The
VYĀKARAṆA-MAHĀBHĀṢYA
of
PATAÑJALI

Edited by

F. KIELHORN, Ph. D.

Late Professor of Oriental Languages, Deccan College, Poona

First Edition, 1885 Second Edition, 1909

Third Edition

revised and furnished with additional readings, references,
and select critical notes

By

MM. **K. V. Abhyankar,** M. A.,

Honorary Professor of Sanskrit, Post-graduate and Research
Department, Bhandarkar Oriental Research Institute, Poona;
Formerly Professor of Sanskrit, Gujarat College, Ahmedabad

VOLUME III
Adhyāyas VI, VII, and VIII

कीर्तिशर्मा
20/-

1972

Printed and published by Dr. R. N. Dandekar, M.A., Ph.D.,
at the Bhandarkar Institute Press, Bhandarkar Oriental
Research Institute, Poona 4

Price Rupees Forty only

श्रीभगवत्पतञ्जलिविरचितं

व्याकरणमहाभाष्यम्

जर्मण्यदेशोद्भवेन पुण्यग्रामस्थशिक्षालये संस्कृतविद्याधिकारिणा

कीलहोर्न्नाम्ना

संशोधितं

प्रथमं संस्करणम् १८८५ द्वितीयं संस्करणम् १९०९

* * *

भाण्डारकर-प्राच्यविद्यासंशोधनमन्दिरे संमाननीय-संस्कृतप्राध्यापकपदे
नियुक्तेन अभ्यंकरोपाह्व-वासुदेवशास्त्रिसुत-काशिनाथेन
संदर्भग्रन्थनिर्दर्शनैः टिप्पणीभिश्च परिष्कृतं

तृतीयं संस्करणम्

तृतीयो भागः

षष्ठाध्यायमारभ्य अष्टमाध्यायान्तः

१९७२

मूल्यं चत्वारिंशत् रूप्यकाः

To

Mahāmahopādhyāya

VASUDEV SHASTRI ABHYANKAR

A TOKEN

OF SINCERE RESPECT

AND

GRATITUDE

K.K. Sharma
1.2.87

PREFACE
TO
THE THIRD EDITION

The present (third) Volume of the *Vyākaraṇa-Mahābhāṣya* completes the publication of the third edition of the work, which was commenced more than ten years ago by the Bhandarkar Oriental Research Institute, Poona. The first and second editions were brought out by Dr. F. KIELHORN himself between 1880–1909. As shown by his remarks in the prefaces to the first and second editions, Dr. KIELHORN took great pains in preparing the text and fixing the Vārttikas. His edition of *VM* is looked upon as a standard one among the various editions available at present, and, hence, in this third edition, the text of the first and second editions is faithfully reproduced (page to page and line to line). This will also facilitate reference to the " Index of Words in the Mahābhāṣya " by Pandits PATHAK and CHITRAV which is based upon Dr. KIELHORN's edition. It may, however, be pointed out that, at a few places, the text of the Vedic passages as given by KIELHORN differs from the text as recited today. The special features of this edition have already been set forth in the prefaces to the first and second Volumes of this third edition.

2. The *Mahābhāṣya* of Patañjali is verily an encyclopaedic work in the field of Sanskrit grammatical literature. Patañjali has subdivided his work into 85 sections which are called *āhnikas*. The number of Pāṇini's Sūtras, on which he has written his gloss, is only 1228 out of 3972. He has commented upon five thousand and odd Vārttikas, and has given about a hundred maxims of interpretation known as Paribhāṣās and well-nigh three hundred illustrative maxims or Laukikanyāyas. The number of topics discussed by him is about one thousand. His long scholarly comments on Sūtras like समर्थः पदविधिः (II. 1. 1.), अर्थवदधातुरप्रत्ययः प्रातिपदिकम् (I. 2. 45), सरूपाणामेकशेष एकविभक्तौ (I. 2. 64), अनेकमन्यपदार्थे: (II. 2. 64), and others are brilliant contributions on the subject of the relation between word and sense. His discussion on general

topics such as *vipratiṣedha* (conflict of Sūtras), *vibhāṣa* (option), *vibhāṣā* (jurisdiction), *sthānivadbhāva* (originalisation), *karmavadbhāva* (treatment like an object), etc. reflects his sharp intellect, and his explanations of such grammatical terms as **धातु, गति, कर्मप्रवचनीय, उदात्तादिस्वर, अङ्गसंज्ञा, आगम** and the like, form independent topics by themselves. The work is flooded with quotations, which fact attests to the wide range of the author's learning. Written in a dignified conversational style, the work fully exemplifies the remark जगत्यनूना भवति हि रुचिरा "perfection is beauty" casually made by him in a different context (VIII. 2. 53).

3. It is rather strange that Dr. Kielhorn has not added any introduction or any indexes to his critically edited text. He has not given even a table of contents. Evidently much of his time was spent on studying the manuscripts and fixing the text. It is, therefore, proposed to issue a separate volume consisting of a brief introduction, a summary of the eighty-five *āhnikas*, and a few indexes.

Ṛṣipañcamī, Śake 1894 }
September 12, 1972 } K. V. Abhyankar

PREFACE
TO
THE FIRST EDITION, Vol. I.

In preparing the present edition of the Vyākaraṇa-Mahābhāṣya I have hitherto used the following manuscripts :—

G. Patañjali's Mahābhāṣya, a MS. dated Saṁvat 1751, by photo-lithography, under the supervision of Prof. T. H. Goldstücker ; London. India Museum, 1874.

D. A MS. belonging to the Deccan College, undated, but apparently written from 100 to 150 years ago. It is incomplete, and portions of it, which have been pointed out in the Various Readings, are very carelessly written.

C. A MS. belonging to the Asiatic Society of Calcutta, collated as far as page 238 of this edition. The portion which I have been able to use bears no date, but the greater part of it was probably written about 80 years ago.

E. A MS. belonging to the Elphinstone College, written about 200 years ago. The leaves 103–156 of the 1st Adhyāya (page 121 l. 10 to page 204 l. 19 of the printed present text) are missing.

g. Patañjali's Mahābhāṣya with Kaiyaṭa's Bhāṣyapradīpa, an undated MS.; as reproduced by photo-lithography under the supervision of Professor T. H. Goldstücker ; London. India Museum, 1874.

B. A MS. belonging to Dr. Bühler, dated Saṁvat 1844.

In addition to these MSS., which are all written in the Devanāgarī character, I have also had the use of a modern Devanāgarī MS. of the Deccan College, and, while carrying my edition through the press, I have been able to compare with the MSS.

above mentioned Śaradā MS. of the Mahābhāṣya brought by Dr. Bühler from Kaśmīr. With the exception of the first leaf, which is missing, this MS. (marked K) contains the text of the first two Adhyāyas complete, but a few leaves are much injured, and the writer has frequently left empty spaces, where the original from which he was copying was probably either damaged or illegible.[1]

Generally speaking, the text of the Mahābhāṣya is the same in all the above MSS., and the differences of reading which occur are not such as to prove the existence of two or more recensions of the work. Though numerous, they rarely affect the meaning of a passage, and they are in the majority of cases accounted for by the carelessness of individual copyists, or the desire of a student to improve on the text which he was studying. There is a marked agreement between the MSS. G. and D on the one hand, and between g and B on the other, and C leans more towards the first group, while the readings of E oftener accord with those of the second. The Kāśmīr MS. generally agrees with g B, but it contains also a few valuable readings which are not found in any of the other MSS.

In settling my text, I have been guided chiefly by the MS. G. which is the best of all the MSS. of the Mahābhāyṣa that have come under my notice, and I have indicated in the various readings all passages where I have departed from it. Of the other MSS. I have generally considered it sufficient to give only the more important readings, but I have throughout noted down anything which appeared to have reference to the text or the constitution of the Vārttikas, and I have also given all various readings in the examples adduced by Patañjali.

In separating the text of the Vārttikas from the bulk of Patañjali's commentary, I have strictly adhered to the principles laid down in my essay on Kātyāyana and Patañjali. I cannot hope that my attempt to reconstruct the work of Kātyāyana has in every particular been successful, and the list of corrections at the end of this volume will show that further consideration has made me change my views in one or two instances. Other cases which as yet appear doubtful I intend to discuss when the whole text of the Mahābhāṣya has been printed, and I hope then also to treat the question of the annotated Kārikās regarding which I cannot bring myself to accept the views expressed by Professor Goldstücker in his 'Pāṇini'.

---

[1] While revising the text for the second edition, I have occasionly compared also the MSS. A. and K., described in the preface of Vol. II; but I have not been able to use these MSS. throughout.

Where a rule of Pāṇini is actually quoted by Patañjali, I have given the reference in the text; where a rule is only alluded to, and where one or more rules are necessary for the formation of a particular form or for the understanding of a passage, the references have been given at the foot of the page. References to the Vārttikas and to Patañjali's commentary are distinguished by an asterisk. In giving all these references I have followed Kaiyaṭa's *Bhāṣyapradīpa* and Nāgojībhaṭṭa's *Bhāṣyapradīpoddyota* wherever they render any assistance; in other cases I have had recourse to Jinendrabuddhi's *Kāśikāvivaraṇapañjikā*, Bhaṭṭojidīkshita's *Śabdakaustubha*, and other grammatical works, or have, though rarely, followed my own judgment. I regret that I have not been able to secure in India a copy of Bhartṛhari's commentary on the Mahābhāṣya, and also that I could study Haradattā's *Padamañjarī* only after the completion of the text of this volume.

The figures for Pāṇini's rules given in the text and in the foot-notes refer to Böhtlingk's edition. It will be apparent even from the present volume of the Mahābhāṣya that the text of Pāṇini's grammar has not been handed down to us altogether in its original shape; at the same time the alterations which it has undergone do not appear to be great, and it seems safest and most convenient to follow the current text until the whole of the Mahābhāṣya has been published and thoroughly examined.

In applying the rules of Sandhi to technical terms I have, I fear, not always been consistent, and especially is this the case as regards the doubling of final ङ्, ण्, and न्, before a vowel. Sanskrit scholars are aware that Prof. Goldstücker ('Pāṇini' page 54, note 53) wished to extend the operation of this rule of euphony to technical terms under all circumstances, and that Prof. Müller (Preface to Ṛgveda IV., pag. lxxiii.) proposed the adoption of a middle course. But when we find that Haradatta in his *Padamañjarī* distinctly tells us that in terms like सनाद्यन्ताः and in rules like इको यणचि, न् and ण् are *not* doubled, that Hemachandra makes the same remark with regard to the term उणादि and that moreover in grammatical Kārikās the final nasal remains single not only in compounds like उणादि (see Mahābhāṣya on P. III. 3. 1) but also in simple terms like सन् (*ibid*. on P. III. 1. 7 and V. 2. 94), we may well venture to omit the doubling uniformly everywhere, and this is the course I intend to adopt in future.

Notwithstanding all the labour which this work has cost me, I am aware that it is not free from defects, and all I can hope is that I may be considered to have somewhat smoothed the way for others, and to have made some advance towards a right understanding of the Mahābhāṣya.

In conclusion, I have to thank Mr. Chatfield, the Director of Public Instruction in this Presidency, for the readiness with which he has undertaken the publication of this work for Government.

F. KIELHORN.

DECCAN COLLEGE, MARCH, 1880.

Note : This preface is given as it is in the second edition of 1892.

PREFACE
TO
THE FIRST EDITION,[1] Vol. II.

For this second volume of the Vyākaraṇa-mahābhāṣya I have used throughout the manuscripts G E g and B, mentioned in the preface to the first volume. The MS. D I have regularly compared only to the end of Adhyāya III; the fifth Adhyāya is missing in this MS., and the fourth so carelessly written that I have consulted it only in very difficult or doubtful passages.

Besides, I have compared the following Devanāgarī MSS. purchased for Government in 1881 :—

A. A carefully made and complete copy of the whole Mahābhāṣya,[2] written for Ananta–sarasvatī by one Jāgeśvara at Vṛiddhanagara (Vaḍnagar) in Saṁvat 1545 and 1546.

---

[1] [A note on the second edition will be published when the printing of volume III is completed. I shall then also give a list of all passages in which the text of the second edition differs from that of the first.]

[2] On the authority of the MS. A, I would now for क्रतेस्तर्कः in vol. I, page 31 l. 16, write क्रतेस्तर्कुः, which is supported by vol. II, p. 87, 16; Nirukta II, I; and Uṇādisūtra I, 17. [This reading has been adopted in the second edition.]

In the peculiarly idiomatic expression of the Mahābhāṣya which commences with यदि पुनः and conveys the meaning 'Suppose we were to read...', 'How would it be if we were to say...?', 'Would there be the same objection if the following course were adopted...?' (Kaiyaṭa on P. IV, I, 90 says : अतोऽयं दोषो न स्यादिति वाक्यशेषः), the verb is by the MSS. more often put in the Present Indicative than in the present Potential of the Passive; i. e., we frequently read यदि पुनः ... उच्यते, यदि पुनः ... क्रियते, and meet only occasionally with यदि पुनः ... उच्येत, यदि पुनः ... क्रियेत etc. The MS. A on the other hand shows a decided preference for the Potential, and I now believe that mood only to be correct (vol. I, p. 66, l.l. 18, 19; p. 94, l. 19; p. 130 l. 6; etc.). It should be observed that, when any form but a 3rd person singular of the Present Passive is used after यदि पुनः, the MSS. agree in putting it in the Potential.

(*Continued on the next page*)

a. A MS. of Adhyāyas III–VIII of the Mahābhāṣya, written by one Nārāyaṇa at Iladurga (Idar) in Saṁvat 1513 and 1514. The appearance of the MS. as well as the fact that it was written by Śrī Nārāyaṇadāsa-vijayarājye render it probable that these figures denote years of the Śaka era.[1] (See Forbes Rāsa–Mālā, 2nd Ed., page 303).

Both these MSS. agree in general more with the MSS. G D than with the group E g B, and in the greater number of instances where G and D happen to differ from one another, A agrees with G, and a with D. For the restitution of the text of the Mahābhāṣya, and particularly for the attempt to separate the Vārttikas[2] from the bulk of Patañjali's work, the MSS. G A a D are decidedly more valuable than the other Devanāgarī MSS.

(*Continued from the previous page*)

See e. g. यदि पुनः … स्यात् vol. II, p. 82, l. 20 ; यदि पुनः … स्युः vol. I, p. 18, l. 12 ; p. 18 l. 16, p. 429, l 4 ; vol. II, p. 408, l. 14 ; and on p. VIII, 3, 29 [vol. III, p. 428, l. 10] ; यदि पुनः …पठ्येरन् on p. VII, 1, 59 [vol. III, p. 262, l. 1]; यदि पुनः … विशेष्येयाताम् vol. II, p. 303, l. 2.

As an instance of another fairly numerous class of cases where we must sometimes disregard the readings of even the best MSS., I may cite किमुच्यते … यावतेदानीमेवोक्तं (vol. I, p. 230, l. 14), 'How can you say … when only now you have been saying … ?' The word here translated by 'when' is in about half the number of cases given by the MSS. as यावता; in the remaining cases the MSS. have यदा or more rarely यद् and यदि. I believe the correct reading to be everywhere यावता, which is used in the same adverbial sense in the Kāśikā-vṛtti on P. I, 4, 84. Haradatta appends to it the note यावताशब्दो निपातो नन्वित्यर्थः । पश्येत्यर्थ इत्यन्ये.

[1 I now believe the above statement to be incorrect. Of the three dates in the MS. which admit of verification one at least is quite correct for the Vikrama era, while none would be correct for the Śaka era.]

[2] On a former occasion I have intimated that Vārttikas disappear from the MSS. chiefly because Patañjali, when about to explain a Vārttika, frequently opens his comment with the very identical words of the Vārttika. A more continuous study of the MSS. has since shown to me that such disappearance takes place by degrees, and that we may observe in the different MSS. four distinct stages by which it is brought about. One writer, to save himself trouble, instead of copying the same

(*Continued on the next page*)

I have also used for this volume the manuscripts written in the Śāradā characters, which were brought by Dr. Bühler from Kaśmīr, and which in his list are numbered 303, 304, and 305. They are denoted in my Various Readings by the letters k and K.

k Dr. Bühler's 304. This MS. consists of altogether 79 leaves, numbered 70–86, 102, and 2–62. Foll. 70–86 give the text of the Mahābhāṣya from vol. I, p. 167 l. 16 to p. 215 l. 1 of my edition; fol. 102 contains vol. I. p. 261 l. 15 ; and foll. 2–62 give the text from vol. I, p. 393 l. 11 to vol. II, p. 53 l. 20. The MS. may be about 150 years old; the leaves numbered 2 and 62 are much torn, and of the leaves 27–61 portions have been eaten away ; besides, on fol. 60 *b* the writing is partly effaced. It is carefully written, but short passages have occasionally been omitted. I have compared this MS. up to the end of the third Āhnika of Adhyāya III, Pāda 1.

K. This MS. contains the text of the Mahābhāṣya up to the beginning of the sixth Adhyāya. It consists of two parts, the first of which may be about 120 and the second from 80 to 100 years old. The first part

---

(*Continued from the previous page*)

words (viz. the text of the Vārttika and so much of the commentary as may be identical with it) twice, writes them only once with the figure 2 after them ; another omits the figure 2 and puts in its place a stop ; a third omits the stop but still leaves the word preceding the stop of his predecessor and the word following it unjoined by the rules of Sandhi ; a fourth does observe the rules of Sandhi, and no trace is left of the Vārttika. This remark may explain why in the Various Readings I have occasionally stated that a Vārttika is omitted in the MSS., but that in the line following it the figure 2 or a stop is put in some MSS. after a particular word, or that the Sandhi-rules have not been observed.

On pages 78, 79 and 486 of vol. I, I have printed certain statements as Vārttikas, but have put them in brackets because they are omitted in the MSS. which at the time were accessible to me. The newly acquired MS. A, though it agrees with the other MSS. in not giving those Vārttikas separately, has in 8 cases out of the 9 a stop before the word प्रयोजनम् in the following; this stop I should now consider a sufficient reason for omitting the brackets from the text [as has been done in the second edition in all cases except one].

(Dr. Bühler's 303) contains the leaves 2–120 and the text from vol. I, p. 1 l. 13 to p. 196 l. 19 of my edition, the second (Dr. Bühler's 305) the leaves 121–154 and the text from vol. I, p. 126 l. 20. Throughout this MS. has been carelessly written, and short passages have frequently been omitted. In the second part the following pages have been left empty: fol. 226 *a* l. 18 to the end of fol. 227 *a*—Ed. I, p. 462 l. 1 to p. 464 l. 26; fol. 246 *a* l. 22 to the end of fol. 247 *a*—Ed. II, p. 16 l. 12 to p. 18 l. 10; fol. 362 *b* to fol. 364 *a*—Ed. II, p. 350 l. 7 to p. 356 l. 7; and on fol. 281 *a* l. 22 the writer has omitted the text from Ed. II, p. 108 l. 5 to p. 111 l. 8, without having left any empty space.

I believe that both these MSS. are copies from one and the same original, and that this original MS., in a fair state of preservation when the older MS. k was being copied from it, had subsequently become much injured and defective. This at least would account on the one hand for the general agreement of k and K, and on the other for the fact that in the same places where k omits short passages, K leaves out longer ones or even whole pages. It is difficult to determine precisely the relation of the Kaśmīr MSS. to Devanāgarī MSS., but in general their text will be found to approach nearest to the text of the MSS. E g B. At the same time I would repeat here that in more cases than one the Kaśmīr MSS. appear to have preserved readings which are preferable to those of all the known Devanāgarī MSS. In vol. I, p. 495 l. 14 the Devanāgarī MSS. read, as I have printed, उक्तमेतत्; I believe that the MSS. k K are correct in reading वक्तव्यमेवैतत्[1] instead, for, the statement सर्वत्रैव पाग्रहणेऽलुग्विकरणस्य ग्रहणम् occurs nowhere else in the Mahābhāṣya.[2] Or, to give a more typical instance, vol. II, p. 120 l. 18 the Devanāgarī MSS., when reading सुप्तमत्तयोरुत्तमः सुप्तमत्तयोरुत्तम इति वक्तव्यम्, would oblige us to take the words

---

[1] [This has been adopted in the second edition.]

[2] I would draw attention to a few other passages in the first volume of the Mahābhāshya where the Kaśmīr MSS. alone seem to have preserved the right readings :—

(*Continued on the next page*)

सुप्तमत्तयोरुत्तमः as a Vārttika ; in my opinion the MS. K is right in omitting one सुप्तमत्तयोरुत्तमः for, the first Vārttika on a rule should be so worded as to contain some distinct reference to that rule,[1]

(*Continued from the previous page*)

Page 181, l. 22 [21], the Devanāgarī MSS. known to me read विंशाति पदानि... त्रिंशत् ... चत्वारिंशत्, which is contrary to the rules of grammar. The MS. k has विंशाति पदानि ... त्रिंशतं ... चत्वारिंशतम् ; but the value of this reading is somewhat lessened by the fact that K agrees with the Devanāgarī MSS.

Page 247, l. 16, I have printed in the text what at the time was considered to be the reading of the Devanāgarī MSS., षोडशपलाश्च माषशंबव्य: ; subsequently I have altered माषशंबव्य: to माषशम्बव्य: because I had found that in the best MSS. of the Mahābhāṣya on P. VI, 1, 28 [vol. III, p. 28, l. 12], the second member of this compound is spelt शम्बटी, and because I had come to regard the word as related to शिम्ब, शिम्बी, etc. The MS. K reads शोडशफलाश्व माषशश्वान्याः and I now believe that in accordance with this reading we must alter the passage still further to षोडशफलाश्च माषशम्बव्य:, and that we have to translate it by 'and the pods of beans contain 16 fruits.' The point of the argument is that the number sixteen is equally associated both with the word माष denoting a particular weight, and with माष in the sense of 'bean.' That the whole passage has given trouble to others before me, may be seen from the mark 卐 placed opposite it in the margin of MS. G. The same sign occurs in G on P. V, 3, 99, and in other difficult passages, and may be compared with the *kuṇḍalas* of which Dr. Bühler is speaking in his Kaśmīr Report, p. 71.

Pages 302 and 303, MS. K. alone appears to give correctly the Vārttikas 30, 33, and 34, as they are quoted by Helārāja in his commentary on the Sādhanasamuddeśa of the Prakīrṇaka. See my Corrigenda in vol. I. [and the second edition]

Page 425, l. 11, the Devanāgarī MSS. read नैषाऽस्तेर्लट्. Considering that लट् is used as a feminine in vol. II, p. 392, l. 14, लृद in vol. II, p. 139, l. 14 and सुप in vol. I, p. 376, l. 18, it appears that the MSS. k K are right in reading नैषास्तेर्लट्.

Besides, I am certain that the MSS. k K are right in omitting what the Devanāgarī MSS. give as Vārt. 20 on P. II, 2, 24, and suspect that the omission by K of Vārt. 8 on P. II, 1, 2 is more than accidental. But of these and other doubtful Vārttikas I hope to treat elsewhere.

[1] As Pāṇini's rules were not numbered, and as Kātyāyana therefore was unable to state in figures to what rule he was appending a remark of his, the principle expressed in the above is so natural and is so generally observed that I regard with great suspicion all cases where seemingly it has not been followed. In about half the number of these suspicious Vārttikas — they do not exceed 20 in the two first volumes of the Mahābhāṣya — the MSS. do not agree with each other,

(*Continued on the next page*)

which would not be the case with सुप्तमत्तयोरुत्तमः, but *is* the case with what I regarded as the only Vārttika on P. III, 2, 115, परोक्षे लिडत्यन्तापह्नवे च. Owing to the general inaccuracy of the MS. K, a various reading or an omission of this kind may in some cases be considered as purely accidental, and it is therefore much to be wished that scholars in India may succeed in securing at least one old really trustworthy MS. written in the Śāradā characters.

As regards commentaries and other works which were likely to throw light on the text of the Mahābhāṣya, I have neglected nothing of what was accessible to me, and I am especially glad that, owing to the kindness of Dr. Rost, I have been able to study for the whole of this volume the *Padamañjarī* of Haradattamiśra. This work, though in the first instance a commentary on the Kāśikā-vṛtti, is of great value also for the understanding of the Mahābhāṣya, because its author discusses,

---

(*Continued from the previous page*)

and in the case of some of them there can be no doubt that the copyists, by repeating certain words which should have been written only once, have given the appearance of a Vārttika to what in reality is a remark of Patañjali's. — Besides, it should be observed that Kātyāyana frequently (in the present volume more than fifty times) commences the first Vārttika on a rule with the very words of that rule, and that negligent writers have occasionlly omitted these introductory words of the Vārttika and with them the reference to Pāṇini's rule in at least some of the MSS. known to us. On P. IV, 3, 87, the words अधिकृत्य कृते ग्रन्थे are omitted from the Vārttika in the MSS. g B (and in the Calcutta Ed. of Pāṇini), on V, 1, 33 the words खार्या ईकन् from the first Vārttika in K (and in the Calcutta Ed.), just because these words are identical with the immediately preceding words of Pāṇini's rules, and what has occurred here in *some* MSS. may have happened in *all* elsewhere.

The Vārttika on the *Yājñavalkāni Brāhmaṇāni* (P. IV, 3, 105), which has often been discussed, induces me to add that the repetition of Pāṇini's rule at the beginning of a Vārttika is sometimes *solely* intended to point out the rule to which the following words of the Vārttika refers. Accordingly the words पुराणप्रोक्तेषु ब्राह्मणकल्पेषु in the Vārt. on IV, 3, 105, are simply equivalent to 'Note on P. IV, 3, 105'; Kātyāyana's note itself is given in the words याज्ञवल्क्यादिभ्यः प्रतिषेधस्तुल्यकालत्वात्, and when Patañjali on P. IV, 2, 66 (page 286, 14) has reason to quote the Vārttika on IV, 3, 105, he quotes only these words and omits the rest. (As to the meaning of the Vārttika, I understand Kātyāyana to say that the Brāhmanas proclaimed by Yājñavalkya, etc., do *not* follow the rule IV, 3, 105, and that it is necessary explicitly to state this because those Brāhmaṇas are not, as Pāṇini assumed, modern works, but are as old as those which Pāṇini had in view when giving his rule.)

often at great length, most of the arguments advanced in the older work. It is a common saying amongst Indian scholars that, so long as one does *not* know the Mahābhāṣya, it is vain to attempt the study of the Padamañjarī, and that, when one does know the Mahābhāṣya, it is useless to do so.[1] Whatever truth there be in this remark, I can say for myself that I have been much assisted by Haradatta's learned work, even though it be based to a great extent on the Mahābhāṣya itself and on Kaiyaṭa's commentary.[2]

Of Bhartṛhari's commentary on the Mahābhāṣya no complete manuscript has yet been discovered, and for a knowledge of that work we therefore can only consult the fragments preserved in the Berlin Library.[3] This is all the more to be regretted as Bhartṛhari holds an important place in Sanskrit grammar, and as, thanks to Professor Max Müller's discoveries, we know now that he lived before the middle of the 7th century A. D. The doubts which have been raised regarding the text of the Mahābhāṣya may justify my attempting to prove here, from the scanty and very imperfect materials at my command, that generally speaking our text at any rate is the same text for which Bhartṛhari composed his commentary, and that his commentary was preceded by other commentaries whose text cannot have materially differed from Bhartṛhari's. To show this I have to enter somewhat into details, and to give something definite, I shall place before the reader those words from the introductory Āhnika of the Mahābhāṣya on which Bhartṛhari has been commenting, exactly as they have been cited by him. The Berlin MS. begins on fol. 3*a* in midst of the commentary on the phrase लौकिकानां वैदिकानां च after that the words quoted and explained by Bhartṛhari are :—

---

[1] [For the exact wording of the maxim see now Colonel Jacob's Laukikanyāyāñjali III, p. 104].

[2] Besides the Padamañjarī Haradatta has composed a work entitled Mahāpadamañjarī, for on P. I, 1, 20 he says—

भाष्यवार्त्तिकविरोधस्तु महापदमञ्जर्यामस्माभिः प्रपञ्चितः.

[3] Bhartṛhari's commentary is called in the Berlin MS. simply भर्तृहरि (or भर्त्तृहर)-टीका, or श्रीमहाभाष्यटीका भर्तृहरिविरचिता, or श्रीमहोपाध्यायभर्तृहरिविरचिता श्रीमहाभाष्यदीपिका. The MS., of which the first two leaves are missing, begins on Ed. I, 1, 3 लौकिकानां वैदिकानां च, and breaks off on fol. 218b in the midst of the commentary on P. I, 1, 55. Besides, the commentary on the following portions of my edition has been omitted: pages 37–43, page 68, 1 l. 2 to 70, l. 3, page 75, l. 5 to p. 79, l. 10, page 80, l. 15 to the end of page 85 and page 122, l. 19 to page 125, l. 15. The MS. has been written by eight different writers, of whom only one, the writer of foll. 3–38, and 84–96, has done his work fairly well.

Ed., page 1, लौकिकास्तावत् । गौरश्वः पुरुषो हस्ती[1] ब्राह्मण (इति)।

अथ गौरित्यत्र कः शब्दः । किं यत्तत्सास्नालाङ्गूलखुरककुदविषाण्यर्थरूपम्[2] । नेत्याह । द्रव्यं नाम तत् । यत्तर्हि तदिङ्गितं चेष्टितं निमिषितम् । नेत्याह । क्रिया नाम सा । यत्तर्हि शुक्लो[3] नीलः । नेत्याह । गुणो नाम सः । यत्तर्हि भिन्नेष्वभिन्नं[4] छिन्नेष्वच्छिन्नं[5] सामान्यभूतम् । नेत्याह । आकृतिर्नाम सा । कस्तर्हि शब्दः । येनोच्चारितेन । अथवा प्रतीतपदार्थकः । शब्दं कुरु मा शब्दं कार्षीः शब्दकार्ययं माणवक इति ध्वनिं कुर्वन्नुच्यते[6] ॥

(महाभाष्यदीपिका B. O. R. I. Ed. pp. 1–4).

कानि[7] पुनरस्य[8] शब्दानुशासनस्य प्रयोजनानि । रक्षोहागमलघ्वसंदेहाः प्रयोजनम् । लोपागमवर्णविकारज्ञो हि सम्यग्वेदाननुपालयिष्यति[9] । ऊहः खल्वपि । आगमः खल्पपि ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयः । ब्राह्मणेन शब्दा[10] ज्ञेयाः । याज्ञिकाः पठन्ति । स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेति ॥

(महाभाष्यदीपिका B. O. R. I. Ed. pp. 5–9).

Page 2, इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि ।

तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः ।
तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै । म्लेच्छा मा भूमेति ॥
दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः ।
यदधीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधः ……… ॥
तस्मादनर्थकं[11] माधिगीष्महि[12] ॥
यस्तु[13] प्रयुङ्क्ते कुशलो विशेषे …… ॥

कः । वाग्योगविदेव । यो हि शब्दाञ्जानाति । भूयांसो ह्यपशब्दा[14] अल्पीयांसः शब्दाः । अज्ञानं तस्य शरणम् । नात्यन्तायाज्ञानं शरणं भवितुमर्हति । एवं तर्हि । क पुनरिदं पठितम् ।

(महाभाष्यदीपिका B. O. R. I. Ed. pp. 9–12).

---

1 Ed. हस्ती शक्रनिर्मृगो ब्राह्मण. 2 Ed. °लाङ्गूलककुदखुरविषाण्य°
3 Ed. यत्तर्हि तच्छुक्लो ; but GD यत्तर्हि शुक्लो.
4 Ed. यत्तर्हि तद्भिन्ने° ; but GDB यत्तर्हि भिन्ने.
5 Ms. भिन्नेश्वभिन्नमिति. 6 Ed. कुर्वन्नेवमुच्यते ; but GD कुर्वन्नुच्यते.
7 Ms. किं. 8 Ed. पुनः
9 Below the Ms. has परिपालयिष्याति like Ed. 10 Ed. ब्राह्मणेनावश्यं शब्दा.
11 Ed. तस्मादविज्ञातार्थमनर्थकं ; but DECgB have तस्मादनर्थकं [so in 2nd Ed.].
12 Ms. °र्थकमधिगीष्मही. 13 Ms. अस्तु. 14 Ed. ऽपशब्दाः

Page 3, आजा नाम श्लोकाः । किं च भोः श्लोका अपि वै[1] प्रमाणम् ।
यदुदुम्बरवर्णानां .... ।
प्रमत्तगीत एष तत्रभवतः ॥
अविद्वांसः प्रत्यभिवादे ...... ॥
प्रयाजाः सविभक्तिकाः ॥
स आर्त्विजीनः ॥
चत्वारि पदजातानि । त्रयः कालाः । द्वौ शब्दात्मानौ नित्यः कार्यश्च ।
सप्त विभक्तयः ।।
नेङ्गयन्ति ॥

(महाभाष्यदीपिका B. O. R. I. Ed. pp. 12–13).

Page 4, पश्यन्नपि न पश्यति । शृण्वन्नपि न शृणोति ॥
सक्तुमिव तितउना .... ।
अत्रा सखायः .... ॥
आहिताग्निरपशब्दं प्रयुज्य ॥
दशम्यां पुत्रस्य नाम[2] विदध्यात् ॥
सुदेवो असि वरुण...... ।

(महाभाष्यदीपिका B. O. R. I. Ed. p. 14).

Page 5, किं पुनरिदं...न पुनरन्यदपि किंचित् । ओमित्युक्त्वा वृत्तान्ततः[3] । पुरा कल्प एतदासीत् । तत्र स्थानकरणानुप्रदानज्ञेभ्यः[4] । तदद्यत्वे न तथा । वेदमधीत्य त्वरिता वक्तारो भवन्ति ।

उक्तः शब्दः । शब्दानुशासनमिदानीं कर्तव्यम् । तत्कथं कर्तव्यम् । उभयोपदेशः । अन्यतरोपदेशेन[5] । तद्यथा । भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते । पञ्च पञ्चनखा भक्ष्या इति । अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः । अभक्ष्यो ग्राम्यकुक्कुटः । किं पुनरत्र ज्यायः । इष्टान्वाख्यानं खल्वपि भवति ।।

अथैतस्मिञ्शब्दोपदेशे सति...प्रतिपदपाठः अनभ्युपायः । एवं हि श्रूयते । बृहस्पतिरिन्द्राय... शब्दानां शब्दपारायणं प्रोवाच । किं पुनरद्यत्वे...चतुर्भिश्च प्रकारैर्विद्योपयुक्तोपयुक्ता[6]

(महाभाष्यदीपिका B. O. R. I. Ed. pp. 14–17).

Page 6, भवत्यागमकालः स्वाध्यायकालः प्रवचनकालः व्यवहारकालः । किंचित्सामान्यविशेषवल्लक्षणं प्रवर्त्यं...अल्पेन यत्नेन महतो महतः शब्दौघान् ॥

किं पुनराकृतिः पदार्थ आहोस्विद्द्रव्यम् । उभयमित्याह । उभयथा ह्याचार्येण ॥

किं पुनर्नित्यः शब्द आहोस्वित्कार्यः । संग्रह एतत्प्राधान्येन परीक्षितं[7] नित्यो वा स्यात्कार्यो वेति । उभयथापि लक्षणं[8] प्रवर्त्यमिति ।। कथं पुनरिदं भगवतः ।

---

[1] Ed. *om*. वै.
[2] Ed. दशम्युत्तरकालं पुत्रस्य जातस्य नाम.
[3] Ms. °मित्युक्त्वा वृत्तांत ; Ed. वृत्तान्तशः
[4] Ed. स्थानकरणनादानुप्रदान° [but altered in 2nd Ed.].
[5] Ms. अन्यतमोपदेशेन.
[6] Ms. चतुर्भिश्च प्रकारैः विंद्योपकल्कोपयुक्ता ; Ed. °र्विद्योपयुक्ता.
[7] Ms. परीक्षते.
[8] Ms. उभयया क्षणं.

सिद्धे शब्दार्थसंबन्धे

अथ सिद्धशब्दस्य कः पदार्थः। नित्यपर्यायवाची सिद्धशब्दः। कथं ज्ञायते यत्कूटस्थेष्वविचालिषु भावेषु वर्तते। सिद्धा द्यौः सिद्धा पृथिवी सिद्धमाकाशमिति। ननु च भोः कार्येष्वपि दृश्यते[1]। संग्रहे[2] कार्यप्रतिद्वन्द्विभावात्। इहापि तदेव। अथवा सन्त्येकपदान्यप्यवधारणानि। सिद्ध एष यो[3] न साध्य इति। अथवा पूर्वोत्तरपदलोपो[4] ऽत्र द्रष्टव्यः। अथवा व्याख्यानतो विशेषप्रतिपत्तिः। मङ्गलार्थम्। माङ्गलिकः॥

(महाभाष्यदीपिका B. O. R. I. Ed. pp. 17–25).

Page 7, महतः शास्त्रौघस्य...प्रथन्ते वीरपुरुषाण्यायुष्मत्पुरुषाणि[5] चाध्येतारश्च सिद्धार्थाः। आभीक्ष्ण्ये। कं पुनः पदार्थं मत्वैष विग्रहः[6] क्रियते सिद्धे शब्देऽर्थे संबन्धे चेति। आकृतिमित्याह। आकृतिर्हि नित्या। अथ द्रव्ये पदार्थे कथं[7] विग्रहः कर्तव्यः। सिद्धे शब्देऽर्थसंबन्धे चेति। नित्यो ह्यर्थवतामर्थैरभिसंबन्धः। द्रव्य एव पदार्थ एष विग्रहो न्याय्यः... द्रव्यं हि नित्यम्। आकृतावपि पदार्थ एष विग्रहो न्याय्यः। न क्वचिदुपरतेति कृत्वातः[8] सर्वत्रोपरता भवति द्रव्यान्तरस्योपलभ्यते[9]। अथवा नेदमेव नित्यलक्षणं ध्रुवं कूटस्थमविचालि। अथवा किं न एतेनेदं नित्यमिदमनित्यमिति। यदस्माकं नित्यं[10] तं पदार्थं मत्वैष विग्रहः क्रियते सिद्धे शब्देऽर्थे संबन्धे चेति॥

कथं पुनर्ज्ञायते[11]। लोकतः। कुरु घटं कार्यमनेन करिष्यामीति।

(महाभाष्यदीपिका B. O. R. I. Ed. pp. 25–29).

Page 8, तावत्येवार्थमर्थमुपादाय[12] शब्दान्॥ यदि तर्हि लोकः शब्देषु[18] प्रमाणम्।

लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः

धर्माय नियमो धर्मनियमः। धर्मार्थो वा नियमो धर्मनियमः। धर्मप्रयोजनो वा।

यथा लौकिकवैदिकेषु॥

प्रियतद्धिता दाक्षिणात्याः। अथवा युक्त एवात्र[14] तद्धितार्थः। कृतान्ताः। लोके तावदभक्ष्यो ग्राम्यकुक्कुटः। शक्यं...क्षुत्। तथा खेदात्। वेदे खल्वपि पयोव्रतो ब्राह्मणः। बैल्वः खादिरो वा यूपः स्यादिति। तथाग्नौ[15] कपालानि एवमिहापि समानायामर्थगतौ[16] शब्देन च अभ्युदयकारि च[17] भवतीति॥

---

1 Ed. वर्तते. 2 Ed. संग्रहे तावत्कार्य°. 3 Ed. *om.* यो.

4 Ed. पूर्वपदलोपो.

5 Ed. वीरपुरुषकाणि च भवन्त्यायुष्मत्पुरुषकाणि.

6 Ms. कः पुनः पदार्थस्यत्वेष परिग्रहः. 7 Ms *om.* कथं. 8 Ed. कृत्वा.

9 Ed. द्रव्यान्तरस्था तूपलभ्यते. 10 Ed. यन्नित्यं. 11 Ms. पूनस्तूयते.

12 Ms. °र्थपादाय 13 Ed लोक एषु. 14 Ed. एव. 15 Ms. यथाग्नौ

16 Ed. °र्थावगतौ [but altered in 2nd Ed.]. 17 Ed. *om.* च.

अस्त्यप्रयुक्तः[1] । ऊषादयः । इदं विप्रतिषिद्धम् । कश्चेदानीमन्यो भवज्जातीयकः । नैतद्विप्रतिषिद्धम् ।

(महाभाष्यदीपिका B. O. R. I. Ed. pp. 29-33).

Page 9, न ब्रूमोऽस्माभिरप्रयुक्ता इति । अभ्यन्तरोऽहं लोके न त्वहं लोकः ॥

अप्रयोगः प्रयोगान्यत्वात्[2] ॥

उषिताः ॥

अप्रयुक्ते दीर्घसत्त्रवत् ॥

सर्वे देशान्तरे ॥

वाकोवाक्यमितिहासः । शवतिर्गतिकर्मा सर्वविभक्त्यन्तः[3]
कम्बोजेष्वेव भाषितो[4] विकार एनमार्या भाषन्ते शव इति ॥

(महाभाष्यदीपिका B. O. R. I. Ed. pp. 33-34).

Page 10, किं पुनः शब्दस्य ज्ञाने धर्म आहोस्वित्प्रयोगे ।

ज्ञाने धर्म इति चेत्तद्वदधर्मः[5] ॥

आचारे नियमः ॥

प्रयोगे सर्वलोकस्य ॥

शास्त्रपूर्वे[6] प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन ॥

योऽग्निष्टोमेन यजते[7] य उ चैनमेवं... । अपर आह । अथवा पुनरस्तु ज्ञान एव ।

(महाभाष्यदीपिका B. O. R. I. Ed. pp. 35-37).

Page 11, शब्दप्रमाणका वयम् । अथवाभ्युपाय एवापशब्दज्ञानं शब्दज्ञानस्य[8] । अथवा कूपखानकवत्[9] । याज्ञे कर्मणि स नियमः । एवं हि श्रूयते । प्रत्यक्षधर्माणः परापरज्ञा विदितवेदितव्याः ॥

अथ व्याकरणमित्यस्य शब्दस्य कः पदार्थः । सूत्रम् ।

षष्ठ्यर्थोऽनुपपन्नः ॥

शब्दाप्रतिपत्तिः ॥

किं तर्हि । व्याख्यानतः । ननु च तदेव सूत्रं विगृहीतं व्याख्यानं[10] भवति । न केवलानि चर्चापदानि ॥

शब्दे ल्युडर्थः ॥

(महाभाष्यदीपिका B. O. R. I. Ed. pp. 37-39).

Page 12, भवे
प्रोक्तादयः ॥

---

[1] Ms. अथ प्रयुक्त. [2] Ms. प्रयोगात्पत्वं. [3] Ed. *om*. सर्वविभक्त्यन्तः.
[4] Ed. भाषितो भवति. [5] Ed. चेत्तथाधर्मः. [6] Ed. °पूर्वके.
[7] Ms. यजति. [8] Ed. शाब्दज्ञाने. [9] Ms. °खनकवत्. [10] Ms. व्याख्या.

पुरस्तादिदम् । तद्यथा । प्रस्कन्दनम् प्रपतनमिति । अथवा शब्दैरपि शब्दा व्याक्रियन्ते । नाश्वो न गर्दभ इति । एवं तर्हि

लक्ष्यलक्षणे ॥

समुदायेषु च[1] शब्दाः प्रवृत्ताः[2] । तैलं भुक्तम् । घृतं भुक्तम् । शुक्लः । व्यपदेशिवद्भावेन भविष्यति । अविजानत एतदेवं[3] भवति । यो ह्युत्सूत्रं कथयेन्नादो गृह्येत[4] ॥

(महाभाष्यदीपिका B. O. R. I. Ed. pp. 39–41).

Page 13, किमर्थो वर्णानामुपदेशः ।

वृत्तिसमवायार्थः उपदेशः ॥

वृत्तये समवायो वृत्तिसमवायः । वृत्त्यर्थो वा समवायः । वृत्तिप्रयोजनो वा । का पुनर्वृत्तिः । शास्त्रप्रवृत्तिः । उच्चारणम् । कुत एतत् । दिशिरुच्चारणक्रियः । उच्चार्य हि[5] वर्णानाहोपदिष्टा मया[6] वर्णा इति ॥

अनुबन्धकरणार्थश्च ॥

समवायश्चानुबन्धकरणं च प्रत्याहारार्थम् । प्रत्याहारो वृत्त्यर्थः ॥
इष्टबुद्ध्यर्थश्च वर्णानामुपदेशः ।
उदात्तादीनामप्युपदेशः कर्तव्यः ।
आकृत्युपदेशात्सिद्धम् ।
संवृतादीनां प्रतिषेधो वक्तव्यः । कलो ध्मात एणीकृतः ।
एताः स्वरदोषभावनाः ।
अतोऽन्ये व्यञ्जनदोषाः । गर्गादिविदादिपाठात्संवृतादीनां निवृत्तिर्भविष्यति[7] ।

(महाभाष्यदीपिका B. O. R. I. Ed. pp. 42–43).

Page 14, अस्त्यन्यद्गर्गादिबिदादिपाठे प्रयोजनम् । एवं तर्ह्यष्टादशधा भिन्नां निवृत्तकलादिकाम् । एवं तर्ह्युभयमनेन क्रियते । कथं पुनरेकेन यत्नेनोभयं लभ्यम् । लभ्यमित्याह । कथम् । द्विगता अपि हेतवो भवन्ति । तथा द्विष्ठान्यपि[8] वाक्यानि । श्वेतः । अथवेदं तावदयं प्रष्टव्यः । धातवोऽपि शुद्धाः पठ्यन्ते । यानि तर्ह्यग्रहणानि । एतेषामप्यवश्यं[9] स्वरवर्णानुपूर्वीज्ञानार्थ उपदेशः कर्तव्यः ॥

(महाभाष्यदीपिका B. O. R. I. Ed. pp. 44–46).

A comparison of the printed text with the above must render it more than probable that our MSS. give the text of the Mahābhāṣya which was current in the seventh century. In saying this, I would however not wish to deny the possibility that some explanatory remarks *may* have found their way into the text after Bhartṛhari's time; and it is certain that some of Bhartṛhari's

---

[1] Ed. *om.* च ; DECgB. हि [added in 2nd Ed.].
[2] Ms. शब्दः प्रवृत्तः. [3] Ms. एतदेव. [4] Ms. कथयत्यदो गृह्यते.
[5] Ms. ते।. [6] Ed. इमे. [7] Ms. °दीनां स्वरानिवृत्ति°.
[8] Ms. निष्ठान्यपि ; Ed. वाक्यान्यपि द्विष्ठानि. [9] Ed. एतेषामपि.

readings are preferable to those of the MSS., and that he knew of readings which have not yet been met with elsewhere. A few instances may prove this.

Page 1, 12, it appears as if Bhartṛhari had not had in his text the words लोके ध्वनिः शब्द इत्युच्यते (। तद्यथा ।), and as if those words had been added to explain the word प्रतीतपदार्थकः. It is unnecessary to define *śabda,* because everybody knows what *śabda* means. (See प्रतीतपदार्थक in vol. I, p. 39 l. 25 ; p. 323 l. 3 ; अनवस्थितपदार्थक in I, p. 207 l. 2, and on P. VIII, 2, 84 [III, p. 417 l. 7]; अव्यक्तपदार्थक in II, p. 47 l. 20 ; p. 170 l. 17 ; निवृत्तपदार्थक in I, p. 411 l. 3 ; see also I, p. 102 l. 6 ; p. 256 l. 20.) '*śabda* conveys that meaning which at once is understood from the word *śabda,*' i. e. it is synonymous with *dhvani*, not with *kriyā*, *dravya*, etc. Bhartṛhari explains : अथवा प्रतीतपदार्थक इति । शब्द इत्येतस्य प्रतीतः पदार्थो ध्वनिः । ध्वनिरस्याभिधेयः । ध्वनावयमर्थप्रकरणशब्दान्तराण्यन्तरेण स्वरुपं प्रतिलभते । एतमेवार्थं [MS. एवमेवार्थं] पदग्रहणेन व्याचष्टे । पदस्यायमर्थो नार्थवाक्यगम्य इति । ... य एव प्रसिद्धः शब्दस्तस्यैव शब्दशब्देन ग्रहणम् । प्रतीतपदार्थकतां च कथयति । शब्दं कुरु

(महाभाष्यदीपिका p. 4, ll. 8–16).

Page 2, 19, Bhartṛhari explains the reading of the MSS. विशेषे, but he adds that others read विशेषैः (अन्येषां ग्रन्थः कुशलो विशेषैरिति । विशेषैः शास्त्रप्रतिपादितैरित्यर्थः)

(महाभाष्यदीपिका p. 11 ll. 7–14).

Page 5, 6, Bhartṛhari reads वृत्तान्ततः, but he also knows the reading वृत्तान्तशः ; his remarks are : वृत्तान्तत [MS. वृत्तांत] इति । वृतान्ताः प्रपाठका उच्यन्ते । तत्राद्यादित्वात्तसिः । वृत्तान्तैः प्रपाठकैः पठन्ति । अन्येषां वृत्तान्तश इति पाठः । त एवं पठन्ति । वृत्तान्तं वृत्तान्तं पठन्तीति वृत्तान्तशः पठन्तीति ।

(महाभाष्यदीपिका p. 14. ll. 23–25).

Page 5, 7, Bhartṛihari's reading स्थानकरणानुप्रदानज्ञेभ्यः is better than the reading of the MSS. स्थानकरणनादानुप्रदानज्ञेभ्यः ।

(महाभाष्यदीपिका p. 15, ll. 2–3).

The expression स्थानकरणानुप्रदानानि occurs again, I, p. 208 l. 18. (See also I, p. 61 l. 17, and Danielsson in Zeitschrift der D. Morg. Ges. XXXVII, page 29, Note 3).

The very incorrect state of the Berlin MS. prevents me from speaking positively about one or two other passages of the first Āhnika where I suspect Bhartṛhari's text to have differed from the current text ; and as regards the subsequent Āhnikas, I for the same reason can do no more than point out those various readings only—of the existence of any important differences I am not aware—which have been given as such by Bhartṛhari himself.[1]

Page 28, 18, Bh. reads, as printed, यद्युक्ता वहन्त्यनुपदिष्टाश्च श्रूयन्ते but haedds : अन्येषां ग्रन्थो यदयुक्ता वहन्त्यनुपदिष्टाः श्रूयन्त इति। तेऽयुक्ता वहन्तीत्यस्यैवार्थमनुपदिष्टाः श्रूयन्त इत्यनेन प्रदर्शयन्ति ॥

(महाभाष्यदीपिका p. 81, ll. 5–15).

(See Kaiyaṭa's note : क्वचित्तु चशब्दो न पठ्यते ॥).

Page 30, 11, Bh. gives two readings, *viz.*, besides the reading स ककारस्य also the reading स सककारस्य

(महाभाष्यदीपिका p. 84, l. 1.).

Page 55, 16, अपर्याप्तश्चैव. Bh. mentions the reading सुपर्याप्तश्चैव. (See Kaiyaṭa's note : केषांचित्पाठः सुपर्याप्तश्चैव हीति)

(महाभाष्यदीपिका p. 125, l. 17).

Page 56, 9, इयन्व्यत्ययेन. Bh. seems to mention two other readings, शव्यत्ययेन, which is mentioned also by Kaiyaṭa and शव्व्यत्ययेन

(महाभाष्यदीपिका p. 127, ll. 10–20).

---

[1] It may be intereresting to observe that the various readings mentioned by Kaiyaṭa up to P. I, 1, 55, where the Berlin Ms. ends, have all been copied either directly or indirecty from Bhartṛhari. The same is the case with Kaiyaṭa's notes on the word संग्रह p. 6, ll. 12 and 21 (Bh. चतुर्दश सहस्राणि वस्तून्यस्मिन्संग्रहग्रन्थे and संग्रहोऽप्यस्यैव शास्त्रस्यैकदेशः। तत्रैकतन्त्रत्वाद्व्याडेश्च प्रामाण्यादिहापि तथैव सिद्धशब्द उपात्तः) ; with the rule quoted on p. 16, l. 16 ग्वृताः संवृता भवन्त्यन्यत्रार्भवसात्रः ; with the remark on p. 22, l. 21 अन्तः पादस्थस्याव्यपरस्यार्धमेकारमर्धमोकारं च विदधति, which according to Bh. is taken from a Prātiśākhya of the Chhandogas ; with the statement on p. 93, l. 3 that *some* (according to Bh. the *Āpiśalāḥ*) have arranged the words of the Gaṇa *sarvādi* in a different order; and with the remark on p. 92, l. 19, that the words contained in the so-called *Ākṛtigaṇas* have been collected by later scholars, not by Pāṇini himself. On the other hand, Kaiyaṭa has *not* taken from Bhartṛhari his quotation from the Phiṭsūtra [21] on p. 91, l. 20 ; his objection, on p. 68, l. 7, to the statement occurring in the Kāśikā-vṛtti on P. I, 1, 11, मणीवादीनां प्रतिषेधो वक्तव्यः [वाक्यपदीयम् is given as an instance in the Kāśikā-vṛtti on P. IV, 3, 88] ; his quotation दश समानाः on p. 24, l. 1 (see Kātantra I, 1, 3) ; nor the remark, on p. 3, I. 1, that the *Bhrājāh ślokāḥ* are by Kātyāyana. Altogether Kaiyaṭa's commentary is much more succinct than Bhartṛhari's, and he has more than once omitted to state all the possible explanations of a particular passage, intimating that he knew more than he is telling us by such phrases as व्याख्यानान्तरमत्र क्लिष्टत्वान्नोक्तम्, अत्र व्याख्यानान्तरं क्लिष्टत्वान्नोपन्यस्तम्, etc.

Page 56, 19, अन्तरषैामिति, Bh. mentions another reading (केषांचिदग्रन्थः) which, so far as I can make out, is अन्तरे येषामिति

(महाभाष्यदीपिका p. 128, l. 21).

Page 60, 6, यमानुस्वाराणामेव. Bh. mentions the reading यमानुस्वाराणामपि

(महाभाष्यदीपिका p. 140, l. 23).

Page 66, 3, उदात्तानुदात्तस्वरितानाम् Bh. appears to mention the reading उदात्तानुदात्तस्वरितानुनासिकानाम्. (See Kaiyaṭa's क्वचिदनुनासिकग्रहणमस्ति । तद्गुणप्रसङ्गेनोच्चारितम्.

(महाभाष्यदीपिका p. 156, ll. 1–3).

Page 67, 23, अत्र हीदादि द्विवचनं तदन्तं च भवति. Bh. knows the two readings अत्रहीदादि च द्विवचनं तदन्तं च भवति, and अत्र हीदाद्यन्तं च श्रूयते द्विवचनान्तं च भवति. (See Kaiyaṭa's note : क्वचित्तु पाठ ईदाद्यन्तं च श्रूयत इति).

(महाभाष्यदीपिका p. 165, ll. 13–14).

Page 72, 10, Bh. mentions the reading किमर्थो योगविभागः । शाकल्यविभाषा मा भूत्.

(महाभाष्यदीपिका p. 176, ll. 7–8).

Page 93, 8, ज्ञातिधनपर्यायवाची According to Bh. others read (अन्येषां ग्रन्थः) अज्ञातिधनपर्यायवाची.

(महाभाष्यदीपिका p. 219, ll. 2-3).

Page 96, 2, त्रयः कृदर्था ग्रहणेन योगाः. Bh. reads त्रयः कृदन्ता ग्रहणेन योगाः and he mentions the reading त्रयः कृदर्थाग्रहणेन योगाः, where कृदर्थाग्रहण is taken as a Bahuvrīhi compound ([कृदर्थमग्रहणं] यस्मिन्हेतौ सकृदर्थाग्रहणः । यस्मिन्हेतावाश्रीयमाणे कृदर्थाग्रहणमारभ्यते । कश्चासौ हेतुः । न सर्वा विभक्तिरिति ...). (महाभाष्यदीपिका p. 230, ll. 8–10).

Page 99, 1, वर्णाश्रयः. According to Bh. some divide अवर्णाश्रयः (See Kaiyaṭa's note : अन्ये त्ववर्णाश्रय इत्यकारप्रश्लेषमाहुः).

(महाभाष्यदीपिका 239, ll. 7-8).

Page 112, 16, तस्यासाध्वभिमतस्य. Bh. appears to mention the reading तत्र साध्वभिमतस्य (साधूनामभिमतस्य).

(महाभाष्यदीपिका p. 273, l. 14).

Page 122, 6, Bh. mentions the two readings क्वचिद्वैरूप्यं and क्वचिद्द्वैरूप्यं.

(महाभाष्यदीपिका p. 298, ll. 18–19).

Page 125, 17, उः स्थानेऽणेव According to Bh. some omit एव. (महाभाष्यदीपिका p. 301, l. 23). (See Kaiyaṭa's note : केषांचित्पाठोऽण्भवति रपरश्चेति).

Page 129, 5, कल्पिपद° According to Bh. some read कल्पपद°. (See Kaiyaṭa's note : क्वचित्तु कल्पपदसंवातभक्त इति पाठः).

Page 130, 4, किमिदमल्ग्रहगन्त्यविशेषणमाहोस्विदादेशविशेषणम् । किं चातः । Bh. mentions the reading किमिदमल्ग्रहणमन्त्यविशेषणम् । एवं भवितुमर्हति ।
(महाभाष्यदीपिका p. 309, ll. 8–9).

The manner in which the meaning of these various readings is discussed by Bhartṛhari shows that he must have had commentaries before him in which they had been adopted; and it is reasonable to suppose that Bh. would not have concealed from us more important discrepancies had he found such in the works of his predecessors. That Bhartṛhari had access to a very extensive commentatorial literature, superseded by his own work as his own writings have in turn been superseded by those of later authors, is proved by almost every page of his commentary. In fact, I know of few grammarians who so frequently quote the opinions of others[1]

---

[1] In addition to commentators Bhartṛhari cites of writers on grammar the following :—

Another grammar or *other* grammars (*vyākaraṇāntara*) are mentioned on p. 144 *a*, 146 *a* and 178 *b* of the Berlin MS. (p. 213, l. 19 p. 215 l. 23) ; other grammarians (*anye vaiyākaraṇāḥ*) on p. 138 *a* [महाभाष्यदीपिका B. O. R. I. (pp. 205–207)] where four different rules are quoted about उभ and उभय. Former grammarians (*pūrvācāryāḥ*) are spoken of several times, and on p. 41b we find the usual statement that the term *sandhyakshara* was invented by them. By name are mentioned the Vṛttikāra *Kuṇi*, to whom is ascribed the explanation of असर्वविभक्ति on p. 95, l 27 of the Mahābhāshya, and the *Āpiśalāḥ* who had arranged the words of the Gaṇa *sarvādi* in a different order; theirs also is the curious opinion (p. 192 a इहास्तेः केचित्सकारमात्रमुपदिश्य पित्स्वडागमं विदधति), referred to already by Patañjali, that the root from which spring the forms अस्ति, स्तः, सन्ति etc., consists of the single letter स् to which अ is prefixed in the so-called strong forms. (See Mahābhāṣya I, p. 280, l. 23, अस्तिं सकारमातिष्ठते. and *Jinendrabuddhi*: सकारमात्रमस्तिधातुमापिशालिः प्रतिजानीते । तथा हि । न तस्य पाणिनेरिवास भुवीति पाठः । किं तर्हि । स भुवीति । स एवागमौ गुणवृद्धी आतिष्ठत इति । एवं प्रतिजानीत इत्यर्थः ।)

As regards works whose contents are more or less closely related to the subject of grammar, it deserves to be noticed that Bhartṛhari's text of the Nirukta appears to have somewhat differed from the published text. Referring to Nir. I, 18, Bhartṛhari says तत्र निरुक्तकारो ऽविज्ञातार्थमिति वर्णयति, but in the printed text the word अविज्ञातम् has not been explained at all. Moreover, on p. 85 a we read : प्रजापतिर्वै

(*Continued on the next page*)

as he does, and nothing is more to be regretted than that he should have introduced those opinions by such vague expressions as *eke varṇayanti, anye varṇayanti, apare varṇayanti, anyeṣām darśanam, apareṣām vyākhyānam,* etc., and should not have recorded the names of the scholars to whom he must have been indebted for his own learning.

There are many passages in the text contained in this volume which have caused me no slight difficulty, and some on which I have not yet been able to form a decisive opinion. Without the different commentaries on the Mahābhāṣya, the Vākyapadīya, the Kāśikāivṛtti, Siddhānta-Kaumudī, etc., each of which has proved useful in turn, my labour would have been much greater than it has been, yet sometimes all have failed me when I should have most prized their assistance. On a passage like **ईदृशौ वध्रौ कुरु । ईदृशौ पुटकौ कुरु ।** on p. 36, l. 9, they say nothing ; on one like **मौर्यैर्हिरण्यार्थिभिरर्चाः प्रकल्पिताः** on p. 429 l. 3, nothing that carries with it conviction. Here then, and wherever else I have been at all doubtful, I have given the text of the best and have recorded

---

(Continued from the previous page)

यत्किंचन मनसादीधेत्तदाधीतं [? MS. °**घेततदधीन**] **यजुर्भिरेवाप्नोति तदाधीतयजुषामाधीतयजुष्ट्वम् एतन्निरुक्तं ध्यायतेर्वर्ण्यते** [MS. °**ते वर्ण्पते**] **। अयं हि तत्र व्याख्यानग्रन्थः । प्रजापतिर्वै यत्किंचन मनसाध्यायत् तदाधीतयजुर्भिरेवाप्नोति** (**महाभाष्यदीपिका** B. O. R. I. Ed. p. 126. l. 14). [? MS. **तादतिराप्तवानिति**] **तथा होत्राय वृतः कृपयन्नदीधेदित्ययमपि ध्या** [**य**] **तेरेव । होत्राय वृतः कृपायमाणो ऽन्वध्यायदिति । ... क्षणः क्षणोतेः प्रक्ष्णुतः कालो भवति क्ष्णौतिः क्षयकर्मेति ।.** The first passage here referred to I do not find in the published text ; the second occurs Nir. II, 12; and the last, but without the word **भवति क्ष्णोतिः क्षयकर्मा**, II, 25. On the other hand, Nir. II, 2 and V, 23 are quoted by Bhartṛhari as printed.

That Bhartṛhari has frequent occasion to quote the works of the three great grammarians need hardly be stated, but it may perhaps be mentioned that Kātyāyana is far more often styled *Vākyakāra* than *Vārttikakāra* and that the Bhāṣyakāra is three times quoted by the title *Chūrṇikāra*. Pāṇini's text is referred to as the *Vṛttisūtra*, an expression used already by Patañjali (Vol. I, p. 371, 18 and p. 424, 21), and opposed to it we find the word *Bhāshyasūtra*, equivalent to Kaiyaṭa's *Vyākhyānasūtra*, a term intended to denote the Vārttikas and generally such additional statements as are meant to elucidate the original text of Pāṇini's grammar. To the *Ślokavārttikakāra*, as distinguished from the *Vākyakāra*, are ascribed the verses in vol. I, p. 36 of this edition, which have been wrongly considered to belong to Kātyāyana.

the readings of all the other MSS. I have done the same with names of peoples and places, such as कडेरः on p. 270 l. 3, निषादकर्षू on p. 294 l. 19, etc., and other terms, such as धीवबन्धू on p. 227 l. 7, which have not yet been met with elsewhere.

I have verified most of Patañjali's quotations from Vedic works, but for some I have had to trust to the MSS. alone, which I fear, have not in every case (as, e. g., on p. 150 l. 18 and 213 l. 12) enabled me to give a satisfactory text. Where the MSS. agree with one another, I have followed them even though the published text of a Vedic work happened to furnish different readings. I have thus, e. g., on p. 278, 10, printed तिल्पिञ्जं दण्डानतम्, and on p. 437 l. 11, नाभा पृथिव्या निहितो दविद्युतत् although I consider the passages to have been taken from Atharva–veda XII, 2, 54, and VII, 62, 1, and have acted similarly in other cases where it would have been easy to substitute the actual readings of the Ṛg–or Atharva–veda, or of the Taittirīya–saṁhitā. I need hardly say that I have prepared a complete list of all the quotations in the Mahābhāshya, which I hope to publish after the completion of the text.

It will be observed that on a few occasions, as on pp. 52 and 283, I have printed certain statements in small type, and have intimated thereby that I do not regard them as Vārttikas of Kātyāyāna, notwithstanding the fact that they have been commented upon by Patañjali. The prominence which I have given to those statements by putting them in each case at the beginning of a new line may attract the student's attention and at the same time convince him that, what I have done, I have done intentionally, and for what I have considered cogent reasons. Taking, e. g., the case on p. 52, it appears to me that the three sentences सिद्धं तु सिचो यादित्वान्, चङ्क्सोः प्रश्लिष्टनिर्देशात्सिद्धम्, चिणोऽनित्त्वात् refute an objection which has not been raised by Kātyāyana at all, and that that objection again is directed against an assumption which is actually opposed to Kātyāyana's teaching on P. III, 1, 43 : moreover, Patañjali's concluding remarks on III, 1, 44 show that the Vārtt. 7 is final and that only when we adopt it can we account for all the Aorist–forms of the verbs enumerated in the Vārttika. We know from the Mahābhāṣya that there have been authors of Vārttikas after Kātyāyana, and in this particular case the context renders it probable that Patañjali has been stating *their* arguments just as we know for certain that, e. g., on p. 209 l. 8, he is quoting a Vārttika of the Saunāgas, without telling us that he is doing so.[1]— If, again, we consider what at first sight might appear to be Vārttikas on P. IV, 2, 60, a word like स्मृतः which is foreign to the real Vārttikas, or a term like ल. which is never used by Kātyāyana, will be sure to rouse our suspicions, and a more careful examination will convince us that what we have before us are not Vārttikas, but fragments or adaptations of verses; and we shall regard it probable that Patañjali is qnoting from that grammatical work composed in verse, of which some parts of his own work may be said to be a prose version. I know that on such and similar questions opinions may differ, and do not regard my undertaking to separate from one another the several constituent parts of the Mahābhāṣya as more than a first attempt, to be improved on by others or by myself in the course of my own studies.

I cannot conclude these remarks without expressing my gratitude to the Director of Public Instruction and to the authorities of the Deccan and Elphinstone Colleges for the great kindness with which they have placed at my disposal the valuable MSS. belonging to the Government of Bombay, even after my departure from India.

F. KIELHORN.

Göttingen, August 1883.

Note : This preface is given as it is in the second edition of 1906.

---

[1] Compare vol. II, p. 105, 8, and p. 238, 11,

PREFACE
TO THE
FIRST AND SECOND EDITIONS, Vol. III

For this last volume of the text of the Vyākaraṇa–Mahābhāṣya I have chiefly used the Devanāgarī MSS. G A a E and B, mentioned in the prefaces of the preceding volumes. I have also compared the MSS. D and g, and, for the Aṅgādhikāra, a modern MS. belonging to myself, but, have generally given the readings of these MSS. only in difficult or doubtful cases. The Kaśmīr MS. K has been of hārdly any use for this volume, because it ends abruptly at line 8 of page 7 of my text. Haradatta's *Padamañjarī* has been consulted to about the end of Adhyāya VII. where the I. O. MS. ends in the midst of the commentary on P. VII. 4, 93.

To the end I have assiduously studied the commentaries of Kaiyaṭa and Nāgojībhaṭṭa, without which my task would indeed have been hopeless; but even their help has not, I fear, always enabled me to give a correct text. There are some passages in this volume (as there are in the preceding ones) which I probably have misunderstood, or where the readings may be faulty in the MSS. known to me; and there are others, where something may have been either omitted or wrongly added in the MSS., or where my arrangement of the text may be liable to objection. Those who take an interest in the study of Indian grammar know, that in years of patient labour I have tried to fit myself for the task which I have undertaken; they will appreciate not only the advantages – always gratefully remembered by me – which I have enjoyed in India, but also the difficulties I have had to contend with, and will, I feel sure, view with some indulgence such defects and short-comings as cannot fail to be discovered in the edition of a work the interpretation of which has tried the strength of India's best scholars. As for myself, I intend, now that the most wearisome part of my work is done, and with such knowledge as I may have acquired during a careful study of the whole Mahābhāṣya, to subject every doubtful passage to a renewed examination, and I hope that by doing this and by the collation of additional MSS. I may succeed in making this edition more perfect than it is at present.*

---

* I take this opportunity of correcting and justifying my readings in three passages which are considered of importance for fixing the date of the composition of the Mahābhāṣya, and which have been the subject of an animated discussion that has lately been going on in India.

In Vol. I, page 177, l. 10 I have printed पुष्पमित्रसभा, and have omitted the word चन्द्रगुप्तसभा which occurs after पुष्पमित्रसभा (for पुष्यमित्रसभा) in the two Kaśmīr MSS. k K. the Devanāgarī MSS. C g B and in another Devanāgarī MS. purchased for Government in 1881–82 and subsequently compared by me. My reason for giving only पुष्पमित्रसभा was, that only this word is given by the MSS. G D (and A), the readings of which are *generally* preferable to those of the other MSS. But in arriving at this decision I lost sight of the fact, that sometimes the rejection of the readings of G A D and the adoption of those of the other MSS. is rendered necessary by reasons which are independent of the value that may be attached to the MSS. on general grounds, and that in this particular instance there are reasons which should have made me follow the MSS. k K C g B. For, on the one hand, it is the universal practice of the author of the Mahābhāṣya to give, where this is possible, at least two examples for each rule ; and, on the other hand, the Kāśikā Vṛtti, which copies most of its examples from the Mahābhāṣya, *does* give the two examples पुष्पमित्रसभा (or K पुष्यमित्रसभा) चन्द्रगुप्तसभा.

In Vol. II., page 119, l. 5 I have printed अरुणद्यवनो मध्यमिकाम् . मध्यमिकाम् is the reading of the MSS. GA a; the MSS. D K E have instead of it मध्यमिकान् ; B, on which generally little reliance can be placed, has माध्यमिकान् , and this would probably have been the reading of g, which here omits about a whole line; the MS. 99 of 1881–82 has मध्यमिकायां, altered to मध्यमिकां. In this case I was right in adopting the reading of the best MSS. G A a, the more so because that reading is supported by a marginal note in G, by the Kaśmīr MS. of the Kāśikā Vṛtti, by the Gaṇaratnamahodadhi, and by Nāgojībhaṭṭa's gloss on P. VI. 3, 37. (See *Indian Antiquary*, VII., page 266.)

In Vol. II., page 429, l. 2 I have printed शिवः स्कन्दः विशाख इति. Here the readings of the MSS. compared by me are as follows :—

G A a E	शिवः स्कन्दो विशाख इति ;
K	शिवः स्कम्दः विशाख इति ;
B	शिं स्कंदो विशाख इति ;
g	स्कंदो विशाख इति.

From this statement it will appear that the first word शिवः is given by the best Devanāgarī MSS. G A a, by the independent Kaśmīr MS. K, and by the Devanāgarī MS. E. It is altogether omitted only in the MS. g, but this omission is of less importance even than it might otherwise be considered to be, because a portion of the word

(*Continued on the next page*)

I reserve for another occasion such remarks as I may have to offer on Kātyāyana's Vārttikas, which it will now be somewhat easier to study as a separate and independent work, on the verses and fragments of verses which occur scattered throughout the Mahābhāṣya, and on Patañjali's own portion of the texts here published; and I intend to print in a separate number various Indices which are in preparation, and which it will be my endeavour to make as complete and useful as possible. Here I would only add a few words on some of the quotations from Vedic works found in the present volume.

As in the preceding volumes, I have here also tried to verify every Vedic quotation, and I have generally succeeded in doing so; sometimes, however, as e. g., on page 213, l. 13 शरावे बप्सति चरुः and page 375, l. 6 and page 379, l. 8 यावदस्त्यत्रैषः सरो जनेभ्यः कृणवत् this has been impossible, and as in these cases the MSS. often greatly differ from one another, the readings given by me may be wrong, and will have to be corrected. In other cases the readings of the MSS. of the Mahābhāṣya, sometimes supported by those of the Kāśikā Vṛtti and by the authority of the commentators, have been retained, even though the published texts of Vedic works happened to suggest slightly different readings. I have thus on page 51, l. 22 printed कुरवोऽपराम्, on page 189, l. 9 किं स्विद्गर्भं on page 208, l. 1, वसपावानः and on page 398, l. 19 and 20 भक्ताय, where it would have been easy to substitute the readings of Atharva–veda XIII. 1, 56 and 57, Ṛgveda X, 82, 5, Vājasaneyi–saṁhitā, VI. 19

(*Continued from the previous page*)

is given by B, and because g and B, the least valuable MSS, are (direct or indirect) copies of one and the same MS., which MS., as is suggested by B., may have contained a portion of the word शिवः. Besides, the reading शिवः is supported by Kaiyaṭa's शिवकान्विक्रीणीते. and by the Kāśikā Vṛtti and Hemachandra's grammar, which both have शिवः before स्कन्दः. In giving (in accordance with K) स्कन्दः for the स्कंदो of the Devanāgarī MSS. I have merely followed the general principle of not observing the rules of Sandhi between different examples for the same rule; and that स्कन्दः and विशाखः are *two* examples for one and the same statement is proved by the compound स्कन्दविशाखौ in Vol. III, page 148, l. 23 and page 370, l. 23, and by the way in which the examples for Pāṇini's rule are given in the Kāśikāvṛtti and by Hemachandra. On these grounds I consider my reading शिवः स्कन्दः विशाख इति to be correct.

and Ṛg-veda I, 187, 7, करवोऽपरम्, कं स्विद्गर्भं, वसापावानः, and भक्षाय. I have similarly retained, e. g., on page 220, l. 17 the reading इमान्यर्यणः पदानि and on page 398, l. 19 the reading वरुणस्य रघुस्यदः, although I suspect that the passages referred to are Atharva-veda X. 4, 7 इमान्यर्वतः पदा and III. 7. 1 हरणस्य रघुष्यदः. In the case of these and similar quotations to which attention has been drawn under the Various Readings, and which will find their places in the index of quotations, the MSS. of the Mahābhāṣya and the commentators may be wrong. But there are other cases where it is certain that the texts known to Patañjali differed from the published texts; instances of this kind occur, e. g., on page 396, ll. 15 and 18, where in the quotations from Atharvaveda XIX, 18, 7 and 5 Patañjali undoubtedly had सप्तर्षिमन्तम् and द्यावापृथिवीमन्तम् for the words सप्त-ऋषिवन्तम् and द्यावापृथिवीवन्तम् of the published text.

The Mahābhāṣya may be said to be composed in the form of a series of dialogues, and there can be no doubt that its meaning is best brought out by oral discussion among scholars versed in the science of grammar. For this reason I have often regretted that I was obliged to prepare the greater portion of the text of this edition far away from those friendly Paṇḍits, to whom I owe a deep debt of gratitude for all they have taught me; but most of all do I regret that I have not been able to discuss my difficulties with that Indian scholar who has contributed more than any other towards a right understanding of the Mahābhāṣya, and to whom I dedicate this volume as a small token of my sincere admiration and friendly regard.

F. KIELHORN.

Göttingen, October 1885.

Note to the Second Edition.

Only pages 1–440 of the text of this edition were seen through the press by the late Dr. Kielhorn; the rest, after his death, by another scholar.

Note : This preface is given as it is in the second edition of 1909.

एकाचो द्वे प्रथमस्य ॥ ६ । १ । १ ॥

एकाच इति किमयं बहुव्रीहिः एकोऽज्यस्मिन्स एकाच् एकाच इति । आहोस्वित्तत्पुरुषोऽयं समानाधिकरणः । एकोच् एकाच् एकाच इति । किं चातः । यदि बहुव्रीहिः सिद्धं पपाच पपाठ । इयाय आरेति न सिध्यति । अथ तत्पुरुषः समानाधिकरणः सिद्धमियाय आरेति । पपाच पपाठेति न सिध्यति ॥ अत उत्तरं पठति ।

एकाचो द्वे प्रथमस्येति बहुव्रीहिनिर्देशः ॥ १ ॥

एकाचो द्वे प्रथमस्येति बहुव्रीहिनिर्देशोऽयम् ॥ एकवर्णेषु कथम् ।

एकवर्णेषु व्यपदेशिवद्वचनात् ॥ २ ॥

व्यपदेशिवदेकस्मिन्कार्यं भवतीति वक्तव्यम् । एवमेकवर्णेषु द्विर्वचनं भविष्यति ॥

एकाचो द्वे भवत इत्युच्यते तत्र न ज्ञायते कस्यैकाचो द्वे भवत इति । वक्ष्यति लिटि धातोरनभ्यासस्य [६.१.८] इति । तेन धातोरेकाच इति विज्ञायते । यदि धातोरेकाचः सिद्धं पपाच पपाठ । जजागार पुपुत्रीयिषतीति न सिध्यति । धातोरिति नैषैकाच्समानाधिकरणा षष्ठी । धातोरेकाच इति । किं तर्हि । अवयवयोगैषा षष्ठी । धातोर्य एकाजवयव इति ॥ अवयवयोगैषा षष्ठी चेत्सिद्धं जजागार पुपुत्रीयिषतीति । पपाच पपाठेति न सिध्यति । एषोऽपि व्यपदेशिवद्भावेन धातोरेकाजवयवो भवति ॥

एकाचो द्वे प्रथमस्येत्युच्यते तेन यत्रैव प्रथमश्चाप्रथमश्चास्ति तत्र द्विर्वचनं स्यात् जजागार पुपुत्रीयिषतीति । पपाच पपाठेत्यत्र न स्यात् ।

प्रथमत्वे च ॥ ३ ॥

प्रथमत्वे च किम् । व्यपदेशिवद्वचनात्सिद्धमित्येव[1] ॥ स तर्हि व्यपदेशिवद्भावो वक्तव्यः । न वक्तव्यः ।

---

[1] तत्र व्यपदेशिवद्वचनम् १. १. २१ वा. २.

L. 7, 8 Ben. एकवर्णेषु च L. 19 Ben. प्रथमत्वे च । किम् ।

उक्तं वा ॥ ४ ॥

किमुक्तम् । तत्र व्यपदेशिवद्वचनमेकाचोद्वेप्रथमार्थं षत्वे चादेशसंप्रत्ययार्थम् । नैष दोषः । अवचनाल्लोकविज्ञानात्सिद्धमित्येव[1] ॥

योगविभागो वा ॥ ५ ॥

अथवा योगविभागः करिष्यते । एकाचो द्वे भवतः । किमर्थो योगविभागः ।

एकाज्मात्रस्य द्विर्वचनार्थः ॥ ६ ॥

एकाज्मात्रस्य द्विर्वचनं यथा स्यात् । इयाय पपाच । ततः प्रथमस्य । प्रथमस्यैकाचो द्वे भवतः । इदमिदानीं किमर्थम् । नियमार्थम् । यत्र प्रथमश्चाप्रथमश्चास्ति तत्र प्रथमस्यैकाचो द्विर्वचनं यथा स्यादप्रथमस्य मा भूदिति जजागार पुपुत्रीयिषतीति ॥

एकाचोऽवयवैकाच्त्वादवयवानां द्विर्वचनप्रसङ्गः ॥ ७ ॥

एकाचोऽवयवैकाच्त्वादवयवानां द्विर्वचनं प्राप्नोति । नेनिजतीत्यत्र निज्शब्दोऽप्येकाजिज्शब्दोऽप्येकाजिकारोऽप्येकाज्निशब्दोऽपि । तत्र निज्शब्दस्य द्विर्वचने रूपं सिद्धं दोषाश्च न सन्ति । इज्शब्दस्य द्विर्वचने रूपं न सिध्यति दोषाश्च न सन्ति । इकारस्य द्विर्वचने रूपं न सिध्यति दोषाश्च सन्ति । निशब्दस्य द्विर्वचने रूपं सिद्धं दोषास्तु सन्ति ॥ तत्र को दोषः ।

तत्र जुस्भाववचनम् ॥ ८ ॥

तत्र जुस्भावो वक्तव्यः । अनेनिजुः पर्यवेविषुः । अभ्यस्ताज्झेर्जुस्भावो भवतीति[2] जुस्भावो न प्राप्नोति जकारेण व्यवधानात् ॥

स्वरश्च ॥ ९ ॥

स्वरश्च न सिध्यति । नेनिजति यत्पर्यवेविषतीति[3]। अभ्यस्तानामादिरुदात्तो भवत्यजादौ लसार्वधातुक इत्येष स्वरो[4] न प्राप्नोति ॥

---

[1] **तत्र व्यपदेशिवद्वचनम्** (वा. २) ॥ तत्र व्यपदेशिवद्भावो वक्तव्यः । ... किं प्रयोजनम् । **एकाचो द्वे प्रथमार्थम्** (वा. ३) ॥ वक्ष्यत्येकाचो द्वे प्रथमस्येति बहुव्रीहिनिर्देश इति । ... **षत्वे चादेशसंप्रत्ययार्थम्** (वा. ४) वक्ष्यत्यादेशप्रत्यययोरित्यवयवषष्ठ्यंवेति । ... स तर्हि व्यपदेशिवद्भावो वक्तव्यः । न वक्तव्यः । **अवचनाल्लोकविज्ञानात्सिद्धम्** । १. २. २१ (वा. ५). [2] सिजभ्यस्तविदिभ्यश्च ३. ४. १०९. [3] निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम् ८. १. ३०. [4] अभ्यस्तानामादिः (६. १. १८९) उदात्तः (१५९) अचि अनिटि (१८८) लसार्वधातुके (१८६).

L, 4 Ben. योगविभागो वैकाज्मात्रस्य द्विर्वचनार्थः । L. 16 Ben. दोषाश्च भवन्ति ।

अद्भावश्च ॥ १० ॥

अद्भावश्च न सिध्यति नेनिजति परिवेविषतीति । अदभ्यस्तात् [७. १. ४] इत्यद्भावो न प्राप्नोति ॥

नुम्प्रतिषेधश्च ॥ ११ ॥

नुम्प्रतिषेधश्च न सिध्यति । नेनिजत् परिवेविषत् । नाभ्यस्ताच्छतुः [७.१.७८] इति नुम्प्रतिषेधो न प्राप्नोति जकारेण व्यवधानात् ॥

शास्त्रहानिश्च ॥ १२ ॥

शास्त्रहानिश्च भवति । समुदायैकाचः शास्त्रं हीयते ॥

सिद्धं तु तत्समुदायैकाच्त्वाच्छास्त्राहानेः ॥ १३ ॥

सिद्धमेतत् । कथम् । तत्समुदायैकाच्त्वात् । किमिदं तत्समुदायैकाच्त्वादिति । तस्य समुदायस्तत्समुदायः । एकाज्भाव एकाच्त्वम् । तत्समुदायस्यैकाच्त्वं तत्समुदायैकाच्त्वम् । तत्समुदायैकाच्त्वात् । तत्समुदायैकाचो द्विर्वचनं भविष्यति । कुत एतत् । शास्त्राहानेः । एवं हि शास्त्रमहीनं भवति ॥ ननु च समुदायैकाचोऽपि द्विर्वचने क्रियमाणेऽवयवैकाचः शास्त्रं हीयते । न हीयते । किं कारणम् । अवयवात्मकत्वात् समुदायस्य । अवयवात्मकः समुदायः । अभ्यन्तरो हि समुदायेऽवयवः । तद्यथा । वृक्षः प्रचलन्सहावयवैः प्रचलति ॥

तत्र बहुव्रीहिनिर्देशेऽनच्कस्य द्विर्वचनमन्यपदार्थत्वात् ॥ १४ ॥

तत्र बहुव्रीहिनिर्देशे ऽनच्कस्य द्विर्वचनं प्राप्नोति । आटतुः आटुः । किं कारणम्। अन्यपदार्थत्वाद्बहुव्रीहेः । अन्यपदार्थे बहुव्रीहिर्वर्तते[1] तेन । यदन्यदचस्तस्य द्विर्वचनं स्यात्। तद्यथा । चित्रगुरानीयतामित्युक्ते यस्य ता गावः सन्ति स आनीयते न गावः ॥

सिद्धं तु तद्गुणसंविज्ञानात्पाणिनेर्यथा लोके ॥ १५ ॥

सिद्धमेतत् । कथम् । तद्गुणसंविज्ञानाद्भगवतः पाणिनेराचार्यस्य यथा लोके । तद्यथा । लोके शुक्लवाससमानय लोहितोष्णीषाः प्रचरन्तीति[2] तद्गुण आनीयते तद्गुणाश्च प्रचरन्ति । एवमिहापि ।

अथ यस्य द्विर्वचनमारभ्यते किं तस्य स्थाने भवत्याहोस्विद्द्विः प्रयोग इति । कश्चात्र विशेषः ।

---

[1] अनेकमन्यपदार्थे । २. २. २४. [2] लोहितोष्णीषाः प्रचरन्ति (षड्विंशब्राह्मण ३. ८. २२).

L. 12 Ben. तत्समुदायैकाच्त्वादिति । L. 13 Ben. तत्समुदायैकाचो द्विर्वचने.

L. 14 Ben. reads अवयवात्मकत्वात्समुदायस्य as a Vārttika. L. 23 Ben. लोहितोष्णीषा ऋत्विजः प्रचरन्तीति.

स्थाने द्विर्वचने णिलोपवचनं समुदायादेशत्वात् ॥ १६ ॥

स्थाने द्विर्वचने णिलोपो वक्तव्यः । आटिटत् आशिशत् । किं कारणम्। समुदायादेशत्वात्। समुदायस्य समुदाय आदेशस्तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययसमुदायस्य नष्टो णिर्भवतीति णेरनिटि [६. ४. ५१] इति णिलोपो न प्राप्नोति ॥ इदमिह संप्रधार्यम् ॥ द्विर्वचनं[1] क्रियतां णिलोप इति किमत्र कर्तव्यम्। परत्वाण्णिलोपः। नित्यं द्विर्वचनम् । कृतेऽपि णिलोपे प्राप्नोत्यकृतेऽपि। द्विर्वचनमप्यनित्यम्। अन्यस्य कृते णिलोपे प्राप्नोत्यन्यस्याकृते शब्दान्तरस्य च प्राप्नुवन् विधिरनित्यो भवति। नित्यमेव द्विर्वचनम्। कथम्। रूपस्य स्थानिवत्त्वात्[2] ॥

यच्च सन्यङन्तस्य द्विर्वचने ॥ १७ ॥

यच्च सन्यङन्तस्य द्विर्वचने चोद्यं तदिहापि चोद्यम्। किं पुनस्तत्। सन्यङन्तस्येति चेदशेः सन्यनिटो दीर्घकुत्वप्रसारणषत्वमधिकस्य द्विर्वचनादाबृग्योश्चाभ्यस्तविधिप्रतिषेधः सङाश्रये च समुदायस्य समुदायादेशत्वाज्झलाश्रये चाव्यपदेश आमिश्रत्वादिति[3] ।

अस्तु तर्हि द्विःप्रयोगो द्विर्वचनम्।

द्विःप्रयोग इति चेण्णकारषकारादेशादेरेत्त्ववचनं लिटि ॥ १८ ॥

द्विःप्रयोग इति चेण्णकारषकारादेशादेरेत्त्वं लिटि वक्तव्यम्। नेमतुः नेमुः। सेहे सेहाते सेहिरे[4]। अनादेशादेरिति प्रतिषेधः प्राप्नोति[5]। स्थाने पुनर्द्विर्वचने सति समुदायस्य समुदाय आदेशस्तत्र संप्रमुग्धत्वात् प्रकृतिप्रत्ययस्य नष्टः स आदेशादिर्भवति ॥ द्विःप्रयोगेऽपि द्विर्वचने सति न दोषः। वक्ष्यति तत्र लिड्ग्रहणस्य प्रयोजनं लिटि य आदेशादिस्तदादेर्नेति[6] ॥

इड्वचनं च यङ्लोपे ॥ १९ ॥

इट् च यङ्लोपे वक्तव्यः। बेभिदिता बेभिदितुम्। एकाच उपदेशेऽनुदात्तात् [७. २. १०] इतीट्प्रतिषेधः प्राप्नोति। स्थाने पुनर्द्विर्वचने सति समुदायस्य समुदाय आदेशस्तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य नष्टः स भवति य एकाजुपदेशेऽनुदात्तः ॥ द्विःप्रयोगेऽपि द्विर्वचने न दोषः। एकाज्ग्रहणेनाङ्गं विशेषयिष्यामः। एकाचोऽङ्गा-

---

[1] चङि ६. १. ११. [2] तत्राभ्यासरूपम् ॥ अज्ग्रहणं तु ज्ञापकं रूपस्थानिवद्भावस्य ॥ १. १. ५९. वा. २, ३. [3] सङाश्रये च समुदायस्य समुदायादेशत्वाज्झलाश्रये चाव्यपदेश आमिश्रत्वात् ॥ ६. १. ९ वा. ७. [4] णो नः। ६. १. ६५; धात्वादे षः सः। ६. १. ६४. [5] अत एकहल्मध्येऽनादेशादेर्लिटि। ६. ४. १२०. [6] प्रथमतृतीयादीनामादेशादित्वादेत्त्वाभावः। ६. ४. १२० वा. ३.

L. 12 Ben. सन्यङाश्रये च समुदाये समुदायादेशत्वात् L. 17 Ben. om. सति.
L. 21 Ben. om. च.

दिति। ननु चैकैकमत्राङ्गम्। समुदाये या वाक्यपरिसमाप्तिस्तयाङ्गसंज्ञा भविष्यति। कुत एतत्। शास्त्राहानेः। एवं हि शास्त्रमहीनं भवति॥

इड्दीर्घप्रतिषेधश्च ॥ २० ॥

इटो दीर्घत्वस्य च प्रतिषेधो वक्तव्यः। जरीगृहिता जरीगृहितुम्। ग्रहोऽलिटि दीर्घः [७. २. ३७] इति दीर्घत्वं प्राप्नोति। स्थाने पुनर्द्विर्वचने समुदायस्य समुदाय आदेशस्तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य नष्टो ग्रहिः ॥ द्विःप्रयोगेऽपि द्विर्वचने न दोषः। ग्रहिणाङ्गं विशेषयिष्यामः। ग्रहेरङ्गादिति। ननु चैकैकमप्यत्राङ्गम्। समुदाये या वाक्यपरिसमाप्तिस्तयाङ्गसंज्ञा भविष्यति। कुत एतत्। शास्त्राहानेः। एवं हि शास्त्रमहीनं भवति॥

पदादिविधिप्रतिषेधश्च ॥ २१ ॥

पदादिलक्षणविधेः प्रतिषेधो वक्तव्यः। सिषेच सुष्वाप। सात्पदाद्योः [८.३.१११] इति षत्वप्रतिषेधः प्राप्नोति। स्थाने पुनर्द्विर्वचने सति न दोषः। समुदायस्य समुदाय आदेशस्तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य नष्टः स पदादिर्भवति॥ द्विःप्रयोगे चापि द्विर्वचने न दोषः। सुप्तिङ्भ्यां पदं विशेषयिष्यामः[1]। यस्मात्सुप्तिङ्विधिस्तदादि सुबन्तं तिङन्तं च। ननु चैकैकस्मात्सुप्तिङ्विधिः। समुदाये या वाक्यपरिसमाप्तिस्तया पदसंज्ञा भविष्यति। कुत एतत्। शास्त्राहानेः। एवं हि शास्त्रमहीनं भवति॥

तावेव सुप्तिङौ यौ ततः परौ सैव च प्रकृतिराद्या।
आदिग्रहणं प्रकृतं[2] समुदायपदत्वमेतेन॥

अजादेर्द्वितीयस्य ॥ ६ । १ । २ ॥

द्वितीयस्येत्यवचनमजादेरिति कर्मधारयात्पञ्चमी ॥ १ ॥

द्वितीयस्येति शक्यमवक्तुम्। कथम्। अजादेरिति नैषा बहुव्रीहेः षष्ठी अजादिर्यस्य सोऽयमजादिः अजादेरिति। किं तर्हि। कर्मधारयात्पञ्चमी। अजादिरजादिः अजादेः परस्येति। तत्रान्तरेण द्वितीयग्रहणं द्वितीयस्यैव भविष्यति[3]॥

---

[1] सुप्तिङन्तं पदम् १. ४. १४. [2] यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्। सुप्तिङन्तं पदम्। १. ४. १३; १४. [3] तस्मादित्युत्तरस्य। १. १. ६७.

L. 5 Ben. द्विर्वचने सति. L. 15 Ben. ननु चैकैकस्मादप्यत्र सुप्तिङ्विधिः ?

द्वितीयद्विर्वचने प्रथमनिवृत्तिः प्राप्तत्वात् ॥ २ ॥

द्वितीयद्विर्वचने प्रथमस्य निवृत्तिर्वक्तव्या अटिटिषति अशिशिषतीति। किं कारणम्। प्राप्तत्वात्। प्राप्नोत्येकाचो द्वे प्रथमस्य [६. १. १] इति॥ ननु च द्वितीयद्विर्वचनं प्रथमद्विर्वचनं बाधिष्यते। कथमन्यस्योच्यमानमन्यस्य बाधकं स्यात्। असति खल्वपि संभवे बाधनं भवत्यस्ति च संभवो यदुभयं स्यात्॥

न वा प्रथमविज्ञाने हि द्वितीयाप्राप्तिरद्वितीयत्वात् ॥ ३ ॥

न वा वक्तव्यम्। किं कारणम्। प्रथमविज्ञाने हि सति द्वितीयस्याप्राप्तिः स्यात्। कि कारणम्। अद्वितीयत्वात्। न हीदानीं प्रथमद्विर्वचने कृते द्वितीयो द्वितीयो भवति। कस्तर्हि। तृतीयः। तद्यथा। द्वयोरासीनयोस्तृतीय उपजायते न द्वितीयो द्वितीयो भवति। कस्तर्हि। तृतीयः॥ न हि किंचिदुच्यते ऽकृते द्विर्वचने यो द्वितीयस्तस्य भवितव्यमिति। किं तर्हि। कृते द्विर्वचने यो द्वितीयस्तस्य द्विर्वचनं भविष्यति॥ अनारम्भसममेवं स्यात्। अटेः प्रथमस्य द्विर्वचनं स्याद्धलादिशेषो[1] द्वितीयस्य द्विर्वचनं हलादिशेषः। त्रयाणामकाराणां पररूपत्वे[2] ऽटिषतीत्येवं रूपं स्यात्॥ नानारम्भसमम्। अटेः प्रथमस्य द्विर्वचनं हलादिशेष इत्त्वं[3] द्वितीयस्य द्विर्वचनं हलादिशेष इत्त्वं द्वयोरिकारयोः[4] सवर्णदीर्घत्वमभ्यासस्यासवर्णे [६. ४. ७८] इतीयङादेश इयटिषतीत्येतद्रूपं यथा स्यादोणेश्चोवोणिषतीति॥ नानिष्टार्था शास्त्रप्रवृत्तिर्भवितुमर्हति॥

यथा वादिविकारेऽलोऽन्त्यविकाराभावः ॥ ४ ॥

यथा वादिविधावलोऽन्त्यविधिर्न भवत्येवं द्वितीयद्विर्वचने प्रथमद्विर्वचनं न भविष्यति[5]॥ विषम उपन्यासः। नाप्राप्तेऽलोऽन्त्यविधावादिविधिरारभ्यते स तस्य बाधको भविष्यति। इदमप्येवंजातीयकम्। नाप्राप्ते प्रथमद्विर्वचने द्वितीयद्विर्वचनमारभ्यते तद्बाधकं भविष्यति॥ यदप्युच्यतेऽसति खल्वपि संभवे बाधनं भवत्यस्ति च संभवो यदुभयं स्यादिति। नैतदस्ति। सत्यपि संभवे बाधनं भवति। तद्यथा। दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति सत्यपि दधिदानस्य संभवे तक्रदानं निवर्तकं भवति। एवमिहापि सत्यपि संभवे प्रथमद्विर्वचनस्य द्वितीयद्विर्वचनं बाधिष्यते॥

---

[1] हलादिः शेषः। ७. ४. ६०. [2] अतो गुणे। ६. १. ९७. [3] सन्यतः। ७. ४. ७९. [4] अकः सवर्णे दीर्घः। ६. १. १०१. [5] अलोन्त्यस्य। आदेः परस्य। १. १. ५२; ५४.

L. 6 Ben. प्रथमस्य विज्ञाने L. 9 Ben. उपजायमाने न. L. 12, 13 Ben. हलादिः शेषः.

तत्र पूर्वस्याचो निवृत्तौ व्यञ्जनस्यानिवृत्तिर्वक्तव्या अटिटिषतीति। यथैवाचो निवृत्तिर्भवत्येवं व्यञ्जनस्यापि प्राप्नोति।

तत्र पूर्वस्याचो निवृत्तौ व्यञ्जनानिवृत्तिरशासनात्पूर्वस्य ॥ ५ ॥

तत्र पूर्वस्याचो निवृत्तौ व्यञ्जनस्यानिवृत्तिः सिद्धा। कुतः। अशासनात्पूर्वस्य। नेह वयं पूर्वस्य प्रतिषेधं शिष्मः। किं तर्हि। द्वितीयस्य द्विर्वचनमारभामहे। व्यञ्जनानि पुनर्नटभार्यावद्भवन्ति। तद्यथा। नटानां स्त्रियो रङ्गं गता यो यः पृच्छति कस्य यूयं कस्य यूयमिति तं तं तव तवेत्याहुः। एवं व्यञ्जनान्यपि यस्य यस्याचः कार्यमुच्यते तं तं भजन्ते ॥

न्द्रादिप्रतिषेधाच्च ॥ ६ ॥

यदयं न न्द्राः संयोगादयः [६. १. ३] इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः पूर्वनिवृत्तौ व्यञ्जनस्यानिवृत्तिरिति ॥

तत्र द्वितीयाभावे प्रथमाद्विर्वचनं प्रतिषिद्धत्वात् ॥ ७ ॥

तत्र द्वितीयस्यैकाचोऽभावे प्रथमस्य द्विर्वचनं न प्राप्नोति। आटतुः आटुः। किं कारणम्। प्रतिषिद्धत्वात्। अजादेर्द्वितीयस्येति प्रतिषेधात् ॥ नैष दोषः। सति तस्मिन्प्रतिषेधः। सति द्वितीयद्विर्वचने प्रथमस्य प्रतिषेधः ॥

सति तस्मिन्प्रतिषेध इति चेद्धलादिशेषे दोषः ॥ ८ ॥

सति तस्मिन्प्रतिषेध इति चेद्धलादिशेषे[1] दोषो भवति। हलादिशेषे सत्याद्ये हल्यनाद्यस्य लोपः स्यात्। इहैव स्यात् पपाचेति। इह न स्यात् आटतुः आटुरिति ॥

लोकवद्धलादिशेषे ॥ ९ ॥

लोकवद्धलादिशेषे सिद्धम्। तद्यथा। लोक ईश्वर आज्ञापयति ग्रामाद्ग्रामान्मनुष्या आनीयन्तां प्रागाऽङ्गं ग्रामेभ्यो ब्राह्मणा आनीयन्तामिति। येषु तत्र ग्रामेषु ब्राह्मणा न सन्ति न तर्हीदानीं ततोऽन्यस्यानयनं भवति। यथा तत्र क्वचिदपि ब्राह्मणस्य

---

[1] हलादिः शेषः। ७. ४. ६०.

Before L. 1 Ben. adds तत्र पूर्वस्याचो...पूर्वस्य as a Vārttika. L. 16, 17, 20, 21 Ben. हलादिः शेषे. L. 18 Ben. पपाच पपाठेति. L. 22 Ben. प्रागगङ्गं.

सत्ताऽब्राह्मणस्य निवर्तिका भवत्येवमिहापि क्वचिदपि हलाद्यः सन्सर्वस्यानाद्यस्य हलो निवर्तको भवति ॥

क्वचिदन्यत्र लोप इति चेद्द्विर्वचनम् ॥ १० ॥

क्वचिदन्यत्र लोप इति चेद्द्विर्वचनमप्येवं प्राप्नोति। क्वचिदपि द्वितीयः सन्सर्वस्य प्रथमस्य निवर्तकः स्यात् ॥ तस्मादस्तु सति तस्मिन् प्रतिषेध इत्येव। ननु चोक्तं सति तस्मिन्प्रतिषेध इति चेद्धलादिशेषे दोष इति। प्रतिविधास्यते हलादिशेषे[1] ॥

न न्द्राः संयोगादयः ॥ ६। १। ३ ॥

किमर्थमिदमुच्यते ॥

न्द्रादेर्द्विर्वचनप्रसङ्गस्तत्र न्द्राणां प्रतिषेधः ॥ १ ॥

न्द्रादेरेकाचो द्विर्वचनं प्राप्नोति तत्र न्द्राणां संयोगादीनां प्रतिषेध उच्यते ॥

ईर्ष्यतेस्तृतीयस्य ॥ २ ॥

ईर्ष्यतेस्तृतीयस्य द्वे भवत इति वक्तव्यम्। केचित्तावदाहुरेकाच इति। ईर्ष्यिषिषति। अपर आह व्यञ्जनस्येति। ईर्ष्यियिषति ॥

कण्ड्वादीनां च ॥ ३ ॥

कण्ड्वादीनां च तृतीयस्य द्वे भवत इति वक्तव्यम्। कण्डूयियिषति असूयियिषति ॥

वा नामधातूनाम् ॥ ४ ॥

वा नामधातूनां तृतीयस्य द्वे भवत इति वक्तव्यम्। अश्वीयियिषति अशिश्वीयिषति ॥

अपर आह। यथेष्टं वा। यथेष्टं वा नामधातूनामिति। पुपुत्रीयिषति पुतित्रीयिषति पुत्रीयियिषति ॥

---

[1] (हलादिः शेषः) उक्तं वा ॥ किमुक्तम्। प्रतिविधास्यते हलादिशेष इति। अयमिदानीं स प्रतिविधानकालः। इदं प्रतिविधीयते। ... आदिः शेषश्च भवत्यभ्यासस्य। ७. ४. ६० वा. ४ महाभाष्य.

L 6, 7 Ben. हलादिः शेषे. L. 12 Ben. ईर्ष्यतेस्तृतीयस्य द्वे भवतः। L. 21 Ben. marks यथेष्टं वा। as a Vārttika before यथेष्टं वा नामधातूनामिति।

पूर्वोऽभ्यासः ॥ ६ । १ । ४ ॥

पूर्वोऽभ्यास इत्युच्यते कस्य पूर्वोऽभ्याससंज्ञो भवति । द्वे[1] इति वर्तते । द्वयोरिति वक्तव्यम् ॥ स तर्हि तथा निर्देशः कर्तव्यः । न कर्तव्यः । अर्थाद्विभक्तिविपरिणामो भविष्यति । तद्यथा । उच्चानि देवदत्तस्य गृहाणि आमन्त्रयस्वैनम् । देवदत्तमिति गम्यते । देवदत्तस्य गावोऽश्वा हिरण्यम् । आढ्यो वैधवेयः । देवदत्त इति गम्यते । पुरस्तात्षष्ठीनिर्दिष्टं सदर्थात्प्रथमानिर्दिष्टं द्वितीयानिर्दिष्टं च भवति । एवमिहापि पुरस्तात्प्रथमानिर्दिष्टं सदर्थात्षष्ठीनिर्दिष्टं भविष्यति ॥

उभे अभ्यस्तम् ॥ ६ । १ । ५ ॥

अभ्यस्तसंज्ञायां सहवचनम् ॥ १ ॥

अभ्यस्तसंज्ञायां सहग्रहणं कर्तव्यम् । उभे अभ्यस्तं सहेति वक्तव्यम् ॥ किं प्रयोजनम् ।

आद्युदात्तत्वे पृथगप्रसङ्गार्थम् ॥ २ ॥

आद्युदात्तत्वं[2] सहभूतयोर्यथा स्यादेकैकस्य मा भूदिति ॥ यस्मिन्नेवाभ्यस्तकार्ये ऽदोषस्तदेव पठितम् । अनुदात्तं पदमेकवर्जम् [६.१.१५८] इति । नास्ति यौगपद्येन संभवः । पर्यायस्तर्हि प्रसज्येत । पर्यायश्च पूर्वस्य तावत्परेण रूपेण व्यवहितत्वान्न भविष्यति । परस्य तर्हि स्यात् । तत्राचार्यप्रवृत्तिर्ज्ञापयति न परस्य भवतीति यदयं बिभेत्यादीनां पिति प्रत्ययात्पूर्वमुदात्तं भवतीत्याह[3] । एवं व्यवधानान्न पूर्वस्य ज्ञापकान्न परस्योच्यते चेदमभ्यस्थानामादिरुदात्तो भवतीति तत्र स एव दोषः पर्यायः प्रसज्येत । तस्मात्सहग्रहणं कर्तव्यम् ॥

न कर्तव्यम् । उभेग्रहणं क्रियते तत्सहार्थं विज्ञास्यते । अस्त्यन्यदुभेग्रहणस्य प्रयोजनम् । किम् । उभेग्रहणं संज्ञिनिर्देशार्थम् । अन्तरेणाप्युभेग्रहणं प्रकृतः संज्ञिनिर्देशः । कथम् । द्वे[1] इति वर्तते ॥ इदं तर्हि प्रयोजनं यत्रोभे शब्दरूपे श्रूयेते तत्राभ्यस्तसंज्ञा यथा स्यात् । इह मा भूत् । ईर्त्सन्ति ईप्सन्ति । ईर्त्सन् ईप्सन् । ऐर्त्सन् ऐप्सन् । किं च स्यात् । अद्भावो नुम्प्रतिषेधो जुस्भाव इत्येते विधयः[4] प्रसज्येरन् ॥ अद्भावे

---

[1] एकाचो द्वे प्रथमस्य ६. १. १. [2] अभ्यस्तानामादिः ६. १. १८९. [3] भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति ६ १. १९२. [4] अदभ्यस्तात्; नाभ्यस्ताच्छतुः, सिजभ्यस्तविदिभ्यश्च ७. १. ४, ७८; ३. ४. १०९.

L. 5. Ben. हिरण्यं च आढ्यो. L. 10 Ben. वक्तव्यम् for कर्तव्यम् L. 14 Ben. तदेवं

तावन्न दोषः । सप्तमे योगविभागः करिष्यते । इदमस्त्यदभ्यस्यात् [७. १. ४] इति । तत आत्मनेपदेषु । आत्मनेपदेषु[1] चाद्भवति । अनत इत्युभयोः शेषः ॥ यदप्युच्यते नुम्प्रतिषेध इत्येकादेशे कृते[2] व्यपवर्गाभावान्न भविष्यति ॥ इदमिह संप्रधार्यम् । नुम्प्रतिषेधः क्रियतामेकादेश इति किमत्र कर्तव्यम् । परत्वान्नुम्प्रतिषेधः । नित्य एकादेशः । कृतेऽपि नुम्प्रतिषेधे प्राप्नोत्यकृतेऽपि । एकादेशोऽप्यनित्यः । अन्यस्य कृते नुम्प्रतिषेधे प्राप्नोत्यन्यस्याकृते । शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति । अन्तरङ्गस्तर्ह्येकादेशः । कान्तरङ्गता । वर्णावाश्रित्यैकादेशो विधिविषये नुम्प्रतिषेधो विधिश्च नुमः सर्वनामस्थाने[3] प्राक्तु सर्वनामस्थानोत्पत्तेरेकादेशः । तत्र नित्यत्वाच्चान्तरङ्गत्वाच्चैकादेश एकादेशे कृते व्यपवर्गाभावान्न भविष्यति ॥ यदप्युच्यते जुस्भाव इत्येकादेशे कृते व्यपवर्गाभावान्न भविष्यति । एकादेश इत्युच्यते केन चात्रैकादेशः । अन्तिना[4] । नात्रान्तिभावः प्राप्नोति । किं कारणम् । जुस्भावेन बाध्यते । नात्र जुस्भावः प्राप्नोति । किं कारणम् । शपा व्यवहितत्वात् । एकादेशे कृते नास्ति व्यवधानम् । एकादेशः पूर्वविधौ स्थानिवद्भवतीति व्यवधानमेव ॥ किं पुनः कारणं निमित्तवानन्तिरेकादेशं तावत्प्रतीक्षते न पुनस्तावत्येव निमित्तमस्तीत्यन्तिभावेन भवितव्यम् । इहापि तर्हि तावत्येव निमित्तमस्तीत्यन्तिभावः स्यात् । अनेनिजुः अवेविषुः । अस्तु । अन्तिभावे कृते स्थानिवद्भावाज्झिग्रहणेन ग्रहणाज्जुस्भावो भविष्यति ॥ अथवा यद्यपि निमित्तवानन्तिरयं तस्य जुस्भावोऽपवादो न चापवादविषय उत्सर्गोऽभिनिविशते । पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः । प्रकल्प्य वापवादविषयं तत उत्सर्गोऽभिनिविशते । न तावदत्र कदाचिदप्यन्तिभावो भवति । अपवादं जुस्भावं प्रतीक्षते ॥ न खल्वपि क्वचिदभ्यस्तानां झेश्चानन्तर्यम् । सर्वत्र विकरणैर्व्यवधानम् । तेनानेनावश्यं विकरणनाशः प्रतीक्ष्यः क्वचिल्लुका क्वचिच्श्लुना क्वचिदेकादेशेन । स यथैव श्लुलुकौ प्रतीक्षते एवमेकादेशमपि प्रतीक्षते ॥ एवं तर्हीदमिह व्यपदेश्यं सदाचार्यो न व्यपदिशति । किम् । स्थानिवद्भावम् । स्थानिवद्भावाद्व्यवधानं व्यवधानान्न भविष्यति । पूर्वविधौ स्थानिवद्भावो न चायं पूर्वस्य विधिः । पूर्वस्मादपि विधिः पूर्वविधिः ॥ तदेतदसति प्रयोजन उभग्रहणं सहार्थं विज्ञास्यते ॥

कथं कृत्वैकैकस्याभ्यस्तसंज्ञा प्राप्नोति । प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति । तद्यथा । प्रत्येकं वृद्धिगुणसंज्ञे भवतः[5] । ननु चायमप्यस्ति दृष्टान्तः समुदाये वाक्यपरिसमाप्तिरिति । तद्यथा । गर्गाः शतं दण्ड्यन्तामिति । अर्थिनश्च राजानो हिरण्येन

---

[1] आत्मनपदेष्वनतः ७. १. ५ [2] कर्तरि शप्; अतो गुणे. ३ १. ६८; ६. १. ९७

[3] उगिदचां सर्वनामस्थानेऽधातोः ७.१.७०. [4] झोन्तः ७.१.३. [5] वृद्धिरादैच्; अदेङ् गुणः १.१.१;२.

L. 16 Ben. पर्यवेविषुः. L. 19 Ben. उत्सर्गः प्रवर्तते. L. 21 Ben. तेनावश्यं. L. 22 Ben. प्रतीक्षते तथैवैकादेशमपि ॥ L. 26 Ben. कथं चैकैकस्याप्यभ्यस्तसंज्ञा.

भवन्ति न च प्रत्येकं दण्डयन्ति । सत्येतस्मिन्दृष्टान्ते तत्र यदि प्रत्येकमित्युच्यत इहापि सहग्रहणं कर्तव्यम् । अथ तत्रान्तरेण प्रत्येकमिति वचनं प्रत्येकं गुणवृद्धिसंज्ञे भवत इहापि नार्थः सहग्रहणेन ॥

जक्षित्यादयः षट् । ६ । १ । ६ ॥

जक्षित्यादिषु सप्तग्रहणं वेवीत्यर्थम् ॥ १ ॥

जक्षित्यादिषु सप्तग्रहणं कर्तव्यम् । सप्त जक्षित्यादयोऽभ्यस्तसंज्ञका भवन्तीति वक्तव्यम् । किं प्रयोजनम् । वेवीत्यर्थम् । वेवीतेरभ्यस्तसंज्ञा यथा स्यात् । वेव्यते[1] ॥

अपरिगणनं वाऽऽगणान्तत्वात् ॥ २ ॥

न वार्थः परिगणनेन । अस्त्वागणान्तमभ्यस्तसंज्ञा ॥ इहापि तर्हि प्राप्नोति । आङः शासु । अस्तु । अभ्यस्तकार्याणि कस्मान्न भवन्ति । भूयिष्ठानि परस्मैपदेष्वात्मनेपदी चायम् । स्वरस्तर्हि प्राप्नोति । यत्राप्यस्यात्मनेपदेष्वभ्यस्तकार्यं स्वरस्तत्राप्यनुदात्तेतः परं लसार्वधातुकमनुदात्तं भवतीत्यनुदात्तत्वे कृते[2] नास्ति विशेषो धातुस्वरेणोदात्तत्वे सत्यभ्यस्तस्वरेण वा[3] ॥ षसिवशी छान्दसौ । दृष्टानुविधिश्छन्दसि भवति ॥ चर्करीतमभ्यस्तमेव ॥ ह्नुङस्तर्हि प्राप्नोति । अस्तु । अभ्यस्तकार्याणि कस्मान्न भवन्ति । भूयिष्ठानि परस्मैपदेष्वात्मनेपदी चायम् । स्वरस्तर्हि प्राप्नोति । अह्न्विङोरिति[2] प्रतिषेधविधानसामर्थ्यात्स्वरो न भविष्यति ॥

अथवा सप्तैवेमे धातवः पठ्यन्ते । जक्षभ्यस्तसंज्ञो भवति । इत्यादयश्च षट् । जक्षित्यादयः षडिति ॥

तुजादीनां दीर्घोऽभ्यासस्य ॥ ६ । १ । ७ ॥

तुजादिषु च्छन्दःप्रत्ययग्रहणम् ॥ १ ॥

तुजादिषु च्छन्दःप्रत्ययग्रहणं कर्तव्यम् । छन्दसि तुजादीनां दीर्घो भवतीति वक्तव्यम् । अस्मिंश्चास्मिंश्च प्रत्यय इति वक्तव्यम् । इह मा भूत् । तुतोज शबलान्हरीन् ॥

---

[1] अभ्यस्तानामादिः ६. १. १८९. [2] तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः ६. १. १८६. [3] धातोः ; अभ्यस्तानामादिः. ६. १ १६२.; ६. १. १८९.

L. 12 Ben. यच्चाप्यस्यात्मनेपदेषु... L. 13. Ben. तत्राप्यस्यानुदात्तेतः L. 14 Ben. दृष्टानुविधिश्च च्छन्दसि. L. 23 after वक्तव्यम् Ben. reads प्रत्ययग्रहणं च कर्तव्यम् ।

अनारम्भो वापरिगणितत्वात् ॥ २ ॥

अनारम्भो वा पुनश्छन्दसि दीर्घत्वस्य न्याय्यः । कुतः । अपरिगणितत्वात् । न हि च्छन्दसि दीर्घस्य परिगणनं कर्तुं शक्यम् । किं कारणम् ।

अन्येषां च दर्शनात् ॥ ३ ॥

येषामपि दीर्घत्वं नारभ्यते तेषामपि च्छन्दसि दीर्घत्वं दृश्यते । तद्यथा । पूरुषः नारक इति ॥

अनेकान्तत्वाच्च ॥ ४ ॥

येषां चाप्यारभ्यते तेषामप्यनेकान्तः । यस्मिन्नेव च प्रत्यये दीर्घत्वं दृश्यते तस्मिन्नेव च न दृश्यते । मामहान उक्थपात्रम् । ममहान इति च ॥

लिटि धातोरनभ्यासस्य ॥ ६ । १ । ८ ॥

धातोरिति किमर्थम् । ईहांचक्रे । नैतदस्ति । लिटीत्युच्यते न चात्र लिटं पश्यामः । प्रत्ययलक्षणेन[1] । न लुमता तस्मिन्निति[2] प्रत्ययलक्षणस्य प्रतिषेधः । इदं तर्हि ससृवांसो विश्शृण्विरे[3] ॥

लिटि द्विर्वचने जागर्तेर्वावचनम् ॥ १ ॥

लिटि द्विर्वचने जागर्तेर्वेति वक्तव्यम् । यो जागार तमृचः कामयन्ते । यो जजागार तमृचः कामयन्ते ॥

अनभ्यासस्येति किम् । कृष्णो नोनाव वृषभो यदीदम् । नोनूयतेर्नोनाव ॥

अभ्यासप्रतिषेधानर्थक्यं च च्छन्दसि वावचनात् ॥ २ ॥

अभ्यासप्रतिषेधश्चानर्थकः । किं कारणम् । छन्दसि वावचनात् । अवश्यं छन्दसि वा द्वे भवत इति वक्तव्यम् । किं प्रयोजनम् ।

---

[1] आमः ; प्रत्ययलोपे प्रत्ययलक्षणम्. २. ४. ८१ ; १. १. ६२. [2] न लुमता तस्मिन् १. १. ६३. वा. १२ महाभाष्य. [3] छन्दस्युभयथा; श्रुवः शृ च. ३. ४. ११७ ; ३. १. ७४.

L. 12 Ben. प्रत्ययलक्षणप्रतिषेधः ।

प्रयोजनमादित्यान्याचिषामहे ॥ ३ ॥

यियाचिषामह इति प्राप्ते । देवता नो दाति प्रियाणि । ददाति प्रियाणि । मघवा दातु । मघवा ददातु । स न स्तुतो वीरवद्धातु । वीरवद्दधातु । यावतेदानीं छन्दसि वा द्वे भवत इत्युच्यते । धातुग्रहणेनापि नार्थः । कस्मान्न भवति ससृवांसो विशृण्विर इति । छन्दसि वावचनात् ॥ तदेतद्धातुग्रहणं सांन्यासिकं तिष्ठतु तावत् ॥

सन्यङोः ॥ ६ । १ । ९ ॥

किमियं षष्ठ्याहोस्वित्सप्तमी । कुतः संदेहः । समानो निर्देशः । किं चातः । यदि षष्ठी सन्यङ्न्तस्य द्विर्वचनेन भवितव्यम् । अथ सप्तमी सन्यङो परतः पूर्वस्य द्विर्वचनम् ॥ कश्चात्र विशेषः ।

सन्यङोः परत इति चेदिटो द्विर्वचनं परादित्वात् ॥ १ ॥

सन्यङोः परत इति चेदिटो द्विर्वचनं कर्तव्यम् । अटिटिषति अशिशिषति । किं पुनः कारणं न सिध्यति । परादित्वात् । इट् परादिः ॥

हन्तेश्चेटः ॥ २ ॥

हन्तेश्चेटो[1] द्विर्वचनं कर्तव्यम् । जेघ्नीयते ॥ ननु च यस्यापि सन्यङन्तस्य द्विर्वचनं तस्यापि स्थानिवद्भावप्रसङ्गः[2] । ईटि स्थानिवद्भावादीटो द्विर्वचनं न प्राप्नोति । नैष दोषः । द्विर्वचननिमित्ते ऽचि स्थानिवदित्युच्यते[3] न चासौ द्विर्वचननिमित्तम् । यस्मिन्नपि द्विर्वचनं यस्यापि द्विवर्चनं सर्वोऽसौ द्विर्वचननिमित्तम् ॥ तस्मादीटो द्विर्वचनम् । तस्मादुभाभ्यामेवेटो द्विर्वचनं कर्तव्यं यश्चोभयोर्दोषो न तमेकश्चोद्यो भवति ॥

एकाच उपदेशे ऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्सन इट्प्रतिषेधः ॥ ३ ॥

एकाच उपदेशे ऽनुदात्तात् [७. २. १०] इत्युपदेशवचनमनुदात्तविशेषणं चेत्सन इट्प्रतिषेधो वक्तव्यः । बिभित्सति चिच्छित्सति । द्विर्वचने कृत उपदेशेऽनुदात्तादेकाचः श्रूयमाणादितीट्प्रतिषेधो न प्राप्नोति ॥

---

[1] यङ्प्रकरणे हन्तेर्हिंसायामीट् ७. ४. ३० वा. १. [2] गमहनजनखनघसां लोपः क्ङित्यनङि ६. ४ ९८. [3] द्विर्वचनेचि १. १. ५९.

L. 9 Ben. पूर्वस्य द्विर्वचनेन भवितव्यम्.

अस्तु तर्हि सन्यङन्तस्य ।

सन्यङन्तस्येति चेदशेः सन्यनिटः ॥ ४ ॥

सन्यङन्तस्येति चेदशेः सन्यनिटो द्विर्वचनं वक्तव्यम् । इयक्षमाणा भृगुभिः सजोषाः ॥ यस्यापि सन्यङोः परतो द्विर्वचनं तेनाप्यत्रावश्यमिडभावे यत्नः कर्तव्यः । किं कारणम् । अशेर्हि प्रतिपदमिड्विधीयते स्मिपूङ्रञ्ज्वशां सनि [७. २. ७४] इति । तेनैव द्वितीयद्विर्वचनमपि न भविष्यति ॥ अथवा नैतदशे रूपम् । यजेरेष च्छान्दसो वर्णलोपः । तद्यथा । तुभ्येदमग्ने । तुभ्यमिदमग्न इति प्राप्ते । अम्बानां चरुम् । नाम्बानां चरुमिति प्राप्ते । आव्याधिनीरुगणाः सुगणा इति प्राप्ते । इष्कर्तारमध्वरस्य । निष्कर्तारमध्वरस्येति प्राप्ते । शिवा उद्रस्य भेषजी । शिवा रुद्रस्य भेषजीति प्राप्ते ॥ अश्यर्थो वै गम्यते । कः पुनरशेरर्थः । अश्नोतिर्व्याप्तिकर्मा । यजिरप्यश्यर्थे वर्तते । कथं पुनरन्यो नामान्यस्यार्थे वर्तते । बह्वर्था अपि धातवो भवन्तीति । तद्यथा । वपिः प्रकिरणे दृष्टश्छेदने चापि वर्तते । केशान्वपतीति । ईडिः स्तुतिचोदनायाच्ञासु दृष्ट ईरणे चापि वर्तते । अग्निर्वा इतो वृष्टिमीट्टे मरुतोऽमुतश्च्यावयन्ति । करोतिरयमभूतप्रादुर्भावे दृष्टो निर्मलीकरणे चापि वर्तते । पृष्ठं कुरु । पादौ कुरु । उन्मृदानेति गम्यते । निक्षेपणे चापि दृश्यते । कटे कुरु । घटे कुरु । अश्मानमितः कुरु । स्थापयेति गम्यते ॥ एवं तर्हि

दीर्घकुत्वप्रसारणषत्वमधिकस्य द्विर्वचनात् ॥ ५ ॥

दीर्घत्वं द्विर्वचनाधिकस्य न सिध्यति । चिचीषति तुष्टूषति । समुदायस्य समुदाय आदेशस्तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य नष्टः सन्भवति । तत्राजन्तानां सनीति[१] दीर्घत्वं न प्राप्नोति ॥ इदमिह संप्रधार्यम् । दीर्घत्वं क्रियतां द्विर्वचनमिति किमत्र कर्तव्यम् । परत्वाद्दीर्घत्वम् । नित्यं द्विर्वचनम् । कृतेऽपि दीर्घत्वे प्राप्नोत्यकृतेऽपि प्राप्नोति । दीर्घत्वमपि नित्यम् । कृतेऽपि द्विर्वचने प्राप्नोत्यकृतेऽपि प्राप्नोति । अनित्यं दीर्घत्वं न हि कृते द्विर्वचने प्राप्नोति । किं कारणम् । समुदायस्य समुदाय आदेशस्तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्याजन्तता नास्तीति दीर्घत्वं न प्राप्नोति । द्विर्वचनमप्यनित्यम् । अन्यस्य कृते दीर्घत्वे प्राप्नोत्यन्यस्याकृते शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति । उभयोरनित्ययोः परत्वाद्दीर्घत्वम् ॥ यत्तर्हि नाकृते द्विर्वचने दीर्घत्वं तत्र सिध्यति । जुहूषतीति[२] ॥ कुत्वं द्विर्वचनाधिकस्य न सिध्यति । जिघांसति जङ्घन्यते । किं कारणम् । समुदायस्य समुदाय आदेशस्तत्र संप्रमुग्ध-

---

[१] अज्झनगमां सनि. । ६. ४. १६. [२] अभ्यस्तस्य च ६. १. ३३.

L. 4 Ben सजोषा । L. 7 Ben. आम्बानां चरुम् । L. 10 Ben. कः पुनरश्नोत्यर्थः । L. 10 Ben. एवं तर्हि यजिरपि.

त्वात्प्रकृतिप्रत्ययस्य नष्टो हन्तिर्भवति । तत्राभ्यासाद्धन्तिहकारस्येति[1] कुत्वं न प्राप्नोति ॥ संप्रसारणं च द्विर्वचनाधिकस्य न सिध्यति । जुहूषति जोहूयते । समुदायस्य समुदाय आदेशस्तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य नष्टो ह्वयतिर्भवति । तत्र ह्वः संप्रसारणमभ्यस्तस्येति[2] संप्रसारणं न प्राप्नोति ॥ नैष दोषः । वक्ष्यति ह्येतद्ध्वोऽभ्यस्तनिमित्तस्येति[3] । यावता चेदानीं ह्वोऽभ्यरतनिमित्तस्येत्युच्यते सोऽप्यदोषो भवति यदुक्तं यत्तर्हि नाकृते द्विर्वचने दीर्घत्वं तन्न सिध्यतीति ॥ षत्वं च द्विर्वचनाधिकस्य न सिध्यति । पिपक्षति यियक्षति । समुदायस्य समुदाय आदेशस्तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य नष्टः सन्भवति । तत्रेण्कुभ्यामुत्तरस्य प्रत्ययसकारस्येति[4] षत्वं न प्राप्नोति ॥ इदमिह संप्रधार्यम् । द्विर्वचनं क्रियतां षत्वमिति किमत्र कर्तव्यम् । परत्वात्षत्वम् । पूर्वत्रासिद्धे षत्वं सिद्धासिद्धयोश्च नास्ति संप्रधारणा ॥

आबृध्योश्चाभ्यस्ताविधिप्रतिषेधः ॥ ६ ॥

आबृध्योश्चाभ्यस्ताश्रयो विधिः प्राप्नोति स प्रतिषेध्यः । ईप्सन्ति ईर्त्सन्ति । ईप्सन् ईर्त्सन् । ऐप्सन् ऐर्त्सन् । किं च स्यात् । अद्भावो नुम्प्रतिषेधो जुस्भाव इत्येते विधयः प्रसज्येरन् ॥ नैष दोषः । उक्ता अत्र परिहाराः[5] ॥

सङाश्रये च समुदायस्य समुदायादेशत्वाज्झलाश्रये चाव्यपदेश आमिश्रत्वात् ॥ ७ ॥

सङाश्रये च कार्ये समुदायस्य समुदायादेशत्वाज्झलाश्रये चाव्यपदेशः । किं कारणम् । आमिश्रत्वात् । आमिश्रीभूतमिवेदं भवति । तद्यथा । क्षीरोदके संपृक्ते । आमिश्रत्वान्न ज्ञायते कियत्क्षीरं कियदुदकमिति कस्मिन्वावकाशे क्षीरं कस्मिन्नवकाश उदकमिति । एवमिहाप्यामिश्रत्वान्न ज्ञायते का प्रकृतिः कः प्रत्ययः कस्मिन्वावकाशे प्रकृतिः कस्मिन्नवकाशे प्रत्यय इति । तत्र को दोषः । सङि[6] झलीति कुत्वादीनि[7] न सिध्यन्ति ॥ इदमिह संप्रधार्यम् । द्विर्वचनं क्रियतां कुत्वादीनीति किमत्र कर्तव्यम् । परत्वात्कुत्वादीनि । पूर्वत्रासिद्धे कुत्वादीनि सिद्धासिद्धयोश्च नास्ति संप्रधारणा ॥ एवं तर्हि पूर्वत्रासिद्धीयमद्विर्वचन इति वक्तव्यम् । तच्चावश्यं वक्तव्यम् । विभाषिताः प्रयोजयन्ति । द्रोग्धा द्रोग्धा । द्रोढा द्रोढा[8] ॥

---

[1] अभ्यासाच्च । ७. ३. ५५ [2] अभ्यस्तस्य च ६. १. ३३. [3] अभ्यस्तनिमित्त इति वक्तव्यम् । किं प्रयोजनम् । अनभ्यस्तप्रसारणार्थम् । ६. १. ३२-३३ वा. ३. [4] आदेशप्रत्यययोः ८. ३. ५९. [5] अद्भावे तावन्न दोषः । सप्तमे योयविभागः करिष्यते । ... उभेग्रहणं सहार्थं विज्ञास्यते । ६. १. ५. भाष्य पृ. १०. [6] सङि लत्वसलोपसंयोगादिलोपकुत्वदीर्घत्वादीनि । (गुप्तिज्किद्भ्यः सन्—तितिक्षिसिप् ... महिङ्). ८. २. २२ वा. १ (३. १. ५—३. ४. ७८). [7] चोः कुः । ८. २. ३०. [8] वा द्रुहमुहष्णुहष्णिहाम् । नित्यवीप्सयोः. ८. २. ३३; ८. १. ४.

L. 3 Ben. ह्वोऽभ्यस्तस्येति.

यावता चेदानीं पूर्वत्रासिद्धीयमद्विर्वचन इत्युच्यते सोऽप्यदोषो भवति यदुक्तं षत्वं न सिध्यतीति ॥

इह स्थाने द्विर्वचने णिलोपोऽपरिहृतः[१] सन्यङोः परतो द्विर्वचन इटो द्विर्वचनं वक्तव्यम्। सन्यङन्तस्य द्विर्वचने हन्तेः कुत्वमपरिहृतम्। तत्र सन्यङन्तस्य द्विर्वचनं द्विःप्रयोगश्चेत्येष पक्षो निर्दोषः । तत्रेदमपरिहृतं सन इट्प्रतिषेध इति। एतस्यापि सप्तमे परिहारं वक्ष्यत्युभयविशेषणत्वात्सिद्धमिति[२] । कथं जेघ्नीयते । वक्ष्यत्येतद्यङ्प्रकरणे हन्तेर्हिंसायां घ्नीति[3] ॥*

दाश्वान्साह्वान्मीढ्वांश्च ॥ ६ । १ । १२ ॥

दाश्वानिति किं निपात्यते।

दाशेर्वसौ द्वित्वेट्प्रतिषेधौ ॥ १ ॥

दाशेर्वसौ द्वित्वेट्प्रतिषेधौ निपात्येते। दाश्वांसो दाशुषः सुतम् । दाश्वान् ॥

साह्वानिति किं निपात्यते ।

सहेर्दीर्घत्वं च ॥ २ ॥

किं च । द्वित्वेट्प्रतिषेधौ च । साह्वान्बलाहकः । साह्वान् ॥

मीढ्वानिति किं निपात्यते ।

मिहेर्ढत्वं च ॥ ३ ॥

यच्च पूर्वयोः । किं च पूर्वयोः द्वित्वेट्प्रतिषेधौ दीर्घत्वं च । मीढ्वस्तोकाय तनयाय मृड । यथेयमिन्द्र मीढ्वः ॥ मह्यर्थो वै गम्यते । कः पुनर्मह्यर्थः । महतिर्दानकर्मा । अतः किम्। इत्वमपि निपात्यम् ।

मह्यर्थ इति चेन्मिहेस्तदर्थत्वात्सिद्धम् ॥ ४ ॥

मह्यर्थ इति चेन्मिहिरपि मह्यर्थे वर्तते। कथं पुनरन्यो नामान्यस्यार्थे वर्तते । बह्वर्था अपि धातवो भवन्तीति । अस्ति पुनरन्यत्रापि क्वचिन्मिहिर्मह्यर्थे वर्तते । अस्तीत्याह । मिहेर्मेघः । मेघश्च कस्माद्भवति । अपो ददातीति ॥

---

* [V. M. om. श्लौ (१०), चङि (११)].

[१] स्थाने द्विर्वचने णिलोपवचनं ६. १. १. वा. १६. [२] उभयविशेषणत्वात्सिद्धम्। ७. २. १०.

[३] एवं तर्हि यङ्प्रकरणे हन्तेर्हिंसायां घ्नी ७. ४. ३० महाभाष्य पृ. ३४९ प. १६–१७.

L. 17 Before यच्च पूर्वयोः Ben adds किं च। L. 18 Ben. महिर्दानकर्मा।

द्विर्वचनप्रकरणे कृञादीनां के ॥ ५ ॥

द्विर्वचनप्रकरणे कृञादीनां क उपसंख्यानं कर्तव्यम् । चक्रम् चिक्लिदम् चक्नसमिति ॥ कादिष्विति वक्तव्यम् । इहापि यथा स्यात् । बभ्रुः ययुरिति ॥

चरिचलिपतिवदीनामच्याक् चाभ्यासस्य ॥ ६ ॥

चरिचलिपतिवदीनामचि द्वे भवत इति वक्तव्यम् । आक् चाभ्यासस्य । चराचरः चलाचलः पतापतः वदावदः ॥

हन्तेर्घश्च ॥ ७ ॥

हन्तेर्घश्च वक्तव्यः । अचि द्वे भवत आक् चाभ्यासस्य । घनाघनः ॥

पाटेर्णिलुक् च दीर्घश्चाभ्यासस्योक्च ॥ ८ ॥

पाटयतेर्णिलुक् च वक्तव्यः । अचि द्वे भवत इति वक्तव्यं दीर्घश्चाभ्यासस्य ऊक्चागमः । पाटूपटः ॥

द्विर्वचनं यणयवायावादेशाल्लोपोपधालोपणिलोपकिकिनोरुत्त्वेभ्यः ॥ ९ ॥

यणयवायावादेशाल्लोपोपधालोपकिकिनोरुत्त्वेभ्यो[1] द्विर्वचनं भवति विप्रतिषेधेन ॥ द्विर्वचनस्यावकाशः । बिभिदतुः बिभिदुः । यणादेशस्यावकाशः । दध्यत्र मध्वत्र । इहोभयं प्राप्नोति । चक्रतुः चक्रुरिति ॥ अयवायावादेशानामवकाशः । चयनम् चायकः । लवनम् लावकः । द्विर्वचनस्य स एव । इहोभयं प्राप्नोति । चिचाय चिचयिथ । लुलाव लुलविथ ॥ आल्लोपस्यावकाशः । गोदः कम्बलदः[2] । द्विर्वचनस्य स एव । इहोभयं प्राप्नोति । ययतुः ययुः । तस्थतुः तस्थुः ॥ उपधालोपस्यावकाशः । श्लेष्मघ्नं[3] मधु । पित्तघ्नं घृतम् । द्विर्वचनस्य स एव । इहोभयं प्राप्नोति । जग्मतुः जग्मुः । जघ्नतुः जघ्नुः ॥ णिलोपस्यावकाशः । कारणा हारणा । द्विर्वचनस्य स एव । इहोभयं प्राप्नोति । आटिटत् आशिशत् ॥ उत्त्वस्यावकाशः । निपूर्ताः पिण्डाः । द्विर्वचनस्य स एव । इहोभयं प्राप्नोति । मित्रावरुणौ ततुरिः । दूरे ह्यध्वा जगुरिः ॥ द्विर्वचनं भवति पूर्वविप्रतिषेधेन ॥ स

---

[1] इको यणचि; एचोऽयवायावः; आतो लोप इटि च; गमहनजनखनघसां लोपः क्ङित्यनङि; णेरनिटि; उदोष्ठ्यपूर्वस्य; बहुलं छन्दसि; (आदृगमहनजनः किकिनौ लिट् च ।) ६. १. ७७; ७८; ६. ४. ६४; ९८; ५१; ७. १. १०२; १०३ (३. २. १७१). [2] आतोनुपसर्गे कः । ३. २. ३. [3] अमनुष्यकर्तृके च ३. २. ५३.

L. 2 Ben. के उपसंख्यानं L. 13 Ben. भवति (पूर्व-) विप्रतिषेधेन.

तर्हि पूर्वविप्रतिषेधो वक्तव्यः । न वक्तव्यः । इष्टवाची परशब्दः[1] । विप्रतिषेधे परं यदिष्टं तद्भवतीति ॥

द्विर्वचनात्प्रसारणात्त्वधात्वादिविकाररीत्वेत्त्वोत्त्वगुणवृद्धिविधयः ॥ १० ॥

द्विर्वचनात्प्रसारणात्त्वधात्वादिविकाररीत्वेत्त्वोत्त्वगुणवृद्धिविधयो भवन्ति विप्रतिषेधेन ॥ द्विर्वचनस्यावकाशः । बिभिदतुः बिभिदुः । संप्रसारणस्यावकाशः । इष्टम् सुप्तम् । इहोभयं प्राप्नोति । ईजतुः ईजुरिति । नैतदस्ति प्रयोजनम् । अस्त्वत्र द्विर्वचनं द्विर्वचने कृते परस्य कितीति[2] भविष्यति पूर्वस्य लिट्यभ्यासस्योभयेषाम् [६. १. १७] इति । इदं तर्हि । सोषुप्यते[3] । इदं चाप्युदाहरणम् ईजतुः ईजुरिति । ननु चोक्तमस्त्वत्र द्विर्वचंनं द्विर्वचने कृते परस्य रूपस्य कितीति भविष्यति पूर्वस्य लिट्यभ्यासस्योभयेषामिति । न सिध्यति । न संप्रसारणे संप्रसारणम् [३७] इति प्रतिषेधः प्राप्नोति । अकारेण व्यवहितत्वान्न भविष्यति । एकादेशे कृते नास्ति व्यवधानम् । एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यवधानमेव । एवं तर्हि समानाङ्गग्रहणं[4] तत्र चोदयिष्यति ॥ आत्त्वस्यावकाशः[5] । ग्लाता म्लाता । द्विर्वचनस्य स एव । इहोभयं प्राप्नोति । जग्ले मम्ले ॥ धात्वादिविकाराणामवकाशः[6] । नमति सिञ्चति । द्विर्वचनस्य स एव । इहोभयं प्राप्नोति । ननाम सिषेच सस्नौ ॥ रीत्वस्यावकाशः[7] । मात्रीयति पित्रीयति । द्विर्वचनस्य स एव । इहोभयं प्राप्नोति । चेक्रीयते जेह्रीयते ॥ ईत्त्वस्यावकाशः[8] । पीयते गीयते । द्विर्वचनस्य स एव । इहोभयं प्राप्नोति । पेपीयते जेगीयते ॥ इत्त्वोत्त्वयोरवकाशः[9] । आस्तीर्णम् निपूर्ताः । द्विर्वचनस्य स एव । इहोभयं प्राप्नोति । आतेस्तीर्यते निपोपूर्यते ॥ गुणवृद्ध्योरवकाशः[10] । चेता गौः[11] । द्विर्वचनस्य स एव । इहोभयं प्राप्नोति । चिचाय चिचयिथ । लुलाव लुलविथ । नैतदस्ति प्रयोजनम् । अस्त्वत्र द्विर्वचनं द्विर्वचने कृते परस्य रूपस्य गुणवृद्धी भविष्यतः । इदं तर्हि । इयाय इययिथ । ननु चात्राप्यस्तु द्विर्वचनं द्विर्वचने कृते परस्य रूपस्य गुणवृद्धी भविष्यतः । न सिध्यति । अन्तरङ्गत्वात्सवर्णदीर्घत्वं प्राप्नोति । वार्णादाङ्गं बलीय इति गुणवृद्धी भविष्यतः । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । आचार्यप्रवृत्तिर्ज्ञापयति वार्णादाङ्गं बलीयो भवतीति यदयमभ्यासस्यासवर्णे [६. ४. ७८] इत्य-

---

[1] विप्रतिषेधे परं कार्यम् १. ४. २. [2] वचिस्वपियजादीनां किति ६. १. १५. [3] स्वपिस्यमिव्येञां यङि ६. १. १९. [4] समानाङ्गग्रहणं च ६. १ ३७ वा. २. [5] आदेच उपदेशेऽशिति ६. १. ४५. [6] धात्वादेः षः सः; णो नः ६ १. ६४; ६५. [7] रीङृतः ७. ४. २७. [8] घुमास्थागापाजहातिसां हलि ६.४.६६. [9] ॠत इद्धातोः; उदोष्ठ्यपूर्वस्य ७.१.१००; १०२. [10] सार्वधातुकार्धधातुकयोः; अचो ञ्णिति ७.३.८४; ७.२.११५. [11] गोतो णित् ७.१.९०.

सवर्णग्रहणं करोति । कथं कृत्वा ज्ञापकम् । न ह्यन्तरेण गुणवृद्धी असवर्णपरोऽभ्यासो भवति ॥ नैतदस्ति ज्ञापकम् । अर्त्यर्थमेतत्स्यात् । इयृतः इयृथः । यत्तर्हि दीर्घ इणः किति [७. ४. ६९] इति दीर्घत्वं शास्ति । एतस्याप्यस्ति वचने प्रयोजनम् । किम् । सवर्णदीर्घबाधनार्थमेतत्स्यात् । स यथैव तर्हि सवर्णदीर्घत्वं बाधत एवं यणादेशमपि बाधेत । एवं तर्हि यणादेशे[1] योगविभागः करिष्यते । इदमस्ति इणो यण्भवति[2] तत एरनेकाचः । एश्चानेकाच इणो यण्भवति । ततोऽसंयोगपूर्वस्य । एरनेकाच इत्येव ॥ असवर्णग्रहणमेव तर्हि ज्ञापकम् । ननु चोक्तमर्त्यर्थमेतत्स्यादिति । नैकमुदाहरणमसवर्णग्रहणं प्रयोजयति ॥ एवमपि स्थानिवद्भावादियङ् प्राप्नोति । अथ सत्यपि विप्रतिषेधे यावता स्थानिवद्भावः कथमेवैतत्सिध्यति । योऽनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भाव आदिष्टाच्चैषोऽचः पूर्वो भवति ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम् ॥

---

[1] एरनेकाचोऽसंयोगपूर्वस्य । ६. ४. ८२. [2] इणो यण् ६. ४. ८१.

L. 2. Ben. इयर्ति इयृतः इयृथः । उवोण उवोणिथ । L. 9. Ben. कथमिवैतत्सिध्यति, कस्मादेवात्र न भवति । L. 10 Ben. पूर्व इति ।

ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे ॥ ६ । १ । १३ ॥

ष्यङः संप्रसारणे पुत्रपत्योस्तदादावतिप्रसङ्गः ॥ १ ॥

ष्यङः संप्रसारणे पुत्रपत्योस्तदादावतिप्रसङ्गो भवति । पुत्रपत्यादौ संप्रसारणं प्राप्नोति । कारीषगन्ध्यापुत्रकुलम् कारीषगन्ध्यापतिकुलम् ॥ वर्णग्रहणात्सिद्धम् । वर्णग्रहण एतद्भवति यस्मिन्विधिस्तदादाविति[1] न चेदं वर्णग्रहणम् ॥

वर्णग्रहण इति चेत्तदन्तप्रतिषेधः ॥ २ ॥

वर्णग्रहण इति चेत्तदन्तस्य प्रतिषेधो वक्तव्यः । पुत्रपत्यन्ते संप्रसारणं प्राप्नोति । कारीषगन्ध्यापरमपुत्रः कारीषगन्ध्यापरमपतिः । कौमुदगन्ध्यापरमपुत्रः कौमुदगन्ध्यापरमपतिः । किं कारणम् । यत्र हि तदादिविधिर्नास्ति तदन्तविधिना तत्र भवितव्यम् ॥

सिद्धं तूत्तरपदवचनात् ॥ ३ ॥

सिद्धमेतत् । कथम् । उत्तरपदवचनात् । पुत्रपत्योरुत्तरपदयोरिति वक्तव्यम् ॥

तत्तर्हि वक्तव्यम् । न वक्तव्यम् । पूर्वपदमुत्तरपदमिति संबन्धिशब्दावेतौ । सति पूर्वपद उत्तरपदं भवति सति चोत्तरपदे पूर्वपदमिति न चात्र पुत्रपती उत्तरपदे ॥ इहापि तर्हि न प्राप्नोति कारीषगन्धीपुत्रः । कारीषगन्धीपतिरिति । किं कारणम् । पूर्वपदमित्युच्यते न ह्यत्र ष्यङ् पूर्वपदमस्ति । ष्यङन्तमेतत्पूर्वपदम् । कथम् । प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीति ॥ यदि प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीत्युच्यते परमकारीषगन्धीपुत्रः परमकारीषगन्धीपतिरिति न सिध्यति । प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवत्यस्त्रीप्रत्ययेनेति ॥ यद्यस्त्रीप्रत्ययेनेत्युच्यते अतिक्रान्तः कारीषगन्ध्यामतिकारीषगन्ध्यः तस्य पुत्रोऽतिकारीषगन्ध्यपुत्रः अतिकारीषगन्ध्यपतिरित्यत्रापि प्राप्नोति । अस्त्रीप्रत्ययेनानुपसर्जनेन । यो ह्युपसर्जनं स्त्रीप्रत्ययो भवत्येषा तत्र परिभाषा प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीति ॥

ष्यङन्ते यावन्तो यणस्तेषां सर्वेषां संप्रसारणं प्राप्नोति । वाराहीपुत्रः तार्णकर्णीपुत्रः । तत्राप्रत्ययस्थस्य प्रतिषेधो वक्तव्यः ।

यथागृहीतस्यादेशवचनादप्रत्ययस्थे सिद्धम् ॥ ४ ॥

निर्दिश्यमानस्यादेशा भवन्तीत्येवमप्रत्ययस्थस्य न भविष्यति ॥

---

[1] यस्मिन्विधिस्तदादावल्ग्रहणे १. १. ७२ वा. २९.

अनन्त्यविकारेऽन्त्यसदेशस्य वा ॥ ५ ॥

अथवानन्त्यविकारेऽन्त्यसदेशस्य कार्यं भवतीत्येषा परिभाषा कर्तव्या ॥ कः पुनरत्र विशेष एषा वा परिभाषा क्रियेताप्रत्ययस्थस्य वा प्रतिषेध उच्येत । अवश्यमेषा परिभाषा कर्तव्या । बहून्येतस्याः परिभाषायाः प्रयोजनानि । कानि ।

प्रयोजनं न संप्रसारणे संप्रसारणम् ॥ ६ ॥

न संप्रसारणे संप्रसारणम् [६. १. ३७] इत्येतन्न वक्तव्यं भवति । कथं व्यधेर्विद्ध इति । अनन्त्यविकारेऽन्त्यसदेशस्य कार्यं भवतीति न दोषो भवति ॥ नैतदस्ति प्रयोजनम् । क्रियते न्यास एव ॥

सान्तमहतो दीर्घत्वे ॥ ७ ॥

सान्तमहतो दीर्घत्वे प्रयोजनम्[1] । पयांसि यशांसि । प इत्यस्यापि प्राप्नोति । अनन्त्यविकारेऽन्त्यसदेशस्य कार्यं भवतीति न दोषो भवति ॥ एतदपि नास्ति प्रयोजनम् । नोपधायाः [६. ४. ७] इति तत्र वर्तते ॥ एवमप्यनांसि मनांसीत्यत्रापि प्राप्नोति । नैष दोषः । सान्तसंयोगेन नोपधां विशेषयिष्यामः । सान्तसंयोगस्य नोपधाया इति ॥ एवमपि हंसशिरांसि ध्वंसशिरांसीत्यत्रापि प्राप्नोति । नैष दोषः । हम्मतेर्हंसः । कः पुनराह हम्मतेर्हंस इति । किं तर्हि । हन्तेर्हंसः । हन्त्यध्वानमिति ॥ एवं तर्हि सर्वनामस्थान[2] इति वर्तते सर्वनामस्थानपरतया सान्तसंयोगं विशेषयिष्यामः सान्तसंयोगेन नोपधाम् । सर्वनामस्थानपरस्य सान्तसंयोगस्य नोपधाया इति ॥

अन्कारान्तस्याल्लोपे ॥ ८ ॥

अन्कारान्तस्याल्लोपे प्रयोजनम्[3] । तक्ष्णा तक्ष्ण इति । त इत्यत्रापि प्राप्नोति । अनन्त्यविकारेऽन्त्यसदेशस्य कार्यं भवतीति न दोषो भवति ॥ एतदपि नास्ति प्रयोजनम् । अनाकारं विशेषयिष्यामः । अनो योऽकार इति ॥ एवमप्यनसा अनस इत्यत्रापि प्राप्नोति । अन्कारेणाङ्गं विशेषयिष्यामोऽनाकारम् अन्कारान्तस्याङ्गस्यानो योऽकार इति ॥ एवमप्यनस्तक्ष्णा अनस्तक्ष्ण इत्यत्रापि प्राप्नोति । एवं तर्हि कार्यकालं हि संज्ञापरिभाषं यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम् । भस्येत्युपस्थितमिदं

---

[1] सान्तमहतः संयोगस्य ६. ४. १०.
[2] सर्वनामस्थाने चासंबुद्धौ ६. ४. ८.
[3] अल्लोपोऽनः ६. ४. १३४.

भवति यचि भम् [१. ४. १८.] इति तत्र यजादिपरतयाऽकारं विशेषयिष्यामोऽनाकारम् । यजादिपरस्यानो योऽकार इति ॥

मृजेर्वृद्धिविधौ ॥ ९ ॥

मृजेर्वृद्धिविधौ प्रयोजनम्[1] । न्यमार्ट् । अटोऽपि वृद्धिः प्राप्नोति । अनन्त्यविकारेऽन्त्यसदेशस्य कार्यं भवतीति न दोषो भवति ॥ एतदपि नास्ति प्रयोजनम् । यथापरिभाषितमिको गुणवृद्धी [१. १. ३.] इतीक एव वृद्धिर्भविष्यति ॥ एवमपि मिमार्जिषतीत्यत्र प्राप्नोति । अस्तु । अभ्यासनिर्ह्रासेन ह्रस्वो भविष्यति[2] ॥

वसोः संप्रसारणे च ॥ १० ॥

वसोः संप्रसारणे च प्रयोजनम्[3] । विदुषः पश्य । विदिवकारस्यापि प्राप्नोति । अनन्त्यविकारे ऽन्त्यसदेशस्येति न दोषो भवति ॥ एतदपि नास्ति प्रयोजनम् । न संप्रसारणे संप्रसारणम् [६. १. ३७] इति प्रतिषेधो भविष्यति । दकारेण व्यवहितत्वान्न प्राप्नोति । एवं तर्हि निर्दिश्यमानस्यादेशा भवन्तीति न भविष्यति ॥

युवादीनां च ॥ ११ ॥

युवादीनां च संप्रसारणे प्रयोजनम्[4] । यूनः यूना यूने । यकारस्यापि प्राप्नोति । अनन्त्यविकारेऽन्त्यसदेशस्येति न दोषो भवति ॥ एतदपि नास्ति प्रयोजनम् । न संप्रसारणे संप्रसारणमिति न भविष्यति । उकारेण व्यवहितत्वान्न प्राप्नोति । एकादेशे कृते नास्ति व्यवधानम् । एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यवधानमेव । एवं तर्हि समानाङ्गग्रहणं तत्र चोदयिष्यति[5] ॥

र्वोरुपधाग्रहणं च ॥ १२ ॥

र्वोश्चोपधाग्रहणं न कर्तव्यं भवति[6] । इह कस्मान्न भवति । अबिभर्भवान् । अनन्त्यविकारेऽन्त्यसदेशस्येति न दोषो भवति ॥ एतदपि नास्ति प्रयोजनम् । क्रियते न्यास एव ॥

---

[1] मृजेर्वृद्धिः ७. २. ११४. [2] अत्र लोपोभ्यासस्य; ह्रस्वः ७. ४. २८.; ५९. [3] वसोः संप्रसारणम् ६. ४. १३१. [4] श्वयुवमघोनामतद्धिते ६. ४. १३३. [5] समानाङ्गग्रहणं च ६. १. ३७ वा २. [6] र्वोरुपधाया दीर्घ इकः ८. २. ७६.

आदित्यदादिविधिसंयोगादिलोपकुत्वढत्वभष्भावषत्वणत्वेष्वतिप्रसङ्गः ॥ १३ ॥

आदिविधावतिप्रसङ्गो भवति । धात्वादेः षः सः [६. १. ६४] णो नः [६५]। इहैव स्यात् नेता सोता । इह न स्यात् नमति सिञ्चतीति । आदि ॥ त्यदादिविधि[1]। इहैव स्यात् तद् सः । त्यद् स्य इत्यत्र न स्यात् । त्यदादिविधि ॥ संयोगादिलोप[2] । इहैव स्यात् मङ्क्ता । मङ्क्तव्यमित्यत्र न स्यात् । संयोगादिलोप ॥ कुत्व[3] । इहैव स्यात् पक्ता । पक्तव्यमित्यत्र न स्यात् । कुत्व ॥ ढत्व[4] । इहैव स्यात् लेढा । लेढव्यमित्यत्र न स्यात् । ढत्व ॥ भष्भाव[5] । इहैव स्यात् अभुत्सि । अभुत्सातामित्यत्र न स्यात् । भष्भाव ॥ षत्व[6] इहैव स्यात् द्रष्टा । द्रष्टव्यमित्यत्र न स्यात् । षत्व ॥ णत्व[7] । इहैव स्यात् माषवापेण । माषवापाणामित्यत्र न स्यात् । णत्व ॥

एते दोषाः समा भूयांसो वा तस्मान्नार्थोऽनया परिभाषया ॥ न हि दोषाः सन्तीति परिभाषा न कर्तव्या लक्षणं वा न प्रणेयम् । न हि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते न च मृगाः सन्तीति यवा नोप्यन्ते । दोषाः खल्वपि साकल्येन परिगणिताः प्रयोजनानामुदाहरणमात्रम् । कुत एतत् । न हि दोषाणां लक्षणमस्ति । तस्माद्यान्येतस्याः परिभाषायाः प्रयोजनानि तदर्थमेषा परिभाषा कर्तव्या प्रतिविधेयं दोषेषु ॥ इदं प्रतिविधीयते ।

उदात्तनिर्देशात्सिद्धम् ॥ १४ ॥

यत्रैषा परिभाषेष्यते तत्रोदात्तनिर्देशः कर्तव्यः । ततो वक्तव्यमनन्त्यविकारेऽन्त्यसदेशस्य कार्यं भवत्युदात्तनिर्देश इति ॥

स तर्ह्युदात्तनिर्देशः कर्तव्यः । न कर्तव्यः । यत्रैवान्त्यसदेशश्चानन्त्यसदेशश्च युगपत्समवस्थितौ तत्रैषा परिभाषा भवति दोषेषु चान्यत्रान्त्यसदेशोऽन्यत्रानन्त्यसदेशः प्रयोजनेषु पुनस्तत्रैवान्त्यसदेशश्चानन्त्यसदेशश्च । तथाजातीयकानि खल्वप्याचार्येण प्रयोजनानि पठितानि यान्युभयवन्ति । इदमेकं यथा दोषास्तथा वोरुपधाग्रहणमिति । अबिभर्भवान् । तच्चापि क्रियते न्यास एव ॥

---

[1] तदोः सः सावनन्त्ययोः ७. २. १०६. [2] स्कोः संयोगाद्योरन्ते च ८. २. २९. [3] चोः कुः ८. २. ३०. [4] हो ढः ८. २. ३१. [5] एकाचो बशो भष् झषन्तस्य स्ध्वोः ८. २. ३७. [6] व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ८. २. ३६. [7] प्रातिपदिकान्तनुम्विभक्तिषु च ८. ४. ११.

बन्धुनि बहुव्रीहौ ॥ ६ । १ । १४ ॥

मातज्मातृकमातृषु व्यङ् प्रसार्यो विभाषया ॥

मातच् । कारीषगन्ध्या मातास्य कारीषगन्धीमातः कारीषगन्ध्यामातः । मातच् ॥ मातृक । कारीषगन्धीमातृकः कारीषगन्ध्यामातृकः । मातृक ॥ मातृ । कारीषगन्धीमाता कारीषगन्ध्यामाता ॥ *

ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ॥ ६ । १ । १६ ॥

वयिग्रहणं किमर्थं न वेञ्यजादिषु[1] पठयते वेञश्च वयिरादेशः क्रियते[2] तत्र यजादीनां कितीत्येव[3] सिद्धम् । तत्रैतत्स्यान्ङिदर्थो ऽयमारम्भ इति । तच्च न लिटययमादेशो लिट् च किदेव[4] ॥ अत उत्तरं पटति ।

वयिग्रहणं वेञः प्रतिषेधात् ॥ १ ॥

वयिग्रहणं क्रियते वेञः प्रतिषेधात् । वेञो लिटि प्रतिषेधं वक्ष्यति स वयेर्मा भूदिति । यथैव हि वेञ्ग्रहणाद्विधिः प्रार्थ्यत एवं प्रतिषेधोऽपि प्राप्नोति ॥

न वा यकारप्रतिषेधो ज्ञापको ऽप्रतिषेधस्य ॥ २ ॥

न वैष दोषः । किं कारणम् । यदयं लिटि वयो यः [६. १. ३८] इति वयेर्यकारस्य संप्रसारणप्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो न वेञ्ग्रहणाद्वयेः संप्रसारणप्रतिषेधो भवतीति । नैतदस्ति ज्ञापकम् । पित्यभ्यासार्थमेतत्स्यात् । वयेः पित्सु वचनेष्वभ्यासस्य यकारस्य संप्रसारणं मा भूदिति । ननु च वेञ्ग्रहणादेव वयेः पित्स्वपि वचनेष्वभ्यासयकारस्य संप्रसारणप्रतिषेधः सिद्धः । न सिध्यति । किं कारणम् । कितीति[5] तत्रानुवर्तते ॥ एवमपि वयेः पित्सु वचनेष्वभ्यासयकारस्य संप्रसतरणं न प्राप्नोति । किं कारणम् । हलादिशेषेण बाध्यते । नात्र हलादिशेषः प्राप्नोति । किं कारणम् । वक्ष्यति ह्येतदभ्याससंप्रसारणं हलादिशेषाद्विप्रतिषेधेनेति[6] ॥ स एष वयेर्यकारस्य संप्रसारणप्रतिषेधः पित्यभ्यासार्थो न ज्ञापकार्थो भवति ॥

---

* [V. M. om. वचिस्वपियजादीनां किति (१५)].

[1] वचिस्वपियजादीनां किति ६. १. १५. [2] वेञो वयिः २. ४. ४१. [3] असंयोगाल्लिट् कित् १. २. ५. [4] वेञः ६. १. ४०. [5] वश्चास्यान्यतरस्यां किति ६. १. ३९. [6] अभ्याससंप्रसारणं हलादिशेषाद्विप्रतिषेधेन ६. १. १७ वा. १.

पित्यभ्यासार्थमिति चेन्नाविशिष्टत्वात् ॥ ३ ॥

पित्यभ्यासार्थमिति चेत्तन्न । किं कारणम् । अविशिष्टत्वात् । अविशेषेण प्रतिषेधः । निवृत्तं तत्र कितीति । आतश्चाविशेषेण वेञोऽपि हि पित्सु वचनेष्वभ्यासस्य संप्रसारणं नेष्यते । ववौ वविथेति । विकृतिग्रहणं खल्वपि प्रतिषेधे क्रियते[1] न च विकृतिः प्रकृतिं गृह्णाति ॥

लिट्यभ्यासस्योभयेषाम् ॥ ६ । १ । १७ ॥

ग्रहिवृश्चतिपृच्छतिभृज्जतीनामविशेषः ॥ यदुच्यते वृश्चेरविशेष इति तन्न । यद्यत्र रेफस्य संप्रसारणं न स्याद्वकारस्य प्रसज्येत । रेफस्य पुनः संप्रसारणे सत्युरदत्त्वस्य[2] स्थानिवद्भावान्न संप्रसारणे संप्रसारणम् [६. १. ३७] इति प्रतिषेधः सिद्धो भवति । तस्माद्वक्तव्यं ग्रहेरविशेषः पृच्छतिभृज्जत्योरविशेष इति ॥

अथोभयेषांग्रहणं किमर्थम् । उभयेषामभ्यासस्य संप्रसारणं यथा स्याद्वचिस्वपियजादीनां ग्रहादीनां च[3] । नैतदस्ति प्रयोजनम् । प्रकृतमुभयेषांग्रहणमनुवर्तते ॥ यद्यनुवर्तते ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति चेति यजादीनां ङित्यपि प्राप्नोति । नैष दोषः । संबन्धमनुवर्तिष्यते । वचिस्वपियजादीनां किति । ग्रहादीनां ङिति च वचिस्वपियजादीनां किति । ततो लिट्यभ्यासस्योभयेषाम् । किति ङितीति निवृत्तम् ॥ अथवा मण्डूकगतयोऽधिकाराः । यथा मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः ॥ अथवैकयोगः करिष्यते । वचिस्वपियजादीनां किति ग्रहादीनां ङिति चेति । ततो लिट्यभ्यासस्येति । न चैकयोगेऽनुवृत्तिर्भवति ॥ अथवोभयं निवृत्तं तदपेक्षिष्यामहे ॥

इदं तर्ह्युभयेषांग्रहणस्य प्रयोजनमुभयेषामभ्यासस्य संप्रसारणमेव यथा स्याद्यदन्यत् प्राप्नोति तन्मा भूदिति । किं चान्यत् प्राप्नोति । हलादिशेषः[4] । अभ्याससंप्रसारणं हलादिशेषाद्विप्रतिषेधेनेति वक्ष्यति[5] स पूर्वविप्रतिषेधो न पठितव्यो भवति ॥

अभ्याससंप्रसारणं हलादिशेषाद्विप्रतिषेधेन ॥ १ ॥

अभ्याससंप्रसारणं हलादिशेषाद्भवति विप्रतिषेधेन । अभ्याससंप्रसारणस्यावकाशः । इयाज । उवाप हलादिशेषस्यावकाशः । बिभिदतुः बिभिदुः । इहोभयं प्राप्नोति ।

---

[1] लिटि वयो यः ६. १. ३८. [2] उरत् ७. ४ ६६. [3] वचिस्वपियजादीनां किति; ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ६. १. १५. १६. [4] हलादिः शेषः ७. ४. ६०. [5] अभ्याससंप्रसारणं हलादिशेषाद्विप्रतिषेधेन ६. १. १७ वा. १.

विव्याध विव्यधिथ । अभ्याससंप्रसारणं भवति पूर्वविप्रतिषेधेन ॥ स तर्हि पूर्वविप्रतिषेधो वक्तव्यः ।

न वा संप्रसारणाश्रयबलीयस्त्वादन्यत्रापि ॥ २ ॥

न वा वक्तव्यः । किं कारणम् । संप्रसारणाश्रयस्य बलीयस्त्वादन्यत्रापि । संप्रसारणं संप्रसारणाश्रयं च बलीयो भवतीति वक्तव्यम् । अन्यत्रापि नावश्यमिहैव वक्तव्यम् ॥ किं प्रयोजनम् ।

प्रयोजनं रमाल्लोपेयङ्यणः ॥ ३ ॥

रम् । भृष्टः भृष्टवान् । संप्रसारणं च प्राप्नोति रम्भावश्च[1] । परत्वाद्रम्भावः स्यात् । संप्रसारणं बलीयो भवतीति वक्तव्यं संप्रसारणं यथा स्यात् ॥ आल्लोपः । जुहुवतुः जुहुवुः । संप्रसारणं च प्राप्नोत्याल्लोपश्च[2] । परत्वादाल्लोपः स्यात् । संप्रसारणं बलीयो भवतीति वक्तव्यं संप्रसारणं यथा स्यात् ॥ संप्रसारणे कृते पूर्वत्वं[3] च प्राप्नोत्याकारलोपश्च । परत्वादाल्लोपः स्यात् । संप्रसारणाश्रयं च बलीयो भवतीति वक्तव्यं पूर्वत्वं यथा स्यात्[4] ॥ इयङ् । शुशुवतुः शुशुवुः । संप्रसारणं च प्राप्नोतीयङादेशश्च[5] । परत्वादियङादेशः स्यात् । संप्रसारणं बलीयो भवतीति वक्तव्यं संप्रसारणं यथा स्यात् ॥ यण् । संप्रसारणे कृते पूर्वत्वं च प्राप्नोति यणादेशश्च[6] । परत्वाद्यणादेशः स्यात् । संप्रसारणाश्रयं च बलीयो भवतीति वक्तव्यं पूर्वत्वं यथा स्यात् ॥

नैतानि सन्ति प्रयोजनानि । यत्तावदुच्येत रमितीदमिह संप्रधार्यम् । रम्भावः क्रियतां संप्रसारणमिति किमत्र कर्तव्यम् । परत्वाद्रम्भावः । नित्यं संप्रसारणम् । कृतेऽपि रम्भावे प्राप्नोत्यकृतेऽपि । रम्भावोऽपि नित्यः । कृतेऽपि संप्रसारणे प्राप्नोत्यकृतेऽपि । कथम् । योऽसावृकारे रेफस्तस्य चोपधायाश्च प्राप्नोति । अनित्यो रम्भावो न हि कृते संप्रसारणे प्राप्नोति । किं कारणम् । न हि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते । अथापि गृह्यन्त एवमप्यनित्यः । उपदेश इति[7] वर्तते । तच्चावश्यमुपदेशग्रहणमनुवर्त्यं बरीभृज्ज्यत इत्येवमर्थम् ॥ आल्लोपेयङ्यणः । नित्यं संप्रसारणम् । अन्तरङ्गं पूर्वत्वम् ॥

---

[1] ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च; भ्रस्जो रोपधयो रमन्यतरस्याम् ६. १. १६ ; ६. ४. ४७. [2] अभ्यस्तस्य च ; आतो लोप इटि च ६. १. ३३ ; ६. ४. ६४. [3] संप्रसारणाच्च ६. १. १०८. [4] अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६. ४. ७७. [5] विभाषा श्वेः ; आचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६. १. ३० ; ६. ४. ७७. [6] संप्रसारणाच्च ; एरनेकाचोऽसंयोगपूर्वस्य ६. १. १०८ ; ६. ४. ८२. [7] अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति ६. ४. ३७.

तदेतदनन्यार्थं संप्रसारणाश्रयं बलीयो भवतीति बक्तव्यं पूर्वविप्रतिषेधो वा वक्तव्यः ॥ उभयं न वक्तव्यम् । उक्तमत्रोभयेषांग्रहणस्य प्रयोजनमुभयेषामभ्यासस्य संप्रसारणमेव यथा स्याद्यदन्यत्प्राप्नोति तन्मा भूदिति ॥

व्यचेः कुटादित्वमनस्यञ्णिति संप्रसारणार्थम् ॥ ४ ॥

व्यचेः कुटादित्वमनसीति वक्तव्यम् । किं प्रयोजनम् । अञ्णिति संप्रसारणार्थम् । अञ्णिति संप्रसारणं यथा स्यात्[1] । उद्विचिता उद्विचितुम् उद्विचितव्यम् । अनसीति किमर्थम् । उरुव्यचाः कण्टकः ।

स्वापेश्चङि ॥ ६ । १ । १८ ॥

चङ्ग्रहणं शक्यमकर्तुम् । कथम् । ङितीति[2] वर्तते न चान्यः स्वापेर्ङिदस्त्यन्यदतश्चङः ॥*

न वशः ॥ ६ । १ । २० ॥

वशेर्यङि प्रतिषेधः ॥ १ ॥

वशेर्यङि प्रतिषेधो वक्तव्यः संप्रसारणस्य । वावश्यते । क्व मा भूत् । उष्टः उशन्तीति[3] ॥ स तर्हि तथा प्रतिषेधो वक्तव्यः । न वक्तव्यः । यङीति[4] वर्तते । एवं तर्ह्यन्वाचष्टे यङीति वर्तत इति । नैतदन्वाख्येयमधिकारा अनुवर्तन्त इति । एष एव न्यायो यदुताधिकारा अनुवर्तेरन्निति ॥**

शृतं पाके ॥ ६ । १ । २७ ॥

किं निपात्यते ।

श्राश्रप्योः शृभावः ॥ १ ॥

श्राश्रप्योः शृभावो निपात्यते ॥

---

* [V. M. om. स्वपिस्यमिव्येञां यङि (१९)]

** [V. M. om. चायः की (२१), स्फायः स्फी निष्ठायाम् (२२) ; स्त्यः प्रपूर्वस्य (२३); द्रवमूर्तिस्पर्शयोः श्यः (२४), प्रतेश्च (२५); विभाषाऽभ्यवपूर्वस्य (२६)]

[1] गाङ्कुटादिभ्योऽञ्णिन्ङित् १. २ १.

[2] ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च. ६-१-१६

[3] सार्वधातुकमपित् १. २. ४.

[4] स्वपिस्यमिव्येञां यङि ६. १. १९.

क्षीरहविषोरिति वक्तव्यम् । श्रृतं क्षीरम् । श्रृतं हविः । क मा भूत् । श्राणा यवागूः । श्रपिता यवागूरिति ॥

श्रपेः श्रृतमन्यत्र हेतोः ॥ २ ॥

श्रपेः श्रृतमन्यत्र हेतोरिति वक्तव्यम् इह मा भूत् । श्रपितं क्षीरं देवदत्तेन यज्ञदत्तेनेति ॥

प्यायः पी ॥ ६ । १ । २८ ॥

आङ्पूर्वादन्धूधसोः ॥ १ ॥

आङ्पूर्वादन्धूधसोरिति वक्तव्यम् । आपीनोऽन्धुः । आपीनमूधः । किं प्रयोजनम् । नियमार्थम् । आङ्पुर्वादन्धूधसोरेव । क मा भूत् । आप्यानश्चन्द्रमा इति ॥ उभयतो नियमश्चायं द्रष्टव्यः । आङ्पूर्वादेवान्धूधसोः । अन्धूधसोरेवाङ्पूर्वादिति । क मा भूत् । प्रप्यानोऽन्धुः । प्रप्यानमूधः ॥ आङ्पूर्वाच्चैष नियमो द्रष्टव्यः । भवति हि पीनंः मुखम् पीनाः शम्बट्यः श्लक्ष्णपीनमुखी कन्येति ॥ *

विभाषा श्वेः ॥ ६ । १ । ३० ॥

श्वेर्लिट्यभ्यासलक्षणप्रतिषेधः ॥ १ ॥

श्वेर्लिट्यभ्यासलक्षणं संप्रसारणं नित्यं प्राप्नोति[1] तस्य प्रतिषेधो वक्तव्यः । शिश्वियतुः शिश्वियुः ॥ किमुच्यते लिट्यभ्यासलक्षणस्येति न पुनः किल्लक्षणस्यापि । किल्लक्षणमपि हि नित्यमत्र प्राप्नोति[2] । किल्लक्षणं श्वयतिलक्षणं बाधिष्यते । यथैव तर्हि किल्लक्षणं श्वयतिलक्षणं बाधत एवमभ्यासलक्षणमपि बाधेत ॥ न ब्रूमोऽपवादत्वाच्छ्वयतिलक्षणं किल्लक्षणं बाधिष्यत इति । किं तर्हि । परत्वात् । श्वयतिलक्षणस्यावकाशः पिन्ति वचनानि । शुशाव शुशविथ । शिश्वाय शिश्वयिथ । किल्लक्षणस्यावकाशोऽन्ये कितः । शूनः शूनवान् । इहोभयं प्राप्नोति । शिश्वियतुः शिश्वियुरिति । श्वयतिलक्षणं भवति विप्रतिषेधेन ॥ अभ्यासलक्षणादपि तर्हि श्वयतिलक्षणं

---

* [V. M. om. लिडयङोश्च (२९)].

[1] वचिस्वपियजादीनां किति ६. १. १५; लिट्यभ्यासस्योभयेषाम् ६. १. १७.

[2] वचिस्वपियजादीनां किति ६. १. १५.

भविष्यति विप्रतिषेन । अभ्यासलक्षणस्यावकाशोऽन्ये यजादयः । इयाज उवाप । श्वयतिलक्षणस्यावकाशः परं धातुरूपम् । शुशुवतुः शुशुवुः शुशविथ । श्वयतेरभ्यासस्योभयं प्राप्नोति । शिश्वियतुः शिश्वियुः । श्वयतिलक्षणं भविष्यति विप्रतिषेधेन ॥ नैष युक्तो विप्रतिषेधो न हि श्वयतेरभ्यासस्यान्ये यजादयोऽवकाशः । श्वयतेर्यजादिषु यः पाठः सोऽनवकाशस्तस्यानवकाशत्वादयुक्तो विप्रतिषेधः । तस्मात् सुष्ठूच्यते श्वेर्लिट्यभ्यासलक्षणप्रतिषेध इति ॥*

ह्वः संप्रसारणमभ्यस्तस्य च ॥ ६ । १ । ३२–३३ ॥

ह्वः संप्रसारणे योगविभागः ॥ १ ॥

ह्वः संप्रसारणे योगविभागः कर्तव्यः । ह्वः संप्रसारणं भवति णौ च संश्चङोः[1] । ततोऽभ्यस्तस्य च । अभ्यस्तस्य च ह्वः संप्रसारणं भवतीति ॥ किमर्थो योगविभागः ।

णौ च संश्चङ्विषयार्थः ॥ २ ॥

णौ च संश्चङ्विषये संप्रसारणं यथा स्यात् । जुहावयिषति अजूहवत् ॥ किं पुनः कारणं न सिध्यति । ह्वोऽभ्यस्तस्येत्युच्यते न चैतद्ध्वोऽभ्यस्तम् । कस्य तर्हि । ह्वाययतेः । ह्व एतदभ्यस्तम् । कथम् । एकाचो द्वे प्रथमस्य [६. १. १.] । एवं तर्हि ह्वयतेरभ्यस्तस्येत्युच्यते न चात्र ह्वयतिरभ्यस्तः । कस्तर्हि । ह्वाययतिः । ह्वयतिरेवात्राभ्यस्तः । कथम् । एकाचो द्वे प्रथमस्येति ॥ एवमपि

अभ्यस्तनिमित्तेऽनभ्यस्तप्रसारणार्थम् ॥ ३ ॥

अभ्यस्तनिमित्त इति वक्तव्यम् । किं प्रयोजनम् । अनभ्यस्तप्रसारणार्थम् । अनभ्यस्तस्य प्रसारणं यथा स्यात् । जुहूषति जोहूयते ॥

अभ्यस्तप्रसारणे ह्यभ्यासप्रसारणाप्राप्तिः ॥ ४ ॥

अभ्यस्तप्रसारणे ह्यभ्यासप्रसारणस्याप्राप्तिः स्यात् । न संप्रसारणे संप्रसारणम् [६. १. ३७] इति प्रतिषेधः प्रसज्येत । नैष दोषः । व्यवहितत्वान्न भविष्यति ।

---

* [V. M. om. णौ च संश्चङोः (३१)].

[1] णौ च संश्चङोः ६. १. ३१.

समानाङ्गे प्रसारणप्रतिषेधात्प्रतिषेधः ॥ ५ ॥

समानाङ्गे प्रसारणप्रतिषेधात् प्रतिषेधः प्राप्नोति । समानाङ्गग्रहणं तत्र चोदयिष्यति[1] ॥

कृदन्तप्रतिषेधार्थं च ॥ ६ ॥

कृदन्तप्रतिषेधार्थं चाभ्यस्तनिमित्त इति वक्तव्यम् । किं प्रयोजनम् । ह्वायकमिच्छति ह्वायकीयति । ह्वायकीयतेः सन् जिह्वायकीयिषति ॥

स तर्हि निमित्तशब्द उपादेयो न ह्यन्तरेण निमित्तशब्दं निमित्तार्थो गम्यते । अन्तरेणापि निमित्तशब्दं निमित्तार्थो गम्यते । तद्यथा । दधित्रपुसं प्रत्यक्षो ज्वरः । ज्वरनिमित्तमिति गम्यते । नड्वलोदकं पादरोगः पादरोगनिमित्तमिति गम्यते । आयुर्घृतम् । आयुषो निमित्तमिति गम्थते ॥ अथवाकारो मत्वर्थीयः । अभ्यस्तमस्मिन्नस्ति सो ऽयमभ्यस्तः अभ्यस्तस्येति ॥ अथवाभ्यस्तस्येति नैषा ह्वयतिसमानाधिकरणा षष्ठी । का तर्हि । संबन्धषष्ठी । अभ्यस्तस्य यो ह्वयतिः । किं चाभ्यस्तस्य ह्वयतिः । प्रकृतिः । ह्वोऽभ्यस्तस्य प्रकृतेरिति ॥ योगविभागस्तु कर्तव्य एव । नात्र ह्वयतिरभ्यस्तस्य प्रकृतिः । किं तर्हि । ह्वाययतिः ॥*

अपस्पृधेथामानृचुरानृहुश्चिच्युषे तित्याज श्राताः श्रितमाशीराशीर्तः ॥ ६ । १ । ३६ ॥

अपस्पृधेथामिति किं निपात्यते । स्पर्धेर्लङ्यात्मनेपदानां मध्यमपुरुषस्य द्विवचन आथामि द्विर्वचनं संप्रसारणमकारलोपश्च निपात्यते । इन्द्रश्च विष्णो यदपस्पृधेथाम् । अपास्पर्धेथामिति भाषायाम् ॥

अपर आह । अपपूर्वात्स्पर्धेर्लङ्यात्मनेपदानां मध्यमपुरुषस्य द्विवचन आथामि संप्रसारणमकारलोपश्च निपात्यते । इन्द्रश्च विष्णो यदपस्पृधेथाम् । अपास्पर्धेथामिति भाषायाम् ॥

श्राताः श्रितमिति किं निपात्यते । श्रीणातेः क्ते श्राभावश्रिभावौ निपात्येते । क्व पुनः श्राभावः क्व वा श्रिभावः । सोमे श्राभावोऽन्यत्र श्रिभावः । न तर्हीदानी-

---

* [V. M. om. बहुलं छन्दसि (३४) ; चायः की (३५)].

[1] समानाङ्गग्रहणं च ६. १. ३७ वा. २.

मिदं भवति। श्रितः सोम इति । बहुवचने श्राभावः । न तर्हीदानीमिदं भवति श्रिता नो ग्रहाः। सोमबहुत्वे श्राभावोऽन्यत्र श्रिभावः

न संप्रसारणे संप्रसारणम् ॥ ६ । १ । ३७ ॥

किमर्थमिदमुच्यते। वचिस्वपियजादीनां ग्रहादीनां च संप्रसारणमुक्तम्[1]। तत्र यावन्तो यणः सर्वेषां संप्रसारणं प्राप्नोति । इष्यते च परस्य यथा स्यान्न पूर्वस्य तच्चान्तरेण यत्नं न सिध्यतीति न संप्रसारणे संप्रसारणम्। एवमर्थमिदमुच्यते ॥ किमन्येऽप्येवं विधयो भवन्ति। अतो दीर्घो यञि सुपि च [७. ३. १०१, १०२] इति। घटाभ्याम् । अकारमात्रस्य दीर्घत्वं कस्मान्न भवति । अस्त्यत्र विशेषः। इयमत्र परिभाषोपतिष्ठते ऽलोन्त्यस्य [१. १. ५२] इति । ननु चेदानीमेतया परिभाषयेह शक्यमुपस्थातुम् । नेत्याह। न हि वचिस्वपियजादीनां ग्रहादीनां चान्त्यो यणस्ति । एवं तर्ह्यनन्त्यविकारेऽन्त्यसदेशस्य कार्यं भवतीत्यन्त्यसदेशो यो यण् तस्य कार्यं भविष्यति। नैतस्याः परिभाषायाः सन्ति प्रयोजनानि ॥

एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति न सर्वस्य यणः संप्रसारणं भवतीति यदयं प्यायः पीभावं शास्ति[2] । कथं कृत्वा ज्ञापकम् । पीभाववचन एतत्प्रयोजनमापीनोऽन्धुः आपीनमूधः एतद्रूपं यथा स्यादिति । यदि चात्र सर्वस्य यणः संप्रसारणं स्यात् पीभाववचनमनर्थकं स्यात् । संप्रसारणे कृते संप्रसारणपरपूर्वत्वे च द्वयोरिकारयोरेकादेशे सिद्धं रूपं स्यादापीनोऽन्धुः आपीनमूध इति । पश्यति त्वाचार्यो न सर्वस्य यणः संप्रसारणं भवतीति ततः प्यायः पीभावं शास्ति ॥ नैतदस्ति ज्ञापकम्। सिद्धे हि विधिरारभ्यमाणो ज्ञापकार्थो भवति न च प्यायः संप्रसारणेन सिध्यति। संप्रसारणे हि सत्यन्त्यस्य प्रसज्येत ॥ एवमपि ज्ञापकमेव । कथम्। प्याय इति नैषा स्थानषष्ठी। का तर्हि । विशेषणषष्ठी । प्यायो यो यणिति । तदेतज्ज्ञापयत्याचार्यो न सर्वस्य यणः संप्रसारणं भवतीति यदयं प्यायः पीभावं शास्ति ॥ एवमप्यनैकान्तिकमेतत् । एतावज्ज्ञाप्यते न सर्वस्य यणः संप्रसारणं भवतीति । तत्र कुत एतत्परस्य भविष्यति न पूर्वस्येति ॥

उच्यमानेऽप्येतस्मिन्कुत एतत्परस्य भविष्यति न पूर्वस्येति। एकयोगलक्षणं खल्वपि संप्रसारणम् । तद्यदि तावत्परमभिनिर्वृत्तं पूर्वमप्यभिनिर्वृत्तमेव। प्रसक्तस्य

---

[1] वचिस्वपियजादीनां किति; ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ६. १. १५; १६.   [2] प्यायः पी. ६. १. २८.

चानभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्या कर्तुं नाभिनिर्वृत्तस्य । यो हि भुक्तवन्तं ब्रूयान्मा भुक्था इति किं तेन कृतं स्यात् । अथापि पूर्वमनभिनिर्वृत्तं परमप्यनभिनिर्वृत्तमेव । तत्र निमित्तसंश्रयोऽनुपपन्नो न संप्रसारणे संप्रसारणमिति ॥ नैष दोषः । यत्तावदुच्यत उच्यमाने ऽप्येतस्मिन्कुत एतत् परस्य भविष्यति न पूर्वस्येति इहोङ्गितेन चेष्टितेन निमिषितेन महता वा सूत्रप्रबन्धेनाचार्याणामभिप्रायो गम्यते । एतदेव ज्ञापयति परस्य भविष्यति न पूर्वस्येति यदयं न संप्रसारणे संप्रसारणमिति प्रतिषेधं शास्ति ॥ यदप्युच्यत एकयोगलक्षणं खल्वपि संप्रसारणं तद्यदि तावत्परमभिनिर्वृत्तं पूर्वमप्यभिनिर्वृत्तमेव प्रसक्तस्य चानभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्या कर्तुमित्यस्तूभयोरभिनिर्वृत्तिः । न वयं पूर्वस्य प्रतिषेधं शिष्मः । किं तर्हि । संप्रसारणाश्रयं यत्प्राप्नोति तस्य प्रतिषेधम् । ततः पूर्वत्वे प्रतिषिद्धे यणादेशेन सिद्धम् ॥ यदप्युच्यतेऽथापि पूर्वमनभिनिर्वृत्तं परमप्यनभिनिर्वृत्तमेव तत्र निमित्तसंश्रयो ऽनुपपन्न इति तादर्थ्यात्ताच्छब्द्यं भविष्यति । तद्यथा । इन्द्रार्था स्थूणेन्द्र इति । एवमिहापि संप्रसारणार्थं संप्रसारणम् । तद्यत् प्रसारणार्थं प्रसारणं तस्मिन्प्रतिषेधो भविष्यति ॥

अथ संप्रसारणमिति[1] वर्तमाने पुनः संप्रसारणग्रहणं किमर्थम् ।

प्रसारणप्रकरणे पुनः प्रसारणग्रहणमतोऽन्यत्र प्रसारणप्रतिषेधार्थम् ॥ १ ॥

संप्रसारणमिति वर्तमाने पुनः प्रसारणग्रहण एतत्प्रयोजनं विदेशस्थमपि यत्संप्रसारणं तस्यापि प्रतिषेधो यथा स्यात् । व्यथो लिटि [७. ४. ६८] विव्यथे ॥ नैतदस्ति प्रयोजनम् । हलादिशेषापवादोऽत्र संप्रसारणम् ॥ इदं तर्हि । श्वयुवमघोनामतद्धिते [६. ४. १३३] यूना यूने ॥ उच्यमानेऽप्येतस्मिन्न सिध्यति । किं कारणम् । उकारेण व्यवधानात् । एकादेशे कृते नास्ति व्यवधानम् । एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यवधानमेव ॥ एवं तर्हि

समानाङ्गग्रहणं च ॥ २ ॥

समानाङ्गग्रहणं च कर्तव्यम् । न संप्रसारणे संप्रसारणं समानाङ्ग इति वक्तव्यम् ॥

तत्रोपोषुषि दोषः ॥ ३ ॥

तत्रोपोषुषि दोषो भवति[2] । उपोषुषा उपोषुषे उपोषुषीति ॥

---

[1] ह्वः संप्रसारणम् ६. १. ३२.

[2] वचिस्वपियजादीनां किति; वसोः संप्रसारणम् ६. १. १५; ६. ४. १३१.

न वा यस्याङ्गस्य प्रसारणप्राप्तिस्तस्मिन्प्राप्तिप्रतिषेधात् ॥ ४ ॥

न वैष दोषः । किं कारणम् । यस्याङ्गस्य प्रसारणप्राप्तिस्तस्मिन्द्वितीया या प्राप्तिः सा प्रतिषिध्यते । अत्र च वसिः क्वसावङ्गं क्वस्वन्तं पुनर्विभक्तौ ॥ अथवा यस्याङ्गस्य प्रसारणप्राप्तिरित्यनेन किं क्रियते । यावद् ब्रूयात् प्रसक्तस्यानभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्या कर्तुमिति । अत्र च यदा वसेर्न तदा क्वसोर्यदा च क्वसोरभिनिर्वृत्तं तदा वसेर्भवति ॥ अथवा यस्याङ्गस्य प्रसारणप्राप्तिरित्यनेन किं क्रियते । यावद् ब्रूयादसिद्धं बहिरङ्गमन्तरङ्ग इति । असिद्धत्वाद्बहिरङ्गलक्षणस्य वसुसंप्रसारणस्यान्तरङ्गलक्षणः प्रतिषेधो न भविष्यति ॥

ऋचि त्रेरुत्तरपदादिलोपश्छन्दसि ॥ ५ ॥

ऋचि त्रेः संप्रसारणं वक्तव्यम् । उत्तरपदादिलोपश्छन्दसि वक्तव्यः । तृचं सूक्तम् । तृचं[1] साम । छन्दसीति किम् । त्र्यृचानि ॥

रयेर्मतौ बहुलम् ॥ ६ ॥

रयेर्मतौ संप्रसारणं बहुलं वक्तव्यम् । आ रे॒वाने॑तु नो॒ विशः॑ । न च भवति । रयि॒मान्पु॑ष्टि॒वर्धनः (वा. सं. ३।४०) ॥

कक्ष्यायाः संज्ञायाम् ॥ ७ ॥

कक्ष्यायाः संज्ञायां मतौ संप्रसारणं वक्तव्यम् । क॒क्षीव॑न्तं॒ य औ॑शि॒जः (ऋ. सं. १।१८।१) । कक्षीवान् । संज्ञायामिति किमर्थम् । कक्ष्यावान् हस्ती ॥*

वश्चास्यान्यतरस्यां किति ॥ ६ । १ । ३९ ॥

वश्चास्यग्रहणं शक्यमकर्तुम् । अन्यतरस्यां किति वेञो न संप्रसारणं भवतीत्येव सिद्धम् । कथम् । प्रसारणे कृत उवङादेशे च द्विर्वचनं सवर्णदीर्घत्वम् । तेन सिद्धं ववतुः ववुः ऊवतुः ऊवुः[2] । वयेरपि नित्यं यकारस्य प्रतिषेधः संप्रसारणस्य ऊयतुः ऊयुः[3] । त्रैशब्द्यं चेह साध्यं तच्चैवं सति सिद्धं भवति ॥ यद्येवं ववौ ववियेति न

---

* [V. M. om. लिटि वयो यः (३८)].

[1] ऋक्पूरब्धूःपथामानक्षे. ५. ४. ७४. [2] वेञः ६. १. ४०. [3] लिटि वयो यः ६.१.३८.

सिध्यति । ल्यपि च [४१] इत्यनेन चकारेण लिडनुकृष्यते । तस्मिन्नित्ये प्रसारणप्रतिषेधे प्राप्त इयं किति विभाषारभ्यते ॥ *

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम् ॥

आदेच उपदेशे ऽशिति ॥ ६ । १ । ४५ ॥

कथमिदं विज्ञायते । एज् य उपदेश इति । आहोस्विदेजन्तं यदुपदेश इति । किं चातः । यदि विज्ञायत एज् य उपदेश इति ढौकिता त्रौकिता अत्रापि प्राप्नोति । अथ विज्ञायत एजन्तं यदुपदेश इति न दोषो भवति ॥ ननु चैजन्तं यदुपदेश इत्यपि विज्ञायमाने ऽत्रापि प्राप्नोति । एतदपि हि व्यपदेशिवद्भावेनैजन्तं भवत्युपदेशे । अर्थवता व्यपदेशिवद्भावः ॥ ननु चैज्य उपदेश इत्यपि विज्ञायमाने न दोषो भवति । अशितीत्युच्यते न चात्राशितं पश्यामः । ननु च ककार एवात्राशित् । न ककारेण भवितव्यम् । किं कारणम् । नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः । नञ्युक्तमिवयुक्तं चान्यस्मिंस्तत्सदृशे कार्यं विज्ञायते तथा ह्यर्थो गम्यते । तद्यथा । लोके ऽब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशमानयति नासौ लोष्टमानीय कृती भवति । एवमिहाप्यशितीति शित्प्रतिषेधादन्यस्मिन्नशिति शित्सदृशे कार्यं विज्ञास्यते । किं चान्यदशिच्छित्सदृशम् । प्रत्ययः ॥ इह तावद् ग्लै ग्लानीयम् म्लै म्लानीयम् वेञ् वानीयम् शो निशानीयम् । परत्वादायादयः[1] प्राप्नुवन्ति । ननु चैजन्तं यदुपदेश इत्यपि विज्ञायमाने परत्वादायादयः प्राप्नुवन्ति । सन्तु । आयादिषु कृतेषु स्थानिवद्भावादेज्ग्रहणेन ग्रहणात्पुनरात्त्वं भविष्यति । ननु चैज्य उपदेश इत्यपि विज्ञायमाने परत्वादायादिषु कृतेषु स्थानिवद्भावादेज्ग्रहणेन ग्रहणादात्त्वं भविष्यति । न भविष्यति । अनल्विधौ स्थानिवद्भावो[2]ऽल्विधिश्चायम् ॥ एवं तर्ह्येजन्तं यदुपदेश इत्यपि विज्ञायमाने ह्वतः ह्वतवानित्यत्रापि प्राप्नोति । भवत्येवात्रात्त्वम् । श्रवणं कस्मान्न भवति । पूर्वत्वमस्य[3] भवति । न सिध्यति । इदमिह संप्रधार्यम् । आत्त्वं क्रियतां पूर्वत्वमिति किमत्र कर्तव्यम् । परत्वात्पूर्वत्वम् । एवं तर्हीदमिह संप्रधार्यम् । आत्त्वं क्रियता संप्रसारणमिति[4] किमत्र कर्तव्यम् । परत्वादात्त्वम् । नित्यं संप्रसारणम् । कृते ऽप्यात्त्वे प्राप्नोत्यकृतेऽपि । आत्त्वमपि नित्यम् । कृतेऽपि संप्रसारणे प्राप्नोत्यकृतेऽपि । अनित्य-

---

* [V. M. om. वेञः (४०); ल्यपि च (४१); ज्यश्च (४२); व्यश्च (४३); विभाष परेः (४४)].

[1] एचोऽयवायावः ६. १. ७८. [2] स्थानिवदादेशोऽनल्विधौ १. १. ५६. [3] संप्रसारणाच्च ६. १. १०८. [4] वचिस्वपियजादीनां किति ६. १. १४.

मात्त्वं न हि कृते संप्रसारणे प्राप्नोति । किं कारणम् । अन्तरङ्गं पूर्वत्वं तेन बाध्यते । यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम् । न च संप्रसारणमेवात्त्वस्य निमित्तं विहन्ति । अवश्यं लक्षणान्तरं पूर्वत्वं प्रतीक्ष्यम् । उभयोर्नित्ययोः परत्वादात्त्वे कृते संप्रसारणं संप्रसारणपूर्वत्वम् । कार्यकृतत्वात्पुनरात्त्वं न भविष्यति । अथापि कथंचिदात्त्वमनित्यं स्यात् । एवमपि न दोषः । उपदेशग्रहणं न करिष्यते ॥ यदि न क्रियते चेता स्तोतेत्यत्रापि प्राप्नोति । नैष दोषः । आचार्यप्रवृत्तिर्ज्ञापयति न परनिमित्तकस्यात्त्वं भवतीति यदयं क्रीङ्जीनां णावात्त्वं शास्ति[1] । नैतदस्ति ज्ञापकम् । नियमार्थमेतत्स्यात् । क्रीङ्जीनां णावेवेति । यत्तर्हि मीनातिमिनोतिदीङां ल्यपि च [५०] इत्यत्रैज्ग्रहणमनुवर्तयति ॥ इह तर्हि ग्लै ग्लानीयम् म्लै म्लानीयम् वेञ् वानीयम् शो निशानीयम् परत्वादायादयः प्राप्नुवन्ति । अत्राप्याचार्यप्रवृत्तिर्ज्ञापयति नायादय आत्त्वं बाधन्त इति यदयमशितीति प्रतिषेधं शास्ति । यदि हि बाधेरञ्शित्यपि बाधेरन् ॥ अथवा पुनरस्त्वेज्य उपदेश इति । ननु चोक्तं ग्लै ग्लानीयम् म्लै म्लानीयम् वेञ् वानीयम् शो निशानीयम् परत्वादायादयः प्राप्नुवन्तीति । अत्रापि शित्प्रतिषेधो ज्ञापको नायादय आत्त्वं बाधन्त इति ॥

आत्त्व एश्युपसंख्यानम् ॥ १ ॥

आत्त्व एश्युपसंख्यानं कर्तव्यम् । जग्ले मम्ले[2] । अशितीति प्रतिषेधः प्राप्नोति ॥ नैष दोषः । नैवं विज्ञायते शकार इद्यस्य सोऽयं शित् न शिदशित् अशितीति । कथं तर्हि । शकार इत् शित् न शिदशित् अशितीति । यद्येवं स्तनंधय इत्यत्रापि प्राप्नोति[3] । अत्रापि शप् शिद्भवति[4] ॥

किं पुनरयं पर्युदासो यदन्यच्छित इति । आहोस्वित्प्रसज्यायं प्रतिषेधः शिति नेति । कश्चात्र विशेषः ।

अशित्येकादेशे प्रतिषेध आदिवत्त्वात् ॥ २ ॥

अशित्येकादेशे प्रतिषेधो वक्तव्यः । ग्लायन्ति म्लायन्ति । किं कारणम् । आदिवत्त्वात् । शिदशितोरेकादेशो ऽशित आदिवत्स्यात् । अस्त्यन्याच्छित इति कृत्वात्त्वं प्राप्नोति ॥

---

[1] क्रीङ्जीनां णौ ६. १. ४८. [2] लिटस्तझयोरेशिरेच् ३. ४. ८१. [3] नासिकास्तनयोर्ध्माधेटोः ३. २. २९. [4] तिङ्शित्सार्वधातुकम्; कर्तरि शप् ३. ४. ११३; ३. १. ६८.

प्रत्ययविधिः ॥ ३ ॥

प्रत्ययविधिश्च न सिध्यति । सुग्लः सुम्लः । आकारान्तलक्षणः[1] प्रत्ययविधिर्न प्राप्नोति । अनिष्टे प्रत्यये ऽवस्थित आत्त्वम् । अनिष्टस्य प्रत्ययस्य श्रवणं प्रसज्येत ॥

अभ्यासरूपं च ॥ ४ ॥

अभ्यासरूपं च न सिध्यति । जग्ले मम्ले । इवर्णाभ्यासता प्राप्नोति[2] ॥

अयवायावां प्रतिषेधश्च ॥ ५ ॥

अयादीनां च प्रतिषेधो वक्तव्यः । ग्लै ग्लानीयम् म्लै म्लानीयम् शो निशानीयम् वेञ् वानीयम् । परत्वादायादयः प्राप्नुवन्ति[3] । अस्तु तर्हि प्रसज्यप्रतिषेधः शिति नेति ।

शिति प्रतिषेधे श्लुलुकोरुपसंख्यानम् ररीध्वम् त्राध्वम् शिशीते ॥ ६ ॥

शिति प्रतिषेधे श्लुलुकोरुपसंख्यानं कर्तव्यम् । दि॒वो नो॑ वृ॒ष्टिं म॑रुतो ररी॒ध्व॒म्[4] । लुक् । त्रा॑ध्वं नो देवा नि॒जु॒रो॒ वृक॑स्य॒[5] । शिशी॑ते॒ शृङ्गे॒ रक्ष॑से वि॒निक्षे॑[6] ॥ नैष दोषः । इह तावद् दि॒वो नो॑ वृ॒ष्टिं म॑रुतो ररी॒ध्व॒मिति नैतद्रै इत्यस्य रूपम् । कस्य तर्हि । रातेर्दानकर्मणः । शिशी॑ते॒ शृङ्गे॒ इति नैतच्छ्यते रूपम् । कस्य तर्हि । शीङः । श्यत्यर्थो वै गम्यते । कः पुनः श्यतेरर्थः । श्यतिर्निशाने वर्तते । शीङपि श्यत्यर्थे वर्तते । कथं पुनरन्यो नामान्यस्यार्थे वर्तते । बह्वर्था अपि धातवो भवन्ति । तद्यथा । वपिः प्रकिरणे दृष्टश्छेदने चापि वर्तते । केशान्वपतीति । ईडिः स्तुतिचोदनायाच्ञासु दृष्टः प्रेरणे चापि वर्तते । अ॒ग्निर्वा॑ इ॒तो वृ॒ष्टिमी॑ट्टे म॒रुतो॑ ऽमुतश्च्यावयन्ति[7] । करोतिरभूतप्रादुर्भावे दृष्टो निर्मलीकरणे चापि वर्तते । पृष्ठं कुरु । पादौ कुरु । उन्मृदानेति गम्यते । निक्षेपणे चापि वर्तते । घटे कुरु । कटे कुरु । अश्मानमितः कुरु । स्थापयेति गम्यते ॥ सर्वेषामेव परिहारः । शितीत्युच्यते न चात्र शितं पश्यामः । प्रत्ययलक्षणेन । न लुमता तस्मिन्निति[8] प्रत्ययलक्षणप्रतिषेधः ॥ त्राध्वमिति लुङेष व्यत्ययेन भविष्यति ॥

अथवा पुनरस्तु पर्युदासः । ननु चोक्तमशित्येकादेशे प्रतिषेध आदिवत्त्वादिति । नैष दोषः । एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद् व्यवधानम् । यदपि प्रत्ययविधिरित्याचार्यप्रवृत्तिर्ज्ञापयति भवत्येजन्तेभ्य आकारान्तलक्षणः, प्रत्ययविधि-

---

[1] आतश्चोपसर्गे ३. १. १३६. [2] द्विर्वचनेऽचि. १. १. ५९. [3] एचोऽयवायावः ६. १. ७८. [4] ऋ. सं. ५. ८३. ६. [5] ऋ. सं. २. २९. ६. [6] ऋ. सं. ५. २. ९. [7] मै. सं. २. १. ८; २. ४. ८. (Only the Udātta accents are marked with a stroke above). [8] न लुमता तस्मिन्निति चेद्धनिणिङादेशास्तलोपे १. १. ६३ वा. १३.

रिति यदयं ह्वावामश्च [३. २. २.] इत्यणं कबाधनार्थं शास्ति ॥ यदप्यभ्यासरूपमिति प्रत्याख्यायते स योगः[1] । अथापि क्रियते । एवमपि न दोषः । कथम् । लिटीत्यनुवर्तते[2] द्विलकारकश्चायं निर्देशः । लिटि लकारादाविति । एवं च कृत्वा सोऽप्यदोषो भवति यदुक्तमात्त्व एश्युपसंख्यानमिति ॥ यदप्युक्तमयवायावां प्रतिषेधश्चेति शिति प्रतिषेधो ज्ञापको नायादय आत्त्वं बाधन्त इति ॥

प्रातिपदिकप्रतिषेधः ॥ ७ ॥

प्रातिपदिकानां प्रतिषेधो वक्तव्यः । गोभ्याम् गोभिः । नौभ्याम् नौभिः ॥ स तर्हि वक्तव्यः । न वक्तव्यः । आचार्यप्रवृत्तिर्ज्ञापयति न प्रातिपदिकानामात्त्वं भवतीति यदयं रायो हलि [७. २. ८५] इत्यात्त्वं शास्ति । नैतदस्ति ज्ञापकम् । नियमार्थमेतत्स्यात् । रायो हल्येवेति । यत्तर्ह्यौतोऽम्शसोः [६. १. ९३] इत्यात्वं शास्ति । एतस्याप्यस्ति वचने प्रयोजनम् । अमि[3] वृद्धिबाधनार्थमेतत्स्याच्छसि प्रतिषेधार्थं च । तस्मात्प्रातिपदिकानां प्रतिषेधो वक्तव्यः ॥ न वक्तव्यः ।

धात्वधिकारात्प्रातिपदिकस्याप्राप्तिः ॥ ८ ॥

धात्वधिकारात्प्रातिपदिकस्यात्त्वं न भविष्यति । धातोरिति वर्तते । क्व प्रकृतम् । लिटि धातोरनभ्यासस्य [६. १. ८] इति ॥ अथापि निवृत्तम् । एवमप्यदोषः । उपदेश इत्युच्यत उद्देशश्च प्रातिपदिकानां नोपदेशः ॥*

क्रीङ्जीनां णौ ॥ ६ । १ । ४८ ॥

आत्त्वे णौ लीयतेरुपसंख्यानं प्रलम्भनशालीनीकरणयोः ॥ १ ॥

आत्त्वे णौ लीयतेरुपसंख्यानं[4] कर्तव्यम् । किं प्रयोजनम् । प्रलम्भने चार्थे शालीनीकरणे च नित्यमात्त्वं यथा स्यात् । प्रलम्भने तावत् । जटाभिरालापयते । श्मश्रुभिरालापयते । शालीनीकरणे । श्येनो वर्तिकामुल्लापयते । रथी रथिनमपलापयते[5] ॥

---

* [V. M. om. न व्यो लिटि (४६); स्फुरतिस्फुलत्योर्घञि (४७)].

[1] द्विर्वचनेचि १. १. ५९. [2] लिटि वयो यः ६. १. ३८. [3] गोतो णित्; अचो ञ्णिति ७. १. ९०; ७. २. ११५. [4] विभाषा लीयतेः ६. १. ५१. [5] लियः संमाननशालीनीकरणयोश्च १. ३. ७०.

सिध्यतेरपारलौकिके ॥ ६ । १ । ४९ ॥

सिध्यतेरज्ञानार्थस्य ॥ १ ॥

सिध्यतेरज्ञानार्थस्येति वक्तव्यम् ॥

इतरथा ह्यनिष्टप्रसङ्गः ॥ २ ॥

अपारलौकिक इत्युच्यमाने ऽनिष्टं प्रसज्येत । अन्नं साधयति ब्राह्मणेभ्यो दास्यामीति ॥ अस्ति पुनरयं सिध्यतिः क्वचिदन्यत्रापि ज्ञानार्थे वर्तते । अस्तीत्याह । तपस्तापसं सेधयति । ज्ञानमस्य प्रकाशयति । स्वान्येवैनं कर्माणि सेधयन्ति । ज्ञानमस्य प्रकाशयन्तीत्यर्थः

मीनातिमिनोतिदीङां ल्यपि च ॥ ६ । १ । ५० ॥

मीनात्यादीनामात्त्व उपदेशवचनं प्रत्ययविध्यर्थम् ॥ १ ॥

मीनात्यादीनामात्वे उपदेशिवद्भावो वक्तव्यः । उपदेशावस्थायामात्त्वं भवतीति वक्तव्यम् । किं प्रयोजनम् । प्रत्ययविध्यर्थम् । उपदेशावस्थाथामात्त्वे कृत इष्टः प्रत्ययविधिर्यथा स्यात् ॥ के पुनः प्रत्यया उपदेशिवद्भावं प्रयोजयन्ति । काः[1] । कास्तावन्न प्रयोजयन्ति । किं कारणम् । एच इत्युच्यते न च केष्वजस्ति[2] ॥ णघञ्युज्विधयस्तर्हि प्रयोजयन्ति । ण । अवदायः । आत इति णः सिद्धो भवति[3] । ण । घञ् । अवदायो वर्तते । आत इति घञ् सिद्धो भवति । किं च भो आत इति घञुच्यते । न खल्वप्यात इत्युच्यते आतस्तु विज्ञायते । कथम् । अविशेषेण घञुत्सर्गस्तस्येवर्णान्तादुवर्णान्ताच्चाजपावपवादौ[4] । तत्रोपदेशावस्थायामात्त्वे कृते ऽपवादस्य निमित्तं नास्तीति कृत्वोत्सर्गेण घञ्सिद्धो भवति[5] । एवं च कृत्वा न चात इत्युच्यत आतस्तु विज्ञायते । युच् । ईषदवदानम् स्ववदानम् । आत इति युच् सिद्धो भवति[6] ॥

---

[1] आतश्चोपसर्गे, आतोऽनुपसर्गे कः; आतश्चोपसर्गे, ३. १ १३६; ३. २. ३; ३. ३. १०६;
[2] क्ङिति च. १. १. ५.
[3] श्याद्व्यधास्रुसंस्रुतीणवसावहृलिहश्लिषश्वसश्च ३. १. १४१.
[4] एरच्; ऋदोरप् ३. ३. ५६; ५७.
[5] भावे; अकर्तरि च कारके संज्ञायाम् ३. ३. १८; १९.
[6] आतो युच् ३. ३. १२८.

इदं विप्रतिषिद्धमेच उपदेश इति । यद्येचो नोपदेशे ऽथोपदेशे नैचः । एचश्चोपदेशे चेति विप्रतिषिद्धम् ॥ नैतद्विप्रतिषिद्धम् । आहायमेच उपदेश इति । यद्येचो नोपदेशेऽथोपदेशे नैचः । ते वयं विषयं विज्ञास्यामः । एज्विषय इति ॥

तत्तर्ह्युपदेशग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । आदेच उपदेशेऽशिति [४४] इति । तद्वै प्रकृतिविशेषणं विषयविशेषणेन चेहार्थः । न चान्यार्थं प्रकृतमन्यार्थं भवति । न खल्वप्यन्यत्प्रकृतमनुवर्तनादन्यद्भवति । न हि गोधा सर्पन्ती सर्पणादहिर्भवति ॥ यत्तावदुच्यते न चान्यार्थं प्रकृतमन्यार्थं भवतीत्यन्यार्थमपि प्रकृतमन्यार्थं भवति । तद्यथा । शाल्यर्थं कुल्याः प्रणीयन्ते ताभ्यश्च पानीयं पीयत उपस्पृश्यते च शालयश्च भाव्यन्ते । यदप्युच्यते न खल्वप्यन्यत्प्रकृतमनुवर्तनादन्यद्भवति न हि गोधा सर्पन्ती सर्पणादहिर्भवतीति भवेद्द्रव्येष्वेतदेवं स्यात् । शब्दस्तु खलु येन येनाभिसंबध्यते तस्य तस्य विशेषको भवति । तद्यथा । गौः शुक्लः । अश्वश्च । शुक्ल इति गम्यते ॥

निमिमीलियां खलचोः प्रतिषेधः ॥ २ ॥

निमिमीलियां खलचोः[1] प्रतिषेधो वक्तव्यः । ईषन्निमयम् । सुनिमयम् । निमयो वर्तते । निमयः । मि ॥ मी । ईषत्प्रमयम् । सुप्रमयम् । प्रमयो वर्तते । प्रमयः । मी ॥ ली । ईषद्विलयम् । सुविलयम् । विलयो वर्तते । विलयः ॥

विभाषा लीयतेः ॥ ६ । १ । ५१ ॥

किमिदं लीयतेरिति । लिनातिलीयत्योर्यका निर्देशः ॥*

बिभेतेर्हेतुभये ॥ ६ । १ । ५६ ॥

हेतुभय इति किमर्थम् । कुञ्चिकयैनं भाययति । अहिनैनं भाययति ॥ हेतुभय इत्युच्यमानेऽप्यत्र प्राप्नोति । एतदपि हि हेतुभयम् । हेतुभय इति नैवं विज्ञायते हेतोर्भयं हेतुभयम् इति । कथं तर्हि । हेतुरेव भयं हेतुभयम् हेतुभय इति । यदि स एव हेतुर्भयं भवतीति ॥**

---

* [V. M. om. खिदेश्छन्दसि (५२); अपगुरो णमुलि (५३), चिस्फुरोर्णौ (५४); प्रजने वीयतेः (५५)].

** [V. M. om. नित्यं स्मयतेः (५७)].

[1] ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ; नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ; एरच् ३. ३. १२६ ; ३. १. १३४ ; ३. ३. ५६.

सृजिदृशोर्झल्यमकिति ॥ ६ । १ । ५८ ॥

अमि सङ्ग्रहणम् ॥ १ ॥

अमि सङ्ग्रहणं कर्तव्यम् । किमिदं सङिति । प्रत्याहारग्रहणम् । क संनिविष्टानां प्रत्याहारः । सनः प्रभृत्या महिङो ङकारात्[१] । किं प्रयोजनम् ।

क्विप्प्रतिषेधार्थम् ॥ २ ॥

क्विबन्तस्य मा भूत् । रज्जुसृड्भ्याम् रज्जुसृड्भिः । देवदृग्भ्याम् देवदृग्भिः[२] ॥

उक्तं वा ॥ ३ ॥

किमुक्तम् । धातोः स्वरूपग्रहणे तत्प्रत्ययविज्ञानात्सिद्धमिति[३] ॥

शीर्षश्छन्दसि ॥ ६ । १ । ६० ॥

शीर्षन्छन्दसि प्रकृत्यन्तरम् ॥ १ ॥

शीर्षन्छन्दसि प्रकृत्यन्तरं द्रष्टव्यम् । किं प्रयोजनम् ।

आदेशप्रतिषेधार्थम् ॥ २ ॥

आदेशो मा विज्ञायि प्रकृत्यन्तरं यथा विज्ञायेत । किं च स्यात् । अस्कारान्तस्य च्छन्दसि श्रवणं न स्यात् । शिरो॑ मे॒ श्रीर्यशो॒ मुख॑म्[४] । इदं॑ ते॒ शिरो॑ भिनद्मीति । तद्वा अ॑थर्व॒णः शिरः॑ (अथ. सं. १०।२।२७) ॥*

ये च तद्धिते ॥ ६ । १ । ६१ ॥

ये च तद्धिते शिरस आदेशार्थम् ॥ १ ॥

ये च तद्धित इत्यत्र शिरसो ग्रहणं कर्तव्यम् । किं प्रयोजनम् । आदेशार्थम् । आदेशो यथा विज्ञायेत प्रकृत्यन्तरं मा विज्ञायि । किं च स्यात् । यकारादौ तद्धितेऽस्कारान्तस्य श्रवणं प्रसज्येत । शीर्षण्यो हि मुख्यो भवति । शीर्षण्यः स्वरः ॥

---

* [V. M. om. अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् (५९)].

[१] गुप्तिज्किद्भ्यः सन्; तिप्तस्झि......वहिमहिङ् ३. १. ५; ३. ४. ७८.

[२] स्वौजसमौट्...ङ्योस्सुप् ४. १. २.

[३] धातोः स्वरूपग्रहणे वा तत्प्रत्ययविज्ञानात् सिद्धम् ७. २. ११४ वा. २.

[४] वा. सं. २०. ५. The passage is read in all the printed and manuscript copies of the Mahābhāṣya as शिरो मे शर्यिते मुखे which probably is due to the mistake of the copyist.

वा केशेषु ॥ २ ॥

वा केशेषु शिरसः शीर्षन्भावो वक्तव्यः। शीर्षण्याः केशाः। शिरस्याः॥

अचि शीर्षः ॥ ३ ॥

अचि परतः शिरसः शीर्षभावो वक्तव्यः। हास्तिशीर्षिः स्थौलशीर्षिः पैलुशीर्षिः[1]॥

छन्दसि च ॥ ४ ॥

छन्दसि च शिरसः शीर्षभावो वक्तव्यः। द्वे शीर्षे॥

इह हास्तिशीर्ष्या पैलुशीर्ष्येति[2] शिरसो ग्रहणेन ग्रहणाच्छीर्षन्भावः प्राप्नोति। अस्तु। नस्तद्धिते [६. ४. १४४] इति टिलोपो भविष्यति। न सिध्यति। ये चाभावकर्मणोः [६. ४. १६८] इति प्रकृतिभावः प्रसज्येत॥ यदि पुनर्येऽचि तद्धित इत्युच्येत। किं कृतं भवति। इञि शीर्षन्भावे कृते टिलोपेन सिद्धम्। नैवं शक्यम्। इह हि स्थूलशिरस इदं स्थौलशीर्षमित्यनणीति प्रकृतिभावः प्रसज्येत[3]। तस्मान्नैवं शक्यम्। न चेदेवं शिरसो ग्रहणेन ग्रहणाच्छीर्षन्भावः प्राप्नोति॥ पाक्षिक एष दोषः। कतरस्मिन्पक्षे। ष्यङ्विधौ द्वैतं भवति[4]। अणिञोर्वादेशः ष्यङणिञ्भ्यां वा पर इति। तद्यदा तावदणिञोरादेशस्तदैष दोषः। यदा ह्यणिञ्भ्यां परो न तदा दोषो भवत्यणिञ्भ्यां व्यवहितत्वात्॥*

पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्शकन्नुदन्नासञ्शस्प्रभृतिषु

॥ ६। १। ६३ ॥

पदादिषु मांस्पृत्स्नूनामुपसंख्यानम्॥ १॥

शस्प्रभृतिष्वित्युच्यतेऽशस्प्रभृतिष्वपि दृश्यते। शलां दोषंणी[5]। ककुद्दोषणी याचते महादेवः[6]॥

पदादिषु मांस्पृत्स्नूनामुपसंख्यानं कर्तव्यम्। यन्नीक्षणं मांस्पचन्याः[7]। मांसपचन्या इति प्राप्ते। मांस्॥ पृत्। पृत्सु मर्त्यम्[8]। पृतनासु मर्त्यमिति प्राप्ते। पृत्॥ स्नु। न ते दिवो न पृथिव्या अधि स्नुषु[9]। अधि सानुष्विति प्राप्ते॥

---

* [V. M. om. अचि शीर्षः (६२) which in fact is Vārtika No 3].

[1] बाह्वादिषु च (वाह्वादिषु शिरःशब्दस्य पाठात् केवलस्यापत्येनायोगात्तदन्तविधिः। कै.) ४. १. ९६. [2] अणिञोरनार्ष्ययोर्गुरूपोत्तमयोः ष्यङ् गोत्रे. ४. १. ७८. [3] तस्यापत्यम्; अन्. ४. ३. १२०; ६. ४. १६७. [4] ष्यङ्यनादेशे नलोपवचनम्; द्विरज्विधिः; आदेशे नलोपवचनम्; न वा ष्यङो लोपनिमित्तत्वात्. ४. १. ७८ वा. १. २. ३. ४. भाष्य. [5] मै. सं ४. १३. ४. only the udātta accent is marked with a stroke above. [6] बृहस्पतिः ककुद्...त्वष्टां चायमा च दोषणी महादेवो बाहू अथ० सं० ९. ७. ५-७. [7] ऋ. सं. १. १६२. १३. [8] ऋ. सं १. २७. ७. [9] वा. सं १७ १४.

नस्नासिकाया यत्तस्क्षुद्रेषु ॥ २ ॥

यत्तस्क्षुद्रेषु परतो नासिकाया नस्भावो वक्तव्यः । यत् । नस्यम्[1] । यत् ॥ तस् । नस्तः[2] । तस् । क्षुद्र । नःक्षुद्रः ॥

अवर्णनगरयोरिति वक्तव्यम् । इह मा भूत् । नासिक्यो वर्णः । नासिक्यं नगरम् ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । इह तावन्नासिक्यो वर्ण इति परिमुखादिषु[3] पाठः करिष्यते । नासिक्यं नगरमिति संकाशादिषु[4] पाठः करिष्यते ॥

धात्वादेः षः सः ॥ ६ । १ । ६४ ॥

धातुग्रहणं किमर्थम् । इह मा भूत् । षोडन् षण्डः षडिकः ॥ अथादिग्रहणं किमर्थम् । इह मा भूत् । पेष्टा पेष्टुम् । नैतदस्ति प्रयोजनम् । अस्त्वत्र सत्वं सत्वे कृत इण उत्तरस्यादेशसकारस्येति[5] षत्वं भविष्यति ॥ इदं तर्हि । लषिता लषितुम् । इदं चाप्युदाहरणम् । पेष्टा पेष्टुम् । ननु चोक्तमस्त्वत्र सत्वं सत्वे कृत इण उत्तरस्यादेशसकारस्येति षत्वं भविष्यतीति । नैवं शक्यम् । इह हि पेक्ष्यतीति षत्वस्यासिद्धत्वात् षढोः कः सि [८. २. ४१] इति कत्वं न स्यात् ॥

सादेशे सुब्धातुष्ठिवुष्वष्कतिनीं प्रतिषेधः ॥ १ ॥

सादेशे सुब्धातुष्ठिवुष्वष्कतीनां प्रतिषेधो वक्तव्यः । सुब्धातु । षोडीयति षण्डीयति । ष्ठिवु । ष्ठीवति । ष्वष्क । ष्वष्कते ॥ सुब्धातूनां तावन्न वक्तव्यः । उपदेशे इति[6] वर्तत उद्देशश्च प्रातिपदिकानां नोपदेशः ॥ यद्येवं नार्थो धातुग्रहणेन । कस्मान्न भवति षोडन् षण्डः षडिक इति । उपदेश इति वर्तते उद्देशश्च प्रातिपदिकानां नोपदेशः ॥ ष्ठिवेरपि द्वितीयो वर्णष्ठकारः । यदि ठकारस्तेष्ठीव्यत इति न सिध्यति । एवं तर्हि थकारः । यदि थकारष्टुष्ठ्यूषति टेष्ठीव्यत इति न सिध्यति । एवं तर्हि द्वाविमौ ष्ठिवू । एकस्य द्वितीयो वर्णष्ठकारोऽपरस्य थकारः । यस्य थकारस्तस्य सत्वं प्राप्नोति ॥ एवं तर्हि द्वाविमौ द्विषकारौ ष्ठिवुष्वष्कती । किं कृतं भवति । पूर्वस्य सत्वे कृते परेण संनिपाते ष्टुत्वं भविष्यति[7] । नैवं शक्यम् । इह हि श्वलिट् ष्ठीव्यति मधुलिट् ष्वष्कते ष्टुत्वस्यासिद्धत्वाड्डः सि धुट् [८. ३. २९]

---

[1] शरीरावयवाद्यत् ५. १. ६. [2] अपादाने चाहीयरुहोः ५. ४. ४५. [3] व्यप्रकरणे परिमुखादिभ्य उपसंख्यानम् ४. ३. ५८ वा. १. [4] वुञ्छण्कठजिल...संकाशबलपक्ष...कुमुदादिभ्यः ४. २. ८०. [5] आदेशप्रत्यययोः ८. ३. ५९. [6] आदेच उपदेशेऽशिति ६. १. ४५. [7] ष्टुना ष्टुः ८. ४. ४१.

इति धुट् प्रसज्येत ॥ एवं तर्हि यकारादी ष्ठिवुष्वष्कती । किं यकारो न श्रूयते । लुप्तनिर्दिष्टो[1] यकारः ॥

अथ किमर्थं षकारमुपदिश्य तस्य सकार आदेशः क्रियते न सकार एवोपदिश्येत । लघ्वर्थमित्याह । कथम् । अविशेषेणायं षकारमुपदिश्य सकारमादेशमुक्त्वा लघुनोपायेन षत्वं निर्वर्तयत्यादेशप्रत्यययोः [८. ३. ५९] इति । इतरथा हि येषां षत्वमिष्यते तेषां तत्र ग्रहणं कर्तव्यं स्यात् ॥

के पुनः षोपदेशा धातवः पठितव्याः । कोऽत्र भवतः पुरुषकारः । यद्यन्तरेण पाठं किंचिच्छक्यते वक्तुं तदुच्यताम् । अन्तरेणापि पाठं किंचिच्छक्यते वक्तुम् । कथम् । अज्दन्त्यपराः सादयः षोपदेशाः स्मिङ्स्वदिस्विदिस्वञ्जिस्वपयश्च सृपिसृजिस्तृस्त्यासेकृसृवर्जम् ॥

णो नः ॥ ६ । १ । ६५ ॥

अथ किमर्थं णकारमुद्दिश्य तस्य नकार आदेशः क्रियते न नकार एवोपदिश्येत । लघ्वर्थमित्याह । कथम् । अविशेषेणायं णकारमुपदिश्य तस्य नकारमादेशमुक्त्वा तस्य लघुनोपायेन णत्वं निर्वर्तयत्युपसर्गादसमासेऽपि णोपदेशस्य [८. ४. १४] इति । इतरथा हि येषां णत्वमिष्यते तेषां तत्र ग्रहणं कर्तव्यं स्यात् ॥

के पुनर्णोपदेशा धातवः पठितव्याः । कोऽत्र भवतः पुरुषकारः । यद्यन्तरेण पाठं किंचिच्छक्यते वक्तुं तदुच्यताम् । अन्तरेणापि पाठं किंचिच्छक्यते वक्तुम् । कथम् । सर्वे नादयो णोपदेशा नृतिनन्दिनर्दिनक्किनाटिनाथृनाधृनॄवर्जम् ॥

लोपो व्योर्वलि ॥ ६ । १ । ६६ ॥

व्योर्लोपे क्वावुपसंख्यानम् ॥ १ ॥

व्योर्लोपे क्वावुपसंख्यानं कर्तव्यम् । इहापि यथा स्यात् । कण्डूयतेरप्रत्ययः कण्डूरिति । किं पुनः कारणं न सिध्यति । वलीत्युच्यते न चात्र वलादिं पश्यामः । ननु चायं क्विबेव वलादिर्भवति । क्विब्लोपे[2] कृते वलाद्यभावान्न प्राप्नोति ॥ इदमिह

---

[1] लोपो व्योर्वलि ६. १. ६६.

[2] वेरपृक्तस्य ६. १. ६७.

संप्रधार्थम् । क्विब्लोपः क्रियतां यलोप इति किमत्र कर्तव्यम् । परत्वात् क्विब्लोपो नित्यत्वाच । नित्यः खल्वपि क्विब्लोपः । कृतेऽपि यलोपे प्राप्नोत्यकृतेऽपि प्राप्नोति । नित्यत्वात् परत्वाच्च क्विब्लोपः । क्विब्लोपे कृते वलाद्यभावाद्यलोपो न प्राप्नोति ॥ एवं तर्हि प्रत्ययलक्षणेन[1] भविष्यति । वर्णाश्रये नास्ति प्रत्ययलक्षणम् । यदि वा कानिचिद्वर्णाश्रयाणि प्रत्ययलक्षणेन भवन्ति तथेदमपि भविष्यति ॥ अथवैवं वक्ष्यामि । लोपो व्योर्वलि । ततो वेः[2] । व्यन्तयोश्च व्योर्लोपो भवति । ततोऽपृक्तस्य । अपृक्तस्य च लोपो भवति । वेरित्येव ॥

वलोपाप्रसिद्धिरूड्भाववचनात् ॥ २ ॥

वलोपस्याप्रसिद्धिः । आस्रेमाणम् जीरदानुरिति । किं कारणम् । ऊड्भाववचनात् । च्छ्वोः शूडनुनासिके च [३. ४. १९] इत्यूट् प्राप्नोति ॥

अतिप्रसङ्गो व्रश्चादिषु ॥ ३ ॥

व्रश्चादिषु चातिप्रसङ्गो भवति । इहापि प्राप्नोति । व्रश्चनः व्रीहिः व्रण इति ॥ उपदेशसामर्थ्याद्व्रश्चादिषु लोपो न भविष्यति ।

उपदेशसामर्थ्यात्सिद्धमिति चेत्संप्रसारणहलादिशेषेषु सामर्थ्यम् ॥ ४ ॥

उपदेशसामर्थ्यात्सिद्धमिति चेदस्त्यन्यदुपदेशवचने प्रयोजनम् । संप्रसारणहलादिशेषेषु कृतेषु वकारस्य श्रवणं यथा स्यात् । वृक्णवान् विव्रश्चिषतीति ॥

न वा बहिरङ्गलक्षणत्वात् ॥ ५ ॥

न वैतत् प्रयोजनमस्ति । किं कारणम् । बहिरङ्गलक्षणत्वात् । बहिरङ्गाः संप्रसारणहलादिशेषाः । अन्तरङ्गो लोपः । असिद्धं बहिरङ्गमन्तरङ्गे ॥

अनारम्भो वा ॥ ६ ॥

अनारम्भो वा पुनर्वलोपस्य न्याय्यः । कथमास्रेमाणम् जीरदानुरिति ।

आस्रेमाणं जीरदानुरिति वर्णलोपात् ॥ ७ ॥

आस्रेमाणम् जीरदानुरिति च्छान्दसाद्वर्णलोपात्सिद्धम् ।

---

[1] प्रत्ययलोपे प्रत्ययलक्षणम् १. १. ६२.

[2] वेरपृक्तस्य ६. १. ६७.

यथा संस्फानो गयस्फानः ॥ ८ ॥

तद्यथा । संस्फायनः संस्फानः । गयस्फायनो गयस्फान इति ॥

वेरपृक्तस्य ॥ ६ । १ । ६७ ॥

दर्विजागृव्योः प्रतिषेधो वक्तव्यः । दर्विः जागृविः ॥ किमुच्यते दर्विजागृव्योः प्रतिषेधो वक्तव्य इति यदापृक्तस्येत्युच्यते । भवति वै किंचिदाचार्याः क्रियमाणमपि चोदयन्ति । तद्वा कर्तव्यं दर्विजागृव्योर्वा प्रतिषेधो वक्तव्यः ॥

वेर्लोपे दर्विजागृव्योरप्रतिषेधोऽनुनासिकपरत्वात् ॥ १ ॥

वेर्लोपे दर्विजागृव्योरप्रतिषेधः । अनर्थकः प्रतिषेधोऽप्रतिषेधः । लोपः कस्मान्न भवति । अनुनासिकपरत्वात् । अनुनासिकपरस्य विशब्दस्य ग्रहणं न चात्रानुनासिकपरो विशब्दः शुद्धपरश्चात्र विशब्दः ॥ यद्यनुनासिकपरस्य विशब्दस्य ग्रहणमित्युच्यते घृतस्पृक् दलस्पृक्[1] अत्र न प्राप्नोति । न ह्येतस्माद्विशब्दादनुनासिकं परं पश्यामः । अनुनासिकपरत्वादिति नैवं विज्ञायते अनुनासिकः परोऽस्मात्सोऽयमनुनासिकपरः अनुनासिकपरत्वादिति । कथं तर्हि । अनुनासिकः परोऽस्मिन्सोऽयमनुनासिकपरः अनुनासिकपरत्वादिति ॥ एवमपि प्रियदर्वि[2] अत्र प्राप्नोति । असिद्धोऽत्रानुनासिकः ॥ एवमपि धात्वन्तस्य प्रतिषेधो वक्तव्यः । इवि दिवि धिवि ।

धात्वन्तस्य चार्थवद्ग्रहणात् ॥ २ ॥

अर्थवतो विशब्दस्य ग्रहणं न धात्वन्तोऽर्थवान् ॥

वस्य वानुनासिकत्वात्सिद्धम् ॥ ३ ॥

अथवा वकारस्यैवेदमनुनासिकस्य ग्रहणम् । सन्ति हि यणः सानुनासिका निरनुनासिकाश्च ॥

---

[1] स्पृशोऽनुदके क्विन् ३. २. ५८. [2] अणोऽप्रगृह्यस्यानुनासिकः ८. ४. ५७.

हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् ॥ ६ । १ । ६८ ॥

यदि पुनरयमपृक्तलोपः संयोगान्तलोपो[1] विज्ञायेत । किं कृतं भवति । द्विहल्पृक्तग्रहणं तिस्योश्च ग्रहणं न कर्तव्यं भवति ।

हलन्तादपृक्तलोपः संयोगान्तलोपश्चेन्नलोपाभावो यथा पचन्निति ॥ १ ॥

हलन्तादपृक्तलोपः संयोगान्तलोपश्चेन्नलोपाभावः । राजा तक्षा । संयोगान्तलोपस्यासिद्धत्वान्नलोपो[2] न प्राप्नोति । यथा पचन्निति । तद्यथा । पचन् यजन्नित्यत्र संयोगान्तलोपस्यसिद्धत्वान्नलोपो न भवति ॥ नैष दोषः । आचार्यप्रवृत्तिर्ज्ञापयति सिद्धः संयोगान्तलोपो नलोप इति यदयं न ङिसंबुद्ध्योः [८. २. ८] इति संबुद्धौ प्रतिषेधं शास्ति । इहापि तर्हि प्राप्नोति पचन् यजन् । तुल्यजातीयस्य ज्ञापकं भवति । कश्च तुल्यजातीयः । संबुद्धावनन्तरः ॥

वस्वादिषु दत्वं संयोगादिलोपबलीयस्त्वात्

वस्वादिषु दत्वं[3] न सिध्यति । उखास्रत् पर्णध्वत् । किं कारणम् । संयोगादिलोपबलीयस्त्वात् । संयोगान्तलोपात्संयोगादिलोपो[4] बलीयान् ॥

यथा कूटतडिति ॥ २ ॥

तद्यथा । कूटतट् काष्ठतडित्यत्र संयोगान्तलोपात्संयोगादिलोपो बलीयान्भवति ॥ ननु च दत्वे कृते न भविष्यति । असिद्धं दत्वं तस्यासिद्धत्वात्प्राप्नोति । सिद्धकाण्डे[5] पठितं वस्वादिषु दत्वं सौ दीर्घत्व इति । तत्र सौदीर्घत्वग्रहणं न करिष्यते । वस्वादिषु दत्वमित्येव ॥ एवमप्यपदान्तत्वान्न प्राप्नोति । अथ सावपि पदं भवति राजा तक्षा नलोपे कृते विभक्तेः श्रवणं प्राप्नोति । सैषोभयतस्पाशा रज्जुर्भवति[6] ॥

रात्तलोपो नियमवचनात् ॥ ३ ॥

रात्तलोपो वक्तव्यः । अबिभर्भवान् अजागर्भवान् । किं पुनः कारणं न सिध्यति । नियमवचनात् । रात्सस्य [८. २. २४] इत्येतस्मान्नियमान्न प्राप्नोति ॥

---

[1] संयोगान्तस्य लोपः ८. २. २३. [2] नलोपः प्रातिपदिकान्तस्य ८. २. ७. [3] वसुस्रंसुध्वंस्वनडुहां दः ८. २. ७२. [4] स्कोः संयोगाद्योरन्ते च ८. २. २९. [5] वस्वादिषु दत्वं सौ दीर्घत्वे ८. २. ६ वा. ८. [6] Ben. सेषोभयतःस्पाशा.

नैष दोषः । रात्सस्येत्यत्र तकारोऽपि निर्दिश्यते । यद्येवं कीर्तयतेरप्रत्ययः कीरिति प्राप्नोति कीर्त् इति चेष्यते । यथालक्षणमप्रयुक्ते ॥

रोरुत्त्वं च ॥ ४ ॥

रोश्चोत्त्वं वक्तव्यम् । अभिनोऽत्र । अच्छिनोऽत्र । संयोगान्तलोपस्यासिद्धत्वादतो ऽतीत्युत्वं[1] न प्राप्नोति ॥

न वा संयोगान्तलोपस्योत्त्वे सिद्धत्वात्

न वैष दोषः । किं कारणम् । संयोगान्तलोपस्योत्त्वे सिद्धत्वात् । संयोगान्तलोप उत्त्वे सिद्धो भवति ॥

यथा हरिवो मेदिनमिति ॥ ५ ॥

तद्यथा ।.... हरिवो मेदिनं[2] त्वेत्यत्र संयोगान्तलोप उत्त्वे सिद्धो भवति ॥

स एव तर्हि दोषः सैषोभयतस्पाशेति । तस्मादशक्योऽपृक्तलोपः संयोगान्तलोपो विज्ञातुम् । न चेद्विज्ञायते द्विहलपृक्तग्रहणं तिस्योश्च ग्रहणं कर्तव्यमेव ॥

एङ्ह्रस्वात्संबुद्धेः ॥ ६ । १ । ६९ ॥

संबुद्धिलोपे डतरादिभ्यः प्रतिषेधः ॥ १ ॥

संबुद्धिलोपे डतरादिभ्यः प्रतिषेधो वक्तव्यः । हे कतरत् । हे कतमत्[3] ॥ किमुच्यते डतरादिभ्यः प्रतिषेधो वक्तव्य इति यदापृक्तस्येत्यनुवर्तते[4] ।

अपृक्ताधिकारस्य निवृत्तत्वात् ॥ २ ॥

निवृत्तोऽपृक्ताधिकारः ॥ किं डतरादिभ्यः प्रतिषेधं वक्ष्यामीत्यतोऽपृक्ताधिकारो निवर्त्यते । नेत्याह ।

---

[1] दश्च; अतो रोरप्लुतादप्लुते ८. २. ७५; ६. १. ११३. [2] तै. सं. ४।७।१४।४.
[3] अद्ड्डतरादिभ्यः पञ्चभ्यः ७. १. २५. [4] वेरपृक्तस्य ६. १. ६७,

तच्चामर्थम् ॥ ३ ॥

स चावश्यमपृक्ताधिकारो निवर्त्यः । किमर्थम् । अमर्थम् । अमो[1] लोपो यथा स्यात् । हे कुण्ड । हे पीठ ॥ निवृत्तेऽपि वा अपृक्ताधिकारे ऽमो लोपो न प्राप्नोति । किं कारणम् । न हि लोपः सर्वापहारी । मा भूत्सर्वस्य लोपः । अलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य लोपे कृते द्वयोरकारयोः पररूपेण[2] सिद्धं रूपं स्यात् । हे कुण्ड हे पीठेति ॥ यद्येतल्लभ्येत कृतं स्यात् । तत्तु न लभ्यम् । किं कारणम् । अत्र हि तस्मादित्युत्तरस्यादेः परस्य [१. १. ६७, २४] इत्यकारस्य लोपः प्राप्नोति । अकारलोपे च सति मकारे ऽतो दीर्घो यञि सुपि च [७. २. १०१, १०२] इति दीर्घत्वे हे कुण्डाम् हे पीठामित्येतद्रूपं प्रसज्येत ॥ एवं तर्हि हलो लोपः संबुद्धिलोपः । तद्धल्ग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् [६८] इति । तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । नैष दोषः । एङ्ह्रस्वादित्येषा पञ्चमी हलित्यस्याः प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति । एवमपि प्रथमयोः पूर्वसवर्णदीर्घत्वे[3] कृते हे कुण्डा हे पीठा इत्येतद्रूपं प्रसज्येत । अमि पूर्वत्वमत्र बाधकं भविष्यति[4] । अमीत्युच्यते न चात्रामं पश्यामः । एकदेशविकृतमनन्यवद्भवतीति ॥ अथवेदमिह संप्रधार्यम् । संबुद्धिलोपः क्रियतामेकादेश इति किमत्र कर्तव्यम् । परत्वादेकादेशः । एवमप्येकादेशे कृते व्यपवर्गाभावात्संबुद्धिलोपो न प्राप्नोति । अन्तादिवद्भावेन व्यपवर्गो भविष्यति । उभयत आश्रये नान्तादिवत् । नोभयत आश्रयः करिष्यते । कथम् । नैवं विज्ञायते ह्रस्वादुत्तरस्याः संबुद्धेर्लोपो भवतीति । कथं तर्हि । ह्रस्वादुत्तरस्य हलो लोपो भवति स चेत्संबुद्धेरिति ॥

स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः ।

उक्तं वा ॥ ४ ॥

किमुक्तम् । सिद्धमनुनासिकोपधत्वादिति[5] ॥ एवमपि दलोपः साधीयः प्राप्नोति । दुक्करणाद्वा[6] । अथवा दुग्डतरादीनामिति वक्ष्यामि[7] ॥ डित्करणाद्वा[8] । अथवा डिदच्छब्दः करिष्यते । स तर्हि डकारः कर्तव्यः । न कर्तव्यः । क्रियते न्यास एव । द्विडकारको निर्देशः । अड्डुतरादिभ्य इति ॥ एवमपि लोपः प्राप्नोति । विहितविशेषणं ह्रस्वग्रहणम् । यस्माद् ह्रस्वात्संबुद्धिर्विहितेति ॥

---

[1] अतोऽम् ७. १. २४. [2] अलोन्त्यस्य; अतो गुणे १. १. ५२; ६. १. ९७. [3] प्रथमयोः पूर्वसवर्णः ६. १. १०२. [4] अमि पूर्वः ६ १. १०७. [5] सिद्धमनुनासिकोपधत्वात् ७. १. २५ वा. २. [6] दुक्करणत्वाद्वा ७. १. २५ वा. ३. [7] अथवा दुग्डतरादीनामिति वक्ष्यामि ७. १. २३ वा. ३ महाभाष्य. [8] डित्करणत्वाद्वा ७. १. २५ वा. ४.

अपृक्तसंबुद्धिलोपाभ्यां लुक् ॥ ५ ॥

अपृक्तसंबुद्धिलोपाभ्यां लुग्भवति विप्रतिषेधेन। अपृक्तलोपस्यावकाशः[1]। गोमान् यवमान्। लुकोऽवकाशः[2]। त्रपु जतु। इहोभयं प्राप्नोति। तद्ब्राह्मणकुलम् यद्ब्राह्मणकुलम्। संबुद्धिलोपस्यावकाशः। अग्ने वायो। लुकः स एव। इहोभयं प्राप्नोति। हे त्रपु। हे जतु। लुग्भवति विप्रतिषेधेन[3] ॥ स तर्हि विप्रतिषेधो वक्तव्यः। न वक्तव्यः।

न वा लोपलुकोर्लुगवधारणाद्यथानडुह्यत इति ॥ ६ ॥

न वार्थो विप्रतिषेधेन। किं कारणम्। लोपलुकोर्लुगवधारणात्। लोपलुकोर्हि लुगवधार्यते। लुग्लोपयणयवायावेकादेशेभ्य[4]ः। यथानडुह्यत इति। तद्यथा। अनड्वानिवाचरत्यनडुह्यत इत्यत्र लोपलुकोर्लुगवधार्यते[5]। एवमिहापि ॥

शेश्छन्दसि बहुलम् ॥ ६। १। ७० ॥

अयं योगः शक्योऽवक्तुम्। कथमग्ने॒ त्री ते॒ वाजि॑ना॒ त्री ष॒धस्था॑[6]। ताता पिण्डा॑नाम्[7] इति। पूर्वसवर्णेनाप्येतत्सिद्धम्[8] ॥ न सिध्यति। नुमा[9] व्यवहितत्वात्पूर्वसवर्णो न प्राप्नोति ॥ छन्दसि नपुंसकस्य पुंवद्भावो वक्तव्यो मधोर्गृह्णाति मधोस्तृप्ता इवासत इत्येवमर्थम्। तत्र पुंवद्भावेन नुमो निवृत्तिः। नुमि निवृत्ते पूर्वसवर्णेन सिद्धम् ॥ भवेत्सिद्धमग्ने॒ त्री ते॒ वाजि॑ना॒ त्री ष॒धस्था इति। इदं तु न सिध्यति ताता[10] पिण्डा॑नाम् इति ॥ इदमपि सिद्धम्। कथम्। साप्तमिके[11] पूर्वसवर्णे कृते पुनः षाष्ठिको भविष्यति ॥ एवमपि जसि गुणः[12] प्राप्नोति ॥ वक्ष्यत्येतज्जसादिषु च्छन्दोवावचनं प्राङ् णौ चङ्युपधाया इति[13] ॥

ह्रस्वस्य पिति कृति तुक् ॥ ६। १। ७१ ॥

तुकि पूर्वान्ते नपुंसकोपसर्जनह्रस्वत्वं द्विगुस्वरश्च ॥ १ ॥

तुकि[14] पूर्वान्ते नपुंसकोपसर्जनह्रस्वत्वं द्विगुस्वरश्च न सिध्यति[15]।

---

[1] हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् ६. १. ६८. [2] स्वमोर्नपुंसकात् ७. १. २३. [3] ह्रस्वस्य गुणः; न लुमताङ्गस्य ७. ३. १०८; १. १. ६३. [4] १. ४. २. वा. २५. [5] सुपो धातुप्रातिपदिकयोः; हल्ङ्याब्भ्यो दीर्घात् ... हल् २. ४. ७१; ६. १. ६८. [6] ऋ. सं. ३. २०. २. [7] ऋ. सं. १. १६२. १९. [8] प्रथमयोः पूर्वसवर्णः ६. १. १०२. [9] नपुंसकस्य झलचः ७. १. ७२. [10] नादिचि ६. १. १०४. [11] सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ७. १. ३९. [12] जसि च ७. ३. १०९. [13] ७. ३. १०९ वा. १. [14] छे च; दीर्घात्; पदान्ताद्वा ६. १. ७३; ७५; ७६. [15] ह्रस्वो नपुंसके प्रातिपदिकस्य; गोस्त्रियोरुपसर्जनस्य; इगन्तकालकपालभगालशरावेषु द्विगौ १. २. ४७; ४८; ६. २. २९.

आराशस्त्रि च्छत्रम् धानाशष्कुलि च्छत्रम्। निष्कौशाम्बि च्छत्रम् निर्वाराणसि च्छत्रम्। द्विगुस्वर। पञ्चारत्नि च्छत्रम् दशारत्नि च्छत्रम्। तुकि कृते ऽनन्त्यत्वादेते विधयो न प्राप्नुवन्ति ॥

न वा बहिरङ्गलक्षणत्वात् ॥ २ ॥

न वैष दोषः। किं कारणम्। बहिरङ्गलक्षणत्वात्। बहिरङ्गलक्षणस्तुक्। अन्तरङ्गा एते विधयः। असिद्धं बहिरङ्गमन्तरङ्गे ॥ इह तर्हि ग्रामणिपुत्रः सेनानिपुत्र इति ह्रस्वत्वे[1] कृते तुक् प्राप्नोति ॥

ग्रामणिपुत्रादिषु चाप्राप्तिः ॥ ३ ॥

ग्रामणिपुत्रादिषु चाप्राप्तिः। किं कारणम्। बहिरङ्गलक्षणत्वादेव ॥ अथवा परादिः करिष्यते ॥

परादौ संयोगादेरित्यतिप्रसङ्गः ॥ ४ ॥

परादौ संयोगादेरित्यतिप्रसङ्गो भवति। अपच्छायात्। वान्यस्य संयोगादेः [६. ४. ६८] इत्येत्वं प्रसज्येत ॥

विलोपवचनं च ॥ ५ ॥

वेश्च लोपो वक्तव्यः। अग्निचित् सोमसुत्। अपृक्तस्येति[2] वेर्लोपो न प्राप्नोति ॥ नैष दोषः। अपृक्तग्रहणं न करिष्यते। यदि न क्रियते दर्विः जागृविः अत्रापि प्राप्नोति। अनुनासिकपरस्य विशब्दस्य ग्रहणं शुद्धपरश्चात्र विशब्दः। एवमपि सतुक्कस्य लोपः प्राप्नोति। निर्दिश्यमानस्यादेशा भवन्तीत्येवं न भविष्यति ॥

इट्प्रतिषेधश्च ॥ ६ ॥

इट्प्रतिषेधश्च वक्तव्यः। परीतत्[3]। सतुक्कस्य वलादिलक्षण इट् प्रसज्येत[4] ॥ एवं तर्ह्यभक्तः करिष्यते।

अभक्ते स्वरः ॥ ७ ॥

यद्यभक्तस्तर्हि स्वरे दोषो भवति। दधि च्छादयति। मधु च्छादयति। तिङ-

---

[1] इको ह्रस्वोऽङ्यो गालवस्य ६. ३. ६१. [2] वेरपृक्तस्य ६. १. ६७. [3] गमः क्वौ ६. ४. ४०, गमादीनामिति वक्तव्यम् ६. ४. ४० वा. १; नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ६. ३. ११६. [4] आर्धधातुकस्येड् वलादेः ७. २. ३५.

तिङः [८. १. २८] इति निघातो न प्राप्नोति । ननु च तुगेवातिङ् । न तुकः परस्य निघातः प्राप्नोति । किं कारणम् । नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः । नञ्युक्त इवयुक्ते वान्यस्मिंस्तत्सदृशे कार्यं विज्ञायते तथा ह्यर्थो गम्यते । तद्यथा । अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशमेवानयति नासौ लोष्टमानीय कृती भवति । एवमिहाप्यतिङिति तिङ्प्रतिषेधादन्यस्मादतिङस्तिङ्सदृशात्कार्यं विज्ञास्यते । किं चान्यदतिङ् तिङ्सदृशम् । पदम् ॥

संहितायाम् ॥ ६ । १ । ७२ ॥

अयं योगः शक्योऽवक्तुम् । कथम् । अधिकरणं नाम त्रिप्रकारं व्यापकमौपश्लेषिकं वैषयिकमिति । शब्दस्य च शब्देन कोऽन्योऽभिसंबन्धो भवितुमर्हत्यन्यदत उपश्लेषात् । इको यणचि [६. १. ७७] अच्युपश्लिष्टस्येति । तत्रान्तरेण संहिताग्रहणं संहितायामेव भविष्यति ॥ *

आङ्माङोश्च ॥ ६ । १ । ७४ ॥

अथ किमर्थमाङ्माङोः सानुबन्धकयोर्निर्देशः ।

आङ्माङोः सानुबन्धकनिर्देशो गतिकर्मप्रवचनीयप्रतिषेधसंप्रत्ययार्थः ॥ १ ॥

आङ्माङोः सानुबन्धकयोर्निर्देशः क्रियत आङो गतिकर्मप्रवचनीयसंप्रत्ययार्थो माङः प्रतिषेधसंप्रत्ययार्थः । इह मा भूत् । आ छाया आ च्छाया । प्रमा छन्दः प्रमा च्छन्दः[1] ॥

दीर्घात् ॥ ६ । १ । ७५ ॥

पदान्ताद्वा ॥ ६ । १ । ७६ ॥

दीर्घात्पदान्ताद्वा विश्वजनादीनां छन्दसि ॥ १ ॥

दीर्घात्पदान्ताद्वेत्यत्र विश्वजनादीनां छन्दस्युपसंख्यानं कर्तव्यम् । विश्वजनस्य छत्रम् विश्वजनस्य च्छत्रम् । न छायां कुरवोऽपराम् न च्छायां कुरवोऽपराम् ॥

---

* [V. M. om. छे च (७३)].

[1] पदान्ताद्वा ६. १. ७६.

इको यणचि ॥ ६ । १ । ७७ ॥

इग्ग्रहणं किमर्थम् । इह मा भूत् । अग्निचिदत्र सोमसुदत्र । नैतदस्ति प्रयोजनम् । जश्त्वमत्र बाधकं भविष्यति[१] ।

जश्त्वं न सिद्धं यणमत्र पश्य

असिद्धमत्र जश्त्वं तस्यासिद्धत्वाद्यणादेशः प्राप्नोति ॥

यश्चापदान्तो हलचश्च पूर्वः ।

यश्चापदान्तो हलचश्च पूर्वस्तस्य प्राप्नोति । पचतीति ॥ एवं तर्हि

दीर्घस्य यण्

दीर्घस्य यणादेशं वक्ष्यामि । तद्दीर्घग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क प्रकृतम् । दीर्घात्पदान्ताद्वा । [७५, ७६] इति । तद्वै पञ्चमीनिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । अचीत्येषा सप्तमी दीर्घादिति पञ्चम्याः षष्ठीं प्रकल्पयिष्यति तस्मिन्निति निर्दिष्टे पूर्वस्य [१. १. ६६] इति ॥ भवेत्सिद्धं कुमार्यत्र ब्रह्मबन्ध्वर्थमिति । इदं तु न सिध्यति दध्यत्र मध्वत्रेति ।

ह्रस्व इति प्रवृत्तं

ह्रस्वग्रहणमपि प्रकृतमनुवर्तते । क प्रकृतम् । ह्रस्वस्य पिति कृति [७१] इति ।। यदि तदनुवर्तते दीर्घात्पदान्ताद्वा ह्रस्वस्येति ह्रस्वादपि पदान्ताद्विकल्पेन प्राप्नोति ।

संबन्धवृत्त्या

संबन्धमनुवर्तिष्यते । ह्रस्वस्य पिति कृति तुक् [७१] । संहितायाम् [७२] ह्रस्वस्य पिति कृति तुक् । छे च [७३] ह्रस्वस्य पिति कृति तुक् । आङ्माङोश्च [७४] ह्रस्वस्य पिति कृति तुक् । दीर्घात्पदान्ताद्वा [७५, ७६] ह्रस्वस्य पिति कृति तुक् । तत इको यणचि । ह्रस्वस्येति वर्तते पिति कृति तुगिति निवृत्तम् ॥ इह तर्हि प्राप्नोति । चयनम् चायकः । लवनम् लावकः । अयादयोऽत्र

---

[१] झलां जशोन्ते. ८. २. ३९.

बाधका भविष्यन्ति[1] ॥ इह तर्हि प्राप्नोति । खट्वेन्द्रः मालेन्द्रः । खट्वैलका मालैलका ।

गुणवृद्धिबाध्यः ॥

गुणवृद्धी अत्र बाधिके भविष्यतः[2] ॥ इदं तर्हि प्रयोजनमिकोऽचि यणेव यथा स्याद्यदन्यत् प्राप्नोति तन्मा भूदिति । किं चान्यत् प्राप्नोति । शाकलम् । सिन्नित्यसमासयोः शाकलप्रतिषेधं चोदयिष्यति[3] स न वक्तव्यो भवति ॥

यणादेशः प्लुतपूर्वस्य च ॥ १ ॥

यणादेशः प्लुतपूर्वस्य चेति वक्तव्यम् । अग्ना३इ इन्द्रम् अग्ना३यिन्द्रम् । पटा३उ उदकम् पटा३वुदकम् । अग्ना३इ आशा अग्ना३याशा । पटा३उ आशा पटा३वाशा[4] । किं पुनः कारणं न सिध्यति । असिद्धः प्लुतः प्लुतविकारौ चेमौ ॥ सिद्धः प्लुतः स्वरसंधिषु । कथं ज्ञायते । यदयं प्लुतप्रगृह्या अचि [६. १. १२५] इति प्लुतस्य प्रकृतिभावं शास्ति तज्ज्ञापयत्याचार्यः सिद्धः प्लुतः स्वरसंधिष्विति । कथं कृत्वा ज्ञापकम् । सतो हि कार्यिणः कार्येण भवितव्यम् ॥ इदं तर्हि प्रयोजनम् ।

दीर्घशाकलप्रतिषेधार्थम् ॥ २ ॥

दीर्घत्वं शाकलं च[5] मा भूदिति ॥ एतदपि नास्ति प्रयोजनम् । आरभ्यते प्लुतपूर्वस्य यणादेशस्तयोर्य्वावचि संहितायाम् [८. २. १०८] इति तद्दीर्घशाकलप्रतिषेधार्थं भविष्यति ॥ तन्न वक्तव्यं भवति ॥ ननु च तस्मिन्नप्युच्यमान इदं न वक्तव्यं भवति ॥ अवश्यमिदं वक्तव्यं यौ प्लुतपूर्वाविदुतावप्लुतविकारौ तदर्थम् । भो३इ इन्द्रम् भो३यिन्द्रम् । भो३इ इह भो३यिहेति ॥ यदि तर्ह्यस्य निबन्धनमस्तीदमेव वक्तव्यं तन्न वक्तव्यम् ॥ तदप्यवश्यं स्वरार्थं वक्तव्यम् । अनेन हि सत्युदात्तस्वरितयोर्यणः [८. २. ४] इत्येष स्वरः प्रसज्येत । तेन पुनः सत्यसिद्धत्वान्न भविष्यति ॥ यदि तर्हि तस्य निबन्धनमस्ति तदेव वक्तव्यमिदं न वक्तव्यम् । ननु चोक्तमिदमप्यवश्यं वक्तव्यं यौ प्लुतपूर्वाविदुतावप्लुतविकारौ तदर्थं भो३ यिन्द्रम् भो३ यिहेति । छान्दसमेतद् दृष्टानुविधिश्छन्दसि भवति । यत्तर्हि न च्छान्दसम् । भो३ यिन्द्रम् भो३ यिहेति साम गायति । एषोऽपि च्छन्दसि दृष्टस्यानुप्रयोगः क्रियते ॥

---

[1] एचोयवायावः ६. १. ७८. [2] आद्गुणः ; वृद्धिरेचि ६. १. ८७; ८८. [3] सिन्नित्यसमासयोः शाकलप्रतिषेधः ६. १. १२८ वा. १. [4] एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ ८. २. १०७. [5] अकः सवर्णे दीर्घः, इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ६. १. १०१; १२७.

जश्त्वं न सिद्धं यणमत्र पश्य यश्चापदान्तो हलचश्च पूर्वः ।
दीर्घस्य यण्ह्रस्व इति प्रवृत्तं संबन्धवृत्त्या गुणवृद्धिबाध्यः ॥ १ ॥
नित्ये च यः शाकलभाक् समासे तदर्थमेतद्भगवांश्चकार ।
सामर्थ्ययोगान्न हि किंचिदस्मिन्पश्यामि शास्त्रे यदनर्थकं स्यात् ॥ २ ॥*

वान्तो यि प्रत्यये ॥ ६ । १ । ७९ ॥

वान्तादेशे स्थानिनिर्देशः ॥ १ ॥

वान्तादेशे स्थानिनिर्देशः कर्तव्यः । ओकारौकारयोरिति वक्तव्यम् । एकारैकारयोर्मा भूदिति ॥ स तर्हि कर्तव्यः । न कर्तव्यः । वान्तग्रहणं न करिष्यते । एचो यि प्रत्ययेऽयादयो भवन्तीत्येव सिद्धम् । यदि वान्तग्रहणं न क्रियते चेयम् जेयमित्यत्रापि प्राप्नोति । क्षय्यजय्यौ शक्यार्थे [६. १ ८१] इत्येतन्नियमार्थं भविष्यति । क्षिज्योरेवैच इति । तयोस्तर्हि शक्यार्थादन्यत्रापि प्राप्नोति । क्षेयं पापम् जेयो वृषल इति । उभयतो नियमो विज्ञास्यते । क्षिज्योरेवैचः । तयोश्च शक्यार्थ एवेति । इहापि तर्हि नियमान्न प्राप्नोति । लव्यम् पव्यम् । अवश्यलाव्यम् अवश्यपाव्यम् । तुल्यजातीयस्य नियमः । कश्च तुल्यजातीयः । यथाजातीयकः क्षिज्योरेच् । कथंजातीयकः क्षिज्योरेच् । एकारः । एवमपि रायमिच्छति रैयति अत्रापि प्राप्नोति । रायिश्छान्दसो दृष्टानुविधिश्छन्दसि भवति ॥

गोर्यूतौ छन्दसि ॥ २ ॥

गोर्यूतौ छन्दस्युपसंख्यानं कर्तव्यम् । आ नो॑ मित्रावरुणा घृ॒तैर्गव्यू॑तिमुक्षतम्[1] । गोयूतिमित्येवान्यत्र ॥

अध्वपरिमाणे च ॥ ३ ॥

अध्वपरिमाणे च गोर्यूतावुपसंख्यानं कर्तव्यम् । गव्यूतिमध्वानं गतः । गोयूतिमित्येवान्यत्र ॥

धातोस्तन्निमित्तस्यैव ॥ ६ । १ । ८० ॥

एवकारः किमर्थः । नियमार्थः । नैतदस्ति प्रयोजनम् । सिद्धे विधिरारभ्यमाणोऽन्तरेणैवकारं नियमार्थो भविष्यति ॥ इष्टतोऽवधारणार्थस्तर्हि । यथैवं विज्ञा-

---

* [V. M. om. एचोऽयवायावः (७८)].

[1] ऋ. सं. ३. ६२. १६; ७. ६५. ४.

येत धातोस्तन्निमित्तस्यैवेति । नैवं विज्ञायि धातोरेव तन्निमित्तस्येति । किं च स्यात् । अधातोस्तन्निमित्तस्य न स्यात् । शङ्कव्यं[1] दारु । पिचव्यः[1] कार्पास इति ॥ *

क्रय्यस्तदर्थे ॥ ६ । १ । ८२ ॥

तदित्यनेन किं प्रतिनिर्दिश्यते । स एव क्रीणात्यर्थः । इह मा भूत् । क्रेयं नो धान्यं न चास्ति क्रय्यमिति ॥

भय्यप्रवय्ये च च्छन्दसि ॥ ६ । १ । ८३ ॥

भय्यादिप्रकरणे ह्रदय्या उपसंख्यानम् ॥ १ ॥

भय्यादिप्रकरणे ह्रदय्या[2] उपसंख्यानं कर्तव्यम् । ह्रदय्या आपः ॥

अञ्शरस्य च ॥ २ ॥

शरस्य च ह्रदस्य चातोऽव् वक्तव्यः । हूद्व्या आपः । शरव्या वै तेजनम् । शरव्यस्य पशूनाभिघातुकः स्यात् ॥

शरुवृत्ताद्वा सिद्धम् ॥ ३ ॥

शरुवृत्ताद्वा पुनः सिद्धमेतत्[3] ॥

ऋञ्जती शरुरित्यपि दृश्यते ॥ ४ ॥

ऋञ्जती शरुरित्यपि शरुशब्दप्रवृत्तिर्दृश्यते ॥

शरुहस्त इति च लोके ॥ ५ ॥

शरुहस्त इति च लोके शरहस्तमुपाचरन्ति ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य प्रथमे पादे तृतीयमाह्निकम् ॥

---

* [V. M. om. क्षय्यजय्यौ शक्यार्थे (८१)].

[1] उगवादिभ्यो यत्; ओर्गुणः ५. १. २; ६. ४. १४६. [2] भवे छन्दसि ४. ४, ११०, [3] ओर्गुणः; वान्तो यि प्रत्यये ६. ४. १४६; ६. १. ७९.

एकः पूर्वपरयोः ॥ ६ । १ । ८४ ॥

एकवचनं किमर्थम् ।

एकवचनं पृथगादेशप्रतिषेधार्थम् ॥ १ ॥

एकवचनं क्रियत एक आदेशो यथा स्यात्पृथगादेशो मा भूदिति ॥

न वा द्रव्यवत्कर्मचोदनायां द्वयोरेकस्याभिनिर्वृत्तेः ॥ २ ॥

न वैतत्प्रयोजनमस्ति । किं कारणम् । द्रव्यवत्कर्मचोदनायां द्वयोरेकस्याभिनिर्वृत्तेरेक आदेशो भविष्यति । तद्यथा । द्रव्येषु कर्मचोदनायां द्वयोरेकस्याभिनिर्वृत्तिर्भवति । अनयोः पूलयोः कटं कुरु । अनयोर्मृपिण्डयोर्घटं कुर्विति । न चोच्यत एकमित्येकं चासौ करोति ॥ किं पुनः कारणं द्रव्येषु कर्मचोदनायां द्वयोरेकस्याभिनिर्वृत्तिर्भवति ॥

तच्चैकवाक्यभावात् ॥ ३ ॥

एकवाक्यभावाद्द्रव्येषु कर्मचोदनायां द्वयोरेकस्याभिनिर्वृत्तिर्भवति । आतश्चैकवाक्यभावाद्व्याकरणेऽपि ह्यन्यत्र द्वयोः स्थानिनोरेक आदेशो भवति । ज्वरत्वरस्रिव्यविमवामुपधायायाश्च [६. ४. २०] भ्रस्जो रोपधयो रमन्यतरस्याम् [६. ४. ४७] इति ॥ यत्तावदुच्यत एकवाक्यभावादिति तन्न । अर्थात्प्रकरणाद्वा लोके द्वयोरेकस्याभिनिर्वृत्तिर्भवति । अर्थो वास्यैकेन भवति प्रकृतं वा तत्र भवतीदमेकमेव कर्तव्यमिति । आतश्चार्थात्प्रकरणाद्वा व्याकरणेऽपि ह्यन्यत्र द्वयोः स्थानिनोर्द्वावादेशौ भवतः । रदाभ्यां निष्ठातो नः पूर्वस्य च दः [८. २. ४२] उभौ साभ्यासस्य [८. ४. २१] इति । कथं यत्तदुक्तं व्याकरणेऽपि ह्यन्यत्र द्वयोः स्थानिनोरेक आदेशो भवति ज्वरत्वरस्रिव्यविमवामुपधायाश्च भ्रस्जो रोपधयो रमन्यतरस्यामिति । इह तावज्ज्वरत्वरस्रिव्यविमवामुपधायाश्चेति स्तां द्वावूठौ नास्ति दोषः सवर्णदीर्घत्वेन सिद्धम् । इह भ्रस्जो रोपधयो रमन्यतरस्यामिति वक्ष्यति ह्येतद्भ्रस्जो रोपधयोर्लोप आगमो रम्विधीयत इति[1] ॥ यदुच्यतेऽर्थात्प्रकरणाद्वेति तन्न । किं कारणम् । एकवाक्यभावादेव लोके द्वयोरेकस्याभिनिर्वृत्तिर्भवति । आतश्चैकवाक्य-

---

[1] ६. ४. ४७ श्लोकवार्तिक.

भावात् । अङ्ग हि भवान्याम्यं पांसुरपादमप्रकरणज्ञमागतं ब्रवीत्वनयोः पूल्योः कटं कुर्वनयोर्मृत्पिण्डयोर्घटं कुर्वित्येकमेवासौ करिष्यति । कथं यदुक्तं व्याकरणेऽपि ह्यन्यत्र द्वयोः स्थानिनोर्द्वावादेशौ भवतः रदाभ्यां निष्ठातो नः पूर्वस्य च दः उभौ साभ्यासस्येति । इह तावद्रदाभ्यां निष्ठातो नः पूर्वस्य च द इति द्वे वाक्ये । कथम् । योगविभागः करिष्यते । रदाभ्यां निष्ठातो नः । ततः पूर्वस्य च द इति । इहाप्युभौ साभ्यासस्येत्युभौग्रहणसामर्थ्याद् द्वावादेशौ भविष्यतः ॥

तत्रावयवे शास्त्रार्थसंप्रत्ययो यथा लोके ॥ ४ ॥

तत्रावयवे शास्त्रार्थसंप्रत्ययः प्राप्नोति यथा लोके । तद्यथा । लोके वसन्ते ब्राह्मणोऽग्नीनादधीतेति सकृदाधाय कृतः शास्त्रार्थ इति कृत्वा पुनःप्रवृत्तिर्न भवति । तथा गर्भाष्टमे ब्राह्मण उपनेय इति सकृदुपनीय कृतः शास्त्रार्थ इति कृत्वा पुनःप्रवृत्तिर्न भवति । तथा त्रिर्हृदयंगमाभिरद्भिरशब्दाभिरुपस्पृशेदिति सकृदुपस्पृश्य कृतः शास्त्रार्थ इति कृत्वा पुनःप्रवृत्तिर्न भवति । एवामिहापि खट्वेन्द्रे कृतः शास्त्रार्थ इति कृत्वा मालेन्द्रादिषु न स्यात्[1] ॥

सिद्धं तु धर्मोपदेशने ऽनवयवविज्ञानाद्यथा लौकिकवैदिकेषु ॥ ५ ॥

सिद्धमेतत् । कथम् । धर्मोपदेशनमिदं शास्त्रं धर्मोपदेशने चास्मिञ्शास्त्रेऽनवयवेन शास्त्रार्थः संप्रतीयते यथा लौकिकेषु वैदिकेषु च कृतान्तेषु ॥ लोके तावद् ब्राह्मणो न हन्तव्यः सुरा न पेयेति ब्राह्मणमात्रं न हन्यते सुरामात्रं च न पीयते । यदि चावयवेन शास्त्रार्थसंप्रत्ययः स्यादेकं च ब्राह्मणमहत्वैकां च सुरामपीत्वान्यत्र कामचारः स्यात् । तथा पूर्ववया ब्राह्मणः प्रत्युत्थेय इति पूर्ववयोमात्रं प्रत्युत्थीयते । यदि चावयवेन शास्त्रार्थसंप्रत्ययः स्यादेकं पूर्ववयसं प्रत्युत्थायान्यत्र कामचारः स्यात् ॥ तथा वेदे खल्वपि वसन्ते ब्राह्मणो ऽग्निष्टोमादिभिः क्रतुभिर्यजेतेत्यग्न्याधाननिमित्तं वसन्ते वसन्त इज्यते । यदि चावयवेन शास्त्रार्थसंप्रत्ययः स्यात्सकृदिष्ट्वा पुनरिज्या न प्रवर्तेत ॥ उभयथेह लोके दृश्यतेऽवयवेनापि शास्त्रार्थसंप्रत्ययोऽनवयवेनापि । कथं पुनरिदमुभयं लभ्यम् । लभ्यमित्याह । कथम् । इह तावद्वसन्तं ब्राह्मणो ऽग्नीनादधीतेत्यग्न्याधानं यज्ञमुखप्रतिपत्त्यर्थम् । सकृदाधाय कृतः शास्त्रार्थः प्रतिपन्नं यज्ञमुखमिति कृत्वा पुनःप्रवृत्तिर्न भवति । अतोऽत्रावयवेन शास्त्रार्थः संप्रतीयते । तथा गर्भाष्टमे ब्राह्मण उपनेय इत्युपनयनं संस्कारार्थम् । सकृच्चासावुप-

---

[1] आद्गुणः ६. १. ८७.

नीतः संस्कृतो भवति । अतोऽत्राप्यवयवेन शास्त्रार्थः संप्रतीयते । तथा त्रिर्हृदयंगमाभिरद्भिरशब्दाभिरुपस्पृशेदित्युपस्पर्शनं शौचार्थम् । सकृच्चासावुपस्पृश्य शुचिर्भवति । अतोऽत्राप्यवयवेन शास्त्रार्थः संप्रतीयते ॥ इहेदानीं ब्राह्मणो न हन्तव्यः सुरा न पेयेति ब्राह्मणवधे सुरापाने च महान् दोष उक्तः । स ब्राह्मणवधमात्रे सुरापानमात्रे च प्रसक्तः । अतोऽत्रानवयवेन शास्त्रार्थः संप्रतीयते । तथा पूर्ववया ब्राह्मणः प्रत्युत्थेय इति पूर्ववयसोऽप्रत्युत्थाने दोषः उक्तः प्रत्युत्थाने च गुणः । कथम् ।

ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यत इति ॥

स च पूर्ववयोमात्रे प्रसक्तः । अतोऽत्राप्यनवयवेन शास्त्रार्थः संप्रतीयते । तथा वसन्ते ब्राह्मणोऽग्निष्टोमादिभिः क्रतुभिर्यजेतेतीज्यायाः किंचित्प्रयोजनमुक्तम् । किम् । स्वर्गे लोके ऽप्सरस एनं जाया भूत्वोपशेरत इति । तच्च द्वितीयस्यास्तृतीयस्याश्चेज्यायाः फलं भवितुमर्हति । अतोऽत्राप्यनवयवेन शास्त्रार्थः संप्रतीयते । तथा शब्दस्यापि ज्ञाने प्रयोगे प्रयोजनमुक्तम् । किम् । एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीति । यद्येकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति किमर्थः द्वितीयस्तृतीयश्च प्रयुज्यते । न वै कामानां तृप्तिरस्ति ॥

अथ पूर्वपरग्रहणं किमर्थम् ।

पूर्वपरग्रहणं परस्यादेशप्रतिषेधार्थम् ॥ ६ ॥

पूर्वपरग्रहणं क्रियते परस्यादेशप्रतिषेधार्थम् । परस्यादेशो मा भूत् । आद्गुणः [६. २. ८७] इति ॥ कथं च प्राप्नोति ।

पञ्चमीनिर्दिष्टाद्धि परस्य ॥ ७ ॥

पञ्चमीनिर्दिष्टाद्धि परस्य कार्यमुच्यते । तद्यथा । द्व्यन्तरुपसर्गेभ्योऽप ईत् [६. ६. ९७.] इति ॥

षष्ठीनिर्दिष्टार्थं तु ॥ ८ ॥

षष्ठीनिर्देशार्थं च पूर्वपरग्रहणं क्रियते । षष्ठीनिर्देशो यथा प्रकल्पेत ॥

अनिर्दिष्टे हि षष्ठ्यर्थाप्रसिद्धिः ॥ ९ ॥

अक्रियमाणे हि पूर्वपरग्रहणे षष्ठ्यर्थस्याप्रसिद्धिः स्यात् । कस्य । स्थानेयोगत्वस्य ॥ नैष दोषः । आदित्येषा पञ्चम्यचीति सप्तम्याः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्य [१, १. ६७] इति । तथाचीत्येषा सप्तम्यादिति पञ्चम्याः षष्ठीं प्रकल्पयिष्यति तस्मिन्निति निर्दिष्टे पूर्वस्य [१. १. ६६] इति ॥ एवं तर्हि सिद्धे सति यत्पूर्वपरग्रहणं करोति तज्ज्ञापयत्याचार्यो नोभे युगपत् प्रकल्पिके भवत इति । किमेतस्य ज्ञापने प्रयोजनम् । यदुक्तं सप्तमीपञ्चम्योश्च भावादुभयत्र षष्ठीप्रकॢप्तिस्तत्रोभयकार्यप्रसङ्ग इति[1] स न दोषो भवति ॥

अन्तादिवच्च ॥ ६ । १ । ८५ ॥

किमर्थमिदमुच्यते ।

अन्तादिवद्वचनमामिश्रस्यादेशवचनात् ॥ १ ॥

अन्तादिवदित्युच्यत आमिश्रस्यादेशवचनात् । आमिश्रस्यायमादेश उच्यते स नैव पूर्वग्रहणेन गृह्यते नापि परग्रहणेन । तद्यथा । क्षीरोदके संपृक्ते आमिश्रत्वान्नैव क्षीरग्रहणेन गृह्येते नाप्युदकग्रहणेन । इष्यते च ग्रहणं स्यादिति । तच्चान्तरेण यत्नं न सिध्यतीत्यन्तादिवद्वचनम् । एवमर्थमिदमुच्यते ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति ।

तत्र यस्यान्तादिवत्तन्निर्देशः ॥ २ ॥

तत्र यस्यान्तादिवद्भाव इष्यते तन्निर्देशः कर्तव्यः । अस्यान्तवद्भवत्यस्यादिवद्भवतीति वक्तव्यम् ॥

सिद्धं तु पूर्वपराधिकारात् ॥ ३ ॥

सिद्धमेतत् । कथम् । पूर्वपराधिकारात् । पूर्वपरयोरिति[2] वर्तते । पूर्वस्य कार्यं प्रत्यन्तवद्भवति । परस्य कार्यं प्रत्यादिवद्भवति ॥ अथ यत्रोभयमाश्रीयते किं

---

[1] १. १. ६६ वा १७ भाष्य.

[2] एकः पूर्वपरयोः ६. १. ८४.

तत्र पूर्वस्यान्तवद्भवत्याहोस्वित्परस्यादिवद्भवति । उभयत आश्रये नान्तादिवत् । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । लौकिकोऽयं दृष्टान्तः । तद्यथा । लोके यो द्वयोस्तुल्यबलयोरेकः प्रेष्यो भवति स तयोः पर्यायेण कार्यं करोति । यदा तु तमुभौ युगपत्प्रेषयतो नानादिक्षु च कार्ये भवतस्तत्र यद्यसावविरोधार्थी भवति तत उभयोर्न करोति । किं पुनः कारणमुभयोर्न करोति । यौगपद्यासंभवात् । नास्ति यौगपद्येन संभवः ॥

अथान्तवत्त्वे कानि प्रयोजनानि ।

अन्तवत्त्वे प्रयोजनं बह्वच्पूर्वपदाट्ठज्विधाने ॥ ४ ॥

अन्तवत्त्वे बह्वच्पूर्वपदाट्ठज्विधाने प्रयोजनम् । द्वादशान्यिकः । पूर्वपदोत्तरपदयोरेकादेशः पूर्वपदस्यान्तवद्भवति । यथा शक्येत कर्तुं बह्वच्पूर्वपदाट्ठञ्भवतीति[1] । क्व तर्हि स्यात् । यत्र कृतेऽप्येकादेशे बह्वच् पूर्वपदं भवति । त्रयोदशान्यिकः ।

प्रत्ययैकादेशः पूर्वविधौ ॥ ५ ॥

प्रत्ययैकादेशः पूर्वविधौ प्रयोजनम् । मधु पिबन्ति । शिदाशितोरेकादेशः शितोऽन्तवद्भवति । यथा शक्येत कर्तुं शितीति पिबादेशः[2] । क्व तर्हि स्यात् । यत्रैकादेशो न भवति । पिबति ॥

वैभक्तस्य णत्वे ॥ ६ ॥

वैभक्तस्य णत्वे प्रयोजनम् । क्षीरपेण सुरापेण । उत्तरपदविभक्त्योरेकादेश उत्तरपदस्यान्तवद् भवति । यथा शक्येत कर्तुमेकाजुत्तरपदे णो भवतीति[3] । क्व तर्हि स्यात् । यत्रैकादेशो न भवति । क्षीरपाणाम् सुरापाणाम् ॥

अदस ईत्त्वोत्वे ॥ ७ ॥

अदस ईत्त्वोत्वे प्रयोजनम् । अमी[4] अत्र अमी आसते । अमू[4] अत्र अमू आसते । अदस्विभक्त्योरेकादेशो ऽदसो ऽन्तवद्भवति । यथा शक्येत कर्तुमदसो ऽसेर्दादु दो म एत ईद्बहुवचने [८. २. ८०, ८१] इति । क्व तर्हि स्यात् । यत्रैकादेशो न भवति । अमीभिः अमूभ्याम् ॥

---

[1] बह्वच्पूर्वपदाट्ठच् ४. ४. ६४. [2] पाघ्राध्मास्था...पिबजिघ्रधमतिष्ठ...शीयसीदाः ७. ३. ७८. [3] एकाजुत्तरपदे णः ८. ४. १२. [4] त्यदादीनामः ; अतो गुणे ; जसः शी ; आद्गुणः ; वृद्धिरेचि. ७. २. १०२ ; ६. १. ९७ ; ७. १. १७ ; ६. १. ८७ ; ६. १. ८८.

स्वरितत्वे प्रयोजनम् । कार्या हार्या । तिदतितोरेकादेशस्तितोऽन्तवद् भवति । यथा शक्येत कर्तुं तित्स्वरितम् [६. १. १८५] इति । क्व तर्हि स्यात् । यत्रैकादेशो न भवति । कार्यः हार्यः ॥

स्वरितत्वं विप्रतिषेधात् ॥ ८ ॥

स्वरितत्वं क्रियतामेकादेश[1] इति किमत्र कर्तव्यम् । परत्वात्स्वरितत्वं भविष्यति विप्रतिषेधेन ॥ नैष युक्तो विप्रतिषेधः । नित्य एकादेशः । कृतेऽपि स्वरितत्वे प्राप्नोत्यकृतेऽपि । अनित्य एकादेशः । अन्यथास्वरस्य कृते स्वरितत्वे प्राप्नोत्यन्यथास्वरस्याकृते स्वरितत्वे प्राप्नोति स्वरभिन्नस्य च प्राप्नुवन्विधिरनित्यो भवति । अन्तरङ्गस्तर्ह्येकादेशः । कान्तरङ्गता । वर्णावाश्रित्यैकादेशः पदस्य स्वरितत्वम् । स्वरितत्वमप्यन्तरङ्गम् । कथम् । उक्तमेतत्पदग्रहणं परिमाणार्थमिति[2] । उभयोरन्तरङ्गयोः परत्वात् स्वरितत्वं स्वरितत्वे कृते आन्तर्यतः स्वरितानुदात्तयोरेकादेशः स्वरितो भविष्यति ॥

लिङ्गविशिष्टग्रहणाद्वा ॥ ९ ॥

अथवा प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीत्येवमत्र स्वरितत्वं भविष्यति ॥

पूर्वपदान्तोदात्तत्वं च प्रयोजनम् । गुडोदकम् मथितोदकम् । पूर्वपदोत्तरपदयोरेकादेशः पूर्वपदस्यान्तवद्भवति । यथा शक्येत कर्तुमुदकेऽकेवले पूर्वपदस्यान्त उदात्तो भवतीति[3] । क्व तर्हि स्यात् । यत्रैकादेशो नास्ति । उदश्विदुदकम् ॥

पूर्वपदान्तोदात्तत्वं च ॥ १० ॥

पूर्वपदान्तोदात्तत्वं च विप्रतिषेधात् । पूर्वपदान्तोदात्तत्वं क्रियतामेकादेश इति किमत्र कर्तव्यम् । परत्वात्पूर्वपदान्तोदात्तत्वम् । पूर्वपदान्तोदात्तत्वस्यावकाशः । उदश्विदुदकम् । एकादेशस्यावकाशः । दण्डाग्रम् क्षुपाग्रम् । इहोभयं प्राप्नोति । मथितोदकम् गुडोदकम् । पूर्वपदान्तोदात्तत्वं भवति विप्रतिषेधेन ॥ स चावश्यं विप्रतिषेध आश्रयितव्यः ।

---

[1] अकः सवर्णे दीर्घः ६. १. १०१. [2] पदग्रहणं परिमाणार्थम् ४. ३. १४० वा ४.
[3] उदकेऽकेवले ६. २. ९६.

एकादेशे हि स्वरिताप्रसिद्धिः ॥ ११ ॥

एकादेशे हि स्वरितस्याप्रसिद्धिः स्यात् । यो हि मन्यतेऽस्त्वत्रैकादेश एकादेशे कृते पूर्वपदान्तोदात्तत्वं भविष्यतीति स्वरितत्वं तस्य न सिध्यति स्वरितो वानुदात्ते पदादौ [८. २. ६.] इति । गुडोदकम् मथितोदकम् ॥

कृदन्तप्रकृतिस्वरत्वं च प्रयोजनम् । प्राटिता प्राशिता । कृद्गत्योरेकादेशो गतेरन्तवद्भवति । यथा शक्येत कर्तुं गतिकारकोपपदात्कृदन्तमुत्तरपदं प्रकृतिस्वरं भवतीति[1] । क्व तर्हि स्यात् । यत्र नैकादेशः । प्रकारकः प्रकरणम् ॥

कृदन्तप्रकृतिस्वरत्वं च ॥ १२ ॥

कृदन्तप्रकृतिस्वरत्वं च विप्रतिषेधात् । कृदन्तप्रकृतिस्वरत्वं क्रियतामेकादेश इति किमत्र कर्तव्यम् । परत्वात्कृदन्तप्रकृतिस्वरत्वं भवति विप्रतिषेधेन । कृदन्तप्रकृतिस्वरस्यावकाशः । प्रकारकः प्रकरणम् । एकादेशस्यावकाशः । दण्डाग्रम् क्षुपाग्रम् । इहोभयं प्राप्नोति । प्राटिता प्राशिता । कृदन्तप्रकृतिस्वरत्वं भवति विप्रतिषेधेन ॥ स चावश्यं विप्रतिषेध आश्रयितव्यः ।

एकादेशे ह्यप्रसिद्धिरुत्तरपदस्यापरत्वात् ॥ १३ ॥

यो हि मन्यतेऽस्त्वत्रैकादेश एकादेशे कृते कृदन्तप्रकृतिस्वरत्वं भविष्यतीति कृदन्तप्रकृतिस्वरत्वं तस्य न सिध्यति । किं कारणम् । उत्तरपदस्यापरत्वात् । न हीदानीमेकादेशे कृत उत्तरपदं परं भवति । ननु चान्तादिवद्भावेन परम् । उभयत आश्रये नान्तादिवत् ॥

उत्तरपदवृद्धिश्चैकादेशात् ॥ १४ ॥

उत्तरपदवृद्धिश्चैकादेशाद्भवति विप्रतिषेधेन । उत्तरपदवृद्धेरवकाशः । पूर्वत्रैगर्तकः अपरत्रैगर्तकः । एकादेशस्यावकाशः । दण्डाग्रम् क्षुपाग्रम् । इहोभयं प्राप्नोति । पूर्वैषुकामशमः अपरैषुकामशमः । उत्तरपदवृद्धिर्भवति विप्रतिषेधेन[2] ॥

एकादेशप्रसङ्गस्त्वन्तरङ्गबलीयस्त्वात् ॥ १५ ॥

एकादेशस्तु प्राप्नोति । किं कारणम् । अन्तरङ्गस्य बलीयस्त्वात् । अन्तरङ्गं बलीयो भवति ॥ तत्र को दोषः ।

---

[1] गतिकारकोपपदात् कृत् ६. २. १३९.
[2] प्राचां ग्रामनगराणाम् ७. ३. १४.

तत्र वृद्धिविधानम् ॥ १६ ॥

तत्र वृद्धिर्विधेया ॥ नैष दोषः । आचार्यप्रवृत्तिर्ज्ञापयति पूर्वपदोत्तरपदयोस्तावत्कार्यं भवति नैकादेश इति यदयं नेन्द्रस्य परस्य [७. ३. २२] इति प्रतिषेधं शास्ति । कथं कृत्वा ज्ञापकम् । इन्द्रे द्वावचौ । तत्रैको यस्येति[1] लोपेन ह्रियतेऽपर एकादेशेन । अनच्क इन्द्रः संपन्नः । तत्र को वृद्धेः प्रसङ्गः । पश्यति त्वाचार्यः पूर्वपदोत्तरपदयोस्तावत्कार्यं भवति नैकादेश इति ततो नेन्द्रस्य परस्येति प्रतिषेधं शास्ति ॥

अथादिवत्त्वे कानि प्रयोजनानि ।

आदिवत्त्वे प्रयोजनं प्रगृह्यसंज्ञायाम् ॥ १७ ॥

आदिवत्त्वे प्रगृह्यसंज्ञायां प्रयोजनम् । अग्नी इति वायू इति । द्विवचनाद्विवचनयोरेकादेशो द्विवचनस्यादिवद्भवति । यथा शक्यते कर्तुमीदूदेद्द्विवचनं प्रगृह्यम् [१. १. ११.] इति । क्व तर्हि स्यात् । यत्रैकादेशो न भवति । त्रपुणी इति जतुनी इति ॥

सुप्तिङाब्विधिषु ॥ १८ ॥

सुप्तिङाब्विधिषु प्रयोजनम् । सुप् । वृक्षे तिष्ठति । प्लक्षे तिष्ठति । सुबसुपोरेकादेशः सुप आदिवद्भवति । यथा शक्येत कर्तुं सुबन्तं पदमिति[3] । क्व तर्हि स्यात् । यत्रैकादेशो न भवति । वृक्षस्तिष्ठति । प्लक्षस्तिष्ठति । सुप् ॥ तिङ् । पचे यज इति । तिङतिङोरेकादेशस्तिङ आदिवद्भवति । यथा शक्येत कर्तुं तिङन्तं पदमिति[3] । क्व तर्हि स्यात् । यत्रैकादेशो न भवति । पचति यजति । तिङ् ॥ आप् । खट्वा माला । आबनापोरेकादेश आप आदिवद्भवति । यथा शक्येत कर्तुमाबन्तात्सोर्लोपो भवतीति[4] । क्व तर्हि स्यात् । यत्रैकादेशो न । क्रुञ्चा उष्णिहा देवविशा ॥

आङ्ग्रहणे पदविधौ ॥ १९ ॥

आङ्ग्रहणे पदविधौ प्रयोजनम् । अद्याहते । कदाहते । आङनाङोरेकादेश आङ आदिवद्भवति । यथा शक्येत कर्तुमाङो यमहनः [१. ३. २८] इत्यात्मनेपदं भवतीति । क्व तर्हि स्यात । यत्रैकादेशो न । आहते ॥

---

१ यस्येति च ६. ४. १४८. २ प्रथमयोः पूर्वसवर्णः ६. १. १०२. ३ सुप्तिङन्तं पदम् १. ४. १४. ४ हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् ६. १. ६८.

आटश्च वृद्धिविधौ ॥ २० ॥

आटश्च वृद्धिविधौ प्रयोजनम् । अयैहिष्ट । आटोऽयशब्दस्य चैकादेश आट आदिवद्भवति । यथा शक्येत कर्तुमाटश्चाचि वृद्धिर्भवतीति[1] । क्व तर्हि स्यात् । यत्रैकादेशो न । ऐहिष्ट ऐक्षिष्ट ॥

कृदन्तप्रातिपदिकत्वे च ॥ २१ ॥

कृदन्तप्रातिपदिकत्वे च प्रयोजनम् । धारयः पारयः[2] । कृदकृतोरेकादेशः कृत आदिवद्भवति । यथा शक्येत कर्तुं कृदन्तं प्रातिपदिकमिति[3] । क्व तर्हि स्यात् । यत्रैकादेशो न । कारकः हारकः ॥

नाभ्यासादीनां ह्रस्वत्वे ॥ २२ ॥

अभ्यासादीनां ह्रस्वत्वे नान्तादिवद्भवतीति वक्तव्यम् । के पुनरभ्यासादयः । अभ्यासाम्बार्थनदीनपुंसकोपसर्जनानि[4] अभ्यासह्रस्वत्वम् । उपेयाज उपोवाप । ऊहेर्ह्रस्वत्वम् । उपोह्यते प्रोह्यते परोह्यते । अम्बार्थनदीनपुंसकोपसर्जनह्रस्वत्वानि । अम्बात्र अक्कात्र । कुमारीदम् किशोरीदम् । आराशस्त्रीदम् धानाशष्कुलीदम् । निष्कौशाम्बीदम् निर्वाराणसीदम् । अभ्यासोहाम्बार्थनदीनपुंसकोपसर्जनग्रहणेन ग्रहणाद्ध्रस्वत्वं प्राप्नोति ॥

न वा बहिरङ्गलक्षणत्वात् ॥ २३ ॥

न वैतद्वक्तव्यम् । किं कारणम् । बहिरङ्गलक्षणत्वात् । अन्तरङ्गं ह्रस्वत्वम् । बहिरङ्गा एते विधयः । असिद्धं बहिरङ्गमन्तरङ्गे ॥

वर्णाश्रयविधौ च ॥ २४ ॥

वर्णाश्रयविधौ च नान्तादिवद्भवतीति वक्तव्यम् । किं प्रयोजनम् ।

प्रयोजनं खट्वाभिर्जुहावास्या अश्व इति ॥ २५ ॥

इह खट्वाभिः मालाभिः अतो भिस ऐस् भवतीत्यैस्भावः प्राप्नोति[5] । नैष दोषः । तपरकरणसामर्थ्यान्न भविष्यति । अस्त्यन्यत्तपरकरणे प्रयोजनम् । किम् ।

---

[1] आटश्च ६. १. ९०. [2] अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च; कर्तरि शप् ३. १. १३८; ६८. [3] कृत्तद्धितसमासाश्च १. २. ४६. [4] ह्रस्वः; उपसर्गाद्ध्रस्व ऊहतेः; अम्बार्थनद्योर्ह्रस्वः; ऊकालोज्झ्रस्वदीर्घप्लुतः ७. ४. ५९; २३, ७. ३. १०७, १. २. २७ ४८. [5] अतो भिस ऐस् ७. १. ९.

कीलालपाभिः शुभंयाभिः । जुहाव[1] ॥ आत औ णलः [७. १. ३४] इत्यौत्वं प्राप्नोति ॥ अस्या अश्व इति एङः पदान्तादति [६. १. १०९] इति पूर्वत्वं प्राप्नोति ॥

न वाऽताद्रूप्यातिदेशात् ॥ २६ ॥

न वा वक्तव्यम् । किं कारणम् । अताद्रूप्यातिदेशात् । नेह ताद्रूप्यमतिदिश्यते । रूपाश्रया वा एते विधयो ऽताद्रूप्यान्न भविष्यन्ति ॥

षत्वतुकोरसिद्धः ॥ ६ । १ । ८६ ॥

किमर्थमिदमुच्यते ।

षत्वतुकोरसिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं च ॥ १ ॥

षत्वतुकोरसिद्धत्वमुच्यत* आदेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं च । आदेशलक्षणप्रतिषेधार्थं तावत् । कोऽसिञ्चत् । योऽसिञ्चत् । एकादेशे[2] कृत इण इति षत्वं[3] प्राप्नोति । असिद्धत्वान्न भवति । उत्सर्गलक्षणभावार्थं च । अधीत्य प्रेत्य । एकादेशे कृते ह्रस्वस्येति[4] तुग्न प्राप्नोति । असिद्धत्वाद्भवति ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति ।

तत्रोत्सर्गलक्षणाप्रसिद्धिरुत्सर्गाभावात् ॥ २ ॥

तत्रोत्सर्गलक्षणस्य कार्यस्याप्रसिद्धिः । अधीत्य प्रेत्येति । किं कारणम् । उत्सर्गाभावात् । ह्रस्वस्येत्युच्यते न चात्र ह्रस्वं पश्यामः ॥ ननु चासिद्धवचनात्सिद्धम् ।**

असिद्धवचनात्सिद्धमिति चेन्नान्यस्यासिद्धवचनादन्यस्य भावः ॥ ३ ॥

असिद्धवचनात्सिद्धमिति चेत्तन्न । किं कारणम् । नान्यस्यासिद्धवचनादन्यस्य भावः । न ह्यन्यस्यासिद्धवचनादन्यस्य प्रादुर्भावो भवति । न हि देवदत्तस्य हन्तरि हते देवदत्तस्य प्रादुर्भावो भवति ॥

---

* Ben. adds किं प्रेयाजनम् after उच्यते.

** Ben. reads ननु चात्रापि–असिद्धवचनात् सिद्धम् (वा.).

[1] अभ्यस्तस्य च; संप्रसारणाच्च ६. १. ३३; १०८. [2] एङः पदान्तादति ६. १. १०९ [3] आदेशप्रत्यययोः ८. ३. ५९. [4] ह्रस्वस्य पिति कृति तुक् ६. १. ७१.

तस्मात्स्थानिवद्वचनमसिद्धत्वं च ॥ ४ ॥

तस्मात्स्थानिवद्भावो वक्तव्यो ऽसिद्धत्वं च। अधीत्य प्रेत्येति स्थानिवद्भावः। कोऽसिञ्चत् योऽसिञ्चदित्यत्रासिद्धत्वम् ॥

स्थानिवद्वचनानर्थक्यं शास्त्रासिद्धत्वात् ॥ ५ ॥

स्थानिवद्वचनमनर्थकम्। किं कारणम्। शास्त्रासिद्धत्वात्। नानेन कार्यासिद्धत्वं क्रियते। किं तर्हि। शास्त्रासिद्धत्वमनेन क्रियते। एकादेशशास्त्रं तुक्शास्त्रेऽसिद्धं भवतीति ॥

संप्रसारणङीट्सु सिद्धः*। संप्रसारणङीट्सु सिद्ध एकादेश इति वक्तव्यम्। शकहूषु परिवीषु[1]। संप्रसारण। ङि। वृक्षे च्छत्रम् वृक्षे छत्रम्। ङि। इट्। अपचे च्छत्रम् अपचे छत्रम्[2] ॥

संप्रसारणङीट्सु सिद्धः पदान्तपदाद्योरेकादेशस्यासिद्धवचनात् ॥ ६ ॥

संप्रसारणङीट्सु सिद्ध एकादेशः। कुतः। पदान्तपदाद्योरेकादेशस्यासिद्धवचनात्। पदान्तपदाद्योरेकादेशोऽसिद्धो भवतीत्युच्यते न चैष पदान्तपदाद्योरेकादेशः ॥ यदि पदान्तपदाद्योरेकादेशोऽसिद्धः सुसस्या ओषधीस्कृधि सुपिप्पला ओषधीस्कृधि अत्र षत्वं प्राप्नोति[3]। तुग्विधिं प्रति पदान्तपदाद्योरेकादेशोऽसिद्धः षत्वं प्रत्येकादेशमात्रमसिद्धं भवति ॥ यदि षत्वं प्रत्येकादेशमात्रमसिद्धं शकहूषु परिवीषु अत्र षत्वं न प्राप्नोति। अस्तु तर्ह्यविशेषेण। कथं सुसस्या ओषधीस्कृधि सुपिप्पला ओषधीस्कृधीति। नैष दोषः। भ्रातुष्पुत्रग्रहणं ज्ञापकमेकादेशनिमित्तात् षत्वप्रतिषेधस्य[4]। यदयं कस्कादिषु भ्रातुष्पुत्रग्रहणं करोति तज्ज्ञापयत्याचार्यो नैकादेशनिमित्तात् षत्वं भवतीति। यद्येतज्ज्ञाप्यते शकहूषु परिवीष्वित्यत्र षत्वं न प्राप्नोति। तुल्यजातीयस्य ज्ञापकम्। किं च तुल्यजातीयम्। यः कुप्वोः ॥ यद्येवं वेञोऽप्रत्यये परत उरिति प्राप्नोति उदिति चेष्यते[5]। यथालक्षणमप्रयुक्ते**। अथवा नैवं विज्ञायते पूर्वस्य च पदादेः परस्य च पदान्तस्येति। कथं तर्हि। परस्य च पदादेः पूर्वस्य च पदान्तस्येति ॥

आद्गुणः ॥ ६ । १ । ८७ ॥

गुणग्रहणं किमर्थं नादेको भवतीत्येवोच्येत।

---

* Ben. takes this as a Vārtika. ** Ben. marks this as a Vārtika.

[1] वचिस्वपियजादीनां किति; संप्रसारणाच्च; हलः; आदेशप्रत्यययोः ६. १. १५; १०८; ६. ४. २; ८. ३. ५९. [2] पदान्ताद्वा ६. १. ७६. [3] ओषधेश्च विभक्तावप्रथमायाम्; प्रथमयोः पूर्वसवर्णः; ससजुषो रुः; खरवसानयोर्विसर्जनीयः, कः करत्करतिकृधिकृतेष्वनदितेः. ६. ३. १३२; ६. १. १०२; ८. २. ६६; ८. ३. १५; ५०; (५९). [4] भ्रातुष्पुत्रग्रहणं ज्ञापकमेकादेशनिमित्तात् षत्वप्रतिषेधस्य ८. ३. ४१. वा. ४. [5] वचिस्वपियजादीनां किति, संप्रसारणाच्च; ह्रस्वस्य पिति कृति तुक् ६. १. १५; १०८; ७१.

आदेकश्चेद्गुणः केन

आदेकश्चेद्गुणः केनेदानीं भविष्यति । खट्वेन्द्रः मालेन्द्रः । खट्वोदकम् मालोदकम् ॥

स्थानेऽन्तरतमो हि सः ।

स्थाने प्राप्यमाणानामन्तरतम आदेशो भवति ॥ ऐदौतावपि तर्हि प्राप्नुतः ।

ऐदौतौ नैचि तावुक्तौ

ऐदौतौ न भविष्यतः । किं कारणम् । एचि ह्यैदौतावुच्येते[1] ॥ इह तर्हि खट्वर्श्यः मालर्श्यः ऋकारस्तर्हि प्राप्नोति ।

ऋकारो नोभयान्तरः ॥ १ ॥

उभयोर्योऽन्तरतमस्तेन भवितव्यं न च ऋकार उभयोरन्तरतमः ॥ आकारस्तर्हि प्राप्नोति ।

आकारो नर्ति धातौ सः

आकारो न भविष्यति । किं कारणम् । ऋति धातावाकार उच्यते[2] तन्नियमार्थं भविष्यति । ऋकारादौ धातावेव नान्यत्रेति ॥ प्लुतस्तर्हि प्राप्नोति ।

प्लुतश्च विषये स्मृतः ।

विषये प्लुत उच्यते[3] यदा च स विषयो भवितव्यमेव तदा प्लुतेन ॥

आन्तर्यात् त्रिचतुर्मात्राः

इदं तर्हि प्रयोजनमान्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति । खट्वा इन्द्रः खट्वेन्द्रः । खट्वा उदकं खट्वोदकम् । खट्वा ईषा खट्वेषा । खट्वा ऊढा । खट्वोढा । खट्वा एलका खट्वैलका । खट्वा ओदनः खट्वौदनः । खट्वा ऐतिकायनः खट्वैतिकायनः । खट्वा औपगवः खट्वौपगवः ॥ अथ क्रियमाणेऽपि गुणग्रहणे कस्मादेवात्र त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा न भवन्ति ।

तपरत्वान्न ते स्मृताः ॥ २ ॥

तपरे गुणवृद्धी[4] । ननु च तः परो यस्मात्सोऽयं तपरः । नेत्याह । तादपि परस्तपरः । यदि तादपि परस्तपर ऋदोरप् [३. ३. ५७] इहैव स्यात् यवः

---

[1] वृद्धिरेचि ६. १. ८८. [2] उपसर्गादृति धातौ ६. १. ९१. [3] वाक्यस्य टेः प्लुत उदात्तः ८. २. ८२—अनत्यस्यापि प्रश्नाख्यानयोः ८. २. १०५. [4] वृद्धिरादैच्; अदेङ् गुणः १. १. १; २.

त्तवः। ल्वः पव इत्यत्र न स्यात्। नैष तकारः। कस्तर्हि। दकारः। किं दकारे प्रयोजनम्। अथ किं तकारे। असंदेहार्थस्तकारः। यद्यसंदेहार्थस्तकारो दकारोऽपि। अथ मुखसुखार्थस्तकारो दकारोऽपि ॥

गुणे ङिशीटामुपसंख्यानं दीर्घत्वबाधनार्थम् ॥ १ ॥

गुणे ङिशीटामुपसंख्यानं कर्तव्यम्। ङि। वृक्ष इन्द्रः प्लक्ष इन्द्रः। शी। य इन्द्रम् त इन्द्रम्। इट्। अपच इन्द्रम् अयज इन्द्रम्। किं प्रयोजनम्। दीर्घत्वबाधनार्थम्। सवर्णदीर्घत्वं[1] मा भूदिति ॥

न वा बहिरङ्गलक्षणत्वात् ॥ २ ॥

न वा कर्तव्यम्। किं कारणम्। बहिरङ्गलक्षणत्वात्। बहिरङ्गलक्षणं सवर्णदीर्घत्वम्। अन्तरङ्गो गुणः। असिद्धं बहिरङ्गमन्तरङ्गे ॥

आदेकश्चेद्गुणः केन स्थानेऽतरतमो हि सः।
ऐदौतौ नैचि तावुक्तावृकारो नोभयान्तरः ॥ १ ॥
आकारो नर्ति धातौ स प्लुतश्च विषये स्मृतः।
आन्तर्यात्त्रिचतुर्मात्रास्तपरत्वान्न ते स्मृताः ॥ २ ॥*

एत्येधत्यूठ्सु ॥ ६। १। ८९ ॥

किमिदमेत्येधत्यो रूपग्रहणमाहोस्विद्धातुग्रहणम्। किं चातः। यदि रूपग्रहणं सिद्धमुपैति प्रैति, उपैषि प्रैषि उपैमि प्रैमीति न सिध्यति। अथ धातुग्रहणं सिद्धमेतद्भवति ॥ किं तर्हीति।

इणीकारादौ वृद्धिप्रतिषेधः ॥ १ ॥

इणीकारादौ वृद्धेः प्रतिषेधो वक्तव्यः। उपेतः प्रेत इति ॥

योगविभागात् सिद्धम् ॥ २ ॥

योगविभागः करिष्यते। वृद्धिरेचि [८८]। तत एत्येधत्योः। एत्येधत्योश्चैचि

---

* [V. M. om. वृद्धिरेचि (८८)]

[1] अकः सवर्णे दीर्घः ६. १. १०१.

वृद्धिर्भवति । तत ऊठि । ऊठि च वृद्धिर्भवतीति ॥ एवमपि आ इत एतः उपेतः प्रेत इत्यत्रापि प्राप्नोति । आङि पररूपमत्र[1] बाधकं भविष्यति* । नाप्राप्ते पररूप इयं वृद्धिरारभ्यते सा यथैङि पररूपं[2] बाधत एवमाङि पररूपं बाधेत । न बाधते । किं कारणम् । येन नाप्राप्ते तस्य बाधनं भवति न चाप्राप्त एङि पररूप इयं वृद्धिरारभ्यत आङि पररूपे पुनः प्राप्ते चाप्राप्ते च । अथवा पुरस्तादपवादा अनन्तरान्विधीन् बाधन्त इतीयं वृद्धिरेङि पररूपं बाधिष्यते नाङि पररूपम् ॥

अक्षादूहिन्याम् ॥ ३ ॥

अक्षादूहिन्यां वृद्धिर्वक्तव्या । अक्षौहिणी ॥

प्रादूहोढोढ्येषैष्येषु ॥ ४ ॥

प्रादूह ऊढ ऊढि एष एष्येत्येतेषु वृद्धिर्वक्तव्या । प्रौहः प्रौढः प्रौढिः प्रैषः प्रैष्यः ॥

स्वादीरेरिणोः ॥ ५ ॥

स्वादीर ईरिनित्येतयोर्वृद्धिर्वक्तव्या । स्वैरः स्वैरी ॥ ईरिन्ग्रहणं शक्यमकर्तुम् । कथं स्वैरीति । इनिनैतन्मत्वर्थीयेन सिद्धम्[3] । स्वैरोऽस्यास्तीति स्वैरी ॥

ऋते च तृतीयासमासे ॥ ६ ॥

ऋते च तृतीयासमासे वृद्धिर्वक्तव्या । सुखार्तः दुःखार्तः । ऋत इति किम् । सुखेतः । दुःखेतः । तृतीयाग्रहणं किम् । परमर्तः । समास इति किम् । सुखेनर्तः ॥

प्रवत्सतरकम्बलवसनानां चर्णे ॥ ७ ॥

प्रवत्सतरकम्बलवसनानां चर्णे वृद्धिर्वक्तव्या । प्रार्णम् वत्सतरार्णम् कम्बलार्णम् वसनार्णम् ॥

ऋणदशाभ्यां च ॥ ८ ॥

ऋणदशाभ्यां च वृद्धिर्वक्तव्या । ऋणार्णम् दशार्णम् ॥

---

* Ben. adds न भविष्यति after बाधकं भविष्यति.

[1] ओमाङोश्च ६. १. ९५. [2] एङि पररूपम् ६. १. ९४. [3] अत इनिठनौ ५. २. ११५.

आटश्च ॥ ६ । १ । ९० ॥

किमर्थश्चकारः । वृद्धेरनुकर्षणार्थः । नैतदस्ति प्रयोजनम् । प्रकृता[1] वृद्धिरनुवर्तिष्यते ॥ इदं तर्हि प्रयोजनमाटो ऽचि वृद्धिरेव यथा स्याद्यदन्यत्प्राप्नोति तन्मा भूदिति । किं चान्यत्प्राप्नोति । पररूपम् । उस्योमाङ्क्ष्वाटः पररूपप्रतिषेधं चोदयिष्यति[2] स न वक्तव्यो भवति ॥

उपसर्गादृति धातौ ॥ ६ । १ । ९१ ॥

धाताविति किमर्थम् । इह मा भूत् । प्रर्षभं वनम् ।

उपसर्गाद्वृद्धिविधौ धातुग्रहण उक्तम् ॥ १ ॥

किमुक्तम् । गत्युपसर्गसंज्ञाः क्रियायोगे यत्क्रियायुक्ताः प्रादयस्तं प्रतीति वचनमिति[3] ॥ क्रियमाणेऽपि धातुग्रहणे प्रर्च्छक इति प्राप्नोति । यत्क्रियायुक्ताः प्रादयस्तं प्रतीति वचनान्न भवति ॥ इदं तर्हि प्रयोजनमुपसर्गादृतिं धातौ वृद्धिरेव यथा स्याद्यदन्यत्प्राप्नोति तन्मा भूदिति । किं चान्यत्प्राप्नोति । ह्रस्वत्वमृत्यकः [६. १. १२८] इति । ऋति ह्रस्वादुपसर्गाद्वृद्धिः पूर्वविप्रतिषेधेनेति चोदयिष्यति[4] स न वक्तव्यो भवति ॥

छे तुकः संबुद्धिगुणः ॥ २ ॥

छे तुग्भवतीत्यस्मात्संबुद्धिगुणो भवति विप्रतिषेधेन[5] । छे तुग्भवतीत्यस्यावकाशः । इच्छति गच्छति । संबुद्धिगुणस्यावकाशः । अग्ने वायो । इहोभयं प्राप्नोति । अग्ने च्छत्रम् अग्ने छत्रम् । वायो च्छत्रम् वायो छत्रम् । संबुद्धिगुणो भवति विप्रतिषेधेन ॥ स तर्हि विप्रतिषेधो वक्तव्यः ।

न वा बहिरङ्गलक्षणत्वात् ॥ ३ ॥

न वा वक्तव्यः । किं कारणम् । बहिरङ्गलक्षणत्वात् ॥ बहिरङ्गलक्षणस्तुक् । अन्तरङ्गलक्षणः संबुद्धिगुणः । असिद्धं बहिरङ्गमन्तरङ्गे ॥ अन्तरेण विप्रतिषेधम-

---

[1] वृद्धिरेचि ६. १. ८८.

[2] उस्योमाङ्क्ष्वाटः प्रतिषेधः ६. १. ९५ वा १३.

[3] गत्युपसर्गसंज्ञाः क्रियायोगे यत्क्रियायुक्तास्तं प्रतीति वचनम् १. ४. ६० वा ३.

[4] ऋति ह्रस्वादुपसर्गाद्वृद्धिर्विप्रतिषेधेन ६. १. १२८ वा ३.

[5] छे च; आङ्माङोश्च; दीर्घात्; पदान्ताद्वा; ह्रस्वस्य गुणः ६. १. ७३; ७४; ७५; ७६; ७. ३. १०८.

न्तरेणापि चैतां परिभाषां सिद्धम् । कथम् । इदमिह संप्रधार्यम् । संबुद्धिलोपः[1] क्रियतां गुण इति किमत्र कर्तव्यम् । परत्वाद्गुणः । नित्यः संबुद्धिलोपः । कृतेऽपि गुणे प्राप्नोत्यकृतेऽपि । गुणोऽपि नित्यः । कृतेऽपि संबुद्धिलोपे प्राप्नोत्यकृतेऽपि । अनित्यो गुणो न हि कृते संबुद्धिलोपे प्राप्नोति । तावत्येव छेनानन्तर्यं तत्र तुका भवितव्यम् । तस्मात्सुष्ठूच्यते छे तुकः संबुद्धिगुणो न वा बहिरङ्गलक्षणत्वादिति ॥

संप्रसारणदीर्घत्वण्यल्लोपाभ्यासगुणादयश्च ॥ ४ ॥

संप्रसारणदीर्घत्वण्यल्लोपाभ्यासगुणादयश्च तुको भवन्ति विप्रतिषेधेन ॥ संप्रसारणदीर्घत्वस्यावकाशः[2] । हूतः जीनः संवीतः शूनः । तुकोऽवकाशः । अग्निचिव् सोमसुत्[3] । इहोभयं प्राप्नोति । परिवीषु शकहूषु ॥ णिलोपस्यावकाशः[4] । कारणा हारणा । तुकः स एव । इहोभयं प्राप्नोति । प्रकार्य गतः । प्रहार्य गतः ॥ अल्लोपस्यावकाशः[5] चिकीर्षिता जिहीर्षिता । तुकः स एव । इहोभयं प्राप्नोति । प्रचिकीर्ष्य गतः । प्रजिहीर्ष्य गतः ॥ अभ्यासगुणादयश्च तुको भवन्ति विप्रतिषेधेन । के पुनरभ्यासगुणादयः । ह्रस्वत्वात्त्वेत्त्वगुणाः[6] । ह्रस्वत्वस्यावकाशः पपतुः पपुः । तस्थतुः तस्थुः । तुकः स एव । इहोभयं प्राप्नोति । अपचच्छतुः अपचच्छुः । अत्त्वस्यावकाशः । चक्रतुः चक्रुः । तुकः स एव । इहोभयं प्राप्नोति । अपचच्छृदतुः अपचच्छृदुः । इत्त्वस्यावकाशः । पिपक्षति यियक्षति । तुकः स एव । इहोभयं प्राप्नोति । चिच्छादयिषति चिच्छर्दयिषति । गुणस्यावकाशः । लोलूयते बेभिद्यते । तुकः स एव । इहोभयं प्राप्नोति । चेच्छिद्यते । चोच्छुप्यते ॥

यणादेशादाद्गुणः ॥ ५ ॥

यणादेशादाद्गुणो भवति विप्रतिषेधेन[7] । यणादेशस्यावकाशः । दध्यत्र मध्वत्र । आद्गुणस्यावकाशः । खट्वेन्द्रः खट्वोदकम् । इहोभयं प्राप्नोति । वृक्षोऽत्र प्लक्षोऽत्र[8] ॥

इरुर्गुणवृद्धिविधयश्च ॥ ६ ॥

इरुर्गुणवृद्धिविधयश्च यणादेशाद्भवन्ति विप्रतिषेधेन ॥ इरुरोरवकाशः[9] । आस्तीर्णम् निपूर्ताः पिण्डाः । यणादेशस्यावकाशः । चक्रतुः चक्रुः । इहोभयं प्राप्नोति । दूरे ह्यध्वा जगुरिः[10] । मित्रावरुणौ ततुरिः[11] । किरति गिरति ॥ गुणवृद्ध्योरवकाशः

---

[1] एङ्ह्रस्वात् संबुद्धेः ६. १. ६९. [2] हलः ६. ४. २. [3] ह्रस्वस्य पिति कृति तुक् ६. १. ७१. [4] णेरनिटि ६. ४. ५१. [5] अतो लोपः ६. ४. ४८. [6] ह्रस्वः ७. ४. ५९; उरत् ७. ४. ६६; सन्यतः ७. ४. ७९; गुणो यङ्लुकोः ७. ४. ८२. [7] इको यणचि; आद्गुणः ६. १. ७७; ८७. [8] ससजुषो रुः; अतो रोरप्लुतादप्लुते ८. २. ६६; ६. १. ११३. [9] ऋत इद्धातोः; उपधायाश्च; उदोष्ठ्यपूर्वस्य; बहुलं छन्दसि ७. १. १००-१०३. [10] ऋ. सं. १०।१०८।१. [11] दद्युर्मित्रावरुणा ततुरिम् । ऋ. सं. ४।३९।२.

चेता[१] गौः[२] । यणादेशस्य स एव । इहोभयं प्राप्नोति । चयनम् चायकः लवनम् लावकः ॥

भलोपधातुप्रातिपदिकप्रत्ययसमासान्तोदात्तोदात्तनिवृत्तिस्वरा एकादेशाच्च ॥ ७ ॥

भलोपधातुप्रातिपदिकप्रत्ययसमासान्तोदात्तोदात्तनिवृत्तिस्वरा एकादेशाच्च यणादेशाच्च भवन्ति विप्रतिषेधेन । भलोपस्यावकाशः । गार्ग्यः वात्स्यः[३] । एकादेशयणादेशयोरवकाशः । दधीन्द्रः मधूदकम् । दध्यत्र मध्वत्र[४] । इहोभयं प्राप्नोति । दाक्षी[५] दाक्षायणः[६] । प्लाक्षी प्लाक्षायणः ॥ अचि भलोप एकादेशाद्भवति विप्रतिषेधेन । अचि भलोपस्यावकाशः । दाक्षी दाक्षायणः । प्लाक्षी प्लाक्षायणः । एकादेशस्यावकाशः । दण्डाग्रम् । क्षुपाग्रम् । इहोभयं प्राप्नोति । गाङ्गेयः[७] गाङ्गः[८] ॥ धातुस्वरस्यावकाशः । पचति पठति[९] । एकादेशयणादेशयोः स एव । इहोभयं प्राप्नोति । श्र्यर्थम्[१०] श्रीषा[११] ॥ प्रातिपदिकस्वरस्यावशाशः । आम्रः । एकादेशयणादेशयोः स एव । इहोभयं प्राप्नोति । अग्न्युदकम्[१२] वृक्षार्थम्[१३] ॥ प्रत्ययस्वरस्यावकाशः । चिकीर्षुः औपगवः[१४] । एकादेशयणादेशयोः स एव । इहोभयं प्राप्नोति । चिकीर्ष्वर्थम् ॥ औपगवार्थम् । समासान्तोदात्तस्यावकाशः । राजपुरुषः ब्राह्मणकम्बलः[१५] । एकादेशयणादेशयोः स एव । इहोभयं प्राप्नोति । राजवैद्यर्थम् राजवैदीहते ॥ उदात्तनिवृत्तिस्वरस्यावकाशः । नदी कुमारी[१६] । एकादेशयणादेशयोः स एव । इहोभयं प्राप्नोति । कुमार्यर्थम् कुमारीहते ॥

अल्लोपाल्लोपौ चार्धधातुके ॥ ८ ॥

अल्लोपाल्लोपौ चार्धधातुक एकादेशाद्भवतो विप्रतिषेधेन । अल्लोपस्यावकाशः । चिकीर्षिता जिहीर्षिता[१७] । एकादेशस्यावकाशः । पचन्ति पठन्ति[१८] । इहोभयं प्राप्नोति । चिकीर्षकः जिहीर्षकः[१९] । आल्लोपस्यावकाशः[२०] । पपिः सोमं ददिर्गाः[२१] । एकादेशस्यावकाशः । यान्ति वान्ति । इहोभयं प्राप्नोति । ययतुः ययुः ॥

---

१ सार्वधातुकार्धधातुकयोः ७. ३. ८४. २ गोतो णित् ; अचो ञ्णिति ७. १. ९० ; ७. २. ११५. ३ यस्येति च ६. ४. १४८. ४ अकः सवर्णे दीर्घः ; इको यणचि ६. १ १०१ ; ७७. ५ अत इञ् ; इतो मनुष्यजातेः ; यस्येति च ४. १. ९५ ; ६५ ; ६. ४. १४८. ६ यञिञोश्च ; आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् ; यस्येति च ४. १. १०१ ; ७. १. २ ; ६. ४. १४८. ७ शुभ्रादिभ्यश्च ; आयनेयी० ; यस्येति च ४. १. १२३ ; ७. १. २ ; ६. ४. १४८. ८ शिवादिभ्योण् ; यस्येति च ४. १. ११२ ; ६. ४. १४८. ९ धातोः ६. १. १६२. १० अर्थे ६. २. ४४ ; इको यणचि ६. १. ७७ ; उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य ८. २. ४. ११ बहुव्रीहौ

[अग्रे (पृ. ७३) अवलोकनीयम्.

इयङ्वङ्गुणवृद्धिटित्किन्मित्पूर्वपदविकाराश्च ॥ ९ ॥

इयङुवङ्गुणवृद्धिटित्किन्मित्पूर्वपदविकाराश्चैकादेशयणादेशाभ्यां भवन्ति विप्रतिषेधेन । इयङुवङोरवकाशः[1] श्रियौ श्रियः । भ्रुवौ भ्रुवः । एकादेशयणादेशयोः स एव । इहोभयं प्राप्नोति । चिक्षियिव चिक्षियिम । लुलुवतुः लुलुवुः । पुपुवतुः पुपुवुः ॥ गुणवृद्ध्योरवकाशः चेता[2] गौः ।[3] एकादेशयणादेशयोः स एव । इहोभयं प्राप्नोति । साधुचायी[4] सुचायी[5] नग्नंभावुको[6] ऽध्वर्युः । शयिता शयितुम् ॥ टितोऽवकाशः[7] । अग्नीनाम् इन्दूनाम् । एकादेशयणादेशयोः स एव । इहोभयं प्राप्नोति । वृक्षाणाम् प्लक्षाणाम् ॥ कितोऽवकाशः[8] साधुदायी सुष्ठुदायी । एकादेशयणादेशयोः स एव । इहोभयं प्राप्नोति । दायकः धायकः ॥ मितोऽवकाशः[9] । त्रपुणी जतुनी । एकादेशयणादेशयोः स एव । इहोभयं प्राप्नोति । अस्थीनि दधीनि । अतिसखीनि ब्राह्मणकुलानि । पूर्वपदविकाराणामवकाशः[10] । होतापोतारौ । एकादेशयणादेशयोः स एव । इहोभयं प्राप्नोति । नेष्टोद्गातारौ आग्नेन्द्रम् ॥

उत्तरपदविकाराश्चेति वक्तव्यम् । उत्तरपदविकाराणामवकाशः[11] । समीपम् दुरीपम् । एकादेशयणादेशयोः स एव । इहोभयं प्राप्नोति । नीपम् वीपम् । प्रेपम् परेपम् ॥*

औतोऽम्शसोः ॥ ६ । १ । ९३ ॥

ओतस्तिङि प्रतिषेधः ॥ १ ॥

ओतस्तिङि प्रतिषेधो वक्तव्यः । अचिनवम् असुनवम् ॥ स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । गोग्रहणं करिष्यते । आ गोत इति वक्तव्यम् ।

गोग्रहणे द्योरुपसंख्यानम् ॥ २ ॥

गोग्रहणे द्योरुपसंख्यानं कर्तव्यम् । द्यां गच्छ ॥

प्रकृत्या पूर्वपदम् ; अकः सवर्णे दीर्घः ; स्वरितो वानुदात्ते पदादौ ; –गतिकारकोपपदात कृत् ; अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे ६. २. १ ; ६. १. १०१ ; ८. २. ६ ;– ६. २. १३९ ; ६. १. १६९. १२ बहुव्रीहौ प्रकृत्या०, उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य ६.२.१ ; ८. २. ४. १३ अर्थे ; स्वरितो वानुदात्ते पदादौ ६. २. ४४ ; ८. २. ६. १४ आद्युदातश्च ३. १. ३. १५ समासस्य ६. १. २२३. १६ अनुदातस्य च यत्रोदात्तलोपः ६.१.१६१. १७ अतो लोपः ६. ४. ४८. १८ अतो गुणे ६. १. ९७. १९ लिति ६. १. १९३. २० आतो लोप इटि च ६. ४. ६४. २१ ऋ. सं. ६।२३।४.

* [V. M. om. वा. सुप्यापिशलेः (९२)].

[1] अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६. ४. ७७. [2] सार्वधातुकार्धधातुकयोः ७. ३. ८४. [3] गोतो णित् ; अचो ञ्णिति ७. १. ९० ; ७. २. ११५. [4] णिन्विधौ साधुकारिण्युपसंख्यानम् ३. २. ७८ वा. १. [5] सुप्यजातौ णिनिस्ताच्छील्ये ३. २. ७८. [6] कर्तरि भुवः खिष्णुच्खुकञौ. ३. २. ५७. [7] ह्रस्वनद्यापो नुट् ७. १. ५४. [8] आतो युक् चिण्कृतोः ७. ३. ३३. [9] नपुंसकस्य झलचः ; इकोऽचि विभक्तौ ७. १. ७२ ; ७३. [10] देवताद्वन्द्वे च ; ईदग्नेः सोमवरुणयोः ६. ३. २५ ; २६. [11] द्व्यन्तरुपसर्गेभ्योप ईत् ६. ३. ९७.

समासाच्च प्रतिषेधः ॥ ३ ॥

समासाच्च प्रतिषेधो वक्तव्यः । चित्रगुं पश्य । शबलगुं पश्य ॥ ननु चौत इत्युच्यमानेऽपि समासात्प्रतिषेधो वक्तव्यः । न वक्तव्यः । ह्रस्वत्वे[1] कृते न भविष्यति । इदमिह संप्रधार्यम् । आत्वं क्रियतां ह्रस्वत्वमिति किमत्र कर्तव्यम् । परत्वादात्वम् ।

न वा बहिरङ्गलक्षणत्वात् ॥ ४ ॥

न वा वक्तव्यः । किं कारणम् । बहिरङ्गलक्षणत्वात् । बहिरङ्गलक्षणमात्वम् । अन्तरङ्गं ह्रस्वत्वम् । असिद्धं बहिरङ्गमन्तरङ्गे ॥ ननु चाऽऽगोत इत्युच्यमानेऽपि समासात्प्रतिषेधो न वक्तव्यः । कथम् । ह्रस्वत्वे कृते न भविष्यति । स्थानिवद्भावात्प्राप्नोति ननु चौत इत्युच्यमानेऽपि स्थानिवद्भावात्प्राप्नोति । नेत्याह । अनल्विधौ स्थानिवद्भावः । आ गोत इत्युच्यमानेऽपि न दोषः । प्रतिषिध्यतेऽत्र स्थानिवद्भावः । गोः पूर्वणित्त्वात्वस्वरेषु स्थानिवन्न भवतीति[2] ॥

स एव तर्हि दोषो गोग्रहणे द्योरुपसंख्यानमिति । सूत्रं च भिद्यते ॥ यथान्यासमेवास्तु । ननु चोक्तमोतस्तिङि प्रतिषेध इति ।

सुबधिकारात्सिद्धम् ॥ ५ ॥

सुपीति वर्तते । क्व प्रकृतम् । वा सुप्यापिशलेः [९२] इति ॥ यद्यनुवर्तत इहापि विभाषा प्राप्नोति । सुब्ग्रहणमनुवर्तते वाग्रहणं निवृत्तम् । कथं पुनरेकयोगनिर्दिष्टयोरेकदेशोऽनुवर्तत एकदेशो न ।

एकयोगे चैकदेशानुवृत्तिरन्यत्रापि ॥ ६ ॥

एकयोगनिर्दिष्टानामप्येकदेशानुवृत्तिर्भवति । अन्यत्रापि नावश्यमिहैव । कान्यत्र । अलुगधिकारः प्रागानङ उत्तरपदाधिकारः प्रागङ्गाधिकारात्[3] ॥ एवमपि

अम्युपसंख्यानं वृद्धिबलीयस्त्वात् ॥ ७ ॥

अम्युपसंख्यानं कर्तव्यम् । गां पश्य । किं पुनः कारणं न सिध्यति । वृद्धिबलीयस्त्वात् । परत्वाद्वृद्धिः प्राप्नोति[4] ॥

---

[1] गोस्त्रियोरुपसर्जनस्य १. २. ४८. [2] गोः पूर्वणित्वात्वस्वरेषु १. १. ५६ वा. १९. [3] अलुगुत्तरपदे ६. ३. १. आनङ् ऋतो द्वन्द्वे ६. ३. २५. अङ्गस्य ६. ४. १; [4] गोतो णित; अचो ञ्णिति ७. १. ९०; ७. २. ११५.

न वानवकाशत्वात् ॥ ८ ॥

न वा वक्तव्यम् किं कारणम्। अनवकाशत्वात्। अनवकाशमात्वं वृद्धिं बाधिष्यते ॥ सावकाशमात्वम्। कोऽवकाशः। द्यां गच्छ ॥

द्योश्च सर्वनामस्थाने वृद्धिविधिः ॥ ९ ॥

द्योश्च सर्वनामस्थाने वृद्धिर्विधेया। किं प्रयोजनम्।

यद्द्याव इन्द्रेति दर्शनात् ॥ १० ॥

यद्द्याव॑ इन्द्र ते श॒तं श॒तं भूमींरुत स्युः[1]। यावता चेदानीं द्योरपि सर्वनामस्थाने वृद्धिरुच्यते ऽनवकाशमात्वं वृद्धिं बाधिष्यते ॥

एङि पररूपम् ॥ ६ । १ । ९४ ॥

पररूपप्रकरणे तुन्वोर्वि निपात उपसंख्यानम् ॥ १ ॥

पररूपप्रकरणे तु नुइत्येतयोर्वकारादौ निपात उपसंख्यानं कर्तव्यम्। तु-वै त्वै। नु-वै न्वै। वकारादाविति किमर्थम्। त्वावत् न्वावत्। निपात इति किमर्थम्। तु वानि। नु वानि ॥

न वा निपातैकत्वात् ॥ २ ॥

न वा कर्तव्यम् किं कारणम्। निपातैकत्वात्। एक एवायं निपातः त्वै न्वै ॥

एवे चानियोगे ॥ ३ ॥

एवे चानियोगे पररूपं वक्तव्यम्। इह एव इहेव। अद्येव। अनियोग इति किमर्थम्। इ॒हैव भ॑व॒ मा स्म गा॒ः[2]। अ॑त्रै॒व त्वमि॒ह वयं सु॒शेवा॑ः[3] (तै. आ. ६. १. ३)॥

शकन्ध्वादिषु च ॥ ४ ॥

शकन्ध्वादिषु च पररूपं वक्तव्यम्। शक अन्धुः शकन्धुः। कुल अटा कुलटा। सीम अन्तः सीमन्तः। केशेष्विति वक्तव्यम्। यो हि सीम्नोऽन्तः सीमान्तः स भवति ॥

---

[1] ऋ. सं. ८।७०।५.

[2] आवतस्त आवतः परावतस्त आवतः। इहैव भव मा नु गा म पूर्वाननु गाः पितॄनसुं बध्नानि ते दृढम् ॥ अथ. सं. ५।३०।१.

[3] अत्रैव त्वमिह वयं सुवीराः ऋ. सं. १०।१८।९.

ओत्वोष्ठयोः समासे वा ॥ ५ ॥

ओत्वोष्ठयोः समासे वा पररूपं वक्तव्यम् । स्थूलौतुः स्थूलोतुः । बिम्बौष्ठी विम्बोष्ठी ॥

एमनादिषु च्छन्दसि ॥ ६ ॥

एमनादिषु च्छन्दसि पररूपं वक्तव्यम् । अ॒पां त्वेम॑न्सादयाम्य॒पां त्वोद्म॑न्सादयामि ॥ (वा. सं. १३. ५३)

ओमाङोश्च ॥ ६ । १ । ९५ ॥

किमर्थश्चकारः । एङीत्यनुकृष्यते[1] । किं प्रयोजनम् । इह मा भूत् । अद्य आ ऋश्यात् अद्यार्श्यात् । कदार्श्यात् ॥ नैतदस्ति प्रयोजनम् अद्यर्श्यादित्येव भवितव्यम् । एवं हि सौनागाः पठन्ति । चोऽनर्थकोऽनधिकारादेङः ॥

उस्योमाङ्क्ष्वाटः प्रतिषेधः ॥ १ ॥

उसि[2] पररूप ओमाङोश्चाटः प्रतिषेधो वक्तव्यः । औस्त्रीयत् औढीयत् औकारीयत् ॥ स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । उक्तमाटश्च [९०] इत्यत्र चकारस्य प्रयोजनं वृद्धिरेव यथा स्याद्यदन्यत्प्राप्नोति तन्मा भूदिति[3] ॥

उस्यपदान्तात् ॥ ६ । १ । ९६ ॥

अपदान्तादिति किमर्थम् । का उस्रा कोस्रा ॥ अपदान्तादिति शक्यमकर्तुम् । कस्मान्न भवति का उस्रा कोस्रा । अर्थवद्ग्रहणे नानर्थकस्येति । नैषा परिभाषेह शक्या विज्ञातुम् । इह हि दोषः स्यात् । भिन्द्या उस् भिन्द्युः । छिन्द्या उस् छिन्द्युः ॥ एवं तर्हि लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवं न भविष्यति ॥ उत्तरार्थं तर्ह्यपदान्तग्रहणं कर्तव्यम् । अतो गुणे [९७] अपदान्ताद्यथा स्यादिति । इह मा भूत् । दण्डाग्रम् क्षुपाग्रमिति ॥ *

---

* [V. M. om. अतो गुणे (९७)].

[1] एङि पररूपम् ६. १. ९४. [2] उस्यपदान्तात् ६. १. ९६. [3] इदं तर्हि प्रयोजनमाढोऽचि वृद्धिरेव यथा स्याद्यदन्यत् प्राप्नोति तन्मा भूदिति । किंचान्यत् प्राप्नोति। पररूपम् । ६. १. ९० महाभाष्य.

अव्यक्तानुकरणस्यात इतौ ॥ ६ । १ । ९८ ॥

इतावनेकाज्ग्रहणं श्रदर्थम् ॥ १ ॥

इतावनेकाज्ग्रहणं कर्तव्यम्। किं प्रयोजनम्। श्रदर्थम्। इह मा भूत्। श्रदिति॥

नाम्रेडितस्यान्त्यस्य तु वा ॥ ६ । १ । ९९ ॥

नित्यमाम्रेडिते डाचि ॥ १ ॥

नित्यमाम्रेडिते डाचि पररूपं कर्तव्यम्। पटपटायति[1]॥

अकारान्तानुकरणाद्वा ॥ २ ॥

अथवाकारान्तमेतदनुकरणम्॥ भवेत्सिद्धं यदाकारान्तं यदा तु खल्वच्शब्दान्तं तदा न सिध्यति। विचित्रास्तद्धितवृत्तयः। नातस्तद्धित उत्पद्यते॥*

अकः सवर्णे दीर्घः ॥ ६ । १ । १०१ ॥

सवर्णदीर्घत्व ऋति [2]ॠवावचनम् ॥ १ ॥

सवर्णदीर्घत्व ऋति ॠ वा भवतीति वक्तव्यम्। होतृ ऋकारः होतॄकारः॥

ऌति [2]ॡवावचनम् ॥ २ ॥

ऌति ॡ वा भवतीति वक्तव्यम्। होतृ ऌकारः होॡकारः॥

इति श्रीभगवत्पञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य प्रथमे पादे चतुर्थमाह्निकम्॥

---

* [V. M. om. नित्यमाम्रेडिते डाचि (१००) which, in fact, is a Vārtika given under नाम्रेडितस्यान्त्यस्य तु वा (sūtra 99)].

[1] लोहितादिडाज्भ्यः क्यष् ३. १. १३. [2] It is difficult to make out which kind of ऋ and ऌ is prescribed as opitional with सवर्णदीर्घ by the Vārtikakāra. More than 15 grammarians appear to show that they should be ऋ and ऌ preceded respectively by the consonants र् and ल्. The followers of the Śākaṭāyana school say that they should be ऋ and ऌ followed by र् and ल्; while the commentator Viṭṭhala on the Prakriyākaumudī says that they shonld bo short ऋ and ऌ.

प्रथमयोः पूर्वसवर्णः ॥ ६ । १ । १०२ ॥

प्रथमयोरित्युच्यते । कयोरिदं प्रथमयोर्ग्रहणं किं विभक्त्योराहोस्वित्प्रत्यययोः । विभक्त्योरित्याह । कथं ज्ञायते । अचीति[1] वर्तते न चाजादी प्रथमौ प्रत्ययौ स्तः । ननु चैवं विज्ञायतेऽजादी यौ प्रथमावजादीनां वा यौ प्रथमाविति । यत्तर्हि तस्माच्छसो नः पुंसि [१०३] इत्यनुक्रान्तं पूर्वसवर्णं प्रतिनिर्दिशति तज्ज्ञापयत्याचार्यो विभक्त्योर्ग्रहणमिति । अथवा सुपीति[2] वर्तते ॥

अथ किमर्थं पूर्वसवर्णदीर्घोऽमि पूर्वत्वं[3] चोच्यते न प्रथमयोः पूर्वसवर्ण इत्येव सिद्धम् । न सिध्यति । प्रथमयोः पूर्वसवर्ण इत्युच्यमाने ऽम्यपि दीर्घः प्राप्नोति । वृक्षम् प्लक्षम् । नेष दोषः । यत्पूर्वस्मिन्योगे[4] दीर्घग्रहणं तदुत्तरत्र निवृत्तम् । एवमपीदमिह पूर्वसवर्णग्रहणं क्रियते तेनाम्यपि पूर्वसवर्णः प्रसज्येत । वृक्षम् प्लक्षम् । द्विमात्रः प्राप्नोति । नैष दोषः । सवर्णग्रहणं न करिष्यते । यदि सवर्णग्रहणं न क्रियते कुतो व्यवस्था । आन्तर्यतः । यद्येवमग्नी वायू त्रिमात्रः प्राप्नोति । वृक्षम् प्लक्षम् द्विमात्रः । तस्मात्सवर्णग्रहणं कर्तव्यं तस्मिंश्च क्रियमाणे दीर्घग्रहणमनुवर्तते तस्मिन्ननुवर्तमाने ऽमि पूर्व इत्यपि वक्तव्यम् ॥ अथ किमर्थं पृथगुच्यते नेहैवोच्येत प्रथमयोः पूर्वसवर्णोऽमि चेति । यदि प्रथमयोः पूर्वसवर्णदीर्घो भवत्यमि चेत्युच्यते तेनाम्यपि दीर्घः प्रसज्येत । वृक्षम् प्लक्षम् । नैष दोषः । दीर्घग्रहणं निवर्तयिष्यते । एवमपि पूर्वसवर्णः प्रसज्येत । सवर्णग्रहणं न करिष्यते । यदि सवर्णग्रहणं न क्रियते पूर्वास्मिन्योगे विप्रतिषिद्धम् । यदि पूर्वो न दीर्घोऽथ दीर्घो न पूर्वः पूर्वश्च दीर्घश्चेति विप्रतिषिद्धम् । तस्मादुभयमारब्धव्यं पृथक्च वक्तव्यम् ॥

प्रथमयोरिति योगविभागः सवर्णदीर्घार्थः ॥ १ ॥

प्रथमयोरिति योगविभागः कर्तव्यः । प्रथमयोरकः सवर्णदीर्घो भवति । ततः पूर्वसवर्णः । पूर्वसवर्णदीर्घो भवत्यकः प्रथमयोरिति । किमर्थो योगविभागः । सवर्णदीर्घार्थः । सवर्णदीर्घत्वं यथा स्यात् ॥

एकयोगे हि जस्शसोः पररूपप्रसङ्गः ॥ २ ॥

एकयोगे हि सति जस्शसोः पररूपं[5] प्रसज्येत । वृक्षाः प्लक्षाः । वृक्षान् प्लक्षान् ॥ ननु च पूर्वसवर्णदीर्घत्वं पररूपं बाधिष्यते । नोत्सहते बाधितुम् । किं कारणम् ।

---

[1] इको यणचि ६. १. ७०. [2] वा सुप्यापिशलेः; सुपः; विभक्तिश्च ६. १. ९२; १. ४. १०३; १०४. [3] अमि पूर्वः ६. १. १०७. [4] अकः सवर्णे दीर्घः ६. १. १०१. [5] णतो गुणे ६. १. ९७.

आद्गुणयणादेशयोरपवादा वृद्धिसवर्णदीर्घपूर्वसवर्णादेशास्तेषां पररूपं स्वरसंधिषु ॥ ३ ॥

आद्गुणयणादेशावुत्सर्गौ । तयोरपवादा वृद्धिसवर्णदीर्घपूर्वसवर्णादेशाः । तेषां सर्वेषां पररूपमपवादः । तत्सर्वबाधकम् । सर्वबाधकत्वात्प्राप्नोति ॥ अथ क्रियमाणेऽपि योगविभागे यावता पररूपमपवादः कस्मादेव न बाधते । योगविभागोऽन्यशास्त्रनिवृत्त्यर्थः । योगविभागोऽन्यशास्त्रनिवृत्त्यर्थो विज्ञायते ॥

योगविभागोऽन्यशास्त्रनिवृत्त्यर्थश्चेदम्यतिप्रसङ्गः ॥ ४ ॥

योगविभागोऽन्यशास्त्रनिवृत्त्यर्थश्चेदम्यतिप्रसङ्गो भवति । वृक्षम् प्लक्षम् । यथैव हि योगविभागः पररूपं बाधत एवममि[1] पूर्वत्वमपि बाधेत ॥

नकाराभावश्च तस्मादित्यनन्तरनिर्देशात् ॥ ५ ॥

नत्वस्य[2] चाभावः वृक्षान् प्लक्षान् । किं कारणम् । तस्मादित्यनन्तरनिर्देशात् । तस्मादित्यनेनानन्तरो योगः प्रतिनिर्दिश्यते । किं पुनः कारणं तस्मादित्यनेनानन्तरो योगः प्रतिनिर्दिश्येत । इह मा भूत् । एतान्गाः[3] पश्य ॥ अस्तु तर्ह्येकयोग एव । ननु चोक्तमेकयोगे हि जश्शसोः पररूपप्रसङ्ग इति । नैष दोषः ।

इज्ग्रहणं तु ज्ञापकं पररूपाभावस्य ॥ ६ ॥

यदयं नादिचि [१०४] इतीज्ग्रहणं करोति तज्ज्ञापयत्याचार्यो न जश्शसोः पररूपं भवतीति । कथं कृत्वा ज्ञापकम् । इज्ग्रहणस्यैतत्प्रयोजनमिह मा भूत् । वृक्षाः प्लक्षाः । वृक्षान् प्लक्षान् । यदि च जश्शसोः पररूपं स्यादिज्ग्रहणमनर्थकं स्यात् । पश्यति त्वाचार्यो न जश्शसोः पररूपं भवतीति तत इज्ग्रहणं करोति ॥ नैतदस्ति ज्ञापकम् । उत्तरार्थमेतत्स्यात् । दीर्घाज्जसि च [१०५] इचि चेति । यद्युत्तरार्थमेतत्स्यात्तत्रैवायमिज्ग्रहणं कुर्वीत । इहापि तर्हि क्रियमाणं यद्युत्तरार्थं न ज्ञापकं भवति ॥ एवं तर्हि यद्युत्तरार्थमेतत्स्यान्नैवायमिज्ग्रहणं कुर्वीत नापि जस्ग्रहणम् । एतावदयं ब्रूयाद्दीर्घाच्छसि पूर्वसवर्णो भवतीति । तन्नियमार्थं भविष्यति । दीर्घाच्छस्येव नान्यत्रेति । सोऽयमेवं लघीयसा न्यासेन सिद्धे यदिज्ग्रहणं करोति तज्ज्ञापयत्याचार्यो न जश्शसोः पररूपं भवतीति ॥

अथवा पुनरस्तु योगविभागः । ननु चोक्तं योगविभागोऽन्यशास्त्रनिवृत्त्यर्थश्चेदम्यतिप्रसङ्ग इति । नैष दोषः । अम्यपि[1] योगविभागः करिष्यते । अमि । अमि

---

[1] अमि पूर्वः ६. १. १०७. [2] तस्माच्छसो नः पुंसि ६.१.१०३. [3] औतोम्शसोः ६. १. ९३.

यदुक्तं तन्न भवतीति । ततः पूर्वः । पूर्वश्च भवत्यमीति ॥ यदप्युच्यते नकाराभावश्च तस्मादित्यनन्तरनिर्देशादिति कः पुनरर्हति तस्मादित्यनेनानन्तरं योगं प्रतिनिर्देष्टुम् । एवं किल प्रतिनिर्दिश्येत तस्मात्पूर्वसवर्णदीर्घादिति । तच्च न । एवं प्रतिनिर्दिश्यते तस्मादको दीर्घादिति । अथवा तस्मात्प्रथमयोर्दीर्घादिति ॥ अथवा पुनरस्त्वयमेकयोगः । ननु चोक्तं योगविभागोऽन्यशास्त्रनिवृत्त्यर्थश्चेदम्यतिप्रसङ्ग इति । नैष दोषः । मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते इत्येवं योगविभागः पररूपं बाधिष्यतेऽमि पूर्वत्वं न बाधिष्यते । यद्येतदस्ति मध्येऽपवादाः पुरस्तादपवादा इति नार्थ एकेनापि योगविभागेन । पुरस्तादपवादा अनन्तरान्विधीन् बाधन्त इत्येवं पररूपं सवर्णदीर्घत्वं बाधिष्यते प्रथमयोः पूर्वसवर्णदीर्घत्वं न बाधिष्यते ॥

अथवा सप्तमे[1] योगविभागः करिष्यते । इदमस्त्यतो दीर्घो यञि सुपि च [७. ३. १०१; १०२] इति । ततो वक्ष्यामि बहुवचने । बहुवचने चातो दीर्घो भवति । ततो झल्येत् । एकारश्च भवति बहुवचने झलीति ॥ इहापि तर्हि प्राप्नोति । वृक्षाणाम् प्लक्षाणाम् । तत्र को दोषः । दीर्घत्वं कृते ह्रस्वाश्रयो नुण्न प्राप्नोति[2] । इदमिह संप्रधार्यम् । दीर्घत्वं क्रियतां नुडिति किमत्र कर्तव्यम् । परत्वाद्दीर्घत्वम् । नित्यं खल्वपि दीर्घत्वम् । कृतेऽपि नुटि प्राप्नोत्यकृतेऽपि । नित्यत्वात्परत्वाच्च दीर्घत्वे कृते ह्रस्वाश्रयो नुण्न प्राप्नोति । एवं तर्ह्याद्ग्रहणमिहापि प्रकृतमनुवर्तते । क्व प्रकृतम् । आज्जसेरसुक् [७. १. ५०] इति । तेन कृतेऽपि दीर्घत्वे नुड्भविष्यति । इहापि तर्हि प्राप्नोति । कीलालपाम् शुभंयाम् । अतो लोपो[3]ऽत्र बाधको भविष्यति । इदमिह संप्रधार्यम् । लोपः क्रियतां नुडिति किमत्र कर्तव्यम् । परत्वान्नुट् । एवं तर्हि ह्रस्वनद्यापो नुडित्यत्रातो धातोः [६. ४. १४०] इत्यातो लोपः संबन्धमनुनवर्तिष्यते । इहापि तर्हि प्राप्नोति । कीलालपानां[4] ब्राह्मणकुलानाम् । नपुंसकस्य नेत्यप्यनुवर्तिष्यते[5] ॥

तस्माच्छसो नः पुंसि ॥ ६ । १ । १०३ ॥

किमिदं नत्वं पुंसां बहुत्वे भवत्याहोस्वित्पुंशब्दाद्बहुषु । कश्चात्र विशेषः ।

नत्वं पुंसां बहुत्वे चेत्पुंशब्दादिष्यते स्त्रियाम् ।

तन्न सिध्यति । भ्रूकुंसान्पश्येति ॥

नपुंसके तथैवेष्टं

तन्न सिध्यति । षण्ढान्पश्य । पण्डकान्पश्येति ॥

---

[1] बहुवचने झल्येत् ७. ३. १०३. [2] ह्रस्वनद्यापो नुट् ७. १. ५४. [3] आतो धातोः ६. ४. १४०. [4] ह्रस्वो नपुंसके प्रातिपदिकस्य; बहुवचने झल्येत् १. २. ४७; ७. ३. १०३. [5] स्वमोर्नपुंसकात्; नेतराच्छन्दसि ७. १. २३; २६.

स्त्रीशब्दाच्च प्रसज्यते ॥ १ ॥

स्त्रीशब्दाच्च प्राप्नोति । चञ्चाः पश्य । वध्रिकाः पश्य । खरकुटीः[१] पश्य ॥ अस्तु तर्हि पुंशब्दाद्बहुषु ।

पुंशब्दादिति चेदिष्टं स्थूरापत्यं न सिध्यति ।

स्थूरान्पश्येति[२] ॥

कुण्डिन्या अररकायाः

अपत्यं च न सिध्यति । कुण्डिनान्पश्य[३] अररकान्पश्य[२] ॥

पुंस्प्राधान्यात्प्रसिध्यति ॥ २ ॥

पुंस्प्रधाना एते शब्दास्ततो नत्वं भविष्यति ॥

पुंस्प्राधान्ये त एव स्युर्ये दोषाः पूर्वचोदिताः ।

भ्रूकुंसान्पश्य । षण्ढान्पश्य । पण्डकान्पश्य । चञ्चाः पश्य । वध्रिकाः पश्य । खरकुटीः पश्येति ॥ तस्माद्यस्मिन्पक्षेऽल्पीयांसो दोषास्तमास्थाय प्रतिविधेयं दोषेषु ॥

नत्वं पुंसां बहुत्वे चेत्पुंशब्दादिष्यते स्त्रियाम् ।
नपुंसके तथैवेष्टं स्त्रीशब्दाच्च प्रसज्यते ॥ १ ॥
पुंशब्दादिति चेदिष्टं स्थूरापत्यं न सिध्यति ।
कुण्डिन्या अररकायाः पुंस्प्राधान्यात्प्रसिध्यति ॥ २ ॥
पुंस्प्राधान्ये त एव स्युर्ये दोषाः पूर्वचोदिताः ।
तस्मादर्थे भवेन्नत्वं वध्रिकादिषु युक्तवत्[४] ॥ ३ ॥*

अमि पूर्वः ॥ ६ । १ । १०७ ॥

वा छन्दसीत्येव[५]। यमीं[६] च यम्यं[७] च । शमीं[८] च शम्यं[९] च । गौरीं[१०] च गौर्यं[११] च । किशोरीं च किशोर्यं च ॥

---

* [V. M. om. नादिचि (१०४) दीर्घाज्जसि च (१०५) वा छन्दसि (१०६)].

[१] संज्ञायां च; लुब्मनुष्ये ५ ३. ९७; ९८. [२] गर्गादिभ्यो यञ्; यञञोश्च; लुक् तद्धितलुकि ४. १. १०५; २. ४. ६४; १. २. ४९. [३] गर्गादिभ्यो यञ्; आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्. ४. १. १०५; २. ४. ७०. [४] लुपि युक्तवद्व्यक्तिवचने १. २. ५१. [५] वा छन्दसि ६. १. १०६. [६] तै. सं २. १. ९. ४. [७] ऋ. सं. १०. १०-७; अथ. सं १८. १. ८. [८] अथ. सं. ६. ११. १. [९] मै. सं. १. १०. १२. [१०] बृ. दे. २. ८१. [११] ऋ. सं. ४. १२. ६; १०. १२६. ८.

संप्रसारणाच्च ॥ ६ । १ । १०८ ॥

वा छन्दसीत्येव[1] । मित्रावरुणौ यज्यमानः । मित्रावरुणौ इज्यमानः ॥

संप्रसारणात्परपूर्वत्वे समानाङ्गग्रहणमसमानाङ्गप्रतिषेधार्थम् ॥ १ ॥

संप्रसारणात्परपूर्वत्वे समानाङ्गग्रहणं कर्तव्यम् । किं प्रयोजनम् । असमानाङ्गप्रतिषेधार्थम् । असमानाङ्गस्य मा भूदिति । शकह्वर्थम् परिव्यर्थम्[2] ॥

सिद्धमसंप्रसारणात् ॥ २ ॥

सिद्धमेतत् । कथम् । असंप्रसारणात् । वाक्यस्य संप्रसारणसंज्ञा न वर्णस्य ॥ अथ वर्णस्य संप्रसारणसंज्ञायां दोष एव । वर्णस्य च संप्रसारणसंज्ञायां न दोषः । कथम् । अन्योऽयं संप्रसारणासंप्रसारणयोः स्थान एक आदिश्यते ॥

कार्यकृतत्वाद्वा ॥ ३ ॥

अथवा सकृत्कृतं पूर्वत्वमिति कृत्वा पुनर्न भविष्यति । तद्यथा । वसन्ते ब्राह्मणोऽग्नीनादधीतेति सकृदाधाय कृतः शास्त्रार्थ इति कृत्वा पुनःप्रवृत्तिर्न भवति ॥ विषम उपन्यासः । युक्तं यत्तस्यैव पुनःप्रवृत्तिर्न भवति यत्तु तदाश्रयं प्राप्नोति न तच्छक्यं बाधितुम् । तद्यथा । वसन्ते ब्राह्मणो ऽग्निष्टोमादिभिः क्रतुभिर्यजेतेत्यग्न्याधाननिमित्तं वसन्ते वसन्त इज्यते । तस्मात्पूर्वोक्त एव परिहारः सिद्धमसंप्रसारणादिति ॥ यदि तर्हि नेदं संप्रसारणं हूत इति दीर्घत्वं[3] न प्राप्नोति ।

दीर्घत्वं वचनप्रामाण्यात् ॥ ४ ॥

अनवकाशं दीर्घत्वं तद्वचनप्रामाण्याद्भविष्यति ॥

अन्तवत्त्वाद्वा ॥ ५ ॥

अथवा पूर्वस्य कार्यं प्रत्यन्तवद्भवतीति दीर्घत्वं भविष्यति ॥

आटो वृद्धेरियङ् ॥ ६ ॥

आटो वृद्धिर्भवतीत्येतस्मादियङ् भवति विप्रतिषेधेन[4] । आटो वृद्धिर्भवतीत्यस्या-

---

[1] वा छन्दसि ६. १. १०६. [2] वचिस्वपियजादीनां किति; संप्रसारणाच्च; हलः; इको यणचि ६. १. १५; १०८; ६. ४. २; ६. १. ७७. [3] हलः ६. ४. २. [4] आटश्च; आचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६. १. ९०; ६. ४. ७७.

वकाशः । ऐक्षिष्ट ऐहिष्ट । इयङोऽवकाशः । अधीयाते अधीयते । इहोभयं प्राप्नोति । अध्यैयाताम् अध्यैयत । इयङादेशो भवति विप्रतिषेधेन ॥ नैष युक्तो विप्रतिषेधः । अन्तरङ्गाऽटो वृद्धिः । कान्तरङ्गता । वर्णावाश्रित्याटो वृद्धिरङ्गस्येयङादेशः । एवं तर्हीदमिह संप्रधार्यम् । आट्रियताभियङादेश क्र इति किमत्र कर्तव्यम्[1] । परत्वादियङ् । नित्य आडागमः । कृतेऽपीयङि प्राप्नोत्यकृतेऽपि । इयङपि नित्यः । कृतेऽप्याटि प्राप्नोत्यकृतेऽपि । अनित्य इयङ् न हि कृते आटि प्राप्नोति । किं कारणम् । अन्तरङ्गाटो वृद्धिः । यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम् । न चात्राडेत्रेयङो निमित्तं विहन्त्यवश्यं लक्षणान्तरमाटो वृद्धिः प्रतीक्ष्या । उभयोर्नित्ययोः परत्वादियङादेशः ॥

आद्गुणात्सवर्णदीर्घत्वमाङभ्यासयोः ॥ ७ ॥

आद्गुणात्सवर्णदीर्घत्वं भवति विप्रतिषेधेन[2] । क्व । आङभ्यासयोः । आद्गुणस्यावकाशः । खट्वेन्द्रः खट्वोदकम् । सवर्णदीर्घत्वस्यावकाशः । दण्डाग्रम् क्षुपाग्रम् । इहोभयं प्राप्नोति । अद्य आ ऊढा अद्योढा । कदा आ ऊढा कदोढा । उप इइजतुः उपेजतुः । उप उउपतुः उपोपतुः । सवर्णदीर्घत्वं भवति विप्रतिषेधेन ॥ अभ्यासार्थेन तावन्नार्थः । अस्त्वत्राद्गुणो ऽयवौ च हलादिशेषः[3] पुनराद्गुणो भविष्यति । भवेत्सिद्धम् उपेजतुः उपेजुरिति । इदं तु न सिध्यति उपोपतुः उपोपुरिति । अत्र ह्याद्गुणे कृत ओदन्तो निपात इति प्रगृह्यसंज्ञा प्रगृह्यः प्रकृत्येति[4] प्रगृह्याश्रयः प्रकृतिभावः प्राप्नोति । पदान्तप्रकरणे प्रकृतिभावो न चैष पदान्तः । पदान्तभक्तः पदान्तग्रहणेन ग्राहिष्यते । एवं तर्ह्येतदेवात्र नास्त्योदन्तो निपात इति । किं कारणम् । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति ॥ इहापि तर्हि अद्योढा कदोढेति भवेद्रूपं सिद्धं स्यात्

स्वरे दोषस्तु ॥ ८ ॥

स्वरे तु दोषो भवति । अद्योढा[5] एवं स्वरः प्रसज्येत अ॒द्योढा[6] इति चेष्यते ॥ आङि पररूपवचनं[7] चेदानीमनर्थकं स्यात् । नानर्थकम् । ज्ञापकार्थम् । किं ज्ञाप्यम् ।

आङि पररूपवचनं तु ज्ञापकमन्तरङ्गबलीयस्त्वस्य ॥ ९ ॥

एतज्ज्ञापयत्याचार्योऽन्तरङ्गं बलीयो भवतीति । किं पुनरिहान्तरङ्गं किं बहिरङ्गं यावता द्वे पदे आश्रित्य सवर्णदीर्घत्वमपि भवत्याद्गुणोऽपि । धातूपसर्गयोर्यत्कार्यं

---

[1] आडजादीनाम्; अचिश्नुधातुभ्रुवां य्वोरियङुवङौ ६. ४. ७२; ७७. [2] आद्गुणः; अकः सवर्णे दीर्घः ६. १. ८७; १०१. [3] एचोयवायावः; हलादिः शेषः ६. १. ७८; ७. ४. ६०. [4] ओत्; प्लुतप्रगृह्या अचि नित्यम् १. १. १५; ६. १. १२५. [5] गतिरनन्तरः; स्वरितो वानुदात्ते पदादौ ६. २. ४९; ८. २. ६. [6] अद्यशब्दः प्रत्ययस्वरेणान्तोदात्तः । आङ्......उदात्तः । शिष्टमनुदात्तम् । तत्र यदि पूर्वं सवर्णदीर्घः स्यात् तदा......स्वरितो वानुदात्ते पदादौ (८।२।६) इति पक्ष उदात्तः स्यात् पक्षे स्वरितः । यदा तु पूर्वमाद्गुणः पश्चादोमाङोश्चेति पररूपं तदा......उदात्त एव भवति । ६।१।१०८ कैयट. [7] ओमाङोश्च ६. १. ९५.

तदन्तरङ्गम् । कुत एतत् । पूर्वमुपसर्गस्य हि धातुना योगो भवति नाद्यशब्देन । किमर्थं तर्ह्यद्यशब्दः प्रयुज्यते । अद्यशब्दस्यापि समुदायेन योगो भवति ॥ किमेतस्य ज्ञापने प्रयोजनम् ।

प्रयोजनं पूर्वसवर्णपूर्वत्वतहिलोपटेनङेर्यङिस्मिन्ङिणलौत्वमन्तरङ्गं बहिरङ्गलक्षणाद्वर्णविकारात् ॥ १० ॥

पूर्वसवर्णः प्रयोजनम् । अग्नी अत्र । वायू अत्र । पूर्वसवर्णश्च प्राप्नोति बहिरङ्गलक्षणश्च वर्णविकार आवादेशः[1] । पूर्वसवर्णदीर्घत्वं भवत्यन्तरङ्गतः । पूर्वसवर्ण ॥ पूर्वत्व । शकह्वर्थम् परिव्यर्थम् । पूर्वत्वं च प्राप्नोति बहिरङ्गलक्षणश्च वर्णविकारः सवर्णदीर्घत्वम्[2] । पूर्वत्वं भवत्यन्तरङ्गतः । पूर्वत्व ॥ तहिलोप । अकार्यत्र अहार्यत्र । पचेदम् । तहिलोपौ च प्राप्नुतो बहिरङ्गलक्षणश्च वर्णविकारः सवर्णदीर्घत्वम्[3] । तहिलोपौ भवतोऽन्तरङ्गतः । तहिलोप ॥ टेन । वृक्षेणात्र प्लक्षेणात्र । इनादेशश्च प्राप्नोति बहिरङ्गलक्षणश्च वर्णविकारः सवर्णदीर्घत्वम्[4] । इनादेशो भवत्यन्तरङ्गतः । टेन ॥ ङेर्य । वृक्षायात्र प्लक्षायात्र । ङेर्यादेशश्च[5] प्राप्नोति बहिरङ्गलक्षणश्च वर्णविकार एङः पदान्तादति [६. १. १०९] इति परपूर्वत्वम् । ङेर्यादेशो भवत्यन्तरङ्गतः । ङेर्य ॥ ङिस्मिन् । यस्मिन्निदम् तस्मिन्निदम् । स्मिन्भावश्च प्राप्नोति बहिरङ्गलक्षणश्च वर्णविकारः सवर्णदीर्घत्वम्[6] । स्मिन्भावो भवत्यन्तरङ्गतः । ङिस्मिन् ॥ ङिणलौत्वम् । अग्नाविदम् । ययावत्र । ङिणलौत्वं प्राप्नोति बहिरङ्गलक्षणश्च वर्णविकारः सवर्णदीर्घत्वम्[7] । औत्वं भवत्यन्तरङ्गतः ॥ नैतानि सन्ति प्रयोजनानि । विप्रतिषेधेनाप्येतानि सिद्धानि[8] । इदं तर्हि प्रयोजनम् । वृक्षा अत्र । प्लक्षा अत्र । पूर्वसवर्णश्च[9] प्राप्नोति बहिरङ्गलक्षणश्च वर्णविकारोऽतो रोरप्लुतादप्लुते [६. २. ११३] इत्युत्त्वम् । पूर्वसवर्णो भवत्यन्तरङ्गतः । न चावश्यमिदमेव प्रयोजनम् । आद्ये योगे बहूनि प्रयोजनानि सन्ति यदर्थमेषा परिभाषा कर्तव्या । प्रतिविधेयं दोषेषु[10] ॥*

ख्यत्यात्परस्य ॥ ६ । १ । ११२ ॥

किमिदं ख्यत्यादिति । सखिपत्योर्विकृतग्रहणम्[11] । किं पुनः कारणं सखिपत्यो-

---

* [V. M. om. एङः पदान्तादति (१०९); ङसिङसोश्च (११०); ऋत उत् (१११)].

[1] प्रथमयोः पूर्वसवर्णः । एचोऽयवायावः ६. १. १०२ ; ७८.

[2] संप्रसारणाच्च ; अकः सवर्णे दीर्घः ; ६. १. १०८ ; १०१.

[3] चिणो लुक् ; अतो हेः ; अकः सवर्णे दीर्घः ६. ४. १०४ ; १०५ ; ६. १. १०१.

[4] टाङसिङसामिनात्स्याः ; अकः सवर्णे दीर्घः ७. १. १२ ; ६. १. १०१.

[5] ङेर्यः ७. १. १३.

[6] ङसिङ्योः स्मात्स्मिनौ ; अकः सवर्णे दीर्घः ७. १. १५ ; ६. १. १०१.

[7] इदुद्भ्याम् ; औत् ; अच्च घेः ; आत औ णलः ; अकः सवर्णे दीर्घः ७. ३. ११७–११९ ; ७. १. ३४. ; ६. १. १०१.

[8] विप्रतिषेधे परं कार्यम् १. ४. २.

[9] प्रथमयोः पूर्वसवर्णः ६. १. १०२.

[10] तस्य दोषः पूर्वपदोत्तरपदयोर्वृद्धिस्वरावेकादेशात् । यणादेशादियुवौ । उसि पररूपाच्च । लुग्लोपयणयवायावावेकादेशेभ्यः । १. ४. २. वा २२-२५.

[11] शेषो घ्यसखि ; पतिः समास एव ; (घेर्ङिति) १. ४. ७. ८ ; (७. ३. १११).

विंकृतग्रहणं क्रियते न सखिपतिभ्यामित्येवोच्येत । नैवं शक्यम् । गरीयांश्चैव हि निर्देशः स्यात् । इह च प्रसज्येत । अतिसखेरागच्छामि । अतिसखेः स्वम् । इह च न स्यात् । सखीयतेरप्रत्ययः सख्युः पत्युः । लूनीयतेरप्रत्ययः । लून्युः पून्युः[1] ॥

अतो रोरप्लुतादप्लुते ॥ ६ । १ । ११३ ॥

किमर्थमप्लुतादप्लुत इत्युच्यते । प्लुतात्परस्य प्लुते वा परतो मा भूदिति । प्लुतात्परस्य । सुस्रोता३ अत्र न्वसि[2] । प्लुते परतः । तिष्ठतु पय आ३ग्निदत्त[3] । अतोऽतीत्युच्यते कः प्रसङ्गः प्लुतात्परस्य प्लुते वा परतः स्यात् । असिद्धः[4] प्लुतस्तस्यासिद्धत्वात्प्राप्नोति । अथाप्लुतादप्लुत इत्युच्यमाने यावतासिद्धः प्लुतः कस्मादेवात्र न प्राप्नोति । अप्लुतभाविनोऽप्लुतभाविनीत्येवमेतद्विज्ञायते ॥ नैतदस्ति प्रयोजनम् । सिद्धः प्लुतः स्वरसंधिषु । कथं ज्ञायते । यदयं प्लुतः प्रकृत्येति[5] प्लुतस्य प्रकृतिभावं शास्ति । सतो हि कार्यिणः कार्येण भवितव्यम् ॥

अप्लुतादप्लुतवचनेऽकारहशोः समानपदे प्रतिषेधः ॥ १ ॥

अप्लुतादप्लुतवचनेऽकारहशोः[6] समानपदे प्रतिषेधो वक्तव्यः । पयो३ट् पयो३द ॥

न वा बहिरङ्गलक्षणत्वात् ॥ २ ॥

न वा वक्तव्यः । किं कारणम् । बहिरङ्गलक्षणत्वात् । बहिरङ्गः प्लुतः । अन्तरङ्गमुत्त्वम् । असिद्धं बहिरङ्गमन्तरङ्गे ॥ इहापि तर्हि प्राप्नोति । सुस्रोता३अत्र न्वसि । अन्तरङ्गोऽत्र प्लुतो बहिरङ्गमुत्त्वम् ॥ क्व पुनरिहान्तरङ्गः प्लुतः क्व वा बहिरङ्गमुत्त्वमुत्त्वं वान्तरङ्गं प्लुतो वा बहिरङ्गः । वाक्यान्तस्य वाक्यादावन्तरङ्गः प्लुतो बहिरङ्गमुत्त्वम् । समानवाक्ये पदान्तस्य पदादावुत्त्वमन्तरङ्गं बहिरङ्गः प्लुतः ॥ किं पुनः कारणं बहिरङ्गत्वमुत्त्वे हेतुर्व्यपदिश्यते न पुनरसिद्धत्वमपि । यथैव ह्ययं बहिरङ्ग एवमसिद्धोऽपि । एवं मन्यते । असिद्धः प्लुत आश्रयात्सिद्धो भवति । अथवा यस्यां नाप्राप्तायां परिभाषायामुत्त्वमारभ्यते साश्रयात्सिद्धा स्यात् । कस्यां च नाप्राप्तायाम् । असिद्धपरिभाषायाम् । बहिरङ्गपरिभाषायां पुनः प्राप्तायामप्राप्तायां च ॥*

---

* [V. M. om. हाशि च (११४)].

[1] ल्वादिभ्यः; पूर्वत्रासिद्धम् ८. २. ४४; ८. २ १. [2] दूराद्धूते च ८. २. ८४. [3] गुरोरनृतोनन्त्यस्याप्येकैकस्य प्राचाम् ८. २. ८६. [4] पूर्वत्रासिद्धम् ८. २. १. [5] प्लुतप्रगृह्या अचि नित्यम् ६. १. १२५. [6] हशि च ६. १. ११४.

नान्तःपादमव्यपरे ॥ ६ । १ । ११५ ॥

कस्यायं प्रतिषेधः । नान्तःपादमिति सर्वप्रतिषेधः । नान्तःपादमिति सर्वस्यायं प्रतिषेधः । कथम् । अचीति[1] वर्तते । अचि यत्प्राप्नोति तस्य प्रतिषेधः ।

नान्तःपादमिति सर्वप्रतिषेधश्चेदतिप्रसङ्गः ॥ १ ॥

नान्तःपादमिति सर्वप्रतिषेधश्चेदतिप्रसङ्गो भवति । इहापि प्राप्नोति । अन्वग्निरुषसामग्रमख्यत् । प्रत्यग्निरुषसामग्रमख्यत् ॥ एवं तर्ह्यतीति[2] वर्तते । अकाराश्रयं यत्प्राप्नोति तस्य प्रतिषेधः ।

अकाराश्रयमिति चेदुत्त्ववचनम् ॥ २ ॥

अकाराश्रयमिति चेदुत्त्वं[3] वक्तव्यम् । कालो अश्वः[4] । शतधारो अयं मणिः[5] ॥

अयवोः प्रतिषेधश्च ॥ ३ ॥

अयवोश्च[6] प्रतिषेधो वक्तव्यः । सुजाते अश्वसूनृते । अध्वर्यो अद्रिभिः सुतम् । शुक्रं ते अन्यत् ॥ एङ्ग्रहणात्सिद्धम् । एङोऽतीति[2] वर्तते । एङोऽति यत् प्राप्नोति तस्य प्रतिषेधः ।

एङ्ग्रहणात्सिद्धमिति चेदुत्त्वप्रतिषेधः ॥ ४ ॥

एङ्ग्रहणात्सिद्धमिति चेदुत्त्वस्य प्रतिषेधो वक्तव्यः । अग्नेरत्र । वायोरत्र । अतो रोरप्लुतादप्लुते [११३] एङश्चेत्युत्त्वं प्राप्नोति ॥

पुनरेङ्ग्रहणात्सिद्धम् ॥ ५ ॥

पुनरेङ्ग्रहणं कर्तव्यम् ॥ तत्तर्हि कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । ननु चोक्तमेङ्ग्रहणात्सिद्धमिति चेदुत्त्वप्रतिषेध इति । नैष दोषः । पदान्ताभिसंबद्धमेङ्ग्रहणमनुवर्तते न चैङः पदान्तात्परो रुरस्ति ॥ *

अवङ् स्फोटायनस्य ॥ ६ । १ । १२३ ॥

गोरग्वचनं गवाग्रे स्वरसिद्ध्यर्थम् ॥ १ ॥

गोरग्वक्तव्यः । किं प्रयोजनम् । गवाग्रे स्वरसिद्ध्यर्थम् । गवाग्रे स्वरसिद्धिर्यथा स्यात् । गवाग्रम्[7] ॥

---

* [V. M. om. अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च (११६); यजुष्युरः (११७) आपो जुषाणो वृष्णो वर्षिष्ठेऽम्बे अम्बालेऽम्बिके पूर्वे (११८) अङ्ग इत्यादौ च (११९) अनुदात्ते च कुधपरे (१२०) अवपथासि (अपवथासि ?) च (१२१) सर्वत्र विभाषा गोः (१२२)].

[1] इको यणचि ६. १. ७७. [2] एङः पदान्तादति ६. १. १०९. [3] अतो रोरप्लुतादप्लुते ६. १. ११३. [4] कालो अश्वः ... अथ. वे. १९. ५३. १. [5] शातवारो (शतवारो) अयं मणिः अथ. वे. १९. ३६. ३. [6] एचोऽयवायावः ६. १. ७८. [7] बहुव्रीहौ प्रकृत्या पूर्वपदम् ६. २. १.

अवङादेशे हि स्वरे दोषः ॥ २ ॥

अवङादेशे हि स्वरे दोषः स्यात् । अन्तोदात्तस्यान्तर्यतोऽन्तोदात्त आदेशः प्रसज्येत । कथं पुनरयमन्तोदात्तो यदैकाच् । व्यपदेशिवद्भावेन । यथैव तर्हि व्यपदेशिवद्भावेनान्तोदात्त एवमाद्युदात्तोऽपि तत्रान्तर्यत आद्युदात्तस्याद्युदात्त आदेशो भवति । सत्यमेवमेतत् । न त्विदं लक्षणमस्ति प्रातिपदिकस्यादिरुदात्तो भवतीति । इदं पुनरस्ति प्रातिपदिकस्यान्त उदात्तो भवतीति । सोऽसौ लक्षणेनान्तोदात्तस्तत्रान्तर्यतोऽन्तोदात्तस्यान्तोदात्त आदेशः प्रसज्येत ॥

यदि पुनर्गमेर्डो विधीयेत । किं कृतं भवति । प्रत्ययाद्युदात्तत्वे कृत आन्तर्यत आद्युदात्तस्याद्युदात्त आदेशो भविष्यति । कथं पुनरयमाद्युदात्तो यदैकाच् । व्यपदेशिवद्भावेन । यथैव तर्हि व्यपदेशिवद्भावेनाद्युदात्त एवमन्तोदात्तोऽपि तत्रान्तर्यतोऽन्तोदात्तस्यान्तोदात्त आदेशः प्रसज्येत । सत्यमेवमेतत् । न त्विदं लक्षणमस्ति प्रत्ययस्यान्त उदातो भवतीति । इदं पुनरस्ति प्रत्ययस्यादिरुदात्तो भवतीति[1] । सोऽसौ लक्षणेनाद्युदात्तस्तत्रान्तर्यत आद्युदात्तस्याद्युदात्त आदेशो भविष्यति ॥

एतदप्यादेशे नास्त्यादेशस्यादिरुदात्तो भवतीति । प्रकृतितोऽनेन स्वरो लभ्यः । प्रकृतिश्चास्य यथैवाद्युदात्तैवमन्तोदात्तापि ॥ एवं तर्ह्याद्युदात्तनिपातनं करिष्यते स निपातनस्वरः प्रकृतिस्वरस्य बाधको भविष्यति । एवमप्युपदेशिवद्भावो वक्तव्यः । यथैव निपातनस्वरः प्रकृतिस्वरस्य बाधक एवं समासस्वरस्यापि । गवास्थि गवाक्षि[2] ॥

इन्द्रे च ॥ ६ । १ । १२४ ॥

इन्द्रादाविति वक्तव्यम् । इहापि यथा स्यात् । गवेन्द्रयज्ञे वीहीति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । नैवं विज्ञायत इन्द्रेऽचीति । कथं तर्हि । आचि भवति । कतरस्मिन् । इन्द्रेऽचीति ॥

प्लुतप्रगृह्या अचि नित्यम् ॥ ६ । १ । १२५ ॥

नित्यग्रहणं किमर्थम् । विभाषा मा भूदिति । नैतदस्ति प्रयोजनम् । पूर्वस्मिन्नेव

---

[1] आद्युदात्तश्च ३. १. ३.
[2] समासस्य २. १. २२२.

योगे[1] विभाषाग्रहणं निवृत्तम् ॥ इदं तर्हि प्रयोजनं प्लुतप्रगृह्याणामचि प्रकृतिभाव एव यथा स्याद्यदन्यत्प्राप्नोति तन्मा भूदिति । किं चान्यत्प्राप्नोति । शाकलम् । सिन्नित्यसमासयोः शाकलप्रतिषेधं वक्ष्यति[3] स न वक्तव्यो भवति ॥

अथाज्ग्रहणं किमर्थम् । अचि प्रकृतिभावो यथा स्यात् ।

प्लुतप्रगृह्येष्वज्ग्रहणमनर्थकमधिकारात्सिद्धम् ॥ १ ॥

प्लुतप्रगृह्येष्वज्ग्रहणमनर्थकम् । किं कारणम् । अधिकारादेव सिद्धम् । अचीति प्रकृतमनुवर्तते । क्व प्रकृतम् । इको यणचि [६. १. ७७] इति ॥

तत्तु तस्मिन्प्रकृतिभावार्थम् ॥ २ ॥

तत्तु द्वितीयमज्ग्रहणं कर्तव्यं प्रकृतिभावार्थम् । तस्मिन्नचि पूर्वस्य प्रकृतिभावो यथा स्यात् । इह मा भूत् । जानु उ[4] अस्य रुजति । जानू[5] अस्य रुजति । जान्वस्य[6] रुजतीति ॥

अथ किमर्थं प्लुतस्य प्रकृतिभाव उच्यते । स्वरसंधिर्मा भूदिति । उच्यमानेऽप्येतस्मिन्स्वरसंधिः प्राप्नोति । प्लुते कृते न भविष्यति । असिद्धः[7] प्लुतस्तस्यासिद्धत्वात्प्राप्नोति ।

प्लुतप्रकृतिभाववचनं तु ज्ञापकमेकादेशात्प्लुतो विप्रतिषेधेनेति ॥ ३ ॥

यदयं प्लुतः प्रकृत्येति प्रकृतिभावं शास्ति तज्ज्ञापयत्याचार्य एकादेशात्प्लुतो भवति विप्रतिषेधेनेति ॥

एकादेशात्प्लुतो विप्रतिषेधेनेति चेच्छालेन्द्रेऽतिप्रसङ्गः ॥ ४ ॥

एकादेशात्प्लुतो विप्रतिषेधेनेति चेच्छालेन्द्रेऽतिप्रसङ्गो भवति । शालायामिन्द्रः शालेन्द्रः ।

न वा बहिरङ्गलक्षणत्वात् ॥ ५ ॥

न वातिप्रसङ्गः । किं कारणम् । बहिरङ्गलक्षणत्वात् । बहिरङ्गः प्लुतः । अन्तरङ्ग एकादेशः । असिद्धं बहिरङ्गमन्तरङ्गे ॥

---

[1] इन्द्रे च ६. १. १२४. [2] इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ६. १. १२७. [3] सिन्नित्यसमासयोः शाकलप्रतिषेधः ६. १. १२७ वा १. [4] निपात एकाजनाङ् १. १. १४. [5] अकः सवर्णे दीर्घः; प्लुतप्रगृह्या अचि नित्यम् ६. १. १०१; १२५. [6] मय उञो वो वा ८. ३. ३३. [7] पूर्वत्रासिद्धम् ८. २. १.

आङोऽनुनासिकश्छन्दसि ॥ ६ । १ । १२६ ॥

आङोऽनर्थकस्य ॥ १ ॥

आङोऽनर्थकस्येति वक्तव्यम् । इह मा भूत् । इन्द्रो बाहुभ्यामातरत् ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । बहुलवचनान्न भविष्यति । आङोऽनुनासिकश्छन्दसि बहुलम् ॥

इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ॥ ६ । १ । १२७ ॥

किमर्थश्चकारः । प्रकृत्येत्येतदनुकृष्यते[1] किं प्रयोजनम् स्वरसंधिर्मा भूदिति ॥ नैतदस्ति प्रयोजनम् । ह्रस्ववचनसामर्थ्यान्न भविष्यति ॥ भवेद्दीर्घाणां ह्रस्ववचनसामर्थ्यात्स्वरसंधिर्न स्याद्ह्रस्वानां तु खलु स्वरसंधिः प्राप्नोति । ह्रस्वानामपि ह्रस्ववचनसामर्थ्यात्स्वरसंधिर्न भविष्यति । ह्रस्वानां ह्रस्वाः प्राप्नुवन्ति न हि भुक्तवान्पुनर्भुङ्क्ते न च कृतश्मश्रुः पुनः श्मश्रूणि कारयति । ननु च पुनःप्रवृत्तिरपि दृष्टा । भुक्तवानपि पुनर्भुङ्क्ते कृतश्मश्रुश्च पुनः श्मश्रूणि कारयति । सामर्थ्यात्तत्र पुनःप्रवृत्तिर्भवति भोजनाविशेषाच्छिल्पिविशेषाद्वा । ह्रस्वानां पुनर्ह्रस्ववचने न किंचित्प्रयोजनमस्ति । अकृतकारि खल्वपि शास्त्रमग्निवत् । तद्यथा । अग्निर्यददग्धं तद्दहति ॥ ह्रस्वानामपि ह्रस्ववचन एतत्प्रयोजनं स्वरसंधिर्मा भूदिति । कृतकारि खल्वपि शास्त्रं पर्जन्यवत् । तद्यथा । पर्जन्यो यावदूनं पूर्णं च सर्वमभिवर्षति ॥ इदं तर्हि प्रयोजनं प्लुतप्रगृह्या अनुकृष्यन्ते । इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च प्लुतप्रगृह्याश्च प्रकृत्या[2] नित्यग्रहणस्याप्येतत्प्रयोजनमुक्तम्[3] । अन्यतरच्छक्यमवक्तुम् ॥

सिन्नित्यसमासयोः शाकलप्रतिषेधः ॥ १ ॥

सिन्नित्यसमासयोः शाकलस्य प्रतिषेधो वक्तव्यः । अयं ते योनिर्ऋत्वियः[4] । प्रजां विन्दाम ऋत्वियाम् । वैयाकरणः सौवश्वः ॥ नित्यग्रहणेन नार्थः । सित्समासयोः शाकलं न भवतीत्येव । इदमपि सिद्धं भवति । वाप्यामश्वो वाप्यश्वः । नद्यामातिर्नद्यातिः ॥

---

[1] नान्तःपादमव्यपरे (न = प्रकृत्या ; प्रकृत्या इत्यपि पाठ): ६. १. ११५. [2] प्लुतप्रगृह्या अचि नित्यम् ६. १. १२५. [3] इदं तर्हि प्रयोजनं प्लुतप्रगृह्याणामचि प्रकृतिभाव एव यथा स्याद्यदन्यत् प्राप्नोति तन्मा भूदिति । किं चान्यत् प्राप्नोति । शाकलम् । सिन्नित्यसमासयोः शाकलप्रतिषेधं वक्ष्यति । स न वक्तव्यो भवति । ६. १. १२५ महाभाष्य. [4] छन्दसि घस् ५. १. १०६.

ईषा अक्षादिषु च्छन्दसि प्रकृतिभावमात्रम् ॥ २ ॥

ईषा अक्षादिषु च्छन्दसि प्रकृतिभावमात्रं द्रष्टव्यम् । ईषा अक्षः[1] । का ईमरे पिशङ्गिला[2] । यथा अङ्गदः ॥

ऋत्यकः ॥ ६ । १ । १२८ ॥

किमर्थमिदमुच्यते ।

ऋत्यकः सवर्णार्थम् ॥ १ ॥

सवर्णार्थोऽयमारम्भः । होतृ ऋश्यः ॥

अनिगन्तार्थं च ॥ २ ॥

खट्व ऋश्यः । माल ऋश्यः ॥

ऋति ह्रस्वादुपसर्गाद्वृद्धिर्विप्रतिषेधेन ॥ ३ ॥

ऋति ह्रस्वो भवतीत्येतस्मादुपसर्गाद्वृद्धिर्भवति विप्रतिषेधेन[3] । ऋति ह्रस्वो भवतीत्यस्यावकाशः । खट्व ऋश्यः माल ऋश्यः । उपसर्गाद्वृद्धेरवकाशः । विभाषा ह्रस्वत्वं यदा न ह्रस्वत्वं सोऽवकाशः । ह्रस्वप्रसङ्ग उभयं प्राप्नोति । उपार्ध्नोति प्राप्नोति । उपसर्गाद्वृद्धिर्भवति विप्रतिषेधेन ॥ स तर्हि विप्रतिषेधो वक्तव्यः । न वक्तव्यः । उक्तं तत्र[4] धातुग्रहणस्य प्रयोजनमुपसर्गादृति धातौ वृद्धिरेव यथा स्याद्यदन्यत्प्राप्नोति तन्मा भूदिति ॥

अप्लुतवदुपस्थिते ॥ ६ । १ । १२९ ॥

उपस्थित इत्युच्यते किमिदमुपस्थितं नाम । अनार्ष इतिकरणः । सुश्लोका३ इति सुश्लोकेति ॥

अथ वद्वचनं किमर्थम् ।

वद्वचनं प्लुतकार्यप्रतिषेधार्थम् ॥ १ ॥

वद्वचनं क्रियते प्लुतकार्यप्रतिषेधार्थम् । प्लुतकार्यं प्रतिषिध्यते त्रिमात्रता न प्रति-

---

[1] ईषा अक्षो हिरण्ययः ऋ. सं. ८. ५. २९. [2] का ईमरे पिशङ्गिला । वा. सं. २३. ५५. [3] उपसर्गादृति धातौ ६. १. ९१. [4] इदं तर्हि प्रयोजनमुपसर्गादृति धातौ वृद्धिरेव यथा स्याद्यदन्यत् प्राप्नोति तन्मा भूदिति । ६. १. ९१ महाभाष्य,

षिध्यते । किं चेदानीं त्रिमात्रताया अप्रतिषेधे प्रयोजनं यावता प्लुतकार्ये प्रतिषिद्धे स्वरसंधिना भवितव्यम् ।

प्लुतप्रतिषेधे हि प्रगृह्यप्लुतप्रतिषेधप्रसङ्गोऽन्येन विहितत्वात् ॥ २ ॥

प्लुतप्रतिषेधे हि सति प्रगृह्यस्यापि प्लुतस्य त्रिमात्रतायाः प्रतिषेधः प्रसज्येत । अग्नी३इति । वायू३इति । किं चेदानीं तस्या अपि त्रिमात्रताया अप्रतिषेधे प्रयोजनं यावता प्लुतकार्ये प्रतिषिद्धे स्वरसंधिना भवितव्यम् । न भवितव्यम् । किं कारणम् । अन्येन विहितत्वात् । अन्येन हि लक्षणेन प्लुतप्रगृह्यस्य प्रकृतिभाव उच्यते प्रगृह्यः प्रकृत्येति[1] ॥

ई३ चाक्रवर्मणस्य ॥ ६ । १ । १३० ॥

किमर्थमिदमुच्यते ।

ई३ चाक्रवर्मणस्येत्यनुपस्थितार्थम् ॥ १ ॥

अनुपस्थितार्थोऽयमारम्भः । चिनु ही३ इदम् चिनु हीदम् । सुनु ही३ इदम् सुनु हीदम् ॥ ईकारग्रहणेन नार्थः । अविशेषेण चाक्रवर्मणस्याचार्यस्याप्लुतवद्भवतीत्येव । इदमपि सिद्धं भवति । वशा३इयम् वशेयम् ॥

दिव उत् ॥ ६ । १ । १३१ ॥

किमर्थस्तकारः । तपरस्तत्कालस्य [१. १. ७०] इति तत्काले यथा स्यात् ॥ नैतदस्ति प्रयोजनम् । आन्तर्यतोऽर्धमात्रिकस्य व्यञ्जनस्य मात्रिको भविष्यति ॥ न सिध्यति । ऊठि[2] कृत आन्तर्यतो दीर्घस्य दीर्घः प्राप्नोति

तदर्थं तपरः कृतः ।

एवमर्थं तपरः क्रियते ॥*

सुट्कात्पूर्वः ॥ ६ । १ । १३५ ॥

कात्पूर्वग्रहणं किमर्थम् । कात्पूर्वो यथा स्यात् । संस्कर्ता संस्कर्तुम् । नैतदस्ति

---

* [V. M. om. एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (१३२) स्यश्छन्दसि बहुलम् (१३३) सोचि लोपे चेत्पादपूरणम् (१३४)].

[1] प्लुतप्रगृह्या अचि नित्यम् ६. १. १२५. [2] च्छ्वोः शूडनुनासिके च. ६. ४. १९.

प्रयोजनम् । सुडित्यादिलिङ्गोऽयं[1] करोतिश्च ककारादिस्तत्रान्तरेण कात्पूर्वग्रहणं कात्पूर्व एव भविष्यति ॥ अत उत्तरं पठति ।

सुटि कात्पूर्ववचनमककारादौ कात्पूर्वार्थम् । सुटि कात्पूर्ववचनं क्रियतेऽककारादौ करोतौ कात्पूर्वो यथा स्यात् । संचस्करतुः संचस्करुः ॥

सुटि कात्पूर्ववचनमककारादौ कात्पूर्वार्थमिति चेदन्तरेणापि तत्सिद्धम् ॥ १ ॥

सुटि कात्पूर्ववचनमककारादौ कात्पूर्वार्थमिति चेदन्तरेणापि कात्पूर्वग्रहणं सिद्धम् । कथम् ।

द्विर्वचनात्सुड्विप्रतिषेधेन । द्विर्वचनं[2] क्रियतां सुडिति सुड्भविष्यति विप्रतिषेधेन । तत्र द्विर्वचनं भवतीत्यस्यावकाशः । बिभिदतुः बिभिदुः । सुटोऽवकाशः । संस्कर्ता संस्कर्तुम् । इहोभयं प्राप्नोति । संचस्करतुः संचस्करुरिति । सुड्भवति विप्रतिषेधेन ॥

द्विर्वचनात्सुड्विप्रतिषेधेनेति चेद् द्विर्भूते शब्दान्तरभावात्पुनः प्रसङ्गः ॥ २ ॥

द्विर्वचनात्सुड्विप्रतिषेधेनेति चेद् द्विर्भूते शब्दान्तरस्याकृतः सुडिति पुनः सुट् स्यात् ॥

द्विर्भूते शब्दान्तरभावात्पुनःप्रसङ्ग इति चेद् द्विर्वचनम् ॥ ३ ॥

सुटि कृते शब्दान्तरस्याकृतमिति पुनर्द्विर्वचनं प्राप्नोति ॥

तथा चानवस्था ॥ ४ ॥

पुनः सुट् पुनर्द्विर्वचनमिति चक्रकमव्यवस्था प्रसज्येत ॥ नास्ति चक्रकप्रसङ्गः । न ह्यव्यवस्थाकारिणा शास्त्रेण भवितव्यम् । शास्त्रतो हि नाम व्यवस्था । तत्र सुटि कृते द्विर्वचनं द्विर्वचनेनावस्थानं भविष्यति ॥

अड्व्यवाय उपसंख्यानम् ॥ ५ ॥

अड्व्यवाय उपसंख्यानं कर्तव्यम् । समस्करोत् समस्कार्षीत् ॥

अभ्यासव्यवाये च ॥ ६ ॥

अभ्यासव्यवाये चोपसंख्यानं कर्तव्यम् । संचस्करतुः संचस्करुः ॥ किमुच्यतेऽभ्यासव्यवाय इति यदेदानीमेवोक्तं द्विर्वचनात्सुड्विप्रतिषेधेनेति ।

---

[1] आद्यन्तौ टकितौ १. १. ४६. [2] लिटि धातोरनभ्यासस्य ६. १. ८.

अविप्रतिषेधो वा बहिरङ्गलक्षणत्वात् ॥ ७॥

अविप्रतिषेधो वा पुनः सुटः । किं कारणम् । बहिरङ्गलक्षणत्वात् । बहिरङ्गलक्षणः सुट् । अन्तरङ्गं द्विर्वचनम् । असिद्धं बहिरङ्गमन्तरङ्गे ॥ एवमर्थमेव तर्हि कात्पूर्वग्रहणं कर्तव्यं कात्पूर्वो यथा स्यात् ॥

क्रियमाणेऽपि वै कात्पूर्वग्रहणेऽत्र न सिध्यति न ह्ययं कात्पूर्वग्रहणे शक्यो मध्ये प्रवेशयितुम् । किं कारणम् । आदिलिङ्गोऽयं क्रियते करोतिश्च ककारादिर्दृष्टश्च पुनरातिदेशिकः करोतिरककारादिः ॥ पाक्षिक एष दोषः । कतरस्मिन्पक्षे । सुड्विधौ द्वैतं भवति । अविशेषेण वा विहितस्य सुटः कात्पूर्वग्रहणं देशप्रक्लृप्त्यर्थं स्याद्विशेषेण वा विधिरिति । द्विर्वचनविधौ चापि द्वैतं भवति । स्थाने द्विर्वचनं स्याद् द्विःप्रयोगो वा द्विर्वचनमिति । तद्यदा द्विःप्रयोगो द्विर्वचनमविशेषेण विहितस्य च सुटः कात्पूर्वग्रहणं देशप्रक्लृप्त्यर्थं तदैष दोषः । यदा हि स्थाने द्विर्वचनं तदा यद्येवाविशेषेण विहितस्य सुटः कात्पूर्वग्रहणं देशप्रक्लृप्त्यर्थमथापि विशेषविधिर्न तदा दोषो भवति ॥ द्विःप्रयोगे चापि द्विर्वचने न दोषः । संपरिभ्यामिति[1] नैषा पञ्चमी । का तर्हि । तृतीया । संपरिभ्यामुपसृष्टस्येति । व्यवहितश्चाप्युपसृष्टो भवति ॥

उपदेशिवद्वचनं च ॥ ८ ॥

उपदेशिवद्भावश्च वक्तव्यः । किं प्रयोजनम् ।

लिटिगुणचङिदीर्घप्रतिषेधार्थम् ॥ ९ ॥

लिटि गुणार्थं चङि दीर्घप्रतिषेधार्थम् । लिटि गुणार्थं[2] तावत् । संचस्करतुः संचस्करुः । चङि दीर्घप्रतिषेधार्थं च[3] । समचिस्करत् ॥ लिटि गुणार्थेन तावन्नार्थः । वक्ष्यत्येतत्संयोगादेर्गुणविधाने संयोगोपधग्रहणं कृञर्थमिति[4] । चङि दीर्घप्रतिषेधार्थेनापि नार्थः । पदमितीयं भगवतः कृत्रिमा संज्ञा । युक्तमिह द्रष्टव्यं किमन्तरङ्गं किं बहिरङ्गमिति । धातूपसर्गयोः कार्यं यत्तदन्तरङ्गम् । कुत एतत् । पूर्वं हि धातुरुपसर्गेण युज्यते पश्चात्साधनेनेति । नैतत्सारम् । पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण । साधनं हि क्रियां निर्वर्तयाति तामुपसर्गो विशिनष्ट्यभिनिर्वृत्तस्य चार्थस्योपसर्गेण विशेषः शक्यो वक्तुम् । सत्यमेवमेतत् । यस्त्वसौ धातूपसर्गयोरभिसंबन्धस्तमभ्यन्तरं कृत्वा धातुः साधनेन युज्यते । अवश्यं चैतदेवं विज्ञेयम् । यो हि मन्यते पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति तस्य आस्यते गुरुणेत्य-

---

[1] संपरिभ्यां करोतौ भूषणे ६. १ १३७. [2] ऋतश्च संयोगादेर्गुणः ७. ४. १०. [3] दीर्घो लघोः ७. ४. ९४. [4] संयोगादेर्गुणविधाने संयोगोपधग्रहणं कृञर्थम् ७. ४. १०. वा १.

कर्मक उपास्यते गुरुरिति केन सकर्मकः स्यात् । एवं च कृत्वा सुट् सर्वतोऽन्तरङ्गतरको भवति कात्पूर्वग्रहणं चापि शक्यमकर्तुम् ॥

यदि पुनरयं सुट्कात्पूर्वान्तः क्रियेत ।

कात्पूर्वान्त इति चेद्रुविधिप्रतिषेधः ॥ १० ॥

कात्पूर्वान्त इति चेद्रुः कश्चिद्विधेयः कश्चित्प्रतिषेध्यः । संस्कर्ता । समो विधेयः सुटः प्रतिषेध्यः ॥ समस्तावन्न विधेयः । वक्ष्यत्येतत्संपूंकानां सत्वं रुविधौ ह्यनिष्टप्रसङ्ग इति[1] । सुटश्चापि न प्रतिषेध्यः । समः सुटि [८. ३. ५] इति द्विसकारको निर्देशः । सुटि सकारादाविति ॥ अथवा परादिः करिष्यते ।

परादाविड्गुणप्रसङ्गः ॥ ११ ॥

यदि परादिरिड्गुणौ प्राप्नुतः । संस्कृषीष्ट । ऋतश्च संयोगादेः [७. २. ४३] इतीट् प्राप्नोति । संस्क्रियते । गुणोऽर्तिसंयोगाद्योः [७. ४. २९] इति गुणः प्राप्नोति ॥ एवं तर्ह्यभक्तः करिष्यते ।

अभक्ते स्वरः ॥ १२ ॥

यद्यभक्तः स्वरो न सिध्यति । संस्करोति । तिङतिङः [८. १. २८] इति निघातो न प्राप्नोति । ननु च सुडेवातिङ् । न सुटः परस्य निघातेन भवितव्यम् । किं कारणम् । नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः । नञ्युक्तमिवयुक्तं चान्यस्मिंस्तत्सदृशे कार्यं विज्ञायते तथा ह्यर्थो गम्यते । तद्यथा । अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशं क्षत्रियमानयति नासौ लोष्टमानीय कृती भवति । एवमिहाप्यतिङिति प्रतिषेधादन्यस्मादतिङस्तिङ्सदृशात्कार्यं विज्ञास्यते । किं चान्यदतिङ् तिङ्सदृशम् । पदम् ॥*

अपाच्चतुष्पाच्छकुनिष्वालेखने ॥ ६ । १ । १४२ ॥

किरतेर्हर्षजीविकाकुलायकरणेषु ॥ १ ॥

किरतेर्हर्षजीविकाकुलायकरणेष्विति वक्तव्यम् अपास्किरते वृषभो हृष्टः । अपस्किरते कुक्कुटो भक्षार्थी । अपस्किरते श्वाश्रयार्थी[2] ॥ **

---

* [V. M. om. अड्भ्यासव्यवायेपि (१३६); संपरिभ्यां करोतौ भूषणे (१३७); समवाये च (१३८); उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु (१३९); किरतौ लवने (१४०) हिंसायां प्रतेश्च (१४१)]

** [V. M. om. कुस्तुम्बुरूणि जातिः (१४३)].

[1] संपुंकानां सत्वम् ८.३.५ वा १; रुविधौ ह्यनिष्टप्रसङ्गः ८. ३. ५ वा २. [2] किरतेर्हर्षजीविकाकुलायकरणेषु १. ३. २१ वा ४.

अपरस्पराः क्रियासातत्ये ॥ ६ । १ । १४४ ॥

किमिदं सातत्य इति । संततभावः सातत्यम् । यद्येवं सांतत्य इति भवितव्यम् ।

समो हिततततयोर्वा लोपः ॥ १ ॥

समो हिततततयोर्वा लोपो वक्तव्यः संहितम् सहितम् संततम् सततम् ॥

सम्तुमुनोः कामे ॥ २ ॥

सम्तुमुनोः कामे लोपो वक्तव्यः । सकामः भोक्तुकामः ॥

मनसि चेति वक्तव्यम् । समनाः भोक्तुमनाः ॥

अवश्यमः कृत्ये ॥ ३ ॥

अवश्यमः कृत्ये लोपो वक्तव्यः । अवश्यभाव्यम् ॥

गोष्पदं सेवितासेवितप्रमाणेषु ॥ ६ । १ । १४५ ॥

इदमतिबहु क्रियते सेविते असेविते प्रमाण इति । सेवितप्रमाणयोरित्येव सिद्धम् । केनेदानीमसेविते भविष्यति । नञा सेवितप्रतिषेधं विज्ञास्यामः ॥ नैवं शक्यम् । सेवितप्रसङ्ग एव स्यादसेविते न स्यात् । असेवितग्रहणे पुनः क्रियमाणे बहुव्रीहिरयं विज्ञास्यते । अविद्यमानसेविते ऽसेवित इति । तस्मादसेवितग्रहणं कर्तव्यम् ॥ *

विष्किरः शकुनौ वा ॥ ६ । १ । १५० ॥

विष्किरः शकुनौ विकिरो वा ॥ १ ॥

विष्किरः शकुनौ विकिरो वेति वक्तव्यम् । शकुनौ वेति ह्युच्यमाने शकुनौ वा स्यादन्यत्रापि नित्यम् ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । न वावचनेन शकुनिरभिसंबध्यते । किं तर्हि । निपातनमभिसंबध्यते । विष्किर इत्येतन्निपातनं शकुनौ वा निपात्यत इति ॥

---

* [V. M. om. आस्पदं प्रतिष्ठायाम् (१४६); आश्चर्यमनित्ये (१४७); वर्चस्केऽवस्करः (१४८); अपस्करो रथाङ्गम् (१४९)].

आश्चर्यमनित्ये ॥ ६ । १ । १४७ ॥

आश्चर्यमद्भुते ॥ १ ॥

आश्चर्यमद्भुत इति वक्तव्यम् । इहापि यथा स्यात् आश्चर्यमुच्चता वृक्षस्य । आश्चर्यं नीला द्यौः । आश्चर्यमन्तरिक्षे ऽबन्धनानि नक्षत्राणि न पतन्तीति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । अनित्य इत्येव सिद्धम् । इह तावदाश्चर्यमुच्चता वृक्षस्येत्याश्चर्यग्रहणेन न वृक्षोऽभिसंबध्यते । किं तर्हि । उच्चता सा चानित्या । आश्चर्यं नीला द्यौरिति नाश्चर्यग्रहणेन द्यौरभिसंबध्यते । किं तर्हि । नीलता सा चानित्या । आश्चर्यमन्तरिक्षेऽबन्धनानि नक्षत्राणि न पतन्तीति नाश्चर्यग्रहणेन नक्षत्राण्यभिसंबध्यन्ते । किं तर्हि । पतनक्रिया सा चानित्या । तत्रानित्य इत्येव सिद्धम् ॥ *

मस्करमस्करिणौ वेणुपरिव्राजकयोः ॥ ६ । १ । १५४ ॥

मस्करिग्रहणं शक्यमकर्तुम् । कथं मस्करी परिव्राजक इति । इनिनैतन्मत्वर्थीयेन सिद्धम् । मस्करोऽस्यास्तीति ॥ न वै मत्करोऽस्यास्तीति मस्करी परिव्राजकः । किं तर्हि । मा कृत कर्माणि मा कृत कर्माणि शान्तिर्वः श्रेयसीत्याहातो मस्करी परिव्राजकः ॥**

पारस्करप्रभृतीनि च संज्ञायाम् ॥ ६ । १ । १५७ ॥

अविहितलक्षणः सुट् पारस्करप्रभृतिषु द्रष्टव्यः । पारस्करो देशः । कारस्करो वृक्षः । रथस्पा नदी । किष्किन्धा गुहा । किष्कुः ॥ तद्बृहतोः करपत्योश्चोरदेवतयोः सुट्तलोपश्च । तस्करः बृहस्पतिः ॥ प्रायस्य चित्तिचित्तयोः सुडस्कारो वा । प्रायःश्चित्तिः प्रायश्चित्तम् ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य प्रथमे पादे पञ्चममाह्निकम् ॥

---

*[V. M. om. ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे (१५१); प्रतिष्कशश्च कशेः (१५२); प्रस्कण्वहरिश्चन्द्रावृषी (१५३).

**[V. M. om. कास्तीराजस्तुन्दे नगरे (१५५); कारस्करो वृक्षः (१५६)].

१ अत इनिठनौ ५. २. ११५.

अनुदात्तं पदमेकवर्जम् ॥ ६ । १ । १५८ ॥

किमनुदात्तानि पदानि भवन्त्येकं पदं वर्जयित्वा । नेत्याह । पदे येषामुदात्तप्रसङ्गस्तेऽनुदात्ता भवन्त्येकमचं वर्जयित्वा । स तर्हि तथा निर्देशः कर्तव्यः । अनुदात्ताः पदे अनुदात्ताः पदस्येति वा ॥ न कर्तव्यः । अनुदात्तं पदमेकवर्जमित्येव सिद्धम् । कथम् । मतुब्लोपोऽत्र द्रष्टव्यः । तद्यथा । पुष्यका एषां पुष्यकाः । कालका एषां कालका इति । अथवाऽकारो मत्वर्थीयः । तद्यथा । तुन्दः घाट इति ॥

किमर्थं पुनरिदमुच्यते ।

आगमस्य विकारस्य प्रकृतेः प्रत्ययस्य च ।
पृथक्स्वरनिवृत्त्यर्थमेकवर्जं पदस्वरः ॥

आगमस्य । चतुरनडुहोरामुदात्तः [७. १. ९८] चत्वारः अनड्वाहः । विकारस्य । अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः [७. १. ७५] अस्थ्ना दध्ना । प्रकृतेः । गोपायति धूपायति[1] । प्रत्ययस्य च । कर्तव्यम् तैत्तिरीयः[2] । एतेषां पदे युगपत् स्वरः प्राप्नोति । इष्यते चैकस्य स्यादिति तच्चान्तरेण यत्नं न सिध्यतीत्यनुदात्तं पदमेकवर्जम् । एवमर्थमिदमुच्यते ॥ नैतदस्ति प्रयोजनम् ।

यौगपद्यं तवै सिद्धं

यदयं तवै चान्तश्च युगपत [६. २. ५१] इति सिद्धे यौगपद्ये यौगपद्यं शास्ति तज्ज्ञापयत्याचार्यो न युगपत्स्वरो भवतीति ॥ पर्यायस्तर्हि प्राप्नोति ।

पर्यायो रिक्तशासनात् ।

यदयं रिक्ते विभाषा [६. १. २०८] इति सिद्धे पर्याये पर्यायं शास्ति तज्ज्ञापयत्याचार्यो न पर्यायो भवतीति ॥

उदात्ते ज्ञापकं त्वेतत्

एतदुदात्ते ज्ञापकं स्यात् ।

स्वरितेन समाविशेत् ॥

स्वरितेन समावेशः प्राप्नोति ॥ स्वरितेऽप्युदात्तोऽस्ति[3] । तस्मान्नार्थोऽनेन योगेन ॥

---

[1] धातोः ६. १. १६२.   [2] आद्युदात्तश्च ३. १. ३.   [3] तस्यादित उदात्तमर्धह्रस्वम् १. २. ३२.

आरभ्यमाणेऽप्येतस्मिन्योगे

अनुदात्ते विप्रतिषेधानुपपत्तिरेकस्मिन्युगपत्संभवात् ॥ १ ॥

अनुदात्ते विप्रतिषेधो नोपपद्यते। पठिष्यति ह्याचार्यो विप्रतिषेधं जे दीर्घाद्बह्वच इति[1] स विप्रतिषेधो नोपपद्यते। किं कारणम्। एकस्मिन्युगपत्संभवात्। असति खलु संभवे विप्रतिषेधो भवत्यस्ति च संभवो यदुभयं स्यात्। कथं संभवो यदानुदात्तं पदमेकवर्जमित्युच्यते। तदिह नास्ति। किं कारणम्। नानेनोदात्तत्वं प्रतिषिध्यते। किं तर्हि। अनुदात्तत्वमनेन क्रियतेऽस्ति च संभवो यदुभयोश्चोदात्तत्वं स्यादन्येषां चानुदात्तत्वम्॥ यदि पुनरयमधिकारो विज्ञायेत। किं कृतं भवति। अधिकारः प्रतियोगं तस्यानिर्देशार्थ इति योगे योग उपतिष्ठते। जे दीर्घान्तस्यादिरुदात्तो भवति[2]। उपस्थितमिदं भवत्यनुदात्तं पदमेकवर्जमिति। अन्त्यापूर्वं बह्वचः [६. २. ८३]। उपस्थितमिदं भवत्यनुदात्तं पदमेकवर्जमिति। तत्र पूर्वेणास्तु वर्ज्यमानता परेण वेति परेण भविष्यति परत्वात्॥ नैवं शक्यम्। षाष्ठिक एकः स्वरः संगृहीतः स्याद्येऽन्ये सप्ताध्याय्यां स्वरास्ते न संगृहीताः स्युः। समानोदरे शयित ओ चोदात्तः [४. ४. १०८]। अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः [७. १. ७५] इति॥

सिद्धं त्वेकाननुदात्तत्त्वात् ॥ २ ॥

सिद्धमेतत्। कथम्। एकाननुदात्तत्वात्। एकाननुदात्तं पदं भवतीति वक्तव्यम्। किमिदमेकाननुदात्तत्वादिति। नोदात्तोऽनुदात्तः। नानुदात्तोऽननुदात्तः। एकोऽननुदात्तोऽस्मिंस्तदिदमेकाननुदात्तम्। एकाननुदात्तत्वादिति। सिध्यति। सूत्रं तर्हि भिद्यते॥ यथान्यासमेवास्तु। ननु चोक्तमनुदात्ते विप्रतिषेधानुपपत्तिरेकस्मिन्युगपत्संभवादिति। नैष दोषः। परिभाषेयम्। किं कृतं भवति। कार्यकालं हि संज्ञापरिभाषम्। यत्र कार्यं तत्रोपस्थितमिदं द्रष्टव्यम्। जे दीर्घान्तस्यादिरुदात्तो भवतीत्युपस्थितमिदं भवत्यनुदात्तं पदमेकवर्जमिति। अन्त्यात्पूर्वं बह्वच इत्युपस्थितमिदं भवत्यनुदात्तं पदमेकवर्जमिति। तत्र पूर्वेणास्तु वर्ज्यमानता परेण वेति परेण भविष्यति परत्वात्॥ अथवा नेदं पारिभाषिकानुदात्तस्य[3] ग्रहणम्। किं तर्हि। अन्वर्थग्रहणम्। अविद्यमानोदात्तमनुदात्तमिति॥

---

[1] जे दीर्घाद्बह्वचः ६. २. ८२. वा १.

[2] दीर्घकाशतुषभ्राष्ट्रवटं जे ६. २. ८२.

[3] नीचैरनुदात्तः १. २. ३०.

एकवर्जमिति चाप्रसिद्धिः संदेहात् ॥ ॥ ३ ॥

एकवर्जमिति चाप्रसिद्धिः । कुतः । संदेहात् । न ज्ञायते क एको वर्जयितव्य इति ॥

सिद्धं तु यस्मिन्ननुदात्त उदात्तवचनानर्थक्यं तद्वर्जम् ॥ ४ ॥

सिद्धमेतत् । कथम् । यस्मिन्ननुदात्त उदात्तवचनमनर्थकं स्यात्स एको वर्जयितव्यः ॥

प्रकृतिप्रत्यययोः स्वरस्य सावकाशत्वादप्रसिद्धिः ॥ ५ ॥

प्रकृतिप्रत्यययोः स्वरस्य सावकाशत्वादप्रसिद्धिः स्यात् । प्रकृतिस्वरस्यावकाशो यत्रानुदात्तः प्रत्ययः । पच॑ति पठ॑ति[1] । प्रत्ययस्वरस्यावकाशो यत्रानुदात्ता प्रकृतिः । स॒म॒त्वम् सि॒म॒त्वम्[2] । इहोभयं प्राप्नोति । क॒र्त॑व्यम् । तै॒त्ति॒री॑यः ॥

विप्रतिषेधात्प्रत्ययस्वरः । विप्रतिषेधात्प्रत्ययस्वरो भविष्यति । नैवम् । विप्रतिषेधे परमित्युच्यते[3] न परः प्रत्ययस्वरः । नैष दोषः । इष्टवाची परशब्दः । विप्रतिषेधे परं[3] यदिष्टं तद्भवतीति ॥

विप्रतिषेधात्प्रत्ययस्वर इति चेत्काम्यायादिषु चित्करणम् ॥ ६ ॥

विप्रतिषेधात्प्रत्ययस्वरः इति चेत्काम्यायादयश्चितः कर्तव्याः[4] । पु॒त्र॒का॒म्य॑ति गो॒पा॒य॑ति ऋ॒ती॒य॑ते ॥ नैष दोषः । प्रकृतिस्वरोऽत्र बाधको भविष्यति[1] ॥

प्रकृतिस्वरे प्रत्ययस्वराभावः ॥ ७ ॥

प्रकृतिस्वरे प्रत्ययस्वरस्याभावः । क॒र्त॑व्यम् । तै॒त्ति॒री॑यः ॥

सिद्धं तु प्रकृतिस्वरबलीयस्त्वात्प्रत्ययस्वराभावः ॥ ८ ॥

सिद्धमेतत् । कथम् । प्रकृतिस्वराद्बलीयस्त्वात्प्रत्ययस्वरस्य भावः सिद्धः । कथम् । प्रकृतिस्वरात्प्रत्ययस्वरो बलीयान् भवति ॥

सतिशिष्टस्वरबलीयस्त्वं च ॥ ९ ॥

सति शिष्टस्वरो बलीयान्भवतीति वक्तव्यम् ॥

---

[1] धातोः ६. १. १६२. [2] आद्युदात्तश्च ३. १. ३. [3] विप्रतिषेधे परं कार्यम् १. ४. २. [4] काम्यच ; गुपूधूपविच्छिपणिपनिभ्य आयः ; चितः ३. १. ९ ; २८ ; ६. १. १६३.

तच्चानेकप्रत्ययसमासार्थम् ॥ १० ॥

तच्चावश्यं सतिशिष्टस्वरबलीयस्त्वं वक्तव्यम् । किं प्रयोजनम् । अनेकप्रत्ययार्थमनेकसमासार्थं च । अनेकप्रत्ययार्थं तावत् । औपगवः । प्रकृतिस्वरमण्स्वरो बाधते । औपगवत्वम् । त्वस्वरोऽण्स्वरं बाधते । औपगवत्वकम् । त्वस्वरं कस्वरो बाधते । अनेकसमासार्थम् । राजपुरुषः राजपुरुषपुत्रः राजपुरुषपुत्रपुरुषः[1] ॥

यदि सतिशिष्टस्वरबलीयस्त्वमुच्यते स्यादिस्वरः सार्वधातुकस्वरं बाधते । सुनुतः चिनुतः ।

स्यादिस्वराप्रसङ्गश्च तासेः परस्यानुदात्तवचनात् ॥ ११ ॥

स्यादिस्वरस्य चाप्रसङ्गः । कुतः । तासेः परस्यानुदात्तवचनात् । यदयं तासेः परस्य लसार्वधातकस्यानुदात्तत्वं शास्ति[2] तज्ज्ञापयत्याचार्यः सति शिष्टोऽपि विकरणस्वरो लसार्वधातुकस्वरं न बाधत इति ॥

शास्त्रपरविप्रतिषेधानियमाद्वा शब्दपरविप्रतिषेधात्सिद्धम् ॥ १२ ॥

अथवा शास्त्रपरविप्रतिषेधे न सर्वमिष्टं संगृहीतं भवतीति कृत्वा शब्दपरविप्रतिषेधो विज्ञास्यते ॥ यदि शब्दपरविप्रतिषेधो भवति काम्यादयश्चितः कर्तव्याः । पुत्रकाम्यति गोपायति ऋतीयते । शब्दपरविप्रतिषेधो नाम भवति यत्रोभयोर्युगपत्प्रसङ्गो न च काम्यादिषु युगपत्प्रसङ्गः ॥

विभक्तिस्वरान्नञ्स्वरो बलीयान् ॥ १३ ॥

विभक्तिस्वरान्नञ्स्वरो बलीयानिति वक्तव्यम् । विभक्तिस्वरस्याकावशः । तिस्रस्तिष्ठन्ति[3] । नञ्स्वरस्यावकाशः । अब्राह्मणः अवृषलः[4] । इहोभयं प्राप्नोति । अतिस्रः । नञ्स्वरो भवति ॥

विभक्तिनिमित्तस्वराच्च ॥ १४ ॥

विभाक्तिनिमित्तस्वराच्च नञ्स्वरो बलीयानिति वक्तव्यम् । विभक्तिनिमित्तस्वरस्यावकाशः । चत्वारः अनड्वाहः[5] । नञ्स्वरस्य स एव । इहोभयं प्राप्नोति । अचत्वारः अननड्वाहः ॥

---

[1] समासस्य ६. १. २२३. [2] तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्निवङोः ६. १. १८६. [3] तिसृभ्यो जसः ६. १. १६६. [4] तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः ६. २. २. [5] चतुरनडुहोरामुदात्तः ७. १. ९८.

यच्चोपपदं कृति नञ् ॥ १५ ॥

यच्चोपपदं कृति नञ् तस्य[1] स्वरो बलीयानिति वक्तव्यम्। अकरणिर्हि ते वृषल ॥

सहनिर्दिष्टस्य च ॥ १६ ॥

सहनिर्दिष्टस्य च नञः स्वरो बलीयानिति वक्तव्यम्। अव्यथी[2] ॥

कर्षात्वतो घञोऽन्त उदात्तः ॥ ६ । १ । १५९ ॥

किमर्थं कृषेर्विकृतस्य ग्रहणं क्रियते न कृषात्वत इत्येवोच्येत। यस्य कृषेर्विकरण एतद्रूपं तस्य यथा स्यात्। इह मा भूत्। हलस्य कर्ष इति ॥

अथ किमर्थं मतुपा निर्देशः क्रियते न कर्षात इत्येवोच्येत । कर्षात इतीयत्युच्यमाने यत्रैवाकारादनन्तरो घञस्ति तत्रैव स्यात् । दायः धायः । इह न स्यात्। पाकः पाठः ॥ न क्वचिदाकारादनन्तरो घञस्ति । इहापि दायः धायः इति युका[3] व्यवधानम् ॥ एवमपि विहितविशेषणमाकारग्रहणं विज्ञायेत । आकाराद्यो विहित इति। मतुब्ग्रहणे पुनः क्रियमाणे न दोषो भवति ॥*

अनुदात्तस्य च यत्रोदात्तलोपः ॥ ६ । १ । १६१ ॥

अनुदात्तस्येति किमर्थम्। प्रासङ्गं वहति प्रासङ्ग्यः[4]।

उदात्तलोपे स्वरितोदात्तयोरभावादनुदात्तग्रहणानर्थक्यम् ॥ १ ॥

उदात्तलोपे स्वरितोदात्तयोरभावादनुदात्तग्रहणमनर्थकम्। न हि कश्चिदुदात्त उदात्ते स्वरिते वा लुप्यते सर्वोऽनुदात्त एव ॥ ननु चायमुदात्तः स्वरिते लुप्यते । प्रासङ्गं वहति प्रासङ्ग्य इति। एषोऽपि निघाते[5] कृते ऽनुदात्त एव लुप्यते। इदमिह संप्रधार्यम्। निघातः क्रियतां लोप[6] इति किमत्र कर्तव्यम्। परत्वाल्लोपः। एवं तर्ह्ययमद्य निघातस्वरः सर्वस्वराणामपवादः । न चापवादविषय उत्सर्गोऽभिनिविशते। पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः । प्रकल्प्य वापवादविषयं तत उत्सर्गोऽभिनिविशते। तन्न तावदत्र कदाचित्थाथादिस्वरो[7] भवत्यपवादं निघातं प्रतीक्षते ।

---

* [V. M. om. उञ्छादीनां च (१६०)].

[1] आक्रोशे नञ्यनिः ; गतिकारकोपपदात् कृत् ; तत्पुरुषे तुल्यार्थद्वितीया० ३. ३. ११२ ; ६. २. १३९ ; ६. २. २.

[2] जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च ; आद्युदात्तश्च ; तत्पुरुषे तुल्यार्थ० ३. २. १५७ ; ३. १. ३ ; ६. २. २.

[3] आतो युक् चिण्कृतोः ७. ३. ३३.

[4] तद्वहति रथयुगप्रासङ्गम् ; तित् स्वरितम् ४. ४. ७६ ; ६. १. १८५.

[5] अनुदात्तं पदमेकवर्जम् ६. १. १५८.

[6] यस्येति च ६. ४. १४८.

[7] थाथघञ्क्ताजबित्रकाणाम् ६. २. १४४.

तत्र निघातः क्रियतां लेप इति यद्यपि परत्वाल्लोपः सोऽसावविद्यमानोदात्तोऽनुदात्तो लुप्यते ॥

किं पुनरनुदात्तस्यान्त उदात्तो भवत्याहोस्विदादिः । कश्चात्र विशेषः ।

अन्त इति चेच्श्नम्क्सयुष्मदस्मदिदंकिंलोपेषु स्वरः ॥ २ ॥

अन्त इति चेच्श्नम्क्सयुष्मदिदंकिंलोपेषु स्वरो न सिध्यति । श्नम् । वि॒न्दाते॑ खि॒न्दाते॑[1] । श्नम् । क्स । मा हि धु॒क्षाता॑म् । मा हि धु॒क्षाथा॑म्[2] । क्स । युष्मदस्मद् । यु॒ष्मभ्य॑म् अ॒स्मभ्य॑म्[3] । इदंकिंलोपः । इया॑न् । किया॑न्[4] ॥ अस्तु तर्ह्यादिः ।

आदिरिति चेदिन्धीत द्वयमित्यन्तः ॥ ३ ॥

आदिरिति चेदिन्धीत द्वयमित्यन्तोदात्तत्वं न सिध्यति । इ॒न्धी॒त । द्व॒यम् । त्र॒यम्[5] ॥

आदौ सिद्धम् ॥ ४ ॥

अस्तु तर्ह्यादिरुदात्तो भवतीति ॥ ननु चोक्तमादिरिति चेदि॒न्धी॒त द्व॒यमित्यन्त इति ।

विदीन्धिखिदिभ्यश्च लसार्वधातुकानुदात्तप्रतिषेधाल्लिङि सिद्धम् ॥ ५ ॥

विदीन्धिखिदिभ्यश्च लसार्वधातुकानुदात्तत्वं[6] लिङि नेति वक्तव्यम् ॥ लिङ्ग्रहणेन नार्थः । अविशेषेण विदीन्धिखिदिभ्यश्च लसार्वधातुकानुदात्तत्वं नेत्येव । इदमपि सिद्धं भवति । वि॒न्दाते॑ खि॒न्दाते॑ ॥ अयचि कथम् ।

अयचि चित्करणात् ॥ ६ ॥

अयचि चित्करणसामर्थ्यादन्तोदात्तत्वं भविष्यति[7] ॥

धातोः ॥ ६ । १ । १६२ ॥

किं धातोरन्त उदात्तो भवत्याहोस्विदादिरिति । कश्चात्र विशेषः ।

---

[1] श्नसोरल्लोपः ; ६. ४. १११. [2] क्सस्याचि ७. ३. ७२. [3] भ्यसोऽभ्यम् ; शेषे लोपः ७. १. ३० ; ७. २. ९०. [4] इदंकिमोरीश्की ; यस्येति च ६. ३. ९० ; ६. ४. १४८. [5] यस्येति च ६. ४. १४८. [6] तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः ६. १. १८६. [7] द्वित्रिभ्यां तयस्यायज्वा ; चितः ५. २. ४३ ; ६. १. १६३.

धातोरन्त इति चेदनुदात्तेचबग्रहणम् ॥ १ ॥

धातोरन्त इति चेदनुदात्तेचबग्रहणं कर्तव्यम् । अभ्यस्तानामादिरनुदात्ते च [६. १. १८९, १९०] इति वक्तव्यम् । बग्रहणं च कर्तव्यम् । बान्तश्च पिबिराद्युदात्तो भवतीति वक्तव्यम् । पिब॑ति[1] ॥

संश्च नित् ॥ २ ॥

संश्च नित्कर्तव्यः । किं प्रयोजनम् । चिकीर्षति जिहीर्षति । नितीत्याद्युदात्तत्वं यथा स्यात्[2] । अस्तु तर्ह्यादिः ।

आदावूर्णुप्रत्ययधातुष्वन्तोदात्तत्वम् ॥ ३ ॥

आदावूर्णुप्रत्ययधातुष्वन्तोदात्तत्वं न सिध्यति । ऊ॒र्णोति॑ । ऊर्णु । प्रत्ययधातु । गो॒पा॒यति॑ धू॒पा॒यति॑ ऋ॒ती॒यते॑ ॥

अन्तोदात्तवचनात्सिद्धम् ॥ ४ ॥

अस्तु तर्ह्यन्तोदात्तो भवतीति ॥ ननु चोक्तं धातोरन्त इति चेदनुदात्तेचबग्रहणं कर्तव्यमिति । यत्तावदुच्यतेऽनुदात्तेचग्रहणं कर्तव्यमिति क्रियते न्यास एवाभ्यस्तानामादिरनुदात्ते चेति । बग्रहणं कर्तव्यमिति ॥

पिबौ निपातनात् ॥ ५ ॥

पिबावाद्युदात्तनिपातनं क्रियते[3] स निपातनस्वरः प्रकृतिस्वरस्य बाधको भविष्यति ॥ संश्च नित् कर्तव्य इत्यवश्यं सनो विशेषणार्थो नकारः कर्तव्यः । क विशेषणार्थेनार्थः । सन्यङोः [३. १. ९] इति[4] । सयङोरितीयत्युच्यमाने हंसः वत्सः अत्रापि प्राप्नोति । अर्थवद्ग्रहणे नानर्थकस्येत्येवं न भविष्यति । इहापि तर्हि न प्राप्नोति । जुगुप्सते मीमांसत इति । अर्थवानेषः । न वै कश्चिदर्थ आदिश्यते । यद्यपि कश्चिदर्थो नादिश्यतेऽनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीत्यन्ततः स्वार्थे भविष्यति । कश्चास्य स्वार्थः । प्रकृत्यर्थः । इहापि तर्हि प्राप्नोति । ह॒ंसः व॒त्स इति । उणादयोऽव्युत्पन्नानि प्रातिपदिकानि । स एषोऽनन्यार्थो नकारः कर्तव्यः । न कर्तव्यः । क्रियते न्यास एव ॥ अथवा धातोरिति[5] वर्तते । धातोः सशब्दान्तस्य द्वे भवत इति ॥

---

[1] पाघ्राध्मास्था...धौशीयसीदाः ७. ३. ७८. [2] ञ्नित्यादिर्नित्यम् ६. १. १९७. [3] गुणः कस्मान्न भवति । पिबतिरदन्तः । अदन्त इति चेदुक्तम् किमुक्तम् । धातोरन्त इति चेदनुदात्ते चबग्रहणमिति । महाभाष्य ७. १. ७८. [4] गुप्तिज्किद्भ्यः सन् ; मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य ३. १. ५ ; ६. [5] लिटि धातोरनभ्यासस्य ६. १. ८.

चितः ॥ ६ । १ । १६३ ॥

चितः सप्रकृतेर्बह्वकजर्थम् ॥ १ ॥

चितः सप्रकृतेरिति वक्तव्यम् । किं प्रयोजनम् । बह्वकजर्थम् । बह्वर्थमकजर्थं च । बह्वर्थं तावत् । बहुभुक्तम् बहुकृतम्[1] । अकजर्थम् । सर्वकैः विश्वकैः । उच्चकैः नीचकैः[2] ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । मतुब्लोपोऽत्र द्रष्टव्यः । तद्यथा । पुष्पका एषां पुष्पकाः कालका एषां कालकाः । अथवाऽकारो मत्वर्थीयः । तद्यथा । तुन्दः घाट इति । पूर्वसूत्रनिर्देशश्च । चित्वान् चित इति ॥*

तिसृभ्यो जसः ॥ ६ । १ । १६६ ॥

जस इति किमर्थम् । तिसृका[3] ॥

तिसृभ्यो जस्ग्रहणानर्थक्यमन्यत्राभावात् ॥ १ ॥

तिसृभ्यो जस्ग्रहणमनर्थकम् । किं कारणम् । अन्यत्राभावात् । न ह्यन्यत्तिसृशब्दादन्तोदात्तत्वं प्रयोजयत्यन्यदतो जसः । किं कारणम् । बहुवचनविषय एव तिसृशब्दस्तेनैकवचनद्विवचने न स्तः । शसि भवितव्यमुदात्तयणो हल्पूर्वात् [६. १. १७४] इति । अन्याः सर्वा हलादयो विभक्तयस्तत्र षट्त्रिचतुर्भ्यो हलादिर्झल्युपोत्तमम् [६. १. १७९, १८०] इत्यनेन स्वरेण भवितव्यम् । तत्रान्तरेण जसो ग्रहणं जस एव भविष्यति ॥ ननु चेदानीमेवोदाहृतं तिसृकेति । नित्स्वरोऽत्र बाधको भविष्यति नाप्राप्तेऽन्यस्वरे तिसृस्वर आरभ्यते स यथैवानुदात्तौ सुप्पितौ [३. १. ४.] इत्येतं स्वरं बाधत एवं नित्स्वरमपि बाधेत । नैष दोषः । नाप्राप्ते तस्य बाधनं भवति न चाप्राप्तेऽनुदात्तौ सुप्पिताविस्येतस्मिंस्तिसृस्वर आरभ्यते नित्स्वरे पुनः प्राप्ते चाप्राप्ते च । अथवा मध्येऽपवादाः पूर्वान्विधीन् बाधन्त इत्येवं तिसृस्वरोऽनुदात्तौ सुप्पिताविति स्वरं न बाधिष्यते ॥

उपसमस्तार्थमेके जसो ग्रहणमिच्छन्ति । अतितिस्रौ[5] । अतितिस्रः[6] ॥

---

* [V. M. om. तद्धितस्य (१६४) कितः (१६५)].

[1] विभाषा सुपो बहुच् पुरस्तात्तु ५. ३. ६८. [2] अव्ययसर्वनाम्नामकच् प्राक् टेः ५ ३. ७१.
[3] तिसृभावे संज्ञायां कन्युपसंख्यानम् ७. २. ९९ वा. १. [4] ञ्नित्यादिर्नित्यम् ६. १. १९७.
[5] उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ८. २. ४. [6] तिसृभ्यो जसः ६. १. १६६.

चतुरः शसि ॥ ६ । १ । १६७ ॥

शसि स्त्रियां प्रतिषेधो वक्तव्यः । चतस्रः पश्य ।

चतुरः शसि स्त्रियामप्रतिषेध आद्युदात्तनिपातनात् ॥ १ ॥

चतुरः शसि स्त्रियामप्रतिषेधः । अनर्थकः प्रतिषेधोऽप्रतिषेधः । शसिस्वरः कस्मान्न भवति । आद्युदात्तनिपातनात् । आद्युदात्तनिपातनं करिष्यते[1] स निपातनस्वरः शसिस्वरस्य बाधको भविष्यति ॥ एवमप्युपदेशिवद्भावो वक्तव्यः । यथैव हि निपातनस्वरः शसिस्वरं बाधत एवं विभक्तिस्वरमपि[2] बाधेत । चतसृणामिति ॥

विभक्तिस्वरभावश्च हलादिग्रहणात् ॥ २ ॥

विभक्तिस्वरस्य च भावः सिद्धः । कुतः । हलादिग्रहणात् । यदयं षट्त्रिचतुर्भ्यो हलादिः [६. १. १७९] इति हलादिग्रहणं करोति तज्ज्ञापयत्याचार्यो न निपातनस्वरो विभक्तिस्वरं बाधत इति । कथं कृत्वा ज्ञापकम् ।

आद्युदात्तनिपातने हि हलादिग्रहणानर्थक्यम् ॥ ३ ॥

आद्युदात्तनिपातने हि सति हलादिग्रहणमनर्थकं स्यात् । न ह्यन्यद्धलादिग्रहणं प्रयोजयत्यन्यदतश्चतसृशब्दात् ॥ षट्संज्ञास्तावन्न प्रयोजयन्ति । किं कारणम् । बहुवचनविषयत्वात् । तेन द्विवचनैकवचने न स्तः । जस्शसी चात्र लुप्येते । अन्याः सर्वा हलादयो विभक्तयः ॥ त्रिशब्दश्चापि न प्रयोजयति । किं कारणम् । बहुवचनविषयत्वात् । तेन द्विवचनैकवचने न स्तः । असर्वनामस्थानमिति[3] वचनाज्जसि न भविष्यति । शसि भवितव्यमेकादेश उदात्तेनोदात्तः [८. २. ५.] इति । अन्याः सर्वा हलादयो विभक्तयः ॥ तिसृशब्दश्चापि न प्रयोजयति । किं कारणम् । बहुवचनविषयत्वात् ॥ तेन द्विवचनैकवचने न स्तः । असर्वनामस्थानमिति[3] वचनाज्जसि न भवितव्यम् । शसि भवितव्यमुदात्तयणो हल्पूर्वात् [६. १. १७४] इति । अन्याः सर्वा हलादयो विभक्तयः । चतुःशब्दश्चापि न प्रयोजयति । किं कारणम् । बहुवचनविषयत्वात् । तेन द्विवचनैकवचने न स्तः । असर्वनामस्थानमिति[3] वचनाज्जसि न भवितव्यम् । शसि भवितव्यं चतुरः शसीति । अन्याः सर्वा हलादयो विभक्तयः ॥ तत्र चतसृ-

---

[1] चतसर्याद्युदात्तनिपातनं च ७. २. ९९ वा. २.

[2] षट्त्रिचतुर्भ्यो हलादिः ६. १. १७९.

[3] अचेश्छन्दस्यसर्वनामस्थानम् ६. १. १७०.

शब्दादेकस्माच्शस् असर्वनामस्थानमजादिर्विभक्तिरस्ति । यदि चात्र निपातनस्वरः स्याद्धलादिग्रहणमनर्थकं स्यात् ॥

नैव वा पुनरत्र शसिस्वरः प्राप्नोति । किं कारणम् । यणादेशे कृते[1] शसः पूर्व उदात्तभावी नास्तीति कृत्वा । अवशिष्टस्य तर्हि प्राप्नोति । ऋकारेण व्यवहितत्वान्न भविष्यति । यणादेशे कृते नास्ति व्यवधानम् । स्थानिवद्भावाद् व्यवधानमेव । प्रतिषिध्यतेऽत्र स्थानिवद्भावः स्वरविधिं प्रति न स्थानिवद्भवतीति[2] । नैषोऽस्ति प्रतिषेधः । उक्तमेतत्प्रतिषेधे स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवदिति[3] ॥

सावेकाचस्तृतीयादिर्विभक्तिः ॥ ६ । १ । १६८ ॥

साविति किमिदं प्रथमैकवचनस्य ग्रहणमाहोस्वित्सप्तमीबहुवचनस्य । कुतः संदेहः । समानो निर्देशः । सप्तमीबहुवचनस्य ग्रहणम् । कथं ज्ञायते । यदयं न गोश्वन्साववर्णेति गोशुनोः प्रतिषेधं शास्ति । कथं कृत्वा ज्ञापकम् । यदि प्रथमैकवचनस्य ग्रहणं स्याद्गोशुनोः प्रतिषेधवचनमनर्थकं स्यात् । ननु चार्थसिद्धिरेवैषा । अनुगृहीताः स्मो यैरस्माभिः प्रथमैकवचनमास्थाय गोशुनोः प्रतिषेधो न वक्तव्यो भवति । भवेत्प्रतिषेधो न वक्तव्यो दोषास्तु भवन्ति । तत्र को दोषः । स्विना स्विना । अन्तोदात्तत्वं न प्राप्नोति । स्विन्स्विनौ न स्तः । उक्तमेतदेकाक्षरात् कृतो जातेः सप्तम्यां च न तौ स्मृतौ[5] स्ववान् स्ववानित्येव भवितव्यम् । इह तर्हि याद्भ्याम् याद्भिरिति न सिध्यति । तस्मात्सप्तमीबहुवचनस्य ग्रहणम् ॥

सावेकाच उदात्तत्वे त्वन्मदोः प्रतिषेधः ॥ १ ॥

सावेकाच उदात्तत्वे त्वन्मदोः प्रतिषेधो वक्तव्यः । त्वया मया ॥

सिद्धं तु यस्मात्तृतीयादिस्तस्याभावात्सौ ॥

सिद्धमेतत् । कथम् । यस्मादत्र तृतीयादिर्विभक्तिर्न तत्सावस्ति ॥ यद्यप्येतत्सौ नास्ति प्रकृतिस्त्वस्य सावस्ति ।

प्रकृतेश्चानेकाच्त्वात् ॥ ३ ॥

यद्यपि तस्य प्रकृतिरास्ति सावनेकाच् तु सा भवति ॥

---

[1] अचि र ऋतः ७. २. १००.

[2] न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु १. १. ५८.

[3] प्रतिषेधे स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत् १. १. ५८ वा. १.

[4] न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः ६. १. १८२.

[5] एकाक्षरात्...स्मृतौ ५. १. ११५ श्लो. वा.

अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे ॥ ६ । १ । १६९ ॥

उत्तरपदग्रहणं किमर्थम् । यथैवाज्ग्रहणमुत्तरपदविशेषणं विज्ञायेत[1] । एकाच उत्तरपदादिति । अथाक्रियमाण उत्तरपदग्रहणे कस्यैकाज्ग्रहणं विशेषणं स्यात् । समासविशेषणम् । अस्ति चेदानीं कश्चिदेकाच्समासो यदर्थो विधिः स्यात् । अस्तीत्याह । शुन ऊर्क् श्वोर्क् । श्वो॒र्जा श्वो॒र्जे इति ॥ *

ऊडिदंपदाद्यप्पुम्रैद्युभ्यः ॥ ६ । १ । १७१ ॥

पदादिषु[2] निशन्तानि प्रयोजयन्ति । अन्यानि पदादीन्युदात्तनिवृत्तिस्वरेण[3] सिद्धानि ॥

ऊठ्युपधाग्रहणमन्त्यप्रातिषेधार्थम् ॥ १ ॥

ऊठ्युपधाग्रहणं कर्तव्यम् । किं प्रयोजनम् । अन्त्यप्रतिषेधार्थम् । अन्त्यस्य मा भूत् । अ॒क्ष॒द्युवा॑ अ॒क्ष॒द्युवे॑ ॥

अष्टनो दीर्घात् ॥ ६ । १ । १७२ ॥

दीर्घग्रहणं किमर्थम् । अ॒ष्टसु प्रक्रमेषु ब्राह्मण आदधीत । दीर्घादिति शक्यमकर्तुम् । कस्मान्न भवति अ॒ष्टसु॑ प्रक्रमेषु ब्राह्मण आदधीतेति । षट्स्वरोऽत्र बाधको भविष्यति[4] । नाप्राप्ते षट्स्वरे ऽष्टनः स्वर आरभ्यते स यथैव दीर्घाद्बाधत एवं ह्रस्वादपि बाधेत । न दीर्घात्षट्स्वरः प्राप्नोति । किं कारणम् । आत्वे कृते[5] षट्संज्ञाभावात् ॥ अत उत्तरं पठति ।

अष्टनो दीर्घग्रहणं षट्संज्ञाज्ञापकमाकारान्तस्य नुडर्थम् ॥ १ ॥

अष्टनो दीर्घग्रहणं क्रियते ज्ञापकार्थम् । किं ज्ञाप्यम् । एतज्ज्ञापयत्याचार्यो भवत्यात्वे कृते षट्संज्ञेति । किमेतस्य ज्ञापने प्रयोजनम् । आकारान्तस्य नुडर्थम् । आकारान्तस्य नुट् सिद्धो भवति । अ॒ष्टाना॑मिति[6] ॥ ननु च नित्यमात्वम् । एतदेव ज्ञापयति विभाषात्वमिति यदयं दीर्घग्रहणं करोति । इतरथा ह्यष्टन इत्येव ब्रूयात् ॥

---

* [V. M. om. अञ्चेश्छन्दस्यसर्वनामस्थानम् (१७०)].

[1] सावेकाचस्तृतीयादिर्विभक्तिः ६. १. १६८. [2] पद्दन्नोमास्...शस्प्रभृतिषु ६. १. ६३. [3] अनुदात्तस्य च यत्रोदात्तलोपः ६. १. १६१. [4] झल्युपोत्तमम् ६. १. १८०. [5] अष्टन आ विभक्तौ ७. २. ८४. [6] षट्चतुर्भ्यश्च ७. १. ५५.

शतुरनुमो नद्यजादी ॥ ६ । १ १७३ ॥

नद्यजाद्युदात्तत्वे बृहन्महतोरुपसंख्यानम् ॥ १ ॥

नद्यजाद्युदात्तत्वे बृहन्महतोरुपसंख्यानं कर्तव्यम् । बृहती महती । बृहता । महता ॥

उदात्तयणो हल्पूर्वात् ॥ ६ । १ । १७४ ॥

हल्पूर्वादिति किमर्थम् । अग्नये वायवे ।

उदात्तयणि हल्ग्रहणं नकारान्तार्थम् ॥ १ ॥

उदात्तयणि हल्ग्रहणं कर्तव्यम् । किं प्रयोजनम् । नकारान्तार्थम् । नकारान्तादपि यथा स्यात् । वाक्पत्नी चित्पत्नी[1] ॥

हल्पूर्वग्रहणानर्थक्यं च समुदायादेशत्वात् ॥ २ ॥

हल्पूर्वग्रहणं चानर्थकम् । किं कारणम् । समुदायादेशत्वात् । समुदायोऽत्रादेशः ॥

स्वरितत्वे चावचनात् ॥ ३ ॥

स्वरितत्वे[2] च हल्पूर्वग्रहणस्यावचनान्मन्यामहे हल्पूर्वग्रहणमनर्थकमिति ॥

यत्तावदुच्यत उदात्तयणि हल्ग्रहणं नकारान्तार्थमिति क्रियते न्यास एव । द्विनकारको निर्देशः । उदात्तयणो हल्पूर्वान्नोङ्धात्वोरिति[3] ॥ यदप्युच्यते हल्पूर्वग्रहणानर्थक्यं च समुदायादेशत्वादित्ययमस्ति केवल आदेशः बहुतितवा[4] ॥ *

ह्रस्वनुड्भ्यां मतुप् ॥ ६ । १ । १७६ ॥

मतुवुदात्तत्वे रेग्रहणम् ॥ १ ॥

मतुबुदात्तत्वे रेग्रहणं कर्तव्यम् । आ रेवानेतु नो विशः ॥

त्रिप्रतिषेधश्च ॥ २ ॥

त्रिप्रतिषेधश्च वक्तव्यः । त्रिवतीर्याज्यानुवाक्या भवन्ति ॥

---

* [V. M. om. नोङ्धात्वोः (१७५)].

[1] न भूवाक्चिद्दिधिषु ; समासस्य ; विभाषा सपूर्वस्य ६. २. १९ ; ६. १. २२३ ; ४. १. ३४.
[2] उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य ८. २. ४.
[3] नोङ्धात्वोः ६. १. १७५.
[4] बहोर्नञ्वदुत्तरपदभूम्नि ६. २. १७५.

नामन्यतरस्याम् ॥ ६ । १ । १७७ ॥

इह कस्मान्न भवति । कि॒शो॒रीणा॑म् । कु॒मा॒रीणा॑म् । ह्रस्वादिति[1] वर्तते । इहापि तर्हि न प्राप्नोति । अ॒ग्नी॒नाम् वा॒यू॒नाम् । किं कारणम् । दीर्घत्वे[2] कृते ह्रस्वाभावात् । इदमिह संप्रधार्यम् । दीर्घत्वं क्रियतां स्वर इति किमत्र कर्तव्यम् । परत्वाद्दीर्घत्वम् ॥ एवं तर्हि

नाम्स्वरे मतौ ह्रस्वग्रहणम् ॥ १ ॥

नाम्स्वरे मतौ ह्रस्वग्रहणं कर्तव्यम् । मतौ ह्रस्वान्तादिति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । आहायं ह्रस्वान्तादिति न च नामि ह्रस्वान्तोऽस्ति तत्र भूतपूर्वगतिर्विज्ञास्यते । ह्रस्वान्तं यद्भूतपूर्वमिति ॥ सांप्रतिकाभावे भूतपूर्वगतिर्विज्ञायते ऽयं चास्ति सांप्रतिकः । ति॒सृ॒णाम् च॒त॒सृ॒णामिति[4] । नैतदस्ति । षट्त्रिचतुर्भ्यो हलादिः [६. १. १७९] इत्यनेनात्र स्वरेण भवितव्यम् । तस्मिन्नित्ये प्राप्त इयं विभाषारभ्यते । एवं तर्हि योगविभागः करिष्यते षट्त्रिचतुर्भ्यो नामुदात्तो भवति । ततो हलादिः । हलादिश्च विभक्तिरुदात्ता भवति षट्त्रिचतुर्भ्य इति ॥ इदं तर्हि । त्वं नॄ॒णां नृ॑पते जायसे॒ शुचिः॑[6] । ननु चात्रापि नृ चान्यतरस्याम् [६. १. १८४] इत्येष स्वरो बाधको भविष्यति । न सिध्यति । किं कारणम् । झल्ग्रहणं तत्रानुवर्तते । किं पुनः कारणं झल्ग्रहणं तत्रानुवर्तते । इह मा भूत् । न्रा न्रे । उदात्तयणो हल्पूर्वात् [६. १. १७४] इत्येष स्वरोऽत्र बाधको भविष्यति । इदं तर्हि । नरिं ॥ नैकमुदाहरणं ह्रस्वग्रहणं प्रयोजयति । यद्येतावत् प्रयोजनं स्यान्नामित्येव ब्रूयात्[7] । तत्र वचनाद्भूतपूर्वगतिर्विज्ञास्यते । ह्रस्वान्तं यद्भूतपूर्वमिति ॥

अथवा नैवं विज्ञायते नाम्स्वरे मतौ ह्रस्वग्रहणं कर्तव्यमिति । कथं तर्हि । नाम्स्वरे मतौ ह्रस्वादिति वर्तत इति ॥ *

न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः ॥ ६ । १ । १८२ ॥

साविति किमिदं प्रथमैकवचनस्य रूपमाहोस्वित्सप्तमीबहुवचनस्य । कुतः

---

* [V. M. om. ङ्याश्छन्दसि बहुलम् (१७८) ; षट्त्रिचतुर्भ्यो हलादिः (१७९) ; झल्युपोत्तमम् (१८०) ; विभाषा भाषायाम् (१८१)].

[1] ह्रस्वनुड्भ्यां मतुप् ६. १. १७६. [2] नामि ; ६. ४. ३. [3] न तिसृचतसृ ६. ४. ४. [4] षट्त्रिचतुर्भ्यो हलादिः ६. १. १७९. [5] नृ च ६. ४. ६. [6] ऋ. सं. २. १. १. [7] नृ चान्यतरस्याम् ६. १. १८४.

संदेहः । समानो निर्देशः । पुरस्तादेष निर्णयः[1] सप्तमीबहुवचनस्य ग्रहणमिति । इहापि तदेव भवितुमर्हति ॥ यदि सप्तमीबहुवचनस्य ग्रहणं ताभ्यां॑ ब्रा॒ह्म॒णाभ्या॑म् याभ्यां॑ ब्रा॒ह्म॒णाभ्या॑म् अत्र न प्राप्नोति । विधिरप्यत्र न सिध्यति[2] । किं कारणम् । न ह्येतद्भवति यत्सौ रूपम् । इह तर्हि तेभ्यो॑ ब्रा॒ह्म॒णेभ्यः॑, येभ्यो॑ ब्रा॒ह्म॒णेभ्यः॑ विधिश्च सिद्धो भवति प्रतिषेधस्तु न प्राप्नोति ॥ अस्ति पुनः किंचित्सप्तमीबहुवचनस्य ग्रहणे सतीष्टं संगृहीतं भवत्याहोस्विद्दोषान्तमेव । अस्तीत्याह । इह याभ्यो॑ ब्रा॒ह्म॒णीभ्यः॑ ताभ्यो॑ ब्रा॒ह्म॒णीभ्य॑ इति विधिश्च सिद्धो भवति प्रतिषेधश्च ॥ अस्तु तर्हि प्रथमैकवचनस्य ग्रहणम् । यदि प्रथमैकवचनस्य ग्रहणं तेनेति स्वरः पुंसि न सिध्यति । न चावश्यं पुंस्येव स्त्रियां पुंसि नपुंसके च । तेन॑ ब्रा॒ह्म॒णेन॑ तया॑ ब्रा॒ह्म॒ण्या । तेन॑ कु॒ण्डेने॑ति । सप्तमीबहुवचनस्यापि ग्रहण एष दोषः । तस्मादुभाभ्यामेव प्रतिषेधे यत्तदोश्च ग्रहणं कर्तव्यम् । न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यो यत्तदोश्चेति *

तित्स्वरितम् ॥ ६ । १ । १८५ ॥

तिति प्रत्ययग्रहणम् ॥ १ ॥

तिति प्रत्ययग्रहणं कर्तव्यम् । इह मा भूत् ऋत इद्धातोः [७. १. १००] कि॒रति॑ गि॒रति॑ ॥ तर्त्तर्हि वक्तव्यम् । न वक्तव्यम् । नैष तकारः । कस्तर्हि । दकारः । यदि दकार आन्तर्यतो दीर्घस्य दीर्घः प्राप्नोति । भाव्यमानेन सवर्णानां ग्रहणं नेत्येवं न भविष्यति ॥ यदि भाव्यमानेन सवर्णानां ग्रहणं नेत्युच्यतेऽदसोऽसेर्दादु दो मः [८. २. ८०] अमूभ्यामित्यत्र न प्राप्नोति । एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति भवत्युकारेण भाव्यमानेन सवर्णानां ग्रहणमिति यदयं दिव उत् [६. १. १३१] इत्युकारं तपरं करोति । एवमर्थमेव तर्हि प्रत्ययग्रहणं कर्तव्यमत्र मा भूदिति । नैष तकारः । कस्तर्हि । दकारः । यदि दकारो न ज्ञापकं भवति । एवं तर्हि तपरस्तत्कालस्य [१. १. ७१] इति दकारोऽपि चर्त्वभूतो[3] निर्दिश्यते । यद्येवं चर्त्वस्यासिद्धत्वाद्धशि च [६. १. ११४] इत्युत्त्वं प्राप्नोति । सौत्रो निर्देशः । अथवासंहितया निर्देशः करिष्यते । इत्सवर्णस्य चाप्रत्ययः तपरस्तत्कालस्येति ॥

---

* [V. M. om. दिवो झल् (१८३); नृ चान्यतरस्याम् (१८४)].

[1] कुतः संदेहः । समानो निर्देशः । सप्तमीबहुवचनस्य ग्रहणम् । ६. १. १६८ महाभाष्य.

[2] सावेकाचस्तृतीयादिर्विभक्तिः ६. १. १६८.

[3] खरि च ८. ४. ५५.

तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः ॥ ६ । १ । १८६

अदुपदेशादिति कथमिदं विज्ञायते । अकारो य उपदेश इति । आहोस्विदकारान्तं यदुपदेश इति । किं चातः । यदि विज्ञायतेऽकारो य उपदेश इति हु॒तः हु॒थ इत्यत्रापि प्राप्नोति । अथ विज्ञायते ऽकारान्तं यदुपदेश इति न दोषो भवति । ननु चाकारान्तं यदुपदेश इत्यपि विज्ञायमानेऽत्रापि प्राप्नोति । एतदपि हि व्यपदेशिवद्भावेनाकारान्तं भवत्युपदेशे । अर्थवता व्यपदेशिवद्भावः ॥ यदि तर्ह्यकारान्तं यदुपदेश इति विज्ञायते मा हि धु॒क्षाथांम् मा हि धु॒क्षातांम् अत्रापि प्राप्नोति । अस्तु । अनुदात्तत्वे कृते लोप उदात्तनिवृत्तिस्वरेण सिद्धम्[1] । न सिध्यति । इदमिह संप्रधार्यम् । अनुदात्तत्वं क्रियतां लोप इति किमत्र कर्तव्यम् । परत्वाल्लोपः । एवं तर्हीदमद्य लसार्वधातुकानुदात्तत्वं प्रत्ययस्वरस्यापवादः । न चापवादविषय उत्सर्गोऽभिनिविशते । पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः । प्रकल्प्य वापवादविषयं तत उत्सर्गोऽभिनिविशते । तत्र तावदत्र कदाचित्प्रत्ययस्वरो भवत्यपवादं लसार्वधातुकानुदात्तत्वं प्रतीक्षते । तत्रानुदात्तत्वं क्रियतां लोप इति किमत्र कर्तव्यम् । परत्वाल्लोपः । यद्यपि परत्वाल्लोपः सोऽसावविद्यमानोदात्तेऽनुदात्त उदात्तो लुप्यते ॥

तास्यादिभ्योऽनुदात्तत्वे सप्तमीनिर्देशोऽभ्यस्तसिजर्थः ॥ १ ॥

तास्यादिभ्यो ऽनुदात्तत्वे सप्तमीनिर्देशः कर्तव्यः । लसार्वधातुक इति वक्तव्यम् । किं प्रयोजनम् । अभ्यस्तसिजर्थः । अभ्यस्तानामादिरुदात्तो भवति[2] लसार्वधातुके । सिजन्तस्यादिरुदात्तो भवति[3] लसार्वधातुके । लसार्वधातुकमित्युच्यमाने तस्यैवाद्युदात्तत्वं स्यात् ॥ यदि सप्तमीनिर्देशः क्रियते तास्यादीनामेवानुदात्तत्वं प्राप्नोति । नैष दोषः । तास्यादिभ्य इत्येषा पञ्चमी लसार्वधातुक इति सप्तम्याः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्य [१. १. ६७] इति ॥

चित्स्वरात्तास्यादिभ्योऽनुदात्तत्वं विप्रतिषेधेन ॥ २ ॥

चित्स्वरात्तास्यादिभ्योऽनुदात्तत्वं भवति विप्रतिषेधेन । चित्स्वरस्यावकाशः ।

---

[1] क्सस्याचि ; अनुदात्तस्य च यत्रोदात्तलोपः ७. ३. ७२ ; ६. १. १६१.
[2] अभ्यस्तानामादिः ६. १, १८९.
[3] आदिः सिचोन्यतरस्याम् ६. १. १८७.

चलनः चोपनः[1] । तास्यादिभ्योऽनुदात्तत्वस्यावकाशः । आस्ते शेते । इहोभयं प्राप्नोति । आसीनः शयानः[2] । तास्यादिभ्योऽनुदात्तत्वं भवति विप्रतिषेधेन ॥ नैष युक्तो विप्रतिषेधः । किं कारणम् । द्विकार्ययोगो हि विप्रतिषेधो न चात्रैको द्विकार्ययुक्तः । आदेरनुदात्तत्वमन्तस्योदात्तत्वम्[3] । नावश्यं द्विकार्ययोग एव विप्रतिषेधः । किं तर्हि । असंभवोऽपि । ननु चात्राप्यस्ति संभवः । आदेरनुदात्तत्वमन्तस्य चोदात्तत्वमिति । अस्ति च संभवो यदुभयं स्यात् । नैषोऽस्ति संभवः । कथम् । वक्ष्यत्येतत्स्वरविधौ संघातः कार्यी भवतीति[4] ॥

मुकश्चोपसंख्यानम् ॥ ३ ॥

मुकश्चोपसंख्यानं कर्तव्यम् । पचमानः यजमानः । मुका[5] व्यवहितत्वाददुपदेशाल्लसार्वधातुकमनुदात्तं भवतीत्यनुदात्तत्वं न प्राप्नोति । ननु चायं मुगदुपदेशभक्तोऽदुपदेशग्रहणेन ग्राहिष्यते । न सिध्यति । अङ्गस्य मुगुच्यते विकरणान्तं चाङ्गं सोऽसौ संघातभक्तो ऽशक्यो मुगदुपदेशग्रहणेन ग्रहीतुम् ॥ अथायमङ्गभक्तः स्याद्गृह्येतायमदुपदेशग्रहणेन । बाढं गृह्येत । अङ्गभक्तस्तर्हि भविष्यति । तत्कथम् । वक्ष्यत्येतस्य परिहारम्[6] ।

इतश्चोपसंख्यानम् ॥ ४ ॥

इतश्चोपसंख्यानं कर्तव्यम् । इड्भिश्च व्यवहितत्वादनुदात्तत्वं न प्राप्नोति । पचतः पठतः[7] ॥

इतश्चानेकान्तत्वात् ॥ ५ ॥

अनेकान्ता अनुबन्धाः ॥ यद्यनेकान्ता अनुबन्धा अदिप्रभृतिजुहोत्यादिभ्यः प्रतिषेधो वक्तव्यः । अत्तः जुह्वत इति[8] । अदुपदेशादित्यनुदात्तत्वं प्राप्नोति ।

तत्रादिप्रभृतिजुहोत्यादिभ्योऽप्रतिषेधः स्थान्यादेशाभावात् ॥ ६ ॥

तत्रादिप्रभृतिभ्यो जुहोत्यादिभ्यो ऽप्रतिषेधः । अनर्थकः प्रतिषेधो ऽप्रतिषेधः । अनुदात्तत्वं कस्मान्न भवति । स्थान्यादेशाभावात् । नैवात्र स्थानिनं नैवादेशं पश्यामः ॥

अनुदात्तङिद्ग्रहणाद्वा ॥ ७ ॥

अथवा यदयमनुदात्तङिद्ग्रहणं करोति तज्ज्ञापयत्याचार्यो न लुप्तविकरणेभ्यो

---

[1] चलनशब्दार्थादकर्मकाद्युच्; ३. २. १४८; ६. १. १६३. [2] लटः शतृशानचावप्रथमासमानाधिकरणे ३. २. १२४. [3] आदेः परस्य १. १. ५४. [4] एवं तर्हि सिद्धे सति यत्प्रत्ययग्रहणं करोति तज्ज्ञापयति—'स्वरविधौ संघातः कार्यी' इति ६. १. १९२ महाभाष्य. [5] आने मुक् ७. २. ८२. [6] अङ्गस्य मुगुच्यते, विकरणान्तं चाङ्गम्। सोयं संघातभक्तोऽशक्तोऽदुपदेशग्रहणेन ग्रहीतुम् ७. २. १२४ महाभाष्य. [7] ३. १. ६८. [8] अदिप्रभृतिभ्यः शपः; जुहोत्यादिभ्यः श्लुः २. ४. ७२; ७५.

ऽनुदात्तत्वं भवतीति ॥ नैतदस्ति ज्ञापकम् । श्नमर्थमेतत्स्यात् । विन्दा॑ते खिन्दा॑ते । यत्तर्हि ङिद्ग्रहणं करोति न हि श्नम्विकरणो ङिदस्ति ॥

ङितोऽनुदात्तत्वे विकरणेभ्यः प्रतिषेधो वक्तव्यः । चि॒नु॒तः सु॒नु॒तः । लु॒नी॒तः पु॒नी॒तः । ङित इत्यनुदात्तत्वं प्राप्नोति[1] ।

ङितोऽनुदात्तत्वे विकरणेभ्योऽप्रतिषेधः सर्वस्योपदेशविशेषणत्वात् ॥ ८ ॥

ङितोऽनुदात्तत्वे विकरणेभ्योऽप्रतिषेधः । अनर्थकः प्रतिषेधो ऽप्रतिषेधः । अनुदात्तत्वं कस्मान्न भवति । सर्वस्योपदेशविशेषणत्वात् । सर्वमुपदेशग्रहणेन विशेषयिष्यामः । उपदेशेऽनुदात्तेतः । उपदेशे ङितः । उपदेशेऽकारान्तादिति ॥

आदिः सिचोऽन्यतरस्याम् ॥ ६ । १ । १८७ ॥

सिच आद्युदात्तत्वे ऽनिटः पित उपसंख्यानम् ॥ १ ॥

सिच आद्युदात्तत्वे ऽनिटः पित उपसंख्यानं कर्तव्यम् । मा हि का॑र्षम् । मा हि का॒र्षम् । अनिट इति किमर्थम् । मा हि ला॑विषम् मा हि ला॒वि॒षम् ॥

स्वपादिहिंसामच्यनिटि ॥ ६ । १ । १८८ ॥

स्वपादीनां वावचनादभ्यस्तस्वरो विप्रतिषेधेन ॥ १ ॥

स्वपादीनां वावचनादभ्यस्तस्वरो[2] भवति विप्रतिषेधेन । स्वपादीनां वावचनस्यावकाशः । स्वप॑न्ति स्व॒पन्ति॑ । श्वस॑न्ति श्व॒सन्ति॑ । अभ्यस्तस्वरस्यावकाशः । दद॑ति दध॑ति । इहोभयं प्राप्नोति । जाग्र॑ति[3] । अभ्यस्तस्वरो भवति विप्रतिषेधेन ॥*

अनुदात्ते च ॥ ६ । १ । १९० ॥

अनुदात्ते चेति बहुव्रीहिनिर्देशो लोपयणादेशार्थः ॥ १ ॥

अनुदात्ते चेति बहुव्रीहिनिर्देशः कर्तव्यः । अविद्यमानोदात्तेऽनुदात्त इति वक्तव्यम् । किं प्रयोजनम् । लोपयणादेशार्थम् । लोपयणादेशयोः कृतयोराद्युदात्तत्वं यथा स्यात् । मा हि स्म दधा॑त् । दधा॑त्यत्र ॥

---

* [V. M. om. अभ्यस्तानामादिः (१८९)].

[1] सार्वधातुकमपित् १. २. ४. [2] अभ्यस्तानामादिः ६. १. १८९. [3] जक्षित्यादयः षट् ६.१.६.

सर्वस्य सुपि ॥ ६ । १ । १९१ ॥

सर्वस्वरोऽनकच्कस्य ॥ १ ॥

सर्वस्वरोऽनकच्कस्येति वक्तव्यम्। इह मा भूत्। सर्वके[१] ॥

भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति ॥ ६ । १ । १९२ ॥

भ्यादिग्रहणं किमर्थम्। इह मा भूत्। ददाति ॥ नैतदस्ति प्रयोजनम्। अभ्यस्तस्वरो[२]ऽत्र बाधको भविष्यति ॥ अन्तत उभयं स्यात्। अनवकाशाः खल्वपि विधयो बाधका भवन्ति सावकाशश्चाभ्यस्तस्वरः। कोऽवकाशः। मिमीते[३] ॥

अथ प्रत्ययग्रहणं किमर्थम्। प्रत्ययात्पूर्वस्योदात्तत्वं यथा स्यादाटः[४] पूर्वस्य मा भूदिति। विभयानि ॥ न चैवास्ति विशेषः प्रत्ययाद्वा पूर्वस्योदात्तत्वे सत्याटो वा। अपि च पिद्वक्तः पिद्ग्रहणेन ग्राहिष्यते ॥ इदं तर्हि प्रयोजनं प्रत्ययात्पूर्वस्योदात्तत्वं यथा स्यादाट एव मा भूदिति ॥ एतदपि नास्ति प्रयोजनम्। पिद्वक्तः पिद्ग्रहणेन ग्राहिष्यते ॥ एवं तर्हि सिद्धे सति यत्प्रत्ययग्रहणं करोति तज्ज्ञापयत्याचार्यः स्वरविधौ संघातः कार्यी भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। चित्स्वरात्तास्यादिभ्योऽनुदात्तत्वं विप्रतिषेधेनेत्युक्तं[५] तदुपपन्नं भवति ॥

अथ पूर्वग्रहणं किमर्थं न तस्मिन्निति निर्दिष्टे पूर्वस्य [१. १. ६६] इति पूर्वस्यैव भविष्यति। एवं तर्हि सिद्धे सति यत्पूर्वग्रहणं करोति तज्ज्ञापयत्याचार्यः स्वरविधौ सप्तम्यस्तदन्तसप्तम्यो भवन्तीति। किमेतस्य ज्ञापने प्रयोजनम्। उपोत्तमं रिति [६. १. २१७] रिदन्तस्य। चङ्यन्यतरस्याम् [२१८] चङन्तस्य ॥ यद्येतज्ज्ञाप्यते चतुरः शसि [१६७] इति शसन्तस्यापि प्राप्नोति। शस्ग्रहणसामर्थ्यान्न भविष्यति। इतरथा हि तत्रैवायं ब्रूयादूडिदंपदाद्यप्पुम्रैद्युभ्यश्चतुर्भ्यश्चेति ॥[६]

अथ पिद्ग्रहणं किमर्थम्। इह मा भूत् जाग्रति ॥ नैतदस्ति प्रयोजनम्। भवत्येवात्र पूर्वेण[७] ॥ इदं तर्हि प्रयोजनम्। दरिद्रति ॥ आकारेण व्यवहितत्वान्न

---

[१] अव्ययसर्वनाम्नामकच् प्राक् टेः; चितः ५. ३. ७१; ६. १. १६३.
[२] अनुदात्ते च ६. १. १९०.
[३] तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः; अनुदात्ते च ६. १. १८६; १९०.
[४] आडुत्तमस्य पिच्च ३ १. ९ .
[५] ६. १. १८६; वा. २.
[६] ऊडिदंपदाद्यप्पुम्रैद्युभ्यः ३. १. १७३.
[७] अभ्यस्तानामादिः ६. १. १८९.

भविष्यति । लोपे[1] कृते नास्ति व्यवधानम् । स्थानिवद्भावाद्व्यवधानमेव । प्रतिषिध्यतेऽत्र स्थानिवद्भावः स्वरविधिं प्रति न स्थानिवद्भवतीति[2] ॥*

अचः कर्तृयकि ॥ ६ । १ । १९५ ॥

यकि रपर उपसंख्यानम् ॥ १ ॥

यकि रपर उपसंख्यानं कर्तव्यम् । स्तीर्य॑ते[3] स्वयमेव ॥

उपदेशवचनात्सिद्धम् ॥ २ ॥

उपदेश इति वक्तव्यम् ॥

उपदेशवचने जनादीनाम् ॥ ३ ॥

उपदेशवचने जनादीनां स्वरो न सिध्यति । जाय॑ते[4] स्वयमेव । जा॒यते॑ स्वयमेव ॥

योगविभागात्सिद्धम् ॥ ४ ॥

योगविभागः करिष्यते । अजन्तानां कर्तृयकि वादिरुदात्तो भवति । चीय॑ते स्वयमेव । ची॒यते॑ स्वयमेव । जाय॑ते स्वयमेव । जा॒यते॑ स्वयमेव । तत उपदेशे । उपदेशे चाजन्तानां कर्तृयकि वादिरुदात्तो भवति स्तीर्य॑ते स्वयमेव । स्ती॒र्यते॑ स्वयमेव ॥

तत्तर्ह्युपदेशग्रहणं कर्तव्यं न ह्यन्तरेणोपदेशग्रहणं योगाङ्गं जायते । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः [६. १. १८६] इति । ननु चोक्तमुपदेशवचने जनादीनां स्वरो न सिध्यतीति । नैष दोषः । नैवं विज्ञायत उपदेशवचने जनादीनां स्वरो न सिध्यतीति । कथं तर्हि । जनादीनामप्यात्त्व उपदेशवचनं कर्तव्यमिति । तत्तर्हि तत्रोपदेशग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति [६. ४. ३७] इति ॥

थलि च सेटीडन्तो वा ॥ ६ । १ । १९६ ॥

सेड्ग्रहणं किमर्थं न थलीडन्तो वेत्युच्यते । इडन्तो वेत्युच्यमान इहापि प्रसज्येत ।

---

* [V. M. om. लिति (१९३); आदिर्णमुल्यन्यतरस्याम् (१९४)].

[1] श्नाभ्यस्तयोरातः ६. ४. ११२. [2] न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु १. १. ५८. [3] ऋत इद्धातोः ; उरण् रपरः, हलि च ७. १. १०० ; १. १. ५१. ; ८. २ ७०. [4] ये विभाषा ६. ४. ४३.

पपक्थ । नैतदस्ति प्रयोजनम् । अच इति[1] वर्तते । इदं तर्हि प्रयोजनम् । ययाथेति ॥*

संज्ञायामुपमानम् ॥ ६ । १ । २०४ ॥

किमर्थमिदमुच्यते न ञ्नित्यादिर्नित्यम् [६. १. १९७] इत्येव सिद्धम् । ञ्नितीत्युच्यते न चात्र ञ्नितं पश्यामः[2] । प्रत्ययलक्षणेन । न लुमता तस्मिन्निति प्रत्ययलक्षणप्रतिषेधः । अङ्गाधिकारोक्तस्य स प्रतिषेधो न लुमताङ्गस्य [१. १. ६३] इति ॥ अत उत्तरं पठति ।

उपमानस्याद्युदात्तवचनं ज्ञापकमनुबन्धलक्षणे स्वरे प्रत्ययलक्षणप्रतिषेधस्य ॥ १ ॥

उपमानस्याद्युदात्तवचनं ज्ञापकार्थं क्रियते । किं ज्ञाप्यम् । एतज्ज्ञापयत्याचार्योऽनुबन्धलक्षणे स्वरे प्रत्ययलक्षणं न भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । गर्गाः वत्साः । बिदाः उर्वाः[3] । उष्ट्रग्रीवाः वामरज्जुः[4] । ञ्नितीत्याद्युदात्तत्वं न भवति । इह च अत्रय इति[5] तद्धितस्य कितः [६. १. १६४-१६५] इत्यन्तोदात्तत्वं न भवति ॥ यद्यनुबन्धलक्षण इत्युच्यते पथिप्रियः मथिप्रिय इति[6] पथिमथोः सर्वनामस्थाने [१९९] इत्याद्युदात्तत्वं प्राप्नोति । एवं तर्ह्याचार्यो ज्ञापयति स्वरे प्रत्ययलक्षणं न भवतीति ॥ एवमपि सर्पिरागच्छ सप्तागच्छतेत्यामन्त्रितस्य च [१९८] इत्याद्युदात्तत्वं न प्राप्नोति[7] । इह च मा हि दाताम् मा हि धाताम्[8] आदिः सिचोऽन्यतरस्याम् [१८७] इत्येष स्वरो न प्राप्नोति । एवं तर्हि ज्ञापयत्याचार्यः सप्तमीनिर्दिष्टे स्वरे प्रत्ययलक्षणं न भवतीति ॥ एवमपि सर्वस्तोमः सर्वपृष्ठः सर्वस्य सुपि [१९१] इत्याद्युदात्तत्वं न प्राप्नोति ॥ अस्तु तर्ह्यनुबन्धलक्षण इत्येव । कथं पथिप्रियः मथिप्रियः । वक्तव्यमेवैतत्पथिमथोः सर्वनामस्थाने लुकि लुमता लुप्ते प्रत्ययलक्षणं न भवतीति[9] ॥

निष्ठा च द्व्यजनात् ॥ ६ । १ । २०५ ॥

निष्ठायां यञि दीर्घत्वे प्रतिषेधः ॥ १ ॥

निष्ठायां यञि दीर्घत्वे प्रतिषेधो वक्तव्यः । दत्ताभ्याम् गुप्ताभ्याम्[10] ॥

---

* [V. M. om. ञ्नित्यादिर्नित्यम् (१९०) ; आमन्त्रितस्य च (१९७) ; पथिमथोः सर्वनामस्थाने (१९९) ; अन्तश्च तवै युगपत् (२००) ; क्षयो निवासे (२०१) ; जयः करणम् (२०२) ; वृषादीनां च (२०३)].

[1] अचः कर्तृयकि ६. १. १९५. [2] संज्ञायां च ; लुब्मनुष्ये ५. ३. ९७ ; ९८. [3] गर्गादिभ्यो यञ् ; अनृष्यानन्तर्ये बिदादिभ्योऽञ् ; यञञोश्च ४ १. १०५ ; १०४ ; २. ४. ६४. [4] इवे प्रतिकृतौ ; देवपथादिभ्यश्च ५. ३. ९६ ; १००. [5] इतश्चानिञः ; अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च ४. १. १२२ ; २ ४. ६५. [6] सुपो धातुप्रातिपदिकयोः ; बहुव्रीहौ प्रकृत्या पूर्वपदम् २. ४. ७१ ; ६. २. १. [7] स्वमोर्नपुंसकात् ; षड्भ्यो लुक् ७. १. २३ ; २२. [8] गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु २. ४. ७७. [9] लुमति प्रतिषेध एकपदस्वरस्योपसंख्यानं कर्तव्यम् । एकपदस्वरे च लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम् १. १. ६३ महाभाष्य. [10] सुपि च ७. ३. १०२.

न वा बहिरङ्गलक्षणत्वात् ॥ २ ॥

न वा वक्तव्यम् । किं कारणम् । बहिरङ्गलक्षणत्वात् । बहिरङ्गोऽत्र दीर्घः । अन्तरङ्गः स्वरः । असिद्धं बहिरङ्गमन्तरङ्गे ॥

अन्तरेण प्रतिषेधमन्तरेण चैतां परिभाषां सिद्धम् । कथम् । नैवं विज्ञायते न चेदाकारान्ता निष्ठेति । कथं तर्हि । न चेदाकारात्परा निष्ठेति। यद्येवं निर्देशश्चैव नोपपद्यते न ह्येषा आकारात्परा पञ्चमी युक्ता । इह च प्राप्नोति । आ॒प्तः रा॒द्ध इति ॥ एवं तर्हि न चेदवर्णात्परा निष्ठेति । भवेन्निर्देश उपपन्न इह तु प्राप्नोति आ॒प्तः रा॒द्ध इति इह च न प्राप्नोति यत॑ः रत॑ इति ॥ एवं तर्हि विहितविशेषणमकारग्रहणम् । न चेदकारान्ताद्विहिता निष्ठेति । एवमपि दत्त॑ः अत्र न प्राप्नोति इह च प्राप्नोति आ॒प्तः रा॒द्ध इति॑ ॥ एवं तर्हि कार्यिविशेषणमाकारग्रहणम् । न चेदाकारः कार्यी भवति ॥ एवमपि अद्याष्ट॑ः कदाष्ट॑ः अत्र न प्राप्नोति । तस्मात्सुष्ठूच्यते निष्ठायां यञि दीर्घत्वे प्रतिषेधो न वा बहिरङ्गलक्षणत्वादिति ॥*

आशितः कर्ता ॥ ६ । १ । २०७ ॥

किं निपात्यते ।

आशिते कर्तरि निपातनमुपधादीर्घत्वमाद्युदात्तत्वं च ॥ १ ॥

आशित इति क्तः कर्तरि निपात्यते । आशितवानाशि॑तः । उपधादीर्घत्वमाद्युदात्तत्वं च निपात्यते ॥ आद्युदात्तत्वमनिपात्यम् । अधिकारात्सिद्धम्[1] । उपधादीर्घत्वमनिपात्यम् । आङ्पूर्वस्य प्रयोगः । यद्येवमवग्रहः प्राप्नोति । न लक्षणेन पदकारा अनुवर्त्याः । पदकारैर्नाम लक्षणमनुवर्त्यम् । यथालक्षणं पदं कर्तव्यम् ॥

रिक्ते विभाषा ॥ ६ । १ । २०८ ॥**

विभाषा वेण्विन्धानयोः ॥ ६ । १ । २१५ ॥

किमियं प्राप्ते विभाषाहोस्विदप्राप्ते । कथं च प्राप्ते कथं वाप्राप्ते । यदि संज्ञायामुपमानं निष्ठा च द्व्यजनात् [६. १. २०४; २०५] इति नित्ये प्राप्त आरम्भस्ततः प्राप्ते ऽन्यत्र वाप्राप्ते ।

---

* [V. M. om. शुष्कधृष्टौ (२०६)].

** [V. M. om. जुष्टार्पिते च च्छन्दसि (२०९) ; नित्यं मन्त्रे (२१०); युष्मदस्मदोर्ङसि (२११); ङयि च. (२१२); यतोऽनावः (२१३) ; ईडवन्दवृशंसदुहां ण्यतः (२१४)].

[1] ञ्नित्यादिर्नित्यम् ६. १. १९७.

वेणुरिक्तयोरप्राप्ते ॥ १ ॥

वेणुरिक्तयोरप्राप्ते विभाषा प्राप्ते नित्यो विधिः । वेणुरिव वेणु॑ः । रिक्तो॑ नाम कश्चित् ॥*

उपोत्तमं रिति ॥ ६ । १ । २१७ ॥

उपोत्तमग्रहणं किमर्थं न रिति पूर्वमित्येवोच्येत । तत्रायमप्यर्थो मतोः पूर्वमात्संज्ञायां स्त्रियाम् [२१९] इत्यत्र पूर्वग्रहणं न कर्तव्यं भवति ॥ एवं तर्ह्युपोत्तमग्रहणमुत्तरार्थम् । चङ्यन्यतरस्याम् [२१८] उपोत्तममित्येव । इह मा भूत् । मा हि स्म द॒धत्[1] ॥**

अन्तोऽवत्याः ॥ ६ । १ । २२० ॥

ईवत्याः ॥ ६ । १ । २२१ ॥

किमर्थमिदमुच्यते न वत्या इत्येवोच्येत । वत्या इतीयत्युच्यमाने राजवती अत्रापि प्रसज्येत । अथावत्या इत्युच्यमाने कस्मादेवात्र न भवति । असिद्धो नलोपस्तस्यासिद्धत्वान्नैषोऽवतीशब्दः । कस्तर्हि । अन्वतीशब्दः[2] ॥ यथैव तर्हि नलोपस्यासिद्धत्वान्नावतीशब्द एवं वत्वस्याप्यसिद्धत्वान्नावतीशब्दः[3] । आश्रयात्सिद्धत्वं स्यात् ॥

चौ ॥ ६ । १ । २२२ ॥

चोरतद्धिते ॥ १ ॥

चुस्वरोऽतद्धित इति वक्तव्यम् । इह मा भूत् । दा॒धी॒चः मा॒धू॒च इति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । प्रत्ययस्वरोऽत्र बाधको भविष्यति[4] ॥ स्थानान्तरप्राप्तश्चुस्वरः । प्रत्ययस्वरस्यापवादोऽनुदात्तौ सुप्पितौ [३. १. ४] इति । अनुदात्तौ सुप्पितावित्यस्योदात्तनिवृत्तिस्वरः[5] । उदात्तनिवृत्तिस्वरस्य चुस्वरः । स यथैवो-

---

* [V. M. om. त्यागरागहासकुहश्वठक्रथानाम् (२१६)].

** [V. M. om. चङ्यन्यतरस्याम् (२१८) ; मतोः पूर्वमात् संज्ञायां स्त्रियाम् (२१९)].

[1] विभाषा धेट्श्व्योः ; आद्युदात्तश्च ३. १. ४९ ; ३. १. ३. [2] नलोपः प्रातिपदिकान्तस्य ; नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ८. २. ७ ; ८. २. २. [3] मादुपधायाश्च मतोर्वोऽयवादिभ्यः ८. २. ९. [4] आद्युदात्तश्च ३. १. ३. [5] अनुदात्तस्य च यत्रोदात्तलोपः ६. १. १६२.

दात्तनिवृत्तिस्वरं बाधत एवं प्रत्ययस्वरमपि बाधेत ॥ नात्रोदात्तनिवृत्तिस्वरः प्राप्नोति। किं कारणम्। न गोश्वन्साववर्ण [६. १. १८२] इति प्रतिषेधात्। नैष उदात्तनिवृत्तिस्वरस्य प्रतिषेधः। कस्य तर्हि। तृतीयादिस्वरस्य[1] ॥ यत्र तर्हि तृतीयादिस्वरो नास्ति। दधीचः पश्येति ॥ एवं तर्हि न तृतीयादिलक्षणस्य प्रतिषेधं शिष्मः। किं तर्हि। येन केनचिल्लक्षणेन प्राप्तस्य विभक्तिस्वरस्य प्रतिषेधम्। यदि विभक्तिस्वरस्य प्रतिषेधो वृक्षवान् प्लक्षवान् अत्र न प्राप्नोति। मतुब्ग्रहणमपि प्रकृतमनुवर्तते। क्व प्रकृतम्। ह्रस्वनुड्भ्यां मतुप् [१७६] इति। यदि तदनुवर्तते वेतस्वानित्यत्र[2] प्राप्नोति। मतुब्ग्रहणमनुवर्तते ड्मतुप् चैषः। यदि तर्हि मतुब्ग्रहणे ड्मतुपो ग्रहणं न भवति वेतस्वानित्यत्र वत्वं[3] न प्राप्नोति। सामान्यग्रहणं वत्वं इह पुनर्विशिष्टस्य ग्रहणम् ॥ यत्र तर्हि विभक्तिर्नास्ति। दधीचीति ॥ यदि पुनरयमुदात्तनिवृत्तिस्वरस्यापि प्रतिषेधो विज्ञायेत[4]। नैवं शक्यम्। इहापि प्रसज्यते। कुमारीति ॥ सति शिष्टः खल्वपि चुस्वरः। कथम्। चाविन्युच्यते। यत्रास्यैतद्रूपम्। अजादावसर्वनामस्थानेऽभिनिर्वृत्ते ऽकारलोपे नकारलोपे च[5] ॥ तस्मात्सुष्ठूच्यते चोरताद्धित इति ॥

समासस्य ॥ ६ । १ । २२३ ॥

समासान्तोदात्तत्वे व्यञ्जनान्तेषूपसंख्यानम् ॥ १ ॥

समासान्तोदात्तत्वे व्यञ्जनान्तेषूपसंख्यानं कर्तव्यम्। राजदृषत् ब्राह्मणसमित् ॥

हल्स्वरप्राप्तौ वा व्यञ्जनमविद्यमानवत् ॥ २ ॥

अथवा हल्स्वरप्राप्तौ व्यञ्जनमविद्यामानवद्भवतीत्येषा परिभाषा कर्तव्या ॥ किमर्थमिदमुभयमुच्यते न हल्स्वरप्राप्तावविद्यमानवदित्येवोच्येत स्वरप्राप्तौ व्यञ्जनमविद्यमानवदिति वा। द्विर्बद्धं सुबद्धं भवतीति ॥ यदि हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवद्भवतीत्युच्यते दृषिं उदात्तादनुदात्तस्य स्वरितः [८. ४. ६६] इति स्वरितत्वं न प्राप्नोति। उदात्ताच्च स्वरितविधौ व्यञ्जनमविद्यमानवद्भवतीत्येषा परिभाषा कर्तव्या ॥

कान्येतस्याः परिभाषायाः प्रयोजनानि।

---

[1] सावेकाचस्तृतीयादिर्विभक्तिः ६. १. १६८.

[2] कुमुदनडवेतसेभ्यो ड्मतुप्; टेः; ४. २. ८७; ६. ४. १४३; ६. १. ६१.

[3] मादुपधायाश्च मतोर्वोऽयवादिभ्यः ८. २. ९.

[4] न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः, अनुदात्तस्य च यत्रोदात्तलोपः ६. १. १८२; १६१.

[5] अचः; अनिदितां हल उपधायाः क्ङिति ६. ४. १३८; ६. ४. २४,

प्रयोजनं लिदाद्युदात्तान्तोदात्तविधयः ॥ ३ ॥

लिति[1] प्रत्ययात्पूर्वमुदात्तं भवतीतीहैव स्यात् भौरिकिविधम् भौलिकिविधम्[2] । चिकीर्षकः जिहीर्षक इत्यत्र[3] न स्यात् ॥ ञ्नित्यादिर्नित्यम् [६. १. १९७] इतीहैव स्यात् आहिंचुम्बकायनिः आग्निवेश्यः[4] । गार्ग्यः कृतिरित्यत्र[5] न स्यात् ॥ धातोरन्त उदात्तो[6] भवतीतीहैव स्यात् ऊर्णोति पचतीत्यत्र न स्यात् ॥

इदं तावदयुक्तं यदुच्यते हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवद्भवतीति । कथं हि हलो नाम स्वरप्राप्तिः स्यात् । तच्चापि ब्रुवतोदात्ताच्च स्वरितविधाविति वक्तव्यम् । तथानुदात्तादेरन्तोदात्ताच्च यदुच्यते तद्व्यञ्जनादेर्व्यञ्जनान्ताच्च न प्राप्नोति ॥ यदि पुनः स्वरविधौ व्यञ्जनमविद्यमानवद्भवतीत्युच्येत । अथ स्वरविधौ व्यञ्जनमविद्यमानवद्भवतीत्युच्यमाने ऽनुदात्तादेरन्तोदात्ताच्च यदुच्यते तत्किं सिद्धं भवति व्यञ्जनादेर्व्यञ्जनान्ताच्च । बाढं सिद्धम् । कथम् । स्वरविधिरिति सर्वविभक्तयन्तः समासः । स्वरेण विधिः स्वरविधिः स्वरस्य विधिः स्वरविधिरिति । नैवं शक्यम् । इह हि दोषः स्यात् । उदश्वित्वान् घोषः विद्युत्वान् बलाहक इति ह्रस्वनुड्भ्यां मतुप् [६. १ १७६] इत्येष स्वरः प्रसज्येत ॥

अस्तु तर्हि हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवद्भवतीति । ननु चोक्तं कथं हि हलो नाम स्वरप्राप्तिः स्यादिति । उच्चैरुदात्तः [१. २. २९] इत्यत्र षष्ठीनिर्दिष्टमज्ग्रहणं[7] निवृत्तं तस्मिन्निवृत्ते हलोऽपि स्वरप्राप्तिर्भवति ॥ यदप्युच्यत उदात्ताच्च स्वरितविधाविति वक्तव्यमिति न वक्तव्यम् । नेदं पारिभाषिकस्यानुदात्तस्य ग्रहणम् । किं तर्हि । अन्वर्थग्रहणम् । अविद्यमानोदात्तमनुदात्तं तस्य स्वरित इति ॥ यदप्युच्यते ऽनुदात्तादेरन्तोदात्ताच्च यदुच्यते तद्व्यञ्जनादेर्व्यञ्जनान्ताच्च न प्राप्नोतीत्याचार्यप्रवृत्तिर्ज्ञापयति सिद्धं तद्भवति व्यञ्जनादेर्व्यञ्जनान्ताच्चेति यदयं नोत्तरपदेऽनुदात्तादावित्युक्त्वा पृथिवीरुद्रपूषमन्थिष्विति प्रतिषेधं शास्ति[8] ॥ सा तर्ह्येषा परिभाषा कर्तव्या । न कर्तव्या । आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति यदयं यतोऽनावः [६. १. २१३] इति नावः प्रतिषेधं शास्ति ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य प्रथमे पादे षष्ठमाह्निकम् ॥ पादश्च समाप्तः ॥

---

[1] लिति ६. १. १९३.

[2] भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ ४. २. ५४

[3] ण्वुल्तृचौ ३. १. १३३.

[4] प्राचामवृद्धात् फिन् बहुलम् ; गर्गादिभ्यो यञ् ४. १. १६० ; १०५.

[5] गर्गादिभ्यो यञ्, स्त्रियां क्तिन् ४. १. १०५ ; ३. ३. ९४.

[6] धातोः ६. १. १६२.

[7] अचश्च १, २ २८.

[8] नोत्तरपदेनुदात्तादावपृथिवीरुद्रपूषमन्थिषु ६. २. १४०.

बहुव्रीहौ प्रकृत्या पूर्वपदम् ॥ ६ । २ । १ ॥

किमर्थमिदमुच्यते ।

बहुव्रीहिस्वरं शास्ति समासान्तविधेः सुकृत् ।

सुकृदाचार्यः समासान्तोदात्तत्वे[1] प्राप्ते बहुव्रीहिस्वरमपवादं शास्ति ॥ नैतदस्ति प्रयोजनम् ।

नञ्सुभ्यां नियमार्थं तु

नञ्सुभ्याम् [६. २. १७२] इत्येतन्नियमार्थं भविष्यति । नञ्सुभ्यामेव बहुव्रीहेरन्त उदात्तो भवति नान्यस्येति ॥ एवमपि कुत एतत्पूर्वपदप्रकृतिस्वरत्वं भविष्यति न पुनः परस्येति ।

परस्य शितिशासनात् ॥ १ ॥

शितेर्नित्याबह्वच् [१३८] इत्येतन्नियमार्थं भविष्यति । शितेरेव नान्यत इति ॥ यत्तावदुच्यते नञ्सुभ्यां नियमार्थमिति

क्षेपे विधिर्नञोऽसिद्धः

उदराश्वेषुषु क्षेपे [१०७-१०८] इत्येतस्मिन्प्राप्ते तत एतदुच्यते ॥ यदप्युच्यते परस्य शितिशासनादिति

परस्य नियमो भवेत् ।

परस्यैष नियमः स्यात् । शितेर्नित्याबह्वजेव नान्यदिति ॥

यदि पूर्वपदप्रकृतिस्वरत्वं समासान्तोदात्तत्वं बाधते च॒प्रि॒यः वा॒प्रि॒यः अत्रापि बाधेत ।

अन्तश्च वाप्रिये सिद्धः

अन्तोदात्तत्वं च वाप्रिये सिद्धम् । कुतः ।

संभवात्

असति खल्वपि संभवे बाधनं भवत्यस्ति च संभवो यदुभयं स्यात् ॥ सत्यपि संभवे बाधनं भवति । तद्यथा । दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति सत्यपि

---

[1] समासस्य ६. १. २२३.

संभवे दधिदानस्य तक्रदानं निवर्तकं भवति । एवमिहापि सत्यपि संभवे पूर्वपदप्रकृतिस्वरत्वं समासान्तोदात्तत्वं बाधिष्येत ।। एवं तर्हि

प्रकृताद्विधेः ॥ २ ॥

बहुव्रीहौ प्रकृत्या पूर्वपदं प्रकृतिस्वरं भवतीति । किं च प्रकृतम् । उदात्त इति च वर्तते[1] ।। एवमपि कार्यप्रियः हार्यप्रियः अत्र न प्राप्नोति । स्वरितेऽप्युदात्तोऽस्ति[2] । अथवा स्वरितग्रहणमपि प्रकृतमनुवर्तते । क प्रकृतम् । तित्स्वरितम् (६. १. १८५) इति[3] ।।

बहुव्रीहावृते सिद्धम् ।

अन्तरेण बहुव्रीहिग्रहणं सिद्धम् । तत्पुरुषे कस्मान्न भवति । तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः (६. २. २) इत्येतन्नियमार्थं भविष्यति । द्विगौ तर्हि कस्मान्न भवति । इगन्ते द्विगावित्येतन्नियमार्थं भविष्यति[4] । द्वन्द्वे तर्हि प्राप्नोति । राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु (३४) इत्येतन्नियमार्थं भविष्यति । अव्ययीभावे तर्हि प्राप्नोति । परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु (३३) इत्येतन्नियमार्थं भविष्यति ।। एवमपि कुत एतदेवं नियमो भविष्यत्येतेषामेव तत्पुरुषादिष्विति न पुनरेवं नियमः स्यादेतेषां तत्पुरुषादिष्वेवेति ।

इष्टतश्चावधारणम् ।

इष्टतश्चावधारणं भविष्यति ।। एतेषां तर्हि बहुव्रीहेश्च पर्यायः प्राप्नोति ।

द्विपाद्दिष्टेर्वितस्तेश्च पर्यायो न प्रकल्पते ॥ ३ ॥

यदयं द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ (१९७) दिष्टिवितस्त्योश्च (३१) इति सिद्धे पर्याये पर्यायं शास्ति तज्ज्ञापयत्याचार्यो न पर्यायो भवतीति ।।

उदात्ते ज्ञापकं त्वेतत्

उदात्त एतज्ज्ञापकं स्यात् ।

स्वरितेन समाविशेत् ।।

स्वरितेन समावेशः प्राप्नोति ।। स्वरितेऽप्युदात्तोऽस्ति ।।

बहुव्रीहिस्वरं शास्ति समासान्तविधेः सुकृत् ।
नञ्सुभ्यां नियमार्थं तु परस्य शितिशासनात् ॥ १ ॥
क्षेपे विधिर्नञोऽसिद्धः परस्य नियमो भवेत् ।
अन्तश्चवाप्रिये सिद्धः संभवात्प्रकृताद्विधेः ॥ २ ॥

---

[1] कर्षात्वतो घञोन्त उदात्तः ६. १. १५९.

[2] तस्यादित उदात्तमर्धह्रस्वम् १. २. ३२.

[3] ऋहलोर्ण्यत् ३. १. १२४.

[4] इगन्तकालकपालभगालशरावेषु द्विगौ ६. २. २९.

बहुव्रीहावृते सिद्धमिष्टतश्चावधारणम् ।
द्विपाद्दिष्टेर्वितस्तेश्च पर्यायो न प्रकल्पते ॥ ३ ॥
उदात्ते ज्ञापकं त्वेतत् स्वरितेन समाविशेत् ॥

तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः ॥ ६ । २ । २ ॥

तत्पुरुषे विभक्तिप्रकृतिस्वरत्वे कर्मधारये प्रतिषेधः ॥ १ ॥

तत्पुरुषे विभक्तिप्रकृतिस्वरत्वे कर्मधारये प्रतिषेधो वक्तव्यः । परमं कारकं परमकारकम् । परमेण कारकेण परमकारकेण । परमे कारके परमकारके ॥

सिद्धं तु लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणात् ॥ २ ॥

सिद्धमेतत् । कथम् । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति प्रतिपदं यो द्वितीयातृतीयासप्तमीसमासस्तस्य[1] ग्रहणं लक्षणोक्तश्चायम्[2] ॥

अव्यये परिगणनं कर्तव्यम् ।

अव्यये नञ्कुनिपातानाम् ॥ ३ ॥

अव्यये नञ्कुनिपातानामिति वक्तव्यम् । नञ् । अब्राह्मणः अवृषलः । नञ् । कु । कुब्राह्मणः कुवृषलः । कु । निपात । निष्कौशाम्बिः निर्वाराणसिः । क्त मा भूत् । स्नात्वाकालकः पीत्वास्थिरकः[3] ॥

क्त्वायां वा प्रतिषेधः ॥ ४ ॥

क्त्वायां वा प्रतिषेधो वक्तव्यः । स्नात्वाकालकः पीत्वास्थिरकः ॥ उभयं न वक्तव्यम् ।

निपातनात्सिद्धम् ॥ ५ ॥

निपातनादेतत् सिद्धम् । किं निपातनम् । अवश्यमत्र समासार्थं ल्यबभावार्थं च निपातनं कर्तव्यं[4] तेनैव यत्नेन स्वरो भविष्यति ॥*

सदृशप्रतिरूपयोः सादृश्ये ॥ ६ । २ । ११ ॥

सदृशग्रहणमनर्थकं तृतीयासमासवचनात् ॥ १ ॥

सदृशग्रहणमनर्थकम् । किं कारणम् । तृतीयासमासवचनात् । सदृशशब्देन

---

* [V. M. om. वर्णो वर्णेष्वनेते (३); गाधलवणयोः प्रमाणे (४); दायाद्यं दायादे (५); प्रतिबन्धि चिरकृच्छ्रयोः (६) पदेऽपदेशे (७); निवाते वातत्राणे (८); शारदेऽनार्तवे (९); अध्वर्युकषाययोर्जातौ (१०)].

[1] द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः ; तृतीया तत्कृतार्थेन गुणवचनेन; सप्तमी शौण्डैः २. १. २४ ; ३०. ४०.

[2] विशेषणं विशेष्येण बहुलम् ६. १. ५७.

[3] क्त्वातोसुन्कसुनः १. १. ४०.

[4] गणपाठ ४५, ४६. (२. १. ७२).

तृतीयासमास उच्यते तत्र तृतीयापूर्वपदं प्रकृतिस्वरं भवतीत्येव सिद्धम्[1] ॥ षष्ठ्यर्थं तर्हीदं वक्तव्यम् । पितुः सदृशः पि॒तृस॑दृश इति ।

षष्ठ्यर्थमिति चेत्तृतीयासमासवचनानर्थक्यम् ॥ २ ॥

षष्ठ्यर्थमिति चेत्तृतीयासमासवचनमनर्थकं स्यात् । किं कारणम् । इहास्माभिस्त्रैशब्द्यं साध्यम् । पित्रा सदृशः पितुः सदृशः पितृसदृश इति । तत्र द्वयोः शब्दयोः समानार्थयोरेकेन विग्रहोऽपरेण समासो भविष्यत्यविरविकन्यायेन । तद्यथा । अवेर्मांसमिति विगृह्य आविकशब्दादुत्पत्तिर्भवति आविकमिति । एवं पितुः सदृश इति विगृह्य पितृसदृश इति भविष्यति पित्रा सदृश इति विगृह्य वाक्यमेव ॥ अवश्यं तृतीयासमासो वक्तव्यो यत्र षष्ठ्यर्थो नास्ति तदर्थम् । भोजनसदृशः अध्ययनसदृश इति[2] ॥ यदि तर्हि तस्य निबन्धनमस्ति तदेव वक्तव्यमिदं न वक्तव्यम् । इदमप्यवश्यं वक्तव्यं यत्र षष्ठी श्रूयते तदर्थम् । दा॒स्याःस॑दृशः वृ॒षल्याः॒स॑दृश इति[3] ॥*

इगन्तकालकपालभगालशरावेषु द्विगौ ॥ ६ । २ । २९ ॥

इगन्तप्रकृतिस्वरत्वे यण्गुणयोरुपसंख्यानम् ॥ १ ॥

इगन्तप्रकृतिस्वरत्वे यण्गुणयोरुपसंख्यानं कर्तव्यम् । पञ्चा॑रत्न्यः दशा॑रत्न्यः । पञ्चा॑रत्नयः दशा॑रत्नयः । यण्गुणयोः[4] कृतयोरिगन्ते द्विगावित्येष स्वरो न प्राप्नोति ॥

न वा बाहिरङ्गलक्षणत्वात् ॥ २ ॥

न वा वक्तव्यम् । किं कारणम् । बहिरङ्गलक्षणत्वात् । बहिरङ्गौ यण्गुणौ । अन्तरङ्गः स्वरः । असिद्धं बहिरङ्गमन्तरङ्गे ॥**

परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु ॥ ६ । २ । ३३ ॥

परिपत्युपापेभ्यो वनं समासे विप्रतिषेधेन ॥ १ ॥

परिप्रत्युपापेभ्यो वनं समासे [६. २. १७८] इत्येतद्भवति विप्रतिषेधेन । परि-

---

* [V. M. om. द्विगौ प्रमाणे (१२); गन्तव्यपण्यं वाणिजे (१३); मात्रोपज्ञोपक्रमच्छाये नपुंसके (१४); सुखप्रिययोर्हिते (१५); प्रीतौ च (१६); स्वं स्वामिनि (१७); पत्यावैश्वर्ये (१८); न भूवाक्चिद्दिधिषु (१९); वा भुवनम् (२०); आशङ्काबाधनेदीयस्सु संभावने (२१); पूर्वे भूतपूर्वे (२२); सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये (२३); विस्पष्टादीनि गुणवचनेषु (२४); श्रज्यावमकन्पापवत्सु भावे कर्मधारये (२५); कुमारश्च (२६); आदिः प्रत्येनसि (२७); पूगेष्वन्यतरस्याम् (२८)]

** [V. M. om. बह्वन्यतरस्याम् (३०); दिष्टिवितस्त्योश्च (३१); सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात् (३२)].

[1] पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः; तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः २. १. ३१; ६. २. २०. [2] हेतौ २. ३. २३. [3] षष्ठ्या आक्रोशे ६. ३. २१. [4] अम्बे दर्वि शतक्रत्वः पश्वे नृभ्यः किकिदीव्या ७. ३. १०९ वा. २; जसि च ७. ३. १०९.

प्रत्युपापा वर्ज्यमानाहोरात्रावयवेष्वित्यस्यावकाशः । परित्रिगर्तम् परिसौवीरम् । वनं समास इत्यस्यावकाशः प्रवणे यष्टव्यम् । इहोभयं प्राप्नोति । परिवनम् अपवनम्[1] । वनं समास इत्येतद्भवति विप्रतिषेधेन ॥

न वा वनस्यान्तोदात्तवचनं तदपवादनिवृत्त्यर्थम् ॥ २ ॥

न वार्थो विप्रतिषेधेन । किं कारणम् । वनस्यान्तोदात्तवचनं तदपवादनिवृत्त्यर्थम् । सिद्धमत्रान्तोदात्तत्वमुत्सर्गेणैव[2] । तस्य पुनर्वचन एतत्प्रयोजनं ये ऽन्ये तदपवादाः प्राप्नुवन्ति तद्बाधनार्थम् । स यथैव तदपवादमव्ययस्वरं[3] बाधत एवमिदमपि बाधिष्यते ॥*

आचार्योपसर्जनश्चान्तेवासी ॥ ६ । २ । ३६ ॥

आचार्योपसर्जनेऽनेकस्यापि पूर्वपदत्वात्संदेहः ॥ १ ॥

आचार्योपसर्जनेऽनेकस्यापि पूर्वपदत्वात्संदेहो भवति । आपिशलपाणिनीयव्याडीयगौतमीयाः । एकं पदं वर्जयित्वा सर्वाणि पूर्वपदानि तत्र न ज्ञायते कस्य पूर्वपदस्य प्रकृतिस्वरत्वेन भवितव्यमिति ॥

लोकविज्ञानात्सिद्धम् ॥ २ ॥

तद्यथा । लोकेऽमीषां ब्राह्मणानां पूर्वमानयेति यः सर्वपूर्वः स आनीयते । एवमिहापि यत्सर्वपूर्वपदं तस्य प्रकृतिस्वरत्वं भविष्यति ॥ **

महान्व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु

॥ ६ । २ । ३८ ॥

किमर्थं महतः प्रवृद्धशब्द उत्तरपदे पूर्वपदप्रकृतिस्वरत्वमुच्यते न कर्मधारयेऽनिष्ठा [६. २. ४६] इत्येव सिद्धम् । न सिध्यति । किं कारणम् । श्रेण्यादिसमास इत्येवं तत्र[4] । इह मा भूत् । महानिरष्टो[5] दक्षिणा दीयते ॥ ***

---

* [V. M. om. राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु (३४); संख्या (३५)].

** [V. M. om. कार्तकौजपादयश्च (३७)].

*** [V. M. om. क्षुल्लकश्च वैश्वदेवे (३९); उष्ट्रः सादिवाम्योः (४०); गौः सादसादिसारथिषु (४१)].

[1] अपपरिबहिरञ्चवः पञ्चम्या २. १. १२. [2] समासस्य ६. १. २२३. [3] तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः ६. २. २. [4] श्रेण्यादयः कृतादिभिः २. १. ५९. [5] Cf. महानिरष्टो दक्षिणा समृद्ध्यै । तै. ब्रा. १।७।३।४.

कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपा पारेवडवा तैतिलकद्रूः पण्यकम्बलो दासीभाराणां च ॥ ६ । २ । ४२ ॥

कुरुवृज्योर्गार्हपते ॥ १ ॥

कुरुवृज्योर्गार्हपत इति वक्तव्यम् । कुरुगार्हपतम् वृजिगार्हपतम् ।

कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूःपण्यकम्बलोदासीभारादीनामिति वक्तव्यम् । इहापि यथा स्यात् । देवहूतिः देवनीतिः वसुनीतिः ओषधिः चन्द्रमाः ॥ तत्तर्हि मक्तव्यम् । न वक्तव्यम् । योगविभागः करिष्यते । कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपा पारेवडवा तैतिलकद्रूः पण्यकम्बल इति । ततो दासीभाराणां चेति । तत्र बहुवचननिर्देशाद्दासीभारादीनामिति विज्ञास्यते ॥

पण्यकम्बलः संज्ञायाम् ॥ २ ॥

पण्यकम्बलः संज्ञायामिति वक्तव्यम् । यो हि पणितव्यः कम्बलः पण्यकम्बलं एवासौ भवति ॥

अपर आह । पण्यकम्बल एव यथा स्यात् । क मा भूत् । पण्यगवः पण्यहस्ती ॥*

अहीने द्वितीया ॥ ६ । २ । ४७ ॥

अहीन इति किमर्थम् । कान्तारातीतः योजनातीतः ॥

अहीने द्वितीयानुपसर्गे ॥ १ ॥

अहीने द्वितीयानुपसर्ग इति वक्तव्यम् । इह मा भूत् । सुखप्राप्तः दुःखप्राप्तः ॥ तत्तर्हि वक्तव्यम् । यद्यप्येतदुच्यते ऽथवैतर्ह्यहीनग्रहणं न करिष्यते । इहापि कान्तारातीतः योजनातीत इत्यनुपसर्ग इत्येव सिद्धम् ॥**

गतिरनन्तरः ॥ ६ । २ । ४९ ॥

अनन्तर इति किमर्थम् । इह मा भूत् । अभ्युद्धृतम् उपसमाहृतम् ।

---

* [V. M. om. चतुर्थी तदर्थे (४३); अर्थे (४४); क्ते च (४५); कर्मधारयेऽनिष्ठा (४६)].

** [V. M. om. तृतीया कर्मणि (४८)].

१ समासस्य ६. १. २२३. २ तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः

३ थाथघञ्क्ताजबित्रकाणाम् ६. २. १४४.

गतेरनन्तरग्रहणमनर्थकं गतिर्गतावनुदात्तवचनात् ॥ १ ॥

गतेरनन्तरग्रहणमनर्थकम् । किं कारणम् । गतिर्गतावनुदात्तवचनात् । गतौ परतो गतेरनुदात्तत्वमुच्यते[1] तद्बाधकं भविष्यति ॥

तत्र यस्याप्रकृतिस्वरत्वं तस्मादन्तोदात्तप्रसङ्गः ॥ २ ॥

तत्र यस्य गतेरप्रकृतिस्वरत्वं तस्मादन्तोदात्तत्वं प्राप्नोति । अन्तस्थाथघञ्क्ताजवित्रकाणाम् (६. २. १४३, १४४) इति ॥

प्रकृतिस्वरवचनाद्व्यनन्तोदात्तत्वम् ॥ ३ ॥

प्रकृतिस्वरवचनसामर्थ्याद्व्यन्तोदात्तत्वं न भविष्यति । यदि स्यात् प्रकृतिस्वरवचनमिदानीं किमर्थं स्यात् ॥

प्रकृतिस्वरवचनं किमर्थमिति चेदेकगत्यर्थम् ॥ ४ ॥

प्रकृतिस्वरवचनं किमर्थमिति चेदेकगत्यर्थम् । यत्रैको गतिस्तदर्थमेतत्स्यात् । प्रकृतम् प्रहृतम् ।। एवमर्थमेत्र तर्ह्यनन्तरग्रहणं कर्तव्यमत्र यथा स्यात् ॥

क्रियमाणेऽपि वा अनन्तरग्रहणेऽत्र न सिध्यति । किं कारणम् । गतिरनन्तरः पूर्वपदं प्रकृतिस्वरं भवतीत्युच्यते यश्चात्र गतिरनन्तरो नासौ पूर्वपदं यश्च पूर्वपदं नासावनन्तरः ॥ अपूर्वपदार्थं तर्हीदं वक्तव्यम् । अपूर्वपदस्यापि गतेः प्रकृतिस्वरत्वं यथा स्यात् ॥

अपूर्वपदार्थमिति चेत्कारकेऽतिप्रसङ्गः ॥ ५ ॥

अपूर्वपदार्थमिति चेत्कारकेऽतिप्रसङ्गो भवति । आगतः दूरादागतः स यथैव गतिपूर्वपदस्य भवत्येवं कारकपूर्वपदस्यापि प्राप्नोति ॥

सिद्धं तु गतेरन्तोदात्ताप्रसङ्गात् ॥ ६ ॥

सिद्धमेतत् । कथम् । यत्तदन्तस्थाथघञ्क्ताजबित्रकाणामिति तद्गतेर्न प्रसङ्क्तव्यम् । किं कृतं भवति । कृत्स्वरापवादो[3] ऽयं भवति । तत्र गतिरनन्तर इत्यस्यावकाशः । प्रकृतम् प्रहृतम् । अन्तस्थाथघञ्क्ताजवित्रकाणामित्यस्यावकाशः । दूराद्गतः दूराद्यातः । इहोभयं प्राप्नोति । आगतः दूरादागतः । अन्तस्थाथघञ्क्ताजबित्रकाणामित्येतद्भवति विप्रतिषेधेन ॥ अवश्यं गतेस्तत्प्रसङ्क्तव्यं भेदः प्रभेद इत्येवमर्थम् ॥

---

१ गतिर्गतौ ८. १. ७०. २ स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन ; पञ्चम्याः स्तोकादिभ्यः ; थाथघञ्क्ताजवित्रकाणाम् २. १. ३९; ६. ३. २; (६. २. १४४). ३ गतिकारकोपपदात् कृत् ; गतिरनन्तरः ; थाथघञ्क्ताजबित्रकाणाम् ६. २. १३९; ४९; १४४.

एवं तर्हि योगविभागः करिष्यते[1] । अन्तस्थाथघञजबित्रकाणाम् । ततः क्तः क्तान्तमुत्तरपदमन्तोदात्तं भवति । अत्र कारकोपपदग्रहणमनुवर्तते गतिग्रहणं[2] निवृत्तम् ॥ अथवोपरिष्टाद्योगविभागः करिष्यते[3] । इदमस्ति सूपमानात् क्तः संज्ञायामनाचितादीनां प्रवृद्धादीनां च [६. २. १४५-१४७] इति । ततो वक्ष्यामि कारकात् । कारकाच्च क्तान्तमुत्तरपदमन्तोदात्तं भवति । ततो दत्तश्रुतयोरेवाशिषि कारकादिति ॥ एवं च कृत्वा नार्थोऽनन्तरग्रहणेन ॥ कथमभ्युद्धृतम् । उद् हरतिक्रियां विशिनष्टि । उदा विशिष्टामभिर्विशिनष्टि । तत्र गतिरनन्तर इति च प्राप्नोति गतिर्गतौ [८. १. ७०] इति च । गतिरनन्तर इत्यस्यावकाशः । प्रकृतम् प्रहृतम् । गतिर्गताविव्यस्यावकाशः अभ्युद्धरति उपसमादधाति । इहोभयं प्राप्नोति । अभ्युद्धृतम् उपसमाहृतम् । गतिर्गताविव्येतद्भवति विप्रतिषेधेन ॥

एवं तर्हि सिद्धे सति यदनन्तरग्रहणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा कृद्ग्रहणे गतिकारकपूर्वस्यापीति । किमेतस्य ज्ञापने प्रयोजनम् । अवतप्तेनकुलस्थितं त एतत् । उदकेविशीर्णं त एतत् । सगतिकेन सनकुलेन समासः[4] सिद्धो भवति ॥

तादौ च निति कृत्यतौ ॥ ६ । २ । ५० ॥

कृद्ग्रहणं किमर्थम् । यथा तकारादिग्रहणं कृद्विशेषणं विज्ञायते । तकारादौ निति कृतीति । अथाक्रियमाणे कृद्ग्रहणे कस्य तकारादिग्रहणं विशेषणं स्यात् । उत्तरपदविशेषणम् । तत्र को दोषः । इहैव स्यात् । प्रतरिता प्रतरितुम् । इह न स्यात् । प्रकर्ता प्रकर्तुम् ॥

तादौ निति कृद्ग्रहणानर्थक्यम् ॥ १ ॥

तादौ निति कृद्ग्रहणमनर्थकम् । क्रियमाणेऽपि कृद्ग्रहणेऽनिष्टं शक्यं विज्ञातुम् । तकारादावुत्तरपद निति कृतीति । अक्रियमाणे चेष्टम् । नियस्तकारादिस्तदन्त उत्तरपद इति । यावता क्रियमाणेऽप्यनिष्टं विज्ञायते ऽक्रियमाणे चेष्टमक्रियमाण एवेष्टं विज्ञास्यामः ॥

कृदुपदेशे वा ताद्यर्थमिडर्थम् ॥ २ ॥

कृदुपदेशे तर्हि ताद्यर्थमिडर्थं कृद्ग्रहणं कर्तव्यम् । कृदुपदेशे यस्तकारादिरित्येवं

---

[1] थाथघञ्क्ताजवित्रकाणाम् ६. २. १४४. [2] गतिकारकोपपदात् कृत् ६. २. १३९.
[3] कारकाद्दत्तश्रुतयोरेवाशिषि ६. २. १४८. [4] क्षेपे गतिकारकपूर्वं उक्तम् २. १. ४७ वा. १.

यथा विज्ञायेत । किं प्रयोजनम् । इडर्थम् । इडादावपि सिद्धं भवति । प्रलंविता प्रलंवितुम् ॥*

अनिगन्तोऽञ्चतौ वप्रत्यये ॥ ६ । २ । ५२ ॥

अनिगन्तप्रकृतिस्वरत्वे यणादेशे प्रकृतिस्वरभावप्रसङ्गः ॥ १ ॥

अनिगन्तप्रकृतिस्वरत्वे यणादेशे प्रकृतिस्वरभावः प्राप्नोति । प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः ॥ अनिगन्तवचनमिदानीं किमर्थं स्यात् ।

अनिगन्तवचनं किमर्थमिति चेदयणादिष्टार्थम् ॥ २ ॥

अयणादिष्टार्थमेतत्स्यात् । यदा यणादेशो न । कदा च यणादेशो न । यदा शाकलम्[1] ॥

उक्तं वा ॥ ३ ॥

किमुक्तम् । समासे शाकलं न भवतीति[2] ॥ यत्र तर्ह्यञ्चतेरकारो लुप्यते । प्रतीचः प्रतीचा । चुस्वरस्तत्र बाधको भविष्यति[3] । अयमेवेष्यते । वक्ष्यति ह्येतच्चोरनिगन्तोऽञ्चतौ वप्रत्यय इति[4] ॥ यत्तर्हि न्यधोः प्रकृतिस्वरं शास्ति[5] । एष हि यणादिष्टार्थ आरम्भः । एतदप्ययणादिष्टार्थमेव स्यात् । यदा यणादेशो न । कदा च यणादेशो न । यदा शाकलम् । उक्तं वा । किमुक्तम् । समासे शाकलं न भवतीति । यत्र तर्ह्यञ्चतेरकारो लुप्यते । अधीचः अधीचा । चुस्वरस्तत्र बाधको भविष्यति । अयमेवेष्यते । वक्ष्यति ह्येतच्चोरनिगन्तोऽञ्चतौ वप्रत्यय इति ॥ यत्तर्हि नेरेव प्रकृतिस्वरं शास्ति । एष हि यणादिष्टार्थ आरम्भः । एतदप्ययणादिष्टार्थमेव स्यात् । कथम् । अकृते यणादेशे पूर्वपदप्रकृतिस्वरत्वे कृत उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य [८. २. ४] इत्येष स्वरः सिद्धो भवति । न्यङ् ॥ तस्मात्सुष्ठूच्यतेऽनिगन्तप्रकृतिस्वरत्वे यणादेशे प्रकृतिस्वरभावप्रसङ्ग इति ॥

चोरनिगन्तोऽञ्चतौ वप्रत्यये ॥ ४ ॥

चुस्वरादनिगन्तोऽञ्चतौ वप्रत्यय इत्येष स्वरो भवति विप्रतिषेधेन । चुस्वरस्यावकाशः[3] । दधीचः पश्य । दधीचा दधीचे । अनिगन्तोऽञ्चतौ वप्रत्यय इत्यस्यावकाशः ।

---

* [V. M. om. तवै चान्तश्च युगपत् (५१)].

[1] इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ६. १. १२७. [2] सिन्नित्यसमासयोः शाकलप्रतिषेधः ६. १. १२७ वा. १. [3] चौ. ६. १. २२२. [4] चोरनिगन्तोऽञ्चतौ वप्रत्यये ६. २. ५२ वा. ४. [5] न्यधी च ६. २. ५३.

पराङ् पराञ्चौ पराञ्चः । इहोभयं प्राप्नोति । अवाचा अवाचे । अनिगन्तोऽञ्चतौ वप्रत्यय इत्येतद्भवति विप्रतिषेधेन ॥

न वा चुस्वरस्य पूर्वपदप्रकृतिस्वरभाविनि प्रतिषेधादितरथा हि सर्वापवादः ॥ ५ ॥

न वैतद्विप्रतिषेधेनापि सिध्यति । कथं तर्हि सिध्यति । चुस्वरस्य पूर्वपदप्रकृतिस्वरभाविनि प्रतिषेधात् । चुस्वरः पूर्वपदप्रकृतिस्वरभाविनः प्रतिषेध्यः । इतरथा हि सर्वापवादश्चुस्वरः । अक्रियमाणे हि प्रतिषेधे सर्वापवादोऽयं चुस्वरः । कथम् । प्रत्ययस्वरस्यापवादोऽनुदात्तौ सुप्पितौ [३. १. ४.] इति । अनुदात्तौ सुप्पितावित्यस्योदात्तनिवृत्तिस्वरः[1] । उदात्तनिवृत्तिस्वरस्य चुस्वरः । स यथैवोदात्तनिवृत्तिस्वरं बाधत एवमनिगन्तस्वरमपि बाधेत ॥ यदि तावत्संख्यातः साम्यमयमपि चतुर्थः । समासान्तोदात्तत्वस्यापवादोऽव्ययस्वरः । अव्ययस्वरस्य कृत्स्वरः । कृत्स्वरस्यायम्[2] । उभयोश्चरितार्थयोर्युक्तो विप्रतिषेधः ॥ सति शिष्टस्तर्हि चुस्वरः । कथम् । चावित्युच्यते । यत्रास्यैतद्रूपम् । अजादावसर्वनामस्थानेऽभिनिर्वृत्तेऽकारलोपे नकारलोपे चौ[3] । तस्मात्सुष्ठूच्यते न वा चुस्वरस्य पूर्वपदप्रकृतिस्वरभाविनि प्रतिषेधादितरथा हि सर्वापवाद इति ॥

विभक्तीषत्स्वरात्कृत्स्वरः ॥ ६ ॥

विभक्तिस्वरादीषत्स्वराच्च कृत्स्वरो भवति विप्रतिषेधेन[4] । विभक्तिस्वरस्यावकाशः । अक्षशौण्डः स्त्रीशौण्डः । कृत्स्वरस्यावकाशः । इध्मप्रव्रश्चनः । इहोभयं प्राप्नोति । पूर्वाह्णेस्फोटकाः अपराह्णेस्फोटकाः । कृत्स्वरो भवति विप्रतिषेधेन ॥ ईषत्स्वरस्यावकाशः । ईषत्कडारः ईषत्पिङ्गलः । कृत्स्वरस्य स एव । इहोभयं प्राप्नोति । ईषद्भेदः । कृत्स्वरो भवति विप्रतिषेधेन ॥

चित्स्वराद्धारिस्वरः ॥ ७ ॥

चित्स्वराद्धारिस्वरो भवति विप्रतिषेधेन[5] । चित्स्वरस्यावकाशः । चलनः चोपनः । हारिस्वरस्यावकाशः । याज्ञिकाश्वः वैयाकरणहस्ती । इहोभयं प्राप्नोति । पितृगवः मातृगवः[6] । हारिस्वरो भवति विप्रतिषेधेन ॥

---

[1] अनुदात्तस्य च यत्रोदात्तलोपः ६. १. १६१. [2] समासस्य ६. १. २२३; तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः ६. २. २; गतिकारकोपपदात्कृत् ६. २. १३९; अनिगन्तोऽञ्चतौ वप्रत्यये ६. २. ५२. [3] अचः ६. ४. १३८; अनिदितां हल उपधायाः क्ङिति ६. ४. २४. [4] तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः ६. २. २; ईषदन्यतरस्याम् ६. २. ५४; गतिकारकोपपदात् कृत् ६. २. १३९. [5] चितः ६. १. १६३; सप्तमीहारिणौ धर्म्मेऽहरणे ६. २. ६५. [6] गोरतद्धितलुकि ५. ४. ९२.

कृत्स्वराच्च ॥ ८ ॥

कृत्स्वराच्च हारिस्वरो भवति विप्रतिषेधेन[1]। कृत्स्वरस्यावकाशः । इध्मप्रव्रश्चनः । हारिस्वरस्य स एव । इहोभयं प्राप्नोति । अश्वहृतः वार्डवहार्यः । हारिस्वरो भवति विप्रतिषेधेन ॥

न वा हरणप्रतिषेधो ज्ञापकः कृत्स्वराबाधकत्वस्य ॥ ९ ॥

न वार्थो विप्रतिषेधेन । किं कारणम् । हरणप्रतिषेधो ज्ञापकः कृत्स्वराबाधकत्वस्य । यदयमहरण इति प्रतिषेधं शास्ति[2] तज्ज्ञापयत्याचार्यो न कृत्स्वरो हारिस्वरं बाधत इति ॥ नैतदस्ति ज्ञापकम् । अनो भावकर्मवचनः [६. २. १५०] इत्येतस्मिन्प्राप्ते तत एतदुच्यते ॥ यद्येवं साधीयो ज्ञापकम् । कृत्स्वरस्यापवादोऽनो भावकर्मवचन इति । बाधकं किलायं बाधते किं पुनस्तम् ॥

युक्तस्वरश्च ॥ १० ॥

युक्तस्वरश्च कृत्स्वराद्भवति विप्रतिषेधेन[3] । युक्तस्वरस्यावकाशः । गोबल्लवः अश्वबल्लवः । कृत्स्वरस्य स एव । इहोभयं प्राप्नोति । गोसंख्यः पशुसंख्यः अश्वसंख्यः । युक्तस्वरो भवति विप्रतिषेधेन ॥*

उपमानं शब्दार्थप्रकृतावेव ॥ ६ । २ । ८० ॥

उपमानग्रहणं किमर्थम् । शब्दार्थप्रकृतावेवेतीयत्युच्यमाने पूर्वेणातिप्रसक्तमिति[4] कृत्वा नियमोऽयं विज्ञायेत । तत्र को दोषः । इह न स्यात् पुष्पहारी फलहारी । उपमानग्रहणे पुनः क्रियमाणे न दोषो भवति ॥ अथ शब्दार्थग्रहणं किमर्थम् । उपमानं प्रकृतावेवेतीयत्युच्यमाने इहापि प्रसज्येत । वृकवञ्ची वृकप्रेक्षी । शब्दार्थग्रहणे पुनः क्रियमाणे न दोषो भवति ॥ अथ प्रकृतिग्रहणं किमर्थम् । शब्दार्थप्रकृतिरेव यो नित्यं तत्र यथा स्यात् । इह मा भूत् । कोकिलाभिव्याहारी ॥ अथैवकारः किमर्थः । नियमार्थः । नैतदस्ति प्रयोजनम् । सिद्धे विधिरारभ्यमाणोऽन्तरेणैवकारं नियमार्थो भविष्यति । इष्टतोऽवधारणार्थस्तर्हि । यथैवं विज्ञायेत । उपमानं शब्दार्थप्रकृतावेवेति । मैवं विज्ञायि । उपमानमेव शब्दार्थप्रकृताविति । शब्दार्थप्रकृतौ ह्युपमानं चानुपमानं चाद्युदात्तमिष्यते । साध्वध्यायी विलम्बिताध्यायी ॥

---

[1] गतिकारकोपपदात्कृत् ६. २. १३९ ; सप्तमीहारिणौ धर्म्येऽहरणे ६. २. ६५. [2] सप्तमीहारिणौ धर्म्येऽहरणे ६. २. ६५. [3] युक्ते च ६. २. ६६ ; गतिकारकोपपदात्कृत् ६. २. १३९. [4] णिनि ६. २. ७९.

* [V. M. om. न्यधी च (५३); ईषदन्यतरस्याम् (५४); हिरण्यपरिमाणं धने (५५); प्रथमोऽचिरोपसंपत्तौ (५६); कतरकतमौ कर्मधारये (५७); आर्यो ब्राह्मणकुमारयोः [अग्रे (पृ. १३२) अवलोकनीयम्.

दीर्घकाषतुषभ्राष्ट्रवटं जे ॥ ६ । २ । ८२ ॥

जे दीर्घाद्बह्वचः ॥ १ ॥

जे दीर्घान्तस्यादिरुदात्तो भवतीत्येतस्मादन्त्यात्पूर्वं बह्वचः [८३] इत्येतद्भवति विप्रतिषेधेन । जे दीर्घान्तस्यादिरुदात्तो भवतीत्यस्यावकाशः । कुटींजः शमींजः । अन्त्यात्पूर्वं बह्वच इत्यस्यावकाशः उपसरंजः मन्दुरंजः । इहोभयं प्राप्नोति । आमलकींजः बलभींजः । अन्त्यात्पूर्वं बह्वच इत्येतद्भवति विप्रतिषेधेन ॥*

न भूताधिकसंजीवमद्राश्मकज्जलम् ॥ ६ । २ । ९१ ॥

आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम् ॥ १ ॥

आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानं कर्तव्यम् । दिवोदासाय गायत । वध्र्यश्वाय दाशुषे ॥

अन्तः ॥ ६ । २ । ९२ ॥

सर्वं गुणकात्स्न्ये ॥ ६ । २ । ९३ ॥

सर्वग्रहणं किमर्थम् । गुणकात्स्न्यें इतीयत्युच्यमान इहापि प्रसज्येत । परमशुक्लः परमकृष्ण इति । सर्वग्रहणे पुनः क्रियमाणे न दोषो भवति ॥ अथ गुणग्रहणं किमर्थम् । सर्वं कात्स्न्यें इतीयत्युच्यमान इहापि प्रसज्येत । सर्वसौवर्णः सर्वराजत इति । गुणग्रहणे पुनः क्रियमाणे न दोषो भवति ॥ अथ कात्स्न्यग्रहणं किमर्थम् । सर्वं गुण इतीयत्युच्यमान इहापि प्रसज्येत । सर्वेषां श्वेतः सर्वश्वेत इति । कथं चात्र समासः । षष्ठी सुबन्तेन समस्यत इति[1] । गुणेन नेति[2] प्रतिषेधः प्राप्नोति । एवं तर्हि

गुणात्तरेण समासस्तरलोपश्च ।

गुणात्तरेण समासस्तरलोपश्च वक्तव्यः । सर्वेषां श्वेततरः सर्वश्वेतः ॥

---

(५८); राजा च (५९); षष्ठी प्रत्येनासि (६०); क्ते नित्यार्थे (६१); ग्रामः शिल्पिनि (६२); राजा च प्रशंसायाम् (६३); आदिरुदात्तः (६४); सप्तमीहारिणौ धर्म्येऽहरणे (६५); युक्ते च (६६); विभाषाऽध्यक्षे (६७); पापं च शिल्पिनि (६८); गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे (६९); अङ्गानि मैरेये (७०); भक्ताख्यास्तदर्थेषु (७१); गोबिडालसिंहसैन्धवेषूपमाने (७२); अके जीविकार्थे (७३); प्राचां क्रीडायाम् (७४) अणि नियुक्ते (७५); शिल्पिनि चाकृञः (७६); संज्ञायां च (७७); गोतान्तियवं पाले (७८); णिनि (७९); युक्तारोह्यादयश्च (८१)].

* [V. M. om. अन्त्यात् पूर्वं बह्वचः (८३); ग्रामेऽनिवसन्तः (८४); घोषादिषु च (८५); छात्र्यादयः शालायाम् (८६); प्रस्थेऽवृद्धमकर्क्यादीनाम् (८७); मालादीनां च (८८); अमहन्नवं नगरेऽनुदीचाम् (८९); अर्मे चावर्णं द्व्यच्त्र्यच् (९०)].

[1] षष्ठी २. २. ८.

[2] पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन २. २. ११.

*उत्तरपदवृद्धौ सर्वं च ॥ ६ । २ । १०५ ॥

अयुक्तोऽयं निर्देशो न ह्युत्तरपदं नाम वृद्धिरस्ति । कथं तर्हि निर्देशः कर्तव्यः । वृद्धिमत्युत्तरपद इति ॥ स तर्हि तथा निर्देशः कर्तव्यः । न कर्तव्यः । नैवं विज्ञायत उत्तरपदं वृद्धिरुत्तरपदवृद्धिः उत्तरपदवृद्धाविति । कथं तर्हि । उत्तरपदस्य वृद्धिरस्मिन्सोऽयमुत्तरपदवृद्धिः उत्तरपदवृद्धाविति ॥

बहुव्रीहौ विश्वं संज्ञायाम् ॥ ६ । २ । १०६ ॥

बहुव्रीहौ विश्वस्यान्तोदात्तात्संज्ञायां मित्राजिनयोरन्तः ॥ १ ॥

बहुव्रीहौविश्वस्यान्तोदात्तात्संज्ञायां मित्राजिनयोरन्त इत्येतद्भवति विप्रतिषेधेन[१] । बहुव्रीहौ विश्वं संज्ञायामित्यस्यावकाशः । विश्वदेवः । विश्वयशाः । संज्ञायां मित्राजिनयोरन्त इत्यस्यावकाशः । कुलमित्रम् कुलाजिनम् । इहोभयं प्राप्नोति । विश्वमित्रः विश्वाजिनः । संज्ञायां मित्राजिनयोरन्त इत्येतद्भवति विप्रतिषेधेन ॥

अन्तोदात्तप्रकरणे मरुद्वृधादीनां छन्दस्युपसंख्यानम् ॥ २ ॥

अन्तोदात्तप्रकरणे मरुद्वृधादीनां छन्दस्युपसंख्यानं कर्तव्यम् । मरुद्वृधः सवया उपस्थे ॥

उदराश्वेषुषु क्षेपे ॥ ६ । २ । १०७-१०८ ॥

उदरादिभ्यो नञ्सुभ्याम् ॥ १ ॥

उदराश्वेषुषु क्षेप इत्येतस्मान्नञ्सुभ्याम् [१७२] इत्येतद्भवति विप्रतिषेधेन । उदराश्वेषुषु क्षेप इत्यस्यावकाशः । कुण्डोदरः घटोदरः । नञ्सुभ्यामित्यस्यावकाशः । अयवः अतिलः अमाषः । सुयवः सुतिलः सुमाषः । इहोभयं प्राप्नोति अनुदरः सूदरः । नञ्सुभ्यामित्येतद्भवति विप्रतिषेधेन ॥ **

सोर्मनसी अलोमोषसी ॥ ६ । २ । ११७ ॥

सोर्मनसोः कपि ॥ १ ॥

सोर्मनसी अलोमोषसी इत्येतस्मात्कपि पूर्वम् [१७३] इत्येतद्भवति विप्रतिषे-

---

* [V. M. om. संज्ञायां गिरिनिकाययोः (९४) ; कुमार्यां वयसि (९५) ; उदकेऽकेवले (९६) ; द्विगौ क्रतौ (९७) ; सभायां नपुंसके (९८) ; पुरे प्राचाम् (९९) ; अरिष्टगौडपूर्वे च (१००) ; न हास्तिनफलकमार्देयाः (१०१) ; कुसूलकूपकुम्भशालं बिले (१०२) ; दिक्शब्दा ग्रामजानपदाख्यानचानराटेषु (१०३) ; आचार्योपसर्जनश्चान्तेवासिनि (१०४)].

** [V. M. om. नदी बन्धुनि (१०९) ; निष्ठोपसर्गपूर्वमन्यतरस्याम् (११०) ; उत्तरपदादिः (१११) ; कर्णो वर्णलक्षणात् (११२) ; संज्ञौपम्ययोश्च (११३) ; कण्ठपृष्ठग्रीवाजङ्घं च (११४) ; शृङ्गमवस्थायां च (११५) ; नञो जरमरमित्रमृताः (११६)].

[१] संज्ञायां मित्राजिनयोः ६. २. १६५.

धेन । सोर्मनसी अलोमोषसी इत्यस्यावकाशः । सु॒शर्मा॑णमधि॒ नावं॑ रुहेयम् । सु॒शमीं॑सि सु॒प्रति॑ष्ठानः । सु॒स्रोता॑ः सु॒पर्या॑ः सु॒शिरा॑ः । कपि पूर्वस्यावकाशः । अ॒य॒वर्क॑ः । इहोभयं प्राप्नोति । सु॒श॒र्मक॑ः सु॒स्रो॒तस्क॑ः । कपि पूर्वमित्येतद्भवति विप्रतिषेधेन ॥*

कूलतीरतूलमूलशालाक्षसममव्ययीभावे ॥ ६ । २ । १२१ ॥

पर्यादिभ्यः कूलादीनामाद्युदात्तत्वम् ॥ १ ॥

पर्यादिभ्यः[1] कूलादीनामाद्युदात्तत्वं भवति विप्रतिषेधेन । परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेष्वित्यस्यावकाशः । परि॑त्रिगर्तम् परि॑सौवीरम् । कूलादीनामाद्युदात्तत्वस्यावकाशः । अ॒ति॒कूल॑म् अ॒नु॒कूल॑म् । इहोभयं प्राप्नोति । प॒रि॒कूल॑म् । कूलादीनामाद्युदात्तत्वं भवति विप्रतिषेधेन ॥**

चेलखेटकटुककाण्डं गर्हायाम् ॥ ६ । २ १२६ ॥

अकर्मधारये राज्यम् ॥ ६ । २ । १३० ॥

चेलराज्यादिभ्योऽव्ययम् ॥ १ ॥

चेलराज्यादिस्वरादव्ययस्वरो भवति विप्रतिषेधेन[2] । चेलराज्यादिस्वरस्यावकाशः । भा॒र्या॒चेल॑म् पु॒त्र॒चेल॑म् । ब्रा॒ह्म॒ण॒राज्य॑म् । अव्ययस्वरस्यावकाशः । निष्कौ॑शाम्बिः निर्वा॑राणसिः । इहोभयं प्राप्नोति । कुचे॑लम् कुरा॑ज्यम् । अव्ययस्वरो भवति विप्रतिषेधेन ॥ स तर्हि पूर्वविप्रतिषेधो वक्तव्यः । न वक्तव्यः । इष्टवाची परशब्दः[3] । विप्रतिषेधे परं यदिष्टं तद्भवतीति ॥***

कुण्डं वनम् ॥ ६ । २ । १३६ ॥

कुण्डाद्युदात्तत्वे तत्समुदायग्रहणम् ॥ १ ॥

कुण्डाद्युदात्तत्वे तत्समुदायग्रहणं कर्तव्यम् । वनसमुदायवाची चेत्स कुण्डशब्दो भवतीति वक्तव्यम् । इह मा भूत् । मृत्कुण्डम् ॥****

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य द्वितीये पादे प्रथममाह्निकम् ॥

---

* [V. M. om. क्त्वादयश्च (११८); आद्युदात्तं द्व्यच् छन्दसि (११९); वीरवीर्यौ च (१२०)].

** [V. M. om. कंसमन्थशूर्पपाय्यकाण्डं द्विगौ (१२२); तत्पुरुषे शालायां नपुंसके (१२३); कन्था च (१२४); आदिश्चिहणादीनाम् (१२५)].

*** [V. M. om. चीरमुपमानम् (१२७); पललसूपशाकं मिश्रे (१२८); कूलसूदस्थलकर्षाः संज्ञायाम् (१२९); वर्ग्यादयश्च (१३१); पुत्रः पुंभ्यः (१३२); नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः (१३३); चूर्णादिष्वप्राणिषष्ठ्याः (१३४); षट् च काण्डादीनि (१३५)].

**** [V. M. om. प्रकृत्या भगालम् (१३७); शितेर्नित्याबह्वज्बहुव्रीहावभसत् (१३८)].

[1] परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु ६. २. ३३.

[2] तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययाद्वितीयाकृत्याः ६. २. २.

[3] विप्रतिषेधे परं कार्यम् १. ४. २.

गतिकारकोपपदात्कृत् ॥ ६ । २ । १३९ ॥

गतिकारकोपपदादिति किमर्थम् । इह मा भूत् । परमं कारकं परमकारकम् ॥ गतिकारकोपपदादित्युच्यमाने ऽप्यत्र प्राप्नोति । एतदपि हि कारकम् ॥ इदं तर्हि । देवदत्तस्य कारकं देवदत्तकारकम्[1] ॥ इदं चाप्युदाहरणं परमं कारकं परमकारकमिति । ननु चोक्तं गतिकारकोपपदादित्युच्यमानेऽप्यत्र प्राप्नोत्येतदपि हि कारकमिति । नैतत्कारकं कारकविशेषणमेतत् । यावद् ब्रूयात्प्रकृष्टं कारकं शोभनं कारकमिति तावदेतत्परमं कारकमिति ॥

अथ कृद्ग्रहणं किमर्थम् । इह मा भूत् । निष्कौशाम्बिः निर्वाराणसिः ॥ अत उत्तरं पठति ।

गत्यादिभ्यः प्रकृतिस्वरत्वे कृद्ग्रहणानर्थक्यमन्यस्योत्तरपदस्याभावात् ॥ १ ॥

गत्यादिभ्यः प्रकृतिस्वरत्वे कृद्ग्रहणमनर्थकम् । किं कारणम् । अन्यस्योत्तरपदस्याभावात् । न ह्यन्यद्गत्यादिभ्य उत्तरपदमस्त्यन्यदतः कृतः । किं कारणम् । धातोर्हि द्वये प्रत्यया विधीयन्ते तिङः कृतश्च । तत्र कृता सह समासो भवति तिङा च न भवति । तत्रान्तरेण कृद्ग्रहणं कृत एव भविष्यति ॥ ननु चेदानीमेवोदाहृतं निष्कौशाम्बिः निर्वाराणसिरिति । यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवतो न च निसः कौशाम्बीशब्दं प्रति क्रियायोगः ॥

कृत्प्रकृतौ वा गतित्वादधिकार्थं कृद्ग्रहणम् ॥ २ ॥

कृत्प्रकृतौ तर्हि गतित्वादधिकार्थं कृद्ग्रहणं कर्तव्यम् । कृत्प्रकृतिर्धातुः । धातुं च प्रति क्रियायोगः । तत्र यत्क्रियायुक्तास्तं प्रतीतीहैव स्यात् प्रणीः उन्नीः । इह न स्यात् प्रणायकः उन्नायकः ॥ एतदपि नास्ति प्रयोजनम् । यत्क्रियायुक्ता इति नैवं विज्ञायते यस्य क्रिया यत्क्रिया यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवत इति । कथं तर्हि । या क्रिया यत्क्रिया यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवत इति । न च कश्चित्केवलः शब्दोऽस्ति यस्तस्यार्थस्य वाचकः स्यात् । केवलस्तस्यार्थस्य वाचको नास्तीति कृत्वा कृदधिकस्य भविष्यति । ननु चायं तस्यैवार्थस्य वाचकः प्रणीरिति । एषोऽपि हि कर्तृविशिष्टस्य ॥ अयं तर्हि तस्यैवार्थस्य वाचकः । प्रभवनंमिति[2] । तस्मात्कृद्ग्रहणं कर्तव्यम् ॥ यदि कृद्ग्रहणं क्रियत आमन्ते स्वरो न प्राप्नोति । प्रप-

---

[1] षष्ठी शेषे २. ३. ५०; षष्ठी २. २. ८.

[2] ल्युट् च ३. ३. ११५.

चतितराम् प्रजल्पतितराम् । असति पुनः कृद्ग्रहणे क्रियाप्रधानमाख्यातं तस्यातिशये तरबुत्पद्यते तरबन्तात्स्वार्थ आम्[1] तत्र यत्क्रियायुक्ता इति भवत्येव संघातं प्रति क्रियायोगः । न च कश्चित्केवलः शब्दोऽस्ति यस्तस्यार्थस्य वाचकः स्यात्केवलस्तस्यार्थस्य वाचको नास्तीति कृत्वाधिकस्य भविष्यति । ननु चायं तस्यैवार्थस्य वाचकः प्रभवनमिति । एषोऽपि द्रव्यविशिष्टस्य । कथम् । कृदभिहितो भावो द्रव्यवद्भवति क्रियावदपि ॥ *

अन्तः ॥ ६ । २ । १४३ ॥

किं समासस्यान्त उदात्तो भवत्याहोस्विदुत्तरपदस्य । कुतः संदेहः । उभयं प्रकृतं[2] तत्रान्यतरच्छक्यं विशेषयितुम् । कश्चात्र विशेषः ।

अन्तोदात्तत्वं समासस्येति चेत्कप्युपसंख्यानम् ॥ २ ॥

अन्तोदात्तत्वं समासस्येति चेत्कप्युपसंख्यानं कर्तव्यम् । इदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने[3] कपि चेति वक्तव्यम् । इहापि यथा स्यात् । इदंप्रथमकाः । अस्तु तर्ह्युत्तरपदस्य ।

उत्तरपदान्तोदात्तत्वे नञ्सुभ्यां समासान्तोदात्तत्वम् ॥ २ ॥

उत्तरपदान्तोदात्तत्वे नञ्सुभ्यां समासान्तोदात्तत्वं वक्तव्यम्[4] । अनृचः बह्वृचः ॥

अपर आह । उत्तरपदान्तोदात्तत्वे नञ्सुभ्यां समासान्तोदात्तत्वं वक्तव्यम् । अज्ञकः अस्त्रकः । कपि पूर्वम् [६. २. १७३] इत्यस्यापवादो ह्रस्वान्तेऽन्त्यात्पूर्वम् [१७४] इति । तत्र ह्रस्वान्तेऽन्त्यात्पूर्व उदात्तभावी नास्तीति कृत्वोत्सर्गेणैवान्तोदात्तत्वं प्राप्नोति ॥

न वा कपि पूर्ववचनं ज्ञापकमुत्तरपदान्तोदात्तत्वस्य ॥ ३ ॥

न वैष दोषः । किं कारणम् । यदयं कपि पूर्वमित्याह तज्ज्ञापयत्याचार्यो नोत्तरपदस्यान्त उदात्तो भवतीति ॥ एवमपि कुत एतत्समासस्यान्त उदात्तो भवतीति ।

प्रकरणाच्च समासान्तोदात्तत्वम् ॥ ४ ॥

प्रकृतं समासग्रहणमनुवर्तते । क्व प्रकृतम् । चौ समासस्य [६. १. २२२. २२३]

---

* [V. M. om. उभे वनस्पत्यादिषु युगपत् (१४०); देवताद्वन्द्वे च (१४१); नोत्तरपदेनुदात्तादावपृथिवीरुद्रपूषमन्थिषु (१४२)].

[1] किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ५. ४. ११. [2] समासस्य ६. १. २२३ ; उत्तरपदादिः ६. २. १११. [3] बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने ६. २. १६२. [4] नञ्सुभ्याम् ६. २. १७२ ; बहोर्नञ्वदुत्तरपदभूम्नि ६. २. १७५. [5] ऋक्पूरब्धूःपथामानक्षे ५. ४. ७४.

इति ॥ ननु चोक्तमन्तोदात्तत्वं समासस्येति चेत्कप्युपसंख्यानमिति । नैष दोषः । उत्तरपदग्रहणमपि प्रकृतमनुवर्तते । क्व प्रकृतम् । उत्तरपदादिः [६. २. १११] इति । तत्रैवमभिसंबन्धः करिष्यते । नञ्सुभ्यां समासस्यान्त उदात्तो भवति । इदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणन उत्तरपदस्येति ॥ *

कारकाद्दत्तश्रुतयोरेवाशिषि ॥ ६ । २ । १४८ ॥

कारकाद्दत्तश्रुतयोरनाशिषि प्रतिषेधः ॥ १ ॥

कारकाद्दत्तश्रुतयोरनाशिषि प्रतिषेधो वक्तव्यः । अनाहतो नदति देवदत्तः[1] ॥

सिद्धं तूभयनियमात् ॥ २ ॥

सिद्धमेतत् । कथम् । उभयनियमात् । उभयतो नियम आश्रयिष्यते । कारकाद्दत्तश्रुतयोरेवाशिषि । आशिष्येव कारकाद्दत्तश्रुतयोः ॥ **

संज्ञायां मित्राजिनयोः ॥ ६ । २ । १६५ ॥

ऋषिप्रतिषेधो मित्रे ॥ १ ॥

ऋषिप्रतिषेधो मित्रे वक्तव्यः । विश्वामित्र ऋषिः ॥ ***

बहोर्नञ्वदुत्तरपदभूम्नि ॥ ६ । २ । १७५ ॥

किमर्थं बहोर्नञ्वदतिदेशः क्रियते न नञ्सुबहुभ्य इत्येवोच्येत[3] । नैवं शक्यम् । उत्तरपदभूम्नीति वक्ष्यति तद्बहोरेव यथा स्यान्नञ्सुभ्यां मा भूदिति । नैतदस्ति प्रयोजनम् । एकयोगेऽपि सति यस्योत्तरपदभूमास्ति तस्य भविष्यति । कस्य चास्ति । बहोरेव ॥ इदं तर्हि प्रयोजनम् । न गुणादयोऽवयवाः [१७६] इति वक्ष्यति तद्बहोरेव यथा स्यान्नञ्सुभ्यां मा भूदिति । एतदपि नास्ति प्रयोजनम् । एकयोगेऽपि सति यस्य गुणादयोऽवयवाः सन्ति तस्य भविष्यति । कस्य च सन्ति । बहोरेव ॥ अत उत्तरं पठति ।

---

* [V. M. om. थाथघञ्क्ताजबित्रकाणाम् (१४४); सूपमानात् क्तः (१४५); संज्ञायामनाचित्तादीनाम् (१४६); प्रवृद्धादीनां च (१४७)].

** [V. M. om. इत्थंभूतेन कृतमिति च (१४९); अनो भावकर्मवचनः (१५०); मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः (१५१); सप्तम्याः पुण्यम् (१५२); ऊनार्थकलहं तृतीयायाः (१५३); मिश्रं चानुपसर्गमसंधौ (१५४); नञो गुणप्रतिषेधे संपाद्यर्हहितालमर्थास्तद्धिताः (१५५); ययतोश्चातदर्थे (१५६); अच्कावशक्तौ (१५७); आक्रोशे च (१५८); संज्ञायाम् (१५९); कृत्योकेष्णुच्चार्वादयश्च (१६०); विभाषा तृन्नन्नतीक्ष्णशुचिषु (१६१); बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने (१६२); संख्यायाः स्तनः (१६३); विभाषा छन्दसि (१६४)].

[अग्रे (पृ. १३८) अवलोकनीयम्.

बहोर्नञ्वदुत्तरपदाद्युदात्तार्थम् ॥ १ ॥

बहोर्नञ्वदतिदेशः क्रियत उत्तरपदाद्युदात्तार्थम् । उत्तरपदस्याद्युदात्तत्वं यथा स्यात् । विदेशस्थमपि यन्नञः कार्यं तदपि बहोर्यथा स्यात् । नञो जरमरमित्रमृताः [६. २. ११६] अजरः अमरः । बहुजरः बहुमित्रः ॥ *

उपसर्गात्स्वाङ्गं ध्रुवमपर्शु ॥ ६ । २ । १७७ ॥

उपसर्गात्स्वाङ्गं ध्रुवं मुखस्यान्तोदात्तत्वात् ॥ १ ॥

मुखस्यान्तोदात्तत्वादुपसर्गात्स्वाङ्गं ध्रुवमित्येतद्भवति विप्रतिषेधेन[1] । मुखान्तोदात्तत्वस्यावकाशः । दीर्घमुखः श्लक्ष्णमुखः । उपसर्गात्स्वाङ्गमित्यस्यावकाशः । प्रस्फिक् प्रोदरः । इहोभयं प्राप्नोति । प्रमुखः । उपसर्गात्स्वाङ्गमित्येतद्भवति विप्रतिषेधेन ॥ कः पुनरत्र विशेषस्तेन वा सत्यनेन वा । सापवादकः स विधिरयं पुनर्निरपवादकः । अव्ययात्तस्य प्रतिषेधोऽपवादः[2] ॥ **

अभेर्मुखम् ६ । २ । १८५ ॥

अपाच्च ॥ ६ । २ । १८६ ॥

किमर्थमिदमुच्यते नोपसर्गात्स्वाङ्गं ध्रुवमित्येव सिद्धम्[3] ।

अभेर्मुखमपाच्चाध्रुवार्थम् ॥ १ ॥

अध्रुवार्थोऽयमारम्भः ॥

अबहुव्रीह्यर्थं वा ॥ २ ॥

अथवा बहुव्रीहेरिति वर्तते ऽबहुव्रीह्यर्थोऽयमारम्भः ॥

स्फिगपूतवीणाञ्जोऽध्वकुक्षिसीरनामनाम च ॥ ६ । २ । १८७ ॥

स्फिगपूतग्रहणं किमर्थं नोपसर्गात्स्वाङ्गं ध्रुवमित्येव सिद्धम्[3] ।

*** [V. M. om. व्यवायिनोन्तरम् (१६६); सुखं स्वाङ्गम् (१६७); नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः (१६८); निष्ठोपमानादन्यतरस्याम् (१६९); जातिकालसुखादिभ्योनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः (१७०); वा जाते (१७१); नञ्सुभ्याम् (१७२); कपि पूर्वम् (१७३); ह्रस्वान्तेन्त्यात् पूर्वम् (१७४)].

[1] तृतीया कर्मणि ६. २. ४८. [2] मित्रे चर्षौ ६. ३. १३० ; बहुव्रीहौ विश्वं संज्ञायाम् ६. २. १०६. [3] नञ्सुभ्याम् ६. २. १०२.

---

* [V. M. om. न गुणादयोवयवाः (१७६)].

** [V. M. om. वनं समासे (१७८); अन्तः (१७९); अन्तश्च (१८०); न निविभ्याम् (१८१); परेरभितोभावि मण्डलम् (१८२); प्रादस्वाङ्गं संज्ञायाम् (१८३); निरुदकादीनि च (१८४)].

[1] मुखं स्वाङ्गम् ६. १. १६७. [2] नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः ६. २. १६८.

[अग्रे (पृ. १३९) अवलोकनीयम् .

स्फिगपूतग्रहणं च ॥ १ ॥

किम् अध्रुवार्थमबहुव्रीह्यर्थमित्येव वा ॥ *

अतेरकृत्पदे ॥ ६ । २ । १९१ ॥

अतेर्धातुलोपे ॥ १ ॥

अतेर्धातुलोपे इति वक्तव्यम् । अकृत्पदे इति ह्युच्यमान इह च प्रसज्येत शोभनो गार्ग्योऽतिगार्ग्यः इह च न स्यात् अतिकारकः अतिपदा शर्करी ॥ **

द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ ॥ ६ । २ । १९७ ॥

किमिदं द्वित्रिभ्यां मूर्धन्यकारान्तग्रहणमाहोस्विन्नकारान्तग्रहणम् । कश्चात्र विशेषः ।

द्वित्रिभ्यां मूर्धन्यकारान्तग्रहणं चेन्नकारान्तस्योपसंख्यानम् ॥ १ ॥

द्वित्रिभ्यां मूर्धन्यकारान्तग्रहणं चेन्नकारान्तस्योपसंख्यानं कर्तव्यम् । द्विमूर्धा त्रिमूर्धा ॥ अस्तु तर्हि नकारान्तग्रहणम् ।

नकारान्तेऽकारान्तस्य ॥ २ ॥

नकारान्तेऽकारान्तस्योपसंख्यानं कर्तव्यम् । द्विमूर्धः त्रिमूर्धः ॥

उदात्तलोपात्सिद्धम् ॥ ३ ॥

अस्तु तर्हि नकारान्तग्रहणम् । अन्तोदात्तत्वे कृते लोप उदात्तनिवृत्तिस्वरेण सिद्धम्[1] ॥ इदमिह संप्रधार्यम् । अन्तोदात्तत्वं क्रियतां लोप इति किमत्र कर्तव्यम् । परत्वाल्लोपः ॥ एवं तर्हीदमिह संप्रधार्यम् । अन्तोदात्तत्वं क्रियतां समासान्त इति किमत्र कर्तव्यम् । परत्वादन्तोदात्तत्वम् । नित्यः समासान्तः । कृतेऽप्यन्तोदात्तत्वे प्राप्नोत्यकृतेऽपि । अन्तोदात्तत्वमपि नित्यम् । कृतेऽपि समासान्ते प्राप्नोत्यकृतेऽपि । अनित्यमन्तोदात्तत्वं न हि कृते समासान्ते प्राप्नोति । परत्वाल्लोपेन भवितव्यम् ॥ यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम् । न च

---

३ उपसर्गात्स्वाङ्गं ध्रुवमपर्शु ६. २. १७७. ४ बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने ६. २. १६२ ; उपसर्गात्स्वाङ्गं ध्रुवमपर्शु ६. २. १७७.

* [V. M. om. अधेरुपरिस्थम् (१८८); अनोरप्रधानकनीयसी (१८९); पुरुषश्चान्वादिष्टः (१९०)].

** [V. M. om. नेरनिधाने (१९२); प्रतेरंश्वादयस्तत्पुरुषे (१९३); उपाद् द्व्यजजिनमगौरादयः (१९४); सोरवक्षेपणे (१९५); विभाषोत्पुच्छे (१९६)].

[1] द्वित्रिभ्यां ष मूर्ध्नः ५. ४. ११५ ; नस्तद्धिते ६. ४. १४४ ; अनुदात्तस्य च यत्रोदात्तलोपः ६. १. १६१.

समासान्त एवान्तोदात्तत्वस्य निमित्तं विहन्ति । अवश्यं लक्षणान्तरं लोपः प्रतीक्ष्यः । उभयोर्नित्ययोः परत्वादन्तोत्तत्वम् । अन्तोदात्तत्वे कृते समासान्तष्टिलोपष्टिलोपे कृत उदात्तनिवृत्तिस्वरेण सिद्धम् ।

युक्तं पुनरिदं विचारयितुम् । नन्वनेनासंदिग्धेन नकारान्तस्य ग्रहणेन भवितव्यं यावता मूर्धस्वित्युच्यते । यदि ह्यकारान्तस्य ग्रहणं स्यान्मूर्धेष्विति ब्रूयात् । सैषा समासान्तार्था विचारणा । एवं तर्हि ज्ञापयत्याचार्यो विभाषा समासान्तो भवतीति ॥*

परादिश्छन्दसि बहुलम् ॥ ६ । २ । १९९ ॥

अत्यल्पमिदमुच्यते ।

परादिश्च परान्तश्च पूर्वान्तश्चापि दृश्यते ।
पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं स्मृतः ॥

अन्तोदात्तप्रकरणे त्रिचक्रादीनां छन्दस्युपसंख्यानम् ॥ १ ॥

अन्तोदात्तप्रकरणे त्रिचक्रादीनां छन्दस्युपसंख्मानं कर्तव्यम् । त्रि॒च॒क्रेण॑ त्रि॒व॒न्धु॒रेण॑ त्रि॒वृता॒ रथे॑न ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य द्वितीये पादे द्वितीयमाह्निकम् ॥ पादश्च समाप्तः ॥

---

* [V. M. om. सक्थं चाक्रान्तात् (१९८)].

अलुगुत्तरपदे ॥ ६ । ३ । १ ॥

आ कुतोऽयमधिकारः । अलुगधिकारः प्रागानङः[1] । उत्तरपदाधिकारः प्रागङ्गाधिकारात्[2] ॥

कानि पुनरुत्तरपदाधिकारस्य प्रयोजनानि ।

उत्तरपदाधिकारस्य प्रयोजनं स्तोकादिभ्योऽलुगानङिकोह्रस्वनलोपाः ॥ १ ॥

पञ्चम्याः स्तोकादिभ्यः [६.३.२.] । स्तोकान्मुक्तः अल्पान्मुक्तः । उत्तरपद इति किमर्थम् । निष्क्रान्तः स्तोकान्निःस्तोकः ॥ आनङिकोह्रस्वनलोपाः प्रयोजनम् । आनङ्[1] । होतापोतारौ । उत्तरपद इति किमर्थम् । होतापोतृभ्याम् ॥ इको ह्रस्वोऽङ्यो गालवस्य [६१] प्रयोजनम् । ग्रामणिकुलम् सेनानिकुलम् । उत्तरपद इति किमर्थम् । ग्रामणीः सेनानीः ॥ नलोपः प्रयोजनम् । नलोपो नञः [७३] । अब्राह्मणः अवृषलः । उत्तरपद इति किमर्थम् । परमन । नैषो ऽस्ति प्रयोगः । इदं तर्हि नतरांगमनम् ॥

एकवच्चालुग्भवतीति वक्तव्यम् । किं प्रयोजनम् । स्तोकाभ्यां मुक्तः स्तोकेभ्यो मुक्त इति विगृह्य स्तोकान्मुक्त इत्येव यथा स्यात् ।

एकवद्वचनमनर्थकम् ॥ २ ॥

एकवद्भावश्चानर्थकः ॥ द्विबह्वोरलुक्कस्मान्न भवति ।

द्विबहुष्वसमासः ॥ ३ ॥

द्विवचनबहुवचनान्तानामसमासः ॥ किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते ।

उक्तं वा ॥ ४ ॥

किमुक्तम् । अनभिधानादिति[3] ॥ तच्चावश्यमनभिधानमाश्रयितव्यम् ।

---

[1] आनङ् ऋतो द्वन्द्वे ६. ३. २५.
[2] अङ्गस्य ६. ४. १.
[3] अनभिधानात् ३. २. १. वा. ५.

एकवद्वचने हि गोषुचरे ऽतिप्रसङ्गः ॥ ५ ॥

एकवद्वचने हि गोषुचरे ऽतिप्रसङ्गः स्यात् । गोषुचरः ॥

वर्षाभ्यश्च जे ॥ ६ ॥

वर्षाभ्यश्च जेऽतिप्रसङ्गो भवति । वर्षासुजः ॥

अपो योनियन्मतिषु च ॥ ७ ॥

अपो योनियन्मतिषु चोपसंख्यानं कर्तव्यम् ॥

जे चरे च ॥ ८ ॥

जे चरे चातिप्रसङ्गो भवति । योनि । अप्सुयोनिः । यत् । अप्सव्यम्[१] । मति । अप्सुमतिः । अप्सुजः । अप्सुचरो गह्वरेष्ठाः ॥

पञ्चम्याः स्तोकादिभ्यः ॥ ६ । ३ । २ ॥

पञ्चमीप्रकरणे ब्राह्मणाच्छंसिन उपसंख्यानम् ॥ १ ॥

पञ्चमीप्रकरणे ब्राह्मणाच्छंसिन उपसंख्यानं कर्तव्यम् । ब्राह्मणाच्छंसी ॥

अन्यार्थे च ॥ २ ॥

अन्यार्थे चैषा पञ्चमी द्रष्टव्या । ब्राह्मणानि शंसति ब्राह्मणाच्छंसी ॥ अथवा युक्त एवात्र पञ्चम्यर्थः । ब्राह्मणेभ्यो गृहीत्वा गृहीत्वाहृत्याहृत्य शंसतीति ब्राह्मणाच्छंसी ॥

ओजःसहोम्भस्तमसस्तृतीयायाः ॥ ६ । ३ । ३ ॥

अञ्जस उपसंख्यानाम् ॥ १ ॥

अञ्जस उपसंख्यानं कर्तव्यम् । अञ्जसाकृतम् ॥

पुंसानुजो जनुषान्धो विकृताक्ष इति च ॥ २ ॥

पुंसानुजो जनुषान्धो विकृताक्ष इति चोपसंख्यानं कर्तव्यम् । पुंसानुजः । जनुषान्धो विकृताक्षः ॥ *

---

* [V. M. om. मनसः संज्ञायाम् (४)].

[१] तत्र साधुः ४. ४. ९८ ; ओर्गुणः ६. ४. १४६ ; वान्तो यि प्रत्यये ६. १. ७९.

आज्ञायिनि च ॥ ६ । ३ । ५ ॥

आत्मनश्च पूरणे ॥ १ ॥

आत्मनश्च पूरण उपसंख्यानं कर्तव्यम् । आत्मनापञ्चमः आत्मनादशमः ॥

अन्यार्थे च ॥ २ ॥

अन्यार्थे चैषा तृतीया द्रष्टव्या । आत्मा पञ्चमोऽस्यात्मनापञ्चमः ॥ अथवा युक्त एवात्र तृतीयार्थः । आत्मना कृतं तत्तस्य येनासौ पञ्चमः ॥ कथं

जनार्दनस्त्वात्मचतुर्थ एव ।

बहूव्रीहिरयम् । आत्मा चतुर्थोऽस्येति ॥ *

वैयाकरणाख्यायां चतुर्थ्याः ॥ ६ । ३ । ७ ॥

परस्य च ॥ ६ । ३ । ८ ॥

आत्मनेभाषपरस्मैभाषयोरुपसंख्यानम् ॥

आत्मनेभाषपरस्मैभाषयोरुपसंख्यानं कर्तव्यम् । आत्मनेभाषः परस्मैभाषः ॥ तत्कथं कर्तव्यम् । यदि व्याकरणे भवा वैयाकरणी वैयाकरण्याख्या वैयाकरणाख्या वैयाकरणाख्यायामिति । अथ हि वैयाकरणानामाख्या वैयाकरणाख्या नार्थ उपसंख्यानेन ॥ यद्यपि व्याकरणे भवा वैयाकरणी वैयाकरण्याख्या वैयाकरणाख्यैवमपि नार्थ उपसंख्यानेन । वचनाद्भविष्यति । अस्ति वचने प्रयोजनम् । किम् । आत्मनेपदम् परस्मैपदमिति । निपातनादेतत्सिद्धम् । किं निपातनम् । अनुदात्तङित आत्मनेपदम् [१. ३. १२] शेषात्कर्तरि परस्मैपदम् [१.३.७८] इति ॥

हलदन्तात्सप्तम्याः संज्ञायाम ॥ ६ । ३ । ९ ॥

हृद्युभ्यां ङेरुपसंख्यानम ॥ १ ॥

हृद्युभ्यां ङेरुपसंख्यानं कर्तव्यम् । हृदिस्पृक् दिविस्पृक् ॥

---

* [V. M. om. आत्मनश्च पूरणे (६)].

अन्यार्थे च ॥ २ ॥

अन्यार्थे चैषा सप्तमी द्रष्टव्या । हृदयं स्पृशतीति हृदिस्पृक् । दिवं स्पृशतीति दिविस्पृक् ॥

हलदन्ताधिकारे गोरुपसंख्यानम् ॥ ३ ॥

हलदन्ताधिकारे गोरुपसंख्यानं कर्तव्यम् । गविष्ठिरः ॥ न कर्तव्यम् । लुको ऽवादेशो विप्रतिषेधेन । लुक् क्रियतामवादेश इत्यवादेशो भविष्यति विप्रतिषेधेन[1] । अवादेशे कृते हलदन्तादित्येव सिद्धम् ॥

लुको ऽवादेशो विप्रतिषेधेनेति चेद्भूमिपाशेऽतिप्रसङ्गः ॥ ४ ॥

लुकोऽवादेशो विप्रतिषेधेनेति चेद्भूमिपाशे ऽतिप्रसङ्गो भवति । भूम्यां[2] पाशो भूमिपाशः ॥

अकोऽत इति वा संध्यक्षरार्थम् ॥ ५ ॥

एवं तर्ह्यविशेषेण सप्तम्या अलुमुक्त्वाकोऽत इति वक्ष्यामि । तन्नियमार्थं भविष्यति । अकोऽत एव भवति नान्यत इति । तेन संध्यक्षराणां सिद्धं भवति । सिध्यति । सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवास्तु । ननु चोक्तं हलदन्ताधिकारे गोरुपसंख्यानमिति । नैष दोषः । निपातनादेतत्सिद्धम् । किं निपातनम् । गविष्ठिरशब्दो बिदादिषु[3] पठ्यते । असकृत्खल्वपि निपातनं क्रियते । गवियुधिभ्यां स्थिरः [८.३.९५] इति ॥

कारनाम्नि च प्राचां हलादौ ॥ ६ । ३ । १० ॥

किमियं प्राप्ते विभाषाहोस्विदप्राप्ते । कथं च प्राप्ते कथं वाप्राप्ते । यदि संज्ञायामिति[4] वर्तते ततः प्राप्ते । अथ निवृत्तं ततोऽप्राप्ते । कश्चात्र विशेषः ।

कारनाम्नि वावचनार्थं चेदजादावतिप्रसङ्गः ॥ १ ॥

कारनाम्नि वावचनार्थं चेदजादावतिप्रसङ्गो भवति । इहापि प्राप्नोति । अविकट उरणो दातव्योऽविकटोरणः ॥ अस्तु तर्ह्यप्राप्तिः ।

---

[1] सुपो धातुप्रातिपदिकयोः २. ४. ७१ ; एचोऽयवायावः ६. १. ७८. [2] इको यणचि ६. १. ७७. [3] अनृष्यानन्तर्ये बिदादिभ्योऽञ् ४. १. १०४ ; विदादिगणे ‘ गविष्ठिरः ’ गणपाठे ४०. [4] हलदन्तात्सप्तम्याः संज्ञायाम् ६. ३. ९.

अप्राप्ते समासविधानम् ॥ २ ॥

यद्यप्राप्ते समासो विधेयः । प्राप्ते पुनः सति संज्ञायाम् [२. १. ४४] इत्येव समासः सिद्धः ॥ नैष दोषः । एतदेव ज्ञापयति भवत्यत्र समास इति यदयं कारनाम्नि सप्तम्या अलुकं शास्ति । यद्यपि तावज्ज्ञापकात्समासः स्यात् स्वरस्तु न सिध्यति । यद्धि तत्सप्तमीपूर्वपदं प्रकृतिस्वरं भवतीति[1] लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवं तत् । नैवात्रानेन स्वरेण भवितव्यम् । किं तर्हि । सप्तमीहारिणौ धर्म्येऽहरणे [६. २. ६५] इत्यनेन स्वरेण भवितव्यम् ॥ किं च भोः संज्ञा अपि वै क्रियन्ते न लोकः संज्ञासु प्रमाणम् । लोके च कारनाम संज्ञा । ननु चोक्तं कारनाम्नि वावचनार्थं चेदजादावतिप्रसङ्ग इति । नैष दोषः ।

योगविभागात्सिद्धम् ॥ ३ ॥

योगविभागः करिष्यते । कारनाम्नि च प्राचाम् । ततो हलादौ । हलादौ च कारनाम्नि सप्तम्या अलुग्भवति । इदमिदानीं किमर्थम् । नियमार्थम् । हलादावेव कारनाम्नि नान्यत्र । क्व मा भूत् । अविकट उरणो दातव्योऽविकटोरणः ॥

मध्याद्गुरौ ॥ ६ । ३ । ११ ॥

गुरावन्ताच्च ॥ १ ॥

गुरावन्ताच्चेति वक्तव्यम् । अन्तेगुरुः ॥*

बन्धे च विभाषा ॥ ६ । ३ । १३ ॥

स्वाङ्गग्रहणमनुवर्तत उताहो न[2] । किं चातः । यद्यनुवर्तते सिद्धं हस्तेबन्धः हस्तबन्धः । चक्रेबन्धः चक्रबन्ध इति न सिध्यति । अथ निवृत्तं सिद्धं चक्रेबन्धः चक्रबन्धः । हस्तेबन्धः हस्तबन्ध इति न सिध्यति । किं कारणम् । नेन्सिद्धबध्नातिषु [६. ३. १९] इति प्रतिषेधः प्राप्नोति ॥ नैष दोषः । सर्वत्रैवात्रोत्तरपदाधिकारे तत्पुरुषे कृति बहुलम् [१४] इति प्राप्ते नेन्सिद्धबध्नातिष्विति प्रतिषेध उच्यते । तस्मिन्नित्ये प्राप्त इयं विभाषारभ्यते ॥ एवमपि न ज्ञायते कस्मिन्विषये विभाषा

---

* [V. M. om. अमूर्धमस्तकात्स्वाङ्गादकामे (१२)].

[1] तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः ६. २. २.　　[2] अमूर्धमस्तकात् स्वाङ्गादकामे ६. ३. १२.

कस्मिन्प्रतिषेध इति । घञन्तस्येदं बन्धशब्दस्य ग्रहणं प्रतिषेधे पुनर्धातुग्रहणम् । घञन्ते विभाषान्यत्र प्रतिषेधः ॥

तत्पुरुषे कृति बहुलम् ॥ ६ । ३ । १४ ॥

तत्पुरुषे कृति बहुलमकर्मधारये ॥ १ ॥

तत्पुरुषे कृति बहुलमित्यत्राकर्मधारय इति वक्तव्यम् । इह मा भूत् । परमे कारके परमकारक इति ॥ तर्त्हिं वक्तव्यम् । न वक्तव्यम् । बहुलवचनान्न भविष्यति ॥

अथ किमर्थं लुगलुगनुक्रमणं क्रियते न तत्पुरुषे कृति बहुलमित्येव सिद्धम् ।

लुगलुगनुक्रमणं बहुलवचनस्याकृत्स्नत्वात् ॥ २ ॥

लुगलुगनुक्रमणं क्रियते ऽकृत्स्नं बहुलवचनमिति ॥ यद्यकृत्स्नं यदनेन कृतमकृतं तत् । एवं तर्हि न ब्रूमोऽकृत्स्नमिति । कृत्स्नं च कारकं च साधकं च निर्वर्तकं च । यदनेन कृतं सुकृतं तत् । किमर्थं तर्हि लुगलुगनुक्रमणं क्रियते । उदाहरणभूयस्त्वात् । ते वै खल्वपि विधयः सुपरिगृहीता भवन्ति येषां लक्षणं प्रपञ्चश्च । केवलं लक्षणं केवलः प्रपञ्चो वा न तथा कारकं भवति ॥ अवश्यं खल्वप्यस्माभिरिदं वक्तव्यं बहुलम् अन्यतरस्याम् उभयथा एकेषामिति । सर्ववेदपारिषदं हीदं शास्त्रम् । तत्र नैकः पन्थाः शक्य आस्थातुम् ॥ *

षष्ठ्या आक्रोशे ॥ ६ । ३ । २१ ॥

षष्ठीप्रकरणे वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषूपसंख्यानम् ॥ १ ॥

षष्ठीप्रकरणे वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषूपसंख्यानं कर्तव्यम् । वाचोयुक्तिः दिशोदण्डः पश्यतोहरः ॥

अमुष्यायणामुष्यपुत्रिकेत्युपसंख्यानम् ॥ २ ॥

आयुष्यायणामुष्यपुत्रिकेत्युपसंख्यानं कर्तव्यम् । आमुष्यायणः आमुष्यपुत्रिका ॥ आमुष्यकुलिकेति च वक्तव्यम् । आमुष्यकुलिका ॥

---

* [V. M. om. प्रावृट्शरत्कालदिवां जे (१५); विभाषा वर्षक्षरशरवरात् (१६); घकालतनेषु कालनाम्नः (१७); शयवासवासिष्वकालात् (१८); नेन्सिद्धबध्नातिषु च (१९); स्थे च भाषायाम् (२०)].

देवानांप्रिय इति च ॥ ३ ॥

देवानांप्रिय इति चोपसंख्यानं कर्तव्यम् । देवानांप्रियः ॥

शेपपुच्छलाङ्गूलेषु शुनः संज्ञायाम् ॥ ४ ॥

शेपपुच्छलाङ्गूलेषु शुनः संज्ञायामुपसंख्यानं कर्तव्यम् । शुनःशेपः शुनःपुच्छः शुनोलाङ्गूलः ॥

दिवश्च दासे ॥ ५ ॥

दिवश्च दास उपसंख्यानं कर्तव्यम् । दिवोदासाय गायत ॥*

ऋतो विद्यायोनिसंबन्धेभ्यः ॥ ६ । ३ । २३ ॥

विद्यायोनिसंबन्धेभ्यस्तत्पूर्वपदोत्तरपदग्रहणम् ॥ १ ॥

विद्यायोनिसंबन्धेभ्यस्तत्पूर्वपदोत्तरपदग्रहणं कर्तव्यम् । विद्यासंबन्धेभ्यो विद्यासंबन्धेषु यथा स्यात् । योनिसंबन्धेभ्यो योनिसंबन्धेषु यथा स्यात् । व्यतिकरो मा भूत् ॥ अथैषां व्यतिकरेण भवितव्यम् । बाढं भवितव्यम् । होतुः पुत्रः पितुरन्तेवासी ॥**

आनङृतो द्वन्द्वे ॥ ६ । ३ । २५ ॥

क्वायं नकारः श्रूयते । न क्वचिच्छ्रूयते लोपोऽस्य भवति नलोपः प्रातिपदिकान्तस्य [८. २. ७] इति । यदि न श्रूयते किमर्थमुच्चार्यते । रपरत्वं[1] मा भूदिति ॥ क्रियमाणेऽपि वै नकारे रपरत्वं प्राप्नोति । किं कारणम् । नलोपे कृत एषोऽपि ह्युः स्थानेऽण् शिष्यते । नैष दोषः । उः स्थानेऽण्प्रसज्यमान एव रपरो भवतीत्युच्यते न चायमुः स्थाने ऽणेव शिष्यते । किं तर्हि । अण्चानण्च ॥

कथं पुनरिदं विज्ञायते । ऋकारान्तानां यो द्वन्द्वः । अहोस्विद्द्वन्द्व ऋकारस्येति । कश्चात्र विशेषः ।

ऋकारान्तानां द्वन्द्वे पुत्र उपसंख्यानम् ॥ १ ॥

ऋकारान्तानां द्वन्द्वे पुत्र उपसंख्यानं कर्तव्यम् । पितापुत्रौ ॥

---

* [V. M. om. पुत्रेऽन्यतरस्याम् (२२)]

** [V. M. om. विभाषा स्वसृपत्योः (२४)]

[1] उरण् रपरः १. १. ५१.

कार्यी चानिर्दिष्टः ॥ २ ॥

कार्यी चानिर्दिष्टो भवति । ऋकारान्तानां द्वन्द्वे न ज्ञायते कस्याङा भवितव्यमिति ॥ अस्तु तर्हि द्वन्द्व ऋकारस्येति ।

अविशेषेण पितृपितामहादिष्वतिप्रसङ्गः ॥ ३ ॥

अविशेषेण पितृपितामहादिष्वतिप्रसङ्गो भवति । पितृपितामहाविति ॥ अस्तु तर्ह्यृकारान्तानां यो द्वन्द्व इति । ननु चोक्तमृकारान्तानां द्वन्द्वे पुत्र उपसंख्यानमिति । नैष दोषः । पुत्रग्रहणमपि प्रकृतमनुवर्तते । क्व प्रकृतम् । पुत्रेऽन्यतरस्याम् [२२] इति । यदि तदनुवर्तते विभाषा स्वसृपत्योः [२४] पुत्रे चेति पुत्रेऽपि विभाषा प्राप्नोति । नैष दोषः । संबन्धमनुवर्तिष्यते । षष्ठ्या आक्रोशे [२१] पुत्रेऽन्यतरस्याम् [२२] षष्ठ्या आक्रोशे । ऋतो विद्यायोनिसंबन्धेभ्यः [२३] पुत्रेऽन्यरस्यां षष्ठ्या आक्रोशे । विभाषा स्वसृपत्योः [२४] पुत्रेऽन्यतरस्यां षष्ठ्या आक्रोशे । आनङृतो द्वन्द्वे । पुत्रग्रहणमनुवर्तते षष्ठ्या आक्रोश इति निवृत्तम् ॥ यदप्युच्यते कार्यी चानिर्दिष्ट इति कार्यी च निर्दिष्टः । कथम् । उत्तरपद इति[1] वर्तते । ङिच्चायं क्रियते । सोऽन्तरेणापि कार्यिनिर्देशमृकारस्यैव भविष्यति ॥ पुत्रे तर्हि कार्य्यनिर्दिष्टः । पुत्रे च कार्यी निर्दिष्टः । कथम् । ऋकारग्रहणमपि प्रकृतमनुवर्तते । क्व प्रकृतम् । ऋतो विद्यायोनिसंबन्धेभ्यः इति । तद्धि पञ्चमीनिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । पुत्र इत्येषा सप्तम्यृत इति पञ्चम्याः षष्ठीं प्रकल्पयिष्यति तस्मिन्निति निर्दिष्टे पूर्वस्य [१.१.६६] इति ॥

देवताद्वन्द्वे च ॥ ६ । ३ । २६ ॥

देवताद्वन्द्व उभयत्र वायोः प्रतिषेधः ॥ १ ॥

देवताद्वन्द्व उभयत्र वायोः प्रतिषेधो वक्तव्यः । वाय्वग्नी अग्निवायू ॥

ब्रह्मप्रजापत्यादीनां च ॥ २ ॥

ब्रह्मप्रजापत्यादीनां च प्रतिषेधो वक्तव्यः । ब्रह्मप्रजापती शिववैश्रवणौ स्कन्दविशाखौ ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । द्वन्द्व इति[2] वर्तमाने पुनर्द्वन्द्वग्रहण-

---

[1] अलुगुत्तरपदे ६. ३. १.

[2] आनङ् ऋतो द्वन्द्वे ६. ३. २५.

स्यैतत्प्रयोजनं लोकवेदयोर्यो द्वन्द्वस्तत्र यथा स्यात् । कश्च लोकवेदयोर्द्वन्द्वः । वेदे ये सहनिर्वापनिर्दिष्टा न चैते वेदे सहनिर्वापनिर्दिष्टाः ॥ *

इद्वृद्धौ ॥ ६ । ३ । २८ ॥

इद्वृद्धौ विष्णोः प्रतिषेधः ॥ १ ॥

इद्वृद्धौ विष्णोः प्रतिषेधो वक्तव्यः । आग्नावैष्णवं चरुं निर्वपेत् ॥ **

मातरपितरावुदीचाम् ॥ ६ । ३ । ३२ ॥

पितरामातरा च च्छन्दसि ॥ ६ । ३ । ३३ ॥

किं निपात्यते । पूर्वपदोत्तरपदयोर्ऋकारस्यारारौ निपात्येते । मातरपितरौ भोजयतः । मातरपितरावानय । आ मा गन्तां पितरामातरा चा मा सोमो अमृतत्वाय गम्यात् ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य तृतीये पादे प्रथममाह्निकम् ॥

---

* [V. M. om. ईदग्नेः सोमवरुणयोः (२७)].

** [V. M. om. दिवो द्यावा (२९); दिवसश्च पृथिव्याम् (३०); उषासोषसः (३१).

स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ॥ ६ । ३ । ३४

भाषितपुंस्कादिति कथमिदं विज्ञायते । समानायामाकृतौ यद्भाषितपुंस्कमाहोस्वित् क्वचिद्यद्भाषितपुंस्कमिति । किं चातः । यदि विज्ञायते समानायामाकृतौ यद्भाषितपुंस्कमिति गर्भिभार्यः प्रजातभार्यः प्रसूतभार्य इत्यत्र न प्राप्नोति । अथ विज्ञायते क्वचिद्यद्भाषितपुंस्कमिति द्रोणीभार्यः कुटीभार्यः पात्रीभार्यः अत्रापि प्राप्नोति ॥ अस्तु समानायामाकृतौ यद्भाषितपुंस्कमिति । कथं गर्भिभार्यः प्रजातभार्यः प्रसूतभार्य इति । कर्तव्योऽत्र यत्नः ॥

अथ किमर्थमूङः पृथक्प्रतिषेध उच्यते न यत्रैवान्यः प्रतिषेधस्तत्रैवायमुच्येत । न कोपधायाः [३७] इत्युक्त्वा तत ऊङश्चेत्युच्येत । तत्रायमप्यर्थो द्विः प्रतिषेधो न वक्तव्यो भवति ॥ नैवं शक्यम् । पठिष्यति ह्याचार्यः पुंवत्कर्मधारये प्रतिषिद्धार्थमिति[1] । स पुंवद्भावो यथेह भवति कारिका वृन्दारिका कारकवृन्दारिकेत्येवमिहापि स्यात् ब्रह्मबन्धूर्वृन्दारिका ब्रह्मबन्धूवृन्दारिकेति ॥ अथ पृथक्प्रतिषेधेऽप्युच्यमाने यावता स प्रतिषिद्धार्थ आरम्भः कस्मादेवात्र न भवति । पृथक्प्रतिषेधवचनसामर्थ्यात् । अथवानूङिति तत्रानुवर्तिष्यते । अथवा नायं प्रसज्यप्रतिषेधः । किं तर्हि । पर्युदासोऽयं यदन्यदूङ इति स च प्रतिषिद्धार्थ आरम्भः ॥

किं पुनरिदं पुंवद्भावे स्त्रीग्रहणं प्रत्ययग्रहणमाहोस्वित्स्त्रीशब्दग्रहणमाहोस्वित् स्त्र्यर्थग्रहणम् । कश्चात्र विशेषः ।

पुंवद्भावे स्त्रीग्रहणं प्रत्ययग्रहणं चेत्तत्र पुंवदित्युत्तरपदे तत्प्रतिषेधविज्ञानम् ॥ १ ॥

पुंवद्भावे स्त्रीग्रहणं प्रत्ययग्रहणं चेत्तत्र पुंवदित्युत्तरपदे तत्प्रतिषेधो विज्ञायेत । कस्य । स्त्रीप्रत्ययस्य प्रतिषेधः ॥ किमुच्यते स्त्रीप्रत्ययस्य प्रतिषेध इति न पुनरन्यदपि किंचित्पुंसः प्रतिपदं कार्यमुच्यते यत्समानाधिकरण उत्तरपदे भाषितपुंस्कस्यातिदिश्येत । अनारम्भात्पुंसि । न हि किंचित्पुंसः प्रतिपदं कार्यमुच्यते यत्समानाधिकरण उत्तरपदे भाषितपुंस्कस्यातिदिश्येत । तत्र किमन्यच्छक्यं विज्ञातुमन्यदतः स्त्रीप्रत्ययप्रतिषेधात् ॥ कथं पुनः पुंवदित्यनेन स्त्रीप्रत्ययस्य प्रतिषेधः शक्यो विज्ञा-

---

[1] पुंवत्कर्मधारये प्रतिषिद्धार्थम् ६. ३. ४२ वा. १.

तुम् । वतिनिर्देशोऽयं कामचारश्च वतिनिर्देशे वाक्यशेषं समर्थयितुम् । तद्यथा । उशीनरवन्मद्रेषु यवाः । सन्ति न सन्तीति । मातृवदस्याः कलाः । सन्ति न सन्तीति । एवमिहापि पुंवद्भवति पुंवन्न भवतीत्येवं वाक्यशेषं समर्थयिष्यामहे । यथा पुंसः स्त्रीप्रत्ययो न भवत्येवं समानाधिकरण उत्तरपदे भाषितपुंस्कस्य न भवतीति ॥

प्रातिपदिकस्य च प्रत्यापत्तिः ॥ २ ॥

प्रातिपदिकस्य च प्रत्यापत्तिर्वक्तव्या । एनी भार्यास्य एतभार्यः । श्येतभार्यः । पुंवद्भावेन किं क्रियते । स्त्रीप्रत्ययस्य निवृत्तिः । अर्थोऽनिवृत्तः स्त्रीत्वं तस्यानिवृत्तत्वात् केन नशब्दो न श्रूयेत । स्त्रियामित्युच्यमानः प्राप्नोति[1] ॥

स्थानिवत्प्रसङ्गश्च ॥ ३ ॥

स्थानिवद्भावश्च प्राप्नोति । पट्वी भार्यास्य पटुभार्यः मृदुभार्यः । पुंवद्भावेन किं क्रियते । स्त्रीप्रत्ययस्य निवृत्तिः । तस्य स्थानिवद्भावाद्यणादेशः प्राप्नोति[2] ॥ किमर्थमिदमुभयमुच्यते न प्रातिपदिकस्य च प्रत्यापत्तिरित्येव स्थानिवद्भावोऽपि चोदितः स्यात् । पुरस्तादिदमाचार्येण दृष्टं स्थानिवत्प्रसङ्गश्चेति तत्पठितम् । तत उत्तरकालमिदं दृष्टं प्रातिपदिकस्य च प्रत्यापत्तिरिति तदपि पठितम् । न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति ॥

वतण्ड्यादिषु पुंवद्वचनम् ॥ ४ ॥

वतण्ड्यादिषु पुंवद्भावो वक्तव्यः । के पुनर्वतण्ड्यादयः । लुगलुगस्त्रीविषयद्विस्त्रीप्रत्ययाः । लुक् । गार्ग्यी वृन्दारिका गर्गवृन्दारिकाः । पुंवद्भावेन किं क्रियते । स्त्रीप्रत्ययस्य निवृत्तिः । अर्थोऽनिवृत्तः स्त्रीत्वं तस्यानिवृत्तत्वात्केन यशब्दो न श्रूयेत । अस्त्रियामिति हि लुगुच्यते[3] । लुक् ॥ अलुक् । वतण्डी वृन्दारिका वातण्ड्यवृन्दारिका । पुंवद्भावेन किं क्रियते । स्त्रीप्रत्ययस्य निवृत्तिः । अर्थोऽनिवृत्तिः स्त्रीत्वं तस्यानिवृत्तत्वाल्लुक्स्त्रियां वतण्डादिति[4] यकारस्य लुक्प्राप्नोति ॥ यदि पुनरीकार एव लुगुच्येत । तदीकारग्रहणं कर्तव्यम् । न कर्तव्यम् । क्रियते न्यास एव । प्रश्लिष्टनिर्देशोऽयम् । स्त्री ई स्त्री स्त्रियामिति ॥ ईकारविधौ वा अप्रत्ययकस्य पाठः क्रियते । वतण्डेति[5] । शार्ङ्गरवादौ सप्रत्यकस्य पाठः करिष्यते । स च सप्रत्ययकस्य पाठः कर्तव्यः । अन्तरङ्गत्वाच्च लुक् प्राप्नोति । अलुक् ॥ अस्त्रीविषय । कौण्डीवृसी वृन्दारिका

---

१ वर्णादनुदात्तात्तोपधात्तो नः ४. १. ३९. २ इको यणचि ६. १. ७७ ३ यञञोश्च २. ४. ६४. ४ लुक् स्त्रियाम् ४. १. १०९. ५ वतण्ड ४. १. ७३, गणपाठ २३.

कौण्डीवृस्यवृन्दारिका । पुंवद्भावेन किं क्रियते । स्त्रीप्रत्ययस्य निवृत्तिः । अर्थोऽनिवृत्तः स्त्रीत्वं तस्यानिवृत्तत्वात्केन यशब्दः श्रूयेत । अस्त्रियामिति हि ञ्यो विधीयते[1] । अस्त्रीविषय ॥ द्विस्त्रीप्रत्यय । गार्ग्यायणी वृन्दारिका गार्ग्यवृदारिका अत्र पुंवद्भावो न प्राप्नोति[2] । किं कारणम् । भाषितपुंस्कादनूङः समानाधिकरण उत्तरपदे पुंवद्भावो भवतीत्युच्यते यश्चात्र भाषितपुंस्कादनूङ् नासावुत्तरपदे यश्चोत्तरपदे नासौ भाषितपुंस्कात्परोऽनूङिति ॥

अस्तु तर्हि स्त्रीशब्दग्रहणम् ।

स्त्रीशब्दस्य पुंशब्दातिदेश इति चेत्सर्वप्रसङ्गोऽविशेषात् ॥ ५ ॥

स्त्रीशब्दस्य पुंशब्दातिदेश इति चेत्सर्वस्य स्त्रीशब्दस्य पुंशब्दातिदेशः प्राप्नोति । अस्यापि प्राप्नोति । अङ्गारका नाम शकुनयः । तेषां कालिकाः स्त्रियः । कालिकावृन्दारिकाः । अङ्गारकवृन्दारिकाः प्राप्नुवन्ति । क्षेमवृद्धयः क्षत्रियाः । तेषां तनुकेश्यः स्त्रियः । तनुकेशीवृन्दारिकाः । क्षेमवृद्धिवृन्दारिकाः प्राप्नुवन्ति । हंसस्य वरटा । कच्छपस्य डुली । ऋश्यस्य रोहित् । अश्वस्य वडवा । पुरुषस्य योषित् । किं कारणम् । अविशेषात् । न हि कश्चिद्विशेष उपादीयते एवंजातीयकस्य स्त्रीशब्दस्य पुंशब्दातिदेशो भवतीति । अनुपादीयमाने विशेषे सर्वत्र प्रसङ्गः ॥ कथं च नाम नोपादीयते यदा भाषितपुंस्कादित्युच्यते ।

भाषितपुंस्कानुपपत्तिश्च ॥ ६ ॥

ह्यर्थे चायं चः पठितः । सर्वो हि शब्दो भाषितपुंस्कात्परः शक्यः कर्तुम् ॥

अस्तु तर्ह्यर्थग्रहणम् ।

अर्थातिदेशे विप्रतिषेधानुपपत्तिः ॥ ७ ॥

अर्थातिदेशे विप्रतिषेधो नोपपद्यते । पठिष्यति ह्याचार्यो विप्रतिषेधं पुंवद्भावाद्ध्रस्वत्वं खिद्धादिकेष्विति[3] स विप्रतिषेधो नोपपद्यते । किं कारणम् । द्विकार्ययोगो हि नाम विप्रतिषेधो न चात्रैको द्विकार्ययुक्तः । शब्दस्य ह्रस्वत्वमर्थस्य पुंवद्भावः ॥ किं च । सर्वप्रसङ्गोऽविशेषादिति । सर्वस्य स्त्र्यर्थस्य पुंवदर्थः प्राप्नोति । अस्यापि प्राप्नोति । अङ्गारका नाम शकुनयः । तेषां कालिकाः स्त्रियः । कालिकावृन्दारिकाः । अङ्गारकवृन्दारिकाः प्राप्नुवन्ति । क्षेमवृद्धयः क्षत्रियाः । तेषां तनुकेश्यः स्त्रियः । तनुकेशीवृन्दारिकाः । क्षेमवृद्धिवृन्दारिकाः प्राप्नुवन्ति । हंसस्य

---

[1] व्रातच्फञोरस्त्रियाम् ५. ३. ११३. [2] प्राचां ष्फ तद्धितः ; षिद्गौरादिभ्यश्च ४. १. १७; ४१. [3] पुंवद्भावाद्ध्रस्वत्वं खिद्धादिकेषु ६. ३. ४२ वा. ५.

वरटा । कच्छपस्य डुली । ऋश्यस्य रोहित् । अश्वस्य वडवा । पुरुषस्य योषित् । किं कारणम् । अविशेषात् । न हि कश्चिद्विशेष उपादीयत एवंजातीयकस्य स्त्र्यर्थस्य पुंवद्भावो भवतीति । कथं च नाम नोपादीयते यदा भाषितपुंस्कादित्युच्यते । भाषितपुंस्कानुपपत्तिर्हि भवति । न ह्यर्थेन पौर्वापर्यमस्ति ॥ अयं तावददोषो यदुच्यतेऽर्थातिदेशे विप्रतिषेधानुपपत्तिरिति । नावश्यं द्विकार्ययोग एव विप्रतिषेधः । किं तर्हि । असंभवोऽपि । स चात्रास्त्यसंभवः । कोऽसावसंभवः । पुंवद्भावोऽभिनिर्वर्तमानो ह्रस्वत्वस्य निमित्तं विहन्ति ह्रस्वत्वमभिनिर्वर्तमानं पुंवद्भावं बाधते । एषोऽसंभवः । सत्यसंभवे युक्तो विप्रतिषेधः ॥ अयं तर्हि दोषः सर्वप्रसङ्गोऽविशेषादिति । तस्मादस्तु स एव मध्यमः पक्षः ॥

ननु चोक्तं स्त्रीशब्दस्य पुंशब्दातिदेश इति चेत्सर्वप्रसङ्गोऽविशेषादिति । नैष दोषः । समासनिर्देशोऽयम् । भाषितपुंस्कादनूङस्मिन्सोऽयं भाषितपुंस्कादनूङिति । यद्येवं लुक् प्रोप्नाति[1] । निपातनान्न भविष्यति । अथवाऽलुक्प्रकृतेः सोऽनुवर्तिष्यते ॥ कथं पुनरनूङित्यनेन स्त्रीप्रत्ययग्रहणं शक्यं विज्ञातुम् । नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः । नञ्युक्तमिवयुक्तं चान्यस्मिंस्तत्सदृशे कार्यं विज्ञायते तथा ह्यर्थो गम्यते । तद्यथा । अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशं पुरुषमानयति नासौ लोष्टमानीय कृती भवति । एवमिहाप्यनूङित्यूङ्प्रतिषेधादन्यस्मिन्नूङ्सदृशे कार्यं विज्ञास्यते । किं चान्यदनूङ्सदृशम् । स्त्रीप्रत्ययः ॥ एवमपि इडविड्वृन्दारिका ऐडविडवृन्दारिका पृद्वृन्दारिका पार्थवृन्दारिका दरद्वृन्दारिका दारदवृन्दारिका उशिजवृन्दारिका औशिजवृन्दारिका[3] अत्र पुंवद्भावो न प्राप्नोति । कर्तव्योऽत्र यत्नः ॥

अथेह कथं भवितव्यम् । पट्वीमृद्व्यौ भार्ये अस्य । पट्वीमृदुभार्य आहोस्वित् पटुमृदुभार्य इति । पट्वीमृदुभार्य इति भवितव्यम् । पुंवद्भावः कस्मान्न भवति । भाषितपुंस्कादित्युच्यते । ननु च भोः पटुशब्दो मृदुशब्दश्च पुंसि भाष्येते । समानायामाकृतौ यद्भाषितपुंस्कमाकृत्यन्तरे चैतौ भाषितपुंस्कौ । समानायामाकृतावप्येतौ भाषितपुंस्कौ । कथम् । आरभ्यते मतुब्लोपः[4] । एवं तर्हि भाषितपुंस्कादनूङ् समानाधिकरण उत्तरपदे पुंवद्भवतीत्युच्यते यश्चात्र भाषितपुंस्कादनूङ् समानाधिकरण उत्तरपदे कृतस्तस्य पुंवद्भावो यस्य चाकृतो नासौ भाषितपुंस्कादनूङ् समानाधिकरण उत्तरपदे ॥

---

[1] सुपो धातुप्रातिपदिकयोः २. ४. ७१. [2] अलुगुत्तरपदे ६. ३. १. [3] जनपदशब्दात् क्षत्रियादञ् ४. १. १६८; द्व्यञ्मगधकलिङ्गसूरमसादण् ४. १. १७०; अतश्च ४, १, १७७,

[4] गुणवचनेभ्यो मतुपो लुक् ५. २. ९४. वा ३.

पूरण्यां प्रधानपूरणीग्रहणम् ॥ ८ ॥

पूरण्यां प्रधानपूरणीग्रहणं कर्तव्यम् । इह मा भूत् । कल्याणी पञ्चम्यस्य पक्षस्य कल्याणपञ्चमीकः[1] पक्ष इति ॥ अथेह कथं भवितव्यम् । कल्याणी पञ्चम्यासां रात्रीणाम् । कल्याणीपञ्चमा रात्रय इति भवितव्यम् । रात्रयोऽत्र प्रधानम् ॥

तसिलादिष्वा कृत्वसुचः ॥ ६ । ३ । ३५ ॥

इह केचित्तसिलादय आ कृत्वसुचः[2] पठ्यन्ते येषु पुंवद्भावो नेष्यते केचिच्चान्यत्र पठ्यन्ते येषु पुंवद्भाव इष्यते । तत्र किं न्याय्यम् । परिगणनं कर्तव्यम् ।

तसिलादी त्रतसौ ॥ १ ॥

त्रतसौ तसिलादी द्रष्टव्यौ । तस्यां शालायां वसति तत्र वसति । तस्याः ततः । यस्याम् यत्र । यस्याः यतः ॥

तरप्तमपौ ॥ २ ॥

तरप्तमपौ तसिलादी द्रष्टव्यौ । दर्शनीयतरा दर्शनीयतमा ॥

चरड्जातीयरौ ॥ ३ ॥

चरड्जातीयरौ तसिलादी द्रष्टव्यौ । पटुचरी पटुजातीया ॥

कल्पब्देशीयरौ ॥ ४ ॥

कल्पब्देशीयरौ तसिलादी द्रष्टव्यौ । दर्शनीयकल्पा दर्शनीयदेशीया ॥

रूपप्पाशपौ ॥ ५ ॥

रूपप्पाशपौ तसिलादी द्रष्टव्यौ । दर्शनीयरूपा दर्शनीयपाशा ॥

थम्थालौ ॥ ६ ॥

थम्थालौ तसिलादी द्रष्टव्यौ । कयाकृत्या कथम् । यया यथा ॥

दार्हिलौ ॥ ७ ॥

दार्हिलौ तसिलादी द्रष्टव्यौ । तस्यां वेलायां तदा । तर्हि ॥

---

[1] अपि प्रधानपूरणीग्रहणम् ५. ४. ११६ वा १.

[2] पञ्चम्यास्तसिल् ५. ३. ७; संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् ५. ४. १७.

तिल्थ्यनौ ॥ ८ ॥

तिल्थ्यनौ तसिलादी द्रष्टव्यौ । वृकी वृकतिः[1] । अजथ्या[2] यूतिः ॥

शसि बह्वल्पार्थस्य ॥ ९ ॥

शसि बह्वल्पार्थस्य[3] पुंवद्भावो वक्तव्यः । बह्वीभ्यो देहि बहुशो देहि । अल्पशः ॥

त्वतलोर्गुणवचनस्य ॥ १० ॥

त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः । पट्व्या भावः पटुत्वम् पटुता । गुणवचनस्येति किमर्थम् । कठ्या भावः कठीत्वम् कठीता ॥

भस्याढे तद्धिते ॥ ११ ॥

भस्याढे तद्धिते पुंवद्भावो वक्तव्यः । हस्तिनीनां समूहो हास्तिकम्[4] । अढ इति किमर्थम् । श्यैनेयः रोहिणेयः[5] ॥ यद्यढ इत्युच्यते अग्नायी देवतास्य[6] आग्नेयः स्थालीपाकः अत्र न प्राप्नोति । इह च प्राप्नोति । कौण्डिन्यः[7] सापत्न[8] इति । यदि पुनरनपत्य इत्युच्येत । नैवं शक्यम् । इह हि न स्यात् । गार्ग्यायण्या अपत्यं[9] माणवको गार्गो जाल्मः । अस्तु तर्ह्यढ इत्येव । कथं कौण्डिन्यः सापत्न इति । कौण्डिन्ये निपातनात्सिद्धम् । किं निपातनम् । आगस्त्यकौण्डिन्ययोरिति[10] । सपत्नशब्दः प्रकृत्यन्तरम् । कथमग्नायी देवतास्य स्थालीपाकस्य आग्नेयः स्थालीपाकः । अस्तु तर्ह्यनपत्य इत्येव । कथं गार्गो जाल्मः । गार्गाग्नेयौ न संवदेते । कर्तव्यो ऽत्र यत्नः ॥

ठक्छसोश्च ॥ १२ ॥

ठक्छसोश्च[11] पुंवद्भावो वक्तव्यः । भवत्याश्छात्त्रा भावत्काः । भवदीयाः ॥ ठग्ग्रहणं किमर्थं नेके कृते[12] ऽजादावित्येव सिद्धम् । नैवं शक्यम् । अजादिलक्षणे हि माथितिकादिवत्प्रसङ्गः[13] । अजादिलक्षणे हि माथितिकादिवत्प्रसज्यते । तद्यथा । मथितं पण्यमस्य माथितिक इत्यकारलोपे कृते[14] तान्तादिति[15] कादेशो न भवति । एवमिहापि न स्यात् ॥

---

[1] वृकज्येष्ठाभ्यां तिल्तातिलौ च च्छन्दसि ५. ४. ४१. [2] अजाविभ्यां थ्यन् ५ १. ८. [3] बह्वल्पार्थाच्छस् कारकादन्यतरस्याम् ५. ४. ४२. [4] अचित्तहस्तिधेनोष्ठक् ४. २. ४७; नस्तद्धिते ६. ४. १४४. [5] वर्णादनुदात्तात्तोपधात्तो नः; स्त्रीभ्यो ढक् ४. १ ३९; १२०. [6] वृषाकप्यग्निकुसितकुसीदानामुदात्तः ४. १. ३७; अग्नेर्ढक् ४. २. ३३. [7] गर्गादिभ्यो यञ् ६. १. १०५; (नस्तद्धिते ६. ४. १४४). [8] नित्यं सपत्न्यादिषु ४. १. ३५; शिवादिभ्योऽण् ४ १. ११२. [9] प्राचां ष्फ तद्धितः; गोत्रस्त्रियाः कुत्सने ण च ४. १. १७; १४७. [10] आगस्त्यकौडिन्ययोरगस्तिकुण्डिनच् २. ४. ७०. [11] भवतष्ठक्छसौ ४. २. ११५. [12] ठस्येकः ७. ३. ५०. [13] अजादिलक्षणे हि माथितिकादिवत्प्रसङ्गः ५. ३. ८३ वा २. [14] तदस्य पण्यम्; ठस्येकः; यस्येति च ४. ४. ५१; ७. ३. ५०; ६. ४. १४८. [15] इसुसुक्तान्तात् कः ७. ३. ५१.

क्यङ्मानिनोश्च ॥ ६ । ३ । ३६ ॥

मानिन्ग्रहणं किमर्थम् ।

मानिन्ग्रहणमस्त्र्यर्थमसमानाधिकरणार्थं च ॥ १ ॥

मानिन्ग्रहणं क्रियतेऽस्त्र्यर्थमसमानाधिकरणार्थं च । अस्त्र्यर्थं तावत् । दर्शनीयां मन्यते देवदत्तो यज्ञदत्तां दर्शनीयमान्ययमस्याः । असमानाधिकरणार्थम् । दर्शनीयां मन्यते देवदत्ता यज्ञदत्तां दर्शनीयमानिनीयमस्याः ॥

न कोपधायाः ॥ ६ । ३ । ३७ ॥

किमिदमेवमाद्यनुक्रमणमाद्यस्य योगस्य[1] विषय आहोस्वित्पुंवद्भावमात्रस्य[2] । किं चातः । यद्याद्यस्य योगस्य विषये माध्यमिकीयः[3] शालूकिकीयः[4] अत्र न प्राप्नोति ॥ विधिरप्यत्र न सिध्यति । किं कारणम् । भाषितपुंस्कादनूङित्युच्यते न ह्येतद्भवति भाषितपुंस्कादनूङ् ॥ इह तर्हि विलेपिकाया धर्म्यं वैलेपिकम्[5] विधिश्च सिद्धो भवति प्रतिषेधश्च न प्राप्नोति ॥ अथ पुंवद्भावमात्रस्य विषये हस्तिनीनां समूहो हास्तिकम्[6] जातिलक्षणः पुंवद्भावप्रतिषेधः[7] प्राप्नोति ॥ एवं तर्हि न कोपधाया इत्येष योगः पुंवद्भावमात्रस्योत्तरमेवमाद्यनुक्रमणमाद्यस्य योगस्य विषये ॥

कोपधप्रतिषेधे तद्धितवुग्रहणम् ॥ १ ॥

कोपधप्रतिषेधे तद्धितवुग्रहणं कर्तव्यम् । तद्धितस्य यः ककारो वोश्च यः ककारस्तस्य ग्रहणं कर्तव्यम् । इह मा भूत् । पाकभार्यः भेकभार्य इति ॥ *

स्वाङ्गाच्चेतः ॥ ६ । ३ । ४० ॥

स्वाङ्गाच्चेतोऽमानिनि ॥ १ ॥

स्वाङ्गाच्चेतोऽमानिनीति वक्तव्यम् । इहापि यथा स्यात् । दीर्घमुखमानी

---

* [V. M. om. संज्ञापूरण्योश्च (३८); वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे (३९)].

[1] स्त्रियाः पुंवत्... ६. ३. ३४; तसिलादिष्वाकृत्वसुचः ६. ३. ३५ क्यङ्मानिनोश्च ६. ३. ३६. [2] तसिलादी त्रतसौ (वा. १); तरप्तमपौ (वा. २); ... ठक्छसोश्च (वा. १२) ६. ३. ३५ वा. १–१२. [3] मध्य मध्यमं चाण् चरणे ४. २. १३८ गहादिगणसूत्र ५. [4] वृद्धादकेकान्तखोपधात् ४. २. १४१. [5] अण् महिष्यादिभ्यः ४. ४. ४८. [6] अचित्तहस्तिधेनोष्ठक् ४. २. ४७. [7] जातेश्च ६. ३. ४१.

श्लक्ष्णमुखमानी ॥ यद्यमानिनीत्युच्यते दीर्घमुखमानिनी श्लक्ष्णमुखमानिनी न सिध्यति । प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीत्येवं भविष्यति ॥ *

पुंवत्कर्मधारयजातीयदेशीयेषु ॥ ६ । ३ । ४२ ॥

किमर्थमिदमुच्यते ।

पुंवत्कर्मधारये प्रतिषिद्धार्थम् ॥ १ ॥

प्रतिषिद्धार्थोऽयमारम्भः । न कोपधायाः [६७] इत्युक्तं तत्रापि पुंवद्भवति । कारिका वृन्दारिका कारकवृन्दारिका । कारकजातीया कारकदेशीया ॥ संज्ञापूरण्योश्च [३८] इत्युक्त तत्रापि पुंवद्भवति । दत्ता वृन्दारिका दत्तवृन्दारिका । दत्तजातीया दत्तदेशीया । पञ्चमी वृन्दारिका पञ्चमवृन्दारिका । पञ्चमजातीया पञ्चमदेशीया ॥ वृद्धिनिमित्तस्येत्युक्तं[1] तत्रापि पुंवद्भवति स्रौघ्नी वृन्दारिका स्रौघ्नवृन्दारिका । स्रौघ्नजातीया स्रौघ्नदेशीया ॥ स्वाङ्गाच्चेतोऽमानिनीत्युक्तं[2] तत्रापि पुंवद्भवति श्लक्ष्णमुखी वृन्दारिका श्लक्ष्णमुखवृन्दारिका । श्लक्ष्णमुखजातीया श्लक्ष्णमुखदेशीया ॥ जातेश्च [४१] इत्युक्तं तत्रापि पुंवद्भवति । कठी वृन्दारिका कठवृन्दारिका । कठजातीया कठदेशीया ॥

कुक्कुट्यादीनामण्डादिषु पुंवद्वचनम् ॥ २ ॥

कुक्कुट्यादीनामण्डादिषु पुंवद्भावो वक्तव्यः । कुक्कुट्या अण्डं कुक्कुटाण्डम् । मृग्याः पदं मृगपदम् । काक्याः शावः काकशावः ॥

न वाऽस्त्रीपूर्वपदविवक्षितत्वात् ॥ ३ ॥

न वा वक्तव्यम् । किं कारणम् । अस्त्रीपूर्वपदविवक्षितत्वात् । नात्र स्त्री पूर्वपदं विवक्षितम् । किं तर्हि । अस्त्री पूर्वपदम् । उभयोरण्डमुभयोः पदमुभयोः शावः ॥ यद्यपि तावदत्रैतच्छक्यते वक्तुमिह तु कथम् । मृग्याः क्षीरं मृगक्षीरमिति । अत्रापि न वास्त्रीपूर्वपदविवक्षितत्वादित्येव । कथं पुनः सतो नामाविवक्षा स्यात् । सतोऽप्यविवक्षा भवति । तद्यथा । अलोमिकैडका । अनुदरा कन्येति । असतश्च विवक्षा भवति । तद्यथा । समुद्रः कुण्डिका । विन्ध्यो वर्धितकमिति ॥

---

* [V. M. om. जातेश्च (४१)].

[1] वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे ६. ३. ३९. [2] स्वाङ्गाच्चेतोऽमानिनि ६. ३. ४० वा. १.

अग्नेरीत्त्वाद्वरुणस्य वृद्धिर्विप्रतिषेधेन ॥ ४ ॥

अग्नेरीत्त्वाद्वरुणस्य वृद्धिर्भवति विप्रतिषेधेन । अग्नेरीत्त्वस्यावकाशः । अग्नीषोमौ[1] । वरुणस्य वृद्धेरवकाशः । वायुवारुणम्[2] । इहोभयं प्राप्नोति । आग्निवारुणीमनड्वाहीमालभेत । वरुणस्य वृद्धिर्भवति विप्रतिषेधेन ॥ नैष युक्तो विप्रतिषेधः । द्विकार्ययोगो हि विप्रतिषेधो न चात्रैको द्विकार्ययुक्तः । अग्नेरीत्त्वं वरुणस्य वृद्धिः ॥ नावश्यं द्विकार्ययोग एव विप्रतिषेधः । किं तर्हि । असंभवोऽपि स चात्रास्त्यसंभवः । कोऽसावसंभवः । अग्नेरीत्त्वमभिनिर्वर्तमानं वरुणस्य वृद्धिं बाधते[3] । वरुणस्य वृद्धिरभिनिर्वर्तमानाग्नेरीत्त्वं बाधते[4] । एषोऽसंभवः सत्यसंभवे युक्तो विप्रतिषेधः ॥

पुंवद्भावाद्ध्रस्वत्वं खिद्भावाद्घादिकेषु ॥ ५ ॥

पुंवद्भावाद्ध्रस्वत्वं भवति विप्रतिषेधेन खिद्धादिकेषु[5] । पुंवद्भावस्यावकाशः । पटुभार्यः मृदुभार्यः । खिति ह्रस्वो भवतीत्यस्यावकाशः । कालिंमन्यः हरिणिंमन्यः । इहोभयं प्राप्नोति । कालिंमन्या हरिणिंमन्या । घादिषु नद्या ह्रस्वो भवतीत्यस्यावकाशः नर्तकितरा नर्तकितमा[6] । पुंवद्भावस्यावकाशः । दर्शनीयतरा दर्शनीयतमा । इहोभयं प्राप्नोति । पट्वितरा पट्वितमा । के ह्रस्वो भवतीत्यस्यावकाशः । नर्तकिका[6] । पुंवद्भावस्यावकाशः । दारदिका[7] । इहोभयं प्राप्नोति । पट्विका मृद्विका । ह्रस्वत्वं भवति विप्रतिषेधेन ॥ अथेदानीं ह्रस्वत्वे कृते पुनः प्रसङ्गविज्ञानात्पुंवद्भावः कस्मान्न भवति । सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति ॥

घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः ॥ ६ । ३ । ४३ ॥

ङीग्रहणं किमर्थम् । अनेकाचो ह्रस्व इतीयत्युच्यमाने खट्वातरा मालातरा अत्रापि प्रसज्येत । नैतदस्ति प्रयोजनम् । भाषितपुंस्कादिति[8] वर्तते ॥ एवमपि दत्तातरा गुप्तातरा अत्रापि प्राप्नोति । ईत इति[9] वर्तते ॥ एवमपि ग्रामणीतरः सेनानीतरः अत्रापि प्राप्नोति । स्त्रियामिति[8] वर्तते ॥ एवमपि ग्रामणीतरा सेनानीतरा

---

[1] ईदग्नेः सोमवरुणयोः ६. ३. २७. [2] देवताद्वन्द्व उभयत्र वायोः प्रतिषेधः ६. ३. २६. वा. १ ; साऽस्य देवता ४. २. २४ ; देवताद्वन्द्वे च ७. ३. २१. [3] दीर्घाच्च वरुणस्य ७. ३. २३. [4] ईद्वृद्धौ ६. ३. २८. [5] खित्यनव्ययस्य ६. ३. ४३ ; घरूपकल्प...हतेषु . ह्रस्वः ६. ३. ४३ ; केऽणः ७. ४. १३. [6] न कोपधायाः ६. ३. ३७ इति पुंवद्भावप्रतिषेधः । [7] द्व्यञ्मगधकलिङ्गसूरमसादण् ; अतश्च ; प्रागिवात् कः ; तसिलादिष्वाकृत्वसुचः ४. १. १७० ; १७७ ; ५. ८. ७० ; ६. ३. ३५. [8] स्त्रियाः पुंवद् भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ६. ३. ३४. [9] स्वाङ्गाच्चेतः ६. ३. ४०.

अत्रापि प्राप्नोति । स्त्रियाः स्त्रियामिति[1] वर्तते ॥ शेषप्रक्लृप्त्यर्थं तर्हि ङीग्रहणं कर्तव्यम् । नद्याः शेषस्यान्यतरस्याम् [६. ३. ४४] इति । कश्च शेषः । अङी च या नदी ङ्यन्तं च यदेकाच् ॥ अन्तरेणापि ङीग्रहणं प्रक्लृप्तः शेषः । कथम् । ईत[2] इति वर्तते । अनीच्च या नदीदन्तं च यदेकाच् ॥ शेषग्रहणमपि शक्यमकर्तुम् । कथम् । अविशेषेण घादिषु नद्या अन्यतरस्यां ह्रस्वत्वमुत्सर्गः । अस्यानेकाचो नित्यं ह्रस्वत्वमपवादः । तस्मिन्नित्ये प्राप्त उगितो विभाषारभ्यते[3] ॥ यद्येवं लक्ष्मितरा तन्त्रितरा इति न सिध्यति लक्ष्मीतरा तन्त्रीतरेति प्राप्नोति । इष्टमेवैतत्संगृहीतम् । लक्ष्मीतरा तन्त्रीतरेत्येव भवितव्यम् । एवं हि सौनागाः पठन्ति । घादिषु नद्या ह्रस्वत्वे कृन्नद्याः प्रतिषेध इति ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम् ॥

---

*[V. M. om. नद्याः शेषस्यान्यतरस्याम् (४४); उगितश्च (४५)].

[1] स्त्रियाः पुंवद्..... स्त्रियामपूरणीप्रियादिषु ६. ३. ३४. [2] स्वाङ्गाच्चेतः ६. ३. ४०, [3] उगितश्च ६. ३. ४५.

आन्महतः समानाधिकरणजातीययोः ॥ ६ । ३ । ४६ ॥

इह कस्मान्न भवति । अमहान्महान्संपन्नो महद्भूतश्चन्द्रमा इति ।

अन्यप्रकृतिस्त्वमहान्भूतप्रकृतौ महान्महत्येव ।

अन्यो महान् । अन्योऽमहान्भूतप्रकृतौ वर्तते । महान्महत्येव ॥

तस्मादात्त्वं न स्यात्

तस्मादात्त्वं न भविष्यति ॥

पुंवत्तु कथं भवेदत्र ॥ १ ॥

पुंवद्भावोऽपि तर्हि न प्राप्नोति । अमहती महती संपन्ना महद्भूता[1] ब्राह्मणी ॥ एवं तर्हि

अमहति महान् हि वृत्तस्तद्वाची चात्र भूतशब्दोऽयम् ।

अमहति महच्छब्दो वर्तते तद्वाची चात्र भूतशब्दः प्रयुज्यते । किंवाची । महद्वाची ॥

तस्मात् सिध्यति पुंवत्

तस्मात् सिध्यति पुंवद्भावः ॥ यद्येवमात्त्वमपि प्राप्नोति । महद्भूतश्चन्द्रमाः ।

निवर्त्यमात्त्वं तु मन्यन्ते ॥ २ ॥

आत्त्वमपि प्राप्नोति ॥ नैष दोषः

यस्तु महतः प्रतिपदं समास उक्तस्तदाश्रयं ह्यात्त्वम् ।
कर्तव्यं मन्यन्ते न लक्षणेन लक्षणोक्तश्चायम् ॥ ३ ॥

एवं तर्हि लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति प्रतिपदं यः समामो विहितस्तस्य ग्रहणं[2] लक्षणोक्तश्चायम्[3] ॥ इहापि तर्हि न प्राप्नोति । महान् बाहुरस्य महाबाहुः ।

शेषवचनात्तु योऽसौ प्रत्यारम्भात्कृतो बहुव्रीहिः ।
तस्मात् सिध्यति तस्मिन्

यस्माच्छेषो बहुव्रीहिः [२. २. २३] इति सिद्धे ऽनेकमन्यपदार्थे [२४] इत्याह तेन प्रतिपदं भवति ॥

---

[1] पुंवत्कर्मधारयजातीयदेशीयेषु ६. ३. ४२. [2] सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः २. १. ६१. [3] कुगतिप्रादयः २. २. १८ इति लाक्षणिकः समासः ।

प्रधानतो वा यतो वृत्तिः ॥ ४ ॥

अथवा गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः । तद्यथा । गौरनूबन्ध्योऽजोऽग्नीषोमीय इति न बाहीकोऽनुबध्यते । कथं तर्हि बाहीके वृद्ध्यात्वे[1] भवतः । गौस्तिष्ठति । गामानयेति । अर्थाश्रय एतदेवं भवति । यद्धि शब्दाश्रयं शब्दमात्रे तद्भवति । शब्दाश्रये च वृद्ध्यात्वे ॥

महदात्त्वे घासकरविशिष्टेषूपसंख्यानं पुंवद्वचनं च नानाधिकरणार्थम् ॥ १ ॥

महदात्त्वे घासकरविशिष्टेषूपसंख्यानं कर्तव्यं पुंवद्भावश्च नानाधिकरणार्थः कर्तव्यः । महत्या घासो महाघासः । महत्याः करो महाकरः । महत्या विशिष्टो महाविशिष्टः ॥

अष्टनः कपाले हविषि ॥ २ ॥

अष्टनः कपाले हविष्युपसंख्यानं कर्तव्यम् । अष्टाकपालं[2] चरुं निर्वपेत् । हविषीति किमर्थम् । अष्टकपालं[3] ब्राह्मणस्य ॥

गवि च युक्ते ॥ ३ ॥

गवि च युक्त उपसंख्यानं कर्तव्यम् । अष्टगवेन[4] शकटेन । युक्त इति किमर्थम् । अष्टगवं ब्राह्मणस्य ॥

द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः ॥ ६ । ३ । ४७ ॥

प्राक्शतादिति वक्तव्यम् । इह मा भूत् । द्विशतम् द्विसहस्रम् । अष्टशतम् अष्टसहस्रम् ॥*

विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम् ॥ ६ । ३ । ४९ ॥

सर्वेषांग्रहणं किमर्थम् । चत्वारिंशत्प्रभृतौ सर्वेषां विभाषा यथा स्याद् द्व्यष्टनोश्च त्रेश्च[5] ॥ नैतदस्ति प्रयोजनम् । प्रकृतं द्व्यष्टन्ग्रहणमनुवर्तिष्यते । यदि तदनुवर्तते त्रेस्त्रयो द्व्यष्टनोश्चेति द्व्यष्टनोरपि त्रय आदेशः प्राप्नोति । नैष दोषः । मण्डूकगतयो

---

* [V. M. om. त्रेस्त्रयः (४८)].

[1] गोतो णित् ७. १. ९० ; औतोम्शसोः ६. १. ९३. [2] संस्कृतं भक्षाः ४. २. १६ ; द्विगोर्लुगनपत्ये ४. १. ८८. [3] तद्धितार्थोत्तरपदसमाहारे च २. १. ५१. [4] गोरतद्धितलुकि ५. ४. ९२. [5] द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः ; त्रेस्त्रयः ६. ३. ४७ ; ४८.

ऽधिकाराः । यथा मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः । अथवैकयोगः करिष्यते । द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योस्त्रेस्त्रयः । ततो विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम् । अथवोभयं निवृत्तं तदपेक्षिष्यामहे ॥

हृदयस्य हृल्लेखयदण्लासेषु ॥ ६ । ३ । ५० ॥

यदण्ग्रहणमिदं प्रत्ययग्रहणं तत्र प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीति यदणन्ते प्राप्नोति ।

यदण्ग्रहणे रूपग्रहणं लेखग्रहणात् ॥ १ ॥

यदण्ग्रहणे रूपग्रहणं द्रष्टव्यम् । कुतः । लेखग्रहणात् । यदयं लेखग्रहणं करोति तज्ज्ञापयत्याचार्यो न यदणन्ते भवतीति ॥

अपर आह । अत्यल्पमिदमुच्यते । सर्वत्रैवोत्तरपदाधिकारे प्रत्ययग्रहणे रूपग्रहणं द्रष्टव्यम् । कुतः । लेखग्रहणादेव । किं प्रयोजनम् । कुमारी गौरितरा । घादिषु नद्या ह्रस्वो भवतीति[1] ह्रस्वत्वं प्रसज्येत ॥ यद्येतज्ज्ञाप्यते खित्यनव्ययस्य [६. ३. ६६] इति खित्येवानन्तरस्यानव्ययस्य ह्रस्वत्वं प्राप्नोति । खित्यनन्तरो ह्रस्वभावी नास्तीति कृत्वा खिदन्ते भविष्यति । ननु चायमस्ति स्तनंधय इति[2] । अत्रापि शपा[3] व्यवधानम् । एकादेशे कृते नास्ति व्यवधानम् । एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद् व्यवधानमेव । अथवैतदेव ज्ञापयति खिदन्ते ह्रस्वो भवतीति यदयमनव्ययस्येति प्रतिषेधं शास्ति । न हि खित्यनन्तरमव्ययमस्ति ॥*

पादस्य पदाज्यातिगोपहतेषु ॥ ६ । ३ । ५२ ॥

पदादेशोऽन्तोदात्तनिपातनं

पदादेशोऽन्तोदात्तनिपातनं कर्तव्यम् । किं प्रयोजनम् ।

पदोपहतार्थम् ॥ १ ॥

पादेनोपहतं पदोपहतम् । तृतीया कर्मणि [६. २. ४८] इति प्रकृतिस्वरत्वे पूर्वपदान्तोदात्तत्वं यथा स्यात्[4] ॥

---

* [V. M. om. वा शोकष्यञ्रोगेषु (५१)].

[1] घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः ६. ३. ४३. [2] नासिकास्तनयोर्ध्माधेटोः ३. २. २९. [3] कर्तरि शप् ३. १. ६८. [4] स्वरितो वाऽनुदात्ते पदादौ ८. २. ६.

उपदेशिवद्वचनं च स्वरसिद्ध्यर्थम् ॥ २ ॥

उपदेशिवद्भावश्च कर्तव्यः । किं प्रयोजनम । स्वरसिद्ध्यर्थम् । उपदेशावस्थायामन्तोदात्तनिपातने कृते समासस्वरेण[1] बाधनं यथा स्यात् । पदाजिः पदातिः ॥

पद्यत्यतदर्थे ॥ ६ । ३ । ५३ ॥

पद्भाव इके चरतावुपसंख्यानम् ॥ १ ॥

पद्भाव इके चरतावुसंख्यानं कर्तव्यम् । पादाभ्यां चरति पदिकः[2] ॥*

वा घोषमिश्रशब्देषु ॥ । ६ । ३ । ५६ ॥

निष्के चोपसंख्यानं कर्तव्यम् । पन्निष्केण पादनिष्केण ॥

उदकस्योदः संज्ञायाम् ॥ ६ । ३ । ५७ ॥

संज्ञायामुत्तरपदस्य च ॥ १ ॥

संज्ञायामुत्तरपदस्येति वक्तव्यम् । इहापि यथा स्यात् । क्षीरोदः लोहितोदः । **

एकहलादौ पूरयितव्येऽन्यतरस्याम् ॥ ६ । ३ । ५९ ॥

एकहलादाविति किमर्थम् । उदकस्थालम् ॥ उच्यमानेऽप्येतस्मिन्नत्र प्राप्नोति । एतदप्येकहलादि । किं कारणम् । एकैकवर्णवर्तित्वाद्वाच उच्चरितप्रध्वंसित्वाच्च वर्णानाम्[3] । एकैकवर्णवर्तिनी वाक् । न द्वौ वर्णौ युगपदुच्चारयति । तद्यथा । गौरित्युक्ते यावद्गकारे वाक्प्रवर्तते तावन्नौकारे न विसर्जनीये, यावदौकारे न गकारे न विसर्जनीये, यावद्विसर्जनीये न गकारे नौकारे । उच्चरितप्रध्वंसित्वाच्च वर्णानाम् । उच्चरितः प्रध्वस्तश्च । अथापरः प्रयुज्यते न वर्णो वर्णस्य सहायः ॥ एवं तर्ह्येक-

---

* [V. M. om. हिमकाषिहातिषु च (५४); ऋचः शे (५५)].

** [V. M. om. पेषंवासवाहनधिषु च (५८)].

[1] गतिकारकोपपदात् कृत् ६. २. १३९. [2] पर्पादिभ्यः ष्ठन् ४. ४. १०. [3] एकैकवर्णवर्तित्वाद्वाच उच्चरितप्रध्वंसित्वाच्च वर्णानाम् १. ४. १०९ वा. १०.

हलादावित्युच्यते सर्वश्चैकहलादिस्तत्र प्रकर्षगतिर्विज्ञास्यते । साधीयो य एकहलादिरिति । कश्च साधीयः । यत्रैकं हलमुच्चार्याजुच्चार्यते ॥*

इको ह्रस्वोऽङ्यो गालवस्य ॥ ६ । ३ । ६१ ॥

इको ह्रस्वत्वमुत्तरपदमात्रे ॥ १ ॥

इको ह्रस्वत्वमुत्तरपदमात्रे वक्तव्यम् । इहापि यथा स्यात् । अलाबुकर्कन्धुदृन्भुफलमिति ॥ किं पुनः कारणं न सिध्यति ।

सर्वान्ते हि लोकविज्ञानम् ॥ २ ॥

लोकविज्ञानाद्धि यदेव सर्वान्त्यं पदं तस्मिन्पूर्वपदस्य ह्रस्वत्वं स्यात् ॥

अथवैवं विग्रहः करिष्यते । अलाबूश्च कर्कन्धूश्चालाबुकर्कन्ध्वौ । अलाबुकर्कन्ध्वौ च दृन्भूश्चालाबुकर्कन्धुदृन्भ्वः । अलाबुकर्कन्धुदृन्भूनां फलमलाबुकर्कन्धुदृन्भुफलमिति । यद्येवं दृन्भ्वाः पूर्वनिपातः प्राप्नोति[1] । राजदन्तादिषु[2] पाठः करिष्यते ॥ अथवा दृन्भ्वाः फलं दृन्भुफलम् कर्कन्धूश्च दृन्भुफलं च कर्कन्धुदृन्भुफलम् । अलाबूश्च कर्कन्धुदृन्भुफलं चालाबुकर्कन्धुदृन्भुफलम् । एवमपि फलेनाकृतोऽभिसंबन्धो भवति । प्रत्येकं फलशब्दः परिसमाप्यते ॥

इयङुवङव्ययप्रतिषेधः ॥ ३ ॥

इयङुवङाविनामव्ययानां च प्रतिषेधो वक्तव्यः । श्रीकुलम् भ्रूकुलम् । काण्डीभूतं वृषलकुलम् । कुड्यीभूतं वृषलकुलम् ॥

अभ्रूकुंसादीनामिति वक्तव्यम् । भ्रूकुटिः भ्रूकुंसः ॥

अपर आह । अकारो भ्रूकुंसादीनामिति वक्तव्यम् । भ्रकुटिः भ्रकुंसः ॥

एक तद्धिते च ॥ ६ । ३ । ६२ ॥

तद्धिते किमुदाहरणम् । एकत्वम् एकता । नैतदस्ति प्रयोजनम् । पुंवद्भावेनाप्येतत्सिद्धम् । कथं पुंवद्भावः । तसिलादिष्वा कृत्वसुचः [६. ३. ३५] । इदं तर्हि प्रयोजनम् । एकस्या आगतमेकरूप्यम् एकमयम्[3] । इदं चाप्युदाहरणम् एकत्वम्

---

* [V. M. om. मन्थौदनसक्तुविन्दुवज्रभारहारवीवधगाहेषु च (३०)].

[1] अल्पाच्तरम् २. २. ३४. [2] राजदन्तादिषु परम् २. २. ३१. [3] हेतुमनुष्येभ्योन्यतरस्यां रूप्यः ; मयट् च ४. ३. ८१, ८२.

एकता । ननु चोक्तं पुंवद्भावेनाप्येतत्सिद्धमिति । न सिध्यति । उक्तमेतत्त्वतलोर्गुणवचनस्येति[1] ॥

अथोत्तरपदे किमुदाहरणम् । एकशाटी । नैतदस्ति । पुंवद्भावेनाप्येतसिद्धम् । कथं पुंवद्भावः । समानाधिकरणलक्षणः । इदं तर्हि प्रयोजनम् । एकस्याः क्षीरमेकक्षीरम् । इदं चाप्युदाहरणम् एकशाटी । ननु चोक्तं पुंवद्भावेनाप्येतत्सिद्धमिति । न सिध्यति । न कोपधायाः [६.३.३७] इति प्रतिषेधः प्राप्नोति । नैष दोषः । उक्तमेतत्कोपधप्रतिषेधे तद्धितवुग्रहणमिति[2] ॥*

खित्यनव्ययस्य ॥ ६ । ३ । ६६ ॥

।खिति ह्रस्वाप्रसिद्धिरनजन्तत्वात् ॥ १ ॥

खिति ह्रस्वस्याप्रसिद्धिः । कालिंमन्या हरिणिंमन्या । किं कारणम् । अनजन्तत्वात् । मुमि कृते[3]ऽनजन्तत्वाद् ह्रस्वत्वं न प्राप्नोति ॥

।सिद्धं तु ह्रस्वान्तस्य मुम्वचनात् ॥ २ ॥

सिद्धमेतत् । कथम् । ह्रस्वान्तस्य मुम् भवतीति वक्तव्यम् ॥

संनियोगाद्वा ॥ ३ ॥

अथवा संनियोगः करिष्यते । क एष यत्नश्चोद्यते संनियोगो नाम । चकारः कर्तव्यः मुम् च । किं च । यच्चान्यत् प्राप्नोति । किं चान्यत् प्राप्नोति । ह्रस्वत्वम् । सिध्यति । सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवास्तु । ननु चोक्तं खिति ह्रस्वाप्रसिद्धिरनजन्तत्वादिति । परिहृतमेतत् ।सिद्धं तु ह्रस्वान्तस्य मुम्वचनादिति । तत्तर्हि ह्रस्वग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते क्व प्रकृतम् । इको ह्रस्वोऽङ्यो गालवस्य [६१] इति । तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । खितीत्येषा सप्तमी ह्रस्व इति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मिन्निति निर्दिष्टे पूर्वस्य [१.१.६६] इति ॥

अथवा खिति ह्रस्वो भवतीत्युच्यते । खित्यनन्तरो ह्रस्वभावी नास्तीति कृत्वा भूतपूर्वगतिर्विज्ञास्यते । अजन्तं यद् भूतपूर्वमिति ॥ अथवा कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्र द्रष्टव्यम् । खिति ह्रस्वो भवतीत्युपस्थितमिदं भवत्यच[4] इति । तत्र वचनादनजन्तस्यापि भविष्यति ॥ इहापि वचनात् प्राप्नोति । वाङ्मन्यः । नैतदस्ति ।

---

* [V. M. om. ङ्यापोः संज्ञाछन्दसोर्बहुलम् (६३); त्वे च (६४) ; इष्टकेषीकामालानां चिततूलभारिषू (६५)].

[1] त्वतलोर्गुणवचनस्य ६. ३. ३५ वा. १०. [2] कोपधप्रतिषेधे तद्धितवुग्रहणम् ६. ३. ३७ वा. १. [3] अरुर्द्विषदजन्तस्य मुम् ६. ३. ६७. [4] अचश्च १. २. २८.

इक[1] इति वर्तते । एवमपि खट्वंमन्यः अत्र न प्राप्नोति । नैष दोषः । आब्ग्रहणमपि प्रकृतमनुवर्तते । क्व प्रकृतम् । ङ्यापोः संज्ञाछन्दसोर्बहुलम् [६३] इति । एवमपि कीलालपंमन्यः शुभंयंमन्यः अत्र न प्राप्नोति । तस्मात्पूर्वोक्तावेव परिहारौ ॥*

इच एकाचोऽम्प्रत्ययवच्च ॥ ६ । ३ । ६८ ॥

अमः प्रत्ययवदनुदेशे किं प्रयोजनम् ।

अमः प्रत्ययवदनुदेशे प्रयोजनमात्वपूर्वसवर्णगुणेयङुवङादेशाः ॥ १ ॥

अमः प्रत्ययवदनुदेश आत्वपूर्वसवर्णगुणेयङुवङादेशाः[2] प्रयोजनम् । आत्वं प्रयोजनम् । गांमन्यः । पूर्वसवर्णः प्रयोजनम् । स्त्रींमन्यः[3] । गुणः प्रयोजनम् । नरंमन्यः । इयङुवङौ प्रयोजनम् । श्रियंमन्यः भ्रुवंमन्यः ॥

अमः प्रत्ययवदनुदेश आत्वपूर्वसवर्णाप्रसिद्धिरप्रथमात्वात् ॥ २ ॥

अमः प्रत्ययवदनुदेशे आत्वपूर्वसवर्णयोरप्रसिद्धिः । किं कारणम् । अप्रथमात्वात् । प्रथमयोरित्युच्यते न चात्र प्रथमां पश्यामः । किं च भो आत्वं प्रथमयोरित्युच्यते । न खलु प्रथमयोरित्युच्यते प्रथमयोरिति तु विज्ञायते । कथम् । अम्शसोरित्युच्यते[4] त एवं विज्ञास्यामः शस्सहचरितो योऽम्शब्दः । कश्च शस्सहचरितः । प्रथमैव ॥ ननु च प्रत्ययवदनुदेशाद्भविष्यति । न सिध्यति । किं कारणम् ।

सामान्यातिदेशे विशेषानतिदेशः ॥ ३ ॥

सामान्ये ह्यतिदिश्यमाने विशेषोऽनतिदिष्टो भवति । तद्यथा । ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमिति सामान्यं यद्ब्राह्मणकार्यं तत्क्षत्रियेऽतिदिश्यते यद्विशिष्टं माठरे कौण्डिन्ये वा न तदतिदिश्यते । एवमिहापि सामान्यं यत्प्रत्ययकार्यं तदतिदिश्यते । यद्विशिष्टं द्वितीयैकवचने भवति प्रथमयोरिति न तदतिदिश्यते ॥

सिद्धं तु द्वितीयैकवचनवद्वचनात् ॥ ४ ॥

सिद्धमेतत् । कथम् । द्वितीयैकवचनवद् भवतीति वक्तव्यम् ॥

---

* [V. M. om. अरुर्द्विषदजन्तस्य मुम् (६७)].

[1] इको ह्रस्वोऽङ्यो गालवस्य ६. ३. ६१. [2] औतोम्शसोः ६. १. ९३; अमि पूर्वः ६. १. १०७; ऋतो ङिसर्वनामस्थानयोः ७. ३. ११०; अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६. ४. ७७. [3] वम्शसोः ६. ४. ८०; [4] औतोम्शसोः ६. १. ९३; वाम्शसोः ६. ४. ८०.

एकशेषनिर्देशाद्वा ॥ ५ ॥

अथवैकशेषनिर्देशोऽयम् । अम् च अम् च । इच एकाचोऽम् भवति । अम्प्रत्ययवच्चास्मिन्कार्यं भवतीति ॥

अथेह कथं भवितव्यम् । श्रियमात्मानं मन्यते ब्राह्मणकुलम् । श्रियंमन्यमाहोस्विच्छ्रिमन्यमिति । श्रियंमन्यमिति भवितव्यम् । स्वमोर्नपुंसकात् [७. १. २३] इति लुक् कस्मान्न भवति । नाप्राप्ते लुक्ययमारभ्यते स यथैव सुपो धातुप्रातिपदिकयोः [२. ४. ७१] इत्येतं बाधत एवं स्वमोर्नपुंसकादित्येतमपि बाधेत ॥ न बाधते । किं कारणम् । येन नाप्राप्ते तस्य बाधनं भवति न चाप्राप्ते सुपो धातुप्रातिपदिकयोरित्येतस्मिन्नेतदारभ्यते स्वमोर्नपुंसकादित्येतस्मिन्पुनः प्राप्ते चाप्राप्ते च । अथवा मध्येऽपवादाः पूर्वान्विधीन् बाधन्त इत्येवमयं सुपो धातुप्रातिपदिकयोरित्येतं बाधते स्वमोर्नपुंसकादित्येतं न बाधिष्यते ॥ एवं तर्ह्यसिद्धं बहिरङ्गमन्तरङ्गे इत्यसिद्धत्वाद्बहिरङ्गलक्षणस्यामोऽन्तरङ्गलक्षणो लुङ्न भविष्यति ॥ नैषा परिभाषेहोत्तरपदाधिकारे शक्या विज्ञातुम् । इह हि दोषः स्यात् । द्विषंतपः परंतपः[1] । संयोगान्तलोपो[2] न स्यात् । तस्माच्छ्रिमन्यमिति भवितव्यम् ॥ *

कारे सत्यागदस्य ॥ ६ । ३ । ७० ॥

अस्तुसत्यागदस्य कारे ॥ १ ॥

अस्तुसत्यागदस्य कार उपसंख्यानं कर्तव्यम् । अस्तुंकारः सत्यंकारः अगदंकारः ॥

भक्षस्य च्छन्दसि ॥ २ ॥

भक्षस्य च्छन्दस्युपसंख्यानं कर्तव्यम् । तस्य ते भक्षंकारस्य । छन्दसीति किमर्थम् । भक्षकारस्य ॥

धेनोर्भव्यायाम् ॥ ३ ॥

धेनोर्भव्यायामुपसंख्यानं कर्तव्यम् । धेनुंभव्या ॥

लोकस्य पृणे ॥ ४ ॥

लोकस्य पृण उपसंख्यानं कर्तव्यम् । लोकंपृणस्य ॥

---

*[V. M. om. वाचंयमपुरन्दरौ च (६९)].

[1] अरुर्द्विषदजन्तस्य मुम् ६. ३. ६७. [2] संयोगान्तस्य लोपः ८. २. २३.

इत्येऽनभ्याशस्य ॥ ५ ॥

इत्येऽनभ्याशस्योपसंख्यानं कर्तव्यम् । अनभ्याशमित्यः ॥

भ्राष्ट्राग्न्योरिन्धे ॥ ६ ॥

भ्राष्ट्राग्न्योरिन्ध उपसंख्यानं कर्तव्यम् । भ्राष्ट्रमिन्धः अग्निमिन्धः ॥

गिलेऽगिलस्य ॥ ७ ॥

गिले ऽगिलस्योपसंख्यानं कर्तव्यम् । तिमिंगिलः । अगिलस्येति किमर्थम् । गिलगिलः ॥

गिलगिले चेति वक्तव्यम् । तिमिंगिलगिलः ॥

उष्णभद्रयोः करणे ॥ ८ ॥

उष्णभद्रयोः करण उपसंख्यानं कर्तव्यम् । उष्णंकरणम् भद्रंकरणम् ॥

सूतोग्रराजभोजकुलमेरुभ्यो दुहितुः पुत्रड्वा ॥ ९ ॥

सूतोग्रराजभोजकुलमेरुभ्यो दुहितुः पुत्रड्वा भवतीति वक्तव्यम् । सूतपुत्री[1] सूतदुहिता । उग्रपुत्री उग्रदुहिता । राजपुत्री राजदुहिता । भोजपुत्री भोजदुहिता । कुलपुत्री कुलदुहिता । मेरुपुत्री मेरुदुहिता ॥

रात्रेः कृति विभाषा ॥ ६ । ३ । ७१ ॥

किमियं प्राप्ते विभाषाहोस्विदप्राप्ते । कथं च प्राप्ते कथं वाप्राप्ते । खितीति[2] वा नित्ये प्राप्तेऽन्यत्र वाप्राप्ते ।

रात्रेरप्राप्ते ॥ १ ।

रात्रेरप्राप्ते विभाषा । प्राप्ते नित्यो विधिः । रात्रिमन्यः । अप्राप्ते विभाषा । रात्र्यटः रात्रिमटः ॥

नलोपो नञः ॥ ६ । ३ । ७२ ॥

किमर्थं नञः सानुबन्धकस्य ग्रहणं क्रियते न नस्येत्येवोच्येत । नस्येतीयत्यु-

---

* [V. M. om. श्येनतिलस्य पाते ञे ६९)].

[1] टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्क्करपः ४. १. १५. [2] खित्यनव्ययस्य; अरुर्द्विषदजन्तस्य मुम् ६. ३. ६६, ६७.

च्यमाने कर्णपुत्रः वर्णपुत्र इत्यत्रापि प्रसज्येत । नैष दोषः । अर्थवद्ग्रहणे नानर्थकस्येत्येवमेतस्य न भविष्यति ॥ एवमपि प्रश्नपुत्रः विश्नपुत्र इत्यत्रापि प्राप्नोति । नैष दोषः । अननुबन्धकग्रहणे न सानुबन्धकस्येत्येवमेतस्य न भविष्यति ॥ एवमपि वामनपुत्रः पामनपुत्र इत्यत्रापि प्राप्नोति । तस्मात्सानुबन्धकस्य ग्रहणं कर्तव्यम् ॥

नञो नलोपे ऽवक्षेपे तिङ्युपसंख्यानम् ॥ १ ॥

नञो नलोपे ऽवक्षेपे तिङ्युपसंख्यानं कर्तव्यम् । अपचसि वै त्वं जाल्म । अकरोषि वै त्वं जाल्म ॥

तस्मान्नुडचि ॥ ६ । ३ ७४ ॥

किमर्थं तस्मादित्युच्यते न नुडचीत्येवोच्येत । नुडचीतीयत्युच्यमाने नञ एव नुट् प्रसज्येत ॥ एवं तर्हि पूर्वान्तः करिष्यते । तत्रायमप्यर्थस्तदोः सः सावनन्त्ययोः [७. २. १०६] इति तदोर्ग्रहणं न कर्तव्यं भवति । तत्र हि तवर्गानिर्देश एतत्प्रयोजनमिह मा भूत् अनेषः करोतीति । यावता पूर्वान्तः सोऽप्यदोषो भवति ॥ नैवं शक्यम् । अनुष्ण इति नलोपः प्रातिपदिकान्तस्य [८. २. ७] इति नलोपः प्रसज्येत । नुग्वचनान्न भविष्यति । ङमुट् तर्हि प्राप्नोति । तस्मात्परादिः कर्तव्यः परादौ च क्रियमाणे तस्मादिति वक्तव्यम् ॥

एकादिश्चैकस्य चादुक् ॥ ६ । ३ । ७६ ॥

किमर्थमादुगुच्यते न अदुगेवोच्येत । का रूपसिद्धिः एकान्नविंशतिः एकान्नशतम् । सवर्णदीर्घत्वेन सिद्धम् । न सिध्यति । अतो गुणे [६. १. ९७] इति पररूपत्वं प्राप्नोति ॥ एवं तर्ह्यदुट् करिष्यते । अदुट् चाशक्यः कर्तुमानुनासिक्यं हि न स्यात् । यद्धि तद्यरो ऽनुनासिकेऽनुनासिको वा [८. ४. ४५] इति पदान्तस्येत्येवं तत् । किं पुनः कारणं पदान्तस्येत्येवं तत् । इह मा भूत् । बुध्नः ब्रध्नः बध्नाति ॥ एवं तर्ह्यनुट् करिष्यते । अनुट् चाशक्यः कर्तुम् । विभाषयानुनासिक्यम् । तेनैतदेव रूपं स्यात् एकान्नविंशतिः इदं न स्यात् एका$\underset{\text{न}}{\text{दा}}$विंशतिरिति ॥ अस्तु तर्ह्यदुगेव । ननु चोक्तमतो गुण इति पररूपत्वं

---

* [V. M. om. नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या (७५)].

१ यजयाचयतविच्छप्रच्छरक्षो नङ् ३ ३. ९०. २ ऊषसुषिमुष्कमधोरः ५. २. १०७.

३ ङमो ह्रस्वादचि ङमुण्नित्यम् ८. ३. ३२. ४ अकः सवर्णे दीर्घः ६. १. १०१.

प्राप्नोतीति । नैष दोषः । अकारोच्चारणसामर्थ्यान्न भविष्यति ॥ यदि तर्हि प्राप्नुवन् विधिरकारोच्चारणसार्थ्याद्वाध्यते सवर्णदीर्घत्वमपि न प्राप्नोति । यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ वाध्यते । पररूपं च प्रत्यकारोच्चारणमनर्थकं सवर्णदीर्घत्वस्य पुनर्निमित्तमेव ॥ *

सहस्य सः संज्ञायाम् ॥ ६ । ३ । ७८ ॥

सहस्य हलोपवचनम् ॥ १ ॥

सहस्य हलोपो वक्तव्यः ॥

सादेशे हि स्वरे दोषः ॥ २ ॥

सादेशे हि स्वरे दोषः स्यात् । आन्तर्यत उदात्तानुदात्तयोः स्वरितः प्रसज्येत ॥ स तर्हि लोपो वक्तव्यः । न वक्तव्यः । आद्युदात्तनिपातनं करिष्यते स निपातनस्वरः प्रकृतिस्वरस्य बाधको भविष्यति ॥ एवमप्युपदेशिवद्भावो वक्तव्यः । स यथैव हि निपातनस्वरः प्रकृतिस्वरं बाधत एवं समासस्वरमपि बाधेत । सेष्टि सपशुबन्धम्[१] ॥

ग्रन्थान्ताधिके च ॥ ६ । ३ । ७९ ॥

ग्रन्थान्ते वचनानर्थक्यमव्ययीभावेन कृतत्वात् ॥ १ ॥

ग्रन्थान्ते वचनमनर्थकम् । किं कारणम् । अव्ययीभावेन कृतत्वात् । अव्ययीभावे चाकाले [६. ३. ८१] इत्येव सिद्धम्[२] ॥ यस्तर्हि कालोत्तरपदो ग्रन्थस्तदर्थमिदं वक्तव्यम् । सकाष्ठं ज्योतिषमधीते । सकलम् समुहूर्तम् ॥ **

वोपसर्जनस्य ॥ ६ । ३ । ८२ ॥

उपसर्जनस्य वावचने सर्वप्रसङ्गोऽविशेषात् ॥ १ ॥

उपसर्जनस्य वावचने सर्वप्रसङ्गः । सर्वस्योपसर्जनस्य सादेशः प्राप्नोति । अस्यापि प्राप्नोति । सहयुध्वा सहकृत्वा । किं कारणम् । अविशेषात् । न हि

---

* [V. M. om. नगोऽप्राणिष्वन्यतरस्याम् (७७)].

** [V. M. om. द्वितीये चानुपाख्ये (८०) ; अव्ययीभावे चाकाले (८१)].

[१] समासस्य ६. १. २२३.

[२] अव्ययं विभक्तिसमीप...साकल्यान्तवचनेषु २. १. ६.

कश्चिद्विशेष उपादीयत एवंजातीयकस्य सादेशो भवतीति । अनुपादीयमाने विशेषे सर्वप्रसङ्गः ॥

सिद्धं तु बहुव्रीहिनिर्देशात् ॥ १ ॥

सिद्धमेतत् । कथम् । बहुव्रीहिनिर्देशात् । बहुव्रीहिनिर्देशः कर्तव्यः ॥ एवमपि सहयुध्वप्रियः सहकृत्वप्रियः अत्रापि प्राप्नोति । बहुव्रीहौ यदुत्तरपदमित्येवं विज्ञास्यते । नन्वेतदपि बहुव्रीहावुत्तरपदम् । एवं तर्हि बहुव्रीहौ यदुपसर्जनमित्येवं विज्ञास्यते । बहुव्रीहौ च यदुपसर्जनं बहुव्रीहिं प्रति च यदुपसर्जनम् ॥ स तर्हि बहुव्रीहिनिर्देशः कर्तव्यः । न कर्तव्यः । इह कश्चित्प्रधानानामेव समासः कश्चिदुपसर्जनानामेव कश्चित्प्रधानोपसर्जनानाम् । तद्य उपसर्जनानामेव समासस्तदुपसर्जनम् ॥ अथवाकारो मत्वर्थीयः । तद्यथा । तुन्दः घाट इति ॥ अथवा मतुब्लोपोऽत्र द्रष्टव्यः । तद्यथा । पुष्पका एषां त इमे पुष्पकाः । कालका एषां त इमे कालका इति ॥

प्रकृत्याशिषि ॥ ६ । ३ । ८३ ॥

प्रकृत्याशिष्यगवादिषु ॥ १ ॥

प्रकृत्याशिष्यगवादिष्विति वक्तव्यम् । इह मा भूत् । सगवे सवत्साय सहलाय ॥ *

चरणे ब्रह्मचारिणि ॥ ६ । ३ । ८६ ॥

चरणे किं निपात्यते ।

ब्रह्मण्युपपदे समानपूर्वे व्रते कर्मणि चरेर्णिनिर्व्रतलोपश्च ॥ १ ॥

ब्रह्मण्युपपदे समानपूर्वे व्रते कर्मणि चरेर्णिनिर्व्रतलोपश्च निपात्यते । समाने ब्रह्मणि व्रतं चरतीति सब्रह्मचारी ॥ **

दृग्दृशवतुषु ॥ ६ । ३ । ८९ ॥

दृग्दृशवतुषु दृक्ष उपसंख्यानम् ॥ १ ॥

दृग्दृशवतुषु दृक्ष उपसंख्यानं कर्तव्यम् । सदृक्षासः प्रतिसदृक्षासः ॥ ***

---

* [V. M. om. समानस्य च्छन्दस्यमूर्धप्रभृत्युदर्केषु (८४); ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु (८५)].

** [V. M om. तीर्थे ये (८७); विभाषोदरे (८८)].

*** [V. M. om. इदंकिमोरीश्की (९०); आ सर्वनाम्नः (९१)].

समः समि ॥ ६ । ३ । ९३ ॥*

नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ॥ ६ । ३ । ११६ ॥

किमर्थमञ्चतिनह्यादिषु क्विब्ग्रहणं क्रियते । इह मा भूत्। समञ्चनम् उपनहनम् । नैतदस्ति प्रयोजनम् । उत्तरपदे[1] इति वर्तते न चान्तरेण क्विपमञ्चतिनह्यादय उत्तरपदानि भवन्ति तत्रान्तरेण क्विब्ग्रहणं क्विबन्त एव भविष्यति । तदादिविधिना प्राप्नोति ॥ अत उत्तरं पठति ।

अञ्चतिनह्यादिषु क्विब्ग्रहणानर्थक्यं यस्मिन्विधिस्तदादावल्ग्रहणे ॥ १ ॥

अञ्चतिनह्यादिषु क्विब्ग्रहणमनर्थकम् । किं कारणम् । यस्मिन्विधिस्तदादावल्ग्रहण एव भवति न चेदमल्ग्रहणम् ॥ एवं तर्हि सिद्धे सति यत्क्विब्ग्रहणं करोति तज्ज्ञापयत्याचार्योऽन्यत्र धातुग्रहणे तदादिविधिर्भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । अतः कृकमीत्यत्र अयस्कृत् अयस्कार इत्यपि सिद्धं भवति[2] ॥

विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये ॥ ६ । ३ । ९२ ॥

सहस्य सध्रिः ॥ ६ । ३ । ९५ ॥

अद्रिसध्र्योरन्तोदात्तत्ववचनं कृत्स्वरनिवृत्त्यर्थम् ॥ १ ॥

अद्रिसध्र्योरन्तोदात्तत्वं वक्तव्यम् । किं प्रयोजनम् । कृत्स्वरनिवृत्त्यर्थम् । कृत्स्वरो[3] मा भूत् । विष्वद्र्यङ् विष्वद्र्यञ्चौ विष्वद्र्यञ्चः । सध्र्यङ् सध्र्यञ्चौ सध्र्यञ्च[4]ः ॥

तत्र च्छन्दसि स्त्रियां प्रतिषेधः ॥ २ ॥

तत्र च्छन्दसि स्त्रियां प्रतिषेधो वक्तव्यः । विश्वाची घृताची ॥ यदि च्छन्दसि स्त्रियां प्रतिषेध उच्यते कथं सा कद्रीची । एवं तर्हि च्छन्दसि स्त्रियां बहुलमिति वक्तव्यम् ॥

---

* [V. M. om. तिरसस्तिर्यलोपे (९४)].

[1] अलुगुत्तरपदे ६. ३. १.

[2] अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य ८. ३. ४६;

[3] गतिकारकोपपदात् कृत् ६. २. १३९.

[4] उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य.

द्व्यन्तरुपसर्गेभ्योऽप ईत् ॥ ६ । ३ । ९७ ॥

समाप ईत्त्वप्रतिषेधः ॥ १ ॥

समाप ईत्त्वप्रतिषेधो वक्तव्यः । समापं नाम देवयजनम् ॥

अपर आह । ईत्त्वमनवर्णादिति वक्तव्यम् । समीपम् अन्तरीपम् । इह मा भूत् । प्रापम् परापम् ॥

ऊदनोर्देशे ॥ ६ । ३ । ९८ ॥

दीर्घोच्चारणं किमर्थं न उदनोर्देश इत्येवोच्येत । का रूपसिद्धिः अनूपः । सवर्णदीर्घत्वेन[१] सिद्धम् । न सिध्यति । अवग्रहे दोषः स्यात् ॥

अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु ॥ ६ । ३ । ९९ ॥

अषष्ठ्यतृतीयास्थस्येत्युच्यते तत्रेदं न सिध्यति । अन्यस्येदमन्यदीयम् । अन्यस्य कारकमन्यत्कारकम् ॥ एवं तर्ह्यविशेषेणान्यस्य दुक्छकारकयोरित्युक्त्वा ततो वक्ष्याम्यषष्ठ्यतृतीयास्थस्याशीराशास्थास्थितोत्सुकोतिरागेष्विति ॥ *

कोः कत्तत्पुरुषेऽचि ॥ ६ । ३ । १०१ ॥

कद्भावे त्रावुपसंख्यानम् ॥ १ ॥

कद्भावे त्रावुपसंख्यानं कर्तव्यम् । कुत्सितास्त्रयः कत्त्रयः । के वा त्रयः । न बिभ्युः कत्त्रयः ॥ **

पृषोदरादीनि यथोपदिष्टम् ॥ ३ । ३ । १०९ ॥

पृषोदरादीनीत्युच्यते कानि पृषोदरादीनि । पृषोदरप्रकाराणि । कानि पुनः पृषोदर-

---

* [V. M. om. अर्थे विभाषा (१००)].

** V. M. om. रथवदयोश्च (१०२); तृणे च जातौ (१०३); का पथ्यक्षयोः (१०४); ईषदर्थे (१०५); विभाषा पुरुषे (१०६); कवं चोष्णे (१०७); पथि च च्छन्दसि (१०८)].

[१] अकः सवर्णे दीर्घः ६. १. १०१.

प्रकाराणि । येषु लोपागमवर्णविकाराः श्रूयन्ते न चोच्यन्ते ॥ अथ यथेति किमिदम् । प्रकारवचने थाल् [५. ३. २३] ॥ अथ किमिदमुपदिष्टानीति । उच्चरितानि । कुत एतत् । दिशिरुच्चारणक्रियः । उच्चार्य हि वर्णानाहोपदिष्टा इमे वर्णा इति । कैः पुनरुपदिष्टाः । शिष्टैः । के पुनः शिष्टाः । वैयाकरणाः । कुत एतत् । शास्त्रपूर्विका हि शिष्टिर्वैयाकरणाश्च शास्त्रज्ञाः । यदि तर्हि शास्त्रपूर्विका शिष्टिः शिष्टिपूर्वकं च शास्त्रं तदितरेतराश्रयं भवति । इतरेतराश्रयाणि च न प्रकल्पन्ते । एवं तर्हि निवासत आचारतश्च । स चाचार आर्यावर्त एव । कः पुनरार्यावर्तः । प्रागादर्शात्प्रत्यक्कालकवनाद्दक्षिणेन हिमवन्तमुत्तरेण पारियात्रम् । एतस्मिन्नार्यनिवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किंचिदन्तरेण कस्याश्चिद्विद्यायाः पारगास्तत्रभवन्तः शिष्टाः ॥ यदि तर्हि शिष्टाः शब्देषु प्रमाणं किमष्टाध्याय्या क्रियते । शिष्टज्ञानार्थाष्टाध्यायी । कथं पुनरष्टाध्याय्या शिष्टाः शक्या विज्ञातुम् । अष्टाध्यायीमधीयानोऽन्यं पश्यत्यनधीयानं येऽत्र विहिताः शब्दास्तान्प्रयुञ्जानम् । स पश्यति । नूनमस्य दैवानुग्रहः स्वभावो वा योऽयं न चाष्टाध्यायीमधीते ये चात्र विहिताः शब्दास्तांश्च प्रयुङ्क्ते । अयं नूनमन्यानपि जानाति । एवमेषा शिष्टज्ञानार्थाष्टाध्यायी ॥

दिक्शब्देभ्यस्तीरस्य तारभावो वा ॥ १ ॥

दिक्शब्देभ्यस्तीरस्य तारभावो वा वक्तव्यः । दक्षिणतीरम् दक्षिणतारम् ॥

वाचो वादे डत्वं वलभावश्चोत्तरपदस्येञि ॥ २ ॥

वाचो वादे डत्वं वक्तव्यं वलभावश्चोत्तरपदस्येञि वक्तव्यः । वाग्वादस्यापत्यं वाड्वलिः ॥

षष उत्वं दतृदशसूत्तरपदादेः ष्टुत्वं च ॥ ३ ॥

षष उत्वं वक्तव्यमुत्तरपदादेः ष्टुत्वं च वक्तव्यम् । षोडन्[1] षोडश ॥

धासु वा ॥ ४ ॥

धासु वेति वक्तव्यमुत्तरपदादेः ष्टुत्वं च वक्तव्यम् । षोढा । षड्ढा कुरु ॥ अथ किमर्थं बहुवचननिर्देशः क्रियते न पुनर्धायामित्येवोच्येत । नानाधिकरणवाची यो धाशब्दस्तस्य ग्रहणं यथा विज्ञायेत[2] । इह मा भूत् । षड् दधातीति षड्धेति ॥

---

[1] वयसि दन्तस्य दतृ ५. ४. १४१. [2] अधिकरणविचाले च ५. ३. ४३.

दुरो दाशनाशदभध्येषु ॥ ५ ॥

दुरो दाशनाशदभध्येषूत्वं वक्तव्यमुत्तरपदादेश्च ष्टुत्वम् । दूडाशः दूणाशः दूडभः । दूढ्यः ॥

स्वरो रोहतौ छन्दसि ॥ ६ ॥

स्वरो रोहतौ छन्दस्युत्वं वक्तव्यम् । एहि॒ त्वं जा॑ये॒ स्वो रोहा॑व ॥

पीवोपवसनादीनां छन्दसि लोपो वक्तव्यः । पीवोपवसनानाम् पयोपवसनानाम् श्रियेदम् ॥

ढ्रलोपे पूर्वस्य दीर्घोऽणः ॥ ६ । ३ । १११ ॥

पूर्वग्रहणं किमर्थं न तस्मिन्निति निर्दिष्टे पूर्वस्य [१. १. ६६] इति पूर्वस्यैव भविष्यति । न सिध्यति न हि ढ्रलोपेनानन्तर्यम् ॥ इह कस्मान्न भवति । करणीयम् हरणीयम्[2] । नैवं विज्ञायते ढ्रोर्लोपो ढ्रलोपः ढ्रलोप इति । कथं तर्हि । ढ्रोर्लोपो ऽस्मिन्सोऽयं ढ्रलोपः ढ्रलोप इति । यद्येवं नार्थः पूर्वग्रहणेन भवति हि ढ्रलोपेनानन्तर्यम् ॥ इदं तर्हि प्रयोजनम् । उत्तरपद इति[3] वर्तत आनन्तर्यमात्रे कार्यं यथा स्यात् । औदुम्बरी राजा । पुना रूपाणि कल्पयेत् ॥

सहिवहोरोदवर्णस्य ॥ ६ । ३ । ११२ ॥

वर्णग्रहणं किमर्थं न सहिवहोरोदस्येत्येवोच्येत । वृद्धावपि[4] कृतायामोत्त्वं यथा स्यात् । उदवोढाम् उदवोढम् उदवोढेति ॥ अथावर्णग्रहणं किमर्थम् । इह मा भूत् । ऊढः ऊढवानिति[5] । नैतदस्ति प्रयोजनम् । भवत्येवात्रौत्त्वम् । श्रवणं कस्मान्न भवति । पूर्वत्वमस्य भविष्यति । इदमिह संप्रधार्यम् । ओत्त्वं क्रियतां पूर्वत्वमिति किमत्र कर्तव्यम् । परत्वादोत्त्वम् । अन्तरङ्गं पूर्वत्वम् ॥ एवं तर्हीदमिह संप्रधार्यम् । ओत्त्वं क्रियतां संप्रसारणमिति किमत्र कर्तव्यम् । परत्वादोत्त्वम् । नित्यं संप्रसारणम् । कृतेऽप्योत्त्वे प्राप्नोत्यकृतेऽपि । ओत्त्वमपि नित्यम् । कृतेऽपि संप्रसारणे प्राप्नोत्यकृतेपि । अनित्यमोत्वं न हि कृते संप्रसारणे प्राप्नोति । अन्तरङ्गं

---

* [V. M. om. संख्याविसायपूर्वस्याह्नस्याहनन्यतरस्यां ङौ (११०)].

[1] Cf. जाय एहि सुवो रोहाव रोहाव (तै. सं. १.७.९.१). [2] तव्यत्तव्यानीयरः ३. १. ९६ ; तस्य लोपः १. ३. ९. [3] अलुगुत्तरपदे ६. ३. १. [4] वदव्रजहलन्तस्याचः ७, २. ३. [5] वचि स्वपियजादीनां किति ६. १. १५ ; संप्रसारणाच्च ६. १. १०८.

पूर्वत्वम् । यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम् । न च संप्रसारणमेवौत्त्वस्य निमित्तं विहन्त्यवश्यं लक्षणान्तरं पूर्वत्वं प्रतीक्ष्यम् । उभयोर्नित्ययोः परत्वादोत्वम् । ओत्त्वे कृते संप्रसारणं संप्रसारणपरपूर्वत्वम् । तत्र कार्यकृतत्वात् पुनरोत्त्वं न भविष्यति ॥ *

इको वहेऽपीलोः ॥ ६ । ३ । १२१ ॥

अपील्वादीनामिति वक्तव्यम् । इह मा भूत् । रुचिवहम् चारुवहम् ॥

उपसर्गस्य घञ्यमनुष्ये बहुलम् ॥ ६ । ३ । १२२ ॥

अमनुष्यादिष्विति वक्तव्यम् । इह मा भूत् । प्रसेवः प्रहारः प्रसारः ॥

सादकारयोः कृत्रिमे ॥ १ ॥

सादकारयोः कृत्रिम इति वक्तव्यम् । इहैव यथा स्यात् । प्रासादः प्राकारः । इह मा भूत् । एषोऽस्य प्रसादः । एषोऽस्य प्रकारः ॥

प्रतिवेशादीनां विभाषा ॥ २ ॥

प्रतिवेशादीनां विभाषा दीर्घत्वं वक्तव्यम् । प्रतिवेशः प्रतीवेशः ॥ **

दस्ति ॥ ६ । ३ । १२४ ॥

कथमिदं विज्ञायते । दा इत्येतस्मिंस्तकारादौ । आहोस्विद्दा इत्येतस्मिंस्तकारान्त इति । किं चातः । यदि विज्ञायते तकारादाविति नीत्ता वीत्ता अत्र न प्राप्नोति । अथ विज्ञायते तकारान्त इति सुदत्तम् प्रतिदत्तम् अत्रापि प्राप्नोति[1] । यथेच्छसि तथास्तु ॥ अस्तु तावत्तकारादाविति । कथं नीत्ता वीत्ता । चर्त्वे[2] कृते भविष्यति । असिद्धं चर्त्वं तस्यासिद्धत्वान्न प्राप्नोति । आश्रयात्सिद्धत्वं भविष्यति ॥ अथवा पुनरस्तु तकारान्त इति । कथं सुदत्तम् प्रतिदत्तम् । नैतत्तकारान्तं थकारान्तमेतत्[3] ॥ ***

---

* [V. M. om. साढ्यै साढ्वा साढेति निगमे (११३); संहितायाम् (११४); कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य (११५); नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ (११६); वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम् (११७); वले (११८); मतौ बह्वचोऽनजिरादीनाम् (११९); शरादीनां च (१२०)].

** [V. M. om. इकः काशे (१२३)].

*** [V. M. om. अष्टनः संज्ञायाम् (१२५); छन्दसि च (१२६); चितेः कपि (१२७) विश्वस्य वसुराटोः (१२८); नरे संज्ञायाम् (१२९); मित्रे चर्षौ (१३०); मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ (१३१); ओषधेश्च विभक्तावप्रथमायाम् (१३२); ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम् (१३३); इकः सुञि (१३४); द्व्यचोतस्तिङः (१३५); निपातस्य च (१३६); अन्येषामपि दृश्यते (१३७).

[1] दो दद् घोः; अच उपसर्गात्तः ७. ४. ४६; ४७. [2] खरि च ८. ४. ५५. [3] थान्तेऽदोषस्तस्मात् थान्तः ७. ४. ४६. श्लो. वा.

चौ ॥ ६ । ३ । १३८ ॥

इहान्य आचार्याश्चौ प्रत्यङ्गस्य[1] प्रतिषेधमाहुस्तदिहापि साध्यम् । नैष दोषः । एतज्ज्ञापयति न चौ प्रत्यङ्गं भवतीति यदयं चौ दीर्घत्वं शास्ति ॥

संप्रसारणस्य ॥ ६ । ३ । १३९ ।

इको ह्रस्वात्संप्रसारणदीर्घत्वं विप्रतिषेधेन ॥ १ ॥

इको ह्रस्वात्संप्रसारणदीर्घत्वं भवति विप्रतिषेधेन[2] । इको ह्रस्वस्यावकाशः । ग्रामणिकुलम् सेनानिकुलम् । संप्रसारणदीर्घत्वस्यावकाशः । विभाषा ह्रस्वत्वं यदा न ह्रस्वत्वं सोऽवकाशः । ह्रस्वप्रसङ्ग उभयं प्राप्नोति । कारीषगन्धीपुत्रैः[3] । संप्रसारणदीर्घत्वं भवति विप्रतिषेधेन ॥ अथेदानीं दीर्घत्वे कृते पुनःप्रसङ्गविज्ञानाद्ध्रस्वत्वं कस्मान्न भवति । सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य तृतीये पादे तृतीयमाह्निकम् ॥ पादश्च समाप्तः ॥

---

[1] इको यणचि ; अकः सवर्णे दीर्घः ६. १. ७७ ; १०१ ; प्राचा दधीचित्यादौ अन्तरङ्गत्वादेकादेशयणादेशयोः कृतयोरनजन्तत्वाद्दीर्घो न प्राप्नोतीत्याह—इहान्य इति । (कै०).

[2] इको ह्रस्वोऽङ्यो गालवस्य ६. ३. ६१.

[3] ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे ६. १. १३.

अङ्गस्य ॥ ६ । ४ । १ ॥

आ कुतोऽयमधिकारः । आ सप्तमाध्यायपरिसमाप्तेरङ्गाधिकारः ॥ यद्या सप्तमाध्यायपरिसमाप्तेरङ्गाधिकारो गुणो यङ्लुकोः [७. ४. ८२] इति यङ्लुग्ग्रहणं कर्तव्यम्[1] । प्रागभ्यासविकारेभ्यः[2] पुनरङ्गाधिकारे सति प्रत्ययलक्षणेन[3] सिद्धम् । अस्तु तर्हि प्रागभ्यासविकारेभ्योऽङ्गाधिकारः ॥ यदि प्रागभ्यासविकारेभ्योऽङ्गाधिकारो वव्रश्च[4] वकारस्य संप्रसारणं प्राप्नोति । आ सप्तमाध्यायपरिसमाप्तेः पुनरङ्गाधिकारे सत्युरदत्त्वस्य स्थानिवद्भावान्न संप्रसारणे संप्रसारणम् (६. १. ३७) इति प्रतिषेधः सिद्धो भवति[5] । स चेदानीमपरिहारो भवति यत्तदुक्तमङ्गान्यत्वाच्च सिद्धमिति[6] ॥ अस्तु तर्ह्या सप्तमाध्यायपरिसमाप्तेरङ्गाधिकारः । ननु चोक्तं गुणो यङ्लुकोरिति यङ्लुग्ग्रहणं कर्तव्यमिति । क्रियते न्यास एव ॥

किं पुनरियं स्थानषष्ठी । अङ्गस्य स्थान इति । एवं भवितुमर्हति[7] ।

अङ्गस्येति स्थानषष्ठी चेत्पञ्चम्यन्तस्य चाधिकारः ॥ १ ॥

अङ्गस्येति स्थानषष्ठी चेत्पञ्चम्यन्तस्य चाधिकारः कर्तव्यः । अङ्गादित्यपि वक्तव्यम् । अनुच्यमाने ह्यतो भिस ऐस् भवतीत्यत इति पञ्चम्यङ्गस्येति स्थानषष्ठी तत्राशक्यं विविभक्तित्वादत इति पञ्चम्याङ्गं विशेषयितुम्[8] । तत्र को दोषः । अकारात्परस्य भिस्मात्रस्यैस्भावो भवतीतीहापि प्रसज्येत । ब्राह्मणभिस्सा ओदनभिस्सटेति ॥

अवयवषष्ठ्यादीनां चाप्रसिद्धिः ॥ २ ॥

अवयवषष्ठ्यादयश्च न सिध्यन्ति । तत्र को दोषः । शास इदङ्हलोः (६. ४. ३४) इति शासेश्चान्त्यस्य स्यादुपधामात्रस्य च । ऊदुपधाया गोहः (६. ४. ८९) इति गोहेश्चान्त्यस्य स्यादुपधामात्रस्य च ॥

---

[1] न लुमताङ्गस्य (१. १. ६३) इत्यनेनाङ्गाधिकारकार्ये प्रतिषिध्यमाने सति (कै.). [2] अत्र लोपोऽभ्यासस्य ७. ४. ५८. [3] प्रत्ययलोपे प्रत्ययलक्षणम् १. १. ६२. [4] लिट्यभ्यासस्योभयेषाम् ६. १. १७. उरत् ७. ४. ६६; उरण् रपरः १. १. ५१; हलादिः शेषः ७. ४. ६०. [5] अचः परस्मिन् पूर्वविधौ १. १. ५७. [6] अङ्गान्यत्वाद्वा सिद्धम् ७. ४. ९३ वा. ४. [7] षष्ठी स्थानेयोगा १. १. ४९. [8] अतो भिस ऐस् ७. १. ९.

सिद्धं तु परस्परं प्रत्यङ्गप्रत्ययसंज्ञाभावात् ॥ ३ ॥

सिद्धमेतत् । कथम् । परस्परं प्रत्यङ्गप्रत्ययसंज्ञे भवतः । अङ्गसंज्ञां प्रति प्रत्ययसंज्ञा प्रत्ययसंज्ञां प्रत्यङ्गसंज्ञा ॥ किमतो यत्परस्परं प्रत्यङ्गप्रत्ययसंज्ञे भवतः ।

संबन्धषष्ठीनिर्देशश्च ॥ ४ ॥

संबन्धषष्ठीनिर्देशश्चायं वृतो भवति । अङ्गस्य यो भिस्शब्द इति । किं चाङ्गस्य भिस्शब्दः । निमित्तम् । यस्मिन्नङ्गमित्येतद्भवति । कस्मिंश्चैतद्भवति । प्रत्यये ॥ एवमप्यवयवषष्ठ्यादयो ऽविशेषिता भवन्ति । अवयवषष्ठ्यादयोऽपि संबन्ध एव ॥ एवमपि स्थानमविशेषितं भवति । स्थानमपि संबन्ध एव ॥ एवमपि न ज्ञायते क्व स्थानषष्ठी क्व विशेषणषष्ठीति । यत्र षष्ठ्यन्ययोगं नापेक्षते सा स्थानषष्ठी । यत्र ह्यन्ययोगमपेक्षते सा विशेषणषष्ठी ॥

कानि पुनरङ्गाधिकारस्य प्रयोजनानि ।

अङ्गाधिकारस्य प्रयोजनं संप्रसारणदीर्घत्वे ॥ ५ ॥

हल उत्तरस्य संप्रसारणस्य दीर्घो भवति[1] । हूतः जीनः संवीतः शूनः । अङ्गस्येति किमर्थम् । निरुतम् दुरुतम् ॥

नाम्सनोश्च ॥ ६ ॥

नाम्सनोश्च दीर्घत्वे प्रयोजनम् । नामि दीर्घो भवति[2] । अग्नीनाम् वायूनाम् । अङ्गस्येति किमर्थम् । क्रिमिणां[3] पश्य । पामनां पश्य ॥ सनि दीर्घो भवति[4] । चिचीषति तुष्टूषति । अङ्गस्येति किमर्थम् । दधि सनोति । मधु सनोति ॥

लिङ्येत्वे ॥ ७ ॥

लिङ्येत्वे[5] प्रयोजनम् । ग्लेयात् म्लेयात् । अङ्गस्येति किमर्थम् । निर्यायात् निर्वायात् ॥

अतो भिस ऐस्त्वे ॥ ८ ॥

अतो भिस ऐस्त्वे[6] प्रयोजनम् । वृक्षैः प्लक्षैः । अङ्गस्येति किमर्थम् । ब्राह्मणभिस्सा ओदनभिस्सटा ॥

---

[1] हलः ६. ४. २. [2] नामि ६. ४. ३. [3] लोमादिपामादिपिच्छादिभ्यः शनेलचः (५. २. १००) इति नप्रत्ययः, ततष्टाप् (कै.). [4] अज्झनगमां सनि ६. ४. १६. [5] वान्यस्य संयोगादेः ६. ४. ६८. [6] अतो भिस ऐस् ७. १. ९.

लुङादिष्वडाटौ ॥ ९ ॥

लुङादिष्वडाटौ[1] प्रयोजनम् । अकार्षीत् ऐहिष्ट । अङ्गस्येति किमर्थम् । प्राकरोत् उपैहिष्ट ॥

इयङुवङ्युष्मदस्मत्तातङामिनुडानेमुक्केह्रस्वयिदीर्घभितत्वानि ॥ १० ॥

इयङुवङौ[2] प्रयोजनम् । श्रियौ श्रियः । भ्रुवौ भ्रुवः । अङ्गस्येति किमर्थम् । श्र्यर्थम् भ्र्वर्थम् ॥ युष्मदस्मदोः प्रयोजनम् । साम आकम् [७. १. ३३] युष्माकम् अस्माकम् । अङ्गस्येति किमर्थम् । युष्मत्साम । अस्मत्साम ॥ तातङ्[3] प्रयोजनम् । जीवताद्भवान् । अङ्गस्येति किमर्थम् । पच हि तावत्त्वम् । जल्प तु तावत्त्वम् ॥ आमि नुट् प्रयोजनम्[4] । कुमारीणाम् किशोरीणाम् । अङ्गस्येति किमर्थम् । कुमारी आमित्याह । किशोरी आमित्याह ॥ आने मुक् [७. २. ८२] प्रयोजनम् । पचमानः यजमानः । अङ्गस्येति किमर्थम् । प्राणः ॥ के ह्रस्वः[5] प्रयोजनम् । किशोरिका कुमारिका । अङ्गस्येति किमर्थम् । कुमारीं कायति कुमारीकः ॥ यि दीर्घः[6] प्रयोजनम् । चीयते स्तूयते । अङ्गस्येति किमर्थम् । दधियानम् मधुयानम् ॥ भि तत्वं[7] प्रयोजनम् । अद्भिः अद्भ्यः । अङ्गस्येति किमर्थम् । अब्भारः अब्भक्षः ॥

नैतानि सन्ति प्रयोजनानि । कथम् ।

अर्थवद्ग्रहणप्रत्ययग्रहणाभ्यां सिद्धम् ॥ ११ ॥

अर्थवद्ग्रहणप्रत्ययग्रहणाभ्यामेवैतानि सिद्धानि । क्वचिदर्थवद्ग्रहणे नानर्थकस्येत्येवं भविष्यति क्वचित्प्रत्ययाप्रत्यययोर्ग्रहणे प्रत्ययस्यैव ग्रहणं भवतीति ॥ अथवा प्रत्यय इति प्रकृत्याङ्गकार्यमध्येष्ये । यदि प्रत्यय इति प्रकृत्याङ्गकार्यमधीषे प्राकरोत् उपैहिष्ट उपसर्गात्पूर्वमडाटौ प्राप्नुतः । सिद्धं तु प्रत्ययग्रहणे यस्मात्स तदादितदन्तविज्ञानात्[8] । सिद्धमेतत् । कथम् । प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य च ग्रहणं भवतीत्येवमुपसर्गात्पूर्वमडाटौ न भविष्यतः ॥

हलः ॥ ६ । ४ । २ ॥

इह कस्मान्न भवति । तृतीयः[9] ।

लुङ्लङ्लृङ्क्ष्वडुदात्तः ; आडजादीनाम् ६. ४. ७१, ७२. २ आचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६. ४. ७७. ३ तुह्योस्तातङाशिष्यन्यतरस्याम् ७. १. ३५. ४ ह्रस्वनद्यापो नुट् ७. १. ५४. ५ केऽणः ७. ४. १३. ६ अकृत्सार्वधातुकयोर्दीर्घः ७. ४. २५. ७ अपो भि. ७. ४. ४८. ८ सिद्धं तु प्रत्ययग्रहणे यस्मात्सतदादितदन्तविज्ञानात् १. ४. १३ वा ७. ९ त्रेः संप्रसारणं च ५. २. ५५.

अण्प्रकरणादृकारस्याप्राप्तिः ।

अण्प्रकरणादृकारस्य दीर्घत्वं न भविष्यति । अण इति वर्तते । क्व प्रकृतम् । ढ्रलोपे पूर्वस्य दीर्घोऽणः [६. ३. १११] इति ॥ तद्वा इकः काशे [१२३] इत्यनेनेग्ग्रहणेन व्यवच्छिन्नं न शक्यमनुवर्तयितुम् ।

इग्ग्रहणस्य चाण्विशेषणत्वात् ।

अण्विशेषणमिग्ग्रहणम् । अण इक इति ॥ यदि तर्ह्यण्विशेषणमिग्ग्रहणं चौ[1] दीर्घो भवतीतीह न प्राप्नोति । अवाचा अवाचे । नैष दोषः । अण्ग्रहणमनुवर्तत इग्ग्रहणं निवृत्तम् ॥ एवमपि कर्तृचा कर्तृचे अत्र न प्राप्नोति । यथालक्षणमप्रयुक्ते ॥ अथवोभयं निवृत्तम् । कस्मान्न भवति तृतीय इति । निपातनात् । किं निपातनम् । द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् [२. २. ३] इति ॥

नामि ॥ ६ । ४ । ३ ॥

किमर्थमामः सनकारस्य ग्रहणं क्रियते न आमि दीर्घ इत्येवोच्येत । केनेदानीं सनकारके भविष्यति । नुडयमाम्भक्त आम्ग्रहणेन ग्राहिष्यते ॥ अत उत्तरं पठति ।

नामि दीर्घ आमि चेत्स्याकृते दीर्घे न नुड्भवेत् ।

नामि दीर्घ आमि चेत्स्याकृते दीर्घत्वे न नुट् स्यात् । अग्नीनाम् इन्दूनाम् ॥ इदमिह संप्रधार्यम् । दीर्घत्वं क्रियतां नुडिति[2] किमत्र कर्तव्यम् । परत्वान्नुट् । नित्यं दीर्घत्वम् । कृतेऽपि नुटि प्राप्नोत्यकृतेऽपि । नित्यत्वाद्दीर्घत्वे कृते ह्रस्वाश्रयो नुड्न प्राप्नोति ॥ एवं तर्ह्याहायं ह्रस्वान्तान्नुडिति न च ह्रस्वान्तोऽस्ति तत्र वचनाद्भविष्यति ॥

वचनाद्यत्र तन्नास्ति

नेदं वचनाल्लभ्यम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् । किम् । यत्र दीर्घत्वं प्रतिषिध्यते । तिसृणाम् चतसृणामिति ॥ नैतदस्ति प्रयोजनम् । इह तावच्चतसृणामिति षट्चतुर्भ्यश्च [७. १. ५५] इत्येवं भविष्यति । तिसृणामिति त्रिग्रहणमपि तत्र प्रकृतमनुवर्तते । क्व प्रकृतम् । त्रेस्त्रयः [५३] इति ॥ इदं तर्हि । त्वं नृणां नृपते जायसे शुचिः ॥ नैकमुदाहरणं ह्रस्वग्रहणं प्रयोजयति । तत्र वचनाद्भूतपूर्वगतिर्विज्ञास्यते । ह्रस्वान्तं यद्भूतपूर्वमिति ॥ उत्तरार्थं तर्हि सनकारग्रहणं कर्तव्यम् ।

---

१ चौ ६. ३. १३८. २ ह्रस्वनद्यापो नुट् ७. १. ५४. ३ न तिसृचतसृ ६. ४. ४. ४ नृ च ६. ४. ६. ५ ऋ. सं. २. १. १.

नोपधायाश्च चर्मणाम् ॥

नोपधाया नामि यथा स्यात् । इह मा भूत् । चर्मणाम् वर्मणामिति ॥

नामि दीर्घ आमि चेत्स्यात्कृते दीर्घे न नुड्भवेत् ॥
वचनाद्यत्र तन्नास्ति नोपधायाश्च चर्मणाम् ॥ *

इन्हन्पूषार्यम्णां शौ ॥ ६ । ४ । १२ ॥

सौ च ॥ ६ । ४ । १३ ॥

हनः क्वावुपधादीर्घत्वप्रसङ्गः ॥ १ ॥

हनः क्वावुपधालक्षणं दीर्घत्वं प्राप्नोति । अनुनासिकस्य क्विझलोः क्ङिति [१५] इति । तस्य प्रतिषेधो वक्तव्यः । वृत्रहणौ वृत्रहण इति ॥ नियमवचनात्सिद्धम् । इन्हन्पूषार्यम्णां शौ सौ चेत्येतस्मान्नियमवचनाद्दीर्घत्वं न भविष्यति ।

नियमवचनात्सिद्धमिति चेत्सर्वनामस्थानप्रकरणे नियमवचनादन्यत्रानियमः ॥ २ ॥

नियमवचनात्सिद्धमिति चेत्सर्वनामस्थानप्रकरणे नियमवचनादन्यत्र नियमो न प्राप्नोति । क्वान्यत्र । वृत्रहणि भ्रूणहनि ॥ एवं तर्हि

दीर्घविधिर्य इहेन्प्रभृतीनां तं विनियम्य सुटीति सुविद्वान् ।

दीर्घविधिर्य इहेन्प्रभृतीनां तं सर्वनामस्थाने विनियम्य । इन्हन्पूषार्यम्णां सर्वनामस्थाने दीर्घो भवति । किमर्थमिदम् । नियमार्थम् । इन्हन्पूषार्यम्णां सर्वनामस्थान एव नान्यत्र ।

शौ नियमं पुनरेव विदध्यात्

ततः शौ । शावेव सर्वनामस्थाने नान्यत्र । ततः सौ सावेव सर्वनामस्थाने नान्यत्र ॥

भ्रूणहनीति तथास्य न दुष्येत् ॥ १ ॥

तथास्य भ्रूणहनीति न दोषो भवति ॥

---

* [V. M. om. न तिसृचतसृ (४); छन्दस्युभयथा (५); नृ च (६); नोपधायाः (७); सर्वनामस्थाने चासंबुद्धौ (८); वा षपूर्वस्य निगमे (९); सान्तमहतः संयोगस्य (१०); अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम् (११)].

१ नोपधायाः ६. ४. ७; षट्चतुर्भ्यश्च ७. १. ५५. २ सर्वनामस्थाने चासंबुद्धौ ६. ४. ८.

शासि निवर्त्य सुटीत्यविशेषे शौ नियमं कुरु वाप्यसमीक्ष्य ।

अथवा निवृत्ते सर्वनामस्थानप्रकरणे ऽविशेषेण शौ नियमं वक्ष्यामि । इन्हन्पूषार्यम्णां शावेव । ततः सौ । सावेव ॥ इहापि तर्हि नियमान्न प्राप्नोति । इन्द्रो वृत्रहायते[1] ।

दीर्घविधेरुपधानियमान्मे हन्त यि दीर्घविधौ च न दोषः ॥ २ ॥

उपधालक्षणदीर्घत्वस्य नियमो न चैतदुपधालक्षणं दीर्घत्वम् ॥

सुट्यपि वा प्रकृतेऽनवकाशः शौ नियमो ऽप्रकृतप्रतिषेधे ।

अथवानुवर्तमाने सर्वनामस्थानग्रहणेऽनवकाशः शौ नियमोऽप्रकृतस्यापि दीर्घत्वस्य नियामको भविष्यति । कथम् ।

यस्य हि शौ नियमः सुटि नैतत्तेन न तत्र भवेद्विनियम्यम् ॥ ३ ॥

यस्य हि शिः सर्वनामस्थानं न तस्य सुट् । यस्य सुट् सर्वनामस्थानं न तस्य शिः[2] । तत्र सर्वनामस्थानप्रकरणे नियम्यं नास्तीति कृत्वाविशेषेण शौ नियमो विज्ञास्यते ॥

दीर्घविधिर्य इहेन्प्रभृतीनां तं विनियम्य सुटीति सुविद्वान् ।
शौ नियमं पुनरेव विदध्याद्भ्रूणहनीति तथास्य न दुष्येत् ॥ १ ॥
शासि निवर्त्य सुटीत्यविशेषे शौ नियमं कुरु वाप्यसमीक्ष्य ।
दीर्घविधेरुपधानियमान्मे हन्त यि दीर्घविधौ च न दोषः ॥ २ ॥
सुट्यपि वा प्रकृतेऽनवकाशः शौ नियमो ऽप्रकृतप्रतिषेधे ।
यस्य हि शौ नियमः सुटि नैतत्तेन न तत्र भवेद्विनियम्यम् ॥ ३ ॥

अत्वसन्तस्य चाधातोः ॥ ६ । ४ । १४ ॥

अत्वसन्तस्य दीर्घत्वे पित उपसंख्यानम् ॥ १ ॥

अत्वसन्तस्य दीर्घत्वे पित उपसंख्यानं कर्तव्यम् । गोमान् यवमान्[3] । किं पुनः कारणं न सिध्यति । अननुबन्धकग्रहणे हि सानुबन्धकस्य ग्रहणं नेत्येवं पितो न प्राप्नोति ॥ अननुबन्धकग्रहण इत्युच्यते सानुबन्धकस्येदं ग्रहणम् । एवं तर्हि तदनुबन्धकग्रहणे ऽतदनुबन्धकस्य ग्रहणं नेत्येवं पितो न प्राप्नोति ॥

तत्तर्ह्युपसंख्यानं कर्तव्यम् । न कर्तव्यम् । पकारलोपे कृते नानुबन्तं भवत्य-

---

[1] कर्तुः क्यङ् सलोपश्च ३. १. ११, नः क्ये १. ४. १५, नलोपः प्रातिपदिकान्तस्य ८. २. ७; अकृत्सार्वधातुकयोर्दीर्घः ७. ४. २५. [2] शि सर्वनामस्थानम् ; सुडनपुंसकस्य १. १. ४२, ४३ ; [3] तदस्यास्त्यस्मिन्निति मतुप् ५. २. ९४.

त्वन्तमेव । यथैव तर्हि पकारलोपे कृते नातुबन्तमेवमुकारलोपेऽपि कृते नात्वन्तम् । ननु च भूतपूर्वगत्या भविष्यत्यत्वन्तम् । यथैव तर्हि भूतपूर्वगत्यात्वन्तमेवमतुबन्तमपि । एवं तर्ह्याश्रीयमाणे भूतपूर्वगतिरत्वन्तं चाश्रीयते नातुबन्तम् ॥ न सिध्यति । इह हि व्याकरणे सर्वेष्वेव सानुबन्धकग्रहणेषु रूपमाश्रीयते यत्रास्यैतद्रूपमिति । रूपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकिकं प्रयोगम् । तस्मिंश्च लौकिके प्रयोग सानुबन्धकानां प्रयोगो नास्तीति कृत्वा द्वितीयः प्रयोग उपास्यते । कोऽसौ । उपदेशो नाम । उपदेशे चैतदतुबन्तं नात्वन्तम् ॥

यदि पुनरत्शब्दं गृहीत्वा दीर्घत्वमुच्येत । नैवं शक्यम् । इहापि प्रसज्येत । जगत् जनगत्[1] । अर्थवद्ग्रहणे नानर्थकस्येत्येवमेतस्य न भविष्यति । इहापि तर्हि न प्राप्नोति । कृतवान् भुक्तवानिति । क्व तर्हि स्यात् । पचन् यजन् । न वा अत्रेष्यते ॥ अनिष्टं च प्राप्नोति । इष्टं च न सिध्यति । तस्मादुपसंख्यानं कर्तव्यम् ॥ *

अज्झनगमां सनि ॥ ६ । ४ । १६ ॥

गमेर्दीर्घत्व इङ्ग्रहणम् ॥ १ ॥

गमेर्दीर्घत्व इङ्ग्रहणं कर्तव्यम् । इङ्गमेरिति वक्तव्यम्[2] । इह मा भूत् । संजिगंसते वत्सो मात्रेति ॥

अग्रहणे ह्यनादेशस्यापि दीर्घप्रसङ्गः ॥ २ ॥

अक्रियमाणे हीङ्ग्रहणेऽनादेशस्यापि दीर्घत्वं प्रसज्येत । संजिगंसते वत्सो मात्रेति ॥

न वा छन्दस्यनादेशास्यापि दीर्घत्वदर्शनादिङ्ग्रहणानर्थक्यम् ॥ ३ ॥

न वेङ्ग्रहणं कर्तव्यम् । किं कारणम् । छन्दस्यनादेशस्यापि दीर्घत्वदर्शनात् । छन्दस्यनादेशस्यापि गमेर्दीर्घत्वं दृश्यते । स्वर्गं लोकं संजिगांसत् । छन्दस्यनादेशस्यापि गमेर्दीर्घत्वदर्शनादिङ्ग्रहणमनर्थकम् ॥ यथैव तर्हि च्छन्दस्यनादेशस्यापि गमेर्दीर्घत्वं भवत्येवं भाषायामपि प्राप्नोति । तस्मादिङ्ग्रहणं कर्तव्यम् ॥ न कर्तव्यम् । योगविभागः करिष्यते । अचः सनि । अजन्तानां सनि दीर्घो भवति । ततो हनिगम्योः । हनिगम्योश्च सनि दीर्घो भवति । अच इत्येव । अचः स्थाने यौ हनिगमी ॥

---

* [V. M. om. अनुनासिकस्य क्विझलोः क्ङिति (१५)].

[1] द्युतिगमिजुहोतीनां द्वे चेति वक्तव्यम् । दिद्युत् । द्युति ॥ गमि । जगत् । गमि । ३. १. १७८ वा. ३ महाभाष्य ; क्विप् च ३. २. ७६ ; क्वौ ६. ४. ४० ; ह्रस्वस्य पिति कृति तुक् ६. १. ७१.

[2] इङश्च २. ४. ४८.

अथोपधाग्रहणमनुवर्तत उताहो न[1] । किं चातः ।

सनि दीर्घ उपधाधिकारश्चेद् व्यञ्जनप्रतिषेधः ॥ ४ ॥

सनि दीर्घ उपधाधिकारश्चेद्व्यञ्जनस्य प्रतिषेधो वक्तव्यः । चिचीषति तुष्टूषतीत्येवमर्थम् ॥ एवं तर्हि निवृत्तम् ।

अनधिकार उक्तम् ॥ ५ ॥

किमुक्तम् । हनिगमिदीर्घेष्वज्ग्रहणमिति[2] ॥ नैष दोषः । उक्तमेतद् ह्रस्वो दीर्घः प्लुत इति यत्र ब्रूयादच इत्येतत्तत्रोपस्थितं द्रष्टव्यमिति[3] ॥ *

च्छ्वोः शूडनुनासिके च ॥ ६ । ४ । १९ ॥

अथ ऊडादिः कस्मान्न भवति । आदिष्टिद्भवतीति[4] प्राप्नोति । कस्य पुनरादिः । वकारस्य । अस्तु । वकारस्य का प्रतिपत्तिः । लोपो व्योर्वलि [६. १. ६६] इति लोपो भविष्यति । नैवं शक्यम् । ज्वरत्वरस्रिव्यविमवामुपधायाश्च [६. ४. २०] इति द्वावूटौ स्याताम् ॥ एवं तर्हि नैष टित् । कस्तर्हि । ठित् । यदि तर्हि ठित् धौतः पट इत्येत्येधत्यूट्सु [६. १. ८९] इति वृद्धिर्न प्राप्नोति । चर्त्वे[5] कृते भविष्यति । असिद्धं[6] चर्त्वं तस्यासिद्धत्वान्न प्राप्नोति । आश्रयात्सिद्धत्वं भविष्यति । असत्यन्यस्मिन्नाश्रयात्सिद्धत्वं स्यादस्ति चान्यः सिद्धो वाह ऊडिति[7] । एषोऽपि टित्करिष्यते । तत्रोभयोश्चर्त्वे कृत आश्रयात्सिद्धत्वं भविष्यति ॥

अथ क्ङिद्ग्रहणमनुवर्तत उताहो न[8] । किं चातः ।

शूट्त्वे क्ङिदधिकारश्चेच्छः षत्वम्

शूट्त्वे क्ङिदधिकारश्चेच्छः षत्वं वक्तव्यम्[9] । प्रष्टा प्रष्टुम् प्रष्टव्यम् ॥

तुक्प्रसङ्गश्च ।

तुक् च प्राप्नोति[10] ॥ निवृत्तेऽपि वै क्ङिद्ग्रहणेऽवश्यमत्र तुगभावार्थो यत्नः कर्तव्यः । अन्तरङ्गत्वाद्धि तुक् प्राप्नोति । च्छ्वोरिति संनिपातग्रहणं विज्ञायते । ननु चैवमप्यन्त्यस्य प्राप्नोति[11] । संनिपातग्रहणसामर्थ्यात्सर्वस्य भविष्यति । एवमप्यङ्गस्य

---

* [V. M. om. तनोतेर्विभाषा (१७); क्रमश्च क्त्वि (१८)].

[1] नोपधायाः ६. ४. ७. [2] ह्रस्वादिविधिरलोन्त्यस्येति चेद् वचिप्रच्छिशमादिप्रभृतिहनिगमिदीर्घेषु अज्ग्रहणम् १. २. २८ वा. १. [3] एवं तर्हि ह्रस्वो दीर्घः प्लुत इति यत्र ब्रूयादच इत्येतत्तत्रोपस्थितं द्रष्टव्यम् । १. २. २८ वा. २ महाभाष्य. [4] आद्यन्तौ टाकितौ १. १. ४६. [5] खरि च ८. ४. ५५. [6] पूर्वत्रासिद्धम् ८. २. १. [7] वाह ऊठ् ६. ४. १३२. [8] अनुनासिकस्य क्विझलोः क्ङिति ६. ४. १५. [9] व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ८. २. ३६. [10] पूर्वत्रासिद्धम् ८. २. १; छे च ६. १. ७३. [11] अलोन्त्यस्य १. १. ५२.

प्राप्नोति । निर्दिश्यमानस्यादेशा भवन्तीत्येवमङ्गस्य न भविष्यति ॥ यद्येवमुत्पुच्छयतेरप्रत्यय उत्पुडिति प्राप्नोति उत्पुदिति चेष्यते । तथा वाञ्छतेरप्रत्ययो वान् वांशौ वांश इति न सिध्यति । यथालक्षणमप्रयुक्ते ॥ तत्र त्वेतावान्विशेषः । अनुवर्तमाने क्ङिद्ग्रहणे छः षत्वं वक्तव्यं तत्र[1] चापि संनिपातग्रहणं विज्ञेयम् ।

निवृत्ते दिव ऊङ्भावः

निवृत्ते दिव ऊङ्भावः प्राप्नोति । द्युभ्याम् द्युभिः । अस्तु । कथं द्युभ्याम् द्युभिरिति । ऊठि कृते दिव उत् [६. १. १३१] इत्युत्त्वं भविष्यति । न सिध्यति । आन्तर्यतो दीर्घस्य दीर्घः प्राप्नोति ।

तदर्थं तपरः कृतः ॥

एवमर्थं तपरः क्रियते ॥

क्व पुनः क्ङिद्ग्रहणं प्रकृतम् । अनुनासिकस्य क्विझलोः क्ङिति [१५] इति । यदि तदनुवर्ततेऽज्झनगमां सनि [१६] क्विझलोश्चेति क्विझलोरपि दीर्घत्वं प्राप्नोति ॥ झलि तावन्न दोषः । सनं झल्ग्रहणेन विशेषयिष्यामः । सनि झलादाविति । क्वावप्याचार्यप्रवृत्तिर्ज्ञापयति नानेन क्वौ दीर्घत्वं भवतीति यदयं क्विब्वचिप्रच्छयायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं चेति[2] दीर्घत्वं शास्ति ॥*

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकम् ॥

---

* [V. M. om. ज्वरत्वरस्रिव्यविमवामुपधायाश्च (२०); राल्लोपः (२१)].

[1] व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ८. २. ३६.

[2] वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घत्वं च वक्तव्यं क्विप् च । .... तस्मात् सुष्ठूच्यते दीर्घवचनसामर्थ्यात् प्रसारणं न भविष्यतीति । ३. २. १७८ महाभाष्य.

असिद्धवदत्रा भात् ॥ ६ । ४ । २२ ॥

असिद्धवचनं किमर्थम् ।

असिद्धवचन उक्तम् ॥ १ ॥

किमुक्तम् । तत्र[1] तावदुक्तं षत्वतुकोरसिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं चेति । इहाप्यसिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं च । आदेशलक्षणप्रतिषेधार्थं तावत् । आगहि जहि । गतः गतवानिति । अनुनासिकलोपे जभावे च कृते[2] ऽतो लोपः [६. ४. ४८] अतो हेः [१०५] इति च प्राप्नोति । असिद्धत्वान्न भवति । उत्सर्गलक्षणभावार्थं च । एधि शाधीति । अस्तिशास्त्योरेत्त्वशाभावयोः कृतयोर्झल्लक्षणं धित्वं[3] न प्राप्नोति । असिद्धत्वाद्भवति ॥

अथात्रग्रहणं किमर्थम् ।

अत्रग्रहणं विषयार्थम् ॥ २ ॥

विषयः प्रतिनिर्दिश्यते । अत्रैतस्मिन्ना भाच्छास्त्र आ भाच्छास्त्रमसिद्धं यथा स्यात् । इह मा भूत् । अभार्जि[4] रागः[5] उपबर्हणम्[6] इति ॥

कानि पुनरस्य योगस्य प्रयोजनानि ।

प्रयोजनं शैत्त्वं धित्वे ॥ ३ ॥

शाभाव एत्त्वं च धित्वे प्रयोजनम्[7] । एधि शाधीति । अस्तिशास्त्योरेत्त्वशाभावयोः कृतयोर्झल्लक्षणं धित्वं न प्राप्नोति । असिद्धत्वाद्भवति ॥ शाभावस्तावन्न प्रयोजयति । एवं वक्ष्यामि शास् हौ शा हाविति । यत्वभूतः[8] सकारस्तत्र साद्धित्वं धि च [८. २. २५] इति सकारस्य लोपः । अथवा आ हाविति वक्ष्यामि । एवमपि सकारस्य प्राप्नोति । उपधायाः[9] इति वर्तते । उपधाया आत्वे कृते साद्धित्वं धि चेति सकारलोपः । अथवा न हाविति वक्ष्यामि । तत्रेत्त्वे[10] प्रतिषिद्धे साद्धित्वं धि चेति सकारलोपः ॥ एत्त्वमपि लोपापवादो[11] विज्ञास्यते न च सकारस्य लोपः प्राप्नोति ॥

---

[1] षत्वतुकोरसिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं च ६. १. ८६. वा. १.
[2] अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति ६. १. ३७; हन्तेर्जः ६. १. ३६.
[3] ध्वसोरेद्धावभ्यासलोपश्च ६. ४. ११९; शा हौ ६. १. ३५; हुझल्भ्यो हेर्धिः ६. १. १०१.
[4] भञ्जेश्च चिणि; अत उपधायाः ६. ४. ३३; ७. २. ११६. [5] घञि च भावकरणयोः; अत उपधायाः ६. ४. २७; ७. २. ११६. [6] बृंहेरच्यनिटि; पुगन्तलघूपधस्य च ६. ४. २४ वा २; ७. ३. ८६. [7] शा हौ; ध्वसोरेद्धावभ्यासलोपश्च; हुझल्भ्यो हेर्धिः ६. ४. ३५; ११९; १०१.
[8] भोभगोअघोअपूर्वस्य योऽशि ८. ३. १७. [9] अनिदितां हल उपधायाः क्ङिति ६. ४. २४.
[10] शास इदङ्हलोः ६. ४. ३४. [11] श्नसोरल्लोपः ६. ४. १११.

हिलोप उत्त्वे ॥ ४ ॥

हिलोप उत्त्वे प्रयोजनम्[1] । कुर्वित्यत्र हिलोपे कृते सार्वधातुकपर उकार इत्युत्त्वं न प्राप्नोति । असिद्धत्वाद्भवति ॥ एतदपि नास्ति प्रयोजनम् । वक्ष्यति[2] तत्र सार्वधातुकग्रहणस्य प्रयोजनं सार्वधातुके भूतपूर्वमात्रेऽपि यथा स्यादुत्त्वम् ॥

तास्तिलोपेण्यणादेशा अडाड्विधौ ॥ ५ ॥

तलोपोऽस्तिलोप इणश्च यणादेशोऽडाड्विधौ प्रयोजनम्[3] । अकारि ऐहीति । तलोपे कृते लुङीत्यडाटौ न प्राप्नुतः । असिद्धत्वाद्भवतः । अस्तिलोप इणश्च यणादेशः प्रयोजनम् । आसन् आयन्निति । इणस्त्योर्यण्लोपयोः कृतयोरनजादित्वादाड् न प्राप्नोति । असिद्धत्वाद्भवति ॥ अस्तिलोपस्तावन्न प्रयोजयति । आचार्यप्रवृत्तिर्ज्ञापयति लोपादाड् बलीयानिति यदयं श्नसोरल्लोपः [६. ४. १११] इति तपरकरणं करोति ॥ इण्यणादेशश्चापि न प्रयोजयति । यणादेशे[4] योगविभागः करिष्यते । इणो यण् भवति । तत एरनेकाचः । एश्चानेकाच इणो यण्भवति । ततोऽसंयोगपूर्वस्य यण्भवति । एरनेकाच इत्येव ॥ सर्वेषामेव परिहारः । उपदेश इति[5] वर्तते तत्रोपदेशावस्थायामेवाडाटौ भवतः । अथवार्धधातुक इति[6] वर्तते । अथवा लुङ्लङ्लृङ्क्ष्वडिति द्विलकारको निर्देशः । लुङादिषु लकारादिष्विति ॥ सर्वथा ऐज्यत औप्यतेति न सिध्यति । वक्ष्यत्येतदजादीनामटा सिद्धम्[7] इति ॥

अनुनासिकलोपो हिलोपाल्लोपयोर्जभावश्च ॥ ६ ॥

अनुनासिकलोपो हिलोपाल्लोपयोर्जभावश्च प्रयोजनम्[8] । आगहि जहि । गतः गतवानिति । अनुनासिकलोपे कृते जभावे चातो हेरतो लोप इति च लोपः प्राप्नोति । असिद्धत्वान्न भवति ॥ अनुनासिकलोपस्तावन्न प्रयोजयति । अल्लोप उपदेशे[9] इति वर्तते । यद्युपदेश इति वर्तते धिनुतः कृणुतः अत्र[10] न प्राप्नोति । नैष दोषः । नोपदेशग्रहणेन प्रकृतिरभिसंबध्यते । किं तर्हि । आर्धधातुकमभिसंबध्यते । आर्धधातुकोपदेशे यदकारान्तमिति ॥ जभावश्चापि न प्रयोजयति । हिलोपे[11] योगविभागः करिष्यते । अतो हेः । तत उतश्च । उतश्च हेर्लुग्भवतीति । ततः प्रत्ययात् । प्रत्ययादित्युभयोः शेषः ॥ अथ किमर्थमनुनासिकलोपो हिलोपाल्लोपयोर्जभावश्चेत्युच्यते नानुनासिकलोप-

---

[1] उतश्च प्रत्ययादसंयोगपूर्वात् ; अत उत् सार्वधातुके ६. ४. १०६ ; ११०. [2] कृञ उत्त्वं उकारान्तनिर्देशात् स्यान्तस्याप्रतिषेधः ६. ४. ११०. वा. १. [3] चिणो लुक् ; श्नसोरल्लोपः ; इणो यण् ; लुङ्लङ्लृङ्क्ष्वडुदात्तः ; आडजादीनाम् ६. ४. १०४ ; १११, ८१, ७१, ७२. [4] एरनेकाचोऽसंयोगपूर्वस्य ६. ४. ८२. [5] स्यसिच्......भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ६. ४. ६२. [6] आर्धधातुके ६. ४. ४६. [7] अजादीनामटा सिद्धम् ६. ४. ७४. श्लो. वा. [8] अनुदात्तोपदेश......क्ङिति ; हन्तेर्जः ; अतो हेः ; अतो लोपः ६. ४. ३७ ; ३६ ; १०५ ; ४८. [9] अनुदात्तोपदेश......झलि क्ङिति ६. ४. ३७. [10] धिन्विकृण्व्योर च ३. १. ८०. [11] उतश्च प्रत्ययादसंयोगपूर्वात् ६. ४. १०६.

जभावावल्लापाहिलोपयोरित्येवोच्येत । संख्यातानुदेशो[1] मा भूदिति । अनुनासिकलोपो हिलोपे प्रयोजयति । मण्डूकि॒ ताभि॒रा ग॑हि* । रो॒हि॑द॑श्वइ॒हागहि** । म॒रुद्भि॑रग्न॒ आ ग॑हि*** ॥

संप्रसारणमवर्णलोपे ॥ ७ ॥

संप्रसारणमवर्णलोपे प्रयोजनम् । मघोनः पश्य । मघोना मघोने । संप्रसारणे कृते यस्येति लोपः प्राप्नोति[2] । असिद्धत्वान्न भवति ॥ नैतदस्ति प्रयोजनम् । वक्ष्यत्येतन्मघवन्शब्दोऽव्युत्पन्नं प्रातिपदिकमिति[3] ॥

रेभाव आल्लोपे ॥ ८ ॥

रेभाव आल्लोपे प्रयोजनम् । कं स्वि॒द्गर्भं॑ प्र॒थ॒मं द॑ध्र॒ आप॑ः*** । रेभावे कृते[4] आतो लोप इटि च [६. ४. ६४] इत्याकारलोपो न प्राप्नोति । असिद्धत्वाद्भवति ॥ एतदपि नास्ति प्रयोजनम् । छान्दसो रेभावो लिट् च च्छन्दसि सार्वधातुकमपि भवति । तत्र सार्वधातुकमपिन्ङिद्भवतीति[5] ङित्त्वं श्नाभ्यस्तयोरातः [६. ४. ११२] इत्याकारलोपो भवति ॥

यदि तर्ह्ययं योगो नारभ्यते

उत्तु कृञः कथमोर्विनिवृत्तौ

इह कुर्वः कुर्मः कुर्यादित्युकारलोपे कृते सार्वधातुकपर उकार इत्युत्त्वं न प्राप्नोति[6] ॥

णेरपि चेटि कथं विनिवृत्तिः ।

इह च कारयतेः कारिष्यते णेरनिटि [६. ४. ५१] इति णिलोपो न प्राप्नोति ॥

अब्रुवतस्तव योगमिमं स्याल्लुक् च चिणो नु कथं न तरस्य ॥

इह च अकारितराम् अहारितरामिति चिण उत्तरस्य तरस्य लुक्कथं न स्यात्[8] ।

चं भगवान्कृतवांस्तु तदर्थं[7] तेन भवेदिटि णेर्विनिवृत्तिः ।

इह स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च [६. ४. ६२] । किं च । णिलोपश्च ॥

म्वोरपि ये च तथाप्यनुवृत्तौ

इहापि कुर्वः कुर्मः कुर्यादिति म्वोर्ये चेत्येतदप्यनुवर्तिष्यते[9] ॥

---

[1] यथासंख्यमनुदेशः समानाम् १. ३. १०. [2] श्वयुवमघोनामतद्धिते ; यस्येति च ६. ४. १३३ ; १४८. [3] मघवन्शब्दोऽव्युत्पन्नं प्रातिपदिकम् ४. १. ७. महाभाष्य. [4] इरयो रे. ६. ४. ७५. [5] सार्वधातुकमपित् १. २. ४. [6] नित्यं करोतेः ; ये च ; अत उत् सार्वधातुके ६. ४. १०८ ; १०९ ; ११०. [7] स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ६. ४. ६२. [8] चिणो लुक् ६. ४. १०४. [9] लोपश्चास्यान्यतरस्यां म्वोः ; ये च ; अत उत् सार्वधातुके ६. ४. १०७ ; १०९ ; ११०.

* वा. सं. १७. ६ ; तै. सं. ४. ६. १. २ ; मै. सं. २. १०. १ ; का. सं. १७. १७.

** वा. सं. ११. ७२ ; तै. सं. ४. १. ९. ३ ; मै. सं. २. ७. ७ ; का. सं. १६. ७.

*** ऋ. सं. १. १९. १. **** ऋ. सं. १०. ८२. ५.

चिण्लुकि च क्ङिन्त एव हि लुक् स्यात् ॥

चिण्लुक्यपि प्रकृतं क्ङिद्ग्रहणमनुवर्तते । क्व प्रकृतम् । गमहनजनखनघसां लोपः क्ङित्यनङि [६. ४. ९८] इति । तद्वै सप्तमीनिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । चिण इत्येषा पञ्चमी क्ङितीति सप्तम्याः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्य [१. १. ६७] इति ॥

उत्तु कृञः कथमोर्विनिवृत्तौ णेरपि चेटि कथं विनिवृत्तिः ।
अब्रुवतस्तव योगमिमं स्याल्लुक् च चिणो नु कथं न तरस्य ॥
चं भगवान्कृतवांस्तु तदर्थं तेन भवेदिटि णेर्विनिवृत्तिः ।
स्वोरपि ये च तथाप्यनुवृत्तौ चिण्लुकि च क्ङिन्त एव हि लुक् स्यात् ॥

आरभ्यमाणेऽप्येतस्मिन्योगे

सिद्धं वसुसंप्रसारणमज्विधौ ॥ ९ ॥

वसोः संप्रसारणमज्विधौ सिद्धं वक्तव्यम् । किं प्रयोजनम् । पपुषः पश्य । तस्थुषः पश्य । निन्युषः पश्य । चिच्युषः पश्य । लुलुवुषः पश्य । पुपुवुषः पश्येति । वसोः संप्रसारणे कृतेऽचीत्याकारलोपादीनि यथा स्युरिति[1] ॥ किं पुनः कारणं न सिध्यन्ति ।

बहिरङ्गलक्षणत्वादसिद्धत्वाच्च ॥ १० ॥

बहिरङ्गलक्षणं चैव हि वसुसंप्रसारणमसिद्धं च ॥

आत्त्वं यलोपाल्लोपयोः पशुषो न वाजान् चाखायिता चाखायितुम् ॥ ११ ॥

आत्त्वं यलोपाल्लोपयोः सिद्धं वक्तव्यम् । किं प्रयोजनम् । पशुषो न वाजान्* । प्रशुषे[2] इत्यात्त्वस्यासिद्धत्वादातो धातोः [६. ४. १४०] इत्याकारलोपो न प्राप्नोति । चाखायितौ[3] चाखायितुमित्यात्त्वस्यासिद्धत्वाद्यस्य हलः [६. ४. ४९] इति यलोपः प्राप्नोति ॥

समानाश्रयवचनात्सिद्धम् ॥ १२ ॥

समानाश्रयमसिद्धं भवति व्याश्रयं चैतत् । इह तावत्पपुषः पश्य तस्थुषः पश्य निन्युषः पश्य चिच्युषः पश्य लुलुवुषः पश्य पुपुवुषः पश्येति वसावाकारलोपादीनि वस्वन्तस्य विभक्तौ संप्रसारणम् । पशुष इति विट्यात्त्वं विडन्तस्य विभक्तावाकारलोपः । चाखायिता चाखायितुमिति यङ्यात्त्वं यङन्तस्य चार्धधातुके लोप

---

[1] वसोः संप्रसारणम् ; आतो लोप इटि च ; एरनेकाचोऽसंयोगपूर्वस्य ; अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६. ४. १३१ ; ६४ ; ८२ ; ७७. [2] जनसनखनक्रमगमो विट् ; विड्वनोरनुनासिकस्यात् ३. २. ६७ ; ६. ४. ४१. [3] ये विभाषा ६. ४. ४३.

* ऋ. सं. ५. ४१. १ ; मै. सं. ४. १४. १०.

इति ॥ किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । अत्रग्रहणसामर्थ्यात् ॥ ननु चान्यदत्रग्रहणस्य प्रयोजनमुक्तम् । किमुक्तम् । अत्रग्रहणं विषयार्थमिति[1] । अधिकारादप्येतत् सिद्धम् ॥

इह पपुषः चिच्युषः लुलुवुषः द्वौ हेतू व्यपदिष्टौ बहिरङ्गलक्षणत्वं चासिद्धत्वं चेति । तत्र भवेदसिद्धत्वं प्रत्युक्तं बहिरङ्गलक्षणं तु नैव प्रत्युक्तम् । नैष दोषः । बहिरङ्गमन्तरङ्गमिति च प्रतिद्वन्द्विभाविनावेतावर्थौ । कथम् । सत्यन्तरङ्गे बहिरङ्गं सति च बहिरङ्गेऽन्तरङ्गम् । न चात्रान्तरङ्गबहिरङ्गयोर्युगपत्समवस्थानमस्ति । नानभिनिर्वृत्ते बहिरङ्गे ऽन्तरङ्गं प्राप्नोति । तत्र निमित्तमेव बहिरङ्गमन्तरङ्गस्य ॥

ह्रस्वयलोपाल्लोपाश्चायादेशे ल्यपि ॥ १३ ॥

ह्रस्वयलोपाल्लोपाश्चायादेशे ल्यपि सिद्धा वक्तव्याः । प्रशमय्य गतः प्रतमय्य गतः । प्रबेभिदय्य गतः प्रचेच्छिदय्य गतः । प्रस्तनय्य गतः । प्रगदय्य गतः । ह्रस्वयलोपाल्लोपानामसिद्धत्वाल्ल्यपि लघुपूर्वात् [६. ४. ५६] इत्ययादेशो न प्राप्नोति[2] ॥ अत्राप्येष परिहारः समानाश्रयवचनात्सिद्धमिति । कथम् । णावेते विधयो णेर्ल्यप्ययादेशः ॥

वुग्युटावुवङ्यणोः ॥ १४ ॥

वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ । बभूवतुः बभूवुः । वुकोऽसिद्धत्वादुवङादेशः प्राप्नोति[3] उपदिदीये उपदिदीयाते । युटोऽसिद्धत्वाद्यणादेशः प्राप्नोति[4] ॥ वुकस्तावन्न वक्तव्यम् । वुकं न वक्ष्यामि । एवं वक्ष्यामि भुवो लुङ्लिटोरूदुपधाया इति[5] । अत्रोवङादेशे कृते योपधा तस्या ऊत्त्वं भविष्यति ॥ एवमपि कुतो नु खल्वेतदुवङादेशे कृते योपधा तस्या ऊत्त्वं भविष्यति न पुनः सांप्रतिकी योपधा तस्याः स्याद्धकारस्येति । नैष दोषः । ओरिति वर्तते[6] तेनोवर्णस्य भविष्यति ॥ भवेत्सिद्धं बभूवतुः बभूवुः इदं तु न सिध्यति बभूव बभूविथेति । किं कारणम् । गुणवृद्ध्योः[7] कृतयोरुवर्णाभावात् । नात्र गुणवृद्धी प्राप्नुतः । किं कारणम् । क्ङिति च [१. १. ५] इति प्रतिषेधात् । कथं कित्त्वम् । इन्धिभवतिभ्यां च [१. २. ६.] इति । तद्वै वयं कित्त्वं प्रत्याचक्ष्महे वुका । इह तु कित्त्वेन वुक् प्रत्याख्यायते । किं पुनरत्र न्याय्यम् । वुग्वचनमेव न्याय्यम् । सत्यपि हि कित्त्वे स्यातामेवात्र

---

[1] अत्रग्रहणं विषयार्थम् ६. ४. २२. वा. २. [2] मितां ह्रस्वः ; यस्य हलः ; अतो लोपः ६. ४. ९२ ; ४९ ; ४८. [3] भुवो वुग्लुङ्लिटोः ; अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६. ४. ८८. ७७. [4] दीङो युडचि क्ङिति ; एरनेकाचोऽसंयोगपूर्वस्य ६. ४. ६३ ; ८२ [5] ऊदुपधाया गोहः ६. ४. ८९. [6] ओः सुपि ६. ४. ८३ ; [7] सार्वधातुकार्धधातुकयोः ; अचो ञ्णिति ७. ३. ८४ ; ७, २, ११५.

गुणवृद्धी। किं कारणम्। इग्लक्षणयोर्गुणवृद्ध्योः स प्रतिषेधो न चैषेग्लक्षणा वृद्धिः॥ एवं तर्हि नार्थो वुका नापि कित्त्वेन। स्तामत्र गुणवृद्धी गुणवृद्ध्योः कृतयोरवायोश्च कृतयोर्योपधा तस्या ऊत्त्वं भविष्यति। कथम्। ओरित्यत्रावर्णमपि प्रतिनिर्दिश्यते[1]। इहापि तर्हि प्राप्नोति। कीलालपः पश्य। शुभंयः पश्येति। लोपोऽत्र बाधको भविष्यति[2]। इह तर्हि प्राप्नोति। कीलालपौ कीलालपा इति। एवं तर्हि य्वोरिति[3] निवृत्तम्॥ युटश्चापि न वक्तव्यम्। युड्वचनसामर्थ्यान्न भविष्यति। अस्त्यन्यद्युड्वचने प्रयोजनम्। किम्। द्वयोर्यकारयोः श्रवणं यथा स्यात्। न व्यञ्जनपरस्यानेकस्यैकस्य वा यकारस्य श्रवणं प्रति विशेषोऽस्ति॥

किं पुनः प्राग्भादसिद्धत्वमाहोस्वित्सह तेन[4]। कुतः पुनरयं संदेहः। आङयं निर्देशः क्रियत आङ् च पुनः संदेहं जनयति। तद्यथा। आ पाटलिपुत्राद्वृष्टो देव इति संदेहः किं प्राक् पाटलिपुत्रात्सह तेनेति। एवमिहापि संदेहः प्राग्भात्सह तेनेति। कश्चात्र विशेषः।

प्राग्भादिति चेच्छुनामघोनाभूगुणेषूपसंख्यानम्॥ १५॥

प्राग्भादिति चेच्छुनामघोनाभूगुणेषूपसंख्यानं कर्तव्यम्। शुनः पश्य। शुना शुने। संप्रसारणे[5] कृतेऽल्लोपोऽनः [६. ४. १३४] इति प्राप्नोति। यस्य पुनः सह तेनासिद्धत्वमसिद्धत्वात्तस्य न संयोगाद्वमन्तात् [१३७] इति प्रतिषेधो भविष्यति॥ यस्यापि प्राग्भादसिद्धत्वं तस्याप्येष न दोषः। कथम्। नास्त्यत्र विशेषोऽल्लोपेन वा निवृत्तौ सत्यां पूर्वत्वेन[6] वा॥ अयमस्ति विशेषः। अल्लोपेन निवृत्तौ सत्यामुदात्तनिवृत्तिस्वरः[7] प्रसज्येत। नात्रोदात्तनिवृत्तिस्वरः प्राप्नोति। किं कारणम्। न गोश्वन्साववर्ण० [६. १. १८२] इति प्रतिषेधात्। नैष उदात्तनिवृत्तिस्वरस्य प्रतिषेधः। कस्य तर्हि। तृतीयादिस्वरस्य[8]। यत्र तर्हि तृतीयादिस्वरो नास्ति। शुनः पश्येति। एवं तर्हि न वयं लक्षणस्य प्रतिषेधं शिष्मः। किं तर्हि। येन केनचिल्लक्षणेन प्राप्तस्य विभक्तिस्वरस्यायं प्रतिषेधः। यत्र तर्हि विभक्तिस्वरो नास्ति। बहुशुनीति[9]॥ यदि पुनरयमुदात्तनिवृत्तिस्वरस्यापि प्रतिषेधो विज्ञायेत। नैवं शक्यम्। इहापि प्रसज्येत। कुमारीति॥ एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति नोदात्तनिवृत्तिस्वरः शुन्यवतरतीति यदयं

---

[1] ओः सुपि ६. ४. ८३. [2] आतो धातोः ६. ४. १४०. [3] अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६. ४. ७७ [4] मघवा बहुलम् ६. ४. १२८; भस्य – ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि च्छन्दसि ६. ४. १२९–१७५. [5] श्वयुवमघोनामतद्धिते ६. ४. १३३. [6] संप्रसारणाच्च ६. १. १०८. [7] अनुदात्तस्य च यत्रोदात्तलोपः ६. १. १६१. [8] सावेकाचस्तृतीयादिर्विभक्तिः ६. १. १६८. [9] बहोर्नञ्वदुत्तरपदभूम्नि ६. २. १७५ (अन उपधालोपिनोन्यतरस्याम् ४. १. २८).

श्वन्शब्दं गौरादिषु पठति[1] । अन्तोदात्तार्थं यत्नं करोति । सिद्धं हि स्यान्ङीपैव ॥ मघोनः पश्य । मघोना मघोने । संप्रसारणे कृते यस्येति लोपः प्राप्नोति[2] । यस्य पुनः सह तेनासिद्धत्वमसिद्धत्वात्तस्य न भविष्यति ॥ यस्यापि हि प्राग्भादसिद्धत्वं तस्याप्येष न दोषः । कथम् । वक्ष्यत्येतन्मघवन्शब्दोऽव्युत्पन्नं प्रातिपदिकमिति[3] ॥ भूगुणः । भूयान् । भूभावे कृत ओर्गुणः प्राप्नोति[4] । यस्य पुनः सह तेनासिद्धत्वमसिद्धत्वात्तस्य न भविष्यति ॥ यस्यापि प्राग्भादसिद्धत्वं तस्याप्येष न दोषः । कथम् । दीर्घोच्चारणसामर्थ्यान्न भविष्यति । अस्त्यन्यद्दीर्घोच्चारणस्य प्रयोजनम् । किम् । भूमेति । निपातनादेतत्सिद्धम् । किं निपातनम् । बहोर्नञ्वदुत्तरपदभूम्नि [६. २. १७५] इति ॥ अथवा पुनरस्तु सह तेनेति ।

आ भादिति चेद्वसुसंप्रसारणयलोपप्रस्थादीनां प्रतिषेधः ॥ १६ ॥

आ भादिति चेद्वसुसंप्रसारणयलोपप्रस्थादीनां प्रतिषेधो वक्तव्यः । पपुषः पश्य तस्थुषः । निन्युषः चिच्युषः लुलुवुषः पुपुवुष इति । वसुसंप्रसारणे कृते तस्यासिद्धत्वादचीत्याकारलोपादीनि[5] न सिध्यन्ति ॥ नैष दोषः । उक्तमेतत्समानाश्रयवचनात् सिद्धमिति[6] । कथम् । वसावाकारलोपादीनि वस्वन्तस्य विभक्तौ संप्रसारणमिति ॥ यलोपः । सौरी बलाका । योऽसावण्यकारो लुप्यते तस्यासिद्धत्वादीतीति यलोपो[7] न प्राप्नोति ॥ अत्राप्येष एव परिहारः समानाश्रयवचनात्सिद्धमिति । कथम् । अण्यकारलोपोऽणन्तस्येति यलोपः ॥ प्रस्थादिषु । प्रेयान्[8] स्थेयान् । प्रस्थादीनामसिद्धत्वात्प्रकृत्यैकाच् [६. ४. १६३] इति प्रकृतिभावो न प्राप्नोति ॥ नैष दोषः । यथैव प्रस्थादीनामसिद्धत्वात्प्रकृतिभावो न प्राप्नोत्येवं टिलोपोऽपि न भविष्यति ॥

श्नान्नलोपः ॥ ६ । ४ । २३ ॥

अथ किमर्थं श्नमः सशकारस्य ग्रहणं क्रियते न नान्नलोप[9] इत्येवोच्येत । नान्नलोप इतीयत्युच्यमाने नन्दिता नन्दक इत्यत्रापि प्रसज्येत ॥ एवं तर्ह्येवं वक्ष्यामि । नान्नलोपोऽनिदिताम् । ततो हल उपधायाः क्ङिति । अनिदितामिति[10] । नैवं शक्यम् । इह हि न स्यात् । हिनस्ति । तस्मान्नैवं शक्यम् । न चेदेवं नन्दिता

---

[1] षिद्गौरादिभ्यश्च ४. १. ४१. [2] श्वयुवमघोनामतद्धिते; यस्येति च ६. ४. १३३, १४८. [3] मघवन्शब्दोऽव्युत्पन्नं प्रातिपदिकम् ४. १. ७ महाभाष्य. [4] बहोर्लोपो भू च बहोः; ओर्गुणः ६. ४. १५८; १४६. [5] वसोः संप्रसारणम्; आतो लोप इटि च; एरनेकाचोऽसंयोगपूर्वस्य; अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६. ४. १३१; ६४; ८२; ७७. [6] समानाश्रयवचनात्सिद्धम् ६. ४. २२ वा १२. [7] तेनैकदिक् (इति अण्); यस्येति च; सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः ४. ३. ११२; ६. ४. १४८; १४९. [8] प्रियस्थिरस्फिरोरुबहुल...प्रस्थस्फवर्बंहि...वृन्दाः ६. ४. १५७. [9] टेः ६. ४. १५५. [10] अनिदितां हल उपधायाः क्ङिति ६. ४. २४.

नन्दक इति प्राप्नोति ॥ एवं तर्हि क्ङितीति वर्तते[1] । एवमपि हिनस्तीत्यत्र न प्राप्नोति । नैषा परसप्तमी । का तर्हि । सत्सप्तमी क्ङिति सति[2] । एवमपि नन्दमान इत्यत्रापि[3] प्राप्नोति । एवं तर्हि नशब्द एवात्र क्ङित्त्वेन विशेष्यते क्ङिच्चेन्नशब्दो भवतीति । एवमपि यज्ञानाम् यत्नानामित्यत्र[4] प्राप्नोति । दीर्घत्वमत्र बाधकं भविष्यति[5] । इदमिह संप्रधार्यम् । दीर्घत्वं क्रियतां नलोप इति किमत्र कर्तव्यम् । परत्वान्नलोपः । तस्मात् सशकारस्य ग्रहणं कर्तव्यम् ॥ अथ क्रियमाणेऽपि सशकारग्रहण इह कस्मान्न भवति । विश्नानाम् प्रश्नानामिति[3] । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवं न भविष्यति ॥

अनिदितां हल उपधायाः क्ङिति ॥ ६ । ४ । २४ ॥

अनिदितां नलोपे लङ्गिकम्प्योरुपतापशरीरविकारयोरुपसंख्यानम् ॥ १ ॥

अनिदितां नलोपे लङ्गिकम्प्योरुपतापशरीरविकारयोरुपसंख्यानं कर्तव्यम् । विलगितः विकपितः । उपतापशरीरविकारयोरिति किमर्थम् । विलङ्गितः विकम्पितः ॥

बृंहेरच्यनिटि ॥ २ ॥

बृंहेरच्यनिट्युपसंख्यानं कर्तव्यम् । निबर्हयति निबर्हकः । अचीति किमर्थम् । निबृंह्यते । अनिटीति किमर्थम् । निबृंहिता निबृंहितुम् ॥ तत्तर्ह्युपसंख्यानं कर्तव्यम् । न कर्तव्यम् । बृहिः प्रकृत्यन्तरम् । कथं ज्ञायते । अचीति लोप उच्यतेऽनजादावपि दृश्यते । निबृह्यते । अनिटीत्युच्यत इडादावपि दृश्यते । निबर्हितुम् । अजादावित्युच्यतेऽजादावपि न दृश्यते । निबृंहयति निबृंहकः ॥

रञ्जेर्णौ मृगरमणे ॥ ३ ॥

रञ्जेर्णौ मृगरमण उपसंख्यानं कर्तव्यम् । रजयति मृगान् । मृगरमण इति किमर्थम् । रञ्जयति वस्त्राणि ॥

घिनुणि चोपसंख्यानं कर्तव्यम् । रागी ।

घिनुणि निपातनात्सिद्धम् ॥ ४ ॥

किं निपातनम् । त्यजरजेति[7] । अशक्यं धातुनिर्देशे निपातनं तन्त्रमाश्रयि-

---

१ अनुनासिकस्य क्विझलोः क्ङिति ६. ४. १५. २ सार्वधातुकमपित् (१. २. ४) इत्यनेन श्नमेव ङिदस्तीति (कैयट). ३ ताच्छील्यवयोवचनशक्तिषु चानश् ३. २. १२९. ४ यजयाचयतविच्छप्रच्छरक्षो नङ् ३. ३. ९०. ५ नामि ६. ४. ३. ६ च्छ्वोः शूडनुनासिके च ६. ४. १९. ७ शमित्यष्टाभ्यो घिनुण्; संपृचानुरुधाङ्यमाङ्यस...त्यजरजभजातिचरापचरामुषाभ्याहनश्च ३. २. १४१; १४२.

तुम् । इह हि दोषः स्यात् । दशनहः करणे[1] । दंष्ट्रा । नैतद्धातुनिपातनम् । किं तर्हि । प्रत्ययान्तस्यैतद्रूपं तस्मिंश्चास्य प्रत्यये लोपो भवति दंशसञ्जस्वञ्जां शपि (६. ४. २५) इति ॥

रजकरजनरजःसूपसंख्यानं कर्तव्यम् । रजकः रजनम् रज इति ।

रजकरजनरजःसु कित्त्वात्सिद्धम् ॥ ५ ॥

कित एवैत औणादिकाः । तद्यथा । रुचकः भुवनम् शिर इति ॥*

शास इदङ्हलोः ॥ ६ । ४ । ३४ ॥

शास इत्त्व आशासः क्वौ ॥ १ ॥

शास इत्त्व आशासः क्वावुपसंख्यानं कर्तव्यम् । आशीरिति । किं पुनरिदं नियमार्थमाहोस्विद्विध्यर्थम् । कथं च नियमार्थं स्यात्कथं वा विध्यर्थम् । यदि तावच्छासिमात्रस्य ग्रहणं ततो नियमार्थम् । अथ हि यस्माच्छासेरङ् विहितस्तस्य[2] ग्रहणं ततो विध्यर्थम् । यद्यपि शासिमात्रस्य ग्रहणमेवमपि विध्यर्थमेव । कथम् । अङ्हलोरित्युच्यते न चात्र हलादिं पश्यामः । ननु च क्विबेव हलादिः । क्विपो लोपे[3] कृते हलाद्यभावान्न प्राप्नोति । इदमिह संप्रधार्यम् । क्विब्लोपः क्रियतामङ्हलोरित्त्वमिति किमत्र कर्तव्यम् । परत्वादङ्हलोरित्वम् । नित्यः क्विब्लोपः । कृतेऽप्यङ्हलोरित्त्वे प्राप्नोत्यकृतेऽपि । नित्यत्वात्क्विब्लोपे कृते हलाद्यभावान्न प्राप्नोति । एवं तर्हि प्रत्ययलक्षणेन भविष्यति । वर्णाश्रये नास्ति प्रत्ययलक्षणम् । यदि वा कानिचिद्वर्णाश्रयाण्यपि प्रत्ययलक्षणेन[4] भवन्ति तथा चेदमपि भविष्यति ॥ अथवैवं वक्ष्यामि । शास इदङ्हलोः । ततः क्वौ । क्वौ च शास इद्भवति । आर्यशीः । मित्रशीः । तत आङः । आङ्पूर्वाच्च क्वौ शास इद्भवति । आशीरिति । इदमिदानीं किमर्थम् । नियमार्थम् । आङ्पूर्वाच्छासेः क्वावेव । क्व मा भूत् । आशास्यते आशास्यमान इति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । अविशेषेण शास इद्भवतीत्युक्त्वा ततोऽङीति वक्ष्यामि । तन्नियमार्थं भविष्यति । अङ्येवाजादौ नान्यस्मिन्नजादाविति । इहापि तर्हि नियमादित्त्वं प्राप्नोति । आशास्यते आशास्यमान इति । यस्माच्छासेरङ्विहितस्तस्य ग्रहणं न चैतस्माच्छासेरङ्विहितः ।

---

* [V. M. om. दंशसञ्जस्वञ्जां शपि (२५); रञ्जेश्च (२६) घञि च भावकरणयोः (२७); स्यदो जवे (२८); अवोदैधौद्मप्रश्रथहिमश्रथाः (२९); नाञ्चेः पूजायाम् (३०); क्त्वि स्कन्दिस्यन्दोः (३१); जान्तनशां विभाषा (३२); भञ्जेश्च चिणि (३३)].

[1] दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे ३. २. १८२. [2] सर्तिशास्त्यर्तिभ्यश्च ३. १. ५६. [3] वेरपृक्तस्य ६. १. ६७. [4] प्रत्ययलोपे प्रत्ययलक्षणम् १. १. ६२.

कथमाशीरिति । निपातनात्सिद्धम् । किं निपातनम् । क्षियाशीःप्रैषेषु तिङाकाङ्क्षम् (८. २. १०४) इति ॥*

अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति
॥ ६ । ४ । ३७ ॥

अनुदात्तोपदेशेऽनुनासिकलोपो ल्यपि च ॥ १ ॥

अनुदात्तोपदेशेऽनुनासिकलोपो ल्यपि चेति वक्तव्यम्[1] । प्रमत्य तत्प्रय ॥ ततो

वामः ॥ २ ॥

वाम इति वक्तव्यम् । प्रयत्य प्रयम्य । प्ररत्य प्ररम्य । प्रणत्य प्रणम्य ॥

गमः क्वौ ॥ ६ । ४ । ४० ॥

गमादीनामिति वक्तव्यम् । इहापि यथा स्यात् । परीतत्सहकण्ठिका । संयत् सुनदिति ॥**

ऊङ् च गमादीनामिति वक्तव्यम् । अग्रेगूः । भ्रूः ॥ ***

जनसनखनां सञ्झलोः ॥ ६ । ४ । ४२ ॥

अथ किमर्थं समुच्चयः । सनि च झलादौ चेति । आहोस्वित्सन्विशेषणं झल्ग्रहणम् । सनि झलादाविति । किं चातः । यदि समुच्चयः सन्यझलादावपि प्राप्नोति । सिसनिषति जिजनिषते जिखनिषति । अथ सन्विशेषणं झल्ग्रहणं जातः जातवानित्यत्र न प्राप्नोति ॥ यथेच्छसि तथास्तु । अस्तु तावत्समुच्चयः । ननु चोक्तं सन्यझलादावपि प्राप्नोतीति । नैष दोषः । प्रकृतं[2] झल्ग्रहणमनुवर्तते तेन सनं विशेषयिष्यामः । सनि झलादाविति । अथवा पुनरस्तु सन्विशेषणम् । कथं जातः जातवानिति । प्रकृतं झलि क्ङितीत्यनुवर्तते ॥ यद्येवं नार्थो झल्ग्रहणेन । योगविभागः करिष्यते । जनसनखनामनुनासिकस्याकारो भवति झलि क्ङिति । ततः सनि । सनि च जनसनखनामनुनासिकस्याकारो भवति झलीत्येव । तस्मान्नार्थो झल्ग्रहणेन ॥

---

* [V. M. om. शा हौ (३५); हन्तेर्जः (३६)].

** [V. M. om. वा ल्यपि (३८); न क्तिचि दीर्घश्च (३९)].

*** [V. M. om. विड्वनोरनुनासिकस्यात् (४१)].

[1] वा ल्यपि ६. ४. ३८.

[2] अनुदात्तोपदेश...झलि क्ङिति ६. ४. ३७.

सनोतेरनुनासिकलोपादात्त्वं विप्रतिषेधेन ॥ १ ॥

सनोतेरनुनासिकलोपादात्त्वं भवति विप्रतिषेधेन[१] । सनोतेरनुनासिकलोपस्यावकाशोऽन्ये तनोत्यादयः । आत्त्वस्यावकाशो ऽन्ये जनादयः । सनोतेरनुनासिकस्योभयं प्राप्नोति आत्त्वं भवति विप्रतिषेधेन ॥ नैष युक्तो विप्रतिषेधः । न हि सनोतेरनुनासिकलोपस्यान्ये तनोत्यादयोऽवकाशः । सनोतेर्यस्तनोत्यादिषु पाठः सोऽनवकाशः । न खल्वप्यात्त्वस्यान्ये जनादयोऽवकाशः । सनोतेर्यदात्त्वे ग्रहणं तदनवकाशं तस्यानवकाशत्वादयुक्तो विप्रतिषेधः ॥ एवं तर्हि तनोत्यादिषु पाठस्तावत्सावकाशः । कोऽवकाशः । अन्यानि तनोत्यादिकार्याणि । तनादिभ्यस्तथासोः [२. ४. ७९] इति । आत्त्वेऽपि ग्रहणं सावकाशम् । कोऽवकाशः । सनि ये विभाषा [६. ४. ४३] च । उभयोः सावकाशयोर्युक्तो विप्रतिषेधः ॥ एवमप्ययुक्तो विप्रतिषेधः । पठिष्यति ह्याचार्यः पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येति[२] । एकस्य हि नामाभावे विप्रतिषेधो न स्यात् किं पुनर्यत्रोभयं नास्ति[३] ॥ नैष दोषः । भवतीह विप्रतिषेधः । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । आचार्यप्रवृत्तिर्ज्ञापयति भवतीह विप्रतिषेध इति यदयं घुमास्थागापाजहातिसां हलि [६. ४. ६६] इति हल्ग्रहणं करोति । कथं कृत्वा ज्ञापकम् । हल्ग्रहणस्यैतत्प्रयोजनं हलादावीत्त्वं यथा स्यादिह मा भूत् गोदः कम्बलद इति[४] । यदि चात्र विप्रतिषेधो न स्याद्धल्ग्रहणमनर्थकं स्यात् । अस्त्वत्रेत्त्वम् । इत्त्वस्यासिद्धत्वाल्लोपो[५] भविष्यति । पश्यति त्वाचार्यो भवतीह विप्रतिषेधस्ततो हल्ग्रहणं करोति ॥ नैतदस्ति ज्ञापकम् । व्यवस्थार्थमेतत् स्यात् । हलादावीत्त्वं यथा स्यादजादौ मा भूदिति । किं च स्यात् । इयङादेशः प्रसज्येत । ननु चासिद्धत्वादेवेयङादेशो न भविष्यति । न शक्यमीत्त्वमियङादेशे ऽसिद्धं विज्ञातुम् । इह हि दोषः स्यात् धियौ धियः पियौ पिय इति । नैतदीत्त्वम् । किं तर्हि । ध्याप्योः संप्रसारणमेतत् । समानाश्रयं खल्वप्यसिद्धं भवति व्याश्रयं चैतत् । कथम् । कावीत्त्वं क्विबन्तस्य विभक्तावियङादेशः ॥ व्यवस्थार्थमेव तर्हि हल्ग्रहणं कर्तव्यम् । कुतो ह्येतदीत्त्वस्यासिद्धत्वाल्लोपो न पुनर्लोपस्यासिद्धत्वादीत्त्वमिति । तत्र चक्रकमव्यवस्था प्रसज्येत । नास्ति चक्रकप्रसङ्गः । न ह्यव्यवस्थाकारिणा शास्त्रेण भवितव्यम् । शास्त्रतो नाम व्यवस्था । तत्रेत्त्वस्यासिद्धत्वाल्लोपो लोपेनावस्थानं भविष्यति । न खल्वपि तस्मिंस्तदेवासिद्धं भवति[६] ॥

---

[१] एर्लिङि ६. ४. ६७ [२] पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य ८. २. १ वा १. [३] असिद्धवदत्राभात् ६. ४. २२. [४] आतोऽनुपसर्गे कः ३. २. ३. [५] आतो लोप इटि च ६. ४. ३४. [६] अचि श्नुधातुभ्रुवां य्वोरियङुवङौ. ६. ४. ७७.

व्यवस्थार्थमेव तर्हि हल्ग्रहणं कर्तव्यम् । हलादावीत्त्वं यथा स्यादजादौ मा भूदिति । कुतो ह्येतदीत्त्वस्यासिद्धत्वाल्लोपो लोपेनावस्थानं भविष्यति न पुनर्लोपस्यासिद्धत्वादीत्त्वमीत्त्वेन व्यवस्थानं स्यात् । तदेव खल्वपि तस्मिन्नसिद्धं भवति । कथम् । पटिष्यति ह्याचार्यश्चिणो लुकि तग्रहणानर्थक्यं संघातस्याप्रत्ययत्वात्तलोपस्य चासिद्धत्वादिति[1] । चिणो लुक् चिणो लुक्येवासिद्धो भवति ॥ एवं तर्हि यदि व्यवस्थार्थमेतत् स्यान्नैवायं हल्ग्रहणं कुर्वीत । अविशेषेणायमीत्त्वमुक्त्वा तस्याजादौ लोपमपवादं विदधीत[2] । इदमस्ति । आतो लोप इटि चेति । ततो घुमास्थागापाजहातिसाम् । लोपो भवतीटि चाजादौ क्ङितीति । किमर्थं पुनरिदम् । ईत्त्वं वक्ष्यति तद्बाधनार्थम् । तत ईत् । ईच्च भवति घ्वादीनाम् । तत एर्लिङि । वान्यस्य संयोगादेः । न ल्यपि । मयतेरिदन्यतरस्याम् । ततो यति । यति चेद्भवति । सोऽयमेवं लघीयसा न्यासेन सिद्धे सति यद्धल्ग्रहणं करोति गरीयांसं यत्नमारभते तज्ज्ञापयत्याचार्यो भवतीह विप्रतिषेध इति ॥ *

सनः क्तिचि लोपश्चास्यान्यतरस्याम् ॥ ६ । ४ । ४५ ॥

इहान्यतरस्यांग्रहणं शक्यमकर्तुम् । कथम् । सनः क्तिचि लोपश्च । आत्त्वं च विभाषेति[3] ॥

अपर आह । सर्व एवायं योगः शक्योऽवक्तुम् । कथम् । इह लोपोऽपि प्रकृत आत्त्वमपि प्रकृतं विभाषाग्रहणमपि प्रकृतम्[4] । तत्र केवलमभिसंबन्धमात्रं कर्तव्यम् । सनः क्तिचि लोपश्चात्त्वं च विभाषेति ॥

आर्धधातुके ॥ ६ । ४ । ४६ ॥

कानि पुनरार्धधातुकाधिकारस्य प्रयोजनानि ।

अतो लोपो यलोपश्च णिलोपश्च प्रयोजनम् ।
आल्लोप ईत्त्वमेत्वं च चिण्वद्भावश्च सीयुटि ॥

अतो लोपः [६. ४. ४८] चिकीर्षितुम् । आर्धधातुक इति किमर्थम् । चिकीर्षति ॥ नैतदस्ति प्रयोजनम् । अस्त्वत्र सनोऽकारलोपः शपो[5] ऽकारस्य

---

* V. M. om. ये विभाषा (४३); तनोतेर्यकि (४४)].

[1] चिणो लुकि तग्रहणानर्थक्यं संघातस्याप्रत्ययत्वात् । तलोपस्य चासिद्धत्वात् ६. ४. १०४ वा १, २. [2] आतो लोप इटि च; ईद्यति; घुमास्थागापाजहातिसां हलि; एर्लिङि; वान्यस्य संयोगादेः; न ल्यपि; मयतेरिदन्यतरस्याम् । ६. ४. ६४ –७०. [3] ये विभाषा ६. ४. ४३; [4] अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति; विड्वनोरनुनासिकस्यात्; ये विभाषा ६. ४. ३७; ४१; ४३. [5] कर्तरि शप् ३. १. ६८.

श्रवणं भविष्यति । शप एव तर्हि मा भूदिति । एतदपि नास्ति प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयति नानेन शबकारस्य लोपो भवतीति यदयमदिप्रभृतिभ्यः शपो लुकं शास्ति[1] । नैतदस्ति ज्ञापकम् । कार्यार्थमेतत्स्यात्[2] । विृत्तः मृष्टः इति । यत्तर्ह्याकारान्तेभ्यो लुकं शास्ति । याति वाति ॥ इदं तर्हि प्रयोजनम् । वृक्षस्य प्लक्षस्य । अतो लोपः प्राप्नोति ॥ यलोपोऽपि प्रयोजनम्[3] । बेभिदिता चेच्छिदिता । आर्धधातुक इति किमर्थम् । बेभिद्यते चेच्छिद्यते ॥ णिलोप[4]: । पाच्यते याज्यते । आर्धधातुक इति किमर्थम् । पाचयति याजयति ॥ आल्लोपः[5] । ययतुः ययुः । ववतुः ववुः । आर्धधातुक इति किमर्थम् । यान्ति वान्ति ॥ ईत्त्वम्[6] । दीयते धीयते । आर्धधातुक इति किमर्थम् । अदाताम् अधाताम् ॥ एत्वम्[7] । स्नेयात् म्लेयात् । आर्धधातुक इति किमर्थम् । स्नायात् ॥ चिण्वद्भावश्च सीयुटि[8] । चिण्वद्भावे सीयुटि किमुदाहरणम् । कारिषीष्ट हारिषीष्ट । आर्धधातुक इति किमर्थम् । क्रियेत ह्रियेत । नैतदुदाहरणम् । यका व्यवहितत्वान्न भविष्यति । इदं तर्ह्युदाहरणम् । प्रस्नुवीत[9] । इदं चाप्युदाहरणम् । क्रियेत ह्रियेत । ननु चोक्तं यका व्यवहितत्वान्न भविष्यतीति । यक एव तर्हि मा भूदिति । किं च स्यात् । वृद्धिः । वृद्धौ कृतायां युक्प्रसज्येत[10] ॥

भ्रस्जो रोपधयो रमन्यतरस्याम् ॥ ६ । ४ । ४७ ॥

अयं रम्रेफस्य स्थाने कस्मान्न भवति । मिदचोऽन्त्यात्पर [१.१.४७] इत्यनेनाचामन्त्यात्परः क्रियते । रेफस्य तर्हि श्रवणं कस्मान्न भवति । षष्ठ्युच्चारणसामर्थ्यात्[11] ॥

भारद्वाजीयाः पठन्ति । भ्रस्जो रोपधयोर्लोप[12] आगमो रम् विधीयत इति ॥

भ्रस्जादेशात्संप्रसारणं विप्रतिषेधेन ॥ १ ॥

भ्रस्जादेशात् संप्रसारणं भवति विप्रतिषेधेन । भ्रस्जादेशस्यावकाशः । भर्ष्टा भ्रष्टा । संप्रसारणस्यावकाशः । भृज्जति । इहोभयं प्राप्नोति । भृष्टः भृष्टवानिति । संप्रसारणं भवति विप्रतिषेधेन ॥ स तर्हि पूर्वविप्रतिषेधो वक्तव्यः । न वक्तव्यः । रसोर्वर्वचनात्सिद्धम् । रसोर्वा ऋ भवतीति वक्ष्यामि ।

---

[1] अदिप्रभृतिभ्यः शपः २. ४. ७२. [2] सार्वधातुकार्धधातुकयोः; पुगन्तलघूपधस्य च ७. ३. ८४; ८६. मृजेर्वृद्धिः ७. २. ११४; (प्रत्ययलोपे प्रत्ययलक्षणम् १. १. ६२) न लुमताङ्गस्य १. १. ६३. [3] यस्य हलः ६. ४. ४९; [4] णेरनिटि ६. ४. ५१; [5] आतो लोप इटि च ६. ४. ६४. [6] घुमास्थागापाजहातिसां हलि ६. ४. ६६ [7] एर्लिङि; वान्यस्य संयोगादेः ६. ४. ६७; ६८. [8] स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ६ ४. ६२. [9] न दुहस्नुनमां यक्चिणौ ३. १. ८९. [10] आतो युक् चिण्कृतोः ७. ३. ३३. [11] षष्ठी स्थानेयोगा १. १. ४९. [12] भारद्वाजीया हि ' सनः क्तिचि लोपः०' (६. ४. ४५) इत्यतो लोपग्रहणमनुवर्त्य रोपधयोर्लोपं रमागमं चान्यतरस्यां विदधाति (कै). [13] ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ६. १. १६.

रसोर्वर्वचने सिचि वृद्धेर्भ्रस्जादेशः ॥ २ ॥

रसोर्वा ऋवचने सिचि वृद्धेर्भ्रस्जादेशो वक्तव्यः । वृद्धौ कृतायामिदमेव रूपं स्यात् । अभ्राक्षीत् । इदं न स्यात् । अभार्क्षीदिति । सर्वथा वयं पूर्वविप्रतिषेधान्न मुच्यामहे[1] । सूत्रं च भिद्यते ॥ यथान्यासमेवास्तु । ननु चोक्तं भ्रस्जादेशात् संप्रसारणं विप्रतिषेधेनेति । इदमिह संप्रधार्यम् । भ्रस्जादेशः क्रियतां संप्रसारणमिति किमत्र कर्तव्यम् । परत्वाद् भ्रस्जादेशः नित्यत्वात्संप्रसारणम् । कृतेऽपि भ्रस्जादेशे प्राप्नोत्यकृतेऽपि । भ्रस्जादेशोऽपि नित्यः । कृतेऽपि संप्रसारणे प्राप्नोत्यकृतेऽपि प्राप्नोति । कथम् । योऽसावृकारो रेफस्तस्य चोपधायाश्च कृतेऽपि प्राप्नोति । अनित्यो भ्रस्जादेशो न हि कृते संप्रसारणे प्राप्नोति । किं कारणम् । न हि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते । अथापि गृह्यन्त एवमप्यनित्यः । कथम् । उपदेश इति वर्तते[2] । तच्चावश्यमुपदेशग्रहणमनुवर्त्यं बरीभृज्ज्यत इत्येवमर्थम् ॥

अतो लोपः ॥ ६ । ४ । ४८ ॥

ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घत्वेभ्यः पूर्वविप्रतिषिद्धम् ॥ १ ॥

ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घत्वेभ्यो भवतः पूर्वविप्रतिषेधेन । णिलोपस्यावकाशः[3] । कार्यते हार्यते । इयङादेशस्यावकाशः[4] । श्रियौ श्रियः । इहोभयं प्राप्नोति । आटिटत् आशिशत् । ननु चात्र यणादेशेन भवितव्यम् । इदं तर्हि । अततक्षत् अररक्षत् ॥ यणादेशस्यावकाशः[5] । निन्यतुः निन्युः । णिलोपस्य स एव । इहोभयं प्राप्नोति । आटिटत् आशिशत् ॥ वृद्धेरवकाशः । सखायौ सखायः[6] । णिलोपस्य स एव । इहोभयं प्राप्नोति । कारयतेः कारकः । हारयतेर्हारकः[7] ॥ गुणस्यावकाशः[8] । चेता स्तोता । णिलोपस्यावकाशः । आटिटत् आशिशत् । इहोभयं प्राप्नोति । कारणा हारणा ॥ दीर्घत्वस्यावकाशः[9] । चीयते स्तूयते । णिलोपस्यावकाशः कारणा हारणा । इहोभयं प्राप्नोति । कार्यते हार्यते । णिलोपो भवति विप्रतिषेधेन ॥ स तर्हि पूर्वविप्रतिषेधो वक्तव्यः । न वक्तव्यः । सन्त्वत्रैते विधय एतेषु विधिषु कृतेषु स्थानिवद्भावाण्णिग्रहणेन ग्रहणाण्णिलोपो भविष्यति । नैवं शक्यम् । इयङादेशे हि दोषः स्यात् । अन्त्यस्य लोपः[10] प्रसज्येत ॥ अल्लोपस्येयङ्यणोश्च नास्ति संप्र-

---

[1] भ्रस्जेः सिचि ऋभावं विकल्पितं परत्वाद्बाधित्वा नित्यं हलन्तलक्षणा वृद्धिः (७. २. ३.) प्राप्नोतीति ऋभावार्थः पूर्वविप्रतिषेधो वक्तव्य एव । कै. [2] अनुदात्तोपदेश...झलि क्ङिति ६. ४. ३७. [3] णेरनिटि ६. ४. ५१. [4] अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६. ४. ७७. [5] एरनेकाचोऽसंयोगपूर्वस्य ६. ४. ८२. [6] सख्युरसंबुद्धौ; अचो ञ्णिति ७. १. ९२; ७. २. ११५. [7] ण्वुल्तृचौ ३. १. १३३. [8] सार्वधातुकार्धधातुकयोः ७. ३. ८४. [9] अकृत्सार्वधातुकयोर्दीर्घः ७, ४. २५. [10] अलोऽन्त्यस्य १. १. ५२.

धारणा ॥ वृद्धेरवकाशः । प्रियमाचष्टे प्रापयति[1] । अल्लोपस्यावकाशः । चिकीर्षिता चिकीर्षितुम् । इहोभयं प्राप्नोति । चिकीर्षकः जिहीर्षकः[2] ॥ गुणस्याल्लोपस्य च नास्ति संप्रधारणा ॥ दीर्घत्वस्यावकाशः । अपि काकः श्येनायते[3] । अल्लोपस्य स एव । इहोभयं प्राप्नोति । चिकीर्ष्यते जिहीर्ष्यते । अल्लोपो भवति विप्रतिषेधेन ॥ स तर्हि पूर्वविप्रतिषेधो वक्तव्यः । न वक्तव्यः । इष्टवाची परशब्दः[4] । विप्रतिषेधे परं यदिष्टं तद्भवतीति ॥

यस्य हलः ॥ ६ । ४ । ४९ ॥

किमिदं यलोपे वर्णग्रहणमाहोस्वित्संघातग्रहणम् । कश्चात्र विशेषः ॥

यलोपे वर्णग्रहणं चेद्भात्वन्तस्य प्रतिषेधः ॥ १ ॥

यलोपे वर्णग्रहणं चेद्भात्वन्तस्य प्रतिषेधो वक्तव्यः । शुच्यिता शुच्यितुम् ॥ अस्तु तर्हि संघातग्रहणम् । यदि संघातग्रहणमन्त्यस्य लोपः प्राप्नोति[5] । सिद्धोऽन्त्यस्य पूर्वेणैव[6] तत्रारम्भसामर्थ्यात्सर्वस्य भविष्यति ॥ एवमपि तेनातिप्रसक्तमिति कृत्वा नियमो विज्ञायेत । यस्य हल एव नान्यतः । क्व मा भूत् । लोलूयिता पोपूयिता । कैमर्थक्यान्नियमो भवति । विधेयं नास्तीति कृत्वा । इह चास्ति विधेयम् । किम् । अन्त्यस्य लोपः प्राप्तः स सर्वस्य विधेयः । तत्रापूर्वो विधिरस्तु नियमोऽस्त्वित्यपूर्व एव विधिर्भविष्यति न नियमः । एवमप्यन्त्यस्य प्राप्नोति । किं कारणम् । न हि लोपः सर्वापहारी । ननु च संघातग्रहणसामर्थ्यात्सर्वस्य भविष्यति ।

संघातग्रहणं चेत्क्यस्य विभाषायां दोषः ॥ २ ॥

संघातग्रहणं चेत् क्यस्य विभाषायां[7] दोषो भवति । समिधिता समिध्यिता । यदा लोपस्तदा सर्वस्य लोपः । यदालोपस्तदा सर्वस्यालोपः प्राप्नोति ॥

आदेः परवचनात्सिद्धम् ॥ ३ ॥

हल इति पञ्चमी । तस्मादित्युत्तरस्यादेः परस्य [१ . १ . ६७ ; ५४] इति यकारस्यैव भविष्यति ॥ अथवा पुनरस्तु वर्णग्रहणम् । ननु चोक्तं यलोपे वर्णग्रहणं चेद्भात्वन्तस्य प्रतिषेध इति । नैष दोषः । अङ्गादिति हि वर्तते । न वा अङ्गादिति पञ्चम्यस्ति ।

---

[1] किं पुनरिदं परिगणनमाहोस्विदुदाहरणमात्रम् । उदाहरणमात्रमित्याह प्रादयोऽपि हीष्यन्ते प्रियमाचष्टे प्रापयतीति । महाभाष्य ६. ४. १५५ वा १ ; प्रियस्थिरस्फिरोरुबहुल...प्रस्थस्फवर्बंहि...वृन्दाः ६. ४. १५७ ; अचो ञ्णिति ७. २. ११५ ; अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ ७. ३. ३६.

[2] ण्वुल्तृचौ ३. १. १३३; (अचो ञ्णिति ७. २. ११५).

[3] कर्तुः क्यङ् सलोपश्च ३. १. ११. अकृत्सार्वधातुकयोर्दीर्घः ७. ४. २५.

[4] विप्रतिषेधे परं कार्यम्...तत्र इष्टवाची परशब्दस्तस्येदं ग्रहणम् । विप्रतिषेधे परं यदिष्टं तद्भवति । १. ४. २ वा. ७ महाभाष्य.

[5] अलोन्त्यस्य १. १. ५२.

[6] अतो लोपः ६. ४. ४८

[7] क्यस्य विभाषा ६. ४. ५०.

एवं तर्ह्यङ्गस्येति[1] संबन्धषष्ठी विज्ञास्यते । अङ्गस्य यो यकारः । किं चाङ्गस्य यकारः । निमित्तम् । यस्मिन्नङ्गमित्येतद्भवति । कस्मिंश्चैतद्भवति । प्रत्यये ॥ *

णेरनिटि ॥ ६ । ४ । ५१ ॥

अथानिटीति किमर्थम् । कारयिता कारयितुम् ॥ अनिटीति शक्यमवक्तुम् । कस्मान्न भवति । कारयिता कारयितुम् । निष्ठायां सेटि [६. ४. ५२] इत्येतन्नियमार्थं भविष्यति । निष्ठायामेव सेटि णेर्लोपो भवति नान्यत्र । क्व मा भूत् । कारयिता कारयितुम् ॥ अथवोपरिष्टाद्योगविभागः करिष्यते[2] । इदमस्ति । निष्ठायां सेटि [५२] जनिता मन्त्रे [५३] शमिता यज्ञे [५४] ततः अय् । अयादेशो भवति णेः सेटि । तत आमन्ताल्वाय्येत्न्विष्णुषु । अय् भवतीत्येव ॥

निष्ठायां सेटि ॥ ६ । ४ । ५२ ॥

अथ सेड्ग्रहणं किमर्थम् । निष्ठायां सेड्ग्रहणमनिटि प्रतिषेधार्थम् । निष्ठायां सेड्ग्रहणं क्रियते ऽनिटि प्रतिषेधो यथा स्यादिति । संज्ञपितः पशुरिति ॥

निष्ठायां सेड्ग्रहणमनिटि प्रतिषेधार्थमिति चेत्तत्सिद्धमनिडभावात् ॥ १ ॥

निष्ठायां सेड्ग्रहणमनिटि प्रतिषेधार्थमिति चेदन्तरेणापि सेड्ग्रहणं तत्सिद्धम् । कथम् । अनिडभावात् ॥ ननु च यस्य विभाषा [७. २. १५] इति ज्ञपेरिट्प्रतिषेधः[3] ।

एकाचो हि प्रतिषेधः ॥ २ ॥

एकाचो हि स प्रतिषेधो[4] ज्ञपिश्चानेकाच् ॥

इड्भावार्थं तु तन्निमित्तत्वाल्लोपस्य ॥ ३ ॥

इड्भावार्थं तर्हि सेड्ग्रहणं क्रियते । कथं पुनः सेटीत्यनेनेट् शक्यो भावयितुम् । तन्निमित्तत्वाल्लोपस्य । नात्राकृत इटि णिलोपेन भवितव्यम् । किं कारणम् । सेटीत्युच्यते ॥

अवचने हि णिलोप इट्प्रतिषेधप्रसङ्गः ॥ ४ ॥

अक्रियमाणे हि सेड्ग्रहणे णिलोपे कृत एकाच इतीट्प्रतिषेधः प्रसज्येत । कारितम् हारितम् ॥

---

* [V. M. om. क्यस्य विभाषा (५०)].

[1] अङ्गस्य ६. ४. १.

[2] अयामन्ताल्वाय्येत्न्विष्णुषु ६. ४. ५५.

[3] सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् ७. २. ४९.

[4] एकाच उपदेशेनुदात्तात् ; यस्य विभाषा ७. २. १० ; १५.

एवं तर्हि नार्थः सेड्ग्रहणेन नापि सूत्रेण । कथम् । सप्तमे[1] योगविभागः करिष्यते । इदमस्ति । निष्ठायां नेड् भवति[2] । ततो णेः । ण्यन्तस्य निष्ठायां नेड् भवति। कारितम् हारितम् । ततो वृत्तम् । वृत्तमिति च निपात्यते । किं निपात्यते । णेर्निष्ठायां लोपो निपात्यते । किं प्रयोजनम् । नियमार्थम् । अत्रैव णेर्निष्ठायां लोपो भवति नान्यत्र । क मा भूत् । कारितम् हारितम् । इहापि तर्हि प्राप्नोति । वर्तितमन्नम् । वर्तिता भिक्षेति । ततः अध्ययने । अध्ययने चेद् वृतिर्वर्तत इति ॥

वृधिरमिशृधीनामुपसंख्यानं सार्वधातुकत्वात् ॥ ५ ॥

वृधिरमिशृधीनामुपसंख्यानं कर्तव्यम् । किं कारणम् । सार्वधातुकत्वात् । वर्धन्तु त्वा सुष्टुतयो गिरो मे[3] । वर्धयन्त्वित्येवं प्राप्ते । बृहस्पतिष्ठा सुम्ने रम्णातु[4] । रमयत्वित्येवं प्राप्ते । अग्ने शर्ध महते सौभगाय[5] । शर्धयेति प्राप्ते ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । वृधिरमिशृधीनामार्धधातुकत्वात्सिद्धम् । कथमार्धधातुकत्वम् । अन्येऽपि हि धातुप्रत्यया उभयथा छन्दसि दृश्यन्ते[6] ॥ *

अयामन्ताल्वाय्येत्न्विष्णुषु ॥ ६ । ४ । ५५ ॥

किं पुनरयं क्त्नुराहोस्विदित्नुः । कश्चात्र विशेषः ।

क्त्नाविटि णेर्गुणवचनम् ॥ १ ॥

क्त्नौ सतीटि णेर्गुणो वक्तव्यः[7] । गदयित्नुः स्तनयित्नुः ॥ अस्तु तर्हीत्नुः ।

इत्नौ प्रत्ययान्तरकरणम् ॥ २ ॥

यदि तर्हीत्नुः प्रत्ययान्तरं कर्तव्यम् ॥

अयादेशे चोपसंख्यानम् ॥ ३ ॥

अयादेशे चोपसंख्यानं कर्तव्यम् ॥ उभयं क्रियते न्यास एव ॥

ल्यपि लघुपूर्वस्य ॥ ६ । ४ । ५६ ॥

ल्यपि लघुपूर्वस्येति चेद्व्यञ्जनान्तेषूपसंख्यानम् ॥ १ ॥

ल्यपि लघुपूर्वस्येति चेद्व्यञ्जनान्तेषूपसंख्यानं कर्तव्यम् । प्रशमय्य गतः । प्रतमय्य गतः ॥

---

* [V. M. om. जनिता मन्त्रे (५३) ; शमिता यज्ञे (५४)].

[1] णेरध्ययने वृत्तम् ७. २. २६. [2] नेड्वशि कृति ; श्वीदितो निष्ठायाम् ७. २. ८. १४. [3] ऋ. सं. ७. ९९. ७. [4] वाज. सं. ४-२१ [5] ऋ. सं. ५. २८. ३. [6] छन्दस्युभयथा. ३. ४. ११७. [7] यदि क्त्नुर्विधीयते तदा तस्येटि कृते अनिटि इति वचनाण्णिलोपो नास्ति । कित्त्वात्तु गुणप्रतिषेधे (क्ङिति च १. १. ५) प्राप्ते गुणो विधेयः ६. ४. ५५ कैयट.

अल्लोपे च गुरुपूर्वात् प्रतिषेधः॥ २ ॥

अल्लोपे[1] च गुरुपूर्वात् प्रतिषेधो वक्तव्यः । प्रचिकीर्ष्य गतः ॥

ल्यपि लघुपूर्वादिति वचनात्सिद्धम् ॥ ३ ॥

ल्यपि लघुपूर्वादिति वक्तव्यम् ॥ एवमपि ह्रस्वयलोपाल्लोपानामसिद्धत्वाल्ल्यपि लघुपूर्वादित्ययादेशो न प्राप्नोति[2] । प्रशमय्य गतः प्रतमय्य गतः । प्रबेभिदय्य गतः प्रचोच्छिदय्य गतः । प्रगदय्य गतः प्रस्तनय्य गतः ।

ह्रस्वादिषु चोक्तम् ॥ ४ ॥

किमुक्तम् । समानाश्रयवचनात्सिद्धमिति[3] । कथम् । णावेते विधयो णेर्ल्यप्यादेशः ॥

विभाषाषः ॥ ६ । ४ । ५७ ॥

इङादेशस्य प्रतिषेधो वक्तव्यः । अध्यार्प्य गतः ।

आपः सानुबन्धकनिर्देशादिङि सिद्धम् ॥ १ ॥

आपः सानुबन्धकस्य निर्देशः करिष्यते । आप्लृ इति । तेनेङादेशस्य न भविष्यति ॥ स तर्हि सानुबन्धकनिर्देशः कर्तव्यः । न कर्तव्यः । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवं न भविष्यति ॥*

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य चतुर्थे पादे द्वितीयमाह्निकम् ॥

---

* [V. M. om. युप्लुवोर्दीर्घश्छन्दसि (५८) ; क्षियः (५९) ; निष्ठायामण्यदर्थे (६०) ; वाऽऽक्रोशदैन्ययोः (६१)].

[1] अतो लोपः ६. ४. ४८. [2] मितां ह्रस्वः ; यस्य हलः; अतो लोपः ६. ४. ९२; ४९; ४८. [3] समानाश्रयवचनात्सिद्धम् ६. ४. २२. वा. १२. [4] क्रीङ्जीनां णौ ; अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ ७. १. ३८. ७. ३. ३६.

स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ॥ ६ । ४ । ६२ ॥

भावकर्मणोरिति कथमिदं विज्ञायते । भावकर्मणोर्ये स्यादय इति । आहोस्विद्भावकर्मवाचिनि परतो ये स्यादय इति । किं चातः । यदि विज्ञायते भावकर्मणोर्ये स्यादय इति सीयुड्विशेषितः स्यसिच्तासयोऽविशेषिताः । अथ विज्ञायते भावकर्ममाचिनि परतो ये स्यादय इति स्यसिच्तासयो विशेषिताः सीयुडविशेषितः । उभयथा चिण्वद्भावोऽविशेषितः ॥ यथेच्छसि तथास्तु । अस्तु तावद्भावकर्मणोर्ये स्यादय इति । ननु चोक्तं सीयुड्विशेषितः स्यसिच्तासयोऽविशेषिता इति । स्यसिच्तासयश्च विशेषिताः । कथम् । भावकर्मणोर्यग्भवतीत्यत्र[1] स्यादयोऽप्यनुवर्तिष्यन्ते । अथवा पुनरस्तु भावकर्मवाचिनि परतो ये स्यादय इति । ननु चोक्तं स्यसिच्तासयो विशेषिताः सीयुडविशेषित इति । सीयुट् च विशेषितः । कथम् । भावकर्मवाचिनि परतः सीयुड्नास्तीति कृत्वा भावकर्मवाचिनि सीयुटि कार्यं विज्ञास्यते ॥

अथेट्चेत्युच्यते कस्यायमिड्भवति । अङ्गस्येति[2] वर्तते । यद्येवमादित इट् प्राप्नोत्यडाड्वत्[3] । तद्यथाडाटौ टित्त्वादादितो भवतस्तद्वत् ॥ एवं तर्हि स्यादीनामेव भविष्यति । एवमपि षष्ठ्यभावान्न प्राप्नोति । ननु च भावकर्मणोरित्येषा षष्ठी । नैषा षष्ठी । किं तर्हि । अर्थनिर्देश एषा सप्तमी । भावे चार्थे कर्मणि चेति । एवं तर्हि भावकर्मणोरित्येषा सप्तमी स्यादिष्विति सप्तम्याः षष्ठीं प्रकल्पयिष्यति तस्मिन्निति निर्दिष्टे पूर्वस्य [१. १. ६६] इति । एवमपि न सिध्यति । किं कारणम् । न ह्यर्थेन पौर्वापर्यमस्ति । अर्थेऽसंभवात्तद्वाचिनि शब्दे कार्यं विज्ञास्यते । एवमपि सीयुटो न प्राप्नोति ॥ एवं तर्हि सप्तमे[4] योगविभागः करिष्यते । आर्धधातुकस्येट् । यावानिड्नाम स सर्व आर्धधातुकस्येड्भवति । ततो वलादेः । वलादेरार्धधातुकस्येड्भवतीति ॥ यद्येवं स्यसिच्सीयुट्तासिष्विड्भवति चिण्वद्भावोऽविशेषितो भवति । तत्र को दोषः । स्यसिच्सीयुट्तासिष्विड्भवत्यज्झनग्रहदृशां वा चिण्वदिति क्वचिदेव चिण्वद्भावः स्यात् । एवं तर्हि स्यादीनेवापेक्षिष्यामहे । स्यसिच्सीयुट्तासिष्विड्भवति । अज्झनग्रहदृशां वा चिण्वत्स्यादिष्विति ॥

---

[1] सार्वधातुके यक् ३. १. ६७.   [2] अङ्गस्य ६. ४. १.   [3] आद्यन्तौ टकितौ ; लुङ्लङ्लृङ्क्ष्वडुदात्तः ; आडजादीनाम्. १. ३. ४६ ; ६. ४. ७१, ७२.   [4] आर्धधातुस्येड् वलादेः ७. २. ३५.

अथ के पुनरिममिटं प्रयोजयन्ति । येऽनुदात्ताः[1] । अथ य उदात्तास्तेषां कथम् । सिद्धं तेनैव परत्वात्[2] ॥ उदात्तेभ्योऽपि वा अनेनैवेडेषितव्यः । किं प्रयोजनम् । कारयतेः कारिष्यते । हारयतेर्हारिष्यते । इटोऽसिद्धत्वाण्णेरनिटि [६. ४· ५१] इति णिलोपो यथा स्यात् । कथं पुनरिच्छतापि भवतोदात्तेभ्यो ऽनेनैवेड्भ्यो न पुनरनेनास्तु तेन वेति तेनैव स्याद्विप्रतिषेधेन । ननु च नित्योऽयम् । कृतेऽपि तस्मिन्प्राप्नोत्यकृतेऽपि प्राप्नोति । न त्वस्मिन्कृतेपि स प्राप्नोति । किं कारणम् । अवलादित्वात् । तस्मादनेनैव भविष्यतीट् ॥

कानि पुनरस्य योगस्य प्रयोजनानि ।

वृद्धिश्चिण्वद्युक्च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति ।

वृद्धिः[3] प्रयोजनम् । चेष्यते चायिष्यते ॥ युक्च[4] प्रयोजनम् । ग्लास्यते ग्लायिष्यते ॥ हन्तेश्च घत्वं[5] प्रयोजनम् हनिष्यते घानिष्यते ॥ दीर्घश्चोक्तो यो मितां वा चिणीति[6] स च प्रयोजनम् । शमिष्यते शामिष्यते । तमिष्यते तामिष्यते ॥

इड्चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं वल्निमित्तो विघाती ॥

इटोऽसिद्धत्वाण्णेरनिटि [६. ४. ५१] इति णिलोपो यथा स्यात् । कथं पुनरयं नित्यः । कृताकृतप्रसङ्गित्वात् । कृतेऽपि तस्मिन्निटि साप्तमिक आर्धधातुकस्येड् वलादेः [७. २. ३५] इति पुनरयं भवति । अस्मिंस्तु विहिते वलादित्वस्य निमित्तस्य विहतत्वात्साप्तमिको न भवति ॥

अथोपदेशग्रहणं किमर्थम् ।

चिण्वद्भाव उपदेशवचनमृकारगुणबलीयस्त्वात् ॥ १ ॥

चिण्वद्भाव उपदेशवचनं क्रियत ऋकारगुणस्य बलीयस्त्वात् । कारिष्यते । परत्वाद्गुणे[7] कृते रपरत्वे चानजन्तत्वाच्चिण्वद्भावो न प्राप्नोति । उपदेशग्रहणाद्भविष्यति ॥

वधिभावात्सीयुटि चिण्वद्भावो विप्रतिषेधेन ॥ २ ॥

वधिभावात्सीयुटि चिण्वद्भावो भवति विप्रतिषेधेन । वधिभावस्यावकाशः[8] । वध्यात् वध्यास्ताम् वध्यासुः । चिण्वद्भावस्यावकाशः । घानिष्यते अघानिष्यत । इहोभयं प्राप्नोति । घानिषीष्ट घानिषीयास्ताम् घानिषीरन् । चिण्वद्भावो भवति विप्रति-

---

[1] एकाच उपदेशेनुदात्तात् ७. २. १०. [2] आर्धधातुकस्येड् वलादेः ७. २. ३५. [3] अचो ञ्णिति ७. २. ११५. [4] आतो युक् चिण्कृतोः ७. ३. ३३. [5] हो हन्तेर्ञ्णिन्नेषु ७. ३. ५४. [6] चिण्णमुलोर्दीर्घोन्यतरस्याम् ६. ४. ९३. [7] सार्वधातुकार्धधातुकयोः ७. ३. ८४. [8] हनो वध लिङि २. ४. ४२.

षेधेन ॥ अथेदानीं चिण्वद्भावे कृते पुनःप्रसङ्गविज्ञानाद्वधिभावः कस्मान्न भवति ॥ सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेवेति ॥

हनिणिङादेशप्रतिषेधश्च ॥ ३ ॥

हनिणिङादेशानां[1] च प्रतिषेधो वक्तव्यः । हनिष्यते घानिष्यते । एष्यते आयिष्यते । अध्येष्यते अध्यायिष्यते । लुङीति हनिणिङादेशाः प्राप्नुवन्ति ॥

अङ्गस्येति तु प्रकरणादाङ्गशास्त्रातिदेशात्सिद्धम् ॥ ४ ॥

आङ्गं यत्कार्यं तत्प्रतिनिर्दिश्यते न च हनिणिङादेशा आङ्गा भवन्तीति ॥ *

आतो लोप इटि च ॥ ६ । ४ । ६४ ॥

अथेड्ग्रहणं किमर्थम् ।

इड्ग्रहणमक्ङिदर्थम् ॥ १ ॥

इड्ग्रहणं क्रियतेऽक्ङिति लोपो यथा स्यात् । पपिथ तस्थिथेति ॥

सार्वधातुके चादीत्यार्धधातुकाधिकारादुपसंख्यानम् ॥ २ ॥

सार्वधातुके चादीत्यार्धधातुकाधिकारादुपसंख्यानं कर्तव्यम् । इषमूर्जमहमित आदिं[2] ॥ ननु च क्ङितीति[3] वर्तमाने यथैवेड्ग्रहणमक्ङिदर्थमेवमार्धधातुके[4] इत्यपि वर्तमान इड्ग्रहणं सार्वधातुकार्थं भविष्यति । न सिध्यति । किं कारणम् । न हि क्ङिताज्विशेष्यते । अचि भवति कतरस्मिन् क्ङितीति । किं तर्हि । अचा क्ङिद्विशेष्यते । क्ङिति भवति कतरस्मिन् अचीति । किं पुनः कारणमचा क्ङिद्विशेष्यते । यथेडप्यज्ग्रहणेन विशेष्येत । अस्ति चेदानीं क्वचिदिडनजादिर्यदर्थो विधिः स्यात् । अस्तीत्याह । दासीय[5] धासीय ॥ तत्तर्ह्युपसंख्यानं कर्तव्यम् । न कर्तव्यम् । आर्धधातुकत्वात्सिद्धम् । कथमार्धधातुकत्वम् । उभयथा छन्दसीति वचनात्[6] । अन्येऽपि धातुप्रत्यया उभयथा छन्दसि दृश्यन्ते ॥ **

घुमास्थागापाजहातिसां हलि ॥ ६ । ४ । ६६ ॥

ईत्त्वे वकारप्रतिषेधो घृतं घृतपावान इति दर्शनात् ॥ १ ॥

ईत्त्वे वकारे प्रतिषेधो वक्तव्यः । किं प्रयोजनम् । घृतं घृतपावान इति दर्शनात् ।

---

* [V. M. om. दीङो युडचि क्ङिति (६३)].　** [V. M. om. ईद्यति (६५)].

[1] लुङि च; इणो गा लुङि; विभाषा लुङ्लृङोः २. ४. ४३; ४५; ५०.　[2] तिप्तस्... ध्वमिड्वहिमहिङ् ३. ४. ७८. The passage इषमूर्जम्...... occurs with the word आदम् for आदि in वाजसनेयिसंहिता XII. 105, and with the word आददे for आदि in तैत्तिरीयसंहिता IV. 2. 7. 1 and V. 2. 5. 6.　[3] दीङो युडचि क्ङिति ६. ४. ६३.　[4] आर्धधातुके ६. ४. ४६.　[5] लिङः सीयुट्; इटोऽत् ६. ४. १०२; १०६.　[6] छन्दस्युभयथा ३. ४. ११७.

इह मा भूत् । घृतं घृतपावानः पिबत वसां वसापावानः पिबतेति ॥ यदि तर्हि बकारे प्रतिषेध उच्यते कथं धीवरी पीवरीति ।

धीवरी पीवरीति चोक्तम् ॥ २ ॥

किमुक्तम् । नैतदीत्त्वम् । किं तर्हि । ध्याप्योरेतत्संप्रसारणमिति[1] ॥

स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । वनिबेष भविष्यति न क्वनिबिति ॥ *

न माङ्योगे ॥ ६ । ४ । ७४ ॥

कस्यायं प्रतिषेधः । आटः[2] प्राप्नोति । अटोऽपीष्यते । तत्तर्ह्यटो ग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । लुङ्लङ्लृङ्क्ष्वडुदात्तः [६. ४. ७१] इति । यदि तर्हि तदनुवर्तत आडजादीनाम् [७२] अट् चेत्यडपि प्राप्नोति । अस्तु । अटि कृते पुनराड्भविष्यति । इहापि तर्ह्यटि कृते पुनराट् प्राप्नोति । अकार्षीत् अहार्षीत् । अड्वचनान्न भविष्यति । इहापि तर्ह्यड्वचनान्न स्यात् । ऐहिष्ट ऐक्षिष्ट । आड्वचनाद्भविष्यति । इहापि तर्ह्याड्वचनात्प्राप्नोति । अकार्षीत अहार्षीत् । अकृतेऽटि योऽजादिरित्येवमेतद्विज्ञास्यते । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । अज्वचनसामर्थ्यात् । यदि कृते ऽटि योऽजादिस्तत्र स्यादज्ग्रहणमनर्थकं स्यात् ॥ अथवोपदेश इति[3] वर्तते । अथवार्धधातुक इति[4] वर्तते । अथवा लुङ्लङ्लृङ्क्ष्वडिति द्विलकारको निर्देशः । लुङादिषु लकारादिषु योऽजादिरिति ॥ सर्वथा ऐज्यत औप्यतेत्येतन्न सिध्यति[5] । एवं तर्हि

अजादीनामटा सिद्धम्

अजादीनामटैव सिद्धं नार्थ आटा ॥ एवं तर्हि वृद्ध्यर्थमाड्वक्तव्यः[6] ।

वृद्ध्यर्थमिति चेदटः ।

अटो वृद्धिं वक्ष्यामि ॥ यदि तर्ह्यटो वृद्धिरुच्यते

अस्वपो हसतीत्यत्र

वृद्धिः प्राप्नोति रोरुत्वे कृते[7] ॥

धातौ वृद्धिमटः स्मरेत् ॥ १ ॥

धातावटो वृद्धिं वक्ष्यामि ॥ तत्तर्हि धातुग्रहणं कर्तव्यम् । न कर्तव्यम् । योग-

---

* [V. M. om. एर्लिङि (६७); वान्यस्य संयोगादेः (६८); न ल्यपि (६९); मयतेरिदन्यतरस्याम् (७०); लुङ्-लङ्-लृङ्क्ष्वडुदात्तः (७१); आडजादीनाम् (७२); छन्दस्यपि दृश्यते (७३)].

१ इह हि दोषः स्यात् धियौ धियः पियौ पिय इति । नैतदात्वम् । किं तर्हि । ध्याप्योः संप्रसारणमेतत् । ६. ४. ४२ वा. १ महाभाष्य. २ आडजादीनाम् ६. ४. ७२. ३ स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशे...इट् च ६. ४. ६२. ४ आर्धधातुके ६. ४. ४६. ५ वाचिस्वपियजादीनां किति ६. १. ६३ ६ आटश्च ६. १. ९०. ७ अड् गार्ग्यगालवयोः; ससजुषो रुः; हशि च ७. ३. ९९, ८. २. ६६; ६. १. ११४; (आद्गुणः ६. १. ८७).

विभागः करिष्यते[1] । अटोऽचि वृद्धिर्भवति । तत उपसर्गादृति वृद्धिर्भवति । ततो धातौ । धातावित्युभयोः शेषः ॥ इह तर्हि आटीत्[2] आशीदित्यतो गुणे [६. १. १७] इति पररूपं प्राप्नोति ।

पररूपं गुणे नाटः

पररूपं गुणेऽटो नेति वक्ष्यामि ॥ तत्तर्हि वक्तव्यम् ।

ओमाङोरुसि तत्समम् ।

यद्यप्येतदुच्यतेऽथवैतर्ह्युस्योमाङ्क्ष्वाटः पररूपप्रतिषेधश्चोदितः[3] स न वक्तव्यो भवति ॥ छन्दोऽर्थं तर्ह्याङ्वक्तव्यः । आरैगु कृष्णा[4] । त्रित एनमायुनक्[5] । सुरुचो वेन आवः[6] ।

छन्दोऽर्थं बहुलं दीर्घम्

बहुलं छन्दसि दीर्घत्वं दृश्यते । तद्यथा । पूरुषः नारक इति ॥ एवं तर्हि आयन् आसन् इणस्त्योर्यण्लोपयोः[7] कृतयोरनजादित्वाद्वृद्धिर्न प्राप्नोति ।

इणस्त्योरन्तरङ्गतः ॥ २ ॥

अन्तरङ्गत्वाद् वृद्धिर्भविष्यति । तस्मान्नार्थ आङ्ग्रहणेन ॥

अजादीनामटा सिद्धं वृद्ध्यर्थमिति चेदटः ।
अस्वपो हसतीत्यत्र धातौ वृद्धिमटः स्मरेत् ॥ १ ॥
पररूपं गुणे नाट ओमाङोरुसि तत्समम् ।
छन्दोऽर्थं बहुलं दीर्घमिणस्त्योरन्तरङ्गतः ॥ २ ॥ *

अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ॥ ६ । ४ । ७७ ॥

इयङादिप्रकरणे तन्वादीनां छन्दसि बहुलम् ॥ १ ॥

इयङादिप्रकरणे तन्वादीनां छन्दसि बहुलमुपसंख्यानं कर्तव्यम् । तन्वं पुषेम । तनुवं पुषेम । विष्वं पश्य । विषुवं पश्य । स्वर्गं लोकम् । सुवर्गं लोकम् । त्र्यम्बकं यजामहे । त्रियम्बकं यजामहे ॥ **

एरनेकाचोऽसंयोगपूर्वस्य ॥ ६ । ४ । ८२ ॥

अथेह कस्मान्न भवति । ब्राह्मणस्य नियौ । ब्राह्मणस्य नियः । अङ्गाधिकारात् ।

---

* [V. M. om. बहुलं छन्दस्यमाङ्योगेपि (७५); इरयो रे (७६)].

** [V. M. om. अभ्यासस्यासवर्णे (७८); स्त्रियाः (७९); वाऽम्शसोः (८०); इणो यण् (८१)].

[1] उपसर्गादृति धातौ ६. १. ९१. [2] नेटि ७. २. ४. [3] उस्योमाङ्क्ष्वाटः प्रतिषेधः ६. १. ९४ वा. १. [4] ऋ. सं. १. ११३. २. [5] ऋ. सं. १. १६३. २. [6] अ. सं. ५. ६. १; मै. सं. २. ७. १५. [7] इणो यण्; श्नसोरल्लोपः ६. ४. ८१; १११.

अङ्गस्येत्यनुवर्तते[1] ॥ एवमपि परमनियौ परमनिय इत्यत्र प्राप्नोति । गतिकारकपूर्वस्येष्यते ॥

यणादेशः स्वरपदपूर्वोपधस्य च ॥ १ ॥

यणादेशः स्वरपूर्वोपधस्य पदपूर्वोपधस्य चेति वक्तव्यम् । स्वरपूर्वोपधस्य । निन्यतुः निन्युः । पदपूर्वोपधस्य । उन्न्यौ उन्न्यः । उद्ध्यौ उद्ध्यः । उभयकृतम् । ग्रामण्यौ ग्रामण्यः । सेनान्यौ सेनान्यः ॥

असंयोगपूर्वे ह्यनिष्टप्रसङ्गः ॥ २ ॥

असंयोगपूर्वस्येति ह्युच्यमाने ऽनिष्टं प्रसज्येत । ऊद्ध्यौ उद्ध्यः । उन्न्यौ उन्न्यः । असंयोगपूर्वस्येति प्रतिषेधः प्रसज्येत ॥

तत्तर्हि वक्तव्यम् । न वक्तव्यम् । धातोरिति[2] वर्तते तत्र धातुना संयोगं विशेषयिष्यामः । धातोर्यः संयोगस्तत्पूर्वस्य नेति । उपसर्जनं वै संयोगो न चोपसर्जनस्य विशेषणमस्ति । धातोरित्यनुवर्तनसामर्थ्यादुपसर्जनस्यापि विशेषणं भविष्यति । अस्त्यन्यद्धातोरित्यनुवर्तनस्य प्रयोजनम् । किम् । इवर्णं विशेषयिष्यामः । नैतदस्ति प्रयोजनम् । यद्ध्यधातोरिवर्णं भवितव्यमेव तस्य यणादेशेनेको यणचि [६. १. ७७] इत्येव ॥*

वर्षाभ्वश्च ॥ ६ । ४ । ८४ ॥

वर्षाभू पुनर्भ्वश्च ॥ १ ॥

वर्षाभू इत्यत्र पुनर्भ्वश्चेति वक्तव्यम् । पुनर्भ्वौ पुनर्भ्वः ॥

अत्यल्पमिदमुच्यते । वर्षादृन्कारपुनःपूर्वस्य भुव इति वक्तव्यम् । वर्षाभ्वौ वर्षाभ्वः । दृन्भ्वौ दृन्भ्वः । कारभ्वौ कारभ्वः । पुनर्भ्वौ पुनर्भ्वः ॥**

हुश्नुवोः सार्वधातुके ॥ ६ । ४ । ८७ ॥

हुश्नुग्रहणानर्थक्यमन्यस्याभावात् ॥ १ ॥

हुश्नुग्रहणमनर्थकम् । किं कारणम् । अन्यस्याभावात् । न ह्यन्यत्सार्वधातुकेऽस्ति

---

* [V. M. om. ओः सुपि (८३)].

** [V. M. om. न भूसुधियो ; (८५) ; छन्दस्युभयथा (८६)].

[1] अङ्गस्य ६. ४. १.

[2] अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६. ४. ७७.

यस्य यणादेशः स्यात् ॥ ननु चायमस्ति । याति वातीति । क्ङितीत्यनुवर्तते[1]। इह तर्हि । यातः वात इति । अचीति वर्तते । इह तर्हि । यान्ति वान्तीति । य्वोरिति वर्तते[2] । एवमपि धियन्ति पियन्तीत्यत्र प्राप्नोति । ओरिति वर्तते[3] । एवमपि सुवन्ति रुवन्तीत्यत्र प्राप्नोति । अनेकाच इति वर्तते[4] । एवमपि असुवन् अरुवन्नित्यत्र प्राप्नोति । एतदप्यटोऽसिद्धत्वादेकाज्भवति । एवमपि प्रोर्णुवन्तीत्यत्र प्राप्नोति । असंयोगपूर्वस्येति[4] वर्तते ॥ यङ्लुगर्थं तर्हि हुश्नुग्रहणं कर्तव्यम्। यङ्लुगन्तमनेकाजसंयोगपूर्वमुवर्णान्तमस्ति तदर्थमिदम् । न॒दं योयु॑वतीनाम्[5]। वृष॒भं॑ रोरु॑वतीनाम् ।

यङ्लुगर्थमिति चेदार्धधातुकत्वात्सिद्धम् ॥ २ ॥

यङ्लुगर्थमिति चेत्तन्न । किं कारणम् । आर्धधातुकत्वात्सिद्धम् । कथमार्धधातुकत्वम् । उभयथा छन्दसीति वचनात्[6] । अन्येऽपि धातुप्रत्ययाश्छन्दस्युभयथा दृश्यन्त इति ॥ एवं तर्हि सिद्धे सति यद्धुश्नुग्रहणं करोति तज्ज्ञापयत्याचार्यो यङ्लुग्भाषायां भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । बोभिदीति चेच्छिदीत्येतसिद्धं भवति भाषायामपि ॥ *

ऊदुपधाया गोहः ॥ ६ । ४ । ८९ ॥

अथ किमर्थं गुहेर्विकृतस्य ग्रहणं क्रियते न पुनर्गुह इत्येवोच्येत ।

गोहिग्रहणं विषयार्थम् ॥ १ ॥

गोहिग्रहणं क्रियते विषयार्थम् । विषयः प्रतिनिर्दिश्यते । यत्रास्यैतद्रूपं तत्र यथा स्यात् । इह मा भूत् । निजुगुहतुः निजुगुहुरिति ॥

अयादेशप्रतिषेधार्थं च ॥ २ ॥

अयादेशप्रतिषेधार्थं च विकृतग्रहणं क्रियते ॥

ह्रस्वादेशे ह्ययादेशप्रसङ्ग ऊत्त्वस्यासिद्धत्वात् ॥ ३ ॥

ह्रस्वादेशे हि सत्ययादेशः प्रसज्येत । प्रगूह्यः गतः । किं कारणम् । ऊत्त्व-

---

* [V. M. om. भुवो वुग्लुङ्लिटोः (८८)].

[1] दीङो युडाचि क्ङिति ६. ४. ६३.
[2] अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६. ४. ७७.
[3] ओः सुपि ६. ४. ८३.
[4] एरनेकाचोऽसंयोगपूर्वस्य ६. ४. ८२.
[5] ऋ. सं. ८. ६९. २.
[6] छन्दस्युभयथा ३. ४. ११७.

स्यासिद्धत्वात् । असिद्धमूत्त्वं तस्यासिद्धत्वाल्ल्यपि लघुपूर्वात् [६. ४. ५६] इत्ययादेशः प्रसज्येत ॥

विषयार्थेन तावन्नार्थो गोहिग्रहणेन । प्रश्लिष्टनिर्देशात्सिद्धम् । प्रश्लिष्टनिर्देशोऽयम् । उ ऊत् ऊदिति । तत्र ह्रस्वस्यावकाशः । निजुगुहतुः निजुगुहुः । गुणस्यावकाशः । निगोढा निगोढुम् । इहोभयं प्राप्नोति । निगूहयति निगूहकः । परत्वाद्गुणे[1] कृत आन्तर्यतो दीर्घस्य दीर्घो भवति ॥ अयादेशप्रतिषेधार्थेनापि नार्थः । समानाश्रयवचनात् सिद्धम् । समानाश्रयमसिद्धं भवति व्याश्रयं चैतत् । कथम् । णावूत्त्वं णेर्ल्यप्ययादेशः ॥

दोषो णौ ॥ ६ । ४ । ९० ॥

अथ किमर्थं दुषेर्विकृतस्य ग्रहणं क्रियते न पुनर्दुष इत्येवोच्येत ।

दोषिग्रहणं च ॥ १ ॥

किम् । अयादेशप्रतिषेधार्थं विकृतग्रहणं क्रियते । ह्रस्वादेशे ह्ययादेशप्रसङ्ग ऊत्त्वस्यासिद्धत्वात् । ह्रस्वादेशे हि सत्ययादेशः प्रसज्येत । प्रदूष्य गतः । किं कारणम् । ऊत्त्वस्यासिद्धत्वात् । असिद्धमूत्त्वं तस्यासिद्धत्वाल्ल्यपि लघुपूर्वादित्ययादेशः प्रसज्येत ॥ अत्रापि समानाश्रयवचनात् सिद्धमित्येव ॥ *

चिण्णमुलोर्दीर्घोऽन्यतरस्याम् ॥ ६ । ४ । ९३ ॥

चिण्णमुलोर्णिव्यपेतानां यङ्लोपे चोपसंख्यानं कर्तव्यम् । शमयन्तं प्रयोजितवान् अशमि अशामि शमं शमम् शामं शामम् । शंशमयतेः अशंशमि अशंशामि शंशमं शंशमम् । शंशामं शंशामम् । किं पुनः कारणं न सिध्यति । चिण्णमुल्परे णौ मितामङ्गानां दीर्घो भवतीत्युच्यते यश्चात्र चिण्णमुल्परो न तस्मिन्मिदङ्गं यस्मिंश्च मिदङ्गं नासौ चिण्णमुल्पर इति । लोपे[2] कृते चिण्णमुल्परो भवति । स्थानिवद्भावान्न चिण्णमुल्परः । ननु च प्रतिषिध्यतेऽत्र स्थानिवद्भावो दीर्घविधिं प्रति न स्थानिवदिति[3] । एवमप्यसिद्धत्वान्न प्राप्नोति ॥ एवं तर्हि

---

* [V. M. om. वा चित्तविरागे (९१); मितां ह्रस्वः (९२)].

[1] पुगन्तलघूपधस्य च ७. ३. ८६. [2] णेरनिटि; अतो लोपः; यस्य हलः ६. ४. ५१; ४८; ४९. [3] न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु १. १. ५८.

चिण्णमुलोर्णिव्यपेतानां यङ्लोपे चान्तरङ्गलक्षणत्वात् सिद्धम् ॥ १ ॥

किमिदमन्तरङ्गलक्षणत्वादिति । यावद् ब्रूयात्समानाश्रयवचनात्सिद्धमित्येव । व्याश्रयं चैतत् । कथम् । णेर्णौ लोपो णौ चिण्णमुल्परे मितामङ्गानां दीर्घत्वमुच्यते । तस्मान्नार्थ उपसंख्यानेनेति ॥ *

छादेर्घेऽद्व्युपसर्गस्य ॥ ६ । ४ । ९६ ॥

अद्विप्रभृत्युपसर्गस्येति वक्तव्यम् । इहापि यथा स्यात् । समुपाभिच्छाद इति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । यत्र त्रिप्रभृतयः सन्ति द्वावपि तत्र स्तस्तत्राद्व्युपसर्गस्येत्येव सिद्धम् ॥ न वा एष लोके संप्रत्ययः । न हि द्विपुत्र आनीयतामित्युक्ते त्रिपुत्र आनीयते । तस्माद् द्विप्रभृत्युपसर्गस्येति वक्तव्यम् ॥ **

घसिभसोर्हलि ॥ ६ । ४ । १०० ॥

हल्ग्रहणमनर्थकमन्यत्रापि दर्शनात् ॥ १ ॥

हल्ग्रहणमनर्थकम् । किं कारणम् । अन्यत्रापि दर्शनात् । अन्यत्रापि लोपो दृश्यते । अग्निस्तृणानि बप्सति[1] । शरावे बप्सति चरुः ॥

हुझल्भ्यो हेर्धिः ॥ ६ । ४ । १०१ ॥

इटः प्रतिषेधे वक्तव्यः । रुदिहि स्वपिहि[2] । झल इति धित्वं प्राप्नोति ॥

हेर्धित्वे हलधिकारादिटोऽप्रतिषेधः ॥ १ ॥

हेर्धित्वे हलधिकारादिटो ऽप्रतिषेधः । अनर्थकः प्रतिषेधो ऽप्रतिषेधः । धित्वं कस्मान्न भवति । हलधिकारात् । प्रकृतं हल्ग्रहणमनुवर्तते । क्व प्रकृतम् । घसिभसोर्हलि [६. ४. १००] इति । तद्वै सप्तमीनिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । तद्वै तत्र प्रत्याख्यायते तत्र प्रत्याख्यातं सद्यया विभक्त्या निर्दिश्यमानमर्थवत्तया निर्दिष्टमिहानुवर्तिष्यते ॥ अथवा हुझल्भ्य इत्येषा पञ्चमी हलीति सप्तम्याः षष्ठीं

---

* [V. M. om. खचि ह्रस्वः (९४); ह्लादो निष्ठायाम् (९५)].

** [V. M om. इस्मन्त्रन्क्विषु च (९७) ; गमहनजनखनघसां लोपः क्ङित्यनङि (९८); तनिपत्योश्छन्दसि (९९)].

[1] Cf. दुद्भिर्वतानि बप्सति ऋ. वे. ८. ४३. ३.

[2] रुदादिभ्यः सार्वधातुके ७. २. ७६.

प्रकल्पयिष्यति तस्मादित्युत्तरस्य [१. १. ६७] इति ॥ ॥ अथवा निर्दिश्यमानस्यादेशा भवन्तीत्येवं न भविष्यति । यस्तर्हि निर्दिश्यते तस्य कस्मान्न भवति । इटा व्यवहितत्वात् ॥ यद्येवं छिन्द्धकि भिन्द्धकीत्यत्र धित्वं न प्राप्नोति । धित्वे कृते ऽकज् भविष्यति[1] । इदमिह संप्रधार्यम् । धित्वं क्रियतामकजिति किमत्र कर्तव्यम् परत्वाद्धित्वम् । नित्योऽकच् । कृतेऽपि धित्वे प्राप्नोत्यकृतेऽपि । अकजप्यनित्यः । अन्यस्य कृते धित्वे प्राप्नोत्यन्यस्याकृते शब्दान्तरस्य च प्राप्नुवन् विधिरनित्यो भवति । उभयोरनित्ययोः परत्वाद्धित्वं धित्वे कृतेऽकज्भविष्यति ॥ अथवा हकारस्यैवाशक्तिजेनेकारेण ग्रहणमिति ॥*

चिणो लुक् ॥ ६ । ४ । १०४ ॥

चिणो लुकि तग्रहणं कर्तव्यम् । किं प्रयोजनम् । इह मा भूत् । अकारितराम् अहारितरामिति ॥

चिणो लुकि तग्रहणानर्थक्यं संघातस्याप्रत्ययत्वात् ॥ १ ॥

चिणो लुकि तग्रहणमनर्थकम् किं कारणम् । संघातस्याप्रत्ययत्वात् । संघातस्य लुक्कस्मान्न भवति । अप्रत्ययत्वात् । प्रत्ययस्य लुक्श्लुलुपो भवन्तीत्युच्यते[2] न च संघातः प्रत्ययः ॥ तलोपे तर्हि कृते परस्य प्राप्नोति ।

तलोपस्य चासिद्धत्वात् ॥ २ ॥

असिद्धस्तलोपस्तस्यासिद्धत्वान्न भविष्यति ॥

कार्यकृतत्वाद्वा ॥ ३ ॥

अथवा कृतश्चिणो लुगिति कृत्वा पुनर्न भविष्यति लुक् । तद्यथा । वसन्ते ब्राह्मणोऽग्नीनादधीतेति सकृदाधाय कृतः शास्त्रार्थ इति कृत्वा पुनःप्रवृत्तिर्न भवति ॥ विषम उपन्यासः । युक्तं यत्तस्यैव पुनःप्रवृत्तिर्न स्याद्यत्तु तदाश्रयं प्राप्नोति न तच्छक्यं बाधितुम् । तद्यथा । वसन्ते ब्राह्मणोऽग्निष्टोमादिभिः क्रतुभिर्यजेतेत्यग्न्याधाननिमित्तं वसन्ते वसन्त इज्यते । तस्मात्पूर्वोक्तावेव परिहारौ ॥

अथवा क्ङितीति वर्तते । क्व प्रकृतम् । गमहनजनखनघसां लोपः क्ङित्यनङि [६. ४. ९८] इति । तद्वै सप्तमीनिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । चिण इत्येषा पञ्चमी क्ङितीति सप्तम्याः षष्ठी प्रकल्पयिष्यति तस्मादित्युत्तरस्य [१. १. ६७] इति ॥**

---

* [V. M. om. श्रुशृणुपॄकृवृभ्यश्छन्दसि (१०२); अङितश्च (१०३)].

** [V. M. cm. अतो हेः (१०५)].

[1] अव्ययसर्वनाम्नामकच् प्राक् टेः ५. ३. ७१.

[2] प्रत्ययस्य लुक्श्लुलुपः १. १. ६१.

उतश्च प्रत्ययादसंयोगपूर्वात् ॥ ६ । ४ । १०६ ॥

कथमिदं विज्ञायते । उकारात्प्रत्ययादिति । आहोस्विदुकारान्तात्प्रत्ययादिति । किं चातः । यदि विज्ञायत उकारात्प्रत्ययादिति सिद्धं तनु कुरु, चिनु सुन्विति न सिध्यति । अथ विज्ञायत उकारान्तात्प्रत्ययादिति सिद्धं चिनु सुनु, तनु कुर्विति न सिध्यति ॥ तथासंयोगपूर्वग्रहणेनेहैव पर्युदासः स्यात् तक्ष्णुहि अक्ष्णुहि, आप्नुहि शक्नुहीत्यत्र न स्यात् ॥ यथेच्छसि तथास्तु । अस्तु तावदुकारात्प्रत्ययादिति । कथं चिनु सुन्विति । तदन्तविधिना[1] भविष्यति । अथवा पुनरस्तूकारान्तात्प्रत्ययादिति । कथं तनु कुर्विति । व्यपदेशिवद्भावेन भविष्यति ॥ यदप्युच्यते तथासंयोपूर्वग्रहणेनेहैव पर्युदासः स्यात् तक्ष्णुहि अक्ष्णुहि, आप्नुहि, शक्नुहीत्यत्र न स्यादिति । नास्माभिरसंयोगपूर्वग्रहणेनोकारान्तं विशेष्यते । किं तर्हि । उकारः । उकारो योऽसंयोगपूर्वस्तदन्तात्प्रत्ययादिति ॥

उतश्च प्रत्ययाच्छन्दोवावचनम् ॥ १ ॥

उतश्च प्रत्ययादित्यत्र च्छन्दसि वेति वक्तव्यम् । अव स्थिरा तनुहि यातुजूनाम्[2] । धिनुहि यज्ञं धिनुहि यज्ञपतिम् । तेन मा भागिनं कृणुहि ॥

उत्तरार्थं च ॥ २ ॥

केचित्तावदाहुश्छन्दोग्रहणं कर्तव्यमिति । अपर आहुर्वावचनं कर्तव्यमिति । लोपश्चास्यान्यतरस्यां म्वोः [१०७] इत्यत्रान्यतरस्यांग्रहणं न कर्तव्यं भवति ॥ *

अत उत् सार्वधातुके ॥ ६ । ४ । ११० ॥

सार्वधातुक इति किमर्थम् । इह मा भूत् । संचस्करतुः संचस्करुः ॥ स्यान्तस्य प्रतिषेधो वक्तव्यः । करिष्यति करिष्यतः ।

कृञ उत्त्व उकारान्तनिर्देशात्स्यान्तस्याप्रतिषेधः ॥ १ ॥

कृञ उत्त्वे उकारान्तनिर्देशात्स्यान्तस्याप्रतिषेधः । अनर्थकः प्रतिषेधोऽप्रतिषेधः उत्त्वं कस्मान्न भवति । उकारान्तनिर्देशात् ॥ अशक्यः करोतावुकारान्त-

---

* [V. M. om. लोपश्चास्यान्तरस्यां म्वोः (१०७); नित्यं करोतेः (१०८); ये च (१०९)].

[1] येन विधिस्तदन्तस्य. १. १. ७२. [2] ऋ. सं. १०. ११६. ५.

निर्देशस्तन्त्रमाश्रयितुम् । इह संपरिभ्यां भूषणसमवाययोः करोताविवितीहैव स्यात् संस्करोति, संस्कर्ता संस्कर्तुमित्यत्र न स्यात्[1] ॥ न ब्रूमो ऽस्मादुकारान्तनिर्देशाद्योऽयं करोतेरिति । किं तर्हि । उकारप्रकरणादुकारान्तमङ्गमभिसंबध्यते । उत इति[2] वर्तते । यद्येवं नार्थः सार्वधातुकग्रहणेन । कस्यान्न भवति संचस्करतुः संचस्करुरिति । उत इति वर्तते ॥ उत्तरार्थं तर्हि सार्वधातुकग्रहणं कर्तव्यम् । श्नसोरल्लोपः [१११] इति । श्नम् सार्वधातुक एव । अस्तेरप्यार्धधातुके भूभावेन भवितव्यम्[3] ॥ उत्तरार्थमेव तर्हि । श्नाभ्यस्तयोरातः [११२] इति । श्ना सार्वधातुक एव । अभ्यस्तमप्याकारान्तमार्धधातुके नास्ति[4] । ननु चेदमस्ति अप्सु यायावरैः[5] प्रवपेत पिण्डानिति । नैतदाकारान्तम् । यकारान्तमेतत् ॥ उत्तरार्थमेव तर्हि ई हल्यघोः [११३] इति । तत्रापि श्नाभ्यस्तयोरित्येव ॥ अतोऽप्युत्तरार्थमेव तर्हि । इद्दरिद्रस्य [११४] इति । वक्ष्यत्येतद्दरिद्रातेरार्धधातुके लोपः सिद्धश्च प्रत्ययविधाविति[6] ॥ अतोऽप्युत्तरार्थम् । भियोऽन्यतरस्याम् [११५] अभ्यस्तस्येत्येव ॥ अतोऽप्युत्तरार्थमेव जहातेश्च [११६] अभ्यस्तस्येत्येव ॥ अतोऽप्युत्तरार्थम् । आ च हौ [११७] ॥ हावित्युच्यते । अभ्यस्तस्येत्येव ॥ अतोऽप्युत्तरार्थम् । लोपो यि [११८] अभ्यस्तस्येत्येव ॥ अतोऽप्युत्तरार्थम् । घ्वसोरेद्धावभ्यासलोपश्च [११९] इति । हावित्युच्यते ॥ तदेव तर्हि प्रयोजनं श्नसोरल्लोप इति । ननु चोक्तं श्नम्सार्वधातुक एव अस्तेरप्यार्धधातुके भूभावेन भवितव्यमिति ।

अनुप्रयोगे तु भुवास्त्यबाधनं स्मरन्ति कर्तुर्वचनान्मनीषिणः ।

अनुप्रयोगे तु भुवास्तेरबाधनमिष्यते । ईहामास ईहामासतुः ईहामासुरिति ॥ किं च स्याद्यद्यत्र लोपः स्यात् ।

लोपे द्विर्वचनासिद्धिः

लोपे कृतेऽनच्कत्वाद् द्विर्वचनं न स्यात् ॥ स्थानिवद्भावाद्भविष्यति ।

स्थानिवदिति चेत्कृते भवेद् द्वित्वे ।

कृते द्वित्वे लोपः प्राप्नोति ॥ अस्तु तर्हि परस्य लोपः । अभ्यासस्य योऽकारस्तस्य दीर्घत्वं भविष्यति[7] ॥

नैवं सिध्यति कस्मात्प्रत्यङ्गत्वाद्भवेद्धि पररूपम् ।

नैवं सिध्यति । कस्मात् । प्रत्यङ्गत्वात्पररूपं प्राप्नोति[8] ।

---

[1] संपरिभ्यां करोतौ भूषणे; समवाये च ६. १. १३७ ; १३८. [2] उतश्चप्रत्ययादसंयोगपूर्वात् ६ ४. १०६. [3] अस्तेर्भूः २. ४. ५२. [4] आतो लोप इटि च ६. ४. ६४. [5] यश्च यङः; अतो लोपः लोपो व्योर्वलि ३. २. १७६. ६. ४. ४८; ६. १. ६६. [6] दरिद्रातेरार्धधातुके लोपः; सिद्धश्च प्रत्ययविधौ ६. ४. ११४ ; वा. १. २. [7] अत आदेः ७. ४. ७०, [8] अतो गुणे ६, १. ९७.

तस्मिंश्च कृते लोपः

पररूपे च कृते लोपः प्राप्नोति ।

दीर्घत्वं बाधकं भवेत्तत्र ॥

अत आदेः [७. ४. ७०] इति दीर्घत्वं बाधकं भविष्यति ॥

इदं तर्हि प्रयोजनं सार्वधातुके भूतपूर्वमात्रेऽपि यथा स्यात् । कुर्विति[1] ॥

श्नसोरल्लोपः ॥ ६ । ४ । १११ ॥

अथात्र तपरकरणं किमर्थम् । इह मा भूत् । आस्ताम् आसन् ॥ नैतदस्ति प्रयोजनम् । आटो[2]ऽसिद्धत्वान्न भविष्यति ॥*

इद्दरिद्रस्य ॥ ६ । ४ । ११४ ॥

दरिद्रातेरार्धधातुके लोपः ॥ १ ॥

दरिद्रातेरार्धधातुके लोपो वक्तव्यः ॥

सिद्धश्च प्रत्ययविधौ ॥ २ ॥

स च सिद्धः प्रत्ययविधौ । किं प्रयोजनम् । दरिद्रातीति दरिद्रः[3] । आकारान्तलक्षणः[4] प्रत्ययविधिर्मा भूदिति ॥

न दरिद्रायके लोपो दरिद्राणे च नेष्यते ।
दिदरिद्रासतीत्येके दिदरिद्रिषतीति वा ॥

वाद्यतन्याम् ॥ ३ ॥

अद्यतन्यां वेति वक्तव्यम् । अदरिद्रीत् अदरिद्रासीत् ॥ **

अत एकहल्मध्येऽनादेशादेर्लिटि ॥ ६ । ४ । १२० ॥

णकारषकारादेशादेरेत्त्ववचनं लिटि ॥ १ ॥

णकारषकारादेशादेरेत्त्वं लिटि वक्तव्यम् । नेमतुः नेमुः । सेहे सेहाते सेहिरे[5] ।

---

* [V. M. om. श्नाभ्यस्तयोरातः (११२); ई हल्यघोः (११३)].

** [V. M. om. भियोन्यतरस्याम् (११५); जहातेश्च (११६); आ च हौ (११७); लोपो यि (११८); घ्वसोरेद्धावभ्यासलोपश्च (११९)].

[1] उतश्च प्रत्ययादसंयोगपूर्वात् ६. ४. १०६ ; (न लुमताङ्गस्य १. १. ६३). [2] आडजादीनाम् ६. ४. ७२. [3] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ३. १. १३४. [4] श्याद्व्यधास्रुसंस्रवतीणवसावहृलिहश्लिषश्वसश्च ३. १. १४१ ; आतो युक् चिण्कृतोः ७. ३. ३३. [5] णो नः ६. १. ६५ ; धात्वादेः षः सः ६. १. ६४.

किं पुनः कारणं न सिध्यति । अनादेशादेरिति प्रतिषेधः प्राप्नोति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । लिटात्रादेशादिं विशेषयिष्यामः । लिटि य आदेशादिस्तदादेर्नेति ॥ अस्त्यन्यल्लिड्ग्रहणस्य प्रयोजनम् । किम् । इह मा भूत् । पक्ता पक्तुम् । नैतदस्ति प्रयोजनम् । क्ङितीति[1] वर्तते । एवमपि पक्तः पक्त्वानित्यत्र प्राप्नोति । अभ्यासलोपसंनियोगेनैत्त्वमुच्यते न चात्राभ्यासलोपं पश्यामः । एवमपि पापच्यते अत्र प्राप्नोति । दीर्घत्वमत्र बाधकं भविष्यति[2] । नाप्राप्ते ऽभ्यासविकार एत्त्वमारभ्यते तद्यथान्यानभ्यासविकारान्बाधत एवं दीर्घत्वमपि बाधेत । सत्यमेवमेतत् । अभ्यासविकारेष्वपि तु ज्येष्ठमध्यमकनीयांसः प्रकारा भवन्ति । तत्र ह्रस्वहलादिशेषावुत्सर्गौ[3] तयोर्दीर्घत्वमपवाद एत्त्वं च । अपवादविप्रतिषेधाद्दीर्घत्वं भविष्यति ॥ इह तर्हि बभणतुः बभणुरित्यभ्यासादेशस्यासिद्धत्वादेत्त्वं प्राप्नोति[4] ।

फलिभजिग्रहणं तु ज्ञापकमभ्यासादेशासिद्धत्वस्य ॥ २ ॥

यदयं फलिभज्योर्ग्रहणं करोति[5] तज्ज्ञापयत्याचार्यः सिद्धोऽभ्यासादेश एत्त्व इति ॥ यद्येवं

प्रथमतृतीयादीनामादेशादित्वादेत्त्वाभावः ॥ ३ ॥

प्रथमतृतीयादीनामपि[6] तर्ह्यादेशादित्वादेत्त्वं न प्राप्नोति । पेचतुः पेचुः । देभतुः देभुः ॥

न वा शसिदद्योः प्रतिषेधो ज्ञापको रूपाभेद एत्त्वविज्ञानस्य ॥ ४ ॥

न वैष दोषः । किं कारणम् । शसिदद्योः प्रतिषेधो ज्ञापको रूपाभेद एत्त्वविज्ञानस्य । यदयं शसिदद्योः प्रतिषेधं शास्ति[7] तज्ज्ञापयत्याचार्यो रूपाभेदेन य आदेशादयो न तेषां प्रतिषेधो भवतीति ॥

दम्भ एत्त्वम्

दम्भ एत्त्वं वक्तव्यम् । देभतुः देभुः ॥ किं पुनः कारणं न सिध्यति ।

नलोपस्यासिद्धत्वात् ॥ ५ ॥

असिद्धो नलोपस्तस्यासिद्धत्वादेत्त्वं न प्राप्नोति[8] ॥

नशिमन्योरलिट्येत्त्वम्

नशिमन्योरलिटयेत्त्वं वक्तव्यम् ॥

---

[1] गमहनजनखनघसां लोपः क्ङित्यनङि ६. ४. ९८. [2] दीर्घो ऽकितः ७. ४. ८३. [3] ह्रस्वः; हलादिः शेषः ७. ४. ५९; ६०. [4] अभ्याचे चर्च; पूर्वत्रासिद्धम् ८. ४. ५४; ८. २. १. [5] तृफलभजत्रपश्च ६. ४. १२२. [6] अभ्यासे चर्च ८. ४. ५४. [7] न शसददवादिगुणानाम् ६. ४. १२६. [8] अनिदितां हल उपधायाः क्ङिति; असिद्धवदत्रा भात् ६. ४. २४; २२.

छन्दस्यमिपचोरपि ।

छन्दस्यमिपचोरपीति वक्तव्यम् ॥ किं प्रयोजनम् ।

अनेशं मेनकेत्येतद्व्येमानं लिङि पेचिरन् ॥ १ ॥
यज् आयेजे वप् आवेपे दम्भ एत्त्वमलक्षणम् ।

असिद्धत्वान्नलोपस्य दम्भ एत्त्वं न सिध्यति ॥

श्नसोरत्त्वे तकारेणं[1] ज्ञाप्यते त्वेत्त्वशासनम् ॥ २ ॥

अनित्योऽयं[2] विधिरिति ॥

थलि च सेटि ॥ ६ । ४ । १२१ ॥

थल्ग्रहणं किमर्थम् ।

थल्ग्रहणमक्ङिदर्थम् ॥ १ ॥

थल्ग्रहणं क्रियतेऽक्ङिदर्थम् । अक्ङित्येत्त्वं यथा स्यात् । पेचिथ शेकिथ ॥ नैतदस्ति प्रयोजनम् । सेड्ग्रहणमेवात्राक्ङिदर्थं भविष्यति ॥ इदं तर्हि प्रयोजनं समुच्चयो यथा विज्ञायेत । थलि च सेटि क्ङिति च सेटीति । किं प्रयोजनम् । पेचिव पेचिम । तत्र पचादिभ्य इड्वचनमिति[3] वक्ष्यति तन्न वक्तव्यं भवति ॥

इह कस्मान्न भवति । लुलविथ । गुणस्य प्रतिषेधात्[4] । इहापि तर्हि न प्राप्नोति । पेचिथ शेकिथ । गुणस्य योऽकार इत्येवमेतद्विज्ञास्यते । एवमपि शशरिथ अत्र प्राप्नोति । गुणस्यैषोऽकारः । कथम् । वृद्धिर्भवति गुणो भवतीति रेफशिरा गुणवृद्धिसंज्ञको ऽभिनिर्वर्तते । अथवाचार्यप्रवृत्तिर्ज्ञापयति नैवंजातीयकानामेत्त्वं भवतीति यदयं तॄफलभजत्रपश्च [६. ४. १२२] इति तॄग्रहणं करोति ॥*

राधो हिंसायाम् ॥ ६ । ४ । १२३ ॥

राधादिषु स्थानिनिर्देशः ॥ १ ॥

राधादिषु स्थानिनिर्देशः कर्तव्यः ॥ न कर्तव्यः । एकहल्मध्ये[5] इति वर्तते ।

---

* [V. M. om. तॄफलभजत्रपश्च (१२२)].

[1] श्नसोरल्लोपः ६. ४. १११.
[2] असिद्धवदत्रा भात् ६. ४. २२.
[3] तत्र पचादिभ्य इड्वचनम् ७. २. ६३. वा. २.
[4] न शसददवादिगुणानाम् ६. ४. १२६.
[5] अत एकहल्मध्येऽनादेशादेर्लिटि ६. ४. १२०.

यद्येवं त्रेसतुः त्रेसुः रशब्दस्यैत्त्वं प्राप्नोति । अस्तु । अलोऽन्त्यस्य[1] विधयो भवन्तीत्यकारस्य भविष्यति । अनर्थकेऽलोऽन्त्यविधिर्नेत्येवं न प्राप्नोति । नैतस्याः परिभाषायाः सन्ति प्रयोजनानि । अथवात इति[2] वर्तते । एवमपि राधेर्न प्राप्नोति । आकारग्रहणमपि प्रकृतमनुवर्तते । क्व प्रकृतम् । श्नाभ्यस्तयोरातः [६. ४. ११२] इति । अथवा श्नसोरल्लोपः [१११] इत्यत्र तपरकरणं प्रत्याख्यायते तत्प्रकृतमिहानुवर्तिष्यते । यदि तदनुवर्ततेऽत एकहल्मध्येऽनादेशादेर्लिटि [१२०] अस्य चेत्यवर्णमात्रस्यैत्त्वं प्राप्नोति । बबाधे । अकारेण तपरेणावर्णं विशेषयिष्यामः । अस्यात इति । इहेदानीमस्येत्यनुवर्तते ऽत इति निवृत्तम् ॥ *

अर्वणस्त्रसावनञः ॥ ६ । ४ । १२७ ॥

मघवा बहुलम् ॥ ६ । ४ । १२८ ॥

अर्वणस्तृ मघोनश्च न शिष्यं छान्दसं हि तत् ।

अर्वणस्तृ मघोनश्च न शिष्यम् । किं कारणम् । छान्दसं हि तत् । दृष्टानुविधिश्छन्दसि भवति ॥

मतुब्वन्योर्विधानाच्च

मतुब्वनी खल्वपि च्छन्दसि विधीयेते[3] ॥

छन्दस्युभयदर्शनात् ॥

उभयं खल्वपि च्छन्दसि दृश्यते । ई॒मान्यर्वणः[4] प॒दानि । अ॒न॒र्वाणं[5] वृ॒ष॒भं म॒न्द्राजिह्वम् ॥ **

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य चतुर्थे पादे तृतीयमाह्निकम् ॥

---

* [V. M. om. वा जॄभ्रमुत्रसाम् (१२४); फणां च सप्तानाम् (१२५); न शसददवादिगुणानाम् (१२६)].

** [V. M. om. भस्य (१२९)].

[1] अलोन्त्यस्य १. १. ५२. [2] अत एकहल्मध्येऽनादेशादेर्लिटि ६. ४. १२० [3] छन्दसीवनिपौ च ५. २. १०९ वा. २, [4] शौ. सं १०. ४. ७. [5] ऋ. सं १. १०९. १.

पादः पत् ॥ ६ । ४ । १३० ॥

पाद उपधाह्रस्वत्वम् ॥ १ ॥

पाद उपधाह्रस्वत्वं वक्तव्यम् । द्विपदः पश्य ॥

आदेशे हि सर्वादेशप्रसङ्गः ॥ २ ॥

आदेशे हि सति सर्वादेशः प्रसज्येत । सर्वस्य द्विपाच्छब्दस्य त्रिपाच्छब्दस्य च पच्छब्द आदेशः प्रसज्येत येन विधिस्तदन्तस्य [१. १. ७२] इति[1] ॥ तत्तर्हि वक्तव्यम् ।

न वा निर्दिश्यमानस्यादेशत्वात् ॥ ३ ॥

न वा वक्तव्यम् । किं कारणम् । निर्दिश्यमानस्यादेशा भवन्तीत्येषा परिभाषा कर्तव्या ॥ कः पुनरत्र विशेष एषा वा परिभाषा क्रियेतोपधाह्रस्वत्वं वोच्येत । अवश्यमेषा परिभाषा कर्तव्या । बह्वन्येतस्याः परिभाषायाः प्रयोजनानि । कानि ।

प्रयोजनं सुप्तिङादेशे ॥ ४ ॥

सुप् । कुमार्याम् किशोर्याम् । खट्वायाम् मालायाम् । तस्याम् यस्याम् । आड्याट्स्याट्सु कृतेषु साड्याट्स्याट्कस्याम्प्राप्नोति[2] । निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति । इदमिह संप्रधार्यम् । आड्याट्स्याटः क्रियन्तामामिति किमत्र कर्तव्यम् । परत्वादाम् । नित्या आड्याट्स्याटः । कृतेऽप्यामि प्राप्नुवन्त्यकृतेऽपि । अनित्या आड्याट्स्याटः । अन्यस्य कृत आमि प्राप्नुवन्त्यन्यस्याकृते शब्दान्तरस्य च प्राप्नुवन्तोऽनित्या भवन्ति । उभयोरनित्ययोः परत्वादाम् ॥ इदं तर्हि । तस्यै यस्यै । स्याटि कृते सस्याट्कस्य स्मैभावः प्राप्नोति[3] । निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति । यस्तर्हि निर्दिश्यते तस्य कस्मान्न भवति । स्याटा व्यवहितत्वात् । सुप् ॥ तिङ् । अरुदिताम् अरुदितम् अरुदितेति । इटि कृते सेट्कस्य ताम्तम्तामादेशाः प्राप्नुवन्ति[4] । निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति । इदमिह संप्रधार्यम् । इटि ऋ यतां ताम्तम्ताम इति किमत्र कर्तव्यम् । परत्वादिडागमः । अन्तरङ्गास्ताम्तम्तामः ॥ इदं तर्हि । क्रियास्ताम् क्रियास्तम् क्रियास्त । यासुटि[5] कृते सयासुट्कस्य ताम्तम्तामः प्राप्नुवन्ति । निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति ॥

---

[1] अनेकाल्शित् सर्वस्य १. १. ५५. [2] आण् नद्याः ; याडापः ; सर्वनाम्नः स्याड्ढ्रस्वश्च ; ङेराम्नद्याम्नीभ्यः ७. ३. ११२ ; ११३ ; ११४ ; ११६. [3] सर्वनाम्नः स्मै ७. १. १४. [4] रुदादिभ्यः सार्वधातुके ७. २. ७६ ; तस्थस्थमिपां ताम्तम्तामः ३. ४. १०१. [5] यासुट् परस्मैपदेषूदात्तो ङिच्च ; किदाशिषि ३. ४. १०३ ; १०४.

ल्यब्भावे च ॥ ५ ॥

ल्यब्भावे च प्रयोजनम् । प्रकृत्य प्रहृत्य । क्त्वान्तस्य ल्यप् प्राप्नोति[1] । निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति ॥

त्रिचतुर्युष्मदस्मत्त्यदादिविकारेषु च ॥ ६ ॥

त्रिचतुर्युष्मदस्मत्त्यदादिविकारेषु च प्रयोजनम् । अतितिस्रः अतिचतस्रः । त्रिचतुरन्तस्य तिसृचतसृभावः प्राप्नोति[2] । निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति ॥ युष्मद् अस्मद् । अतियूयम् अतिवयम् । युष्मदस्मदन्तस्य यूयवयौ प्राप्नुतः[3] । निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति ॥ त्यदादिविकार । अतिस्यः उत्तमस्यः । अत्यसौ उत्तमासौ । त्यदाद्यन्तस्य त्यदादिविकाराः प्राप्नुवन्ति[4] । किमन्तस्य कादेशः प्राप्नोति[5] । अतिकः परमकः । निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति ॥

उदः पूर्वत्वे ॥ ७ ॥

उदः पूर्वत्वे प्रयोजनम् । उदस्थाताम् । अटि कृते साङ्कस्य पूर्वसवर्णः प्राप्नोत्युदः स्थास्तम्भोरिति[6] । निर्दिश्यमानस्यादेशा भवन्तीति न दोषो भवति । यस्तर्हि निर्दिश्यते तस्य कस्मान्न भवति । अटा व्यवहितत्वात् ॥

सा तर्ह्येषा परिभाषा कर्तव्या । न कर्तव्या । उक्तं षष्ठी स्थानेयोगा [१.१.४९] इत्येतस्य योगस्य वचने प्रयोजनं षष्ठ्यन्तं स्थानेन यथा युज्येत यतः षष्ठ्युच्चारितेति[7] ॥

वाह ऊठ् ॥ ६ । ४ । १३२ ॥

ऊडादिः कस्मान्न भवति । आदिष्टिद्भवतीत्यादिः प्राप्नोति[8] । संप्रसारणमित्यनेन यणः स्थानं ह्रियेत[9] । यद्येवं ॥

वाह ऊड्वचनानर्थक्यं संप्रसारणेन कृतत्वात् ॥ १ ॥

वाह ऊड्वचनमनर्थकम् । किं कारणम् । संप्रसारणेन कृतत्वात् । संप्रसारणेनैव सिद्धम् । का रूपसिद्धिः पष्ठौहः पश्य ।

---

[1] समासेऽनञ्पूर्वे क्त्वो ल्यप् ७. १. ३७. [2] त्रिचतुरोः स्त्रियां तिसृचतसृ ७. २. ९९. [3] यूयवयौ जसि ७. २. ९३. [4] तदोः सः सावनन्त्ययोः ७. २. १०६. [5] किमः कः ७. २. १०३. [6] लुङ्लङ्लृङ्क्ष्वडुदात्तः, उदः स्थास्तम्भोः पूर्वस्य ६. ४. ७१; ८. ४. ६१. [7] न तर्हीदानीमयं योगो वक्तव्यः । वक्तव्यश्च । किं प्रयोजनम् । षष्ठ्यन्तं स्थानेन यथा युज्येत यतः षष्ठ्युच्चारिता । १. १. ४९. वा. ४ महाभाष्य. [8] आद्यन्तौ टकितौ १. १. ४६. [9] वसोः संप्रसारणम् ; इग्यणः संप्रसारणम् ६. ४. १३१; १. १. ४५.

गुणः प्रत्ययलक्षणत्वात् ॥ २ ॥

प्रत्ययलक्षणेन गुणो[१] भविष्यति ॥

एज्ग्रहणाद्वृद्धिः ॥ ३ ॥

एज्ग्रहणाद्वृद्धिर्भविष्यति[२] ॥

एवं तर्हि सिद्धे सति यद्वाह ऊठं शास्ति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषासिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षण इति । किमेतस्य ज्ञापने प्रयोजनम् । पचावेदम् पचामेदम् । असिद्धत्वाद्बहिरङ्गलक्षणस्याद्गुणस्यातरङ्गलक्षणमैत्वं न भवतीति[३] ॥

श्वयुवमघोनामतद्धिते ॥ ६. ४. १३३ ॥

श्वादीनां प्रसारणे नकारान्तग्रहणमनकारान्तप्रतिषेधार्थम् ॥ १ ॥

श्वादीनां संप्रसारणे नकारान्तग्रहणं कर्तव्यम् । किं प्रयोजनम् । अनकारान्तप्रतिषेधार्थम् । अनकारान्तस्य मा भूत् । मघवता मघवते ॥ तथा प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीति यथेह भवति यूनः पश्येत्येवं युवतीः पश्येत्यत्रापि स्यादिति ॥ यत्तावदुच्यते नकारान्तग्रहणं कर्तव्यमिति न कर्तव्यम् ।

उक्तं वा ॥ २ ॥

किमुक्तम् । अर्वणस्तृ मघोनश्च न शिष्यं छान्दसं हि तदिति[४] ॥ यदप्युच्यते तथा प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीति यथेह भवति यूनः पश्येत्येवं युवतीः पश्येत्यत्रापि स्यादिति । लिङ्गविशिष्टग्रहणे चोक्तम् । किमुक्तम् । न वा विभक्तौ लिङ्गविशिष्टाग्रहणादिति[५] ॥ अथवोपरिष्टाद्योगविभागः करिष्यते[६] । श्वयुवमघोनामतद्धिते । ततोऽल्लोपः । अकारस्य च लोपो भवति । ततोऽनः । अन इत्युभयोः शेषः ॥ *

षपूर्वहन्धृतराज्ञामणि ॥ ६. ४. १३५ ॥

किमिदं षपूर्वादीनां पुनर्वचनमल्लोपार्थमाहोस्विन्नियमार्थम् । कथं चाल्लोपार्थं

---

* [V. M. om. अल्लोपो–नः (१३४)].

[१] पुगन्तलघूपधस्य च ७. ३. ८६. [२] वृद्धिरेचि ६. १. ८८. [३] आद् गुणः ; एत ऐ ६. १. ८७ ; ३. ४. ९३. [४] अर्वणस्तृ मघोनश्च न शिष्यं छान्दसं हि तत् ६. ४. १२७, १२८ श्लो. वा. [२] न वा विभक्तौ लिङ्गविशिष्टाग्रहणात् ७. १. १. वा. १३. [६] अल्लोपोऽनः ६. ४. १३४.

स्यात्कथं वा नियमार्थम् । यद्यविशेषेणाल्लोपटिलोपयोः स प्रकृतिभावस्ततोऽल्लोपार्थम्[1] । अथ ह्यणि टिलोपस्यैव प्रकृतिभावस्ततो नियमार्थम् ॥ अत उत्तरं पठति ।

षपूर्वादीनां पुनर्वचनमल्लोपार्थम् ॥ १ ॥

षपूर्वादीनां पुनर्वचनं क्रियतेऽल्लोपार्थम् । अविशेषेणाल्लोपटिलोपयोः प्रकृतिभावः ॥

अवधारणे ह्यन्यत्र प्रकृतिभाव उपधालोपप्रसङ्गः ॥

अवधारणे हि सत्यन्यत्र प्रकृतिभाव उपधालोपः प्रसज्येत । कथम् । यदि तावदेवं नियमः स्यात्षपूर्वादीनामेवाणीति भवेदिह नियमान्न स्यात् सामनः वैमन इति ताक्षण्य इति प्राप्नोति । अथाप्येवं नियमः स्यात्षपूर्वादीनामण्येवेत्येवमपि भवेदिह नियमान्न स्यात् ताक्षण्य इति सामनः वैमन इति तु प्राप्नोति । अथाप्युभयतो नियमः स्यात् षपूर्वादीनामेवाण्यण्येव षपूर्वादीनामित्येवमपि सामन्यः वेमन्य इति प्राप्नोति । तस्मात्सुष्ठूच्यते षपूर्वादीनां पुनर्वचनमल्लोपार्थमवधारणे ह्यन्यत्र प्रकृतिभाव उपधालोपप्रसङ्ग इति ॥ *

आतो धातोः ॥ ६. ४. १४० ॥

आतोऽनापः ॥ १ ॥

आतोऽनाप इति वक्तव्यम् । इहापि यथा स्यात् । समासेऽनञ्पूर्वे क्त्वो ल्यप् [७. १. ३७] इति । अनाप इति किमर्थम् । खट्वायाम् मालायाम् ॥ यद्यनाप इत्युच्यते कथं क्त्वायाम् । निपातनादेतत्सिद्धम् । किं निपातनम् । क्त्वायां वा प्रतिषेध इति[2] ॥ यद्येवं नार्थोऽनाप इत्यनेन । कथं समासेऽनञ्पूर्वे क्त्वो ल्यबिति । निपातनादेतत्सिद्धम् । कथं हलः श्नः शानज्झौ [३. १. ८३] इति । एतदपि निपातनात्सिद्धम् ॥ अथवा योगविभागः करिष्यते । आतः । आकारलोपो भवति । ततो धातोः । धातोश्चाकारस्य लोपो भवतीति ॥

मन्त्रेष्वाङ्यादेरात्मनः ॥ ६. ४. १४१ ॥

मन्त्रेष्वात्मनः प्रत्ययमात्रप्रसङ्गः ॥ १ ॥

मन्त्रेष्वात्मनः प्रत्ययमात्रे लोपः प्रसङ्क्ष्व्यः । इहापि यथा स्यात् । त्मन्या

---

* [V. M. om. विभाषा ङिश्योः (१३६); न संयोगाद्वमन्तात् (१३७); अचः (१३८); उद ईत् (१३९)].

[1] अल्लोपोऽनः ; नस्तद्धिते ; अन् ६. ४. १३४, १४४ १६७. [2] क्त्वायां वा प्रतिषेधः ६. ३. २. वा. ४.

समञ्जन्[1] । त्मनोरन्तरस्थ इति ॥ यदि प्रत्ययमात्रे लोप उच्यते कथमात्मन एव निर्मिमीष्व[2] इति । तस्मान्नार्थः प्रत्ययमात्रे लोपेन । कथं त्मन्या समञ्जन् त्मनोरन्तरस्थ इति । छान्दसत्वात्सिद्धम् । छान्दसमेतत् । दृष्टानुविधिश्छन्दसि भवति ॥

आदिग्रहणानर्थक्यं चाकारप्रकरणात् ॥ २ ॥

आदिग्रहणं चानर्थकम् । किं कारणम् । आकारप्रकरणात् । आत इति[3] वर्तते ॥

ति विंशतेर्डिति ॥ ६ । ४ । १४२ ॥

तिग्रहणं किमर्थं न विंशतेर्डिति लोप इत्येवोच्येत । नैवं शक्यम् । विंशतेर्डिति लोप इतीयत्युच्यमानेऽन्त्यस्य प्रसज्येत[4] । सिद्धोऽन्त्यस्य यस्येति[5] लोपेनैव तत्रारम्भसामर्थ्यात्तिशब्दस्य भविष्यति । कुतो नु खल्वेतदनन्त्यार्थ आरम्भे तिशब्दस्य भविष्यति न पुनरङ्गस्येति । तस्मात्तिग्रहणं कर्तव्यम् ॥ अथ क्रियमाणेऽपि तिग्रहणेऽन्त्यस्य कस्मान्न भवति । निर्दिश्यमानस्यादेशा भवन्तीत्येवं न भविष्यति ॥

टेः ॥ ६ । ४ । १४३ ॥

अभस्योपसंख्यानं कर्तव्यम् । इहापि यथा स्यात् । उपसरजः मन्दुरजः[6] इति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । कथमुपसरजः मन्दुरज इति ।

डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् ॥ १ ॥

अभस्याप्यनुबन्धकरणसामर्थ्याद्भविष्यति ॥

नस्तद्धिते ॥ ६ । ४ । १४४ ॥

नकारान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापिकुथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसंख्यानम् ॥ १ ॥

नकारान्तस्य टिलोपे सब्रह्मचारिन् पीठसर्पिन् कलापिन् कुथुमिन् तैतिलिन् जाजलिन् लाङ्गलिन् शिलालिन् शिखण्डिन् सूकरसद्मन् सुपर्वन्नित्येतेषामुपसंख्यानं

---

[1] त्मन्या समञ्जञ्छमिता न देवः । वा. सं. २०. ४५ ; मै. सं. ३. ११. १ ; का. सं. ३८. ६.
[2] आत्मनीनं निर्मिमीष्व । पैप्प. सं. ५. ११. ८.
[3] आतो धातोः ६. ४. १४०.
[4] अलोन्त्यस्य १. १. ५२.
[5] यस्येति च ६. ४. १४८.
[6] सप्तम्यां जनेर्डः ३. २. ९७.

कर्तव्यम्[1] । सब्रह्मचारिन् साब्रह्मचाराः सब्रह्मचारिन् । पीठसर्पिन् पैठसर्पाः पीठसर्पिन् । कलापिन् कालापाः कलापिन् । कुथुमिन् कौथुमाः कुथुमिन् । तैतिलिन् तैतिलाः तैतिलिन् । जाजलिन् जाजलाः जाजलिन् । लाङ्गलिन् लाङ्गलाः लाङ्गलिन् । शिलालिन् शैलालाः शिलालिन् । शिखण्डिन् शैखण्डाः शिखण्डिन् । सूकरसद्मन् सौकरसद्माः सूकरसद्मन् । सुपर्वन् सौपर्वाः सुपर्वन् ॥

चर्मणः कोशे ॥ २ ॥

चर्मणः कोश उपसंख्यानं कर्तव्यम् । चार्मः कोशः ॥

अश्मनो विकारे ॥ ३ ॥

अश्मनो विकार उपसंख्यानं कर्तव्यम् । अश्मनो विकार आश्मः ॥

शुनः संकोचे ॥ ४ ॥

शौवः संकोचः ॥

अव्ययानां च

अव्ययानां चोपसंख्यानं कर्तव्यम् । किं प्रयोजनम् ।

सायंप्रातिकाद्यर्थम् ॥ ५ ॥

सायंप्रातिकः पौनःपुनिकः ॥

शाश्वतिके प्रतिषेधो वक्तव्यः । न वक्तव्यः । निपातनादेतत् सिद्धम् । किं निपातनम् । येषां च विरोधः शाश्वतिकः [२. ४. ९] इति । एवं तर्हि शाश्वते प्रतिषेधो वक्तव्यः । शाश्वतम् ॥ *

यस्येति च ॥ ६ । ४ । १४८ ॥

इवर्णान्तस्येति किमुदाहरणम् । हे दाक्षि दाक्ष्या दाक्षेयः । हे दाक्षीति । यदि लोपो न स्यात्परस्य ह्रस्वत्वे कृते सवर्णदीर्घत्वं प्रसज्येत । दाक्ष्येति । यदि लोपो न स्यात्परस्य यणादेशे कृते पूर्वस्य श्रवणं प्रसज्येत । दाक्षेय इति । यदि लोपो न स्यात्परस्य लोपे कृते पूर्वस्य श्रवणं प्रसज्येत ॥ नैतानि सन्ति प्रयोजनानि । सवर्णदीर्घत्वेनाप्येतानि सिद्धानि ॥ इदं तर्हि । अतिसखेरागच्छति । अतिसखेः स्वम् । यदि लोपो न स्यादुपसर्जनह्रस्वत्वे कृते ऽसखीति प्रतिषेधः प्रसज्येत[2] ।

---

* [V. M. om. अह्नष्टखोरेव (१४५); ओर्गुणः (१४६); ढे लोपोऽकद्र्वाः (१४७)].

[1] इनण्यनपत्ये ; अन् ६. ४. १६४ ; १६७.

[2] सख्यशिश्वीति भाषायाम् ; कुगतिप्रादयः ; गोस्त्रियोरुपसर्जनस्य ; शेषो घ्यसखि ४. १. ६२ ; २. २. १८ ; १. २. ४८ ; १. ४. ७.

यस्येत्यादौ श्यां प्रतिषेधः ॥ १ ॥

यस्येत्यादौ श्यां प्रतिषेधो वक्तव्यः । काण्डे कुड्ये । सौर्ये[1] नाम हिमवतः शृङ्गे ॥ स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । इह श्यामित्यपि प्रकृतं नेत्यपि[2] तत्राभिसंबन्धमात्रं कर्तव्यम् । यस्येत्यादौ लोपो भवति श्यां न ॥

इयङुवङ्भ्यां लोपो विप्रतिषेधेन ॥ २ ॥

इयङुवङ्भ्यां लोपो भवति विप्रतिषेधेन । इयङुवङोरवकाशः[3] । श्रियौ श्रियः । भ्रुवौ भ्रुवः । लोपस्यावकाशः । कामण्डलेयः माद्रबाहेयः[4] । इहोभयं प्राप्नोति । वात्सप्रेयः लैखाभ्रेयः[5] । लोपो भवति विप्रतिषेधेन ॥

गुणवृद्धी च ॥ ३ ॥

गुणवृद्धी चेयङुवङ्भ्यां भवतो विप्रतिषेधेन । गुणवृद्ध्योरवकाशः । चेता[6] गौः[7] । इयङुवङोः स एव । इहोभयं प्राप्नोति । चयनम् चायकः । लवनम् लावकः । गुणवृद्धी भवतो विप्रतिषेधेन ॥

न वेयङुवङादेशस्यान्यविषये वचनात् ॥ ४ ॥

न वार्थौ विप्रतिषेधेन । किं कारणम् । इयङुवङादेशस्यान्यविषये वचनात् । इयङुवङादेशोऽन्यविषय आरभ्यते । किंविषये । यणादेशविषये । स यथैव यणादेशं बाधत एवं गुणवृद्धी अपि बाधेत ॥

तस्मात्तत्र गुणवृद्धिविषये प्रतिषेधः ॥ ५ ॥

तस्मात्तत्र गुणवृद्धिविषये प्रतिषेधो वक्तव्यः ॥ न वक्तव्यः । मध्येऽपवादाः पूर्वान्विधीन्बाधन्त इत्येवमियङुवङादेशो यणादेशं[8] बाधिष्यते गुणवृद्धी न बाधिष्यते ॥

सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः ॥ ६ । ४ । १४९ ॥

सूर्यादीनामणन्तेऽप्रसिद्धिरङ्गान्यत्वात् ॥ १ ॥

सूर्यादीनामणन्तेऽप्रसिद्धिः । सौरी[9] बलाका । किं कारणम् । अङ्गान्यत्वात् । अणन्तमेतदङ्गमन्यद्भवति । लोपे[10] कृते नाङ्गान्यत्वम् । स्थानिवद्भावादङ्गान्यत्वं भवति ॥

---

[1] तेनैकदिक् ; यस्येति च ; सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः ४. ३. ११२ ; ६. ४. १४८ ; १४९. [2] विभाषा ङिश्योः ; न संयोगाद्वमन्तात् ६. ४. १३६ ; १३७. [3] अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६. ४. ७७. [4] चतुष्पाद्भ्यो ढञ् ; ढे लोपोऽकद्र्वाः ४. १. १३५ ; ६. ४. १४७ ; भाद्रबाहेयः इत्यपि पाठः. [5] शुभ्रादिभ्यश्च ४. १. १२३. [6] सार्वधातुकार्धधातुकयोः ७. ३. ८४. [7] गोतो णित् ; अचो ञ्णिति ७. १. ९० ; ७. २. ११५. [8] इको यणचि ६. १. ७७. [9] तेनैकदिक् ४. ३. ११२. [10] यस्येति च ६. ४. १४८.

सिद्धं तु स्थानिवत्प्रतिषेधात् ॥ २ ॥

सिद्धमेतत् । कथम् । स्थानिवत्प्रतिषेधात् । प्रतिषिध्यतेऽत्र स्थानिवद्भावो यलोपविधिं प्रति न स्थानिवद् भवतीति[1] ॥ एवमपि न सिध्यति । किं कारणम् । शब्दान्यत्वात् । अन्यो हि सूर्यशब्दो ऽन्यः सौर्यशब्दः । नैष दोषः । एकदेशविकृतमनन्यवद्भवतीति भविष्यति ॥

उपधाग्रहणानर्थक्यं च ॥ ३ ॥

स्थानिवद्भावे चेदानीं प्रतिषिद्ध उपधाग्रहणमनर्थकम् । किं कारणम् । अन्त्य एव हि सूर्यादीनां यकारः[2] । किं यातमेतद्भवति । सुष्ठु च यातं साधु च यातं यदि प्राग्भादसिद्धत्वम् । अथ हि सह तेनासिद्धत्वमसिद्धत्वाल्लोपस्य नान्त्यो यकारो भवति । यद्यपि सह तेनासिद्धत्वमेवमपि न दोषः । नैवं विज्ञायते सूर्यादीनामङ्गानां यकारलोप इति । कथं तर्हि । अङ्गस्य यलोपो भवति स चेत्सूर्यादीनां यकार इति ॥ एवमपि सूर्यचरी अत्र प्राप्नोति । तस्मादुपधाग्रहणं कर्तव्यम् ॥

विषयपरिगणनं च ॥ ४ ॥

विषयपरिगणनं च कर्तव्यम् ॥

सूर्यमत्स्ययोर्ङ्याम् ॥ ५ ॥

सूर्यमत्स्ययोर्ङ्यामिति वक्तव्यम् । सौरी मत्सी ॥

सूर्यागस्त्ययोश्छे च ॥ ६ ॥

सूर्यागस्त्ययोश्छे च ङ्यां चेति वक्तव्यम् । सौरी सौरीयः । आगस्ती आगस्तीयः ॥

तिष्यपुष्ययोर्नक्षत्राणि ॥ ७ ॥

तिष्यपुष्ययोर्नक्षत्राणि[3] लोपो वक्तव्यः । तैषम् पौषम् ॥

अन्तिकस्य तसि कादिलोप आद्युदात्तत्वं च ॥ ८ ॥

अन्तिकस्य तसि[4] कादिलोपो वक्तव्य आद्युदात्तत्वं च वक्तव्यम् । अन्तितो न दूरात्[5] ॥

तमे तादेश्च ॥ ९ ॥

तमे तादेश्च कादेश्च लोपो वक्तव्यः । अग्ने त्वं नो अन्तमः[6] । आन्तितमो अवरोहति ॥

---

[1] न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु १. १. ५८.

[2] अलोन्त्यस्य १. १. ५२.

[3] नक्षत्रेण युक्तः कालः ४. २. ३.

[4] अपादाने चाहीयरुहोः ५. ४. ४५.

[5] ऋ. सं. २. २७. १३; ३. २९. २.

[6] ऋ. सं. ५. २४. १.

तसीत्येष न वक्तव्यो दृष्टो दाशतयेऽपि हि।
घौ लोपोऽन्ति षदित्यत्र
अन्ति षत्[1] ॥
तथाघौ येऽन्त्यथर्वसु ॥
अन्तिये च दूरके[2] ॥ *

बिल्वकादिभ्यश्छस्य लुक् ॥ ६ । ४ । १५३ ॥

छग्रहणं शक्यमकर्तुम्। इह कस्मान्न भवति। बिल्वकेभ्यः[3]। भस्येति[4] वर्तते ॥ एवमपि बिल्वकाय अत्र प्राप्नोति। तद्धितस्येति[5] वर्तते ॥ एवमपि बिल्वकस्य विकारोऽवयवो वा बैल्वकः[6] अत्र प्राप्नोति। तद्धिते तद्धितस्येति[7] वर्तते ॥ एवमपि बिल्वकीयायां भवो बैल्वकः बैल्वकस्य किंचिद्बैल्वकीयम्[8] अत्र प्राप्नोति। न स बिल्वकात्। बिल्वकादिभ्यो यो विहित इत्युच्यते न चासौ बिल्वकशब्दाद्विहितः। किं तर्हि। बिल्वकीयशब्दात् ॥ एवं तर्हि सिद्धे सति यच्छग्रहणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा संनियोगशिष्टानामन्यतराभाव उभयोरप्यभाव इति। तस्माच्छग्रहणं कर्तव्यं छस्यैव लुग्यथा स्यात्कुको मा भूदिति[9] ॥

तुरिष्ठेमेयःसु ॥ ६ । ४ १५४ ॥

तुः सर्वस्य लोपो वक्तव्योऽन्त्यस्य[10] लोपो मा भूदिति। स तर्हि वक्तव्यः। न वक्तव्यः।

तुः सर्वलोपविज्ञानमन्त्यस्य वचनानर्थक्यात् ॥ १ ॥

तुः सर्वलोपो विज्ञायते। कुतः। अन्त्यस्य वचनानर्थक्यात्। अन्त्यस्य लोपवचने प्रयोजनं नास्तीति[11] कृत्वा सर्वस्य भविष्यति ॥

अथवा लुक्प्रकृतः[12] सोऽनुवर्तिष्यते। अशक्यो लुगनुवर्तयितुम्। किं कारणम्। विजयिष्ठकरिष्ठयोर्गुणदर्शनात्। विजयिष्ठकरिष्ठयोर्गुणो दृश्यते[13]। विजयिष्ठः। आसुतिं करिष्ठः[14] ॥

---

* [V. M. om. हलस्तद्धितस्य (१५०); आपत्यस्य च तद्धितेऽनाति (१५१); क्यच्व्योश्च (१५२)].

[1] मातुष्पदे परमे अन्ति षद् गोः। ऋ. सं. ४. ५. १०. [2] ये अन्ति ये च दूरके। अथ० सं. १०. २. २. ९. [3] अल्पे ५. ३. ८५. [4] भस्य ६. ४. १२९. [5] हलस्तद्धितस्य ६. ४. १५०. [6] अनुदात्तादेश्च ४. ३. १४०. [7] नस्तद्धिते; हलस्तद्धितस्य ६. ४. १४४; १५०. [8] नडादीनां कुक् च ४. २. ९१; तत्र भवः ४. ३. ५३; वृद्धाच्छः ४. २. ११४. [9] नडादीनां कुक् च ४. २. ९१. [10] अलोऽन्त्यस्य १. १. ५२. [11] टेः ६. ४. १५५. [12] बिल्वकादिभ्यश्छस्य लुक् ६. ४. १५३. [13] न लुमताङ्गस्य १. १. ६३. [14] ऋ. सं. ७. ९७. ७.

टेः ॥ ६ । ४ । १५५ ॥

णाविष्ठवत्प्रातिपदिकस्य

णौ प्रातिपदिकस्येष्ठवद्भावो वक्तव्यः । किं प्रयोजनम् ।

पुंवद्भावरभावटिलोपयणादिपरार्थम् ॥ १ ॥

पुंवद्भावार्थम् । एनीमाचष्ट एतयति । श्येतयति[1] । रभावार्थम् । पृथुमाचष्टे प्रथयति । म्रदयति[2] । टिलोपार्थम् । पटुमाचष्टे पटयति । यणादिपरार्थम् । स्थूलमाचष्टे स्थवयति । दवयति[3] ॥ किं पुनरिदं परिगणनमाहोस्विदुदाहरणमात्रम् । उदाहरणमात्रमित्याह प्रादयोऽपि हीष्यन्ते । प्रियमाचष्टे प्रापयतीति[4] ॥

भारद्वाजीयाः पठन्ति । णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरप्रादिविन्मतोर्लुक्कन्विध्यर्थमिति[5] ॥ *

इष्ठस्य यिट् च ॥ ६ । ४ । १५९ ॥

किमयं यिशब्दः आहोस्विद्यकारः । किं चातः । यदि लोपोऽप्यनुवर्तते[6] ततो यिशब्दः । अथ निवृत्तं ततो यकारः ॥

ज्यादादीयसः ॥ ६ । ४ । १६० ॥

किमर्थं ज्यात्परस्येयस आत्त्वमुच्यते न लोपः प्रकृतेः[6] सोऽनुवर्तेत । का रूपसिद्धिः ज्यायान् । अकृद्यकार इति दीर्घत्वं भविष्यति[7] ॥ एवं तर्हि सिद्धे सति यज्ज्यात्परस्येयस आत्त्वं शास्ति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषाङ्गवृत्ते पुनर्वृत्तावविधिरिति । किमेतस्य ज्ञापने प्रयोजनम् । पिबेर्गुणप्रतिषेधश्चोदितः[8] स न वक्तव्यो भवति ॥

अथ किमर्थं ज्यात्परस्येयसो दीर्घ उच्यते न अकार एवोच्येत । का रूपसिद्धिः ज्यायान् । आन्तर्यतो दीर्घस्य दीर्घो भविष्यति ॥ एवं तर्हि सिद्धे सति यद्दीर्घग्रहणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा भाव्यमानेन सवर्णानां ग्रहणं नेति ॥

---

* [V. M. om. स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः (१५६); प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः (१५७); बहोर्लोपो भू च बहोः (१५८)].

[1] तसिलादिष्वा कृत्वसुचः ६. ३. ३५. [2] र ऋतो हलादेर्लघोः ६. ४. १६१. [3] स्थूलदूरयुव...गुणः ६. ४. १५६. [4] प्रियस्थिरोरुबहुल...प्रस्थवर्बंहि... वृन्दाः; अचो ञ्णिति; अर्तिह्रीव्लीरीक्नूय्यीक्ष्माय्यातां पुङ्णौ ६. ४. १५७; ७. २. ११५; ७. ३. ३६. [5] विन्मतोर्लुक्; युवाल्पयोःकनन्यतरस्याम् ५. ३. ६५; ६४. [6] बहोर्लोपो भू च बहोः ६. ४. १५८. [7] अकृत्सार्वधातुकयोर्दीर्घः ७. ४. २५. [8] पिबेर्गुणप्रतिषेधः ७. ३. ७८. वा. १.

र ऋतो हलादेर्लघोः ॥ ६ । ४ । १६१ ॥

कथमिदं विज्ञायते । हलादेरङ्गस्येति । आहोस्विद्धलादेर्ऋकारस्येति । युक्तं पुनरिदं विचारयितुम् । नन्वनेनासंदिग्धेनाङ्गविशेषणेन भवितव्यम् । कथं ह्यृकारस्य नाम हलादिः स्यादन्यस्यान्यः । अयमादिशब्दोऽस्त्येवावयववाची । तद्यथा । ऋगादिः अर्धर्चादिः श्लोकादिरिति । अस्ति सामीप्ये वर्तते । तद्यथा । दधिभोजनमर्थसिद्धेरादिः । दधिभोजनसमीपे । घृतभोजनमारोग्यस्यादिः । घृतभोजनसमीपे । यावता सामीप्येऽपि वर्तते जायते विचारणा हल्समीपस्यर्कारस्य स्यादथवा हलादेरङ्गस्येति । किं चातः । यदि विज्ञायते हलादेरङ्गस्येति अप्रथीयान् अत्र न प्राप्नोति । अथ विज्ञायते हलादेर्ऋकारस्येति अनृचीयान् अत्रापि प्राप्नोति । उभयथा स्वृचीयानित्यत्र प्राप्नोति । यथेच्छसि तथास्तु ॥ अस्तु तावद्धलादेरङ्गस्येति । कथमप्रथीयान् । तद्धितान्तेन समासो भविष्यति । न प्रथीयानप्रथीयानिति । भवेत्सिद्धं यदा तद्धितान्तेन समासो यदा तु खलु समासात्तद्धितोत्पत्तिस्तदा न सिध्यति । नैव समासात्तद्धितोत्पत्त्या भवितव्यम् । किं कारणम् । बहुव्रीहिणोक्तत्वान्मत्वर्थस्य । भवेद्यदा बहुव्रीहिस्तदा न स्याद्यदा तु खलु तत्पुरुषस्तदा प्राप्नोति । न पृथुरपृथुः अयमप्यपृथुः अयमप्यपृथुः अयमनयोरप्रथीयानिति । न समासादजादिभ्यां भवितव्यम् । किं कारणम् । गुणवचनादित्युच्यते[1] न च समासो गुणवचन इति । यदा तर्हि समासाद्विन्मतुपौ विन्मतुबन्तादजादी तदा प्राप्नुतः[2] । अविद्यमानाः पृथवो ऽपृथवः अपृथवोऽस्य सन्त्यपृथुमान् अयमप्यपृथुमान् अयमप्यपृथुमान् अयमनयोरप्रथीयानिति । नैष दोषः । अपृथव एव न सन्ति कुतो यस्यापृथव इति ॥ इह कस्मान्न भवति । मातयति भ्रातयति । लोपो ऽत्र बाधको भविष्यति । इदमिह संप्रधार्यम् । टिलोपः क्रियतां रभाव इति किमत्र कर्तव्यम् । परत्वाद्रभावः ॥ यदि पुनरवशिष्टस्य रभाव उच्येत । नैवं शक्यम् । इहापि प्रसज्येत । कृतमाचष्टे कृतयतीति ॥ एवं तर्हि परिगणनं कर्तव्यम् । पृथुमृदुकृशभृशदृढपरिवृढानामिति वक्तव्यम् ॥*

प्रकृत्यैकाच् ॥ ६ । ४ । १६३ ॥

प्रकृत्यैकाजिति किमिष्टेमेयःस्वाहोस्विदविशेषेण । किं चातः । यद्यविशेषेण

---

* [V. M om. विभाषर्जोश्छन्दसि (१६२)].

[1] अजादी गुणवचनादेव ५. ३. ५८. [2] विन्मतोर्लुक् ५. ३. ६५. [3] टेः ६. ४. १५५.

खी खी[1] शौवम्[2] अधुनेत्यत्रापि[3] प्राप्नोति । खिखिनावेव न स्तः । कथम् । उक्तमेतदेकाक्षरात्कृतो जातेः सप्तम्यां च न तौ स्मृतौ[4] । स्ववान् खवानित्येव भवितव्यम् । शौवमिति परत्वादैजागमे[5] कृते टिलोपेन भवितव्यम् । अधुनेति सप्रकृतिकस्य सप्रत्ययकस्य स्थाने निपातनं क्रियते ॥ इह तर्हि प्राप्नोति । द्रव्यम्[6] ।

यस्येत्यादौ प्रकृतिभावः । यस्येति[7] यस्य लोपप्राप्तिस्तस्य प्रकृतिभावो न चैतानि यस्येत्यादौ ॥ एवमपि श्रिये हितः श्रीयः[8] श्रा देवतास्य स्थालीपाकस्य श्रः[9] स्थालीपाक इत्यत्र प्राप्नोति । तस्मादिष्ठेमेयःसु प्रकृतिभावः ॥

अथेष्ठेमेयःसु प्रकृतिभावे किमुदाहरणम् । प्रेयान् प्रेष्ठः[10] । नैतदस्ति । प्रादीनामसिद्धत्वान्न भविष्यति ॥ इदं तर्हि । श्रेयान् श्रेष्ठः[11] ।

प्रकृत्यैकाजिष्ठेमेयःसु चेदेकाच उच्चारणसामर्थ्यादवचनात्प्रकृतिभावः ॥ १ ॥

प्रकृत्यैकाजिष्ठेमेयःसु चेत्तन्न । किं कारणम् । एकाच उच्चारणसामर्थ्यादन्तरेणापि वचनं प्रकृतिभावो भविष्यति ॥

विन्मतोस्तु लुगर्थम् ॥ २ ॥

विन्मतोस्तु लुगर्थं प्रकृतिभावो वक्तव्यः[12] । स्रग्वितरः स्रजीयान् । स्रग्वितमः स्रजिष्ठः । स्रुग्वत्तरः स्रुचीयान् । स्रुग्वत्तमः स्रुचिष्ठः ॥ ननु च विन्मतोर्लुक् टिलोपं[13] बाधिष्यते ॥ कथमन्यस्योच्यमानमन्यस्य बाधकं स्यात् । असति खल्वपि संभवे बाधनं भवत्यस्ति च संभवो यदुभयं स्यात् । यथैव खल्वपि विन्मतोर्लुक् टिलोपं बाधत एवं नस्तद्धिते [१४४] इत्येतमपि बाधेत । यतरो नौब्रह्मीय इन्[14] । ब्रह्मवत्तर इति ॥ यत्तावदुच्यते कथमन्यस्योच्यमानमन्यस्य बाधकं स्यादितीदं तावदयं प्रष्टव्यः । यदि तर्हि विन्मतोर्लुग्नोच्येत किमिह स्यादिति । टिलोप इत्याह । टिलोपश्चेन्नाप्राप्ते टिलोपे विन्मतोर्लुगारभ्यते स बाधको भविष्यति । यदप्युच्यतेऽसति खल्वपि संभवे बाधनं भवत्यस्ति च संभवो यदुभयं स्यादिति सत्यपि संभवे बाधनं भवति । तद्यथा । दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति सत्यपि संभवे दधिदानस्य तक्रदानं निवर्तकं भवति । एवमिहापि सत्यपि संभवे विन्मतोर्लुक् टिलोपं बाधिष्यते । यदप्युच्यते यथैव खल्वपि विन्मतोर्लुक् टिलोपं

---

[1] अत इनिठनौ; यस्येति च ५.२.११५; ६.४.१४८ [2] प्राणिरजतादिभ्योञ्; नस्तद्धिते ४.३.१५४; ६.४.१४४. [3] अधुना; यस्येति च; ५.३.१७; ६.४.१४८ [4] एकाक्षरात् कृतो जातेः सप्तम्यां च न तौ स्मृतौ ५.२.११५ श्लो. वा. [5] द्वारादीनां च ७.३.४. [6] द्रोश्च; ओर्गुणः ४.३.१६१; ६.४.१४६. [7] यस्येति च ६. ४. १४८. [8] प्राक् क्रीताच्छः ; यस्येति च ५. १. १ ; ६. ४. १४८. [9] सास्य देवता ; यस्येति च ४. २. २४ ; ६. ४. १४८. [10] प्रियस्थिर...प्रस्थ...वृन्दाः ६. ४. १५७. [11] प्रशस्यस्य श्रः ५. ३. ६०. [12] विन्मतोर्लुक् ५. ३. ६५. [13] टेः ६. ४. १५५. [14] तै. सं. २. ५. ८. ३.

बाधत एवं नस्तद्धित इत्येतमपि बाधेतेति न बाधते । किं कारणम् । येन नाप्राप्ते तस्य बाधनम्। नाप्राप्ते टिलोपे विन्मतोर्लुगारभ्यते नस्तद्धित इत्येतस्मिन्पुनः प्राप्ते चाप्राप्ते च । अथवा पुरस्तादपवादा अनन्तरान्विधीन् बाधन्त इत्येवं विन्मतोर्लुक् टिलोपं बाधिष्यते नस्तद्धित इत्येतं न बाधिष्यते ॥ यदि तर्हि विन्मतोर्लुक् टिलोपं बाधते पयिष्ठ इति न सिध्यति पयसिष्ठ इति प्राप्नोति। यथालक्षणमप्रयुक्ते ॥

प्रकृत्याके राजन्यमनुष्ययुवानः ॥ ३ ॥

राजन्यमनुष्ययुवानोऽके प्रकृत्या भवन्तीति वक्तव्यम्। राजन्यकम्[1] मानुष्यकम्[2] यौवनिकौ ॥*

न मपूर्वोऽपत्येऽवर्मणः ॥ ६ । ४ । १७० ॥

मपूर्वात्प्रतिषेधे वा हितनाम्नः ॥ १ ॥

मपूर्वात्प्रतिषेधे वा हितनाम्न इति वक्तव्यम्। आरोहितो वै हैतनामः। आरोहितो वै हैतनामनः[3]। समानो हैतनामः। समानो हैतनामन इति च ॥

ब्राह्मोऽजातौ ॥ ६ । ४ । १७१ ॥

अथ किमिदं ब्राह्मस्याजातावनो लोपार्थं वचनमाहोस्विन्नियमार्थम् । कथं च लोपार्थं स्यात्कथं वा नियमार्थम् । यदि तावदपत्य इति[4] वर्तते ततो नियमार्थम्। अथ निवृत्तं ततो लोपार्थम् ॥ अत उत्तरं पठति ।

ब्राह्मस्याजातौ लोपार्थं वचनम् ॥ १ ॥

ब्राह्मस्याजातौ लोपार्थं वचनं क्रियते। अपत्य इति निवृत्तम् ॥

तत्राप्राप्तविधाने प्राप्तप्रतिषेधः ॥ २ ॥

तत्राप्राप्तस्य टिलोपस्य विधाने प्राप्तस्य[5] प्रतिषेधो वक्तव्यः। ब्राह्मणः ॥

न वा पर्युदाससामर्थ्यात् ॥ ३ ॥

न वा वक्तव्यः। किं कारणम्। पर्युदाससामर्थ्यात्। पर्युदासोऽत्र भविष्यति ॥ अस्त्यन्यत्पर्युदासे प्रयोजनम्। किम् । या जातिरेव नापत्यम् । ब्राह्मयोषधिरिति ॥

---

* [V. M. om. इनण्यनपत्ये (१६४); गाथिविदथिकेशिगणिपणिनश्च (१६५); संयोगादिश्च (१६६); अन् (१६७); ये चाभावकर्मणोः (१६८); आत्माध्वानौ खे (१६९)].

[1] गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ् ४. २. ३९ ; (आपत्यस्य च तद्धितेऽनाति ६. ४. १५१). [2] द्वन्द्वमनोज्ञादिभ्यश्च ५. १. १३३ ; (नस्तद्धिते ६. ४. १४४). [3] Cf. आहतो वै हैतनामनः (मैसं. ३. ४. ६). [4] न मपूर्वोऽपत्येऽवर्मणः ६. ४, १७०, [5] न मपूर्वोऽपत्येऽवर्मणः ; नस्तद्धिते ६. ४. १७० ; १४४,

न वा अत्रेष्यते । अनिष्टं च प्राप्नोतीष्टं च न सिध्यति ॥ एवं तर्ह्यनुवर्ततेऽपत्य इति न त्वपत्य इत्यनेन निपातनमभिसंबध्यते । ब्राह्म इति निपात्यतेऽपत्येऽजाताविति । किं तर्हि । प्रतिषेधोऽभिसंबध्यते । ब्राह्म इति निपात्यते ऽपत्ये जातौ नेति ॥

कार्मस्ताच्छील्ये ॥ ६ । ४ । १७२ ॥

किमर्थमिदमुच्यते न नस्तद्धिते [१४४] इत्येव सिद्धम् । न सिध्यति । अनणीति[1] प्रकृतिभावः प्रसज्येत । अणीत्युच्यते णश्चायम्[2] ॥ एवं तर्हि सिद्धे सति यन्निपातनं करोति तज्ज्ञापयत्याचार्यस्ताच्छीलिके णेऽण्कृतानि भवन्तीति । किमेतस्य ज्ञापने प्रयोजनम् । चौरी तापसीत्यणन्तादितीकारः सिद्धो भवति[3] ॥ *

दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवासिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि ॥ ६ । ४ । १७४ ॥

अत्र भ्रौणहत्ये किं निपात्यते । यकारादौ तद्धिते तत्वं निपात्यते ।

भ्रौणहत्ये तत्वनिपातनानर्थक्यं सामान्येन कृतत्वात् ॥ १ ॥

भ्रौणहत्ये[4] तत्वानिपातनमनर्थकम् । किं कारणम् । सामान्येन कृतत्वात् । सामान्येनैवात्र तत्वं भविष्यति हनस्तोऽचिण्णलोः [७. ३. ३२] इति ॥

ज्ञापकं तु ताद्धिते तत्वप्रतिषेधस्य ॥ २ ॥

एवं तर्हि ज्ञापयत्याचार्यो न ताद्धिते तत्वं भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । भ्रौणघ्नः वार्त्रघ्न इत्यत्र तत्वं न भवति ॥

ऐक्ष्वाकस्य स्वरभेदान्निपातनं पृथक्त्वेन ॥ ३ ॥

ऐक्ष्याकस्य[5] स्वरभेदान्निपातनं पृथक्त्वेन कर्तव्यम् । ऐक्ष्वाकः ऐक्ष्वाकः ॥

एकश्रुत्या निर्देशात्सिद्धम् ॥ ४ ॥

एकश्रुतिः स्वरसर्वनाम[6] यथा नपुंसकं लिङ्गसर्वनाम ॥

अथ मैत्रेये किं निपात्यते ।

---

* [V. M. om. औक्षमनपत्ये (१७३)].

[1] अन् ६. ४. १६७. [2] छत्त्रादिभ्यो णः ४. ४. ६२. [3] छत्त्रादिभ्यो णः ४. ४. ६२ ; टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ४. १. १५. [4] गुणवचनब्राह्मणादिभ्यः कर्मणि च ५. १. १२४. [5] जनपदशब्दात् क्षत्रियादञ् ४. १. १६८ ; ञ्नित्यादिर्नित्यम् ६. १. १९७ ; कोपधादण् ४. २. १३२ ; आद्युदात्तश्च ३. १. ३. [6] Cf. प्रकृतिसार्वनाम्न्याच्च निरुक्त (७. ४).

मैत्रेये ढञि यादिलोपनिपातनम् ॥ ५ ॥

मैत्रेये ढञि यादिलोपो निपात्यते ॥ इदं मित्रयुशब्दस्य चतुर्ग्रहणं क्रियते । गृष्ट्यादिषु प्रत्ययविध्यर्थं पाठः क्रियते[1] । द्वितीयेऽध्याये यस्कादिषु लुगर्थं ग्रहणं क्रियते[2] । सप्तमेऽध्याय इयादेशार्थम्[3] । इदं चतुर्थं यादिलोपार्थम् । द्विर्ग्रहणं शक्यमकर्तुम् । बिदादिषु[4] प्रत्ययविध्यर्थं पाठः कर्तव्यः । तत्र नैवार्थो लुका नापि यादिलोपेन[5] । इयादेशेनैव सिद्धम् ॥ नैवं शक्यम् । इह हि मैत्रेयकः[6] संघ इति संघाङ्कलक्षणेष्वञ्यञिञामण् [४. ३. १२७] इत्यण् प्रसज्येत ॥

हिरण्मये किं निपात्यते ।

हिरण्मये यलोपवचनम् ॥ ६ ॥

हिरण्मये यलोपो निपात्यते । हिरण्मयं कलशं बिभर्षि ॥

अथ हिरण्यये किं निपात्यते[7] ।

हिरण्ययस्य च्छन्दसि मलोपवचनात्सिद्धम् ॥ ७ ॥

हिरण्यये छन्दसि मलोपो निपात्यते । हिरण्ययी नो नयतु । हिरण्ययाः पन्थान आसन् । हिरण्ययमासनम् ॥ *

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य चतुर्थे पादे चतुर्थमाह्निकम् ॥ पादश्च समाप्तः ॥

॥ षष्ठोऽध्यायः समाप्तः ॥

---

* [V. M. om. ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि च्छन्दसि (१७५)].

[1] गृष्ट्यादिभ्यश्च ४. १. १३६.　[2] यस्कादिभ्यो गोत्रे २. ४. ६३.　[3] आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् ७. ३. २.　[4] अनृष्यानन्तर्ये विदादिभ्योञ् ४. १. १०४ यञञोश्च २. ४. ६४.　[5] यस्कादिभ्यो गोत्रे २. ४. ६३ ; दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवासिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि ६. ४. १७४.　[6] गोत्रचरणाद्वुञ् ४. ३. १२६.　[7] ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि छन्दासि ६. ४. १७५.

युवोरनाकौ ॥ ७ । १ । १ ॥

युवोरनाकावित्युच्यते कयोर्युवोरनाकौ भवतः । प्रत्यययोः । कथं पुनरङ्गस्येत्यनुवर्तमाने[१] प्रत्यययोः स्याताम् । युशब्दवुशब्दान्तमेतद्विभक्तावङ्गं भवति । यदि युशब्दवुशब्दान्तस्याङ्गस्यानाकौ भवतः सर्वादेशौ प्राप्नुतः[२] । निर्दिश्यमानस्यादेशा भवन्तीत्येवं न भविष्यतः । यत्र तर्हि विभक्तिर्नास्ति । नन्दना कारिकेति[३] । अत्रापि प्रत्ययलक्षणेन विभक्तिः । यत्र तर्हि प्रत्ययलक्षणं नास्ति । नन्दनप्रियः कारकाप्रिय इति[४] । मा भूतां यासौ सामासिकी विभक्तिस्तस्यां यासौ समासाद्विभक्तिस्तस्यां भविष्यतः । न वै तस्यां युशब्दवुशब्दान्तमङ्गं भवति । भवेद्यो युशब्दवुशब्दाभ्यामङ्गं विशेषयेत्तस्यानन्त्ययोर्न स्यातां वयं खल्वङ्गेन युशब्दवुशब्दौ विशेषयिष्यामः । अङ्गस्य युवोरनाकौ भवतो यत्रतत्रस्थयोरिति । यत्र तर्हि समासाद्विभक्तिर्नास्ति । नन्दनदधि कारकदधि[५] ॥ एवं तर्हि

न चापरं निमित्तं संज्ञा च प्रत्ययलक्षणेन । न चेह परं निमित्तमाश्रीयते । अस्मिन्परतो युवोरनाकौ भवत इति । किं तर्हि । अङ्गस्य युवोरनाकौ भवत इति । अङ्गसंज्ञा च भवति प्रत्ययलक्षणेन ॥ अथवा तयोरेव यदङ्गं तन्निमित्तत्वेनाश्रयिष्यामः । कथम् । अङ्गस्येति संबन्धसामान्ये षष्ठी विज्ञास्यते । अङ्गस्य यौ युवू । किं चाङ्गस्य युवू । निमित्तम् । ययोर्युवोरङ्गमित्येतद्भवति । कयोश्चैतद्भवति । प्रत्यययोः

युवोरनाकाविति चेद्धातुप्रतिषेधः ॥ १ ॥

युवोरनाकाविति चेद्धातुप्रतिषेधो वक्तव्यः । युत्वा युतः युतवान् युतिः ॥

भुज्य्वादीनां च ॥ २ ॥

भुज्य्वादीनां च प्रतिषेधो वक्तव्यः । भुज्युः कंयुः शंयुरिति[६] ॥

अनुनासिकपरत्वात्सिद्धम् ॥ ३ ॥

अनुनासिकपरयोर्युवोर्ग्रहणं न चैतावनुनासिकपरौ ॥ यद्यनुनासिकपरयोर्ग्रहणं

---

[१] अङ्गस्य ६. ४. १. [२] अनेकाल्शित् सर्वस्य १. १. ५५. [३] हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्त हल् ६. १. ६८. [४] सुपो धातुप्रातिपदिकयोः २. ४. ७१ ; न लुमताङ्गस्य १. १. ६३. [५] स्वमोर्नपुंसकात् ७. १. २३ ; न लुमताङ्गस्य १. १. ६३. [६] कंशंभ्यां बभयुस्तितुतयसः ५. २. १३८. For भुज्यु cf. तरसन्ता न भुज्युः (ऋ. १०. ९५. ८) for शंयु cf. शंयूइव महिष्ठा (ऋ. १०. १४३. ६).

नन्दनः कारकः अत्र न प्राप्नुतो न ह्येताभ्यां युशब्दवुशब्दाभ्यामनुनासिकं परं पश्यामः । अनुनासिकपरत्वादिति नैवं विज्ञायते अनुनासिकः पर आभ्यां ताविमावनुनासिकपरौ अनुनासिकपरत्वादिति । कथं तर्हि । अनुनासिकः परोऽनयोस्ताविमावनुनासिकपरौ अनुनासिकपरत्वादिति ॥ यद्यनुनासिकपरयोर्ग्रहणमित्संज्ञा प्राप्नोति[1] । तत्र को दोषः ।

तत्र ङीन्नुमोः प्रतिषेधः ॥ ४ ॥

ङीन्नुमोः प्रतिषेधो वक्तव्यः । नन्दनः कारकः । नन्दना कारिका । उगिल्लक्षणौ ङीन्नुमौ प्राप्नुतः[2] ॥

धात्वन्तस्य च ॥ ५ ॥

धात्वन्तस्य च प्रतिषेधो वक्तव्यः । दिवु सिवु ॥

षिट्टित्करणं तु ज्ञापकमुगित्कार्याभावस्य ॥ ६ ॥

यदयं युशब्दवुशब्दौ षिट्टितौ करोति शिल्पिनि ष्वुन् [३. १. १४५] टयुटयुलौ तुट् चेति[3] तज्ज्ञापयत्याचार्यो न युवोरुगित्कार्यं भवतीति । कथं कृत्वा ज्ञापकम् । षिट्टित्करण एतत्प्रयोजनं षिट्टित इतीकारो यथा स्यात्[4] । यदि चात्रोगित्कार्यं स्यात्षिट्टित्करणमनर्थकं स्यात् । पश्यति त्वाचार्यो न युवोरुगित्कार्यं भवतीति ततो युशब्दवुशब्दौ षिट्टितौ करोति ॥

न वा षित्करणं ङीष्विधानार्थम् ॥ ७ ॥

नैतदस्ति ज्ञापकम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् । किम् । षित्करणं क्रियते ङीष्विधानार्थम् । षित इति ङीष् यथा स्यात् ॥

टित्करणमनुपसर्जनार्थम् ॥ ८ ॥

टित्करणेऽप्यन्यत्प्रयोजनमस्ति । किम् । अनुपसर्जनाट्टित इतीकारो यथा स्यात् । टितोऽनुपसर्जनाद्भवत्युगित उपसर्जनाच्चानुपसर्जनाच्च ॥ एवं तर्हि

विप्रतिषेधात्तु टापो बलीयस्त्वम् ॥ ९ ॥

विप्रतिषेधात्तु टापो बलीयस्त्वं भविष्यति । टापोऽवकाशः । खट्वा माला । ङीपोऽवकाशः । गोमती यवमती । इहोभयं प्राप्नोति । नन्दना कारिका । टाब्भवति

---

[1] उपदेशेजनुनासिक इत् १. ३. २. [2] उगितश्च ४. १. ६ ; उगिदचां सर्वनामस्थानेऽधातोः ७. १. ७०. [3] सायंचिरंप्राह्णेप्रगेव्ययेभ्यष्ट्युटयुलौ तुट् च ४. ३. २३. [4] षिद्गौरादिभ्यश्च ४. १. ४१ ; टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ४. १. ४१ ; १५. [5] अजाद्यतष्टाप् ४. १. ४.

विप्रतिषेधेन ॥ नैष युक्तो विप्रतिषेधः ॥ विप्रतिषेधे परमित्युच्यते[1] पूर्वश्च टाप् परो ङीप् । ङीपः परष्टाप् करिष्यते । सूत्रविपर्यासः कृतो भवति ॥ एवं तर्ह्युगितो ङीब्भवतीत्यत्राप्यतष्टाबित्यनुवर्तिष्यते । एवमप्यकारान्तादुगित इहैव स्यात् नन्दना कारिका । गोमती यवमतीत्यत्र न स्यात् ॥ एवं तर्हि संबन्धानुवृत्तिः करिष्यते । अजाद्यतष्टाप् [४. १. ४] ऋन्नेभ्यो ङीप् [५] अतष्टाप् । उगितश्च [६] ङीब्भवति अतष्टाप् । वनो र च [७] वनो ङीब्भवति उगितोऽतष्टाप् । पादोऽन्यतरस्याम् [८] ङीब्भवति उगित अतष्टाप् । तत ऋचि[2] । ऋचि च टाब्भवति । उगितोऽत इति निवृत्तम् । तत्रायमप्यर्थो द्विष्टाब्ग्रहणं न कर्तव्यं भवति । प्रकृतमनुवर्तते ॥ सिध्यत्येवं यत्त्विदं वार्त्तिककारः पठति विप्रतिषेधात्तु टापो बलीयस्त्वमित्येतदसंगृहीतं भवति । एतच्च संगृहीतं भवति । कथम् । इष्टवाची परशब्दः[1] । विप्रतिषेधे परं यदिष्टं तद्भवतीति ॥

धात्वन्तस्य चार्थवद्ग्रहणात् ॥ १० ॥

अर्थवतोर्युवोर्ग्रहणं न च धात्वन्तोऽर्थवान् ॥

नुम्विधौ झल्ग्रहणम् ॥ ११ ॥

नुम्विधौ[3] झल्ग्रहणं कर्तव्यम् । झलन्तस्योगित इष्यते । उगिदचां सर्वनामस्थानेऽधातोर्झल इति ॥ तच्चावश्यं कर्तव्यं

लिङ्गविशिष्टप्रतिषेधार्थम् ॥ १२ ॥

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीति यथेह भवति गोमान् यवमानेवं गोमती यवमतीत्यत्रापि स्यात् ॥

न वा विभक्तौ लिङ्गविशिष्टाग्रहणात् ॥ १३ ॥

न वा वक्तव्यम् । किं कारणम् । विभक्तौ लिङ्गविशिष्टग्रहणं नेत्येषा परिभाषा कर्तव्या ॥ कः पुनरत्र विशेष एषा वा परिभाषा क्रियेत झल्ग्रहणं वेति । अवश्यमेषा परिभाषा कर्तव्या । बहून्येतस्याः परिभाषायाः प्रयोजनानि । कानि ।

प्रयोजनं शुनः स्वरे ॥ १४ ॥

यथेह भवति[4] शुना शुन एवं शुन्या शुन्या[5] इत्यत्रापि स्यात् ॥

---

[1] विप्रतिषेधे परं कार्यम् १. ४. २. [2] टाबृचि ४. १. ९. [3] उगिदचां सर्वनामस्थानेऽधातोः ७. १. ७०. [4] न गोश्वन्साववर्णराडङ्क्रुङ्क्रुद्भ्यः ६. १. १८२. [5] षिद्गौरादिभ्यश्च ४. १. ४१ ; आद्युदात्तश्च ३. १. ३ ; उदात्तयणो हल्पूर्वात् ६. १. १७४.

यूनः संप्रसारणे ॥ १५ ॥

यूनः संप्रसारणे प्रयोजनम् । यथेह भवति[१] यूनः पश्येत्येवं युवतीः पश्येत्यत्रापि स्यात् ॥

उगिदचां नुम्विधौ ॥ १६ ॥

उगिदचां नुम्विधौ प्रयोजनम् । यथेह भवति[२] गोमान् यवमानेवं गोमती यवमतीत्यत्रापि स्यात् ॥

अनडुहश्चाम्विधौ ॥ १७ ॥

अनडुहश्चाम्विधौ प्रयोजनम् । यथेह भवति[३] अनड्वानित्येवमनडुहीत्यत्रापि स्यात् । न वा भवत्यनड्वाहीति । भवत्यन्येन यत्नेन । आमनडुहः स्त्रियां वेति[४] । लिङ्गविशिष्टग्रहणादीकारान्तस्य प्राप्नोति ॥

पथिमथोरात्त्वे ॥ १८ ॥

पथिमथोरात्त्वे प्रयोजनम् । यथेह भवति[५] पन्थाः मन्था एवं पथी मथीत्यत्रापि प्राप्नोति । न केवलः पथिशब्दः स्त्रियां वर्तते । उपसमस्तस्तर्हि वर्तते । सुपथीति[६] ॥

पुंसोऽसुङ्विधौ ॥ १९ ॥

पुंसोऽसुङ्विधौ प्रयोजनम् । यथेह भवति[७] पुमानेवं पुंसीत्यत्रापि स्यात् । न केवलः पुंशब्दः स्त्रियां वर्तते । उपसमस्तस्तर्हि वर्तते । सुपुंसीति ॥

सख्युर्णित्त्वानङौ ॥ २० ॥

सख्युर्णित्त्वानङौ प्रयोजनम् । यथेह भवति[८] सखा सखायौ सखाय एवं सखी सख्यौ सख्य इत्यत्रापि प्राप्नोति ॥

भवद्भगवदघवतामोद्भावे ॥ २१ ॥

भवद्भगवदघवतामोद्भावे[९] प्रयोजनम् । यथेह भवति भोः भगोः अघोः इत्येवं भवति भगवति अघवतीत्यत्रापि स्यात् ॥

एतान्यस्याः परिभाषायाः प्रयोजनानि यदर्थमेषा परिभाषा कर्तव्या । एतस्यां च सत्यां नार्थो झल्ग्रहणेन ॥

---

[१] श्वयुवमघोनामतद्धिते ६. ४. १३३.

[२] उगिदचां सर्वनामस्थानेऽधातोः ७. १. ७०.

[३] चतुरनडुहोरामुदात्तः ७. १. ९८.

[४] आमनडुहः स्त्रियां वा ७. १. ९८ वा. १.

[५] पथिमथ्यृभुक्षामात् ७. १. ८५.

[६] न पूजनात् ५. ४. ६९ ; ऋन्नेभ्यो ङीप् ४. १. ५ ; भस्य टेर्लोपः ७. १. ८८.

[७] पुंसोऽसुङ् ७. १. ८९.

[८] सख्युरसंबुद्धौ ७. १. ९२ ; अनङ् सौ ७. १. ९३.

[९] विभाषा भवद्भगवदघवतामोच्चावस्य ८. ३. १ वा. ३.

तदेतदनन्यार्थं झल्ग्रहणं कर्तव्यं नुम्प्रतिषेधो वा वक्तव्यः ॥ उभयं न वक्तव्यम् । उपरिष्टाज्झल्ग्रहणं क्रियते[1] तत्पुरस्तादपकक्ष्यते । एवमपि सूत्रविपर्यासः कृतो भवति ॥ एवं तर्हि योगविभागः करिष्यते । उगिदचां सर्वनामस्थानेऽधातोः [७. १. ७०] । युजेरसमासे [७१] । ततो नपुंसकस्य । नपुंसकस्य नुम भवति । झल इत्युभयोः शेषः । ततोऽचः । अजन्तस्य च नपुंसकलिङ्गस्य नुम्भवति ॥

यद्यपि तावदेतदुगित्कार्यं परिहृतमिदमपरं प्राप्नोति । शातनितरा । पातनितरा[2] । उगितो नद्या घादिषु ह्रस्वो भवतीत्यन्यतरस्यां ह्रस्वत्वं प्रसज्येत[3] नित्यं चेष्यते । उगितो या नद्येवमेतद्विज्ञायते । उगित एषा नदी । उगितो या परा । अत्र चैव दोषो भवत्युगितो ह्येषा परा नद्यैषुमतितरायां[4] च प्राप्नोति । उगितः परा या विहिता । उगित एषा विहिता । उगित इत्येवं या विहिता । एवमपि भोगवतितरायां[5] दोषो भवति । भोगवतितरा भोगवतीतरा । तस्मादुगितो या नद्युगितो या विहितेत्येवमेतद्विज्ञास्यते । एवं विज्ञायमाने शातनितरायां दोष एव ॥

सिद्धं तु युवोरनुनासिकत्वात् ॥ २२ ॥

सिद्धमेतत् । कथम् । यकारवकारयोरेवेदमनुनासिकयोर्ग्रहणम् । सन्ति हि यणः सानुनासिका निरनुनासिकाश्च ॥

आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् ॥ ७ । १ । २ ॥

आयनादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थम् ॥ १ ॥

आयनादिषूपदेशिवद्भावो वक्तव्यः । उपदेशावस्थायामायनादयो भवन्तीति वक्तव्यम् । किं प्रयोजनम् । स्वरसिद्ध्यर्थम् । उपदेशावस्थायामायनादिष्विष्टः स्वरो यथा स्यादिति । शिलेयम्[6] तैत्तिरीयः[7] । अक्रियमाणे ह्युपदेशिवद्भावे प्रत्ययसंज्ञासंनियोगेनाद्युदात्तत्वे कृते[8] आन्तर्यत आदेशा अस्वरकाणामस्वरकाः स्युः ॥

---

[1] नपुंसकस्य झलचः ७. १. ७२.

[2] करणाधिकरणयोश्च ३. ३. ११७ ; टिड्ढाणञ् ... कञ्क्वरपः ४. १. १५.

[3] उगितश्च ६. ३. ४५.

[4] तदस्यास्त्यस्मिन्निति मतुप् ५. २. ९४ ; तस्येदम् ४. ३. १२० ; टिड्ढाणञ् ...क्वरपः ४. १. १५ ; यस्येति च ६. ४. १४८.

[5] शार्ङ्गरवाद्यञो ङीन् ४. १. ७३.

[6] शिलाया ढः ५. ३. १०२.

[7] तित्तिरिवरतन्तुखण्डिकोखाच्छण् ४. ३. १०२.

[8] आद्युदात्तश्च ३. १. ३.

न वा क्वचिच्चित्करणादुपदेशिवद्वचनानर्थक्यम् ॥ २ ॥

न वा वक्तव्यम्। किं कारणम्। क्वचिच्चित्करणात्। यदयं क्वचिद्वादींश्चितः करोति 'अग्राघत्'; 'घच्छौ च' [४. ४. ११६; ११७] तज्ज्ञापयत्याचार्य उपदेशावस्थायामायनादयो भवन्तीति। कथं कृत्वा ज्ञापकम्। चित्करण एतत्प्रयोजनं चितः [६. १. १६३] इत्यन्तोदात्तत्वं यथा स्यादिति। यदि चोपदेशावस्थायामायनादयो भवन्ति ततश्चित्करणमर्थवद्भवति ॥

तत्रोणादिप्रतिषेधः ॥ ३ ॥

तत्रोणादीनां प्रतिषेधो वक्तव्यः। शङ्खः शण्ढ इति ॥

धातोर्वैयङ्वचनात् ॥ ४ ॥

अथवा यदयमृतेरीयङ् [३. १. २९] इति धातोरीयङं शास्ति तज्ज्ञापयत्याचार्यो न धातुप्रत्ययानामायनादयो भवन्तीति। यदि हि स्युर्ऋतेश्छङित्येव ब्रूयात् ॥ सिद्धे विधिरारभ्यमाणो ज्ञापकार्थो भवति न चर्तेश्छङा सिध्यति। छङि सति वलादिलक्षण इट्प्रसज्येत[1]। इटि कृतेऽनादित्वादादेशो न स्यात् ॥ इदमिह संप्रधार्यम्। इट्क्रियतामादेश इति किमत्र कर्तव्यम्। परत्वादिडागमः। नित्य आदेशः। कृतेऽपीटि प्राप्नोत्यकृतेऽपि। अनित्य आदेशो न हि कृत इटि प्राप्नोति। किं कारणम्। अनादित्वात्। अन्तरङ्गस्तर्ह्यादेशः। कान्तरङ्गता। इदानीमेव ह्युक्तमायनादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थमिति। तदेतदृतेरीयङ्वचनं ज्ञापकमेव न धातुप्रत्ययानामायनादयो भवन्तीति ॥

प्रातिपदिकविज्ञानाच्च पाणिनेः सिद्धम् ॥ ५ ॥

प्रातिपदिकविज्ञानाच्च भगवतः पाणिनेराचार्यस्य सिद्धम्। उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥

झोऽन्तः ॥ ७। १। ३ ॥

झादेशे धात्वन्तप्रतिषेधः ॥ १ ॥

झादेशे धात्वन्तस्य प्रतिषेधो वक्तव्यः। उज्झिता उज्झितुमिति ॥ प्रत्ययाधि-

---

[1] आर्धधातुकस्येड्वलादेः ७. २. ३५.

कारात्सिद्धम् । प्रत्ययग्रहणं प्रकृतमनुवर्तते । क्व प्रकृतम् । आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् [७. १. २] इति ॥

प्रत्ययाधिकारात्सिद्धमिति चेदनादेरादेशवचनम् ॥ २ ॥

प्रत्ययाधिकारात्सिद्धमिति चेदनादेरादेशो वक्तव्यः । अपि नः श्वो विजनिष्यमाणाः पतिभिः सह शयान्तै[1] ॥ एवं तर्हि प्रत्ययग्रहणमनुवर्तत आदिग्रहणं निवृत्तम् । कथं पुनः समासनिर्दिष्टानामेकदेशोऽनुवर्तत एकदेशो वा निवर्तते ।

असमासनिर्देशात्सिद्धम् ॥ ३ ॥

असमासनिर्देशः करिष्यते । प्रत्ययस्यादीनामिति ॥ स तर्ह्यसमासनिर्देशः कर्तव्यः । न कर्तव्यः । क्रियते न्यास एव । कथम् । अविभक्तिको निर्देशः । प्रत्यय आदीनामिति ॥

तत्र शयान्ता इत्यनकारान्तत्वादङ्गस्याद्भावप्रतिषेधः ॥ ४ ॥

तत्रैतस्मिन्प्रत्ययग्रहणेऽनुवर्तमान आदिग्रहणे निवृत्ते शयान्ता इत्यनकारान्तत्वादङ्गस्याद्भावः प्राप्नोति[2] तस्य प्रतिषेधो वक्तव्यः ॥

सिद्धमनानन्तर्यादनकारान्तेनाद्भावनिवृत्तिः ॥ ५ ॥

सिद्धमेतत् । कथम् । अनानन्तर्यादनकारान्तेनाद्भावो न भविष्यति ॥

कथं कृत्वा चोदितं कथं कृत्वा परिहारः । अनकारान्तग्रहणं प्रत्ययविशेषणमिति कृत्वा चोदितं झकारविशेषणमिति कृत्वा परिहारः । यद्यनकारान्तग्रहणं झकारविशेषणं शेरते अत्र न प्राप्नोति[2] ।

तत्र रुटि संनियोगवचनात्सिद्धम् ॥ ६ ॥

तत्र रुटि[3] संनियोगः करिष्यते । क्व एष यत्नश्चोद्यते संनियोगो नाम । चकारः कर्तव्यः । रुट्च । किं च । यच्चान्यत्प्राप्नोति । किं चान्यत्प्राप्नोति । अद्भावः ॥ स तर्हि चकारः कर्तव्यः । न कर्तव्यः । योगविभागः करिष्यते । शीङः । शीङ उत्तरस्य झस्याद्भवति । ततो रुट् । रुट्च भवति शीङ इति ॥ एवमपि पर्यायः प्रसज्येत । एवं तर्ह्यच्छब्दस्य रुटं वक्ष्यामि । तदच्छब्दग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । अदभ्यस्तात् [७. १. ४.] इति । तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । शीङ इत्येषा पञ्चम्यदिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्य [१. १. ६७] इति ॥ *

---

* [V. M. om. अदभ्यस्तात् (४) ; आत्मनेपदेष्वनतः (५)].

[1] लेटोऽडाटौ ३. ४. ९४ cf. शयाते । तै. ब्रा. १।२।२।१६ cf. काममाविजनितोः संभवाम तै. सं. २।५।१।५.

[2] आत्मनेपदेष्वनतः ७. १. ५.

[3] शीङो रुट् ७. १, ६.

शीङो रुट् ॥ ७ । १ । ६ ॥

रुटि दृशिगुणप्रतिषेधः ॥ १ ॥

रुटि दृशिगुणः प्राप्नोति[1] । अदृश्रन्नस्य केतव इति । तस्य प्रतिषेधो वक्तव्यः ॥ न वक्तव्यः । परस्मिन्निति क्ङिति च [१. १. ५] इति प्रतिषेधो भविष्यति । एवमप्यदृश्रमस्य केतव इत्यत्र प्राप्नोति ॥ एवं तर्हि पूर्वान्तः करिष्यते ।

पूर्वान्ते शीङो गुणविधिः ॥ २ ॥

पूर्वान्ते शीङो गुणो विधेयः । शेरते । सूत्रं च भिद्यते ॥ यथान्यासमेवास्तु । ननु चोक्तं रुटि दृशिगुणप्रतिषेध इति । पूर्वान्तेऽप्येष दोषः । कथम् । अयं दृशिगुणः प्रतिषेधविषय आरभ्यते स यथैव क्ङिति चेत्येतं प्रतिषेधं बाधत एवमनुपधाया अपि प्रसज्येत । तस्मादुभाभ्यामेव दृशेरक्प्रत्ययान्तरं वक्तव्यं पितरं च दृशेयं मातरं च दृशेयमित्येवमर्थम्[2] ॥

झादेशादाड्लेटि ॥ ३ ॥

झादेशादाड्लेटि[3] भवति विप्रतिषेधेन । झादेशस्यावकाशः[4] । लुनते लुनताम् अलुनत । आटोऽवकाशः । पताति दिद्युत्[5] । उदधिं च्यावयाति[6] । इहोभयं प्राप्नोति । अपि नः श्वो विजनिष्यमाणाः पतिभिः सह शयान्तै । आड्लेटि भवति विप्रतिषेधेन ॥

स तर्हि पूर्वविप्रतिषेधो वक्तव्यः ।

न वा नित्यत्वादाटः ॥ ४ ॥

न वा वक्तव्यः । किं कारणम् । नित्यत्वादाटः । नित्य आडागमः । स कथं नित्यः । यद्यनकारान्तग्रहणं झकारविशेषणम् । अथ हि प्रत्ययविशेषणं झादेशोऽपि नित्यः ॥

अन्तरङ्गलक्षणत्वाच्च ॥ ५ ॥

अन्तरङ्गः खल्वप्याडागमः । कथमन्तरङ्गः । यदि प्राग्लादेशाद्धात्वधिकारः[7] । अथ हि लादेशे धात्वधिकारोऽनुवर्तते उभयं समानाश्रयम् ॥ यद्येवानकारान्तग्रहणं प्रत्ययविशेषणमथापि लादेशे धात्वधिकारोऽनुवर्तत उभयथापि पूर्वविप्रतिषेधेन

---

[1] इरितो वा. ३. ३. ५७; बहुलं छन्दसि ७. १. ८; ऋदृशोऽङि गुणः ७. ४. १६.
[2] दृशेरक् पितरं च दृशेयं मातरं च ३. १. ८६ वा. २.
[3] लेटोऽडाटौ ३. ४. ९४.
[4] आत्मनेपदेष्वनतः ७. १. ५.
[5] ऋ. सं. ७. २५. १.
[6] तै. सं. ३. ५. ५. २.
[7] धातोः ३. १. ९१; तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् ३. ४. ७८.

नार्थः । कथम् । बहुलं छन्दसि [२. ४. ७३] इत्येवमत्र शपो लुग्न भविष्यति। तत्रानत इति प्रतिषेधो भविष्यति ॥

वेत्तेर्विभाषा ॥ ७ । १ । ७ ॥

बहुलं छन्दसि ॥ ७ । १ । ८ ॥

अतो भिस ऐस् ॥ ७ । १ । ९ ॥

बहुलं छन्दसि ॥ ७ । १ । १० ॥

इदं बहुलं छन्दसीति द्विः क्रियते । एकं शक्यमकर्तुम् । कथम् । यदि तावत्पूर्वं क्रियते परं न करिष्यते । अतो भिस ऐसित्यत्र बहुलं छन्दसीत्येतदनुवर्तिष्यते । अथ परं क्रियते पूर्वं न करिष्यते । बहुलं छन्दसीत्यत्र रुडप्यनुवर्तिष्यते ॥

अपर आह । उभे बहुलग्रहणे एकं छन्दोग्रहणं शक्यमकर्तुम् । कथम् । इदमस्ति । वेत्तेर्विभाषा । ततश्छन्दसि । छन्दसि च विभाषा । ततोऽतो भिस ऐस् भवति । छन्दसि विभाषेति ॥

अतो भिस ऐस् ॥ ७ । १ । ९ ॥

इह वृक्षैः प्लक्षैरिति परत्वादेत्त्वं प्राप्नोति[1]। ऐस्भाव इदानीं क्व भविष्यति ।

कृत एत्त्वे भौतपूर्व्यात्

कृत एत्त्वे भूतपूर्वमकारान्तमित्यैस् भविष्यति ॥

ऐस्तु नित्यस्तथा सति ॥

एवं सति नित्य ऐस्भावः कृतेऽप्येत्त्वे प्राप्नोत्यकृतेऽपि प्राप्नोति । नित्यत्वादैस्त्वे कृते विहतनिमित्तत्वादेत्त्वं न भविष्यति ॥

एत्त्वं भिसि परत्वाच्चेदत ऐस् क्व भविष्यति ।
कृत एत्त्वे भौतपूर्व्यादैस् तु नित्यस्तथा सति ॥

---

[1] बहुवचने झल्येत् ७. ३. १०३.

नेदमदसोरकोः ॥ ७ । १ । ११ ॥

इमौ द्वौ प्रतिषेधावुच्येते । उभौ शक्याववक्तुम् । कथम् । एवं वक्ष्यामि । इदमदसोः कादिति । तन्नियमार्थं भविष्यति । इदमदसोः कादेव नान्यत इति ॥

टाङसिङसामिनात्स्याः ॥ ७ । १ । १२ ॥

किमर्थमिनादेश उच्यते न नादेश एवोच्येत । का रूपसिद्धिः वृक्षेण प्लक्षेण । एत्त्वे योगविभागः करिष्यते[1] । कथम् । इदमस्ति । बहुवचने झल्येत् [७. ३. १०३] ओसि च [१०४] । तत आङि च । आङि च परतो ऽत एत्त्वं भवति । वृक्षेण प्लक्षेण । तत आपः संबुद्धौ च [१०६] । आप आङि चौसि चेति ॥ नैवं शक्यम् । इह हि अनेनेतीद्रूपलोपः प्रसज्येत[2] । झलि लोपः करिष्यते । न शक्यो झलि लोपः कर्तुम् । इह हि दोषः स्यात् । अया[3] विष्ठति ॥ एवं तर्ह्यन् लोपापवादो विज्ञास्यते[4] । कथम् । एवं वक्ष्यामि । अन् ने चापि चेति । तन्नकारग्रहणं कर्तव्यम् । न कर्तव्यम् । क्रियते न्यास एव । लुप्तनिर्दिष्टो नकारः । यद्येवं नोपधाया इति दीर्घत्वं प्राप्नोति[5] । सौत्रो निर्देशः । अथवा नपुंसकनिर्देशः करिष्यते ॥

अथ किमर्थमादुच्यते न अदेवोच्येत । का रूपसिद्धिः वृक्षात् प्लक्षात् । सवर्णदीर्घत्वेन सिद्धम्[6] । न सिध्यति । अतो गुणे पररूपमिति पररूपत्वं प्राप्नोति[7] । अकारोच्चारणसामर्थ्यान्न भविष्यति ॥ यदि प्राप्नुवन्विधिरुच्चारणसामर्थ्याद्बाध्यते सवर्णदीर्घत्वमपि न प्राप्नोति । नैष दोषः । यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यते । पररूपं प्रत्यकारोच्चारणमनर्थकं सवर्णदीर्घत्वस्य पुनर्निमित्तमेव ॥

ङेर्यः ॥ ७ । १ । १३ ॥

किमिदं चतुर्थ्येकवचनस्य ग्रहणमाहोस्वित्सप्तम्येकवचनस्य ग्रहणम् । कुतः

---

[1] आङि चापः ७. ३. १०५.

[2] हलि लोपः ७. २. ११३.

[3] सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ७. १. ३९.

[4] अनाप्यकः ७. २. ११२; हलि लोपः ७. २. ११३.

[5] नोपधायाः ६. ४. ८.

[6] अकः सवर्णे दीर्घः ६. १. १०१.

[7] अतो गुणे ६. १. ९७.

संदेहः । समानो निर्देशः ॥ चतुर्थ्येकवचनस्य ग्रहणम् । कथं ज्ञायते । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति । इहापि तर्हि चतुर्थ्येकवचनस्य ग्रहणं स्यात् । ङेराम् नद्याम्नीभ्यः [७. ३. ११६] ॥ एवं तर्हि व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमितीह चतुर्थ्येकवचनस्य ग्रहणं व्याख्यास्यामस्तत्र सप्तम्येकवचनस्येति ॥

सर्वनाम्नः स्मै ॥ ७ । १ । १४ ॥

अश एकादिष्टात्स्मायादीनामुपसंख्यानम् ॥ १ ॥

अश[1] एकादिष्टात्स्मायादीनामुपसंख्यानं कर्तव्यम् । अथो अत्रास्मै । अथो अत्रास्मात् । अथो अत्रास्मिन्निति । एकादेशे[2] कृते ऽत इति स्मायादयो न प्राप्नुवन्ति । किं पुनः कारणमेकादेशस्तावद्भवति न पुनः स्मायादयः । न परत्वात् स्मायादिभिर्भवितव्यम् । न भवितव्यम् । किं कारणम् । नित्यत्वादेकादेशः । नित्य एकादेशः । कृतेष्वपि स्मायादिषु प्राप्नोत्यकृतेष्वपि । नित्यत्वादेकादेशे कृते ऽत इति स्मायादयो न प्राप्नुवन्ति ॥ किमुच्यते ऽश इति नेहापि कर्तव्यम् । अत्रास्मै । अत्रास्मात् । अत्रास्मिन्निति । एकादेशे कृतेऽत इति स्मायादयो न प्राप्नुवन्ति । आनुपूर्व्या सिद्धमेतत् । नात्राकृतेषु स्मायादिषु हलादिर्विभक्तिरस्ति हलादौ चेद्रूपलोपो[3] न चाकृत इद्रूपलोप एकादेशः प्राप्नोति । तदानुपूर्व्या सिद्धम् ॥ तत्तर्ह्युपसंख्यानं कर्तव्यम् ।

न वा बहिरङ्गलक्षणत्वात् ॥ २ ॥

न वा कर्तव्यम् । किं कारणम् । बहिरङ्गलक्षणत्वात् । बहिरङ्गलक्षण एकादेशः । अन्तरङ्गाः स्मायादयः । असिद्धं बहिरङ्गमन्तरङ्गे ॥ *

जसः शी ॥ ७ । १ । १७ ॥ **

जश्शसोः शिः ॥ ७ । १ । २० ॥

किमर्थं शीभावः शिभावश्चोच्यते न शिभाव एवोच्येत । का रूपसिद्धिः ते ये

---

* [V. M. om. ङसिङ्योः स्मात्स्मिनौ (१५) ; पूर्वादिभ्यो नवभ्यो वा (१६)].

** [V. M. om. औङ आपः (१८) ; नपुंसकाच्च (१९)].

[1] इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ २. ४. ३२.

[2] अकः सवर्णे दीर्घः ६. १. १०१.

[3] हलि लोपः ७. २. ११३.

के । आद्गुणेन सिद्धम्[1] । नैवं शक्यम् । इह हि त्रपुणी जतुनी[2] दीर्घश्रवणं न स्यात् ॥ एवं तर्हि शीभाव एवोच्यताम् । नैवं शक्यम् । इह हि कुण्डानि वनानीति ह्रस्वस्य श्रवणं न स्यात् ॥ तस्माच्छीभावः शिभावश्च वक्तव्यः ॥

औङ आपः ॥ ७ । १ । १८ ॥

किमर्थो ङकारः । सामान्यग्रहणार्थः । औ इत्युच्यमाने प्रथमाद्विवचनस्यैव स्यात् । अथाप्यौडित्युच्यत एवमपि द्वितीयाद्विवचनस्यैव स्यात् ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति । ङित्कार्यं तु प्राप्नोति । खट्वे माले । याडापः [७.३.११३] इति याट् प्राप्नोति । नैष दोषः । नैवं विज्ञायते ङकार इदस्य सोऽयं ङित् ङितीति । कथं तर्हि । ङ एवेन्ङित् ङितीति । एवं सति वर्णग्रहणमिदं भवति वर्णग्रहणेषु चैतद्भवति यस्मिन्विधिस्तदादावल्ग्रहण इति । न दोषो भवति ॥ अथवा वर्णग्रहणमिदं भवति न चैतद्वर्णग्रहणेषु भवत्यननुबन्धकग्रहणे न सानुबन्धकस्येति ॥ अथवा पूर्वसूत्रनिर्देशोऽयं पूर्वसूत्रेषु च येऽनुबन्धा न तैरिहेत्कार्याणि क्रियन्ते ॥

औकारोऽयं शीविधौ ङिद्गृहीतो ङिच्चास्माकं नास्ति कोऽयं प्रकारः ।
सामान्यार्थस्तस्य चासञ्जनेऽस्मिन् ङित्कार्यं ते श्यां प्रसक्तं स दोषः ॥ १ ॥
ङित्त्वे विद्याद्वर्णनिर्देशमात्रं वर्णे यत्स्यात्तच्च विद्यात्तदादौ ।
वर्णश्चायं तेन ङित्त्वेऽप्यदोषो निर्देशोऽयं पूर्वसूत्रेण वा स्यात् ॥ २ ॥*

अष्टाभ्य औश् ॥ ७ । १ । २१ ॥

औशघौ

औशघाविति वक्तव्यम् । किमिदमघाविति । अनुत्तरपद इति । किं प्रयोजनम् । इह मा भूत् । अष्टपुत्रः अष्टभार्य इति ॥

अस्तु लुक् तत्र

अस्त्वत्रौश्त्वं लुग्भविष्यति[3] ॥

षड्भ्योऽप्येवं प्रसज्यते ।

इहापि तर्हि प्राप्नोति । अष्टौ तिष्ठन्ति । अष्टौ पश्येति[4] ॥

---

* [V. M. om. नपुंसकाच्च (१९) ; जश्शसोः शिः (२०)].

[1] आद्गुणः ६. १. ८७.

[2] नपुंसकाच्च ७. १. १९.

[3] सुपो धातुप्रातिपदिकयोः २. ४. ७१.

[4] षड्भ्यो लुक् ७. १. २२.

अपवादः

अपवादत्वादत्रौश्त्वं लुकं बाधिष्यते ॥ इहापि तर्हि बाधेत । अष्टपुत्रः अष्टभार्यः ।

यस्य विषये

यस्य लुको विषय औश्त्वं तस्यापवादः ॥

यो वा तस्मादनन्तरः ॥ १ ॥

अथवानन्तरस्य लुको बाधकं भविष्यति । कुत एतत् । अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति ॥ अथेह कस्मान्न भवत्यौश्त्वम् । अष्ट तिष्ठन्ति । अष्ट पश्येति ॥

आत्वं यत्र तु तत्रौश्त्वम्

यत्रैवात्वं तत्रैवौश्त्वेन भवितव्यम् । कुत एतत् ।

तथा ह्यस्य ग्रहः कृतः ।

तथा ह्यस्यात्वभूतस्य ग्रहणं क्रियते । अष्टाभ्य इति । ननु च नित्यमात्वम्[1] । एतदेव ज्ञापयत्याचार्यो विभाषात्वमिति यदयमात्वभूतस्य ग्रहणं करोति । अष्टाभ्य इति । इतरथा ह्यष्टन इत्येव ब्रूयात् ॥

औशाघावस्तु लुक्तत्र षड्भ्योऽप्येवं प्रसज्यते ।
अपवादो यस्य विषये यो वा तस्मादनन्तरः ॥ १ ॥
आत्वं यत्र तु तत्रौश्त्वं तथा ह्यस्य ग्रहः कृतः ।
स्वमोर्लुक्च त्यदादीनां कृते ह्यत्वे न लुग्भवेत् ॥ २ ॥*

स्वमोर्नपुंसकात् ॥ ७ । १ । २३ ॥

स्वमोर्लुक् त्यदादिभ्यश्च ॥ १ ॥

स्वमोर्लुक् त्यदादिभ्यश्चेति वक्तव्यम् । इहापि यथा स्यात् । तद्ब्राह्मणकुलमिति । किं पुनः कारणं न सिध्यति ।

कृते ह्यत्वे न लुग्भवेत् ।

अत्वे[2] कृते लुग्न प्राप्नोति । इदमिह संप्रधार्यम् । अत्वं क्रियतां लुगिति किमत्र कर्तव्यम् । परत्वादत्वम् । नित्यो लुक् । कृतेऽप्यत्वे प्राप्नोत्यकृतेऽपि । अनित्यो

---

* [V. M. om. षड्भ्यो लुक् (२२)].

[1] अष्टन आ विभक्तौ ७. २. ८४.

[2] त्यदादीनामः ७. २. १०२.

लुग्न हि कृतेऽत्वे प्राप्नोति । अतोऽम् [७. १. २४] इत्यम्भावेन भवितव्यम् । तस्मात् त्यदादिभ्यश्चेति वक्तव्यम् ॥

इदं विचार्यते शिशीलुग्नुम्विधिषु[1] नपुंसकग्रहणं शब्दग्रहणं वा स्यादर्थग्रहणं वेति । कश्चात्र विशेषः ।

शिशीलुग्नुम्विधिषु नपुंसकग्रहणं शब्दग्रहणं चेदन्यपदार्थे प्रतिषेधः ॥ २ ॥

शिशीलुग्नुम्विधिषु नपुंसकग्रहणं शब्दग्रहणं चेदन्यपदार्थे प्रतिषेधो वक्तव्यः । वहुत्रपुः बहुत्रपू बहुत्रपत्र इति । अस्तु तर्ह्यर्थग्रहणम् ॥ यद्यर्थग्रहणं प्रियसक्थ्ना ब्राह्मणेनेत्यनङ् प्राप्नोति[2] । अस्तु तर्हि शब्दग्रहणमेव । ननु चोक्तं शिशीलुग्नुम्विधिषु नपुंसकग्रहणं चेदन्यपदार्थे प्रतिषेध इति ।

सिद्धं तु प्रकृतार्थविशेषणत्वात् ॥ ३ ॥

सिद्धमेतत् । कथम् । प्रकृतस्यार्थो विशेष्यते । किं च प्रकृतम् । अङ्गम्[3] । अङ्गस्य शिशीलुग्नुमो भवन्ति नपुंसके वर्तमानस्य ॥ कथं प्रियसक्थ्ना ब्राह्मणेन ।

अस्थ्यादिषु शब्दग्रहणम् ॥ ४ ॥

अस्थ्यादिषु नपुंसकग्रहणं शब्दग्रहणं द्रष्टव्यम् ॥

युक्तं पुनरिदं विचारयितुम् । नन्वनेनासंदिग्धेनार्थग्रहणेन भवितव्यं न हि नपुंसकं नाम शब्दोऽस्ति । किं तर्ह्युच्यतेऽस्थ्यादिषु शब्दग्रहणमिति । अत्राप्यर्थग्रहणमेव ॥ अत्रैतावान्संदेहः क्व प्रकृतस्यार्थो विशेष्यते क्व गृह्यमाणस्येति । शिशीलुग्नुम्विधिषु प्रकृतस्यार्थो विशेष्यतेऽस्थ्यादिषु गृह्यमाणस्य ॥ *

अद्ड्डतरादिभ्यः पञ्चभ्यः ॥ ७ । १ । २५ ॥

अद्भावे पूर्वसवर्णप्रतिषेधः ॥ १ ॥

अद्भावे पूर्वसवर्णस्य[4] प्रतिषेधो वक्तव्यः । कतरत्तिष्ठति । कतरत्पश्य ॥

सिद्धमनुनासिकोपधत्वात् ॥ २ ॥

सिद्धमेतत् । कथम् । अनुनासिकोपधोऽच्छब्दः करिष्यते ॥

---

* [V. M. om. अतोऽम् (२४)].

[1] नपुंसकाच्च ; जश्शसोः शिः ; स्वमोर्नपुंसकात् ; नपुंसकस्य झलचः ७. १. १९ ; ७. १. २० ; ७. १. २३ ; ७. १. ७२. [2] अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ७. १. ७५. [3] अङ्गस्य ६. ४. १. [4] प्रथमयोः पूर्वसवर्णः ६. १. १०२.

दुक्करणाद्वा ॥ ३ ॥

अथवा दुग्डतरादीनामिति वक्ष्यामि[1] ॥

डित्करणाद्वा ॥ ४ ॥

अथवा डिदच्छब्दः करिष्यते[2] ॥ स तर्हि डकारः कर्तव्यः । न कर्तव्यः । क्रियते न्यास एव । द्विडकारको निर्देशः । अद्ड्डतरादिभ्य इति ॥

नेतराच्छन्दसि ॥ ७ । १ । २६ ॥

इतराच्छन्दसि प्रतिषेधः एकतरात्सर्वत्र ॥ १ ॥

इतराच्छन्दसि प्रतिषेध एकतरात्सर्वत्रेति वक्तव्यम् । एकतरं तिष्ठति । एकतरं पश्य ॥

नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा विप्रतिषेधेन ॥ २ ॥

नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा भवन्ति विप्रतिषेधेन । नपुंसकादेशानामवकाशः[3] । त्रपु त्रपुणी त्रपूणि । युष्मदस्मदोर्विभक्त्यादेशानामवकाशः[4] । त्वं ब्राह्मणः अहं ब्राह्मणः । युवां ब्राह्मणौ आवां ब्राह्मणौ । यूयं ब्राह्मणाः वयं ब्राह्मणाः । इहोभयं प्राप्नोति । त्वं ब्राह्मणकुलम् अहं ब्राह्मणकुलम् युवां ब्राह्मणकुले आवां ब्राह्मणकुले । यूयं ब्राह्मणकुलानि वयं ब्राह्मणकुलानि । युष्मदस्मदोर्विभक्त्यादेशा भवन्ति विप्रतिषेधेन ॥ अथेदानीं युष्मदस्मदोर्विभक्त्यादेशेषु कृतेषु पुनःप्रसङ्गाच्छिशीलुग्नुम्विधयः कस्मान्न भवन्ति । सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति ॥

युष्मदस्मद्भ्यां ङसोऽश् ॥ ७ । १ । २७ ॥

किमर्थः शकारः । सर्वादेशार्थः । शित्सर्वस्येति[5] सर्वादेशो यथा स्यात् । नैतदस्ति प्रयोजनम् । अक्रियमाणेऽपि शकारेऽलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्याकारे कृते त्रयाणामकाराणामतो गुणे पररूपत्वे[6] सिद्धं रूपं स्यात् तव स्वम्

---

[1] आद्यन्तौ टकितौ १. १. ४६ ; स्वमोर्नपुंसकात् ७. १. २३. [2] टेः ६. ४. १४३.
[3] स्वमोर्नपुंसकात् ७. १. २३ ; नपुंसकाच्च ७. १. १९ ; जश्शसोः शिः ७. १. २०. [4] ङेप्रथमयोरम् ७. १. २८. [5] अनेकाल्शित् सर्वस्य १. १. ५५. [6] अलोन्त्यस्य १, १. ५२ ; अतो गुणे ६. १. ९७.

मम स्वम् । यद्येतल्लभ्येत कृतं स्यात् । तत्तु न लभ्यम् । किं कारणम् । अत्र हि तस्मादित्युत्तरस्यादेः परस्य [१. १. ६७ ; ५४] इत्यकारस्य प्रसज्येत ॥ अत उत्तरं पठति ।

ङस आदेशे शित्करणानर्थक्यमकारस्याकारवचनानर्थक्यात् ॥ १ ॥

ङस आदेशे शित्करणमनर्थकम् । किं कारणम् । अकारस्याकारवचनानर्थक्यात् । अकारस्याकारवचने प्रयोजनं नास्तीति कृत्वान्तरेण शकारं सर्वादेशो भविष्यति ॥

अर्थवत्त्वादेशे लोपार्थम् ॥ २ ॥

अर्थवत्त्वकारस्याकारवचनम् । कोऽर्थः । आदेशे लोपार्थम् । यः स शेषे लोपः [७. २. ९०] आदेशे स विज्ञायते । ननु चादेशो या विभक्तिरित्येवमेतद्विज्ञायते । आदेश एषा विभक्तिः । कथम् ।

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः ।
एकदेशविकारे हि नित्यत्वं नोपपद्यते ॥

तस्माच्छित्करणम् ॥ ३ ॥

तस्माच्छकारः कर्तव्यः । न कर्तव्यः । क्रियते न्यास एव । कथम् । प्रश्लिष्टनिर्देशोऽयम् । अ अ अ इति । सोऽनेकाल्शित्सर्वस्य [१. १. ५५] इति सर्वस्य भविष्यति ॥

ङे प्रथमयोरम् ॥ ७ । १ । २८ ॥

प्रथमयोरित्युच्यते कयोरिदं प्रथमयोर्ग्रहणं किं विभक्त्योराहोस्वित्प्रत्यययोः । विभक्त्योरित्याह । कथं ज्ञायते । अन्यत्रापि हि प्रथमयोर्ग्रहणे विभक्त्योर्ग्रहणं विज्ञायते न प्रत्यययोः । क्वान्यत्र । प्रथमयोः पूर्वसवर्णः [६. १. १०२] इति ॥ अस्ति कारणं येन तत्र विभक्त्योर्ग्रहणं विज्ञायते । किं कारणम् । अचीति[1] तत्र वर्तते न चाजादी प्रथमौ प्रत्ययौ स्तः । ननु चैवं विज्ञायतेऽजादी यौ प्रथमावजादीनां वा यौ प्रथमाविति । यत्तर्हि तस्माच्छसो नः पुंसि [६. १. १०३] इत्यनुक्रान्तं पूर्वसवर्णं प्रतिनिर्दिशति तज्ज्ञापयत्याचार्यो विभक्त्योर्ग्रहणमिति ॥

---

[1] इको यणचि ६. १. ७७.

इहाप्याचार्यप्रवृत्तिर्ज्ञापयति विभक्त्योर्ग्रहणमिति यदयं शसो न [७. १. २९] इति प्रतिषेधं शास्ति । नैष प्रतिषेधः । नत्वमेतद्विधीयते । सिद्धमत्र नत्वं तस्माच्छसो नः पुंसीति । यत्र तेन न सिध्यति तदर्थम् । क्व च तेन न सिध्यति । स्त्रियां नपुंसके च । युष्मान् ब्राह्मणीः पश्य अस्मान् ब्राह्मणीः पश्य । युष्मान् ब्राह्मणकुलानि पश्य अस्मान्ब्राह्मणकुलानि पश्येति ॥ यत्तर्हि युष्मदस्मदोरनादेशे द्वितीयायां च [७. २. ८६, ८७] इत्याह तज्ज्ञापयत्याचार्यो विभक्त्योर्ग्रहणमिति ॥ *

भ्यसोऽभ्यम् ॥ ७ । १ । ३० ॥

किमयं भ्यम्शब्द आहोस्विदभ्यम्शब्दः । कुतः संदेहः । समानो निर्देशः । किं चातः । यदि तावद् भ्यम्शब्दः शेषे लोपश्चान्त्यस्यैत्त्वं प्राप्नोति[1] । अथाभ्यम्शब्दः शेषे लोपश्च टिलोप उदात्तनिवृत्तिस्वरः प्राप्नोति[2] ॥ यथेच्छसि तथास्तु । अस्तु तावद्भ्यम्शब्दः शेषे लोपश्चान्त्यस्य । ननु चोक्तमेत्त्वं प्राप्नोतीति । नैषः दोषः । अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येति न भविष्यति ॥ अथवा पुनरस्त्वभ्यम्शब्दः शेषे लोपश्च टिलोपः । ननु चोक्तमुदात्तनिवृत्तिस्वरः प्राप्नोतीति । नैष दोषः । उक्तमेतदादौ सिद्धमिति[3] ॥ **

साम आकम् ॥ ७ । १ । ३३ ॥

किमर्थमामः ससकारस्य ग्रहणं क्रियते न आम आकमित्येवोच्येत । केनेदानीं ससकारस्य भविष्यति । आमः सुडयं भक्ते[4] आम्ग्रहणेन ग्राहिष्यते ॥ अत उत्तरं पठति ॥

साम्ग्रहणं यथागृहीतस्यादेशवचनात् ॥ १ ॥

साम्ग्रहणं क्रियते । निर्दिश्यमानस्यादेशा भवन्तीत्येवं ससकारस्य न प्राप्नोति । इष्यते च स्यादिति तच्चान्तरेण यत्नं न सिध्यतीति साम आकम् । एवमर्थमिदमुच्यते ॥

न वा द्विपर्यन्तानामकारवचनादामि सकाराभावः ॥ २ ॥

न वैतत्प्रयोजनमस्ति । किं कारणम् । द्विपर्यन्तानामकारवचनात् । द्विपर्यन्तानां हि त्यदादीनामत्वमुच्यते[5] तेनामि सकारो न भविष्यति ॥

---

* [V. M. om. शसो न (२९)].

** [V. M. om. पञ्चम्या अत् (३१) ; एकवचनस्य च (३२)].

[1] शेषे लोपः ; बहुवचने झल्येत् ७. २. ९० ; ७. ३. १०३.

[2] अनुदात्तस्य च यत्रोदात्तलोपः ; कर्षात्वतो घञोन्त उदात्तः ६. १. १६१ ; ६. १. १५९.

[3] आदौ सिद्धम् ६. १. १६१ वा. ४.

[4] आमि सर्वनाम्नः सुट् ७. १. ५२.

[5] त्यदादीनां द्विपर्यन्तानामकारवचनम् ७. २. १०२ वा १.

सुट्प्रतिषेधस्त्वादेशे लोपविज्ञानात् ॥ ३ ॥

सुट्प्रतिषेधस्तु वक्तव्यः । किं कारणम् । आदेशे लोपविज्ञानात् । यः स शेषे लोपः [७. २. ९०] आदेशे स विज्ञायते ॥

न वा टिलोपवचनादादेशे टाप्प्रतिषेधार्थम् ॥ ४ ॥

न वा सुट्प्रतिषेधो वक्तव्यः । किं कारणम् । टिलोपवचनात् । आदेशे यः स शेषे लोपष्टिलोपः स वक्तव्यः । किं प्रप्रोजनम् । टाप्प्रतिषेधार्थम् । टाब्मा भूदिति[1] ॥ स तर्हि टिलोपो वक्तव्यः ।

न वा लिङ्गाभावाट्टिलोपवचनानर्थक्यम् ॥ ५ ॥

न वा वक्तव्यम् । किं कारणम् । लिङ्गाभावात् । अलिङ्गे युष्मदस्मदी । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । न ह्यस्ति विशेषो युष्मदस्मदोः स्त्रियां पुंसि नपुंसके वा ॥ अस्ति कारणं येनैतदेवं भवति । किं कारणम् । योऽसौ विशेषवाची शब्दस्तदसांनिध्यात् । अङ्ग हि भवांस्तमुच्चारयतु गंस्यते स विशेषः ॥ ननु च नैतेनैवं भवितव्यम् । न हि शब्दनिमित्तकेन नामार्थेन भवितव्यम् । किं तर्हि । अर्थनिमित्तकेन नाम शब्देन भवितव्यम् । तदेतदेवं दृश्यतामर्थरूपमेवैतदेवंजातीयकं येनात्र विशेषो न गम्यत इति । अवश्यं चैतदेवं विज्ञेयम् । यो हि मन्यते योऽसौ विशेषवाची शब्दस्तदसांनिध्यादत्र विशेषो न गम्यत इतीहापि तस्य विशेषो न गम्यते दृषत् समिदिति ॥

तस्मात्सुट्प्रतिषेधः ॥ ६ ॥

तस्मात्सुट्प्रतिषेधो वक्तव्यः ससकारग्रहणं वा कर्तव्यम् ॥ अथ क्रियमाणेऽपि ससकारग्रहणे कस्मादेवात्र सुड्न भवति । ससकारग्रहणसामर्थ्याद्भाविनः सुट आदेशो विज्ञायते ॥

आत औ णलः ॥ ७ । १ । ३४ ॥

इह पपौ तस्थाविति त्रीणि कार्याणि युगपत्प्राप्नुवन्ति द्विर्वचनमेकादेश औत्वमिति[2] । तद्यदि सर्वत औत्वं लभ्येत कृतं स्यात् । अथापि द्विर्वचनं लभ्येतैवमपि कृतं स्यात् । तत्तु न लभ्यम् । किं कारणम् । अत्र हि परत्वादेकादेशो द्विर्वचनं

---

[1] अजाद्यतष्टाप् ४. १. ४.

[2] लिटि धातोरनभ्यासस्य ; अकः सवर्णे दीर्घः ; आत औ णलः ६. १. ८ ; ६. १. १०१ ; ७. १. ३४.

बाधते । परत्वादौत्वम् । नित्य एकादेश औत्वं बाधेत ॥ कं पुनर्भवानौत्वस्यावकाशं मत्वाह नित्य एकादेश इति । अनवकाशमौत्वमेकादेशं बाधिष्यते । औत्वे कृते द्विर्वचनमेकादेश इति यद्यपि परत्वादेकादेशः स्थानिवद्भावाद् द्विर्वचनं भविष्यति[1] ॥ *

विदेः शतुर्वसुः ॥ ७ । १ । ३६ ॥

विदेर्वसोः कित्त्वम् ॥ १ ॥

विदेर्वसोः कित्त्वं वक्तव्यम् । किं प्रयोजनम् । वसुग्रहणेषु लिडादेशस्यापि[2] ग्रहणं यथा स्यात् । किं च कारणं न स्यात् । अननुबन्धकग्रहणे हि सानुबन्धकस्य ग्रहणं नेत्येवं लिडादेशस्य न प्राप्नोति सानुबन्धको हि स क्रियते ॥ किं पुनः कारणं स सानुबन्धकः क्रियते । अयमॄकारान्तानां लिटि गुणः प्रतिषेधविषय आरभ्यते[3] स पुनः कित्करणद्बाध्यते । आतिस्तीर्वान् निपुपूर्वानिति ॥ स तर्ह्यस्यैवमर्थोऽनुबन्धः कर्तव्यः । न कर्तव्यः । क्रियते न्यास एव । द्विसकारको निर्देशः । विदेः शतुर्वसुस्समासेऽनञ्पूर्वे क्त्वो ल्यप् ॥

समासेऽनञ्पूर्वे क्त्वो ल्यप् ॥ ७ । १ । ३७ ॥

ल्यबादेश उपदेशिवद्वचनम् ॥ १ ॥

ल्यबादेश उपदेशिवद्भावो वक्तव्यः । उपदेशावस्थायां ल्यब्भवतीति वक्तव्यम् । किं प्रयोजनम् ।

अनादिष्टार्थम् ॥ २ ॥

अकृतेष्वादेशेषु ल्यब्यथा स्यात् । के पुनरादेशा उपदेशिवद्वचनं प्रयोजयन्ति । हित्वदत्त्वात्त्वेत्वेत्त्वदीर्घत्वशूडिटः[4] । हित्वम् । हित्वा प्रधाय । हित्वम् ॥ दत्त्वम् । दत्त्वा प्रदाय । दत्त्वम् ॥ आत्त्वम् । खात्वा प्रखन्य । आत्त्वम् ॥ इत्वम् । स्थित्वा प्रस्थाय । इत्वम् ॥ ईत्त्वम् । पीत्वा प्रपाय । ईत्त्वम् ॥ दीर्घत्वम् । शान्त्वा प्रशम्य । दीर्घत्वम् ॥ शत्वम् । पृष्ट्वा आपृच्छ्य । शत्वम् ॥ ऊठ् । द्यूत्वा प्रदीव्य ।

---

* [V. M. om. तुह्योस्तातङाशिष्यन्यतरस्याम् (३५)].

[1] द्विर्वचनेऽचि १. १. ५९.

[2] क्रसुश्च ३. २. १०७.

[3] ऋच्छत्यॄताम् ७. ४. ११; असंयोगाल्लिट् कित् १. २. ५; क्ङिति च १. १. ५.

[4] दधातेर्हिः ७. ४. ४२; दो दद् घोः ७. ४. ४६; जनसनखनां सञ्झलोः ६. ४. ४२; द्यतिस्यतिमास्थामित्ति किति ७. ४. ४०; घुमास्थागापाजहातिसां हलि ६. ४. ६६; अनुनासिकस्य क्विझलोः क्ङिति ६. ४. १५; च्छ्वोः शूडनुनासिके च ६. ४. १९; उदितो वा ७. २. ५६.

ऊठ् ॥ इट् । देवित्वा प्रदीव्य ॥ किं पुनः कारणमादेशास्तावद्भवन्ति न पुनर्ल्यप् । न परत्वाल्ल्यपा भवितव्यम् । सन्ति चैवात्र केचित्पर आदेशा अपि च

बहिरङ्गलक्षणत्वात् ॥ ३ ॥

बहिरङ्गो ल्यप् । अन्तरङ्गा आदेशाः । असिद्धं बहिरङ्गमन्तरङ्गे ॥ स तर्ह्युपदेशिवद्भावो वक्तव्यः । न वक्तव्यः । आचार्यप्रवृत्तिर्ज्ञापयत्यन्तरङ्गानपि विधीन्बहिरङ्गो ल्यब्बाधत इति यदयमदो जग्धिर्ल्यप्ति किति [२. ४. ३६] इति ति कितीत्येव सिद्धे ल्यब्ग्रहणं करोति ॥

स्नात्वाकालकादिषु च प्रतिषेधः ॥ ४ ॥

स्नात्वाकालकादिषु च प्रतिषेधो वक्तव्यः । स्नात्वाकालकः पीत्वास्थिरकः भुक्त्वासुहितक इति ॥

तदन्तनिर्देशात्सिद्धम् ॥ ५ ॥

तदन्तानिर्देशात्सिद्धमेतत् । कथम् । क्त्वान्तस्य ल्यपा भवितव्यं न चैतत् क्त्वान्तम् ॥

समासनिपातनाद्वा ॥ ६ ॥

अथवावश्यमत्र समासार्थं निपातनं कर्तव्यं[1] तेनैव यत्नेन ल्यबपि न भविष्यति ।

अनञो वा परस्य ॥ ७ ॥

अथवानञः परस्य ल्यपा भवितव्यं न चात्रानञं पश्यामः । ननु च धातुरेवानञ् ॥ न धातोः परस्य भवितव्यम् । किं कारणम् । नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः । नञ्युक्तमिवयुक्तं वान्यस्मिंस्तत्सदृशे कार्यं विज्ञास्यते । कुत एतत् । तथा ह्यर्थो गम्यते । तद्यथा । अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशं पुरुषमानयति नासौ लोष्टमानीय कृती भवति । एवमिहाप्यनञिति नञ्प्रतिषेधादन्यस्मादनञो नञ्सदृशात्कार्यं विज्ञास्यते । किं चान्यदनञ् नञ्सदृशम् । पदमित्याह ॥

अथवा प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीत्येवं धातुरपि क्त्वाग्रहणेन ग्राहिष्यते ॥ ननु चेयमपि परिभाषास्ति कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवतीति सापीहोपतिष्ठते । तत्र को दोषः । इह न स्यात् । प्रकृत्य प्रहृत्य । क्व तर्हि स्यात् । परमकृत्वा उत्तमकृत्वौ[2] । न वा अत्रेष्यते ॥ अनिष्टं च प्राप्नोतीष्टं च न सिध्यति ॥ गतिकारकपूर्वस्यैवेष्यते । कुतो नु खल्वेतद् द्वयोः परिभाषयोः सावकाशयोः

---

[1] स्नात्वाकालक, पीत्वास्थिरक, भुक्त्वासुहितक २. १. ७२; गणसूत्र ४५, ४६, ४७.

[2] सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः २. १. ६१.

समवस्थितयोः प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवति कृद्ग्रहणे गतिकारकपूर्वस्येति च, इयमिह परिभाषा भवति प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीतीयं न भवति कृद्ग्रहणे गतिकारकपूर्वस्यापीति । आचार्यप्रवृत्तिर्ज्ञापयतीयमिह परिभाषा भवति प्रत्ययग्रहण इतीयं न भवति कृद्ग्रहण इति यदयमनञिति प्रतिषेधं शास्ति । कथं कृत्वा ज्ञापकम् । अयं हि नञ् न गतिर्न च कारकं तत्र कः प्रसङ्गो यन्नञ्पूर्वस्य स्यात् । पश्यति त्वाचार्य इयमिह परिभाषा भवति प्रत्ययग्रहण इतीयं न भवति कृद्ग्रहण इति ततोऽनञिति प्रतिषेधं शास्ति ॥

किं नञः प्रतिषेधेन न गतिर्न च कारकम् ।
यावता नञि पूर्वे तु ल्यब्भावो न भविष्यति ॥ १ ॥
प्रतिषेधात्तु जानीमस्तत्पूर्वं नेह गृह्यते ।
प्रत्ययग्रहणे यावत्तावद्भवितुमर्हति ॥ २ ॥*

सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ॥ ७ । १ । ३९ ॥

सुपां च सुपो भवन्तीति वक्तव्यम् । युक्ता मातासीद्धुरि दक्षिणायाः[1] । दक्षिणायामिति प्राप्ते ॥ तिङां च तिङो भवन्तीति वक्तव्यम् । चषालं ये अश्वयूपाय तक्षति[2] । तक्षन्तीति प्राप्ते ॥

लुकि किमुदाहरणम् । आर्द्रे चर्मन्[3] । लोहिते चर्मन्[4] । नैतदस्ति । पूर्वसवर्णेनाप्येतत्सिद्धम्[5] ॥ इदं तर्हि । यत्स्थवीयस आवसन्नुत सप्त ऋषयः सप्त सार्कम्[6] । ननु चैतदपि पूर्वसवर्णेनैव सिद्धम् । न सिध्यति । यद्यत्र पूर्वसवर्णः स्यात्त्यदाद्यत्वं प्रसज्येत[7] ॥ इदं चाप्युदाहरणम् । आर्द्रे चर्मन्[3] । लोहिते चर्मन्[4] । ननु चोक्तं पूर्वसवर्णेनाप्येतत् सिद्धमिति । न सिध्यति । यद्यत्र पूर्वसवर्णः स्यादान्तर्यतो दकारः प्रसज्येत । अस्तु । संयोगान्तलोपेन सिद्धम्[8] ॥

इयाडियाजीकाराणामुपसंख्यानम् ॥ १ ॥

इयाडियाजीकाराणामुपसंख्यानं कर्तव्यम् । दार्विया पारज्मन् । इया ॥ डियाच्[9] । सुक्षेत्रिया सुगातुया[10] । डियाच् ॥ ईकार । दृतिं न शुष्कं सरसी शयानम्[11] ॥

---

* [V. M. om. क्त्वाऽपि च्छन्दसि (३८)].

[1] ऋ. सं. १. १६४. ९. [2] ऋ. सं. १. १६५. ६. [3] ५ तै. सं. ७ ५. ९. ३. [4] का. सं. २४. २. [5] स्वादिष्वसर्वनामस्थाने १. ४. १७ ; नलोपः प्रातिपदिकान्तस्य ८. २. ७. [6] आव सनुत, given incorrectly in the second, edition is correctly put here as आवसन्नुत. Cf. for a similar passage यत्स्थवीयस आ वपति स मैत्रश्चरुः स्वयं शृतो भवति । का. सं. १५. ५. [7] त्यदादीनामः ७. २. १०२ ; बहुवचने झल्येत् ७. ३. १०३ ; स्कोः संयोगाद्योरन्ते च ८. २. २९. [8] संयोगान्तस्य लोपः ८. २. २३. [9] टेः ६. ४. १४३. [10] ऋ. सं. १. ९७. २. [11] ऋ. सं ७. १०३. २.

आङ्याजयारां चोपसंख्यानं कर्तव्यम् । आङ्[1] । प्र बा॒ह॒वा॑[2] । अयाच् । स्व॒प्न॒या स॑चसे॒ जन॑म्[3] । अयाच् । अयार्[4] । स न॒: सिन्धु॑मिव ना॒वया॑[5] ॥

अमो मश् ॥ ७ । १ । ४० ॥

किमर्थः शकारः । शित्सर्वस्येति[6] सर्वादेशो यथा स्यात् । अक्रियमाणे हि शकारेऽलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य प्रसज्येत[7] ॥ अत उत्तरं पठति ।

अमो मश् न मकारस्य

मकारस्य मकारवचने प्रयोजनं नास्तीति कृत्वा तत्रान्तरेण शकारं सर्वादेशो भविष्यति ॥

वचनादन्यबाधनम् ।

अस्त्यन्यन्मकारस्य मकारवचने प्रयोजनम् । येऽन्ये मकारादेशाः प्राप्नुवन्ति तद्बाधनार्थम् । तद्यथा । मो राजि समः क्वौ [८. ३. २५] इति मकारस्य मकारवचनसामर्थ्यादनुस्वारादयो बाध्यन्ते ॥ एवं तर्हि द्विमकारको निर्देशः करिष्यते[8] ।

द्विमकार ईडपृक्ते

यदि द्विमकारकोऽपृक्ताश्रय ईड् प्राप्नोति[9] । वधीं वृ॒त्रं म॑रुत इ॒न्द्रि॒येण[10] ॥

यकारादौ न दुष्यति ॥

किं यकारो न श्रूयते । लुप्तनिर्दिष्टो यकारः ॥

अमो मश्च मकारस्य वचनादन्यबाधनम् ।
द्विमकार ईडपृक्ते यकारादौ न दुष्यति ॥ *

आज्जसेरसुक् ॥ ७ । १ । ५० ॥

इह ये पूर्वा॑सो॒ य उप॑रासः[11] आज्जसेरसुगित्यसुकि कृते जसो ग्रहणेन ग्रहणाच्छीभावः प्राप्नोति[12] । एवं तर्हि जसि पूर्वान्तः करिष्यते ॥ यदि पूर्वान्तः क्रियते का रूपसिद्धिः ब्राह्म॑णा॒सः पित॑र॒ः सोम्या॑सः[13] । सवर्णदीर्घत्वेन[14] सिद्धम् । न सिध्यति । अतो गुणे [६. १. ९७] इति पररूपत्वं प्राप्नोति । अकारोच्चारणसामर्थ्यान्न भविष्यति ।

---

* [V. M. om. लोपस्त आत्मनेपदेषु (४१) ; ध्वमो ध्वात् (४२) ; यजध्वैनमिति च (४३) ; तस्य तात् (४४) ; तप्तनप्तनथनाश्च (४५) ; इदन्तो मसि (४६) ; क्त्वो यक् (४७) इष्ट्वीनमिति च (४८) स्नात्व्यादयश्च (४९)].

[1] घेर्ङिति ७. ३. १११. [2] ऋ. सं. २. ३८. २ ; ७. ६२. ५. [3] शौ. ५. ७. ८.
[4] उपोत्तमं रिति ६. १. २१७. [5] ऋ. सं. १. ९७. ८. [6] अनेकाल्शित् सर्वस्य १. १. ५५.
[7] अलोन्त्यस्य १. १. ५२. [8] संयोगान्तस्य लोपः ८. २. २३. [9] अस्तिसिचोऽपृक्ते ७. ३. ९६. [10] ऋ. सं. १. १६५. ८. [11] ऋ. सं. १०. १५. २. [12] जसः शी ७. १. १७. [13] ऋ. सं. ६ ७६. १०. [14] अकः सवर्णे दीर्घः ६. १. १०१.

यदि तर्हि प्राप्नुवन्विधिरुच्चारणसामर्थ्याद्बाध्यते सवर्णदीर्घत्वमपि न प्राप्नोति । नैष दोषः । यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तं नासौ बाध्यते । पररूपं च प्रत्यकारोच्चारणमनर्थकं सवर्णदीर्घत्वस्य पुनर्निमित्तमेव ॥ अथवाऽसुट् करिष्यते[१] । एवमपि ये पूर्वासो य उपरासः[२] इत्यसुटि कृते जसो ग्रहणेन ग्रहणाच्छीभावः प्राप्नोति । नैष दोषः । निर्दिश्यमानस्यादेशा भवन्तीत्येवमस्य न भविष्यति । यस्तर्हि निर्दिश्यते तस्य कस्मान्न भवति । असुटा व्यवहितत्वात् । सिध्यति । सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवास्तु । ननु चोक्तं ये पूर्वासो य उपरासः[२] असुकि कृते जसो ग्रहणेन ग्रहणाच्छीभावः प्राप्नोतीति । नैष दोषः । इदमिह संप्रधार्यम् । शीभावः क्रियतामसुगिति किमत्र कर्तव्यम् । परत्वादसुक् । अथेदानीमसुकि कृते पुनःप्रसङ्गविज्ञानाच्छीभावः कस्मान्न भवति । सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति ॥

अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि ॥ ७ । १ । ५१ ॥

अश्ववृषयोर्मैथुनेच्छायाम् ॥ १ ॥

अश्ववृषयोर्मैथुनेच्छायामिति वक्तव्यम् । अश्वस्यति वडवा । वृषस्यति गौः । मैथुनेच्छायामिति किमर्थम् । अश्वीयति वृषीयति ॥

क्षीरलवणयोर्लालसायाम् ॥ २ ॥

क्षीरलवणयोर्लालसायामिति वक्तव्यम् । क्षीरस्यति माणवकः । लवणस्यत्युष्ट्र इति ॥

अपर आह । सर्वप्रातिपदिकेभ्यो लालसायामिति वक्तव्यं दध्यस्यति मध्वस्यतीत्येवमर्थम् ॥

अपर आह । सुग्वक्तव्यो दधिस्यति मधुस्यतीत्येवमर्थम् ॥

आमि सर्वनाम्नः सुट् ॥ ७ । १ । ५२ ॥

त्रेस्त्रयः ॥ ७ । १ । ५३ ॥

ह्रस्वनद्यापो नुट् ॥ ७ । १ । ५४ ॥

इमे वहव आम्शब्दाः । कास्प्रत्ययादाममन्त्रे लिटि [३. १. ३५] । ङसो-

---

[१] प्रथमयोः पूर्वसवर्णः ६. १. १०२.
[२] ऋ. सं. १०. १५. २.

साम्[1] । किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे [५. ४. ११] । डेराम् नद्याम्नीभ्यः [७. ३. ११६] इति । कस्येदं ग्रहणम् । षष्ठीबहुवचनस्य ग्रहणम् ॥

अथास्य कस्मान्न भवति कास्प्रत्ययादाममन्त्रे लिटीति । अननुबन्धकग्रहणे हि न सानुबन्धकस्येति । स तर्ह्यस्यैवमर्थोऽनुबन्धः कर्तव्य इहास्य ग्रहणं मा भूदिति । ननु चावश्यं मकारस्येत्संज्ञापरित्राणार्थोऽनुबन्धः कर्तव्यः । नार्थ इत्संज्ञापरित्राणार्थेन । इत्कार्याभावादत्रेत्संज्ञा न भविष्यति ॥ इदमस्तीत्कार्यं मिदचोऽन्त्यात्परः [१. १. ४७] इत्यचामन्त्यात्परो यथा स्यात् । प्रत्ययान्तादयं विधीयते तत्र नास्ति विशेषो मिदचोऽन्त्यात्पर इति वा परत्वे प्रत्ययः पर इति[2] वा । यस्तर्हि न प्रत्ययान्तादिजादेश्च गुरुमतोऽनृच्छः [३. १. ३६] इति । अत्राप्यास्कासोराम्वचनं[3] ज्ञापकं नायमचामन्त्यात्परो भवतीति । कथं कृत्वा ज्ञापकम् । न ह्यस्ति विशेष आम्यचामन्त्यात्परे सत्यसति वा । अयमस्ति विशेषः । असत्यामि द्विर्वचनेन भवितव्यं सति न भवितव्यम् । सत्यपि भवितव्यम् । कथम् । आमस्तन्मध्यपतितत्वाद्धातुग्रहणेन ग्रहणात् । तदेतत्कासासोराम्वचनं ज्ञापकमेव नायमचामन्त्यात्परो भवतीति ॥ अथापि कथंचिदित्कार्यं स्यादेवमपि न दोषः । क्रियते न्यास एव । आम अमन्त्र इति । यद्येवमामामन्त्र इति प्राप्नोति । शकन्धुन्यायेन[4] निर्देशः ॥ अथवारत्वस्य ग्रहणं को दोषः । इह कारयांचकार हारयांचकार चिकीर्षांचकार जिहीर्षांचकार ह्रस्वनद्यापो नुडिति नुट् प्रसज्येत । लोपायादेशयोः[5] कृतयोर्न भविष्यति । इदमिह संप्रधार्यम् । लोपायादेशौ क्रियेतां नुडिति किमत्र कर्तव्यम् । परत्वान्नुट् । नित्यौ लोपायादेशौ । कृतेऽपि नुटि प्राप्नुतोऽकृतेऽपि । तत्र नित्यत्वाल्लोपायादेशयोः कृतयोर्विहतनिमित्तत्वान्नुण्न भविष्यति ॥

अथास्य कस्मान्न भवति किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्ष इति । अननुबन्धकग्रहणे हि न सानुबन्धकस्येति । स तर्ह्येवमर्थोऽनुबन्धः कर्तव्यः । ननु चावश्यमुगित्कार्यार्थोऽनुबन्धः कर्तव्यः । नार्थ उगित्कार्यार्थेनानुबन्धेन । लिङ्गविभक्तिप्रकरणे सर्वमुगित्कार्यं न चामो लिङ्गविभक्ती स्तः । अव्ययमेषः ॥ मकारस्य तर्हीत्संज्ञापरित्राणार्थोऽनुबन्धः कर्तव्यः । इत्कार्याभावादत्रेत्संज्ञा न भविष्यति ॥ इदमस्तीत्कार्यं मिदचोऽन्त्यात्पर इत्यचामन्त्यात्परो यथा स्यात् । नैतदस्ति । घान्तादयं विधीयते तत्र नास्ति विशेषो मिदचोऽन्त्यात्पर इति वा परत्वे प्रत्ययः पर

---

[1] स्वौजसमौट्छष्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङसोसाम्ङ्योस्सुप् ४. १. २.

[2] परश्च ३. १. २.

[3] दयायासश्च ३. १. ३७; कास्प्रत्ययादाममन्त्रे लिटि ३. १. ३५.

[4] शकन्ध्वादिषु च ६. १. ९४ वा. ४.

[5] अतो लोपः ६. ४. ४८; अयामन्ताल्वाय्येत्न्विष्णुषु ६. ४. ५५.

इति वा परत्वे ॥ अथापि कथंचिदित्कार्यं स्यादेवमपि न दोषः । क्रियते न्यास एव ॥ अथवास्त्वस्य ग्रहणं को दोषः । इह पचातितराम् जल्पतितराम् ह्रस्वनद्यापो नुडिति नुट् प्रसज्येत । लोपे[1] कृते न भविष्यति । इदमिह संप्रधार्यम् । लोपः क्रियतां नुडिति किमत्र कर्तव्यम् । परत्वान्नुट् । एवं तर्हि ह्रस्वनद्यापो नुडित्यत्र यस्येति लोपोऽनुवर्तिष्यते ॥

अथास्य कस्मान्न भवति ङेराम्नद्याम्नीभ्य इति । किं च स्यात् । कुमार्याम् किशोर्याम् खट्वायाम् मालायाम् तस्याम् यस्यामिति ह्रस्वनद्यापो नुडिति नुट् प्रसज्येत । आड्याट्स्याटोऽत्र बाधका भविष्यन्ति[2] । इदमिह संप्रधार्यम् । आड्याट्स्याटः क्रियन्तां नुडिति किमत्र कर्तव्यम् । परत्वादाड्याट्स्याटः । अथेदानीमाड्याट्स्याट्सु कृतेषु पुनःप्रसङ्गान्नुट् कस्मान्न भवति । सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति ॥ *

श्रीग्रामण्योश्छन्दसि ॥ ७ । १ । ५६ ॥

अयं योगः शक्योऽवक्तुम् । कथं श्रीणामुदारो धरुणो रयीणाम्[3] । अपि । तत्र सूतग्रामणीनाम् । इह तावच्छ्रीणामुदारो धरुणो रयीणाम् विभाषामि नदीसंज्ञौ[4] सा छन्दसि व्यवस्थितविभाषा भविष्यति । अपि तत्र सूतग्रामणीनामिति सूताश्च ग्रामण्यश्च सूतग्रामणि तत्र ह्रस्वनद्यापो नुट् [५४] इत्येव सिद्धम् ॥ **

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम् ॥

---

* [V. M. om. षट्चतुर्भ्यश्च (५५)].

** [V. M. om. गोः पादान्ते (५७)].

[1] यस्येति च ६. ४. १४८.

[2] आण् नद्याः ७. ३. ११२ ; याडापः ७. ३. ११३ ; सर्वनाम्नः स्याड्ढ्रस्वश्च ७. ३. ११४.

[3] ऋ. सं. १०. ४५. ५.

[4] वाऽमि १. ४. ५.

इदितो नुम् धातोः ॥ ७ । १ । ५८ ॥

अथ धातोरिति किमर्थम् । अभैत्सीत् अच्छैत्सीत्[1] ॥

नुम्विधावुपदेशिवद्वचनं प्रत्ययविध्यर्थम् ॥ १ ॥

नुम्विधावुपदेशिवद्भावो वक्तव्यः । उपदेशावस्थायां नुम् भवतीति वक्तव्यम् । किं प्रयोजनम् । प्रत्ययविध्यर्थम् । उपदेशावस्थायां नुमि कृत इष्टः प्रत्ययविधिर्यथा स्यात् । कुण्डा हुण्डेति[2] ॥

इतरथा ह्यनकारे प्रत्ययः ॥ २ ॥

अक्रियमाणे ह्युपदेशिवद्भावेऽनकारे यः प्रत्ययः प्राप्नोति स[3] तावत् स्यात्तस्मिन्नवस्थिते नुम् ॥ तत्र को दोषः ।

तत्रायथेष्टप्रसङ्गः ॥ ३ ॥

तत्रायथेष्टं प्रसज्येत । अनिष्टे प्रत्ययेऽवस्थिते नुम् । अनिष्टस्य प्रत्ययस्य श्रवणं प्रसज्येत ॥

धातुग्रहणसामर्थ्याद्वा तदुपदेशे नुम्विधानम् ॥ ४ ॥

धातुग्रहणसामर्थ्याद्वा तदुपदेशे धातूपदेशे नुम् भविष्यति ॥ ननु चान्यद्धातुग्रहणस्य प्रयोप्रयोजनमुक्तम् । किम् । अभैत्सीत् अच्छैत्सीदिति ॥ नैतदस्ति प्रयोजनम् । प्रयोजनं नाम तद्वक्तव्यं यन्नियोगतः स्यात् । यच्चात्रेकारेण क्रियतेऽकारेणापि तच्छक्यं कर्तुम् ॥

शे मुचादीनाम् ॥ ७ । १ । ५९ ॥

शे तृम्पादीनाम् ॥ १ ॥

शे तृम्पादीनामुपसंख्यानं कर्तव्यम् । तृम्पति तृम्फति ॥ किमर्थमिदम् । न नुमनुषक्ता एवैते पठ्यन्ते ।

लुप्तनकारत्वात् ॥ २ ॥

लुप्यतेऽत्र नकारोऽनिदितां हल उपधायाः क्ङिति [६. ४. २४] इति[4] ॥ यदि

---

[1] च्लेः सिच् ३. १. ४४. [2] अ प्रत्ययात् ३. ३. १०३. [3] स्त्रियां क्तिन् ३. ३. ९४.

[4] सार्वधातुकमपित् १. २. ४.

पुनरिम इदितः पठ्येरन् । नैवं शक्यम् । इह हि लोपो न स्यात् । तृपितः दृपित इति ॥ यदि पुनरिमे मुचादिषु पठ्येरन् । न दोषः स्यात् ॥ अथवा नैवं विज्ञायत इदितो नुम् धातोरिति । कथं तर्हि । इदितो नुम् । ततो धातोरिति ॥ *

नेट्यलिटि रधेः ॥ ७ । १ । ६२ ॥

इमौ द्वौ प्रतिषेधावुच्येते । उभौ शक्यावक्तुम् । कथम् । एवं वक्ष्यामि । इटि लिटि रधेर्नुम् भवतीति । तन्नियमार्थं भविष्यति । लिटयेवेडादौ नान्यस्मिन्निडादाविति ॥ **

आङो यि ॥ ७ । १ । ६५ ॥

इह कस्मान्न भवति । आलभ्यते । अस्तु । अनिदितां हल उपधायाः क्ङिति [६.४.२४] इति लोपो भविष्यति ॥ इह तर्हि आलम्भ्या गौः पोरदुपधात् [३.१.९८] इति यत्यवस्थिते नुम् । तत्र को दोषः । आलम्भ्यां एष स्वरः[1] प्रसज्येत । आलम्भ्या इति[2] चेष्यते । नैष दोषः । उक्तमेतद्धातुग्रहणसामर्थ्यादुपदेशे नुम्विधानमिति[3] ॥ ***

न सुदुर्भ्यां केवलाभ्याम् ॥ ७ । १ । ६८ ॥

अथ केवलग्रहणं किमर्थं न न सुदुर्भ्यामित्येवोच्येत ।

सुदुरोः केवलग्रहणमन्योपसर्गप्रतिषेधार्थम् ॥ १ ॥

सुदुरोः केवलग्रहणं क्रियतेऽन्योपसृष्टान्मा भूदिति । प्रसुलम्भम् । नैषोऽस्ति प्रयोगः । इदं तर्हि । सुप्रलम्भम् । प्रेण व्यवहितत्वान्न भविष्यति । इदं तर्हि । अतिसुलम्भम् । कर्मप्रवचनीयसंज्ञात्र बाधिका भविष्यति सुः पूजायामतिरतिक्रमणे च [१ ४. ९४ ; ९५] इति । यदा तर्हि नातिक्रमणं न पूजा ॥ इदं चाप्युदाहरणम् । सुप्रलम्भम् । ननु चोक्तं प्रेण व्यवहितत्वान्न भविष्यतीति । नैष दोषः । सुदुर्भ्यामिति नैषा पञ्चमी । का तर्हि । तृतीया । सुदुर्भ्यामुपसृष्टस्येति । व्यवहितश्चाप्युपसृष्टो भवति ॥

---

* [V. M. om. मस्जिनशोर्झलि (६०) ; रधिजभोरचि (६१)].

** [V. M. om. रभेरशब्लिटोः (६३) ; लभेश्च (६४)].

*** [V. M. om. उपात् प्रशंसायाम् (६६) ; उपसर्गात् खल्घञोः (६७)].

[1] यतोऽनावः ६. १. २१३ ; गतिकारकोपपदात् कृत् ६. २. १३९.

[2] ऋहलोर्ण्यत् ३. १. १२४ ; तित् स्वरितम् ६. १. १८५ ; गतिकारकोपपदात् कृत् ६. २. १३९.

[3] नुम्विधावुपदेशिवद्वचनं प्रत्ययविध्यर्थम् ७. १. ५८ वा. १.

विभाषा चिण्णमुलोः ॥ ७ । १ । ६९ ॥

चिण्णमुलोरनुपसर्गस्य ॥ १ ॥

चिण्णमुलोरनुपसर्गस्येति वक्तव्यम् । इह मा भूत् । प्रालम्भि । प्रलम्भं प्रलम्भम्[1] ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । इहोपसर्गादित्यपि प्रकृतं नेत्यपि[2] तत्राभिसंबन्धमात्रं कर्तव्यम् । विभाषा चिण्णमुलोरुपसर्गान्नेति ॥

उगिदचां सर्वनामस्थानेऽधातोः ॥ ७ । १ । ७० ॥

अधातोरिति किमर्थम् । उखास्रत् पर्णध्वत् ॥ अधातोरिति शक्यमवक्तुम् । कस्मान्न भवति उखास्रत् पर्णध्वदिति ।

उगित्यञ्चतिग्रहणात्सिद्धमधातोः ॥ १ ॥

उगित्यञ्चतिग्रहणादधातोः सिद्धम् । अञ्चतिग्रहणं नियमार्थं भविष्यति । अञ्चतेरेवोगितो धातोर्नान्यस्योगितो धातोरिति । इदं तर्हि प्रयोजनमधातुभूतपूर्वस्यापि यथा स्यात् । गोमन्तमिच्छति गोमत्यति गोमत्यतेरप्रत्ययो गोमानिति ॥ *

नपुंसकस्य झलचः ॥ ७ । १ । ७२ ॥

झलचो नुम्विधावुगित्प्रतिषेधः ॥ १ ॥

झलचो नुम्विधावुगिल्लक्षणस्य प्रतिषेधो वक्तव्यः । गोमन्ति ब्राह्मणकुलानि । श्रेयांसि भूयांसि ॥ ननु च झल्लक्षण उगिल्लक्षणं बाधिष्यते । कथमन्यस्योच्यमानमन्यस्य बाधकं स्यात् । असति खल्वपि संभवे बाधनं भवत्यस्ति च संभवो यदुभयं स्यात् । किं च स्याद्यद्यत्रोगिल्लक्षणोऽपि स्यात् । द्वयोर्नकारयोः श्रवणं प्रसज्येत । न व्यञ्जनपरस्यैकस्य वानेकस्य वा श्रवणं प्रति विशेषोऽस्ति । ननु च प्रतिज्ञाभेदो भवति । श्रुतिभेदेऽसति किं प्रतिज्ञाभेदः करिष्यति । ननु च श्रुतिकृतोऽपि भेदोऽस्ति । इह तावच्छ्रेयांसि भूयांसीति परस्यानुस्वारे[4] कृते पूर्वस्य श्रवणं प्राप्नोति । तथा

---

* [V. M. om. युजेरसमासे (७१)].

[1] लभेश्च ७. १. ६४.

[2] उपसर्गात् खल्घञोः ७. १. ६७; न सुदुर्भ्यां केवलाभ्याम् ७. १. ६८.

[3] उगिदचां सर्वनामस्थानेऽधातोः ७. १. ७०.

[4] नश्चापदान्तस्य झलि ८. ३. २४.

कुर्वन्ति कृषन्तीति परस्यानुस्वारपरसवर्णयोः[1] कृतयोः पूर्वस्य णत्वं[2] प्राप्नोति । अथैकस्मिन्नपि नुमि णत्वं कस्मान्न भवति । अनुस्वारीभूतो णत्वमतिक्रामति । कृते तर्हि परसवर्णे कस्मान्न भवति । असिद्धे च परसवर्णः ॥

विप्रतिषेधात् सिद्धम् ॥ २ ॥

विप्रतिषेधात् सिद्धमेतत् । झल्लक्षणः क्रियतामुगिल्लक्षण इति झल्लक्षणो भविष्यति विप्रतिषेधेन । झल्लक्षणस्यावकाशः । सर्पींषि धनूंषि । उगिल्लक्षणस्यावकाशः । गोमान् यवमान् । इहोभयं प्राप्नोति । गोमन्ति ब्राह्मणकुलानि । यवमन्ति ब्राह्मणकुलानि । श्रेयांसि भूयांसीति । झल्लक्षणो भविष्यति विप्रतिषेधेन ॥ ननु च पुनःप्रसङ्गविज्ञानादुगिल्लक्षणः प्राप्नोति ।

पुनःप्रसङ्ग इति चेदमादिभिस्तुल्यम् ॥ २ ॥

पुनःप्रसङ्ग इति चेदमादिभिस्तुल्यमेतद्भवति । तद्यथा । युष्मदस्मदोरमादिषु[3] कृतेषु पुनःप्रसङ्गाच्छिशीलुग्नुमो न भवन्ति । एवं झल्लक्षणे कृते पुनःप्रसङ्गादुगिल्लक्षणो न भविष्यति ॥ यदप्युच्यतेऽसति खल्वपि संभवे बाधनं भवत्यस्ति च संभवो यदुभयं स्यादिति सत्यपि संभवे बाधनं भवति । तद्यथा । दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति सत्यपि संभवे दधिदानस्य तक्रदानं निवर्तकं भवति । एवमिहापि सत्यपि संभवे झल्लक्षण उगिल्लक्षणं बाधिष्यते ॥ अथवास्त्वत्रोगिल्लक्षणोऽपि । ननु चोक्तं द्वयोर्नकारयोः श्रवणं प्रसज्येतेति । परिहृतमेतन्न व्यञ्जनपरस्यैकस्य वानेकस्य वा श्रवणं प्रति विशेषोऽस्ति । ननु चोक्तं प्रतिज्ञाभेदो भवतीति । श्रुतिभेदेऽसति प्रतिज्ञाभेदः किं करिष्यति । ननु च श्रुतिकृतोऽपि भेद उक्त इह तावच्छ्रेयांसि भूयांसीति परस्यानुस्वारे कृते पूर्वस्य श्रवणं प्रसज्येत कुर्वान्ति कृषन्तीति परस्यानुस्वारपरसवर्णयोः कृतयोः पूर्वस्य णत्वं प्राप्नोतीति । नैष दोषः । अयोगवाहानामविशेषेणोपदेशश्चोदितः[4] । तत्रेह तावच्छ्रेयांसि भूयांसीति परस्यानुस्वारे कृते तस्य झल्ग्रहणेन ग्रहणात्पूर्वस्यानुस्वारो भविष्यति कुर्वान्ति कृषन्तीति परस्यानुस्वारपरसवर्णयोः कृतयोस्तस्य झल्ग्रहणेन ग्रहणात्पूर्वस्यानुस्वारपरसवर्णौ भविष्यतः ॥

नैव वा पुनरत्रोगिल्लक्षणः प्राप्नोति । किं कारणम् । मिदचोऽन्त्यात्परः [१. १. ४७] इत्युच्यते न च द्वयोर्मितोरचामन्त्यात्परत्वे संभवोऽस्ति । कथं तर्हीमौ

---

[1] नश्चापदान्तस्य झलि ८. ३. २४; अनुस्वारस्य ययि परसवर्णः ८. ४. ५८.

[2] अट्कुप्वाङ्नुम्व्यवायेऽपि ८. ४. २.

[3] अथेदानीं युष्मदस्मदोर्विभक्त्यादेशेषु कृतेषु पुनःप्रसङ्गाच्छिशीलुग्नुम्विधयः कस्मान्न भवन्ति सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेवेति । महाभाष्य ७. १. २६ वा. २.

[4] अयोगवाहानामट्सु णत्वम्; शर्षु जश्भावषत्वे; अविशेषेण संयोगोपधासंज्ञालोन्त्यद्विर्वचनस्थानिवद्भावप्रतिषेधाः । शिवसूत्र ५ वा. ६, ७, ८.

द्वौ मितावचामन्त्यात्परौ स्तः । बह्वनड्वांहि[1] ब्राह्मणकुलानीति । विनिमित्तावेतौ ॥

तत्र बहूर्जि प्रतिषेधः ॥ ४ ॥

तत्र बहूर्जि प्रतिषेधो वक्तव्यः । बहूर्जि ब्राह्मणकुलानीति ॥

अन्त्यात्पूर्वं नुममेके ॥ ५ ॥

अन्त्यात्पूर्वं नुममेक इच्छन्ति । किमविशेषेणाहोस्विद्बहूर्जावेव । किं चातः । यद्यविशेषेण काष्ठतंक्षीति भवितव्यम् । अथ बहूर्जावेव काष्ठतड्क्षीति भवितव्यम् । एवं तर्हि बहूर्जावेव । बहूर्ञ्जि ॥

स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । अच इत्येषा पञ्चमी । अच उत्तरो
यो झल् तदन्तस्य नपुंसकस्य नुमा भवितव्यं यश्चात्राच उत्तरो नासौ झल् नापि तदन्तं
नपुंसकं यदन्तं च नपुंसकं नासावच उत्तरः । इहापि तर्हि न प्राप्नोति । काष्ठत-
ङ्क्षीति । अत्र यो ऽच उत्तरो झल् न तदन्तं नपुंसकं यदन्तं च नपुंसकं नासावच
उत्तरः । नैतदस्ति । झल्जातिः प्रतिनिर्दिश्यते । अच उत्तरा या झल्जातिरिति ।
यदि पञ्चमी कुण्डानि वनानीत्यत्र न प्राप्नोति । एवं तर्हीकोऽचि विभक्तौ [७. १. ७३]
इत्यत्राचः सर्वनामस्थान इत्येतदनुवर्तिष्यते । एवमपि षष्ठ्यभावान्न प्राप्नोति ।
सर्वनामस्थान इत्येषा सप्तम्यच इति पञ्चम्याः षष्ठीं प्रकल्पयिष्यति तस्मिन्निति निर्दिष्टे
पूर्वस्य [१. १. ६६] इति ॥

इकोऽचि विभक्तौ ॥ ७ । १ । ७३ ॥

अज्ग्रहणं किमर्थम्

इकोऽचि व्यञ्जने मा भूत्

इकोऽचीत्युच्यते व्यञ्जनादौ मा भूत् । त्रपुभ्याम् त्रपुभिः ॥

अस्तु लोपः

अस्त्वत्र नुम् । नलोपः प्रातिपदिकान्तस्य [८. २. ७] इति नलोपो भविष्यति ॥

स्वरः कथम् ॥

पञ्चत्रपुभ्याम् पञ्चत्रपुभ्यः । इगन्ते द्विगावित्येष स्वरो[2] न प्राप्नोति ॥

---

[1] चतुरनडुहोरामुदात्तः ७. १. ९८ ; नपुंसकस्य झलचः ७. १. ७२.

[2] इगन्तकालकपालभगालशरावेषु द्विगौ ७. २. २९.

स्वरो वै श्रूयमाणेऽपि

श्रूयमाणेऽपि नुमि स्वरो भवति । पञ्चत्रपुणा पञ्चत्रपुण इति ॥

लुप्ते किं न भविष्यति ॥

लुप्त इदानीं किं न भविष्यति ॥ किं पुनः कारणं श्रूयमाणेऽपि नुमि स्वरो भवति । संघातभक्तोऽसौ नोत्सहतेऽवयवस्येगन्ततां विहन्तुमिति कृत्वा ततः श्रूयमाणेऽपि नुमि स्वरो भवति ॥ इदं तर्हि । अतिराभ्याम् अतिराभिः । नुमि कृते रायो हलि [७. २. ८५] इत्यात्वं न प्राप्नोति । इदमिह संप्रधार्यम् । नुम् क्रियतामात्वमिति किमत्र कर्तव्यम् । परत्वादात्वम् ॥ इह तर्हि प्रियतिसृभ्याम् प्रियतिसृभिः नुमि कृते तिसृभावो[1] न प्राप्नोति । इदमिह संप्रधार्यम् । नुम् क्रियतां तिसृभाव इति किमत्र कर्तव्यम् । परत्वात्तिसृभावः । अथेदानीं तिसृभावे कृते पुनःप्रसङ्गान्नुम् कस्मान्न भवति । सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति ॥ अत उत्तरं पठति ।

इकोऽचि विभक्तावज्ग्रहणं नुम्नुटोर्विप्रतिषेधार्थम् ॥ १ ॥

इकोऽचि विभक्तावज्ग्रहणं क्रियते नुमो नुड्विप्रतिषेधेन यथा स्यात्[2] । त्रपूणाम् जतूनाम् ॥

इतरथा हि नुमो नित्यनिमित्तत्वान्नुडभावः ॥ २ ॥

अक्रियमाणे ह्यज्ग्रहणे नित्यनिमित्तो नुम् । कृतेऽपि नुटि प्राप्नोत्यकृतेऽपि । नित्यनिमित्तत्वान्नुमि कृते नुटोऽभावः स्यात् ॥ एतदपि नास्ति प्रयोजनम् । क्रियमाणेऽपि वा अज्ग्रहणेऽवश्यमत्र नुडर्थो यत्नः कर्तव्यः । पूर्वविप्रतिषेधो वक्तव्यः[3] ॥ इदं तर्हि प्रयोजनं नुटि कृते नुम् मा भूदिति । किं च स्यात् । त्रपूणाम् जतूनाम् । नामि [६. ४. ३] इति दीर्घत्वं न स्यात् । मा भूदेवम् । नोपधायाः [६. ४. ७] इत्येवं भविष्यति । इह तर्हि शुचीनाम् इन्हन्पूषार्यम्णां शौ सौ च [६. ४. १२; १३] इत्यस्मान्नियमान्न प्राप्नोति दीर्घत्वम् । अर्थवद्ग्रहणे नानर्थकस्येत्येवं न भविष्यति । नैषा परिभाषेह शक्या विज्ञातुम् । इह हि दोषः स्यात् । वाग्मीति । एवं तर्हि लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति ॥

उत्तरार्थं च ॥ ३ ॥

उत्तरार्थं तर्ह्यज्ग्रहणं कर्तव्यम् । अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः [७. १. ७५]

---

[1] त्रिचतुरोः स्त्रियां तिसृचतसृ ७. २. ९९. [2] ह्रस्वनद्यापो नुट् ७. १. ५४. [3] नुमचिरतृज्वद्भावेभ्यो नुट् ७. १. ९५–९६ वा. ११.

अजादौ यथा स्यात् । इह मा भूत् । अस्थिभ्याम् अस्थिभिरिति ॥ यद्युत्तरार्थं स्यात्तत्रैवायमज्ग्रहणं कुर्वीत । इह क्रियमाणे यदि किंचित्प्रयोजनमस्ति तदुच्यताम् । इहापि क्रियमाणे प्रयोजनमस्ति । किम् । अजादौ यथा स्यात् । इह मा भूत् । त्रपु जतु ॥ एतदपि नास्ति प्रयोजनम् । विभक्तावित्युच्यते न चात्र विभक्तिं पश्यामः[1] । प्रत्ययलक्षणेन[2] । न लुमताङ्गस्य [१. १. ६३] इति प्रत्ययलक्षणस्य प्रतिषेधः ॥ एवं तर्हि सिद्धे सति यदज्ग्रहणं करोति तज्ज्ञापयत्याचार्यो भवतीह कश्चिदन्योऽपि प्रकारः प्रत्ययलक्षणं नामेति । किमेतस्य ज्ञापने प्रयोजनम् । हे त्रपु । हे त्रपो । अत्र गुणः[3] सिद्धो भवतीति ॥

इकोऽचि व्यञ्जने मा भूदस्तु लोपः स्वरः कथम् ।
स्वरो वै श्रूयमाणेऽपि लुप्ते किं न भविष्यति ॥ १ ॥

रायात्वं तिसृभावश्च व्यवधानान्नुमा अपि ।
नुड्वाच्य उत्तरार्थं तु इह किंचित् त्रपो इति ॥ २ ॥

तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य ॥ ७ । १ । ७४ ॥

किमिह पुंवद्भावेनातिदिश्यते । नुम्प्रतिषेधः । कथं पुनः पुंवदित्यनेन नुम्प्रतिषेधः शक्यो विज्ञातुम् । वतिनिर्देशोऽयं कामचारश्च वतिनिर्देशे वाक्यशेषं समर्थयितुम् । तद्यथा । उशीनरवन्मद्रेषु यवाः । सन्ति न सन्तीति । मातृवदस्याः कलाः । सन्ति न सन्तीति । एवमिहापि पुंवद्भवति पुंवन्न भवतीति वाक्यशेषं समर्थयिष्यामहे । यथा पुंसो न नुम् भवत्येवं तृतीयादिषु भाषितपुंस्कस्यापि न भवतीति ॥ किमुच्यते नुम्प्रतिषेध इति न पुनरन्यदपि पुंसः प्रतिपदं कार्यमुच्यते यत्तृतीयादिषु विभक्तिष्वजादिषु भाषितपुंस्कस्यातिदिश्येत । अनारम्भात्पुंसि । न हि किंचित्पुंसः प्रतिपदं कार्यमुच्यते यत्तृतीयादिष्वजादिषु भाषितपुंस्कस्यातिदिश्येत । नुम् प्रकृतस्तत्र किमन्यच्छक्यं विज्ञातुमन्यदतो नुम्प्रतिषेधात् ॥

पुंवदिति नुम्प्रतिषेधश्चेद्गुणनाभावनुडौत्त्वप्रतिषेधः ॥ १ ॥

पुंवदिति नुम्प्रतिषेधश्चेद्गुणनाभावनुडौत्त्वानां[4] प्रतिषेधो वक्तव्यः । गुण ग्रामण्ये ब्राह्मणकुलाय । गुण । नाभाव । ग्रामण्या ब्राह्मणकुलेन । नाभाव । नुट् । ग्रामण्यां ब्राह्मणकुलानाम् । नुट् । औत्त्वम् । ग्रामण्यां ब्राह्मणकुले । ह्रस्वत्वमप्रतिषिद्धं ह्रस्वाश्रयाश्चैते विधयः प्राप्नुवन्ति ॥

---

[1] स्वमोर्नपुंसकात् ७. १. २३. [2] प्रत्ययलोपे प्रत्ययलक्षणम् १. १. ६२. [3] ह्रस्वस्य गुणः ७. ३. १०८. [4] घेर्ङिति ७. ३. १११ ; आङो नाऽस्त्रियाम् ७. ३. १२० ; ह्रस्वनद्यापो नुट् ७. १. ५४ ; अच्च घेः ७. ३. ११९.

ह्रस्वाभावार्थं च ॥ २ ॥

किं च । नुम्प्रतिषेधार्थं च । कथं पुनरत्राप्रकृतस्यासंशब्दितस्य ह्रस्वत्वस्य प्रतिषेधः शक्यो विज्ञातुम् ।

अर्थातिदेशात्सिद्धम् ॥ ३ ॥

नैवं विज्ञायते भाष्यते पुमाननेन शब्देन सोऽयं भाषितपुंस्कः भाषितपुंस्कस्य शब्दस्य पुंशब्दो भवतीति । कथं तर्हि । भाष्यते पुमानस्मिन्नर्थे सोऽयं भाषितपुंस्कः भाषितपुंस्कस्यार्थस्य पुंवदर्थो भवतीति ॥

तद्धितलुक्प्रतिषेधश्च ॥ ४ ॥

तद्धितलुकश्च प्रतिषेधो वक्तव्यः । पीलुर्वृक्षः । पीलु फलम्[1] । पीलुना पीलुन इति ॥

न वा समानायामाकृतौ भाषितपुंस्कविज्ञानात् ॥ ५ ॥

न वा वक्तव्यम् । किं कारणम् । समानायामाकृतौ भाषितपुंस्कविज्ञानात् । समानायामाकृतौ यद्भाषितपुंस्कमाकृत्यन्तरे चैतद्भाषितपुंस्कम् । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । एतदप्यर्थनिर्देशात्सिद्धम् ॥ *

ई च द्विवचने ॥ ७ । १ । ७७ ॥

किमुदाहरणम् । अ॒क्षी[2] ते॑ इन्द्र॒ पिङ्ग॑ले । नैतदस्ति । पूर्वसवर्णेनाप्येतत्सिद्धम्[3] । इदं तर्हि । अ॒क्षीभ्यां॑ ते॒ ना॑[4]सि॑काभ्याम् । इदं चाप्युदाहरणम् । अ॒क्षी ते॑ इन्द्र॒ पिङ्ग॑ले[2] । ननु चोक्तं पूर्वसवर्णेनाप्येतत्सिद्धमिति । न सिध्यति । नुमो[5] व्यवहितत्वात्पूर्वसवर्णो न प्राप्नोति ॥ छन्दसि नपुंसकस्य पुंवद्भावो वक्तव्यो मधोर्गृभ्णामि मधोस्तृप्ता इवासत इत्येवमर्थम् । पुंवद्भावेन नुमो निवृत्तिर्नुमि निवृत्ते पूर्वसवर्णेनैव सिद्धम् ॥ स्वरार्थस्तर्हीकारो वक्तव्यः[6] । उदात्तस्वरो यथा स्यान्नपुंसकस्वरो[7] मा भूदिति । ननु च पुंवद्भावातिदेशादेव स्वरो भविष्यति । अशक्यः पुंवद्भावातिदेशः स्वरे तन्त्रमाश्रयितुम् । इह हि दोषः स्यात् । मध्वस्मिन्नस्ति मधुर्मास इति[8] ॥ स तर्हि पुंवद्भावो वक्तव्यः । न वक्तव्यः । प्रकृतं[9] पुंवदिति वर्तते ॥

---

* [V. M. om. अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः (७५) ; छन्दस्यपि दृश्यते (७६)].

[1] फले लुक् ४. ३. १६३. [2] शबर (जैसू. २. १. ३२ तच्चोदकेषु मन्त्राख्या)...... प्रचलितं – अक्षी ते इन्द्र पिङ्गले कुलेरिवेति । ... [3] प्रथमयोः पूर्वसवर्णः ६. १. १०२. [4] ऋ. सं. १०. १६३. १. [5] इकोऽचि विभक्तौ ७. १. ७३. [6] अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ७. १. ७५. [7] नब्विषयस्यानिसन्तस्य (फि. सू. २७). [8] लुगकारेकाररेफाश्च ४. ४. १२८ वा. २. [9] तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य ७. १. ७४.

नाभ्यस्ताच्छतुः ॥ ७ । १ । ७८ ॥

कस्यायं प्रतिषेधः । नुम इत्याह । तन्नमो ग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । इदितो नुम् धातोः [७. १. ५८] इति । तद्वा अनेकग्रहणेन व्यवच्छिन्नमशक्यमनुवर्तयितुम् ॥ एवं तर्हि सर्वनामस्थान इति[1] वर्तते सर्वनामस्थाने यत् प्राप्नोति तस्य प्रतिषेधः । तद्वै बहुतरकेण ग्रहणेन व्यवच्छिन्नमशक्यमनुवर्तयितुम् ॥ अथेदानीं व्यवहितमपि शक्यतेऽनुवर्तयितुं नुमेवानुवर्त्य इहार्थमुत्तरार्थं च । इह चैव प्रतिषेधः सिद्धो भवतीह चाच्छीनद्योर्नुम् [८०] इति नुम्ग्रहणं न कर्तव्यं भवति ॥ *

आच्छीनद्योर्नुम् ॥ ७ । १ । ८० ॥

इह कस्मान्न भवति । अदती घ्नती लुनती पुनती । लोपे[2] कृतेऽवर्णाभावात् । किं तर्ह्यस्मिन्योग उदाहरणम् । याती यान्ती । अत्राप्येकादेशे[3] कृते व्यपवर्गाभावान्न प्राप्नोति । अन्तादिवद्भावेन व्यपवर्गः । उभयत आश्रये नान्तादिवत् ॥ नोभयत आश्रयः करिष्यते । नैवं विज्ञायतेऽवर्णान्ताच्शतुर्नुम् भवतीति । कथं तर्हि । अवर्णान्नुम् भवति तच्चेदवर्णं शतुरनन्तरमिति ॥

शप्श्यनोर्नित्यम् ॥ ७ । १ । ८१ ॥

नित्यग्रहणं किमर्थम् । विभाषा मा भूदिति । नैतदस्ति प्रयोजनम् । सिद्धोऽत्र पूर्वेणैव तत्रारम्भसामर्थ्यान्नित्यो विधिर्भविष्यति ॥ तदेतन्नित्यग्रहणं सांन्यासिकं तिष्ठतु तावत् ॥

सावनडुहः ॥ ७ । १ । ८२ ॥

अनडुहः सावाम्प्रतिषेधो नुमोऽनवकाशत्वात् ॥ १ ॥

अनडुहः सावाम्प्रतिषेधः प्राप्नोति । किं कारणम् । नुमोऽनवकाशत्वात् । अनवकाशो नुमामं[5] बाधते ॥

---

* [V. M. om. वा नपुंसकस्य (७९)].

[1] उगिदचां सर्वनामस्थानेऽधातोः ७. १. ७०. [2] अदिप्रभृतिभ्यः शपः २. ४. ७२ ; श्नाभ्यस्तयोरातः ६. ४. ११२. [3] अकः सवर्णे दीर्घः ६. १. १०१. [4] आच्छीनद्योर्नुम् ७. १. ८०. [5] चतुरनडुहोरामुदात्तः ७. १. ९८.

न वावर्णोपधस्य नुम्वचनात् ॥ २ ॥

न वैष दोषः । किं कारणम् । अवर्णोपधस्य नुम्वचनात् । अवर्णोपधस्य नुमं वक्ष्यामि ॥ तदवर्णग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । आच्छीनद्योर्नुम् [७. १. ८०] इति । यदि तदनुवर्तते ऽनडुहि यावन्त्यवर्णानि सर्वेभ्यः परो नुम् प्राप्नोति । नैष दोषः । मिदचोऽन्त्यात्परः [१. १. ४७] इत्यनेन यत्सर्वान्त्यमवर्णं तस्मात्परो भविष्यति ॥

पुनःप्रसङ्गविज्ञानाद्वा सिद्धम्

अथवा पुनःप्रसङ्गान्नुमि कृत आम् भविष्यति ।

यथात्त्वादिषु द्विर्वचनम् ॥ ३ ॥

तद्यथा जग्ले मम्ले ईजतुः ईजुरित्यात्त्वादिषु[1] कृतेषु पुनःप्रसङ्गाद्विर्वचनं भवत्येवमत्रापि नुमि कृत आम् भविष्यति ॥ नैष युक्तः परिहारः । विप्रतिषेधे पुनःप्रसङ्गो विप्रतिषेधश्च द्वयोः सावकाशयोर्भवति । इह पुनरनवकाशो नुम् आमं बाधते ॥ एवं तर्हि वृत्तान्तादेष परिहारः प्रस्थितः । कस्माद् वृत्तान्तात् । इदमयं चोद्यो भवत्यनडुहः सावाम्प्रतिषेधो नुमोऽनवकाशत्वादिति । तस्य परिहारो न वावर्णोपधस्य नुम्वचनादिति । ततोऽयं चोद्यो भवति यत्र तर्ह्यवर्णप्रकरणं नास्ति तत्र त आमा नुमो बाधनं प्राप्नोति बह्वनड्वांहि[2] ब्राह्मणकुलानीति । तत उत्तरकालमिदं पठितं पुनःप्रसङ्गविज्ञानाद्वा सिद्धमिति ॥ *

दिव औत् ॥ ७ । १ । ८४ ॥

दिव औत्त्वे धातुप्रतिषेधः ॥ १ ॥

दिव औत्त्वे धातोः प्रतिषेधो वक्तव्यः । अक्षद्यूरिति ॥ अधात्वधिकारात् सिद्धम् । अधातोरिति वर्तते । क्व प्रकृतम् । उगिदचां सर्वनामस्थानेऽधातोः [७. १. ७०] इति ।

अधात्वधिकारात्सिद्धमिति चेन्नपुंसके दोषः ॥ २ ॥

अधात्वधिकारात्सिद्धमिति चेन्नपुंसके दोषो भवति । काष्ठतङ्क्षि कूटतङ्क्षि । नपुंसकस्य झलचः [७२] अधातोरिति प्रतिषेधः प्राप्नोति ॥

---

* [V. M. om. दृक्स्ववस्स्वतवसां छन्दसि (८३)].

[1] आदेच उपदेशेऽशिति ६. १. ४५ ; वचिस्वपियजादीनां किति ६. १. १५ ; लिटि धातोरनभ्यासस्य ६. १. ८.

[2] नपुंसकस्य झलचः ७. १. ७२ ; चतुरनडुहोरामुदात्तः ७. १. ९८.

उक्तं वा ॥ ३ ॥

किमुक्तम् । अननुबन्धकग्रहणे हि न सानुबन्धकस्येति[1] ॥ अथवा संबन्धमनुवर्तिष्यते ॥ *

इतोऽत् सर्वनामस्थाने ॥ ७ । १ । ८६ ॥

इतोऽद्वचनमनर्थकमाकारप्रकरणात् ॥ १ ॥

इतोऽद्वचनमनर्थकम् । किं कारणम् । आकारप्रकरणात् । आदिति[2] वर्तते ॥

षपूर्वार्थं तु ॥ २ ॥

षपूर्वार्थं तर्ह्यद्वक्तव्यः । ऋभुक्षाणमिन्द्रम्[3] ऋभुक्षणमिन्द्रम्[4] ॥ **

पुंसोऽसुङ् ॥ ७ । १ । ८९ ॥

असुङ्युपदेशिवद्वचनं स्वरसिद्ध्यर्थं बहिरङ्गलक्षणत्वात् ॥ १ ॥

असुङ्युपदेशिवद्भावो वक्तव्यः । उपदेशावस्थायामेवासुङ् भवतीति वक्तव्यम् ।
किं प्रयोजनम् । स्वरसिद्ध्यर्थम् । उपदेशावस्थायामसुङि कृत इष्टः स्वरो यथा
स्यात् । परमपुमानिति । अक्रियमाणे ह्युपदेशिवद्भावे समासान्तोदात्तत्वे[5] ऽसुङा-
न्तर्यतो ऽस्वरकस्यास्वरकः स्यात् । किं पुनः कारणं समासान्तोदात्तत्वं तावद्भ-
वति न पुनरसुङ् । न परत्वादसुङा भवितव्यम् । बहिरङ्गलक्षणत्वात् । बहिरङ्ग-
लक्षणोऽसुङ् । अन्तरङ्गः स्वरः । असिद्धं बहिरङ्गमन्तरङ्गे ॥ स तर्ह्युपदेशिवद्भा-
वो वक्तव्यः । न वक्तव्यः । आद्युदात्तनिपातनं करिष्यते स निपातनस्वरः समा-
सस्वरस्य बाधको भविष्यति ॥ एवमप्युपदेशिवद्भावो वक्तव्यः । स यथैव हि
निपातनस्वरः समासस्वरं बाधत एवं प्रकृतिस्वरमपि बाधेत । पुमान् । तस्मात्सुष्ठू-
च्यते ऽसुङ्युपदेशिवद्वचनं स्वरसिद्ध्यर्थं बहिरङ्गलक्षणत्वादिति ॥

गोतो णित् ॥ ७ । १ । ९० ॥

किमिदं गोतः परस्य सर्वनामस्थानस्य णित्त्वमुच्यत आहोस्वित्सर्वनामस्थाने परतो णित्कार्यमतिदिश्यते । कश्चात्र विशेषः ।

---

* [V. M. om. पथिमथ्यृभुक्षामात् (८५)].

** [V. M. om. थो न्थः (८७) ; भस्य टेर्लोपः (८८)].

[1] अननुवन्धकग्रहणे हि न सानुवन्धकस्य ४. १. १५ वा. २.

[2] पथिमथ्यृभुक्षामात् ७. १. ८५.

[3] वा षपूर्वस्य निगमे ६. ४. ९.

[4] ऋ. सं. १. १११. ४.

[5] समासस्य ६. १. २२३.

गोतः सर्वनामस्थाने णित्कार्यातिदेशः ॥ १ ॥

गोतः सर्वनामस्थाने णित्कार्यमतिदिश्यते ॥

सर्वनामस्थाने णित्त्ववचने ह्यसंप्रत्ययः षष्ठ्यनिर्देशात् ॥ २ ॥

सर्वनामस्थानस्य णिद्वचने ह्यसंप्रत्ययः स्यात् । किं कारणम् । षष्ठ्यभावात् । षष्ठीनिर्दिष्टस्यादेशा उच्यन्ते[1] न चात्र षष्ठीं पश्यामः ॥ एवं तर्हि वतिनिर्देशोऽयम् । गोतो णिद्वद्भवतीति । स तर्हि वतिनिर्देशः कर्तव्यो न ह्यन्तरेण वतिमतिदेशो गम्यते । अन्तरेणापि वतिमतिदेशो गम्यते । तद्यथा । एष ब्रह्मदत्तः । अब्रह्मदत्तं ब्रह्मदत्त इत्याह ते मन्यामहे ब्रह्मदत्तवदयं भवतीति । एवमिहाप्यणितं णिदित्याह णिद्वदिति गम्यते ॥ अथवा पुनरस्तु गोतः परस्य सर्वनामस्थानस्य णित्त्वम् । ननु चोक्तं सर्वनामस्थाने णित्त्ववचने ह्यसंप्रत्ययः षष्ठ्यनिर्देशादिति । नैष दोषः । गोत इत्येषा पञ्चमी सर्वनामस्थान इति सप्तम्याः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्य [१. १. ६७] इति ॥

अथ तपरकरणं किमर्थम् । इह मा भूत् । चित्रगुः शबलगुरिति । नैतदस्ति । ह्रस्वत्वे कृते[2] न भविष्यति । स्थानिवद्भावात् प्राप्नोति ॥ अत उत्तरं पठति ।

तपरकरणमनर्थकं स्थानिवत्प्रतिषेधात् ॥ ३ ॥

तपरकरणमनर्थकम् । किं कारणम् । स्थानिवत्प्रतिषेधात् । प्रतिषिध्यतेऽत्र स्थानिवद्भावो गोः पूर्वणित्त्वात्वस्वरेषु स्थानिवद्भावो न भवतीति[3] । स चावश्यं प्रतिषेध आश्रयितव्यः ।

इतरथा हि संबुद्धिजसोः प्रतिषेधः ॥ ४ ॥

यो हि मन्यते तपरकरणसामर्थ्यादत्र न भविष्यतीति संबुद्धिजसोरतेन प्रतिषेधो वक्तव्यः स्यात् । हे चित्रगो चित्रगव इति[4] ॥ अथेदानीं सत्यपि स्थानिवद्भावप्रतिषेधे गुणे कृते कस्मादेवात्र न भवति । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति । ननु चेदानीमसत्यपि स्थानिवद्भावप्रतिषेध एतया परिभाषया शक्यमुपस्थातुम् । नेत्याह न हीदानीं क्वचिदपि स्थानिवत् स्यात् ॥ *

तृज्वत्क्रोष्टुः ॥ ७ । १ । ९५ ॥

स्त्रियां च ॥ ७ । १ । ९६ ॥

अथात्र विभक्तावि[5]त्यनुवर्तत उताहो न । किं चातः ।

---

* [V. M. om. णलुत्तमो वा (९१); सख्युरसंबुद्धौ (९२); अनङ् सौ (९३); ऋदुशनस्पुरुदंसोनेहसां च (९४)].

[1] षष्ठी स्थानेयोगा १. १. ४९. [2] गोस्त्रियोरुपसर्जनस्य १. २. ४८. [3] गोः पूर्वणित्त्वात्वस्वरेषु १. १. ५६ वा २९. [4] ह्रस्वस्य गुणः, जसि च ७. ३. १०८, १०९. [5] इकोऽचि विभक्तौ ७. १. ७३.

तृज्वत्स्त्रियां विभक्तौ चेत्क्रोष्ट्रीभक्तिर्न सिध्यति ।

तृज्वत्स्त्रियां विभक्तौ चेत्क्रोष्ट्रीभक्तिरिति[1] न सिध्यति ॥ एवं तर्हीकार एव तृज्वद्भावं वक्ष्यामि । तदीकारग्रहणं कर्तव्यम् । न कर्तव्यम् । क्रियते न्यास एव । प्रश्लिष्टनिर्देशोऽयम् । स्त्री ई स्त्री स्त्रियामिति ।

ईकारे तन्निमित्तः सः

ईकारे चेत्तन्न । किं कारणम् । तन्निमित्तः सः । तृज्वद्भावनिमित्तः स ईकारः । नाकृते तृज्वद्भाव ईकारः प्राप्नोति । किं कारणम् । ऋन्नेभ्यो ङीप् [४. १. ५] इत्युच्यत ईकारे च तृज्वद्भावः । तदिदमितरेतराश्रयं भवति । इतरेतराश्रयाणि च न प्रकल्पन्ते ॥ एवं तर्हि गौरादिषु[2] पाठादीकारो भविष्यति ।

गौरादिषु न पठ्यते ॥

न हि किंचित्तुनन्तं गौरादिषु पठ्यते ॥ एवं तर्ह्येतज्ज्ञापयत्याचार्यो भवत्यत्रेकार इति यदयमीकारे तृज्वद्भावं शास्ति ।

तेनैव भावनं चेत्स्यादनिष्टोऽपि प्रसज्यते ।

यद्यपि नास्ति विशेषो ङीपो[3] वा ङीषो वा ङीनपि तु प्राप्नोति[4] । इह च न प्राप्नोति । पञ्चभिः क्रोष्ट्रीभिः क्रीतै रथैः पञ्चक्रोष्टृभी[5] रथैरिति ॥ एवं तर्हि

न चापरं निमित्तं संज्ञा च प्रत्ययलक्षणेन । न चापरं निमित्तमाश्रीयते । अस्मिन्परतः क्रोष्टुस्तृज्वद्भवतीति । किं तर्हि । अङ्गस्य क्रोष्टुस्तृज्वद्भवति । अङ्गसंज्ञा च भवति प्रत्ययलक्षणेन ॥

किं पुनरयं शास्त्रातिदेशः । तृचो यच्छास्त्रं तदतिदिश्यते । आहोस्विद्रूपातिदेशः । तृचो यद्रूपं तदतिदिश्यत इति । कश्चात्र विशेषः ।

तृज्वदिति शास्त्रातिदेशश्चेद्यथा चिणि तद्वत् ॥ १ ॥

तृज्वदिति शास्त्रातिदेशश्चेद्यथा चिणि तद्वत्प्राप्नोति । कथं च चिणि । उक्तमङ्गस्येति तु प्रकरणादाङ्गशास्त्रातिदेशात्सिद्धमिति[6] । आङ्गं यत्कार्यं तदतिदिश्यते । एवमिहाप्यनङ्गुणदीर्घत्वान्यतिदिष्टानि[7] रपरत्वमनतिदिष्टम्[8] ॥ तत्र को दोषः ।

---

[1] सुपो धातुप्रातिपदिकयोः २. ४. ७१ ; न लुमताङ्गस्य १. १. ६३. [2] षिद्गौरादिभ्यश्च ४. १. ४१. [3] उदात्तयणो हल्पूर्वात् ६. १. १७४. [4] ञ्नित्यादिर्नित्यम् ६. १. १९७. [5] तद्धितार्थोत्तरपदसमाहारे च २. १. ५१ ; आर्हादगोपुच्छसंख्यपारिमाणाट्ठक् ५. १. १९ ; अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम् ५. १. २८ ; लुक् तद्धितलुकि १. २. ४९ ; न लुमताङ्गस्य १. १. ६३. [6] अङ्गस्येति तु प्रकरणादाङ्गशास्त्रातिदेशात् सिद्धम् ६ ४. ६२ वा. ४. [7] ऋदुशनस्पुरुदंसोनेहसां च ७. १. ९४ ; ऋतो ङिसर्वनामस्थानयोः ७. ३. ११० ; अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् ६. ४. ११. [8] उरण् रपरः १. १. ५१.

तत्र रपरवचनम् ॥ २ ॥

तत्र रपरत्वं न सिध्यति तद्वक्तव्यम् ॥ नैष दोषः । गुणेऽतिदिष्टे रपरत्वमप्यतिदिष्टं भवति । कथम् । कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्र द्रष्टव्यम् । ऋतो ङिसर्वनामस्थानयोर्गुणो भवति[1] । उपस्थितमिदं भवत्युरण् रपरः [१. १. ५१] इति ॥

एवं तर्ह्ययमन्यो दोषो जायते । आहत्य तृचो यच्छास्त्रं तदतिदिश्येतानाहत्य वेति । किं चातः । यद्याहत्य दीर्घत्वमतिदिष्टमनङ्गुणरपरत्वान्यनतिदिष्टानि[2] । अथानाहत्यानङ्गुणरपरत्वान्यतिदिष्टानि दीर्घत्वमनतिदिष्टम् । अस्त्वाहत्य । ननु चोक्तं दीर्घत्वमतिदिष्टमनङ्गुणरपरत्वान्यनतिदिष्टानीति । नैष दोषः । दीर्घत्वेऽतिदिष्टेऽनङ्गुणरपरत्वान्यप्यतिदिष्टानि भवन्ति । कथम् । उपधाया इति वर्तते[3] न चाकृतेष्वेतेषु दीर्घभाविन्युपधा भवति । कुतो नु खल्वेतदेतेषु विधिषु कृतेषु योपधा तस्या दीर्घत्वं भविष्यति न पुनः क्रोष्टोर्योऽन्तरतमो गुणस्तस्मिन्कृते[4] ऽवादेशे च योपधा तस्या दीर्घत्वं भविष्यति । नैकमुदाहरणं योगारम्भं प्रयोजयतीति । तत्र तृज्वद्वचनसामर्थ्यादेतेषु विधिषु कृतेषु योपधा तस्या दीर्घत्वं भविष्यति ॥ अथवा किं न एतेनाहत्यानाहत्य वेति । आहत्यानाहत्य च तृचो यच्छास्त्रं तदतिदिश्यते ॥

अथवा पुनरस्तु रूपातिदेशः । अथैतस्मिन् रूपातिदेशे सति किं प्रागादेशेभ्यो यद्रूपं तदतिदिश्यत आहोस्वित्कृतेष्वादेशेषु । किं चातः । यदि प्रागादेशेभ्यो यद्रूपं तदतिदिश्यत ऋकार एकोऽतिदिष्टोऽनङ्गुणरपरत्वदीर्घत्वान्यनतिदिष्टानि । अथ कृतेष्वादेशेष्वृकारोऽनतिदिष्टोऽनङ्गुणरपरत्वदीर्घत्वान्यतिदिष्टानि । उभयथा च स्वरोऽनतिदिष्टो न हि स्वरो रूयवान् ॥ अस्तु प्रागादेशेभ्यो यद्रूपं तदतिदिश्यते । ननु चोक्तमृकारोऽतिदिष्टोऽनङ्गुणरपरत्वदीर्घत्वान्यनतिदिष्टानीति । नैष दोषः । ऋकारेऽतिदिष्टे स्वाश्रया अत्रैते विधयो भविष्यन्ति । यदप्युच्यत उभयथा च स्वरोऽनतिदिष्टो न हि स्वरो रूपवानिति सचकारग्रहणसामर्थ्यात्स्वरो भविष्यति[5] ॥

रूपातिदेश इति चेत्सर्वादेशप्रसङ्गः ॥ ३ ॥

रूपातिदेश इति चेत्सर्वादेशः प्राप्नोति । सर्वस्य तुनन्तस्य तृशब्द आदेशः प्राप्नोति[6] ॥

---

[1] ऋतो ङिसर्वनामस्थानयोः ७. ३. ११०.
[2] अप्तृन् ... प्रशास्तॄणाम् ६. ४. ११; ऋदुशनस्पुरुदंसोनेहसां च ७. १. ९४; ऋतो ङिसर्वनामस्थानयोः ७. ३. ११०; उरण् रपरः १. १. ५१.
[3] नोपधायाः ६. ४. ७; इन्हन्पूषार्यम्णां शौ ६. ४. १२.
[4] जसि च ७. ३. १०९.
[5] चितः ६. १. १६३.
[6] अनेकाल्शित् सर्वस्य १. १. ५५.

सिद्धं तु रूपातिदेशात् ॥ ४ ॥

सिद्धमेतत् । कथम् । रूपातिदेशात् । रूपातिदेशोऽयम् ॥ ननु चैवमेव कृत्वा चोद्यते रूपातिदेश इति चेत्सर्वादेशप्रसङ्ग इति ।

सिद्धं तु प्रत्ययग्रहणे यस्मात्स तदादितदन्तविज्ञानात् ॥ ५ ॥

सिद्धमेतत् । कथम् । प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य च ग्रहणं भवतीत्येवं तुनन्तस्य तृजन्त आदेशो भविष्यति ॥ एवमपि किंचिदेव तृजन्तं प्राप्नोति । इदमपि प्राप्नोति पक्तेति ।

आन्तरतम्याच्च सिद्धम् ॥ ६ ॥

क्रोष्टोर्यदन्तरतमं तद्भविष्यति । किं पुनस्तत् । क्रुशेर्यस्तृज्विहितस्तदन्तम् ॥

तृज्वद्वचनमनर्थकं तृज्विषये तृचो मृगवाचित्वात् ॥ ७ ॥

तृज्विषय एतत्तृजन्तं मृगवाचि ॥ तुनो निवृत्त्यर्थं तर्हीदं वक्तव्यम् । तुनः सर्वनामस्थाने निवृत्तिर्यथा स्यात् ।

तुनो निवृत्त्यर्थमिति चेत्सिद्धं यथान्यत्रापि ॥ ८ ॥

तुनो निवृत्त्यर्थमिति चेत्तदन्तरेण वचनं सिद्धं यथान्यत्राप्यविशेषविहिताः शब्दा नियतविषया दृश्यन्ते । क्वान्यत्र । तद्यथा । घरतिरस्मा अविशेषेणोपदिष्टः स घृतम् घृणा घर्म इत्येवंविषयः । रशिरस्मा अविशेषेणोपदिष्टः स राशिः रश्मिः रशनेत्येवंविषयः । लुशिरस्मा अविशेषेणोपदिष्टः स लोष्ट इत्येवंविषयः ॥ इदं तर्हि प्रयोजनं विभाषा वक्ष्यामीति । विभाषा तृतीयादिष्वचि [७. १. ९७] इति ।

वावचनानर्थक्यं च स्वभावसिद्धत्वात् ॥ ९ ॥

वावचनं चानर्थकम् । किं कारणम् । स्वभावसिद्धत्वात् । स्वभावत एव तृतीयादिष्वजादिषु विभक्तिषु तृजन्तं च तुनन्तं च मृगवाचीति ॥

गुणवृद्ध्यौत्त्वतृज्वद्भावेभ्यो नुम् पूर्वविप्रतिषिद्धम् ॥ १० ॥

गुणवृद्ध्यौत्त्वतृज्वद्भावेभ्यो नुम् भवति पूर्वविप्रतिषेधेन[1] ॥ तत्र गुणस्यावकाशः । अग्नये वायवे । नुमोऽवकाशः । त्रपुणी जतुनी । इहोभयं प्राप्नोति । त्रपुणे जतुने ॥ अतिवृद्धेरवकाशः । सखायौ सखायः । नुमः स एव । इहोभयं प्राप्नोति । अति-

---

[1] घेर्ङिति ७. ३. १११ ; सख्युरसंबुद्धौ ७. १. ९२ (अचो ञ्णिति ७. २. ११५); [2] अच्च घेः ७. ३. ११९ ; विभाषा तृतीयादिष्वचि ७. १. ९७ — इकोचि विभक्तौ ७. १. ७३.

सखीनि ब्राह्मणकुलानीति ॥ औत्त्वस्यावकाशः । अग्नौ वायौ । नुमः स एव । इहोभयं प्राप्नोति । त्रपुणि जतुनीति ॥ तृज्वद्भावस्यावकाशः । क्रोष्टुना । नुमः स एव । इहोभयं प्राप्नोति । कृशक्रोष्टुनेऽरण्याय । हितक्रोष्टुने वृषलकुलाय । नुम् भवति पूर्वविप्रतिषेधेन ॥ स तर्हि पूर्वविप्रतिषेधो वक्तव्यः । न वक्तव्यः । इष्टवाची परशब्दः[1] । विप्रतिषेधे परं यदिष्टं तद्भवतीति ॥

नुमचिरतृज्वद्भावेभ्यो नुट् ॥ ११ ॥

नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन वक्तव्यः[2] ॥ नुमोऽवकाशः । त्रपूणि जतूनि । नुटोऽवकाशः । अग्नीनाम् वायूनाम् । इहोभयं प्राप्नोति । त्रपूणाम् जतूनाम् ॥ अचि रादेशस्यावकाशः । तिस्रस्तिष्ठन्ति चतस्रस्तिष्ठन्ति । नुटः स एव । इहोभयं प्राप्नोति । तिसृणाम् चतसृणाम् ॥ तृज्वद्भावस्यावकाशः । क्रोष्टा क्रोष्टुना । नुटः स एव । इहोभयं प्राप्नोति । क्रोष्टूनाम् । नुड्भवति पूर्वविप्रतिषेधेन ॥ स तर्हि पूर्वविप्रतिषेधो वक्तव्यः ।

न वा नुड्विषये रप्रतिषेधात् ॥ १२ ॥

न वैतद्विप्रतिषेधेनापि सिध्यति तिसृणाम् चतसृणामिति । कथं तर्हि सिध्यति । नुड्विषये रप्रतिषेधात् । नुड्विषये रप्रतिषेधो वक्तव्यः ।

इतरथा हि सर्वापवादः ॥ १३ ॥

इतरथा हि सर्वापवादो रादेशः । स यथैव गुणपूर्वसवर्णौ[3] बाधत एवं नुटमपि बाधेत ॥

तस्मान्नुड्विषये रप्रतिषेधः ॥ १४ ॥

तस्मान्नुड्विषये रादेशस्य प्रतिषेधो वक्तव्यः ॥ न वक्तव्यः । आचार्यप्रवृत्तिर्ज्ञापयति न रादेशो नुटं बाधत इति यदयं न तिसृचतसृ [६. ४. ४] इति प्रतिषेधं शास्ति नामि दीर्घत्वस्य ॥*

चतुरनडुहोरामुदात्तः ॥ ७ । १ । ९८ ॥

आमनडुहः स्त्रियां वा ॥ १ ॥

आमनडुहः स्त्रियां वेति वक्तव्यम् । अनडुही अनड्वाही ॥ **

---

* [V. M. om. विभाषा तृतीयादिष्वचि (९७)].

** [V. M. om. अम् संबुद्धौ (९९)].

[1] विप्रतिषेधे परं कार्यम् १. ४. २.

[2] नपुंसकस्य झलचः ७. १. ७२ ; अचि र ऋतः ७. २. १०० ; विभाषा तृतीयादिष्वचि ७. १. ९७ — ह्रस्वनद्यापो नुट् ७. १. ५४.

[3] ऋतो ङिसर्वनामस्थानयोः ७. ३. ११० ; प्रथमयोः पूर्वसवर्णः ६. १. १०२.

ॠत इद्धातोः ॥ ७ । १ । १०० ॥

उपधायाश्च ॥ ७ । १ । १०१ ॥

उदोष्ठ्यपूर्वस्य ॥ ७ । १ । १०२ ॥

इत्त्वोत्त्वाभ्यां गुणवृद्धी भवतो विप्रतिषेधेन । इत्त्वोत्त्वयोरवकाशः । आस्तीर्णम् निपूर्ताः पिण्डाः । गुणवृद्ध्योरवकाशः[1] । चयनम् चायकः । लवनम् लावकः । इहोभयं प्राप्नोति । आस्तरणम् आस्तारकः । निपरणम् निपारकः । गुणवृद्धी भवतो विप्रतिषेधेन ॥ अयुक्तोऽयं विप्रतिषेधो योऽयं गुणस्येत्त्वोत्त्वयोश्च । कथम् । नित्यो गुणः ॥*

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम् ॥ पादश्च समाप्तः ॥

---

* [V. M. om. बहुलं छन्दसि (१०३)].

[1] सार्वधातुकार्धधातुकयोः ७. ३. ८४; अचो ञ्णिति ७. २. ११५.

सिचि वृद्धिः परस्मैपदेषु ॥ ७ । २ । १ ॥

सिचि वृद्धावोकारप्रतिषेधः ॥ १ ॥

सिचि वृद्धावोकारस्य प्रतिषेधो वक्तव्यः[1] । उदवोढाम् उदवोढम् उदवोढेति ॥ स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । ओकाराद्वृद्धिर्विप्रतिषेधेन । ओत्त्वं क्रियतां वृद्धिरिति वृद्धिर्भविष्यति विप्रतिषेधेन ॥

ओकाराद्वृद्धिर्विप्रतिषेधेनेति चेदोत्त्वाभावः ॥ २ ॥

ओकाराद्वृद्धिर्विप्रतिषेधेनेति चेदोत्त्वस्याभावः । उदवोढाम् उदवोढम् उदवोढेति ॥ नैष दोषः । उक्तं तत्र वर्णग्रहणस्य प्रयोजनं वृद्धावपि कृतायामोत्त्वं यथा स्यात्[2] ॥

पुनःप्रसङ्गविज्ञानाद्वा सिद्धम्

अथवा पुनःप्रसङ्गादत्र वृद्धौ कृतायामोत्त्वं भविष्यति ।

यथा प्रसारणादिषु द्विर्वचनम् ॥ ३ ॥

तद्यथा । जग्ले मम्ले ईजतुः ईजुरिति प्रसारणादिषु पुनःप्रसङ्गविज्ञानाद् द्विर्वचनं भवति[3] ॥ इहापि तर्हि पुनःप्रसङ्गविज्ञानादोत्त्वं स्यात् सौढामित्रिरिति ।

सौढामित्रौ बहिरङ्गलक्षणत्वासिद्धम् ॥ ४ ॥

बहिरङ्गलक्षणा वृद्धिः[4] । अन्तरङ्गमोत्त्वम् । असिद्धं बहिरङ्गमन्तरङ्गे ॥

अतो र्लान्तस्य ॥ ७ । २ । २ ॥

अन्तग्रहणं किमर्थं नातो र्ल इत्येवोच्येत । केनेदानीं तदन्तस्य भविष्यति । तदन्तविधिना[5] ॥ इदं तर्हि प्रयोजनम् । अयमन्तशब्दोऽस्त्येवावयववाची । तद्यथा । वस्त्रान्तः वसनान्तः । अस्ति सामीप्ये वर्तते । तद्यथा । उदकान्तं गतः ।

---

[1] वदव्रजहलन्तस्याचः ७. २. ३; सहिवहोरोदवर्णस्य ६. ३. ११२. [2] वृद्धावपि कृतायामोत्त्वं यथा स्यात् ६. ३. ११२ महाभाष्य [पृ. १७५ प. १६]. [3] वचिस्वपियजादीनां किति ६. १. १५; आदेच उपदेशेऽशिति ६. १. ४५ — लिटि धातोरनभ्यासस्य ६. १. ८. [4] अत इञ् ४. १. ९५; तद्धितेष्वचामादेः ७. २. ११७. [5] येन विधिस्तदन्तस्य १. १. ७२.

उदकसमीपं गत इति गम्यते। तद्यः सामीप्ये वर्तते तस्येदं ग्रहणं यथा विज्ञायेत। अङ्गान्तौ यौ रेफलकारौ तयोः समीपे योऽकारस्तस्य यथा स्यात्। इह मा भूत्। अश्वल्लीत् अवभ्रीत्॥

वदव्रजहलन्तस्याचः॥ ७। २। ३॥

हल्ग्रहणं किमर्थम्। समुच्चयो यथा विज्ञायेत। वदिव्रज्योश्च हलन्तस्य चाच इति। नैतदस्ति प्रयोजनम्। अज्ग्रहणादेवात्र समुच्चयो भविष्यति। वदिव्रज्योश्चाचश्चेति। अस्त्यन्यदज्ग्रहणे प्रयोजनं वदिव्रजिविशेषणं यथा विज्ञायेत। वदिव्रज्योरच इति। यद्येतावत्प्रयोजनं स्याद्वदिव्रज्योरत इत्येवं ब्रूयात्। अथवैतदपि न ब्रूयात्। अत इति[1] वर्तते॥ इदं तर्हि प्रयोजनं हलन्तस्य यथा स्यादजन्तस्य मा भूत्। कस्य पुनरजन्तस्य प्राप्नोति। अकारस्य। अचिकीर्षीत् अजिहीर्षीत्। लोपोऽत्र[2] बाधको भविष्यति। आकारस्य तर्हि प्राप्नोति। अयासीत् अवासीत्। नास्त्यत्र विशेषः सत्यां वा वृद्धावसत्यां वा। संध्यक्षरस्य तर्हि प्राप्नोति। न वै संध्यक्षरमन्त्यमस्ति। ननु चेदमास्ति ढलोपे कृत उदवोढाम् उदवोढम् उदवोढेति[3]। असिद्धो ढलोपस्तस्यासिद्धत्वान्नैतदन्त्यं भवति॥ अत उत्तरं पठति।

हल्ग्रहणमिटि प्रतिषेधार्थम्॥ १॥

हल्ग्रहणं क्रियत इटि प्रतिषेधार्थम्। नेटि [७. २. ४] इति प्रतिषेधं वक्ष्यति स हलन्तस्य यथा स्यादजन्तस्य मा भूत्। अलावीत् अपावीत्[4]॥

न वानन्तरस्य प्रतिषेधात्॥ २॥

न वैतत्प्रयोजनमस्ति। किं कारणम्। अनन्तरस्य प्रतिषेधात्। अनन्तरं यद् वृद्धिविधानं तत्प्रतिषिध्यते। कुत एतत्। अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति॥

तच्चानन्त्यार्थम्॥ ३॥

तच्चानन्तरं वृद्धिविधानमनन्त्यार्थं विज्ञायते॥ कथं पुनरनन्तरं वृद्धिविधानमनन्त्यार्थं शक्यं विज्ञातुम्।

---

[1] अतो ल्रान्तस्य ७. २. २. [2] अतो लोपः ६. ४. ४८. [3] ढो ढे लोपः ८. ३. १३; सहिवहोरोदवर्णस्य ६. ३. ११२. [4] सिचि वृद्धिः परस्मैपदेषु ७. २. १.

अन्त्यस्य वचनानर्थक्यात् ॥ ४ ॥

अन्त्यस्य वृद्धिविधाने प्रयोजनं नास्तीति कृत्वानन्तरं वृद्धिविधानमनन्त्यार्थं विज्ञायते ॥

अतो विभाषार्थं तर्हीदं वक्तव्यम् । अतो हलादेर्लघोः [७. २. ७] इति विभाषा वृद्धिं वक्ष्यति सा हलन्तस्य यथा स्यादजन्तस्य मा भूत् । आचिकीर्षीत् अजिहीर्षीत् ।

अतो विभाषार्थमिति चेत्सिद्धं वृद्धेर्लोपबलीयस्त्वात् ॥ ५ ॥

अतो विभाषार्थमिति चेत्तदन्तरेणापि हल्ग्रहणं सिद्धम् । कथम् । वृद्धेर्लोपबलीयस्त्वात् । वृद्धेर्लोपो[1] बलीयान् भवतीति । इदमिह संप्रधार्यम् । वृद्धिः क्रियतां लोप इति किमत्र कर्तव्यम् । परत्वाद् वृद्धिः । नित्यो लोपः । कृतायामपि वृद्धौ प्राप्नोत्यकृतायामपि[2] । अनित्यो लोपो न हि कृतायां वृद्धौ प्राप्नोति । परत्वात् सगिड्भ्यां भवितव्यम्[3] । नात्र सगिटौ प्राप्नुतः । किं कारणम् ।

एकाचस्तौ वलीति वा ।

एकाचः सगिटावुच्येते[4] अथवा वलीति तत्रानुवर्तते[5] । किं पुनः कारणमेकाचस्तौ वलीति वा । दरिद्रातेर्मा भूदिति । दरिद्रातेर्न सगिड्भ्यां भवितव्यम् । उक्तमेतद्दरिद्रातेरार्धधातुके लोपः सिद्धश्च प्रत्ययविधाविति[6] । यश्चेदानीं प्रत्ययविधौ सिद्धः सिद्धोऽसौ सगिड्विधौ । एवमर्थमेव तर्ह्येकाज्ग्रहणमनुवर्त्यमत्र सगिटौ मा भूतामिति । स एष नित्यो लोपो वृद्धिं बाधिष्यते ॥ कं पुनर्भवान् वृद्धेरवकाशं मत्वाह नित्यो लोप इति । अनवकाशा वृद्धिर्लोपं बाधिष्यते । सावकाशा वृद्धिः[7] । कोऽवकाशः । अनन्त्यः । अकणीत् अकाणीत् । कथं पुनः सत्यन्त्येऽनन्त्यस्य वृद्धिः स्यात् । भवेद्योऽताङ्गं विशेषयेत्तस्यानन्त्यस्य न स्यात् । वयं तु खल्वङ्गेनाकारं विशेषयिष्यामः । तत्रानन्त्यो वृद्धेरवकाशोऽन्त्यस्य लोपो बाधको भविष्यति ॥ एवं वृद्धेर्लोपबलीयस्त्वात् । अथवारभ्यते पूर्वविप्रतिषेधो ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घत्वेभ्यः पूर्वविप्रतिषिद्धम्[8] ॥ सा तर्ह्येषानन्त्यार्था वृद्धिर्हलन्तस्य यथा स्यादजन्तस्य मा भूत् । अपिपठिषीत् । एतदपि नास्ति प्रयोजनम् । कथम् । हलादेरिति नैषा बहुव्रीहेः षष्ठी । हल् आदिर्यस्य सोऽयं हलादिः हलादेरिति । का तर्हि । कर्मधारयात्पञ्चमी । हल् आदिर्हलादिः हलादेः परस्येति । यदि कर्मधारयात् पञ्चमी अचकासीत् अत्र प्राप्नोति । सिचानन्तर्यं

---

[1] अतो लोपः ६. ४. ४८. [2] आतो लोप इटि च ६. ४. ६४; अतो लोपः ६. ४. ४८. [3] यमरमनमातां सक् च ७. २. ७३. [4] एकाच उपदेशेनुदात्तात् ७. २. १०. [5]. आर्धधातुकस्येड् वलादेः ७. २. ३५; यमरमनमातां सक् च; ७. २. ७३. [6] इड्दरिद्रस्य ६. ४. ११४; सिद्धश्च प्रत्ययविधौ ६. ४. ११४ वा. २. [7] ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घत्वेभ्यः पूर्वविप्रतिषिद्धम्. ६. ४. ४८ वा. १.

विशेषयिष्यामः । हलादेः परस्य सिच्यनन्तरस्येति । यदि सिचानन्तर्यं विशेष्यते अकणीत् अकाणीत् अत्र न प्राप्नोति । वचनाद्भविष्यति । इहापि तर्हि वचनात्प्राप्नोति । अचकासीत् । येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात् । केन च नाव्यवधानम् । वर्णेनैकेन । संघातेन पुनर्व्यवधानं भवति न च भवति । यदि सिचानन्तर्यं विशेष्यतेऽस्तु बहुव्रीहेः षष्ठी । कस्मान्न भवति । अपिपठिषीत् । व्यवहितत्वात् ॥

एवं तर्ह्यतिदूरमेवेदं हल्ग्रहणमनुसृतम् । हल्ग्रहणमनन्त्यार्थम् । अज्ग्रहणमनिगर्थम् ॥ *

ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ॥ ७ । २ । ५ ॥

किमर्थं जागर्तेर्वृद्धिप्रतिषेध उच्यते । सिचि वृद्धिर्मा भूदिति[1] । नैतदस्ति प्रयोजनम् । जागर्तेर्गुण उच्यते[2] वृद्धिविषये प्रतिषेधविषये च स बाधको भविष्यति । गुणे तर्हि कृते रपरत्वे च हलन्तलक्षणा वृद्धिः[3] प्राप्नोति । नेटि [७. २. ४] इति तस्याः प्रतिषेधो भविष्यति । इयं तर्हि प्रतिषेधोत्तरकाला वृद्धिरारभ्यतेऽतो ल्रान्तस्य [२] इति ॥

अपर आह । कक्ष्यया कक्ष्या निमातव्या । सिचि वृद्धिश्च प्राप्नोति गुणश्च[4] । गुणो भवति । गुणे कृते रपरत्वे च हलन्तलक्षणा वृद्धिः[3] प्राप्नोति नेटि [४] इति च तस्याः प्रतिषेधो भवति । प्रतिषेधोत्तरकालमतो हलादेर्लघोः [७] इति विभाषा वृद्धिः प्राप्नोति न च किंचित् । अतो ल्रान्तस्य [२] इति च वृद्धिः प्राप्नोति न च किंचित् ॥

नेड्वशि कृति ॥ ७ । २ । ८ ॥

किमर्थं पुरस्तात्प्रतिषेध उच्यते न विध्युत्तरकालः प्रतिषेधः क्रियेत । तद्यथा । अन्यत्रापि विध्युत्तरकालाः प्रतिषेधा भवन्ति । क्वान्यत्र । कर्तरि कर्मव्यतिहारे न गतिहिंसार्थेभ्यः [१. ३. १४; १५] इति । देवताद्वन्द्वे च नेन्द्रस्य परस्य [७. ३. २१ ; २२] । तत्रायमप्यर्थो द्विरिड्ग्रहणं न कर्तव्यं भवति प्रकृतमनुवर्तते[5] ॥ नैवं शक्यम् । इडर्थं सार्वधातुकग्रहणं लिङः सलोपे संनिहितं[6] तद्विच्छिद्येत ॥

---

* [V. M. om. नेटि (४)].

** [V. M. om. ऊर्णोतेर्विभाषा (६); अतो हलादेर्लघोः (७)].

[1] सिचि वृद्धिः परस्मैपदेषु ७. २. १.

[2] जाग्रोऽविचिण्णल्ङित्सु ७. ३. ८५.

[3] वदव्रजहलन्तस्याचः ७. २. ३.

[4] सिचि वृद्धिः परस्मैपदेषु ७. २. १ ; जाग्रोऽविचिण्णल्ङित्सु ७. ३. ८५.

[5] आर्धधातुकस्येड् वलादेः ७. २. ३५.

[6] रुदादिभ्यः सार्वधातुके ७. २. ७६ ; लिङः सलोपोनन्त्यस्य ७. २. ७९.

यदि पुनर्न वृद्भ्यश्चतुर्भ्यः [७. २. ५९] इत्यत्रैवोच्येत । किं कृतं भवति । विध्युत्तरकालश्चैव प्रतिषेधः कृतो भवति द्विश्चेड्ग्रहणं न कर्तव्यमिडर्थं च सार्वधातुकग्रहणं लिङः सलोपे संनिहितं भवति । तत्रायमप्यर्थो द्विः प्रतिषेधो न कर्तव्यो भवति ॥ नैवं शक्यम् । इह हि तुष्टोथ दुद्रोथेत्यृतो भारद्वाजस्य [७. २. ६३] इत्येतस्मान्नियमादिट् प्रसज्येत । कृसृभृवृस्तुद्रुश्रुस्रुवो लिटि [१३] इत्येष योगः प्रतिषेधार्थो भविष्यति । यद्येष योगः प्रतिषेधार्थो य एतस्माद्योगादिट् परिप्राप्यते नियमात् स न सिध्यति । पेचिव पेचिम । शेकिव शेकिम । एवं तर्हि कृसृभृ इत्येतेषां ग्रहणं नियमार्थं भविष्यति स्तुद्रुश्रुस्रुवां प्रतिषेधार्थं वृङ्वृञोर्ज्ञापकार्थम् । एवमपि सामान्यविहितस्यैवेटः[2] प्रतिषेधो विज्ञायेत विशेषविहितश्चायं थलीति ॥

पुरस्तात्पुनः प्रतिषेधे सत्यनारभ्यापवादोऽयं भवति तेन यावानिण् नाम तस्य सर्वस्यैव प्रतिषेधः सिद्धो भवति । यदि खल्वप्येषोऽभिप्रायस्तन्न क्रियत इति पुरस्तादपि प्रतिषेधे सति तन्न करिष्यते । कथम् । इदमस्ति नेड्वशि कृतीति । ततो वक्ष्यामि[3] । आर्धधातुकस्य वलादेरिति । इडित्यनुवर्तते नेति निवृत्तम् ॥

अथ कृद्ग्रहणं किमर्थम् । इह मा भूत् । बिभिदिव बिभिदिमेति । नैतदस्ति प्रयोजनम् । कृसृभृवृस्तुद्रुश्रुस्रुवो लिटि [१३] इत्येतस्मान्नियमादत्रेड्भविष्यति ॥ नात्र तेन परिप्रापणं प्राप्नोति । किं कारणम् । प्रकृतिलक्षणस्य[4] प्रतिषेधस्य स प्रत्यारम्भः प्रत्ययलक्षणश्चायं प्रतिषेधः ॥ उभयोः स प्रत्यारम्भः । कथं ज्ञायते । वृङ्वृञोर्ग्रहणात् । कथं कृत्वा ज्ञापकम् । इमौ वृङ्वृञावुदात्तौ तयोः प्रकृतिलक्षणः प्रतिषेधो न प्राप्नोति । पश्यति त्वाचार्य उभयोः स प्रत्थारम्भ इति ततो वृङ्वृञोर्ग्रहणं करोति । न खल्वपि कश्चिदुभयवान्प्रतिषेधः प्रकृतिलक्षणः प्रत्ययलक्षणश्च । ततः किम् । तुल्यजातीयेऽसति यथैव प्रकृतिलक्षणस्य नियामको भवत्येवं प्रत्ययलक्षणस्यापि नियामको भविष्यति ॥ इदं तर्हि प्रयोजनम् । इह मा भूत् । रुदिवः रुदिमः[5] ॥ एतदपि नास्ति प्रयोजनम् । उपरिष्टाद्योगविभागः करिष्यते[3] । आर्धधातुकस्य । यदेतदनुक्रान्तमेतदार्धधातुकस्य द्रष्टव्यम् । तत इड्वलादेरिति ॥ तत्र त्वेतावद् द्रष्टव्यं यदि किंचित्तत्रान्यदप्यार्धधातुकग्रहणस्य प्रयोजनमस्ति । अथ न किंचिदिह वा कृद्ग्रहणं क्रियेत तत्र वार्धधातुकग्रहणं को न्वत्र विशेषः ॥

---

[1] कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ७. २. १३. [2] ऋतो भारद्वाजस्य ७. २. ६३. [3] आर्धधातुकस्येड् वलादेः ७. २. ३५. [4] एकाच उपदेशेऽनुदात्तात् ७. २. १०. [5] रुदादिभ्यः सार्वधातुके ७. २. ७६.

नेड्वरमनादौ कृति ॥ १ ॥

वरमनादौ कृतीट्प्रतिषेधं प्रयोजयति । ईशिता ईशितुम् ईश्वरः । व । र । दीपिता दीपितुम् दीप्रः । र । म । भसिता भसितुम् भस्म । म । न । यतिता यतितुम् यत्नः ॥ अथान्ये ये वशादयस्तत्र कथम् । उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥

तितुत्रतथसिसुसरकसेषु च ॥ ७ । २ । ९ ॥

तितुत्रेष्वग्रहादीनाम् ॥ १ ॥

तितुत्रेष्वग्रहादीनामिति वक्तव्यम् । इह मा भूत् । निगृहीतिः उपस्निहितिः निकुचितिः निपठितिरिति ॥

एकाच उपदेशेऽनुदात्तात् ॥ ७ । २ । १० ॥

एकाज्ग्रहणं किमर्थम् ।

एकाज्ग्रहणं जागर्त्यर्थम् ॥ १ ॥

एकाज्ग्रहणं क्रियते जागर्तेरिट्प्रतिषेधो मा भूदिति । जागरिता जागरितुम् ॥ न ब्रूम नैतदस्ति प्रयोजनम् । उपदेशेऽनुदात्तादित्युच्यते जागर्तिश्चोपदेश उदात्तः ॥ न ब्रूम इहार्थं जागर्त्यर्थमेकाज्ग्रहणं कर्तव्यमिति । किं तर्हि । उत्तरार्थम् । श्र्युकः किति [११] इतीट्प्रतिषेधं वक्ष्यति स जागर्तेर्मा भूदिति । जागरितः जागरितवानिति ॥ एतदपि नास्ति प्रयोजनम् । जागर्तेर्गुण उच्यते[1] वृद्धिविषये प्रतिषेधविषये च स बाधको भविष्यति । तत्र गुणे कृते रपरत्वे च कृतेऽनुगन्तत्वादिट्प्रतिषेधो न भविष्यति । ननु चोपदेशाधिकारात् प्राप्नोति । उपदेशग्रहणं निवर्तयिष्यते । यदि निवर्त्यते स्तीर्त्वा पूर्त्वा इत्त्वोत्त्वयोः[2] कृतयो रपरत्वे चानुगन्तत्वादिट्प्रतिषेधो न प्राप्नोति । इत्त्वोत्त्वे प्राप्नुतः । नैष दोषः । आनुपूर्व्या सिद्धमेतत् । नात्राकृत इट्प्रतिषेध इत्त्वोत्त्वे प्राप्नुतः । किं कारणम् । न क्त्वा सेट् [१. २. १८] इति कित्त्वप्रतिषेधात् । इदं तर्हि । आतिस्तीर्षति निपुपूर्षति[3] । इत्त्वोत्त्वयोः कृतयो रपरत्वे चानुगन्तत्वादिट्प्रतिषेधो न प्राप्नोति । मा भूदेवं श्र्युकः किति [११] इति । इट् सनि वा [४१]

---

[1] जाग्रोऽविचिण्णल्ङित्सु ७. ३. ८५.　[2] ऋत इद्धातोः ७. १. १०० ; उदोष्ठ्यपूर्वस्य ७. १. १०२.　[3] इको झल् १. २. ९.

इत्येवं भविष्यति । इदं तर्हि । आस्तीर्णम् निपूर्ताः पिण्डाः । इत्त्वोत्त्वयोः कृतयो रपरत्वे चानुगन्तत्वादिट्प्रतिषेधो न प्राप्नोति । मा भूदेवम् । इट्सनि वेति सनि विभाषा यस्य विभाषा [१५] इति प्रतिषेधो भविष्यति ॥

इहार्थमेव तर्हि वध्यर्थमेकाज्ग्रहणं कर्तव्यम् । वध इट्प्रतिषेधो मा भूदिति] वधिषीष्टेति[1] ॥ एतदपि नास्ति प्रयोजनम् । क्रियमाणेऽपि वा एकाज्ग्रहणे वध इट्प्रतिषेधः प्राप्नोति । वधिषीष्टेति । किं कारणम् ।

वध इट्प्रतिषेधः संनिपात एकाच्त्वात्प्रकृतेश्चानुदात्तत्वात् ॥ २ ॥

संनिपाते चैव हि वधिरेकाच्श्रूयते प्रकृतिश्चास्यानुदात्ता ॥

किं पुनः कारणमेवं विज्ञायत उपदेशेऽनुदात्तादेकाचः श्रूयमाणादिति । यङ्लोपार्थम् । यङ्लोपे मा भूदिति । बेभिदिता बेभिदितुम् । चेच्छिदिता चेच्छिदितुम् ।

एकाच उपदेशे ऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्कृञादिभ्यो लिटि नियमानुपपत्तिरप्राप्तत्वात्प्रतिषेधस्य ॥ ३ ॥

एकाच उपदेशे ऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्कृञादिभ्यो लिटि[2] नियमस्यानुपपत्तिः । किं कारणम् । अप्राप्तत्वात्प्रतिषेधस्य । द्विर्वचने कृत उपदेशेऽनुदात्तादेकाचः श्रूयमाणादितीट्प्रतिषेधो न प्राप्नोति । असतीट्प्रतिषेधे नियमो नोपपद्यते ॥ असति नियमे को दोषः ।

तत्र पचादिभ्य इड्वचनम् ॥ ४ ॥

तत्र पचादिभ्य इड्वक्तव्यः । पेचिम शेकिम ॥

सनश्चेट्प्रतिषेधः ॥ ५ ॥

सनश्चेट्प्रतिषेधो वक्तव्यः । बिभित्सति चिच्छित्सति । द्विर्वचने कृत उपदेशे ऽनुदात्तादेकाचः श्रूयमाणादितीट्प्रतिषेधो न प्राप्नोति ॥

इह च नीत्तः तत्वे कृते[3] ऽनच्कत्वादिट्प्रतिषेधो न प्राप्नोति ॥

नैष दोषः । आनुपूर्व्या सिद्धमेतत् । नात्राकृत इट्प्रतिषेधे तत्वं प्राप्नोति । किं कारणम् । ति कितीत्युच्यते ॥ यदप्युच्यत एकाच उपदेशेऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्कृञादिभ्यो लिटि नियमानुपपत्तिरप्राप्तत्वात्प्रतिषेधस्येति मा भून्नि-

---

[1] हनो वध लिङि २. ४. ४२. [2] कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ७. २. १३. [3] अच उपसर्गात्तः ७. ४. ४७.

यमः । ननु चोक्तं तत्र पचादिभ्य इड्वचनमिति । नैष दोषः । उक्तं तत्र[1] थल्ग्रहणस्य प्रयोजनं समुच्चयो यथा विज्ञायेत थलि च सेटि क्ङिति च सेटीति ॥ यदप्युच्यते सनश्चेट्प्रतिषेध इति

उभयविशेषणत्वात्सिद्धम् ॥ ६ ॥

उभयमुपदेशग्रहणेन विशेषयिष्यामः । उपदेशेऽनुदात्तादुपदेश एकाच इति ॥

यङ्लोपे कथम् ।

यङ्लोपे च तदन्तद्विर्वचनात् ॥ ७ ॥

सन्यङन्तस्य स्थाने द्विर्वचनं[2] तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य नष्टः स भवति यः स एकाजुपदेशेऽनुदात्तः ॥ अथापि द्विःप्रयोगो द्विर्वचनमेवमपि न दोषः । न ह्यस्य भिद्युपदेश उपदेशः । किं तर्हि । बेभिद्युपदेश उपदेशः ॥ अथापि भिद्युपदेश उपदेश एवमपि न दोषः । अकारेण व्यवहितत्वान्न भविष्यति । ननु च लोपे कृते[3] नास्ति व्यवधानम् । स्थानिवद्भावाद्व्यवधानमेव । न सिध्यति । पूर्वविधौ स्थानिवद्भावो[4] न चायं पूर्वविधिः । एवं तर्हि पूर्वस्मादपि विधिः पूर्वविधिः ॥ कः पुनरुपदेशो न्याय्यः । यः कृत्स्नः । कश्च कृत्स्नः । य उभयोः । यदि तर्हि य उभयोः स कृत्स्नः स च न्याय्यो वध इट्प्रतिषेधः प्राप्नोति । आवधिषीष्टेति ॥ नैष दोषः । आद्युदात्तनिपातनं करिष्यते स निपातनस्वरः प्रकृतिस्वरस्य बाधको भविष्यति । एवमप्युपदेशिवद्भावो वक्तव्यः । यथैव हि स निपातनस्वरः प्रकृतिस्वरं बाधत एवं प्रत्ययस्वरमपि बाधेत । आवधिषीष्टेति । नैष दोषः । आर्धधातुकीयाः सामान्येन भवन्त्यनवस्थितेषु प्रत्ययेषु । तत्रार्धधातुकसामान्ये वधिभावे कृते सतिशिष्टत्वात्प्रत्ययस्वरो भविष्यति ॥

अथ के पुनरनुदात्ताः । आदन्ता अदरिद्राः । इवर्णान्ताश्चाश्विश्रिडीशीदीधीवेवीङः । उवर्णान्ता युरुणुक्षुक्ष्णुस्नूर्णुवर्जम् । ऋदन्ताश्चाजागृवृङ्वृञः । शाकिः कवर्गान्तानाम् । पचिवचिसिचिमुचिरिचिविचिप्रच्छ्यजिभजिसृजित्यजिभुजिभ्रस्जिभञ्जिरुजियुजिणिजिविजिसञ्जिस्वञ्जयश्चवर्गान्तानाम् । सदिशदिहदिच्छिर्दितुदिस्विदिभिदिस्कन्दि क्षुदि खिद्यति विन्दि विद्यति राधि युधि बुधि शुधि क्रुधि रुधि साधि व्यधि बन्धि सिध्यतिहनिमन्यतयस्तवर्गान्तानाम् । तपितिपिवपिशपिचुपिलुपिलिपिस्वप्यापिक्षिपिसृपितृपिदृपियभिरभिलभियमिरमिनमिगमयः पवर्गान्तानाम् । रुशिरिशिदिशिविशि-

---

[1] थलि च सेटि ६. ४. १२१.
[2] सन्यङोः ६. १. ९.
[3] अतो लोपः ६. ४. ४८ ; यस्य हलः ६. ४. ४९.
[4] अचः परस्मिन् पूर्वविधौ १. १. ५७.

लिशिस्पृशिदशिक्रुशिमृशिदंशित्विषिकृषिश्लिषिविषिपिषितुषिदुषिद्विषिघसिवसिदहिदिहिवहिदुहिनहिरुहिलिहिमिहयश्चोष्मान्तानाम् । वसिः प्रसारणी ॥ *

कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ॥ ७ । २ । १३ ॥

कृञोऽसुटः ॥ १ ॥

कृञोऽसुट इति वक्तव्यम् । इह मा भूत् । संचस्कारिव संचस्करिम ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । गुणे[1] कृते रपरत्वे चानुगन्तत्वादिट्प्रतिषेधो[2] न भविष्यति ॥ एवमप्युपदेशाधिकारात्प्राप्नोति[3] । तस्मादसुट इति वक्तव्यम् ॥

श्वीदितो निष्ठायाम् ॥ ७ । २ १४ ॥

श्विग्रहणं किमर्थं न प्रसारणे कृते प्रसारणपूर्वत्वे चोगन्तादित्येव सिद्धम्[4] ॥ अत उत्तरं पठति ।

श्विग्रहणमिदन्तत्वादुपदेशस्य ॥ १ ॥

श्विग्रहणं क्रियत इदन्तत्वादुपदेशस्य । उपदेश उगन्तादित्युच्यते श्वयतिश्चोपदेश इदन्तः ॥

यस्य विभाषा ॥ ७ । २ । १५ ॥

यस्य विभाषाविदेः ॥ १ ॥

यस्य विभाषाविदेरिति वक्तव्यम् । इह मा भूत् । विदितः विदितवानिति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । यदुपाधेर्विभाषा तदुपाधेः प्रतिषेधः । शब्विकरणस्य विभाषा[5] लुग्विकरणश्चायम् ॥

आदितश्च ॥ ७ । २ । १६ ॥

विभाषा भावादिकर्मणोः ॥ ७ । २ । १७ ॥

किमर्थो योगविभागो नादितो विभाषा भावादिकर्मणोरित्येवोच्येत । केनेदानीं

---

* [V. M. om. श्र्युकः किति (११); सनिग्रहगुहोश्च (१२)].

[1] संयोगादेर्गुणविधाने संयोगोपधग्रहणं कृञर्थम् ७. ४. १० वा. १. [2] श्र्युकः किति ७. २. ११. [3] एकाच उपदेशेनुदात्तात् ७. २. १०. [4] वचिस्वपियजादीनां च ६. १. १५ ; संप्रसारणाच्च ६. १. १०८ ; श्र्युकः किति ७. २. ११. [5] विभाषा गमहनविदविशाम् ७. २. ६८.

कर्तरि प्रतिषेधो भविष्यति । यस्य विभाषा [७. २. १५] इत्यनेन ॥ एवं तर्हि सिद्धे सति यद्योगविभागं करोति तज्ज्ञापयत्याचार्यो यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध इति । किमेतस्य ज्ञापने प्रयोजनम् । यस्य विभाषाविदेरित्युक्तं[1] तन्न वक्तव्यं भवति ॥

क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु ॥ ७ । २ । १८ ॥

क्षुब्धं मन्थाभिधाने ॥ १ ॥

क्षुब्धं मन्थाभिधान इति वक्तव्यम् । क्षुभितं मन्थेनेत्येवान्यत्र । क्षुब्ध ॥ स्वान्त ।

स्वान्तं मनोऽभिधाने ॥ २ ॥

स्वान्तं मनोऽभिधान इति वक्तव्यम् । स्वनितं मनसेत्येवान्यत्र । स्वान्त ॥ ध्वान्त ।

[ध्वान्तं तमोऽभिधाने ॥ ३ ॥]

ध्वान्तं तमोऽभिधान इति वक्तव्यम् । ध्वनितं तमसेत्येवान्यत्र ॥

धृषिशसी वैयात्ये ॥ ७ । २ । १९ ॥

किमिदं वैयात्य इति । वियातभावो वैयात्यम् ॥

दृढः स्थूलबलयोः ॥ ७ । २ । २० ॥

दृढनिपातनं किमर्थं न दृहेर्नेड्भवतीत्येवोच्येत ।

दृढनिपातनं नकारहकारलोपार्थं परस्य च ढत्वार्थम् ॥ १ ॥

दृढनिपातनं क्रियते नकारहकारलोपार्थम् । नकारहकारलोपो यथा स्यात् । परस्य च ढत्वार्थम् । परस्य च ढत्वं यथा स्यात् ॥

---

[1] यस्य विभाषाविदेः ७. २. १५ वा. १.

अनिड्वचने हि रभावाप्रसिद्धिरलघुत्वात् ॥ २ ॥

अनिड्वचने हि रभावस्याप्रसिद्धिः । द्रढीयान् । किं कारणम् । अलघुत्वात्[1] ॥

नलोपवचनं च ॥ ३ ॥

नलोपश्च वक्तव्यः ॥ इह च परिद्रढय्य गतः ल्यपि लघुपूर्वस्य [६. ४. ५६] इत्ययादेशो न स्यात् । इह च पारिदृढी[2] कन्येति गुरूपोत्तमलक्षणः ष्यङ् प्रसज्येत[3] ॥

प्रभौ परिवृढः ॥ ७ । २ । २१ ॥

परिवृढ इति किमर्थं निपात्यते न परिपूर्वाद्वृहेर्नेड्मवतीत्येवोच्येत ।

परिवृढनिपातनं च ॥ १ ॥

किम् । नकारहकारलोपार्थं परस्य च ढत्वार्थमनिड्वचने हि रभावाप्रसिद्धिरलघुत्वान्नलोपवचनं चेत्येवं[4] । परिव्रढीयानिति र ऋतो हलादेर्लघोः [६. ४. १६१] इति रभावो न स्यात् । इह च परिव्रढय्य गत इति ल्यपि लघुपूर्वस्य [६. ४. ५६] इत्ययादेशो न स्यात् । इह च पारिवृढी कन्येति गुरूपोत्तमलक्षणः ष्यङ्प्रसज्येत[3] ॥ *

घुषिरविशब्दने ॥ ७ । २ । २३ ॥

किमर्थमविशब्दन इत्युच्यते न विशब्दने चुरादिणिचा भवितव्यम् ॥ एवं तर्हि सिद्धे सति यदयमविशब्दन इत्याह तज्ज्ञापयत्याचार्यो विशब्दने घुषेर्विभाषा णिज्भवतीति । किमेतस्य ज्ञापने प्रयोजनम् ।

महीपालवचः श्रुत्वा जुघुषुः पुष्यमाणवाः

एष प्रयोग उपपन्नो भवति ॥ **

णेरध्ययने वृत्तम् ॥ ७ । २ । २६ ॥

किमिदमध्ययनाभिधायिकायां निष्ठायां निपातनं क्रियत आहोस्विदध्ययने

---

* [V. M. om. कृच्छ्रगहनयोः कषः (२२)].

** [V. M. om. अर्देः संनिविभ्यः (२४); अभेश्चाविदूर्ये (२५)].

[1] ढो ढे लोपः ८. ३. १३ ; पूर्वत्रासिद्धम् ८. २. १ ; र ऋतो हलादेर्लघोः ६. ४. १६१.

[2] अत इञ् ४. १. ९५ ; इतो मनुष्यजातेः ४. १. ६५.

[3] अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे ४. १. ७८.

[4] नलोपवचनं च ७. २. २० वा. ३.

चेद्वृतिर्वर्तत इति । किं चातः । यद्यध्ययनाभिधायिकायां निष्ठायां निपातनं क्रियते सिद्धं वृत्तो गुणः वृत्तं पारायणम्, वृत्तं गुणस्य वृत्तं पारायणस्येति न सिध्यति । अथ विज्ञायते ऽध्ययने चेद्वृतिर्वर्तत इति न दोषो भवति । यथा न दोषस्तथास्तु ॥ अध्ययने चेद्वृतिर्वर्तत इत्यपि वै विज्ञायमाने न सिध्यति । किं कारणम् । वृतिरयमकर्मकः । अकर्मकाश्चापि ण्यन्ताः सकर्मका भवन्ति । अकर्मकश्चात्र वृतिः । कथं पुनर्ज्ञायते ऽकर्मकोऽत्र वृतिरिति । अकर्मकाणां भावे क्तो भवतीत्येवमत्र भावे क्तो भवति[1] । तत्रोदितः क्त्वि विभाषा[2] यस्य विभाषा [७. २. १५] इतीट्प्रतिषेधो भविष्यति ॥ अथ णिग्रहणं किमर्थम् ।

वृत्तनिपातने णिग्रहणमण्यन्तस्यावधारणप्रतिषेधार्थम् ॥ १ ॥

वृत्तनिपातने णिग्रहणं क्रियतेऽण्यन्तस्यावधारणं मा भूदिति ॥ कैमर्थक्यान्नियमो भवति । विधेयं नास्तीति कृत्वा । इह चास्ति विधेयम् । किम् । ण्यधिकाद्वृतेरिट्प्रतिषेधो विधेयः । तत्रापूर्वो विधिरस्तु नियमोऽस्त्वित्यपूर्व एव विधिर्भविष्यति न नियमः ॥ कुतो नु खल्वेतदधिकार्थ आरम्भे सति ण्यधिकस्य भविष्यति न पुनः सनधिकस्य वा स्याद्यङधिकस्य वेति । तस्माण्णिग्रहणं कर्तव्यम् ॥ अथ किमर्थं निपातनं क्रियते ।

निपातनं णिलोपेड्गुणप्रतिषेधार्थम् ॥ २ ॥

निपातनं क्रियते णिलोपार्थमिड्गुणप्रतिषेधार्थं च ॥

वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ॥ ७ । २ । २७ ॥

दान्तशान्तयोः किं निपात्यते ।

दान्तशान्तयोरुपधादीर्घत्वं च ॥ १ ॥

किं च । णिलोपेट्प्रतिषेधौ च[3] ॥ उपधादीर्घत्वमनिपात्यम् । वृद्ध्या सिद्धम् । न सिध्यति । मितां ह्रस्वः [६. ४. ९२] इति ह्रस्वत्वेन भवितव्यम् । एवं तर्ह्यनुनासिकस्य क्विझलोः क्ङिति [६. ४. १५] इत्येवमत्र दीर्घत्वं भविष्यति । न सिध्यति । किं कारणम् । णिचा व्यवहितत्वात् । णिलोपे कृते नास्ति व्यवधानम् ।

---

[1] तयोरेव कृत्यक्तखलर्थाः ३. ४. ७०.

[2] उदितो वा ७. २. ५६.

[3] वृत्तनिपातने णिग्रहणमण्यन्तस्यावधारणप्रतिषेधार्थम् ७. २. २६ वा. १.

स्थानिवद्भावाद्व्यवधानमेव । प्रतिषिध्यतेऽत्र स्थानिवद्भावो दीर्घविधिं प्रति न स्थानिवदिति[1] ॥

अथ स्पष्टच्छन्नयोः किं निपात्यते ।

स्पष्टच्छन्नयोरुपधाह्रस्वत्वं च ॥ २ ॥

किं च । णिलोपेट्प्रतिषेधौ च[2] ॥

रुष्यमत्वरसंघुषास्वनाम् ॥ ७ । २ । २८ ॥

घुषिस्वनोर्वावचनमिट्प्रतिषेधाद्विप्रतिषेधेन ॥ १ ॥

घुषिस्वनोर्वावचनमिट्प्रतिषेधाद्भवति विप्रतिषेधेन[3] । घुषेरिट्प्रतिषेधस्यावकाशोऽसंपूर्वादविशब्दनम् । घुष्टा रज्जुः घुष्टो मार्गः । वावचनस्यावकाशः संपूर्वाद्विशब्दनम् । संघुष्टं वाक्यम् संघुषितं वाक्यम् । संपूर्वादविशब्दन उभयं प्राप्नोति । संघुष्टा रज्जुः संघुषिता रज्जुः । वावचनं भवति विप्रतिषेधेन ॥ स्वन इट्प्रतिषेधस्यावकाशोऽनाङ्पूर्वान्मनोऽभिधानम् । स्वान्तं मनः । वावचनस्यावकाश आङ्पूर्वादमनोऽभिधानम् । आस्वान्तो देवदत्तः आस्वनितो देवदत्तः । आङ्पूर्वान्मनोऽभिधान उभयं प्राप्नोति । आस्वान्तं मनः आस्वनितं मनः । वावचनं भवति विप्रतिषेधेन ॥

हृषेर्लोमसु ॥ ७ । २ । २९ ॥

हृषेर्लोमकेशकर्तृकस्येति वक्तव्यम् । हृष्टानि लोमानि हृषितानि लोमानि । हृष्टं लोमभिः हृषितं लोमभिः । हृष्टाः केशाः हृषिताः केशाः । हृष्टं केशैः हृषितं केशैः ॥

विस्मितप्रतीघातयोरिति वक्तव्यम् । हृष्टो देवदत्तः हृषितो देवदत्तः । हृष्टा दन्ताः हृषिता दन्ताः ॥

अपचितश्च ॥ ७ । २ । ३० ॥

अपचित इति किं निपात्यते । चायश्चिभावो निपात्यते । अपचितः ॥

क्तिनि नित्यमिति वक्तव्यम् । अपचितिः ॥ *

---

* [V. M. om. ह्रु ह्वरेश्छन्दसि (३१); अपरिह्वृताश्च (३२); सोमे ह्वरितः (३३); ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ता विशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरितिक्षमितिवमित्यमितीति च (३४)].

[1] न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु १. १. ५८. [2] निपातनं णिलोपेड्गुणप्रतिषेधार्थम् ७. २. २६ वा. २. [3] क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु ७. २. १८ ; घुषिरविशब्दने ७, २. २३.

आर्धधातुकस्येड्वलादेः ॥ ७ । २ । ३५ ॥

आर्धधातुकग्रहणं किमर्थम् । यथा वलादिग्रहणमार्धधातुकविशेषणं विज्ञायेत । वलादेरार्धधातुकस्येति ॥ अथाक्रियमाण आर्धधातुकग्रहणे कस्य वलादिग्रहणं विशेषणं स्यात् । अङ्गस्येति[1] वर्तते । अङ्गविशेषणम् । तत्र को दोषः । अङ्गस्य वलादेरादितः इट् प्रसज्येताडाडुत्[2] । तद्यथाडाटावङ्गस्यादितो भवतस्तद्वत् ॥ क्रियमाणेऽप्यार्धधातुकग्रहणेऽनिष्टं शक्यं विज्ञातुम् । वलादेरार्धधातुकस्य यदङ्गमिति । अक्रियमाणे चेष्टम् । अङ्गस्य यो वलादिरिति । किं चाङ्गस्य वलादिः । निमित्तम् । यस्मिन्नङ्गमित्येतद्भवति । कस्मिंश्चैतद्भवति । प्रत्यये । यावता क्रियमाणे चानिष्टं विज्ञायते ऽक्रियमाणे चेष्टं तत्राक्रियमाण एवेष्टं विज्ञास्यामः ॥ इदं तर्हि प्रयोजनम् । इह मा भूत् । आस्ते शेते ॥ एतदपि नास्ति प्रयोजनम् । रुदादिभ्यः सार्वधातुके [७. २. ७६] इत्येतन्नियमार्थं भविष्यति । रुदादिभ्य एव सार्वधातुक इड् भवति नान्येभ्यः इति ॥ एवमपि वृक्षत्वम् वृक्षता अत्र प्राप्नोति । नैष दोषः । धातोरिति वर्तते । एवमपि लूभ्याम् पूभ्याम् अत्र प्राप्नोति । एवं तर्हि विहितविशेषणं धातुग्रहणम् । धातोर्यो विहितः । ननु धातोरेवायं विहितः । न चायं धातोरित्येवं विहितः ॥ क्व पुनर्धातुग्रहणं प्रकृतम् । ऋत इद्धातोः [७. १. १००] इति । तद्वै षष्ठीनिर्दिष्टं पञ्चमीनिर्दिष्टेन चेह विहितः शक्यते विशेषयितुम् । अथेदानीं षष्ठीनिर्दिष्टेन चापि विहितः शक्यते विशेषयितुं शक्यमार्धधातुकग्रहणमकर्तुमिति ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमस्याध्यायस्य द्वितीये पादे प्रथममाह्निकम् ॥

---

[1] अङ्गस्य ६. ४. १.　[2] लुङ्लङ्लृङ्क्ष्वडुदात्तः ६. ४. ७१ ; आडजादीनाम् ६. ४. ७२.

स्नुक्रमोरनात्मनेपदनिमित्ते ॥ ७ । २ । ३६ ॥

स्नुक्रमोरनात्मनेपदनिमित्ते चेत्कृत्युपसंख्यानम् ॥ १ ॥

स्नुक्रमोरनात्मनेपदनिमित्ते चेत्कृत्युपसंख्यानं कर्तव्यम् । प्रस्नविता प्रस्नवितुम् प्रस्नवितव्यम् । प्रक्रमिता प्रक्रमितुम् प्रक्रमितव्यम् ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । अविशेषेण स्नुक्रमोरिडागममुक्त्वात्मनेपदपरे नेति वक्ष्यामि ।

आत्मनेपदपरप्रतिषेधे तत्परपरसीयुडेकादेशेषु प्रतिषेधः ॥ २ ॥

आत्मनेपदपरप्रतिषेधे च तत्परपरसीयुडेकादेशेषु प्रतिषेधो वक्तव्यः । तत्परपरे तावत् । प्रसुस्नूषिष्यते प्रचिक्रंसिष्यते[1] । सीयुटि । प्रस्नोषीष्ट प्रक्रंसीष्ट । एकादेशे । प्रस्नोष्यन्ते प्रक्रंस्यन्ते । एकादेशे कृते व्यपवर्गाभावान्न प्राप्नोति । अन्तादिवद्भावेन व्यपवर्गः । उभयत आश्रये नान्तादिवत् । एवं तर्ह्येकादेशः पूर्वविधिं प्रति स्थानिवद्भवतीति[2] स्थानिवद्भावाद्व्यपवर्गः । तत्परपरसीयुटोस्तर्हि प्रतिषेधो वक्तव्यः ॥

सिद्धं तु स्नोरात्मनेपदेन समानपदस्थस्येट्प्रतिषेधात् ॥ ३ ॥

सिद्धमेतत् । कथम् । स्नोरात्मनेपदेन समानपदस्थस्य नेड् भवतीति वक्तव्यम् ॥ यदि स्नोरात्मनेपदेन समानपदस्थस्येण्न भवतीत्युच्यते प्रस्नवितेवाचरति प्रस्नवित्रीयते अत्र न प्राप्नोति । बहिरङ्गलक्षणमत्रात्मनेपदम्[3] ॥

क्रमेश्च ॥ ४ ॥

क्रमेश्चात्मनेपदेन समानपदस्थस्येण्न भवतीति वक्तव्यम् ॥ अथ किमर्थं क्रमेः पृथग्ग्रहणं क्रियते न स्नुक्रमिभ्यामित्येवोच्येत । कर्तरि चात्मनेपदविषयात्कृति नेति वक्ष्यति तत्क्रमेरेव स्यात् स्नोर्मा भूत् । व्यतिप्रस्नवितारौ व्यतिप्रस्नवितारः[4] ॥

कर्तरि चात्मनेपदविषयात्कृति ॥ ५ ॥

कर्तरि चात्मनेपदविषयात्कृति प्रतिषेधो वक्तव्यः । प्रक्रन्ता उपक्रन्तौ[5] ॥

तत्तर्हीदं बहु वक्तव्यम् । स्नोरात्मनेपदेन समानपदस्थस्येण्न भवतीति वक्तव्यम् । क्रमेश्चेति वक्तव्यम् । कर्तरि चात्मनेपदविषयात्कृतीति वक्तव्यम् । सूत्रं च भिद्यते ॥

---

[1] पूर्ववत्सनः १. ३. ६२. [2] एकादेशस्योपसंख्यानम् १. १. ५७ वा. ११. [3] कर्तुः क्यङ् सलोपश्च ३. १. ११ ; अनुदात्तङित आत्मनेपदम् १. ३. १२. [4] कर्तरि कर्मव्यतिहारे १. ३. १४. [5] प्रोपाभ्यां समर्थाभ्याम् १. ३. ४२.

यथान्यासमेवास्तु । ननु चोक्तं स्नुक्रमोरनात्मनेपदनिमित्ते चेत्कृत्युपसंख्यानमिति । नैष दोषः । स्नुक्रमी एवात्मनेपदनिमित्तत्वेन विशेषयिष्यामः । न चेत्स्नुक्रमी आत्मनेपदस्य निमित्ते इति । कथं पुनर्धातुर्नामात्मनेपदस्य निमित्तं स्यात् । धातुरेव निमित्तम् । आह हि भगवाननुदात्तङित आत्मनेपदं शेषात्कर्तरि परस्मैपदम् [१. ३. १२ ; ७८] इति । यत्र तर्हि धातुर्नाश्रीयते भावकर्मणोः [१. ३, १३] इति । अत्रापि धातुरेवाश्रीयते । भावकर्मवृत्ताद्धातोरिति । कथं प्रक्रमितव्यम् । सत्यात्मनेपदे निमित्तशब्दो वर्तते । कथं प्रक्रान्ता उपक्रान्ता । तस्मादसत्यपि । कथं प्रक्रमितव्यम् । तस्मात्सत्येव । कथं प्रक्रान्ता उपक्रान्ता । वक्तव्यमेवैतत्कर्तरि चात्मनेपदविषयात्कृतीति । अथवा कृतीति[1] वर्तते ॥

ग्रहोऽलिटि दीर्घः ॥ ७ । २ । ३७ ॥

ग्रहेर्दीर्घत्व इड्ग्रहणम् ॥ १ ॥

ग्रहेर्दीर्घत्व इड्ग्रहणं कर्तव्यम् । इटो दीर्घ इति वक्तव्यम् ॥ न वक्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । आर्धधातुकस्येड् वलादेः [७. २. ३५] इति ॥ एवमपि कर्तव्यमेव ।

अग्रहणे ह्यसंप्रत्ययः षष्ठ्यभावात् ॥ २ ॥

अक्रियमाणे हीड्ग्रहणे ऽसंप्रत्ययः स्यात् । किं कारणम् । षष्ठ्यभावात् । षष्ठीनिर्दिष्टस्यादेशा उच्यन्ते[2] न चात्र षष्ठीं पश्यामः ॥ क्रियमाणे चापीड्ग्रहणे

चिण्वदिटः प्रतिषेधः ॥ ३ ॥

चिण्वदिटः[3] प्रतिषेधो वक्तव्यः । ग्राहिष्यते ॥

यङ्लोपे च ॥ ४ ॥

यङ्लोपे च प्रतिषेधो वक्तव्यः । जरीगृहिता जरीगृहितुम् जरीगृहितव्यम् ॥ यदि पुनरिड् दीर्घ आगमान्तरं विज्ञायेत ।

इड् दीर्घ इति चेद्विप्रतिषिद्धम् ॥ ५ ॥

इड् दीर्घ इति चेद्विप्रतिषिद्धं भवति । यदि इण्न दीर्घः । अथ दीर्घो न इट् । इड् दीर्घश्चेति विप्रतिषिद्धम् ॥

---

[1] नेड् वशि कृति ७. २. ८. [2] षष्ठी स्थानेयोगा १. १. ४९. [3] स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ६. ४. ६२.

प्रतिषिद्धस्य च पुनर्विधाने दीर्घत्वाभावः ॥ ६ ॥

प्रतिषिद्धस्य च पुनर्विधाने दीर्घत्वस्याभावः । वुवूर्षते विवरिषते विवरीषते[1] ॥ अत्रापि[2] इड् दीर्घ इत्यनुवर्तिष्यते ॥ यत्तर्हि विदेशस्थं प्रतिषिध्य पुनर्विधानं तन्न सिध्यति । जॄव्रश्च्योः क्त्वि [७. २. ५५] । श्र्युकः किति [११] इत्यनेन प्रतिषिद्धे[3] दीर्घत्वं न प्राप्नोति । जरित्वा जरीत्वा ॥ ईटो विधिरिटः प्रतिषेधः[4] । यथाप्राप्त इड् दीर्घो भविष्यति ॥ यदि तर्हि इटो ग्रहण ईटो ग्रहणं न भवति जरीत्वा न क्त्वा सेट् [१. २. १८] इति कित्त्वप्रतिषेधो न प्राप्नोति । इह च अग्रहीदिति इट ईटि [८. २. २८] इति सिज्लोपो न प्राप्नोति । इह च अग्रहीत् नेटि [७. २. ४] इति वृद्धिप्रतिषेधो न प्राप्नोति । मा भूदेवम् । ह्ययन्तानामित्येवं[5] भविष्यति । अत्रापि नेटीत्येवानुवर्तते । तच्चावश्यमिड्ग्रहणमनुवर्त्यमग्राक्षीदित्येवमर्थम् । तथा अग्रहीध्वम् अग्रहीढ्वम् विभाषेटः [८. ३. ७९] इति मूर्धन्यो न प्राप्नोति । तस्मान्नैवं शक्यं वक्तुमिटो ग्रहण ईटो ग्रहणं न भवतीति । भवति चेत्प्रतिषिद्धस्य च पुनर्विधाने दीर्घाभाव इत्येव ॥ तस्मादशक्य इड् दीर्घ आगमान्तरं विज्ञातुम् । न चेद्विज्ञायत इटो ग्रहणं कर्तव्यम् । न कर्तव्यम् । आर्धधातुकस्येति[6] वर्तते । ग्रहः परस्यार्धधातुकस्य दीर्घत्वं वक्ष्यामि । इहापि तर्हि प्राप्नोति । ग्रहणम् ग्रहणीयम् । वलादेरिति[6] वर्तते । एवमपि ग्रहीता ग्रहीतुम् अत्र न प्राप्नोति । भूतपूर्वगत्या भविष्यति ॥ एवमपि ग्राहकः अत्र प्राप्नोति । किंचेट्प्रतीघातेन खल्वपि दीर्घत्वमुच्यमानमिटं बाधते । तस्मादिटो ग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । आर्धधातुकस्येड् वलादेरिति । ननु चोक्तमेवमपि कर्तव्यमेवाग्रहणे ह्यसंप्रत्ययः षष्ठ्यनिर्देशादिति । नैष दोषः । ग्रह इत्येषा पञ्चमीडिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्य [१. १. ६७] इति ॥ एवं च कृत्वा सोऽप्यदोषो भवति यदुक्तं चिण्वदिटः प्रतिषेध इति । कथम् । प्रकृतस्येट इदं दीर्घत्वं न च चिण्वदिट् प्रकृतः ॥ यङ्लोपे कथम् । यङ्लोपे चोक्तमिटि सर्वत्र । क्व सर्वत्र । यद्येव प्रकृतस्येटो दीर्घत्वमथापि इड् दीर्घ आगमान्तरं विज्ञायेत ।

यङ्लोपे चोक्तम् ॥ ७ ॥

किमुक्तम् । तदन्ताद्विर्वचनादिति[7] ॥ *

---

* [V. M. om. वृतो वा (३८) ; न लिङि (३९) ; सिचि च परस्मैपदेषु (४०) ; इट् सनि वा (४१) ; लिङ्सिचोरात्मनेपदेषु (४२) ; संयोगादेः (४३)].

[1] आर्धधातुकस्येड् वलादेः ७. २. ३५ ; वृतो वा ७. २. ३८ ; सनि ग्रहगुहोश्च ७. २. १२ ; इट् सनि वा ७. २. ४१.

[2] इट् सनि वा ७. २. ४१.

[3] आर्धधातुकस्येड् वलादेः ७. २. ३५ ; वृतो वा ७. २. ३८.

[4] वृतो वा ७. २. ३८ ; श्र्युकः किति ७. २. ११.

[5] ह्ययन्तक्षणश्वसजागृणिश्व्येदिताम् ७. २. ५.

[6] आर्धधातुकस्येड् वलादेः ७. २. ३५.

[7] यङ्लोपे च तदन्तद्विर्वचनात् ७. २. १० वा. ७.

स्वरतिसूतिसूयतिधूञूदितो वा ॥ ७ । २ । ४४ ॥

अथ वेति[1] वर्तमाने पुनर्वावचनं किमर्थम् ।

पुनर्वावचनं लिङ्सिचोर्निवृत्त्यर्थम् ॥ १ ॥

पुनर्वावचनं क्रियते लिङ्सिचोर्निवृत्त्यर्थम्[2] ॥

अथ किमर्थं सूतिसूयत्योः पृथग्ग्रहणं क्रियते । सुवतेर्मा भूत् ॥ अथ किमर्थं धूञः सानुबन्धकस्य ग्रहणं क्रियते । धुवतेर्मा भूदिति ॥

किं पुनरियं प्राप्ते विभाषाहोस्विदप्राप्ते । कथं च प्राप्ते कथं वाप्राप्ते । यदि स्वरतिरुदात्तस्ततः प्राप्ते । अथानुदात्तस्ततोऽप्राप्ते ।

स्वरतिरुदात्तः ॥ २ ॥

स्वरतिरुदात्तः पठ्यते ॥ किमर्थं तर्हि वावचनम् ।

वावचनं निवृत्त्यर्थम् ॥ ३ ॥

वावचनं क्रियते निवृत्त्यर्थम् ॥

अनुदात्ते हि किति वाप्रसङ्गः प्रतिषिध्य पुनर्विधानात् ॥ ४ ॥

अनुदात्ते हि सति किति विभाषा प्रसज्येत । स्वृत्वा । किं कारणम् । प्रतिषिध्य पुनर्विधानात् । प्रतिषिध्य[3] किलायं पुनर्विधीयते । स यथैवैकाज्लक्षणं[4] प्रतिषेधं बाधत एवं श्र्युकः किति [७. २. ११] इत्येतमपि बाधेत ॥ यदि तर्ह्युदात्तः स्वरतिः पठिष्यति विप्रतिषेधं स्वरतेर्वेट्त्वाद्धतः स्ये विप्रतिषेधेनेति[5] स विप्रतिषेधो नोपपद्यते । किं कारणम् । स विधिरयं प्रतिषेधो विधिप्रतिषेधयोश्चायुक्तो विप्रतिषेधः ॥ सोऽपि विधिर्न मृदूनामिव कार्पासानां कृतः प्रतिषेधविषय आरभ्यते । स यथैवैकाज्लक्षणं प्रतिषेधं बाधत एवमिममपि बाधिष्यते ॥ अथवा येन नाप्राप्ते तस्य बाधनं भवति न चाप्राप्ते वलादिलक्षणे[6] इयं विभाषारभ्यते स्यलक्षणे पुनः प्राप्ते चाप्राप्ते च । अथवा मध्येऽपवादाः पूर्वान्विधीन् बाधन्त इत्येवमियं विभाषा वलादिलक्षणमिटं बाधिष्यते स्यलक्षणं न बाधिष्यते ।

अथवा पुनरस्त्वनुदात्तः । ननु चोक्तमनुदात्ते हि किति वाप्रसङ्गः प्रतिषिध्य

---

[1] इट् सनि वा ७. २. ४१. [2] लिङ्सिचोरात्मनेपदेषु ७. २. ४२. [3] श्र्युकः किति ७. २. ११. [4] एकाच उपदेशेऽनुदात्तात् ७. २. १०. [5] स्वरतेर्वेट्त्वाद्धतः स्ये विप्रिषेधेन ७. २. ७० वा १. [6] आर्धधातुकस्येड् वलादेः ७. २. ३५.

पुनर्विधानादिति । नैष दोषः । येन नाप्राप्ते तस्य बाधनं भवति न चाप्राप्त एकाज्लक्षणे प्रतिषेध इयं विभाषारभ्यते श्युकः कितीत्येतस्मिन्पुनः प्राप्ते चाप्राप्ते च ॥ अथवा श्युकः कितीत्येष योग उदात्तार्थश्च येभ्यश्चानुदात्तेभ्य इट् प्राप्यते तद्बाधनार्थश्च । अथवा श्युकः कितीतीहानुवर्तिष्यते । अथवाचार्यप्रवृत्तिर्ज्ञापयति नेयं विभाषोग्लक्षणस्य प्रतिषेधस्य विषये भवतीति यदयं सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् [७. २. ४१] इति स्वृग्रहणं करोति[1] ॥ *

इण्निष्ठायाम् ॥ ७ । २ । ४७ ॥

इडिति[2] वर्तमाने पुनरिड्ग्रहणं किमर्थम् ।

इड्ग्रहणं नित्यार्थम् ॥ १ ॥

नित्यार्थोऽयमारम्भः ॥ नैतदस्ति प्रयोजनम् । सिद्धात्र विभाषा पूर्वेणैवं[3] तत्रारम्भसामर्थ्यान्नित्यो विधिर्भविष्यति ॥ नात्र पूर्वेण विभाषा प्राप्नोति किं कारणम् । यस्य विभाषा [७. २. १५] इति प्रतिषेधात् । तत्रारम्भसामर्थ्याद्विभाषा लभ्येत पुनरिड्ग्रहणादिडेव भवति ॥

तीषसहलुभरुषरिषः ॥ ७ । २ । ४८ ॥

इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधः ॥ १ ॥

इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधो वक्तव्यः । इह मा भूत् । प्रेषिता प्रेषितुम् प्रेषितव्यम् ॥ **

वसतिक्षुधोरिट् ॥ ७ । २ । ५२ ॥

इडिति[4] वर्तमाने पुनरिड्ग्रहणं किमर्थम् ।

पुनरिड्ग्रहणं नित्यार्थम् ॥ १ ॥

इडिति वर्तमाने पुनरिड्ग्रहणं क्रियते नित्यार्थम् । नित्यार्थोऽयमारम्भः ॥ ***

---

* [V. M. om. रधादिभ्यश्च (४५) ; निरः कुषः (४६)].

** [V. M. om. सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् (४९) ; क्लिशः क्त्वानिष्ठयोः (५०) ; पूङश्च (५१)].

*** [V. M. om. अञ्चेः पूजायाम् (५३) ; लुभो विमोहने (५४) ; जॄव्रश्च्योः क्त्वि (५५) ; उदितो वा (५६) ; सेऽसिचि कृतचृतच्छृदतृदनृतः (५७)].

[1] सनि ग्रहगुहोश्च ७. २. १२. [2] इड् सनि वा ७. २. ४१. [3] निरः कुषः ७. २. ४६. [4] इण्निष्ठायाम् ७. २. ४७.

गमेरिट् परस्मैपदेषु ॥ ७ । २ । ५८ ॥

गमेरिट् परस्मैपदेषु चेत्कृत्युपसंख्यानम् ॥ १ ॥

गमेरिट् परस्मैपदेषु चेत्कृत्युपसंख्यानं कर्तव्यम् । जिगमिषिता जिगमिषितुम् जिगमिषितव्यम् ॥ तत्तर्ह्युपसंख्यानं कर्तव्यम् । न कर्तव्यम् । अविशेषेण गमेरिडागममुक्त्वात्मनेपदपरे नेति वक्ष्यामि ।

आत्मनेपदपरप्रतिषेध उक्तम् ॥ २ ॥

किमुक्तम् । आत्मनेपदपरप्रतिषेधे तत्परपरसीयुडेकादेशेषु प्रतिषेध इति[1] । इहाप्यात्मनेपदपरप्रतिषेधे तत्परपरसीयुडेकादेशेषु प्रतिषेधो वक्तव्यः । तत्परपरे तावत् । संजिगंसिष्यते । सीयुटि । संगंसीष्ट । एकादेशे । संगंस्यन्ते । एकादेशे कृते व्यपवर्गाभावान्न प्राप्नोति ॥

सिद्धं तु गमेरात्मनेपदेन समानपदस्थस्येट्प्रतिषेधात् ॥ ३ ॥

सिद्धमेतत् । कथम् । गमेरात्मनेपदेन समानपदस्थस्येण् न भवतीति वक्तव्यम् ॥

न वृद्भ्यश्चतुर्भ्यः ॥ ७ । २ । ५९ ॥

वृतादिप्रतिषेधे च ॥ १ ॥

किम् । कृत्युपसंख्यानं कर्तव्यम् । विवृत्सिता विवृत्सितुम् विवृत्सितव्यम् ॥ तत्तर्ह्युपसंख्यानं कर्तव्यम् । न कर्तव्यम् । अविशेषेण वृतादिभ्य इट्प्रतिषेधमुक्त्वात्मनेपदपर इड् भवतीति वक्ष्यामि ।

आत्मनेपदपर इड्वचने तत्परपरसीयुडेकादेशेष्विड्वचनम् ॥ २ ॥

आत्मनेपदपर इड्वचने तत्परपरसीयुडेकादेशेष्विड्वक्तव्यः । तत्परपरे तावत् । विवर्तिषिष्यते । सीयुटि । वर्तिषीष्ट । एकादेशे । वर्तिष्यन्ते वर्धिष्यन्ते ॥

सिद्धं तु वृतादीनामात्मनेपदेन समानपदस्थस्येड्वचनात् ॥ ३ ॥

सिद्धमेतत् । कथम् । वृतादीनामात्मनेपदेन समानपदस्थस्येड् भवतीति वक्तव्यम् ॥

---

[1] आत्मनेपदपरप्रतिषेधे तत्परपरसीयुडेकादेशेषु प्रतिषेधः ७. २. ३६ वा. २.

चतुस्तासिक्लृपिग्रहणानर्थक्यं च ॥ ४ ॥

चतुर्ग्रहणं चानर्थकं सर्वेभ्यो हि वृतादिभ्यः प्रतिषेध इष्यते । तासिग्रहणं[1] चानर्थकम् । किं कारणम् ।

निवृत्तत्वात्सकारस्य ॥ ५ ॥

निवृत्तं सकारादाविति[2] । तास्ग्रहणे चेदानीमक्रियमाणे क्लृपिग्रहणेनापि[1] नार्थः एषोऽपि हि वृतादिः पञ्चमः ॥ भवेत्क्लृपिग्रहणं न कर्तव्यं तास्ग्रहणं तु कर्तव्यम् । यद्धि तत्सकारादाविति न तच्छक्यं निवर्तयितुं तृच्यपि हि प्रसज्येत । वर्तिता वर्धिता । तास्ग्रहणे चेदानीं क्रियमाणे क्लृपिग्रहणमपि कर्तव्यमन्येभ्योऽपि वृतादिभ्यस्तासौ मा भूदिति ॥ भवेत्तास्ग्रहणं कर्तव्यं क्लृपिग्रहणं तु नैव कर्तव्यम् । अन्येभ्योऽपि वृतादिभ्यस्तासौ कस्मान्न भवति । परस्मैपदेष्विति[3] वर्तते क्लृपेरेव च तासपरस्मैपदपरो नान्येभ्यो वृतादिभ्यः ॥ यद्येवं तास्ग्रहणेनापि नार्थः । तृचि कस्मान्न भवति । परस्मैपदेष्विति वर्तते ॥ *

उपदेशेऽत्वतः ॥ ७ । २ । ६२ ॥

तासावत्वत्प्रतिषेधे घसेः प्रतिषेधप्रसङ्गोऽकारवत्त्वात् ॥ १ ॥

तासावत्वत्प्रतिषेधे घसेः प्रतिषेधः प्राप्नोति । जघसिथ । किं कारणम् । अकारवत्त्वात् । सोऽपि ह्यकारवान् ॥

सिद्धं तु हलादिग्रहणात् ॥ २ ॥

सिद्धमेतत् । कथम् । हलादिग्रहणं कर्तव्यम् ॥ तच्चावश्यं कर्तव्यम् । अट्यशी प्रयोजयतः । अट्यशी तावन्न प्रयोजयतः । किं कारणम् । तासावनिट इत्युच्यते सेटौ चेमौ तासौ । अञ्ज्यशू तर्हि प्रयोजयतः । अञ्ज्यशू चापि न प्रयोजयतः । किं। कारणम् । तासौ नित्यानिट इत्युच्यते विभाषितेटौ चैतौ[5] । अदिस्तर्हि प्रयोजयति । आदिथ ॥ क्रियमाणेऽपि वै हलादिग्रहणे ऽत्र प्राप्नोति । जघसिथ । एषोऽपि हलादिः ।

तस्य चाभावात्तासौ ॥ ३ ॥

तासावनिट इत्युच्यते न च घसिस्तासावस्ति ॥ ननु च यस्तासौ नास्त्यनिड-

---

* [V. M. om. तासि च क्लृपः (६०) ; अचस्तास्वत्थल्यनिटो नित्यम् (६१)].

[1] तासि च क्लृपः ७. २. ६०. [2] सेऽसिचि कृतचृतच्छृदतृदनृतः ७. २. ५७. [3] गमेरिट् परस्मैपदेषु २. ४. ४०. [4] लिट्यन्यतरस्याम् २. ४. ४०. [5] स्वरतिसूतिसूयतिधूञूदितो वा ७. २. ४४.

प्यसौ तासौ भवति । नैवं विज्ञायते यस्तासावनिडिति । कथं तर्हि । यस्तासावस्त्यनिट् चेति । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । सप्तम्यर्थेऽपि वै वतिर्भवति । तद्यथा । मथुरायामिव मथुरावत् । पाटलिपुत्र इव पाटलिपुत्रवत् । एवं तासाविव तास्वत् ।

ऋतो भारद्वाजस्य ॥ ७ । २ । ६३ ॥

किमर्थमिदमुच्यते नाचस्तास्वत्थल्यनिटो नित्यम् [७. २. ६१] इत्येव सिद्धम् । एवं तर्हि नियमार्थोऽयमारम्भः । ऋत एव भारद्वाजस्य नान्यतो भारद्वाजस्येति । क मा भूत् । ययिथ वविथेति ।

ऋतो भारद्वाजस्येति नियमानुपपत्तिरप्राप्तत्वात्प्रतिषेधस्य ॥ १ ॥

ऋतो भारद्वाजस्येति नियमानुपपत्तिः । किं कारणम् । अप्राप्तत्वात्प्रतिषेधस्य । गुणे कृते रपरत्वे चानजन्तत्वात्प्रतिषेधो न प्राप्नोति ॥ असति नियमे को दोषः ।

तत्र पचादिभ्य इड्वचनम् ॥ २ ॥

तत्र पचादिभ्य इड्वक्तव्यः । पेचिथ शेकिथेति ॥ यदि पुनरयं भारद्वाजः पुरस्तादपकृष्येत । अचस्तास्वत्थल्यनिटो नित्यं भारद्वाजस्य । उपदेशेऽत्वतो भारद्वाजस्य । तत ऋतः । भारद्वाजस्येति निवृत्तम् । सिध्यत्येवमयं तु भारद्वाजः स्वस्मान्मतात्प्रच्यावितो भवति ॥ एवं तर्हि

योगविभागात्सिद्धम् ॥ ३ ॥

योगविभागः करिष्यते[1] । अचस्तास्वत्थल्यनिटो नित्यमुपदेशे । ततोऽत्वतः । अत्वतश्चोपदेश इति ॥

बभूथाततन्थ जगृभ्म ववर्थेति निगमे ॥ ७ । २ । ६४ ॥

वृग्रहणं किमर्थं न कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि [७. २. १३] इत्येव सिद्धम् । एवं तर्हि नियमार्थोऽयमारम्भः । निगम एव यथा स्यात् । क मा भूत् । ववरिथ ॥ *

---

* [V. M. om. विभाषा सृजिदृशोः (६५) ; इडत्त्यर्तिव्ययतीनाम् (६६)].

[1] उपदेशेऽत्वतः ७. २. ६२.

वस्वेकाजाद्घसाम् ॥ ७ । २ । ६७ ॥

किमर्थमिदमुच्यते ।

वस्वेकाजाद्घसांवचनं नियमार्थम् ॥ १ ॥

नियमार्थोऽयमारम्भः । वसावेकाजाद्घसामेव । क मा भूत् । बिभिद्वान् ॥ किमुच्यते नियमार्थमिति न पुनर्विध्यर्थोऽपि स्यात् । प्रतिषेधोऽपि ह्यत्र प्राप्नोति नेड् वशि कृति [७. २. ८] इति । कृच्चैव ह्ययं वशादिश्च । एवं तर्हि कृसृभृवृस्तुद्रुश्रुस्रुवो लिटि [७. २. १३] इत्येतस्मान्नियमादत्रेड् भविष्यति ॥ नात्र तेन परिप्रापणं प्राप्नोति । किं कारणम् । प्रकृतिलक्षणस्य[1] प्रतिषेधस्य स प्रत्यारम्भः प्रत्ययलक्षणश्चायं प्रतिषेधः ॥ उभयोः स प्रत्यारम्भः । कथं ज्ञायते । वृङ्वृञोर्ग्रहणात् । कथं कृत्वा ज्ञापकम् । इमौ वृङ्वृञावुदात्तौ तयोः प्रकृतिलक्षणः प्रतिषेधो न प्राप्नोति । पश्यति त्वाचार्य उभयोः स प्रत्यारम्भ इति ततो वृङ्वृञोर्ग्रहणं करोति । न खल्वपि कश्चिदुभयवान्प्रतिषेधः प्रकृतिलक्षणः प्रत्ययलक्षणश्च । तुल्यजातीये ऽसति यथैव प्रकृतिलक्षणस्य नियामको भवत्येवं प्रत्ययलक्षणस्यापि नियामको भविष्यति ॥ अथ यावता वसावेकाज्भ्य इटा भवितव्यं को न्वत्र विशेषो नियमार्थे वा सति विध्यर्थे वा । न खलु कश्चिद्विशेषः । आहोपुरुषिकामात्रं तु भवानाह विध्यर्थमिति । वयं तु ब्रूमो नियमार्थमिति ॥

अथैकाज्ग्रहणं किमर्थम् । इह मा भूत् । बिभिद्वान् चिच्छिद्वानिति ॥ क्रियमाणेऽपि वा एकाज्ग्रहणे ऽत्र प्राप्नोति । एषोऽपि ह्येकाच् ॥ एवं तर्हि कृते द्विर्वचने य एकाच् । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । एकाज्ग्रहणसामर्थ्यात् । न हि कश्चिदकृते द्विर्वचने ऽनेकाजस्ति यदर्थमेकाज्ग्रहणं क्रियते । ननु चायमस्ति जागर्तिः । जागृवांसो अनु ग्मन्[2] । यत्तर्ह्याकारग्रहणं करोति न हि कश्चिदकृते द्विर्वचन आकारान्तोऽनेकाजस्ति । ननु चायमस्ति दरिद्रातिः । न दरिद्रातेरिटा भवितव्यम् । किं कारणम् । उक्तमेतद्दरिद्रातेरार्धधातुके लोपः सिद्धश्च प्रत्ययविधाविति[3] । यश्चेदानीं प्रत्ययविधौ सिद्धः सिद्धोऽसाविड्विधौ । एवमपि भूतपूर्वगतिर्विज्ञायेत । आकारान्तो यो भूतपूर्व इति । एकाज्ग्रहणमेव तर्हि ज्ञापकम् । ननु चोक्तं जागर्त्यर्थमेतत् स्यात् । नैकमुदाहरणमेकाज्ग्रहणं प्रयोजयति । यद्येतावत् प्रयोजनं स्याज्जागर्तेर्नेत्येव ब्रूयात् ॥

---

[1] एकाच उपदेशेऽनुदात्तात् ७. २. १०. [2] ऋ. सं. ६. १. ३. [3] सिद्धश्च प्रत्ययविधौ ६. ४. ११४ वा. २.

अथ घसिग्रहणं किमर्थं नैकाजित्येव सिद्धम् ।

घसिग्रहणमनच्कत्वात् ॥ २ ॥

घसिग्रहणं क्रियते लोपे कृतेऽनच्कत्वादिण्न प्राप्नोति । इदमिह संप्रधार्यम् । इट् क्रियतां लोप इति किमत्र कर्तव्यम् । परत्वादिडागमः । नित्यो लोपः । कृतेऽपीटि प्राप्नोत्यकृतेऽपि[1] । इडपि नित्यः । कृतेऽपि लोपे प्राप्नोत्यकृतेऽपि । अनित्य इण्न हि कृते लोपे प्राप्नोति । किं कारणम् । अनच्कत्वात् । एवं तर्हि द्विर्वचने कृते ऽभ्यासे योऽकारस्तदाश्रय इड् भविष्यति । न सिध्यति । किं कारणम् । द्वित्वाल्लोपस्य परत्वात् । द्विर्वचनं[2] क्रियतां लोप इति किमत्र कर्तव्यम् । परत्वाल्लोपः । लोपे कृते ऽनच्कत्वाद् द्विर्वचनं न प्राप्नोति । घसिग्रहणे पुनः क्रियमाणे न दोषो भवति । कथम् । वचनादिड् भविष्यति । इटि कृते द्विर्वचनं क्रियतां लोप इति यद्यपि परत्वाल्लोपः स्थानिवद्भावाद् द्विर्वचनं भविष्यति[3] ॥

विभाषा गमहनविदविशाम् ॥ ७ । २ । ६८ ॥

दृशेश्चेति वक्तव्यम् । ददृश्वान् । ददृशिवान् ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । दृशेरिति[4] वर्तते ॥ *

ऋद्धनोः स्ये ॥ ७ । २ । ७० ॥

स्वरतेर्वेट्त्वादृतः स्ये विप्रतिषेधेन ॥ १ ॥

स्वरतिलक्षणाद् वावचनादृतः स्य इत्येतद्भवति विप्रतिषेधेन[5] । स्वरतिलक्षणस्य वावचनस्यावकाशः । स्वर्ता स्वरिता । ऋतः स्य इत्यस्यावकाशः । करिष्यते हरिष्यते । इहोभयं प्राप्नोति । स्वरिष्यति अस्वरिष्यत् । ऋतः स्य इत्येतद्भवति विप्रतिषेधेन ॥ **

यमरमनमातां सक् च ॥ ७ । २ । ७३ ॥

किमुदाहरणम् । अयंसीत् व्यरंसीत् अनंसीत् अयासीत् अवासीत् ॥ नैतदस्ति ।

---

* [V. M. om. सनिं ससनिवांसम् (६९)].

** [V. M. om. अञ्जेः सिचि (७१) ; स्तुसुधूञ्भ्यः परस्मैपदेषु (७२)].

[1] गमहनजनखनघसां लोपः क्ङित्यनङि ६. ४. ९८ ; घसिभसोर्हलि ६. ४. १००.

[2] लिटि धातोरनभ्यासस्य ६. १. ८.

[3] स्थानिवदादेशोऽनल्विधौ १. १. ५९.

[4] विभाषा सृजिदृशोः ७. २. ६५.

[5] स्वरतिसूतिसूयतिधूञूदितो वा ७. २. ४४.

नास्त्यत्र विशेषः सति वेट्यसति वा ॥ इदं तर्हि । अयंसिष्टाम् अयंसिषुः । व्यरंसिष्टाम् व्यरंसिषुः । अनंसिष्टाम् अनंसिषुः । अयासिष्टाम् अयासिषुः । अवासिष्टाम् अवासिषुः ॥ इदं चाप्युदाहरणम् । अयंसीत् व्यरंसीत् अनंसीत् अयासीत् अवासीत् । ननु चोक्तं नास्त्यत्र विशेषः सति वेट्यसति वेति । अयमस्ति विशेषः । यद्यत्रेण्न स्याद्वृद्धिः प्रसज्येत[1] । इटि पुनः सति नेटि [७. २. ४] इति प्रतिषेधः सिद्धो भवति । मा भूदेवं ह्म्यन्तानामित्येवं[2] भविष्यति । अत्रापि नेटीत्यनुवर्तते । तच्चावश्यमिड्ग्रहणमनुवर्त्यमधाक्षीदित्येवमर्थम् ॥ आकारान्ताश्चापि पदपूर्वा एकवचन उदाहरणम् । मा हि[3] यासीत्[4] । यद्यत्रेण्न स्यादनुदात्तस्य ईटः श्रवणं प्रसज्येत । इटि पुनः सत्युक्तमेतदर्थवत्तु सिचश्चित्करणसामर्थ्याद्धीट उदात्तत्वमिति[5] तत्रैकादेश उदात्तेनोदात्तः [८. २. ५] इत्युदात्तत्वं सिद्धं भवति ॥ *

ईशः से ॥ ७ । २ । ७७ ॥

ईडजनोर्ध्वे च ॥ ७ । २ । ७८ ॥

किमर्थो योगविभागो नेशीडजनां स्ध्व इत्येवोच्येत । ईशो ध्वे मा भूदिति । इष्यत एव । ईशिध्व इति । ईडजनोस्तर्हि से मा भूदिति । इष्यत एव । ईडिषे जनिष इति । ईशस्तर्हि स्वे मा भूदिति । इष्यत एव । ईशिष्वेति । से तर्हि यः स्वशब्दस्तत्र[6] यथा स्यात् क्रियासमभिहोर यः स्वशब्दस्तत्र[7] मा भूदिति । अत्रापीष्यते । स भवानीशिष्वेशिष्वेत्येवायमीष्ट इति । आतश्चेष्यत एवं ह्याह सिद्धं तु लोण्मध्यमपुरुषैकवचनस्य क्रियासमभिहारे द्विर्वचनादिति[8] ॥ **

अतो येयः ॥ ७ । २ । ८० ॥

किं सार्वधातुकग्रहणमनुवर्तते[9] उताहो न । किं चार्थोऽनुवृत्त्या । बाढमर्थो यद्यकारात्परो याशब्द आर्धधातुकमस्ति । ननु चायमस्ति । चिकीर्ष्यात् जिहीर्ष्यात्[10] । लोपोऽत्र बाधको भविष्यति[11] ॥ किं तर्ह्यस्मिन्योग उदाहरणम् । पचेत् यजेत् ॥

---

* [V. M. om. स्मिपूङ्रञ्ज्वशां सनि (७४); किरश्च पञ्चभ्यः (७५); रुदादिभ्यः सार्वधातुके (७६)].

** [V. M. om. लिङः सलोपोनन्त्यस्य (७९)].

[1] वदव्रजहलन्तस्याचः ७. २. ३. [2] ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ७. २. ५. [3] हि च ८. १. ३४. [4] आदिः सिचोन्यतरस्याम् ६. १. १८७. [5] अर्थवत्तु चित्करणसामर्थ्याद्धीट उदात्तत्वम् ३. १. ४४. [6] सवाभ्यां वामौ ३. ४. ९१. [7] क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः ३. ४. २. [8] सिद्धं तु...द्विर्वचनात् ३. ४. २ वा ५. [9] रुदादिभ्यः सार्वधातुके ७. २. ७६. [10] लिङाशिषि ३. ४. ११६. [11] अतो लोपः ६. ४. ४८.

अत्राप्यतो दीर्घो यञि [७. ३. १०१] इति दीर्घत्वं प्राप्नोति । स यथैवेयादेशो दीर्घत्वं बाधत एवं लोपमपि बाधेत । तस्मात्सार्वधातुकग्रहणमनुवर्त्यम् ॥ *

आने मुक् ॥ ७ । २ । ८२ ॥

मुकि स्वरे दोषः ॥ १ ॥

मुकि सति स्वरे दोषो भवति । पच॑मानः यज॑मानः । मुका व्यवहितत्वादनुदात्तत्वं[1] न प्राप्नोति । ननु चायं मुगदुपदेशभक्तोऽदुपदेशग्रहणेन ग्राहिष्यते । न सिध्यति । अङ्गस्य मुगुच्यते विकरणान्तं चाङ्गं सोऽयं संघातभक्तोऽशक्योऽदुपदेशग्रहणेन ग्रहीतुम् ॥ एवं तर्ह्यभक्तः करिष्यते ।

अभक्ते च ॥ २ ॥

किम् । स्वरे दोषो भवति । पच॑मानः यज॑मानः । मुका व्यवहितत्वादनुदात्तत्वं न प्राप्नोति ॥ एवं तर्हि परादिः करिष्यते ।

परादौ दीर्घप्रसङ्गः ॥ ३ ॥

यदि परादिः क्रियतेऽतो दीर्घो यञि [७. ३. १०१] इति दीर्घत्वं प्राप्नोति ॥ नैष दोषः । तिङीत्येवं तत्[2] । सिध्यति । सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवास्तु । ननु चोक्तं मुकि स्वरे दोष इति । परिहृतमेतददुपदेशभक्तोऽदुपदेशग्रहणेन ग्राहिष्यते । ननु चोक्तमङ्गस्य मुगुच्यते विकरणान्तं चाङ्गं सोऽयं संघातभक्तोऽशक्योऽदुपदेशग्रहणेन ग्रहीतुमिति ॥

अथायमङ्गभक्तः स्याद्गृह्येतादुपदेशग्रहणेन । बाढं गृह्येत । अङ्गभक्तस्तर्हि भविष्यति । तत्कथम् । अतो या इयः [७. २. ८०] इत्यत्राकारग्रहणं पञ्चमीनिर्दिष्टमङ्गस्येति[3] च षष्ठीनिर्दिष्टं तत्राशक्यं विविभक्तित्वादत इति पञ्चम्याङ्गं विशेषयितुम् । तत् प्रकृतमिहानुवर्तिष्यते । एवमपि षष्ठ्यभावान्न प्राप्नोति । आन इत्येषा सप्तम्यत इति पञ्चम्याः षष्ठीं प्रकल्पयिष्यति तस्मिन्निति निर्दिष्टे पूर्वस्य [१. १. ६६] इति ॥ **

---

* [V. M. om. आतो ङितः (८१)].

** [V. M. om. ईदासः (८३)].

[1] तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः ६. १ १८६. [2] भूसुवोस्तिङि ७. २. ८८. [3] अङ्गस्य ६. ४. १.

अष्टन आ विभक्तौ ॥ ७ । २ । ८४ ॥

अष्टन्जनादिपथिमथ्यात्वेष्वान्तरतम्यादनुनासिकप्रसङ्गः ॥ १ ॥

अष्टन्जनादिपथिमथ्यात्वेष्वान्तरतम्यादनुनासिकः प्राप्नोति[1] । अष्टाभिः अष्टाभ्यः । जातः जातवान् । पन्थाः मन्थाः ॥

सिद्धमनण्त्वात् ॥ २ ॥

सिद्धमेतत् । कथम् । अनण्त्वात् । कथमनण्त्वम् । अण्सवर्णान्गृह्णातीत्युच्यते[2] न चाकारोऽण् ॥

उच्चारणसामर्थ्याद्वा ॥ ३ ॥

अथवा शुद्धोच्चारणसामर्थ्यान्न भविष्यति ॥ नैतौ स्तः परिहारौ । यत्तावदुच्यतेऽनण्त्वादिति न ब्रूमोऽण्सवर्णान्गृह्णातीति । कथं तर्हि तपरस्तत्कालस्य [१. १. ७०] इति । यदप्युच्यत उच्चारणसामर्थ्याद्वेत्यस्त्यन्यदुच्चारणे प्रयोजनम् । किम् । उत्तरार्थम् । रायो हलि [७. २. ८५] इति ॥ एवं तर्हि नेमौ पृथक्परिहारौ । एकपरिहारोऽयम् । सिद्धमनण्त्वादुच्चारणसामर्थ्याद्वेति । इह तावदष्टाभिः अष्टाभ्य इत्यनण्त्वात्सिद्धम् । जातः जातवान् पन्थाः मन्थाः उच्चारणसामर्थ्यात्सिद्धम् ॥ यद्येवं पृथक्परिहारयोरपि न दोषः । यो यत्र परिहारः स तत्र भविष्यति ॥ *

युष्मदस्मदोरनादेशे ॥ ७ । २ । ८६ ॥

अनादेशग्रहणं शक्यमकर्तुम् । कथम् । हलीत्यनुवर्तते[3] न चादेशो हलादिरस्ति ॥ तदेतदनादेशग्रहणं तिष्ठतु तावत्सांन्यासिकम् ॥ **

योऽचि ॥ ७ । २ । ८९ ॥

अज्ग्रहणं शक्यमकर्तुम् । कथम् । अविशेषेण यत्वमुत्सर्गस्तस्य हलादावात्वमपवादः[4] ॥

---

* [V. M. om. रायो हलि (८५)].

** [V. M. om. द्वितीयायां च (८७) ; प्रथमायाश्च द्विवचने भाषायाम् (८८)].

[1] जनसनखनां सञ्झलोः ६. ४. ४२ ; पथिमथ्यृभुक्षामात् ७. १. ८५ ; स्थानेन्तरतमः १. १. ५०.

[2] अणुदित्सवर्णस्य चाप्रत्ययः १. १. ६९.

[3] रायो हलि ७. २. ८५.

[4] युष्मदस्मदोरनादेशे ७. २. ८६.

शेषे लोपः ॥ ७ । २ । ९० ॥

शेषग्रहणं शक्यमकर्तुम् । कथम् । अविशेषेण[1] लोप उत्सर्गस्तस्याजादौ यत्वमपवादो हलादावात्वम्[2] ॥

मपर्यन्तस्य ॥ ७ । २ । ९१ ॥

परिग्रहणं शक्यमकर्तुम् । मान्तस्येत्येव सिद्धम् ॥ न सिध्यति । किं कारणम् । अन्तशब्दस्योभयार्थत्वात् । कथम् । अयमन्तशब्दोऽस्त्येव सह तेन वर्तते । तद्यथा । मर्यादान्तं देवदत्तस्य क्षेत्रम् । सह मर्यादयेति गम्यते । अस्ति प्राक्तस्माद्वर्तते । तद्यथा । नद्यन्तं देवदत्तस्य क्षेत्रमिति । प्राङ् नद्या इति गम्यते । तद्यः सह तेन वर्तते तस्येदं ग्रहणं यथा विज्ञायेत ॥ नैतदस्ति प्रयोजनम् । सर्वत्रैवान्तशब्दः सह तेन वर्तते । अथ कथं नद्यन्तं देवदत्तस्य क्षेत्रमिति । नद्याः क्षेत्रत्वे संभवो नास्तीति कृत्वा प्राङ् नद्या इति गम्यते ॥ अवधिद्योतनार्थं तर्हि परिग्रहणं कर्तव्यम् । मान्तस्येतीयत्युच्यमाने यत्रैव मान्ते युष्मदस्मदी तत्रैवादेशाः स्युः । क च मान्ते युष्मदस्मदी । युष्मानाचष्ट अस्मानाचष्ट इति युष्मयतेरस्मयतेश्चाप्रत्ययैः[3] ॥ *

प्रत्ययोत्तरपदयोश्च ॥ ७ । २ । ९८ ॥

किमर्थमिदमुच्यते न त्वमावेकवचने [७. २. ९७] इत्येव सिद्धम् । न सिध्यति । किं कारणम् । एकवचनाभावात् । एकवचन इत्युच्यते न चात्रैकवचनं पश्यामः[4] । प्रत्ययलक्षणेन[5] । न लुमताङ्गस्य [१. १. ६३] इति प्रत्ययलक्षणस्य प्रतिषेधः ॥ एवं तर्हीदमिह संप्रधार्यम् । लुक् क्रियतामादेशाविति किमत्र कर्तव्यम् । परत्वादादेशौ । नित्यो लुक् । कृतयोरप्यादेशयोः प्राप्नोत्यकृतयोरपि । अन्तरङ्गावादेशौ ॥ एवं तर्हि सिद्धे सति यत्प्रत्ययोत्तरपदयोस्त्वमौ शास्ति तज्ज्ञापयत्याचार्योऽन्तरङ्गानपि विधीन् बाधित्वा बहिरङ्गो लुग्भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । गोमान् प्रियोऽस्य गोमत्प्रियः यवमत्प्रियः गोमानिवाचरति गोमत्यते यवमत्यते अन्तरङ्गानपि

---

* [V. M. om. युवावौ द्विवचने (९२) ; यूयवयौ जसि (९३) ; त्वाहौ सौ (९४) ; तुभ्यमह्यौ ङयि (९५) ; तवममौ ङसि (९६) ; त्वमावेकवचने (९७)].

[1] अष्टन आ विभक्तौ ७. २. ८४. [2] योऽचि ७. २ ८९ ; युष्मदस्मदोरनादेशे ७. २. ८६. [3] णाविष्ठवत् प्रातिपदिकस्य ६. ४. १५५ ; वा. १ ; णेरनिटि ६ ४. ५१ ; क्लिलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानम् १. १. ५८ वा. २. [4] सुपो धातुप्रातिपदिकयोः २. ४. ७१. [5] प्रत्ययलोपे प्रत्ययलक्षणम् १. १. ६२.

नुमादीन्बहिरङ्गो लुग्बाधत इति[1] ॥ नैतदस्ति ज्ञापकम् । अस्त्यन्यदेतस्य वचने प्रयोजनम् । किम् । येऽन्य एकवचनादेशाः प्राप्नुवन्ति तद्बाधनार्थमेतत्स्यात् । तद्यथा । तव पुत्रस्त्वत्पुत्रः मम पुत्रो मत्पुत्रः । तुभ्यं हितं त्वद्धितम् मह्यं हितं मद्धितमिति[2] ॥ यत्तर्हि मपर्यन्तग्रहणमनुवर्तयति[3] । यद्यत्रान्य एकवचनादेशाः स्युर्मपर्यन्तानुवृत्तिरनर्थिका स्यात् ॥

त्रिचतुर्युष्मदस्मद्ग्रहणेष्वर्थग्रहणं शब्दविशेषणम् ॥ १ ॥

त्रिचतुर्युष्मदस्मद्ग्रहणेष्वर्थग्रहणं शब्दविशेषणं द्रष्टव्यम् । त्रिचतुरोः स्त्रियां तिसृचतसृ [७. २. ९९] । यद्यपि समासः पुंसि नपुंसके वा वर्तते त्रिचतुरौ च स्त्रियां वर्तेते भवत्येव तिसृचतसृभावः । प्रियास्तिस्रो ब्राह्मण्योऽस्य ब्राह्मणस्य प्रियतिसा प्रियतिस्रौ प्रियतिस्रः । प्रियचतसा प्रियचतस्रौ प्रियचतस्रः । प्रियास्तिस्रो ब्राह्मण्योऽस्य ब्राह्मणकुलस्य प्रियतिसृ प्रियतिसृणी प्रियतिसृणि । प्रियचतसृ प्रियचतसृणी प्रियचतसृणि ॥ यदा हि समासः स्त्रियां वर्तते त्रिचतुरौ च पुंसि नपुंसके वा तदा मा भूतामिति । प्रियास्त्रयो ब्राह्मणा अस्या ब्राह्मण्याः प्रियत्रिः प्रियत्री प्रियत्रयः । प्रियचत्वाः प्रियचत्वारौ प्रियचत्वारः । प्रियाणि त्रीणि ब्राह्मणकुलान्यस्या ब्राह्मण्याः प्रियत्रिः प्रियत्री प्रियत्रयः । प्रियचत्वाः प्रियचत्वारौ प्रियचत्वारः ॥

युवावौ द्विवचने [७. २. ९२] । यद्यपि समास एकार्थो वा भवति बह्वर्थो वा भवति द्व्यर्थे च युष्मदस्मदी भवत एव युवावौ । किमविशेषेण । नेत्याह । यूयवयौ जसि त्वाहौ सौ तुभ्यमह्यौ ङयि तवममौ ङसि [७. २. ९३-९६] इत्येतान्विधीन्वर्जयित्वा । अतिक्रान्तो युवामतित्वम् अत्यहम् । अतिक्रान्तौ युवामतियुवाम् अत्यावाम् । अतिक्रान्ता युवामतियूयम् अतिवयम् । अतिक्रान्तं युवामतियुवाम् अत्यावाम् । अतिक्रान्तौ युवामतियुवाम् अत्यावाम् । अतिक्रान्तान्युवामतियुवान् अत्यावान् । अतियुवया अत्यावया अतियुवाभ्याम् अत्यावाभ्याम् अतियुवाभिः अत्यावाभिः । अतितुभ्यम् अतिमह्यम् अतियुवाभ्याम् अत्यावाभ्याम् अतियुवभ्यम् अत्यावभ्यम् । अतियुवत् अत्यावत् अतियुवाभ्याम् अत्यावाभ्याम् अतियुवत् अत्यावत् । अतितव अतिमम अतियुवयोः अत्यावयोः अतियुवाकम् अत्यावाकम् । अतियुवयि अत्यावयि अतियुवयोः अत्यावयोः अतियुवासु अत्यावासु ॥

त्वमावेकवचने [७. २. ९७] । यद्यपि समासो द्व्यर्थो भवति बह्वर्थो वैकार्थे

---

[1] उगिदचां सर्वनामस्थानेऽधातोः ७. १. ७० ; सुपो धातुप्रातिपदिकयोः २. ४. ७१.
[2] तवममौ ङसि ७. २. ९६ ; तुभ्यमह्यौ ङयि ७. २. ९५.
[3] मपर्यन्तस्य ७. २. ९१.

च युष्मदस्मदी भवत एव त्वमौ । किमविशेषेण । नेत्याह । तानेव विधीन्वर्जयित्वा । अतिक्रान्तस्त्वामतित्वम् अत्यहम् । अतिक्रान्तौ त्वामतित्वाम् अतिमाम् । अतिक्रान्तास्त्वामतियूयम् अतिवयम् । अतिक्रान्तं त्वामतित्वाम् अतिमाम् । अतिक्रान्तौ त्वामतित्वाम् अतिमाम् । अतिक्रान्तांस्त्वामतित्वान् अतिमान् । अतित्वया अतिमया अतित्वाभ्याम् अतिमाभ्याम् अतित्वाभिः अतिमाभिः । अतितुभ्यम् अतिमह्यम् अतित्वाभ्याम् अतिमाभ्याम् अतित्वभ्यम् अतिमभ्यम् । अतित्वत् अतिमत् अतित्वाभ्याम् अतिमाभ्याम् अतित्वत् अतिमत् । अतितव अतिमम अतित्वयोः अतिमयोः अतित्वाकम् अतिमाकम् । अतित्वयि अतिमयि अतित्वयोः अतिमयोः अतित्वासु अतिमासु ॥

यद्येवं यूयवयौ जसि त्वाहौ सौ तुभ्यमह्यौ ङयि तवममौ ङसीत्येतेभ्यो विधिभ्यः परत्वात्त्वमावेकवचन इति प्राप्नोति सावकाशा ह्येते विधय इदानीं भवन्ति । कोऽवकाशः । अनेकार्थे युष्मदस्मदी । त्वमावेकवचन इत्यस्यावकाशः । अन्यानि वचनानि । एकार्थयोर्युष्मदस्मदोरेतेषु वचनेषूभयं प्राप्नोति । परत्वात्त्वमावेकवचन इति प्राप्नोति ॥ नैष दोषः । शेष इति[1] वर्तते । कश्च शेषः । जसादिभिरव्याप्तं यदेकवचनं तस्मिञ्शेषे । अशेषत्वान्न भविष्यति । अथवा त्वमावेकवचन इत्यत्र यूयवयौ जसि त्वाहौ सौ तुभ्यमह्यौ ङयि तवममौ ङसीत्येतदनुवर्तिष्यते ॥

त्रिचतुरोः स्त्रियां तिसृचतसृ ॥ ७ । २ । ९९ ॥

तिसृभावे संज्ञायां कन्युपसंख्यानम् ॥ १ ॥

तिसृभावे संज्ञायां कन्युपसंख्यानं कर्तव्यम् । तिसृका नाम ग्रामः ॥

चतसर्याद्युदात्तनिपातनं च ॥ २ ॥

चतसर्याद्युदात्तनिपातनं कर्तव्यम् । त्रिचतुरोः स्त्रियां तिसृचतसृ । किं प्रयोजनम् । चतस्रः पश्य । शासि स्वरो[2] मा भूदिति ॥ किं चान्यत् ।

उपदेशिवद्वचनं च ॥ ३ ॥

उपदेशिवद्भावश्च वक्तव्यः । किं प्रयोजनम् ।

---

[1] शेषे लोपः ७. २. ९०. [2] चतुरः शसि ६. १. १६७.

स्वरसिद्ध्यर्थम् ॥ ४ ॥

उपदेशावस्थायामेवाद्युदात्तनिपातने कृते विभक्तिस्वरेण[1] बाधनं यथा स्यात् । चतसृणामिति ॥ स तर्ह्युपदेशिवद्भावो वक्तव्यः । न वक्तव्यः ।

उक्तं वा ॥ ५ ॥

किमुक्तम् । विभक्तिस्वरभावश्च हलादिग्रहणादाद्युदात्तनिपातने हि हलादिग्रहणानर्थक्यमिति[2] ॥

अचि र ऋतः ॥ ७ । २ । १०० ॥

अचि रादेशे जस्युपसंख्यानं गुणपरत्वात् ॥ १ ॥

अचि रादेशे जस्युपसंख्यानं कर्तव्यम् । तिस्रस्तिष्ठन्ति । चतस्रस्तिष्ठन्ति । किं पुनः कारणं न सिध्यति । गुणपरत्वात् । परत्वाद्गुणः प्राप्नोति[3] ॥ तत्तर्हि वक्तव्यम् ।

न वानवकाशत्वाद्रस्य ॥ २ ॥

न वा वक्तव्यम् । किं कारणम् । अनवकाशत्वाद्रस्य । अनवकाशो रादेशो गुणं बाधिष्यते । सावकाशो रादेशः । कोऽवकाशः । तिस्रः पश्य । चतस्रः पश्य । नैषोऽस्त्यवकाशः । अत्रापि पूर्वसवर्णदीर्घः प्राप्नोति[4] । स यथैव पूर्वसवर्णं बाधत एवं गुणमपि बाधिष्यते ॥ गुणोऽप्यनवकाशः । सावकाशो गुणः । कोऽवकाशः । हे कर्तः । नैष सर्वनामस्थाने गुणः । कस्तर्हि । संबुद्धिगुणः[5] । अयं तर्हि । हे मातः । एषोऽपि संबुद्धिगुणः एव । नात्र संबुद्धिगुणः प्राप्नोति । किं कारणम् । अम्बार्थनद्योर्ह्रस्वः [७. ३. १०७] इति ह्रस्वत्वेन भवितव्यम् । भवेद्दीर्घाणां ह्रस्ववचनसामर्थ्यान्न स्याद्ध्रस्वानां तु खलु ह्रस्वत्वं क्रियतां संबुद्धिगुण इति परत्वात्संबुद्धिगुणेन भवितव्यम् ॥ अथापि कथंचित्सावकाशो गुणः स्यादेवमपि न दोषः । पुरस्तादपवादा अनन्तरान्विधीन्बाधन्त इत्येवमयं रादेशो जसि गुणं[6] बाधते सर्वनामस्थानगुणं[7] न बाधिष्यते । तस्मात्सुष्ठूच्यतेऽचि रादेशे जस्युपसंख्यानं गुणपरत्वादिति ॥

---

[1] षट्त्रिचतुर्भ्यो हलादिः ६. १. १७९. [2] विभक्तिस्वरभावश्च हलादिग्रहणात् ६. १. १६७ वा. २. [3] जसि च ७. ३. १०९ ; ऋतो ङिसर्वनामस्थानयोः ७. ३. ११०. [4] प्रथमयोः पूर्वसवर्णः ६. १. १०२. [5] ह्रस्वस्य गुणः ७. ३. १०८. [6] जसि च ७. ३. १०९. [7] ऋतो ङिसर्वनामस्थानयोः ७. ३. ११०.

जराया जरसन्यतरस्याम् ॥ ७ । २ । १०१ ॥

नुमोऽनङ्जरसौ भवतो विप्रतिषेधेन । नुमोऽवकाशः[1] । त्रपुणी जतुनी तुम्बुरुणी । अनङोऽवकाशः[2] । प्रियसक्थ्ना ब्राह्मणेन । इहोभयं प्राप्नोति । दध्ना सक्थ्ना । जरसोऽवकाशः । जरसा जरसे । नुमोऽवकाशः[3] । कुण्डानि वनानि । इहोभयं प्राप्नोति । अतिजरांसि ब्राह्मणकुलानि । अनङ्जरसौ नुमो भवतो विप्रतिषेधेन ॥

अथेह लुक्कस्मान्न भवति[4] । अतिजरसं पश्येति । किं पुनः कारणं द्वितीयैकवचनमेवोदाह्रियते न पुनः प्रथमैकवचनमपि । अतिजरसं तिष्ठतीति । अस्त्यत्र विशेषः । नात्राकृतेऽम्भावे[5] जरस्भावः प्राप्नोति । किं कारणम् । अचीत्युच्यते । यदा च जरस्भावः कृतस्तदा लुग्न भविष्यति संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति । यद्येवमतिजरसम् अतिजरसैरित्यत्र[6] न प्राप्नोति[7] अतिजरम् अतिजरैरिति भवितव्यम् । गोनर्दीय आह । इष्टमेवैतत्संगृहीतं भवति । अतिजरम् अतिजरैरिति भवितव्यं सत्यामेतस्यां परिभाषायां संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति ॥

त्यदादीनामः ॥ ७ । २ । १०२ ॥

त्यदादीनां द्विपर्यन्तानामकारवचनम् ॥ १ ॥

त्यदादीनां द्विपर्यन्तानामत्वं वक्तव्यम् । किं प्रयोजनम् । युष्मदस्मदन्तानां भवदन्तानां वा मा भूदिति[8] ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् ।

त्यदादीनामकारेण सिद्धत्वाद्युष्मदस्मदोः ।
शेषे लोपस्य लोपेन ज्ञायते प्राक्ततोऽदिति ॥ १ ॥

यदयं त्यदादीनामत्वेन सिद्धे युष्मदस्मदोः शेषे लोपं शास्ति[9] तज्ज्ञापयत्याचार्यः प्राक्ततोऽत्वं भवतीति । न सर्वेषामिति ॥

अपि वोपसमस्तार्थमत्वाभावात्कृतं भवेत् ।

नैतदस्ति ज्ञापकम् । उपसमस्तार्थमेतत्स्यात् । अतियूयम् अतिवयम् । उपसमस्तानां हि त्यदादीनामत्वं नेष्यते । अतितत् अतितदौ अतितदः ॥

---

[1] इकोचि विभक्तौ ७. १. ७३. [2] अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ७. १. ७५. [3] नपुंसकस्य झलचः ७. १. ७२. [4] स्वमोर्नपुंसकात् ७. १. २३. [5] अतोऽम् ७. १. २४. [6] अतोऽम् ७. १. २४ ; अतो भिस ऐस् ७. १. ९. [7] जराया जरसन्यतरस्याम् ७. २. १०१. [8] सर्वादीनि सर्वनामानि १. १. २७ गणशब्द २६. २७. २८. [9] शेषे लोपः ७. २. ९०.

टिलोपष्टावभावार्थः कर्तव्य इति तत्स्मृतम् ॥ २ ॥

यस्तु शेषे लोपष्टिलोपः स वक्तव्यः । किं प्रयोजनम् । टाप्प्रतिषेधार्थम् । टाब्मा भूदिति ॥ स तर्हि टिलोपो वक्तव्यः । न वक्तव्यः ।

अथवा शेषसप्तम्या शेषे लोपो विधीयते ।

इह युष्मदस्मदोर्लोप इतीयतान्त्यस्य लोपः सिद्धः । सोऽयमेवं सिद्धे सति यच्छेषग्रहणं करोति तस्यैतत्प्रयोजनमवशिष्टस्य लोपो यथा स्यादिति ॥

लुप्तशिष्टे हि तस्याहुः कार्यसिद्धिं मनीषिणः ॥ ३ ॥

एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति न सर्वेषां त्यदादीनामत्वं भवतीति यदयं किमः कः [७. २. १०३] इति कादेशं शास्ति । इतरथा हि किमोऽद्भवतीत्येव ब्रूयात् । सिद्धे विधिरारभ्यमाणो ज्ञापकार्थो भवति न च किमोऽत्वेन सिध्यति । अत्वे हि सत्यन्त्यस्य प्रसज्येत । सिद्धमन्त्यस्य पूर्वेणैव तत्रारम्भसामर्थ्यादिकारस्य भविष्यति । कुतो नु खल्वेतदनन्त्यार्थ आरम्भे सतीकारस्य भविष्यति न पुनः ककारस्य स्यात् ॥ यत्तर्हि किमो ग्रहणं करोति । इतरथा हि कादद्भवतीत्येव ब्रूयात् । एवमपि ककारमात्रात्परस्य प्राप्नोति । त्यदादीनामिति वर्तते न चान्यत्किमस्त्यदादिषु ककारवदस्ति ॥ एवमप्यनैकान्तिकं ज्ञापकम् । एतावत्तु ज्ञाप्यते न सर्वेषां त्यदादीनामत्वं भवतीति तत्र कुत एतद् द्विपर्यन्तानां भविष्यति न पुनर्युष्मदस्मदन्तानां वा स्याद्भवदन्तानां वा । किंचावश्यं खल्वप्युत्तरार्थं किमो ग्रहणं कर्तव्यम् । कु तिहोः क्वाति [१०४ ; १०५] इति । कादेशः खल्वप्यवश्यं साकच्कार्थो वक्तव्यः कः कौ क इत्येवमर्थम् । तस्माद् द्विपर्यन्तानामत्वं वक्तव्यम् ॥

त्यदादीनामकारेण सिद्धत्वाद्युष्मदस्मदोः ।
शेषे लोपस्य लोपेन ज्ञायते प्राक्ततोऽदिति ॥ १ ॥
अपि वोपसमस्तार्थमत्वाभावात्कृतं भवेत् ।
टिलोपष्टावभावार्थः कर्तव्य इति तत्स्मृतम् ॥ २ ॥
अथवा शेषसप्तम्या शेषे लोपो विधीयते ।
लुप्तशिष्टे हि तस्याहुः कार्यसिद्धिं मनीषिणः ॥ ३ ॥*

क्वाति ॥ ७ । २ । १०५ ॥

किमर्थं कादेश उच्यते न कु तिहात्स्वित्येवोच्येत[1] । का रूपसिद्धिः क्व । यणादेशेन सिद्धम् । न सिध्यति । ओर्गुणः प्रसज्येत[2] ॥

---

* [V. M. om. किमः कः (१०३); कु तिहोः (१०४)].

[1] कु तिहोः ७. २. १०४. [2] ओर्गुणः ६. ४. १४६.

तदोः सः सावनन्त्ययोः ॥ ७ । २ । १०६ ॥

किमर्थमनन्त्ययोरित्युच्यते । अन्त्ययोर्मा भूदिति ॥ नैतदस्ति प्रयोजनम् । अत्वमन्त्ययोर्बाधकं भविष्यति[1] । अनवकाशा विधयो बाधका भवन्ति सावकाशं चात्वम् । कोऽवकाशः । द्विशब्दः । सत्वमपि सावकाशम् । कोऽवकाशः । अनन्त्यः । कथं पुनः सत्यन्त्येऽनन्त्यस्य सत्वं स्यात् । भवेद्यस्तकारदकाराभ्यामङ्गं विशेषयेत्तस्यानन्त्ययोर्न स्याद्वयं तु खल्वङ्गेन तकारदकारौ विशेषयिष्यामः ॥ एवमप्युभयोः सावकाशयोः परत्वात्सत्वं प्राप्नोति । किं च स्याद्यद्यन्त्ययोः सत्वं स्यात् । इह हे स इत्येङ्ह्रस्वादिति[2] संबुद्धिलोपो न स्यात् । इह च या सा अत इति[3] टान्न स्यात् । तस्मादनन्त्ययोरिति वक्तव्यम् ॥ न वक्तव्यम् । एवं वक्ष्यामि । तदोः सः सौ । ततोऽदसः[4] । अदसश्च दकारस्य सो भवतीति । इदमिदानीं किमर्थम् । नियमार्थम् । अदस एव दकारस्य नान्यस्य दकारस्येति । यदि नियमः क्रियते द्वीयतेरप्रत्ययो द्व इति प्राप्नोति स्व इति चेष्यते । यथालक्षणमप्रयुक्ते ॥

अदस औ सुलोपश्च ॥ ७ । २ । १०७ ॥

अदसः सोर्भवेदौत्वं किं सुलोपो विधीयते ।

अदस एव सोर्भवेदौत्वं[5] किमर्थं सुलोपो विधीयते ।

ह्रस्वाल्लुप्येत संबुद्धिः

इह हेऽसावित्येङ्ह्रस्वात्संबुद्धेः [६. १. ६९] इति लोपः प्रसज्येत ॥

न हलः

हलो लोपः संबुद्धिलोपः । तद्धल्ग्रहणं कर्तव्यम् ।

प्रकृतं हि तत् ॥ १ ॥

प्रकृतं हल्ग्रहणम् । क्व प्रकृतम् । हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् [६. १. ६८] इति । तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । ह्रस्वादित्येषा पञ्चमी हलिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्य [१. १. ६७] इति ॥

---

[1] त्यदादीनामः ७. २. १०२.
[2] एङ्ह्रस्वात् संबुद्धेः ६. १. ६९.
[3] अजाद्यतष्टाप् ४. १. ४.
[4] अदस औ सुलोपश्च ७. २. १०७.
[5] त्यदादीनामः ७. २. १०२ ; वृद्धिरेचि ६. १. ८८.

आप एत्त्वं भवेत्तस्मिन्

इह हेऽसौ ब्राह्मणि आङि चापः संबुद्धौ च [७. ३. १०५ ; १०६] इत्येत्त्वं प्रसज्येत ।

न झलीत्यनुवर्तनात् ।

झलीति तत्रानुवर्तते । क्व प्रकृतम् । सुपि च बहुवचने झल्येत् [७. ३. १०२ ; १०३] इति ॥

प्रत्ययस्थाच्च कादित्त्वम्

इह च असकौ ब्राह्मणीति प्रत्ययस्थात्कात्पूर्वस्य [७. ३. ४४] इतीत्त्वं प्रसज्येत । नैष दोषः । प्रश्लिष्टनिर्देशोऽयम् । आ आप् आबिति । इहापि तर्हि न प्राप्नोति । कारिके हारिके इति ॥

शीभावश्च प्रसज्यते ॥ २ ॥

इह च शीभावश्च प्राप्नोति । असौ ब्राह्मणी । आप उत्तरस्यौङः शी भवतीति[1] शीभावः प्राप्नोति । तस्मात्सोर्लोपो वक्तव्यः ॥

सावौत्वप्रतिषेधः साकच्काद्वा सादुत्वं च ॥ १ ॥

सावौत्वप्रतिषेधः साकच्काद्वा वक्तव्यः । साच्च परस्योत्वं वक्तव्यम् । असकौ असुकः ॥

उत्तरपद भूतानामादेश उपदेशिवद्वचनम् ॥ २ ॥

उत्तरपदभूतानां त्यदादीनामादेश उपदेशिवद्भावो वक्तव्यः । परमाहम् परमायम् परमानेन । किं प्रयोजनम् ।

अनादिष्टार्थम् ॥ ३ ॥

अकृत एकादेश आदेशा यथा स्युरिति ॥ किं पुनः कारणमेकादेशस्तावद्भवति न पुनरादेशाः । न परत्वादादेशैर्भवितव्यम् ।

बहिरङ्गलक्षणत्वात् ॥ ४ ॥

बहिरङ्गा आदेशाः । अन्तरङ्ग एकादेशः । असिद्धं बहिरङ्गमन्तरङ्गे ॥

स तर्ह्युपदेशिवद्भावो वक्तव्यः । न वक्तव्यः । आचार्यप्रवृत्तिर्ज्ञापयति पूर्वपदोत्तरपदयोस्तावत्कार्यं भवति नैकादेश इति यदयं नेन्द्रस्य परस्य [७. ३. २२]

---

[1] औङ आपः ७. १. १८.

इति प्रतिषेधं शास्ति । कथं कृत्वा ज्ञापकम् । इन्द्रे द्वावचौ । तत्रैको यस्येति[१] लोपेनापह्रियतेऽपर एकादेशेन । अनच्क इन्द्रः संवृत्तः । तत्र को वृद्धेः प्रसङ्गः । पश्यति त्वाचार्यः पूर्वपदोत्तरपदयोस्तावत्कार्यं भवति नैकादेश इति ततो नेन्द्रस्य परस्येति प्रतिषेधं शास्ति ॥

अदसः सोर्भवेदौत्वं किं सुलोपो विधीयते ।
ह्रस्वाल्लुप्येत संबुद्धिर्न हलः प्रकृतं हि तत् ॥ १ ॥
आप एत्वं भवेत्तस्मिन्न झलीत्यनुवर्तनात् ।
प्रत्ययस्थाच्च कादित्त्वं शीभावश्च प्रसज्यते ॥ २ ॥*

मृजेर्वृद्धिः ॥ ७ । २ । ११४ ॥

मृजेर्वृद्धिविधौ क्विप्रतिषेधः ॥ १ ॥

मृजेर्वृद्धिविधौ क्व्यन्तस्य प्रतिषेधो वक्तव्यः । कंसपरिमृड्भ्याम् कंसपरिमृड्भिः ॥

धातोः स्वरूपग्रहणे वा तत्प्रत्ययविज्ञानात्सिद्धम् ॥ २ ॥

अथवा धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्सिद्धम् । धातुप्रत्यये कार्यं भवतीत्येषा परिभाषा कर्तव्या ॥ कान्येतस्याः परिभाषायाः प्रयोजनानि ।

प्रयोजनं सृजिदृशिमस्जिनशिहन्तिगिरत्यर्थम् ॥ ३ ॥

सृजि । रज्जुसृड्भ्याम् रज्जुसृड्भिः[२] । सृजि । दृशि । देवदृग्भ्याम् देवदृग्भिः[२] । दृशि । मस्जि । उदकमग्भ्याम् उदकमग्भिः[३] । मस्जि । नशि । प्रनड्भ्याम् प्रनड्भिः[३] नशि । हन्ति । वार्त्रघ्नः भ्रौणघ्नः[४] । हन्ति । गिरति । देवगिरः[५] ॥

यदि स्वरूपग्रहण इत्युच्यते प्रसृब्भ्याम् प्रसृब्भिः अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् [६. १. ५९] इत्यम् प्राप्नोति । एवं तर्हीयं परिभाषा कर्तव्या धातोः कार्यमुच्यमानं तत्प्रत्यये भवतीति ॥ सा तर्ह्येषा परिभाषा कर्तव्या । न कर्तव्या । आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति यदयं भ्रौणहत्ये तत्वं शास्ति[६] ॥

अचो ञ्णिति ॥ ७ । २ । ११५ ॥

अज्ग्रहणं किमर्थम्[७] ।

---

* [V. M. om. इदमो मः (१०८) ; दश्च (१०९) ; यः सौ (११०) ; इदोऽय् पुंसि (१११) ; अनाप्यकः (११२) ; हलि लोपः (११३)].

[१] यस्येति च ६. ४. १४८. [२] सृजिदृशोर्झल्यमकिति ६. १. ५८. [३] मस्जिनशोर्झलि ७. १. ६०. [४] हनस्तोऽचिण्णलोः ७. ३. ३२. [५] अचि विभाषा ८. २. २१. [६] दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि ६. ४. १७४. [७] इको गुणवृद्धी १. १. ३.

वृद्धावज्ग्रहणं गोऽर्थम् ॥ १ ॥

वृद्धावज्ग्रहणं क्रियते गोतो वृद्धिर्यथा स्यात् । गौरिति ॥ नैतदस्ति प्रयोजनम् । णित्करणसामर्थ्यादेवात्र वृद्धिर्भविष्यति[1] ॥ अथ योगविभागः किमर्थो न ञ्णित्यत उपधाया इत्येवोच्येत[2] । का रूपसिद्धिः चायकः लावकः कारकः । गुणे[3] कृते ऽयवो रपरत्वे चात उपधाया इत्येव सिद्धम् ।

योगविभागः सखिव्यञ्जनाद्यर्थः ॥ २ ॥

योगविभागः क्रियते सख्यर्थो व्यञ्जनाद्यर्थश्च । सख्यर्थस्तावत्[4] । सखायौ सखायः । व्यञ्जनाद्यर्थः । जैत्रम् यौत्रम् च्यौत्रम् ॥ योगविभागे चेदानीं सखिव्यञ्जनाद्यर्थे क्रियमाणे ऽज्ग्रहणमपि कर्तव्यं भवति । किं प्रयोजनम् । गोऽर्थम् । ननु चोक्तं णित्करणसामर्थ्यादेवात्र वृद्धिर्भविष्यतीति । अस्त्यन्यण्णित्करणस्य प्रयोजनम् । किम् । गावौ गावः । अवादेशे कृते ऽत उपधाया इति वृद्धिर्यथा स्यात् । यत्तु सौ णित्करणं तदनवकाशं तस्यानवकाशत्वादेव वृद्धिर्भविष्यति । यथैव खल्वपि णित्करणसामर्थ्यादनिकोऽपि वृद्धिः प्रार्थ्यत एवं तत्वमपि प्राप्नोति । तत्वमपि हि ञ्णितीत्युच्यते[5] । तस्मादज्ग्रहणं कर्तव्यम् ॥

तद्धितेष्वचामादेः ॥ ७ । २ । ११७ ॥

अज्ग्रहणं कर्तव्यम् । ननु च क्रियत एव । द्वितीयं कर्तव्यं यथाचामादिग्रहणमज्विशेषणं विज्ञायेत । अचामादेरच इति । अथाक्रियमाणेऽज्ग्रहणे कस्याचामादिग्रहणं विशेषणं स्यात् । इग्विशेषणमित्याह । अचामादेरिक इति[6] । तत्र को दोषः । इहैव स्यात् । ऐतिकायनः औपगवः । इह न स्यात् । गार्ग्यः वात्स्य इति ॥ तत्तर्ह्यज्ग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । अचो ञ्णिति [११५] इति । यदि तदनुवर्तते ऽत उपधायाः [११६] अचश्चेत्यज्मात्रस्योपधाया वृद्धिः प्रसज्येत । छेदक इति । अकारेण तपरेणाचं विशेषयिष्यामः । अचोऽत इति । इहेदानीमच इत्येवानुवर्तते ऽत इति निवृत्तम् । अथवा मण्डूकगतयोऽधिकाराः । यथा मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः । अथवै-

---

* [V. M. om. अत उपधायाः (११६)].

[1] गोतो णित् ७. १. ९०. [2] अत उपधायाः ७. २. ११६. [3] सार्वधातुकार्धधातुकयोः ७. ३. ८४. [4] सख्युरसंबुद्धौ ७. १. ९२. [5] हनस्तोऽचिण्णलोः ७. ३. ३२. [6] इको गुणवृद्धी १. १. ३.

कयोगः करिष्यते । अचो ञ्णित्यत उपधायाः । ततस्तद्धितेष्वचामादेरिति । न चैकयोगेऽनुवृत्तिर्भवति ॥

तद्धितेष्वचामादिवृद्धावन्त्योपधलक्षणप्रतिषेधः ॥ १ ॥

तद्धितेष्वचामादिवृद्धावन्त्योपधलक्षणाया वृद्धेः[1] प्रतिषेधो वक्तव्यः । क्रौष्ट्रः जागत इति । ननु चाचामादिवृद्धिरन्त्योपधलक्षणां वृद्धिं बाधिष्यते । कथमन्यस्योच्यमानान्यस्य बाधिका स्यात् । असति खल्वपि संभवे बाधनं भवत्यस्ति च संभवो यदुभयं स्यात् ॥

लोकविज्ञानात्सिद्धम् ॥ २ ॥

सत्यपि संभवे बाधनं भवति । तद्यथा । ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेति सत्यपि संभवे दधिदानस्य तक्रदानं निवर्तकं भवति । एवमिहापि सत्यपि संभवेऽचामादिवृद्धिरन्त्योपधलक्षणां वृद्धिं बाधिष्यते ॥ विषम उपन्यासः । नाप्राप्ते दधिदाने तक्रदानमारभ्यते तत्प्राप्त आरभ्यमाणं बाधकं भविष्यति । इह पुनरप्राप्तायामन्त्योपधलक्षणायां वृद्धावचामादिवृद्धिरारभ्यते । सुश्रुत् सौश्रुत इति ॥

पुष्करसद्ग्रहणाद्वा ॥ ३ ॥

अथवा यदयमनुशतिकादिषु[2] पुष्करसच्छब्दं पठति तज्ज्ञापयत्याचार्योऽचामादिवृद्धावन्त्योपधलक्षणा वृद्धिर्न भवतीति ॥ *

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमस्याध्यायस्य द्वितीये पादे द्वितीयमाह्निकम् ॥ पादश्च समाप्तः ॥

---

* [V. M. om. किति च (११८)].

[1] अचो ञ्णिति ७. २. ११५ ; अत उपधायाः ७. २. ११६.

[2] अनुशतिकादीनां च ७. ३. २० ; पुष्करसद् अनुशतिकादिगण ७. ३. २०, गणशब्द ९.

देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् ॥ ७ । ३ । १ ॥

देविकादिषु तदादिग्रहणम् ॥ १ ॥

देविकादिषु तदादिग्रहणं कर्तव्यम् । देविकाद्यादीनामिति वक्तव्यम् । इहापि यथा स्यात् । दाविकाकूलाः शालयः । शांशपास्थला देवाः ॥ किं पुनः कारणं न सिध्यति ।

अन्यत्र तद्ग्रहणात्तदन्तग्रहणाद्वा ॥ २ ॥

अन्यत्र हि तस्य वा ग्रहणं भवति तदन्तस्य वा न चेदं तत्रापि तदन्तम् ॥

आद्यज्विशेषणत्वात्सिद्धम् ॥ ३ ॥

आद्यज्विशेषणं देविकादयः । नैवं विज्ञायते देविकादीनामङ्गानामचामादेराकारो भवतीति । कथं तर्हि । ञ्णित्यङ्गस्याचामादेराकारो भवति स चेद्देविकादीनामाद्यज्भवतीति ॥

आन्तरतम्यानिवर्तकत्वाद्वा ॥ ४ ॥

अथवा नानेनानन्तरतमा वृद्धिर्निर्वर्त्यते । किं तर्हि । अन्तरतमानेन निवर्त्यते । सिद्धात्र वृद्धिस्तद्धितेष्वचामादेः [७. २. ११७] इत्येव तत्रानेनान्तरतमा वृद्धिर्निवर्त्यते ॥ परिहारान्तरमेवेदं मत्वा पठितं कथं चेदं परिहारान्तरं स्यात् । यदि नाद्यज्विशेषणं देविकादयः । अवश्यं चैतदेवं विज्ञेयमाद्यज्विशेषणं देविकादय इति । यदि नाद्यज्विशेषणं देविकादयः स्युरिहापि प्राप्नोति सुदेविकायां भवः सौदेविक इति । अथात्राप्याद्यज्विशेषणत्वादित्येव सिद्धं परिहारान्तरं न भवति ॥ न ब्रूमो यत्र क्रियमाणे दोषस्तत्र कर्तव्यमिति । किं तर्हि । यत्र क्रियमाणे न दोषस्तत्र कर्तव्यम् । क्व च क्रियमाणे न दोषः । संज्ञाविधौ[1] । वृद्धिरादैज्देविकादीनामाकार इति । सिध्यति । सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवास्तु । ननु चोक्तं देविकादिषु तदादिग्रहणमन्यत्र तद्ग्रहणात्तदन्तग्रहणाद्वेति । परिहृतमेतदाद्यज्विशेषणत्वात्सिद्धमिति ॥

---

[1] वृद्धिरादैच् १. १. १.

न्यग्रोधे च केवलग्रहणात् ॥ ५ ॥

न्यग्रोधे[1] च केवलग्रहणान्मन्यामह आद्यज्विशेषणं देविकादय इति । तस्य हि केवलग्रहणस्यैतत् प्रयोजनमिह मा भूत् न्याग्रोधमूलाः शालय इति । यदि चाद्यज्विशेषणं देविकादयस्ततः केवलग्रहणमर्थवद्भवति ॥ तदेतत् कथं कृत्वा ज्ञापकं भवति । यदि न्यग्रोधशब्दोऽव्युत्पन्नं प्रातिपदिकं भवति । अथ हि न्यग्रोहतीति न्यग्रोधस्ततो नियमार्थं पदान्त इति कृत्वा न ज्ञापकं भवति ॥

वहीनरस्येद्वचनम् ॥ ६ ॥

वहीनरस्येत्त्वं वक्तव्यम् । वहीनरस्यापत्यं वैहीनरिः ॥

कुणरवाडवस्त्वाह । नैष वहीनरः । कस्तर्हि । विहीनर एषः । विहीनो नरः कामभोगाभ्यां विहीनरः । विहीनरस्यापत्यं वैहीनरिः ॥ *

न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ॥ ७ । ३ । ३ ॥

य्वाभ्यां परस्यावृद्धित्वम्

य्वाभ्यां परस्यावृद्धित्वं सिद्धम् । कुतः ।

अपवादौ वृद्धेर्हि तौ ।

अपवादौ हि वृद्धेस्तावैचावुच्येते ॥

नित्यावैचौ तयोर्वृद्धिः

अथवा नित्यावैचौ । कृतायामपि वृद्धौ प्राप्नुतोऽकृतायामपि । नित्यत्वादैचोः कृतयोर्यद्यपि वृद्धिस्तयोरेव ।

किमर्थं नेति शिष्यते ॥ १ ॥

अथ किमर्थं प्रतिषेध उच्यते ।

ऐचोर्विषयार्थं प्रतिषेधसंनियुक्तवचनम् ॥ १ ॥

ऐचोर्विषयार्थं प्रतिषेधसंनियोगेनैचावुच्येते ।

यत्र य्वाभ्यां परावृद्धिस्तत्राध्यश्वेर्यथा न तौ ।

यत्र य्वाभ्यां परस्यावृद्धित्वमुच्यते तत्रैचौ यथा स्याताम् । इह मा भूताम् । आध्यश्विः दाध्यश्विः माध्वश्विरिति ॥ नैतदस्ति प्रयोजनम् ।

---

* [V. M. om. केकयमित्रयुप्रलयानां यादेरियः (२)].

[1] न्यग्रोधस्य च केवलस्य ७. ३. . [2] न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ७. ३. ३.

अचामादेर्य्वाभ्यां हि तौ

अचामादिनात्र य्वौ विशेषयिष्यामः । अचामादेर्यौ य्वाविति ॥

कथं द्व्याशीतिके न तौ ॥ २ ॥

द्व्याशीतिक इत्यत्र कस्मान्न तौ भवतः ।

यत्र वृद्धिरचामादेस्तत्रैचावत्र घोर्हि सा ।

यत्राचामादेरित्येवं[1] वृद्धिस्तत्रैचावुच्येते । अत्र घोरित्येवं वृद्धिः । किमिदं घोरिति । उत्तरपदस्येति[2] ॥ उत्तरपदाधिकारेऽप्यवश्यमैजागमोऽनुवर्त्यः पूर्वत्र्यलिन्दे भवः पूर्वत्रैयलिन्द इत्येवमर्थम्[3] । नैष दोषः । उत्तरपदेनात्राचामादि विशेषयिष्यामोऽचामादिना य्वौ । उत्तरपदस्याचामादेर्यौ य्वाविति ॥

अथ कस्मात्पदान्ताभ्याम्

अथ किमर्थं पदान्ताभ्यामित्युच्यते ।

यथेणो न भवेद्यणः ॥ ३ ॥

इणो यणादेशे मा भूत् । यतश्छात्रा याता इति ॥

इह वैयाकरणः सौवश्व इति शाकलं प्राप्नोति[4] य्वोश्च स्थानिवद्भावादायावौ प्राप्नुतः[5] ।

शाकलायावादेशेषु चोक्तम् ॥ २ ॥

किमुक्तम् । शाकले तावदुक्तं सिन्नित्यसमासयोः शाकलप्रतिषेध[6] इति । आयावोः किमुक्तम् । अचः पूर्वविज्ञानादैचोः सिद्धमिति[7] ॥

य्वाभ्यां परस्यावृद्धित्वमपवादौ वृद्धेर्हि तौ ।
नित्यावैचौ तयोर्वृद्धिः किमर्थं नेति शिष्यते ॥ १ ॥
यत्र य्वाभ्यां परावृद्धिस्तत्राध्यश्वेर्यथा न तौ ।
अचामादेर्य्वाभ्यां हि तौ कथं द्व्याशीतिके न तौ ॥ २ ॥
यत्र वृद्धिरचामादेस्तत्रैचावत्र घोर्हि सा ।
अथ कस्मात्पदान्ताभ्यां यथेणो न भवेद्यणः ॥ ३ ॥

द्वारादीनां च ॥ ७ । ३ । ४ ॥

अथ परस्यावृद्धिरित्यनुवर्तत उताहो न । किं चातः । यद्यनुवर्तते शौवं मांसम् टि-

---

[1] तद्धितेष्वचामादेः ; किति च ७. २. ११७ ; ११८. [2] संख्यायाः संवत्सरसंख्यस्य च ७. ३. १५ ; उत्तरपदस्य ७. ३. १०. [3] प्राचां ग्रामनगराणाम् ७. ३. १४. [4] इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ६. १. १२७. [5] इको यणचि ; एचोऽयवायावः ६. १. ७७ ; ७८. [6] सिन्नित्यसमासयोः शाकलप्रतिषेधः ६. १. १२७ वा. १. [7] अचः पूर्वविज्ञानादैचोः सिद्धम् १. १. ५७ वा. १.

लोपे[1] कृत ऐजागमो न प्राप्नोति । अथ निवृत्तं स्वाध्यायशब्दो द्वारादिषु पठ्यते तत्र यावन्तो यणः सर्वेभ्यः पूर्व ऐजागमः प्राप्नोति । यथेच्छसि तथास्तु ॥ अस्तु तावदनुवर्तते । कथं शौवं मांसम् । आनुपूर्व्या सिद्धमेतत् । नात्राकृत ऐजागमे टिलोपः प्राप्नोति । किं कारणम् । प्रकृत्यैकाच् [६. ४. १६३] इति प्रकृतिभावेन भवितव्यम् । तदेतदानुपूर्व्या सिद्धं भवति ॥ अथवा पुनरस्तु निवृत्तम् । ननु चोक्तं स्वाध्यायशब्दो द्वारादिषु पठ्यते तत्र यावन्तो यणः सर्वेभ्यः पूर्व ऐजागमः प्राप्नोतीति । कः पुनरर्हति स्वाध्यायशब्दं द्वारादिषु पठितुम् । एवं किल पठ्येत स्वमध्ययनं स्वाध्याय इति । तच्च न । सुष्ठु वाध्ययनं स्वाध्यायः शोभनं वाध्ययनं स्वाध्यायः[2] । अथापि स्वमध्ययनं स्वाध्याय एवमपि न दोषः । अचामादेरिति[3] वर्तते ॥ *

श्वादेरिञि ॥ ७ । ३ । ८ ॥

अयं श्वन्शब्दो द्वारादिषु पठ्यते तत्र कः प्रसङ्गो यत्तदादेः स्यात् । नैव प्राप्नोति नार्थः प्रतिषेधेन । तदादिविधिना प्राप्नोति । नैव तदादिविधिरस्ति ॥ अत उत्तरं पठति ।

प्रतिषेधे श्वादिग्रहणं ज्ञापकमन्यत्र श्वन्ग्रहणे तदादिग्रहणस्य शौवहानाद्यर्थम् ॥ १ ॥

प्रतिषेधे श्वादिग्रहणं क्रियते ज्ञापकार्थम् । किं ज्ञाप्यम् । एतज्ज्ञापयत्याचार्योऽन्यत्र श्वन्ग्रहणे तदादिविधिर्भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । शौवहानाद्यर्थम् । शौवहानं[4] नाम नगरम् । शौवादंष्ट्रो[6] मणिरिति ॥

इकारादिग्रहणं च श्वागणिकाद्यर्थम् ॥ २ ॥

इकारादिग्रहणं च कर्तव्यम् । किं प्रयोजनम् । श्वागणिकाद्यर्थम् । श्वगणेन चरति श्वागणिकः[7] ॥

तदन्तस्य चान्यत्र प्रतिषेधः ॥ ३ ॥

तदन्तस्य चान्यत्र प्रतिषेधो वक्तव्यः । श्वाभस्त्रेः स्वं श्वाभस्त्रम् ॥ **

---

* [V. M. om. न्यग्रोधस्य च केवलस्य (५) ; न कर्मव्यतिहारे (६) ; स्वागतादीनां च (७)].

** [V. M. om. पदान्तस्यान्यतरस्याम् (९)].

[1] प्राणिरजतादिभ्योऽञ् ४. ३. १५४ ; नस्तद्धिते ६. ४. १४४. [2] न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ७. ३. ३. [3] तद्धितेष्वचामादेः ७. २. ११७. [4] द्वारादीनां च ७. ३. ४. [5] तदस्मिन्नस्तीति देशे तन्नाम्नि ४. २. ६७ ; द्वारादीनां च ७. ३. ४. [6] अन्येषामपि दृश्यते ६. ३. १३७ ; तत्र भवः ४. ३. ५३ ; द्वारादीनां च ७. ३. ४. [7] श्वगणाट्ठञ्च ४. ४. ११. [8] इञश्च ४. २. ११२.

उत्तरपदस्य ॥ ७ । ३ । १० ॥

किमर्थमिदमुच्यते । अवयवादृतोः [७. ३. ११] इति वक्ष्यति तदुत्तरपदस्य यथा स्यादचामादेर्मा भूत् । नैतदस्ति प्रयोजनम् । अवयवादिति पञ्चमी तत्रान्तरेणाप्युत्तरपदग्रहणमुत्तरपदस्यैव भविष्यति[1] । उत्तरार्थं तर्हि सुसर्वार्धाज्जनपदस्य [१२] इति । सुसर्वार्धादिति पञ्चमी । दिशोऽमद्राणाम् [१३] । दिश इति पञ्चमी । प्राचां ग्रामनगराणाम् [१४] । दिश इत्येव । संख्यायाः संवत्सरसंख्यस्य च [१५] । संख्याया इति पञ्चमी । वर्षस्याभविष्यति [१६] । संख्याया इत्येव । परिमाणान्तस्यासंज्ञाशाणयोः [१७] इति । संख्याया इत्येव ॥ इदं तर्हि प्रयोजनं जे प्रोष्ठपदानाम् [१८] उत्तरपदस्य यथा स्यात् पूर्वपदस्य मा भूत् । प्रोष्ठपदासु जातः प्रोष्ठपादो[2] ब्राह्मणः ॥

तद्धितेष्वचामादिवृद्धेरुत्तरपदवृद्धिर्विप्रतिषेधेन द्व्याशीतिकाद्यर्थम् ॥ १ ॥

तद्धितेष्वचामादिवृद्धेरुत्तरपदवृद्धिर्भवति विप्रतिषेधेन । किं प्रयोजनम् । द्व्याशीतिकाद्यर्थम् । अचामादिवृद्धेरवकाशः । ऐतिकायनः औपगवः[3] । उत्तरपदवृद्धेरवकाशः । द्विषाष्टिकः त्रिषाष्टिकः । इहोभयं प्राप्नोति । द्व्याशीतिकः त्र्याशीतिकः । उत्तरपदवृद्धिर्भवति विप्रतिषेधेन । कः पुनरत्र विशेषोऽचामादिवृद्धौ वा सत्यामुत्तरपदवृद्धौ वा । अयमस्ति विशेषः । यद्यत्राचामादिवृद्धिः स्यादैजागमः प्रसज्येत[5] ॥ *

प्राचां ग्रामनगराणाम् ॥ ७ । ३ । १४ ॥

नगरग्रहणं किमर्थं न प्राचां ग्रामाणामित्येव सिद्धम् । न सिध्यति । अन्यो ग्रामोऽन्यन्नगरम् । कथं ज्ञायते । एवं हि कश्चित् कंचित्पृच्छति । कुतो भवानागच्छति ग्रामात् । स आह । न ग्रामान्नगरादिति ॥ ननु च भो य एव ग्रामस्तन्नगरम् । कथं ज्ञायते । लोकतः । ये हि ग्रामे विधयो नेष्यन्ते साधीयस्ते नगरे न क्रियन्ते । तद्यथा । अभक्ष्यो ग्राम्यकुक्कुटो ऽभक्ष्यो ग्राम्यशूकर इत्युक्ते सुतरां नागरोऽपि न भक्ष्यते । तथा ग्रामे नाध्येयमिति साधीयो नगरे नाधीयते । तस्माद्य एव

---

* [V. M. om. अवयवादृतोः (११) ; सुसर्वार्धाज्जनपदस्य (१२) ; दिशोऽमद्राणाम् (१३)].

[1] तस्मादित्युत्तरस्य १. १. ६७. [2] नक्षत्रेण युक्तः कालः ४. २. ३ ; लुबविशेषे ४. २. ४ ; संधिवेलाद्यृतुनक्षत्रेभ्योऽण् ४. ३. १६. [3] तद्धितेष्वचामादेः ७. २. ११७ ; किति च ७. २. ११८. [4] संख्यायाः संवत्सरसंख्यस्य च ७. ३. १५. [5] न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ७. ३. ३.

ग्रामस्तन्नगरम् । कथं यदुक्तमेवं हि कश्चित्कंचित्पृच्छति कुतो भवानागच्छति ग्रामात् स आह न ग्रामान्नगरादिति । संस्त्यायविशेषमसावाचष्टे । संस्त्यायविशेषा ह्येते ग्रामो घोषो नगरं संवाह इति ॥ एवं तर्हि सिद्धे सति यद् ग्रामग्रहणे नगरग्रहणं करोति तज्ज्ञापयत्याचार्योऽन्यत्र ग्रामग्रहणे नगरग्रहणं न भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । विशिष्टलिङ्गो नदीदेशोऽग्रामाः [२. ४. ७] इत्यत्र नगरप्रतिषेधश्चोदितः स न वक्तव्यो भवति ॥ यद्येतज्ज्ञाप्यत उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात् [४. २. १०९] इत्यत्र नगरग्रहणं कर्तव्यम् । वाहीकग्रामेभ्यश्च [४. २. ११७] नगरग्रहणं कर्तव्यम् । दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु [६. २. १०३] नगरग्रहणं कर्तव्यम् । इदं चतुर्थं ज्ञापकार्थम् । तत्रातिनिर्बन्धो न लाभः । तस्माद्यस्मिन्नेव ग्रामग्रहणे नगरग्रहणं नेष्यते तस्य प्रतिषेधो वक्तव्यः ॥

संख्यायाः संवत्सरसंख्यस्य च ॥ ७ । ३ । १५ ॥

संवत्सरग्रहणमनर्थकं परिमाणान्तस्येति कृतत्वात् ॥ १ ॥

संवत्सरग्रहणमनर्थकम् । किं कारणम् । परिमाणान्तस्येति कृतत्वात् । परिमाणान्तस्यासंज्ञाशाणयोः [७. ३. १७] इत्येव सिद्धम् ॥

ज्ञापकं तु कालपरिमाणानां वृद्धिप्रतिषेधस्य ॥ २ ॥

एवं तर्हि ज्ञापयत्याचार्यः कालपरिमाणानां वृद्धिर्न भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । द्वैरात्रिकः त्रैरात्रिकः अत्र वृद्धिर्न भवति । नैतदस्ति प्रयोजनम् । नास्त्यत्र विशेषः सत्यां वोत्तरपदवृद्धावसत्यां वा । इदं तर्हि । द्वैसमिकः त्रैसमिकः । इदं चापि प्रयोजनं द्वैरात्रिकः त्रैरात्रिकः । ननु चोक्तं नास्त्यत्र विशेषः सत्यां वोत्तरपदवृद्धावसत्यां वेति । अयमस्ति विशेषः । यद्यत्रोत्तरपदवृद्धिः स्यादचामादेर्वृद्धिर्न स्यात् ॥

अपर आह । ज्ञापकं तु कालपरिमाणानां परिमाणग्रहणस्य । एवं तर्हि ज्ञापयत्याचार्यः कालपरिमाणानां परिमाणग्रहणेन ग्रहणं न भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि [४. १. २२] द्विवर्षा त्रिवर्षा । परिमाणपर्युदासेन पर्युदासो न भवति ॥ *

---

* [V. M. om. वर्षस्याभविष्यति (१६); परिमाणान्तस्यासंज्ञाशाणयोः (१७); जे प्रोष्ठपदानाम् (१८); हृद्भगसिन्ध्वन्ते पूर्वपदस्य च (१९); अनुशतिकादीनां च (२०); देवताद्वन्द्वे च (२१); नेन्द्रस्य परस्य (२२); दीर्घाच्च वरुणस्य (२३); प्राचां नगरान्ते (२४); जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम् (२५); अर्धात् परिमाणस्य पूर्वस्य तु वा (२६); नातः परस्य (२७)].

प्रवाहणस्य ढे ॥ ७ । ३ । २८ ॥

परस्य वृद्धिर्नेत्यनुवर्तत उताहो न[1] । किं चातः । यद्यनुवर्तते प्रवाहणेयी[2] भार्यास्येति प्रवाहणेयीभार्यः वृद्धिनिमित्तस्येति[3] पुंवद्भावप्रतिषेधो न प्राप्नोति । अथ निवृत्तं न दोषो भवति । यथा न दोषस्तथास्तु ॥ अथवा पुनरस्त्वनुवर्तते । ननु चोक्तं प्रवाहणेयी भार्यास्य प्रवाहणेयीभार्यः वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधो न प्राप्नोतीति । नैष दोषः । मा भूदेवम् । जातेरित्येवं[4] भविष्यति ॥ *

यथातथयथापुरयोः पर्यायेण ॥ ७ । ३ । ३१ ॥

अयं योगः शक्योऽवक्तुम् । कथमयाथातथ्यम् आयथातथ्यम् अयाथापुर्यम् आयथापुर्यम् । यदा तावत्पूर्वपदस्य वृद्धिस्तदैवं विग्रहः करिष्यते । न यथातथा अयथातथा । अयथातथाभाव आयथातथ्यम् । यदोत्तरपदस्य वृद्धिस्तदैवं विग्रहः करिष्यते । यथातथाभावो याथातथ्यम् । न याथातथ्यमयाथातथ्यम् ॥

हनस्तोऽचिण्णलोः ॥ ७ । ३ । ३२ ॥

हन्तेस्तकारे तद्धिते प्रतिषेधः ॥ १ ॥

हन्तेस्तकारे तद्धिते प्रतिषेधो वक्तव्यः । वार्त्रघ्नम् भ्रौणघ्नम्[5] ॥

उक्तं वा ॥ २ ॥

किमुक्तम् । धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्सिद्धमिति[6] ॥

आतो युक् चिण्कृतोः ॥ ७ । ३ । ३३ ॥

कृद्ग्रहणं किमर्थम् । इह मा भूत् । ददौ दधौ । नैतदस्ति प्रयोजनम् । अचिण्णलोरिति[7] वर्तते । यद्यचिण्णलोरिति वर्तते अदायि अधायीत्यत्र न प्राप्नोति । वचनाच्चिणि भविष्यति । अचिण्णलोरिति वर्तते ॥ एवमपि चौडिः बालाकिरित्यत्र

---

* [V. M. om. तत्प्रत्ययस्य च (२९); नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् (३०)].

[1] नातः परस्य ७. ३. २७.
[2] शुभ्रादिभ्यश्च ४. १. १२३.
[3] वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे ६. ३. ३९.
[4] जातेश्च ६. ३. ४१.
[5] षपूर्वहन्धृतराज्ञामणि ६. ४. १३५.
[6] धातोः स्वरूपग्रहणे वा तत्प्रत्ययविज्ञानात् सिद्धम् ७. २. ११४ वा. २.
[7] हनस्तोऽचिण्णलोः ७. ३. ३२.
[8] बाह्वादिभ्यश्च ४. १. ९६.

प्राप्नोति । लोपो[1]ऽत्र बाधको भविष्यति । इदमिह संप्रधार्यम् । लोपः क्रियतां युगिति किमत्र कर्तव्यम् । परत्वाद्युक् । एवं तर्ह्यचामादेरिति[2] वर्तते । यत्राचामादिराकारस्तत्र युगिति ॥ एवमपि ज्ञा देवतास्य स्थालीपाकस्य ज्ञैः[3] स्थालीपाकः अत्र प्राप्नोति । तस्मात्क्वद्ग्रहणं कर्तव्यम् ॥

नोदात्तोपदेशस्य मान्तस्यानाचमेः ॥ ७ । ३ । ३४ ॥

अत्यल्पमिदमुच्यतेऽनाचमेरिति । अवमिकामिचमीनामिति वक्तव्यम् । वामः कामः आचामः ॥ *

शाछासाह्वाव्यावेपां युक् ॥ ७ । ३ । ३७ ॥

णिच्प्रकरणे धूञ्प्रीञोर्नुग्वचनम् ॥ १ ॥

णिच्प्रकरणे धूञ्प्रीञोर्नुग्वक्तव्यः । धूनयति प्रीणयति ॥

पातेर्लुग्वचनम् ॥ २ ॥

पालयति ॥ **

प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः ॥ ७ । ३ । ४४ ॥

स्थग्रहणं किमर्थम् । इदं विचारयिष्यत इत्त्वे कग्रहणं संघातग्रहणं वा स्याद्वर्णग्रहणं वेति । तद्यदा संघातग्रहणं तदा स्थग्रहणं कर्तव्यमिहापि यथा स्यात् कारिका हारिका । यदा हि वर्णग्रहणं तदा केवलः ककारः प्रत्ययो नास्तीति कृत्वा वचनाद्भविष्यति ॥

अथासुप इति कथमिदं विज्ञायते । असुब्वतोऽङ्गस्येति । आहोस्विन्न चेत्सुपः पर आबिति । किं चातः । यदि विज्ञायतेऽसुब्वतोऽङ्गस्येति बहुचर्मिका अत्र न प्राप्नोति । अथ विज्ञायते न चेत्सुपः पर आबिति न दोषो भवति । यथा न दोषस्तथास्तु ॥

इदं विचार्यत इत्त्वे कग्रहणं संघातग्रहणं वा स्याद्वर्णग्रहणं वेति । कश्चात्र विशेषः ।

---

* [V. M. om. जनिवध्योश्च (३५) ; अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग् णौ (३६)].

** [V. M. om. वो विधूनने जुक् (३८) ; लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने (३९) ; भियो हेतुभये षुक् (४०) ; स्फायो वः (४१) ; शदेरगतौ तः (४२) ; रुहः पोऽन्यतरस्याम् (४३)].

[1] यस्येति च ६. ४. १४८. [2] तद्धितेष्वचामादेः ७. २. ११७. [3] साऽस्य देवता ४. २. २४.

इत्त्वे कग्रहणं संघातग्रहणं चेदेतिकास्वप्राप्तिः ॥ १ ॥

इत्त्वे कग्रहणं संघातग्रहणं चेदेतिकास्वप्राप्तिः । एतिकाश्चरन्ति[1] । वचनाद्भविष्यति । अस्ति वचने प्रयोजनम् । किम् । कारिका हारिका ॥ अस्तु तर्हि वर्णग्रहणम् ।

वर्णग्रहणं चेद् व्यवहितत्वादप्रसिद्धिः ॥ २ ॥

वर्णग्रहणं चेद् व्यवहितत्वान्न प्राप्नोति । कारिका हारिका । अकारेण व्यवहितत्वान्न प्राप्नोति । एकादेशे कृते नास्ति व्यवधानम् । एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद् व्यवधानमेव ॥ एवं तर्ह्याहायं प्रत्ययस्थात्कात्पूर्वस्येति न क्वचिदव्यवधानं तत्र वचनाद्भविष्यति ।

वचनप्रामाण्यादिति चेद्रथकट्यादिष्वतिप्रसङ्गः ॥ ३ ॥

वचनप्रामाण्यादिति चेद्रथकट्यादिषु दोषो भवति । रथकट्यौ[2] गर्गकाम्यौ[3] ॥ नैष दोषः । येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात् । केन च नाव्यवधानम् । वर्णेनैकेन । संघातेन पुनर्व्यवधानं भवति न भवति च ॥

अथवा पुनरस्तु संघातग्रहणम् । ननु चोक्तमित्त्वे कग्रहणं संघातग्रहणं चेदेतिकास्वप्राप्तिरिति । परिहृतमेतद्वचनाद्भविष्यतीति । ननु चोक्तमस्ति वचने प्रयोजनम् । किम् । कारिका हारिकेति । अत्राप्येकादेशे कृते व्यपवर्गाभावान्न प्राप्नोति । अन्तादिवद्भावेन व्यपवर्गः । उभयत आश्रये नान्तादिवत् । एवं तर्ह्येकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद् व्यपवर्गः । एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति भवत्येवंजातीयकानामपीत्त्वमिति यदयं न यासयोः [४५] इति प्रतिषेधं शास्ति ॥

ममकनरकयोरुपसंख्यानमप्रत्ययस्थत्वात् ॥ ४ ॥

ममकनरकयोरुपसंख्यानं कर्तव्यम् । मामिकौ[4] नरिकौ[5] । किं पुनः कारणं न सिध्यति । अप्रत्ययस्थत्वात् ॥

त्यकूत्यपोश्च प्रतिषिद्धत्वात् ॥ ५ ॥

त्यकूत्यपोश्चोपसंख्यानं कर्तव्यम् । दाक्षिणात्यिकौ[6] अमात्यिकौ[7] । किं पुनः कारणं न सिध्यति । प्रतिषिद्धत्वात् । उदीचामातः स्थाने यकपूर्वायाः [४६] इति प्रतिषिद्धत्वात् ॥

---

[1] अव्ययसर्वनाम्नामकच् प्राक् टेः ५. ३. ७१. [2] इनित्रकट्यचश्च ४. २. ५१. [3] काम्यच्च ३. १. ९; अ प्रत्ययात् ३. ३. १०२. [4] तवकममकावेकवचने ४. ३. ३. [5] आतोनुपसर्गे कः ('नरं कायतीति नरिका'—कैयट) ३. २. ३. [6] दक्षिणापश्चात्पुरसस्त्यक् ४. २. ९८; अज्ञाते ५. ३. ७३. [7] अव्ययात् त्यप् ४. २. १०४; अज्ञाते ५. ३. ७३.

न यासयोः ॥ ७ । ३ । ४५ ॥

न यत्तदोरिति वक्तव्यम् । इहापि यथा स्यात् । यकां यकामधीते । तकां तकां पचामह इति ॥

प्रतिषेधे त्यकन उपसंख्यानम् ॥ १ ॥

प्रतिषेधे त्यकन उपसंख्यानं कर्तव्यम् । उपत्यका अधित्यका[1] ॥ तत्तर्ह्युपसंख्यानं कर्तव्यम् । न कर्तव्यम् । आचार्यप्रवृत्तिर्ज्ञापयति नैवंजातीयकानामित्त्वं भवतीति यदयं मृदस्तिकन् [५. ४. ३९] इतीत्त्वभूतं निर्देशं करोति ॥

पावकादीनां छन्दस्युपसंख्यानम् ॥ २ ॥

पावकादीनां छन्दस्युपसंख्यानं कर्तव्यम् । हिरण्यवर्णाः शुचयः[2] पावकाः । ऋक्षकाः[3] अलोमकाः । छन्दसीति किमर्थम् । पाविका अलोमिका ॥

आशिषि च ॥ ३ ॥

आशिषि चोपसंख्यानं कर्तव्यम् । जीवताज्जीवका । नन्दतान्नन्दका । भवताद्भवका[4] ॥

उत्तरपदलोपे च ॥ ४ ॥

उत्तरपदलोपे चोपसंख्यानं कर्तव्यम् । देवदत्तिका देवका । यज्ञदत्तिका यज्ञका[5] ॥

क्षिपकादीनां च ॥ ५ ॥

क्षिपकादीनां चोपसंख्यानं कर्तव्यम् । क्षिपका ध्रुवका धुवका ॥

तारका ज्योतिषि ॥ ६ ॥

तारका ज्योतिष्युपसंख्यानं कर्तव्यम् । तारका । ज्योतिषीति किमर्थम् । तारिका दासी ॥

वर्णका तान्तवे ॥ ७ ॥

वर्णका तान्तव उपसंख्यानं कर्तव्यम् । वर्णका । तान्तव इति किमर्थम् । वर्णिका भागुरी लोकायतस्य ॥

---

[1] उपाधिभ्यां त्यकन्नासन्नारूढयोः ५. २. ३४. [2] तै. सं. ५. ६. १. १. [3] ऋक्षा वा एषाऽलोमका तै. सं. २. ६. ५. १ ; अथ वा इयं तर्ह्यृक्षालोमकासीत् काठसं १२. १३ ; …… अलोमिका तै. सं. २. ५. ६. १. [4] आशिषि च ३. १. १५०. [5] ठाजादावूर्ध्वं द्वितीयादचः ५. ३. ८३ ; द्वितीयादचो लोपे संध्यक्षरद्वितीयत्वे तदादेर्लोपवचनम् ५. ३. ८३ वा. ३.

वर्तका शकुनौ प्राचाम् ॥ ८ ॥

वर्तका शकुनौ प्राचामुपसंख्यानं कर्तव्यम् । वर्तका शकुनिः । शकुनाविति किमर्थम् । वर्तिका भागुरी लोकायतस्य । प्राचामिति किमर्थम् । वर्तिका ॥

अष्टका पितृदेवत्ये ॥ ९ ॥

अष्टका पितृदेवत्य उपसंख्यानं कर्तव्यम् । अष्टका । पितृदेवत्य इति किमर्थम् । अष्टिका[1] खारी ॥

वा सूतकापुत्रकावृन्दारकाणाम् ॥ १० ॥

वा सूतकापुत्रकावृन्दारकाणामुपसंख्यानं कर्तव्यम् । सूतका सूतिका । पुत्रका पुत्रिका । वृन्दारका वृन्दारिका ॥

उदीचामातः स्थाने यकपूर्वायाः ॥ ७ । ३ । ४६ ॥

किमर्थं स्त्रीलिङ्गनिर्देशः क्रियते न यकपूर्वस्येत्येवोच्येत । स्त्रीविषयो य आकारस्तस्य स्थाने योऽकारस्तस्य प्रतिषेधो यथा स्यात् । इह मा भूत् । शुभं यातीति शुभंयाः शुभंयिका[2] । भद्रंयिका ॥

यकपूर्वे धात्वन्तप्रतिषेधः ॥ १ ॥

यकपूर्वे धात्वन्तप्रतिषेधो वक्तव्यः । किं प्रयोजनम् । सुनयिका अशोकिका अपाकिका ॥

भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि ॥ ७ । ३ । ४७ ॥

एषाद्वे नञ्पूर्वे अनुदाहरणे असुप इति[3] प्रतिषेधात् ॥

अथ भस्त्राग्रहणं किमर्थं नाभाषितपुंस्कादित्येव सिद्धम्[4] ।

भस्त्राग्रहणमुपसर्जनार्थम् ॥ १ ॥

उपसर्जनार्थोऽयमारम्भः । अभस्त्रिका अभस्त्रका ॥

---

[1] संख्याया अतिशदन्तायाः कन् ५. १. २२.

[2] अज्ञाते ५. ३. ७३ ; केऽणः ७. ४. १३.

[3] प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः ७. ३. ४४.

[4] अभाषितपुंस्काच्च ७. ३. ४८.

नञ्पूर्वग्रहणानर्थक्यं चोत्तरपदमात्रस्येद्वचनात् ॥ २ ॥

नञ्पूर्वग्रहणं चानर्थकम् । किं कारणम् । उत्तरपदमात्रस्येद्वचनात् । उत्तरपदमात्रस्येत्त्वं वक्तव्यम् । निर्भस्त्रका निर्भस्त्रिका । बहुभस्त्रका बहुभस्त्रिका ॥ *

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमस्याध्यायस्य तृतीये पादे प्रथममाह्निकम् ॥

---

* [V. M. om. अभाषितपुंस्काच्च (४८) ; आदाचार्याणाम् (४९)].

ठस्येकः ॥ ७ । ३ । ५० ॥

किमिदं ठादेशे वर्णग्रहणमाहोस्वित्संघातग्रहणम् । कश्चात्र विशेषः ।

ठादेशे वर्णग्रहणं चेद्धात्वन्तस्य प्रतिषेधः ॥ १ ॥

ठादेशे वर्णग्रहणं चेद्धात्वन्तस्य प्रतिषेधो वक्तव्यः । पठिता पठितुम् ॥ अस्तु तर्हि संघातग्रहणम् ।

संघातग्रहणं चेदुणादिमाथितिकादीनां प्रतिषेधः ॥ २ ॥

संघातग्रहणं चेदुणादिमाथितिकादीनां प्रतिषेधो वक्तव्यः । उणादीनां तावत् । कण्ठः वण्ठः शण्ठः । इह च मथितं पण्यमस्य माथितिक इत्यकारलोपे कृते तान्तादिति कादेशः प्राप्नोति[1] । वर्णग्रहणे पुनः सत्यल्विधिरयं भवति[2] ॥

तस्माद्विशिष्टग्रहणम् ॥ ३ ॥

तस्माद्विशिष्टस्य ठकारस्य ग्रहणं कर्तव्यम् ॥

न कर्तव्यम् । अस्तु तावद्वर्णग्रहणम् । ननु चोक्तं ठादेशे वर्णग्रहणं चेद्धात्वन्तस्य प्रतिषेध इति । नैष दोषः । अङ्गादिति वर्तते । न वा अङ्गादिति पञ्चम्यस्ति । एवं तर्हि प्रत्ययस्थस्येति वर्तते । क्व प्रकृतम् । प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः [७. ३. ४४] इति । तद्वै पञ्चमीनिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । अर्थाद्विभक्तिविपरिणामो भविष्यति । तद्यथा । उच्चानि देवदत्तस्य गृहाणि । आमन्त्रयस्वैनम् । देवदत्तमिति गम्यते । देवदत्तस्य गावोऽश्वा हिरण्यम् । आढ्यो वैधवेयः । देवदत्त इति गम्यते । पुरस्तात्षष्ठीनिर्दिष्टं सदर्थात्प्रथमानिर्दिष्टं द्वितीयानिर्दिष्टं च भवति । एवमिहापि पुरस्तात्पञ्चमीनिर्दिष्टं सदर्थात्षष्ठीनिर्दिष्टं भविष्यति । एवमप्युणादीनां प्रतिषेधो वक्तव्यः । न वक्तव्यः । उणादयोऽव्युत्पन्नानि प्रातिपदिकानि । एवमपि कर्मठ इत्यत्र[3] प्राप्नोति । एवं तर्ह्यङ्गस्येति[4] संबन्धषष्ठी विज्ञास्यते । अङ्गस्य यष्ठकारः । किं चाङ्गस्य ठकारः । निमित्तम् । यस्मिन्नङ्गमित्येतद्भवति । कस्मिंश्चैतद्भवति । प्रत्यये ॥ अथवा पुनरस्तु संघातग्रहणम् । ननु चोक्तं संघातग्रहणं चेदुणादिमाथितिकादीनां प्रतिषेध इति । उणादीनां तावत्प्रतिषेधो न वक्तव्यः । परिहृतमेतदुणादयो

---

[1] तदस्य पण्यम् ४. ४. ५१ ; ठस्येकः ७. ३. ५० ; यस्येति च ६. ४. १४८ ; इसुसुक्तान्तात् कः ७. ३. ५१.

[2] स्थानिवदादेशोऽनल्विधौ १. १. ५६.

[3] कर्मणि घटोऽठच् ५. २. ३५.

[4] अङ्गस्य ६. ४. १.

ऽव्युत्पन्नानि प्रातिपदिकानीति । यदप्युच्यत इह च मथितं पण्यमस्य माथितिक इत्यकारलोपे कृते तान्तादिति कादेशः प्राप्नोतीति । नैष दोषः । अकारलोपस्य स्थानिवद्भावान्न भविष्यति । न सिध्यति । पूर्वविधौ स्थानिवद्भावो[1] न चायं पूर्वविधिः । अयमपि पूर्वविधिः । पूर्वस्मादपि विधिः पूर्वविधिरिति ॥ अथाप्युणादयो व्युत्पाद्यन्त एवमपि न दोषः । क्रियते न्यास एव विशिष्टग्रहणं ठस्येति ॥

इसुसुक्तान्तात् कः ॥ ७ । ३ । ५१ ॥

इह कस्मान्न भवति । आशिषो[2] तरत्याशिषिकः[3] । उषो[4] तरत्यौषिकः । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति ॥ अथेह कथं भवितव्यम् । दोर्भ्यां तरति । दौष्क इति भवितव्यम् । कथम् । यदि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते ॥*

हो हन्तेर्ञ्णिन्नेषु ॥ ७ । ३ । ५४ ॥

किमिदं ञ्णिन्नकारग्रहणं हन्तिविशेषणम् । ञ्णिन्नकारपरस्य हन्तेर्यो हकार इति । आहोस्विद्धकारविशेषणम् । ञ्णिन्नकारपरस्य हकारस्य स चेद्धन्तेरिति । कश्चात्र विशेषः ।

हन्तेस्तत्परस्येति चेन्नकारेऽप्रसिद्धिः ॥ १ ॥

हन्तेस्तत्परस्येति चेन्नकारेऽप्रसिद्धिः । घ्नन्ति घ्नन्तु अघ्नन् ॥ अस्तु तर्हि हकारविशेषणम् ।

हकारस्येति चेञ्ञ्णित्यप्राप्तिः ॥ २ ॥

हकारस्येति चेञ्ञ्णित्यप्राप्तिः । घातयति घातकः । किं कारणम् । नकारेण व्यवहितत्वान्न प्राप्नोति ॥ वचनाद्भविष्यति । इहापि वचनात् प्राप्नोति । हननमिच्छति हननीयति हननीयतेर्ण्वुल् हननीयक इति ॥

स्थानिवद्भावाच्चाचो नकारेऽप्रसिद्धिः ॥ ३ ॥

स्थानिवद्भावाच्चाचो नकारेऽप्रसिद्धिः । घ्नन्ति घ्नन्तु[5] ॥ वचनाद्भविष्यति ।

---

* [V. M. om. चजोः कु घिण्यतोः (५२) ; न्यङ्क्वादीनां च (५३)].

[1] अचः परस्मिन् पूर्वविधौ १. १. ५७. [2] शास इत्त्व आशासः क्वौ ६. ४. ३४ वा. १. [3] तरति ४. ४. ५. [4] वचिस्वपियजादीनां किति च ६. १. १५. [5] गमहनजनखनघसां लोपः क्ङित्यनङि ६. ४. ९८.

वचनप्रामाण्यादिति चेदलोपे प्रतिषेधः ॥ ४ ॥

वचनप्रामाण्यादिति चेदलोपे प्रतिषेधो वक्तव्यः । हन्ता हन्तुम् ॥ नकारग्रहणसामर्थ्यादलोपे न भविष्यति । अस्त्यन्यन्नकारग्रहणस्य प्रयोजनम् । किम् । श्रूयमाणविशेषणम् । यत्र नकारः श्रूयते तत्र यथा स्यात् । इह मा भूत् । हतः हथ इति[1] ॥

सिद्धं तूपधालोप इति वचनात् ॥ ५ ॥

सिद्धमेतत् । कथम् । उपधालोपे चेति वक्तव्यम् । सिध्यति । सूत्रं तर्हि भिद्यते ॥

यथान्यासमेवास्तु । ननु चोक्तं हन्तेस्तत्परस्येति चेन्नकारेऽप्रसिद्धिरिति । वचनाद्भविष्यति ॥ अथवा पुनरस्तु हकारविशेषणम् । ननु चोक्तं हकारस्येति चेञ्णित्यप्राप्तिरिति । वचनाद्भविष्यति । ननु चोक्तमिहापि वचनात्प्राप्नोति हननीयक इति । नैष दोषः । येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात् । न च क्वचिद्धात्ववयवेनाव्यवधानमेतेन पुनः संघातेन व्यवधानं भवति न च भवति ॥ यदप्युच्यते स्थानिवद्भावाच्चाचो नकारेऽप्रसिद्धिरिति वचनाद् भविष्यति । ननु चोक्तं वचनप्रामाण्यादिति चेदलोपे प्रतिषेध इति । नैष दोषः । आनन्तर्यमिहाश्रीयते हकारस्य नकार इति । क्वचिच्च संनिपातकृतमानन्तर्यं शास्त्रकृतमनानन्तर्यं क्वचिच्च न संनिपातकृतं नापि शास्त्रकृतम् । लोपे संनिपातकृतमानन्तर्यमलोपे नैव संनिपातकृतं नापि शास्त्रकृतम् । यत्र कुतश्चिदेवानन्तर्यं तदाश्रयिष्यामः ॥

अभ्यासाच्च ॥ ७ । ३ । ५५ ॥

अभ्यासात्कुत्वमसुपः ॥ १ ॥

अभ्यासात्कुत्वमसुप इति वक्तव्यम् । इह मा भूत् । हननमिच्छति हननीयति हननीयतेः सन् जिहननीयिषतीति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । हन्तेरभ्यासादित्युच्यते न चैष हन्तेरभ्यासः । हन्तेरेषोऽभ्यासः । कथम् । एकाचो द्वे प्रथमस्य [६. १. १] इति । एवं तर्हि हन्तेरङ्गस्य योऽभ्यासस्तस्मादित्युच्यते न चैष हन्तेरङ्गस्याभ्यासः । हन्तेरङ्गस्यैषोऽभ्यासः । कथम् । एकाचो द्वे प्रथमस्येति । एवं तर्हि यस्मिन्हन्तिरङ्गं तस्मिन्योऽभ्यासस्तस्मादित्युच्यते यस्मिंश्चात्र हन्तिरङ्गं[2] न तस्मिन्नभ्यासो यस्मिंश्चाभ्यासो[3] न तस्मिन्हान्तिरङ्गं भवति ॥

---

[1] अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति ६. ४. ३७.

[2] ल्युट् च ३. ३. ११५.

[3] धातोः कर्मणः समानकर्तृकादिच्छायां वा ३. १. ७.

हेरचङि ॥ ७ । ३ । ५६ ॥

अचङीति किमर्थम् । प्राजीहयद्दूतम् ॥

हेश्चङि प्रतिषेधानर्थक्यमङ्गान्यत्वात् ॥ १ ॥

हेश्चङि प्रतिषेधोऽनर्थकः । किं कारणम् । अङ्गान्यत्वात् । ण्यन्तमेतदङ्गमन्यद्भवति । लोपे[1] कृते नाङ्गान्यत्वम् । स्थानिवद्भावादङ्गान्यत्वमेव ॥

ज्ञापकं त्वन्यत्र ण्यधिकस्य कुत्वविज्ञानार्थम् ॥ २ ॥

एवं तर्हि ज्ञापयत्याचार्योऽन्यत्र ण्यधिकस्य कुत्वं भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । प्रजिघाययिषतीत्यत्र कुत्वं सिद्धं भवति ॥

सन्लिटोर्जेः ॥ ७ । ३ । ५७ ॥

ज्रिग्रहणे ज्यः प्रतिषेधः ॥ १ ॥

जिग्रहणे ज्यः[2] प्रतिषेधो वक्तव्यः । जिज्यतुः जिज्युरिति ॥ स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवमेतस्य न भविष्यति । सा तर्ह्येषा परिभाषा कर्तव्या । अवश्यं कर्तव्या अध्याप्य गत इत्येवमर्थम्[3] ॥ *

न क्वादेः ॥ ७ । ३ । ५९ ॥

क्वादिजिव्रजियाचिरुचीनामप्रतिषेधो निष्ठायामनिटः कुत्ववचनात् ॥ १ ॥

क्वादिजिव्रजियाचिरुचीनामप्रतिषेधः[4] । अनर्थकः प्रतिषेधोऽप्रतिषेधः । कुत्वं कस्मान्न भवति । निष्ठायामनिटः कुत्ववचनात् । निष्ठायामनिटः कुत्वं वक्ष्यामि सेटश्चैते निष्ठायाम् ॥ यदि निष्ठायामनिटः कुत्वमुच्यते कथं शोकः समुद्ग इति ।

शुच्युब्ज्योर्घञि कुत्वम् ॥ २ ॥

शुच्युब्ज्योर्घञि कुत्वं वक्तव्यम् ॥ कथमर्कः ।

---

* [V. M. om. विभाषा चेः (५८)].

[1] णेरनिटि ६. ४. ५१. [2] ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ६. १. १६ ; संप्रसारणाच्च ६. १. १०८. [3] विभाषाऽऽपः ६. ४. ५७ ; आपः सानुबन्धकनिर्देशादिङि सिद्धम् ६. ४. ५७ वा. १. [4] अजिव्रज्योश्च ७. ३. ६० ; यजयाचरुचप्रवचर्चश्च ७. ३. ६६.

अर्चेः कविधानात् सिद्धम् ॥ ३ ॥

नैतद्घञन्तम् । औणादिक[1] एष कशब्दस्तस्मिन्नाष्टमिकं कुत्वम्[2] ॥ *

भुजन्युब्जौ पाण्युपतापयोः ॥ ७ । ३ । ६१ ॥

भुजः पाणौ ॥ १ ॥

भुजः पाणाविति वक्तव्यम् ॥ कथं न्युब्ज उपताप इति ।

न्युब्जेः कर्तृत्वादप्रतिषेधः ॥ २ ॥

अनर्थकः प्रतिषेधो ऽप्रतिषेधः । कुत्वं कस्मान्न भवति । कर्तृत्वात् । नैतद्घञन्तम्[3] । कर्तृप्रत्यय एषः[4] । न्युब्जतीति न्युब्जः ॥ अधिकरणसाधनो वै लक्ष्यते घञ् । न्युब्जिताः शेरतेऽस्मिन्न्युब्ज उपताप इति । एषोऽपि हि कर्तृसाधन एव । कथम् । न्युब्जयतीति न्युब्जः ॥ **

यजयाचरुचप्रवचर्चश्च ॥ ७ । ३ । ६६ ॥

प्रवचिग्रहणमनर्थकं वचोऽशब्दसंज्ञाभावात् ॥ १ ॥

प्रवचिग्रहणमनर्थकम् । किं कारणम् । वचोऽशब्दसंज्ञाभावात् । वचोऽशब्दसंज्ञायां प्रतिषेध उच्यते[5] प्रपूर्वश्च वचिरशब्दसंज्ञायां वर्तते ॥ उपसर्गनियमार्थं तर्हीदं वक्तव्यम् । प्रपूर्वस्यैव वचेरशब्दसंज्ञायां प्रतिषेधो यथा स्यात् । इह मा भूत् । अविवाक्यमिति ।

उपसर्गपूर्वनियमार्थमिति चेदविवाक्यस्य विशेषवचनात् सिद्धम् ॥ २ ॥

विशेष एतद्वक्तव्यम् । अविवाक्यमहरिति[6] । क्व मा भूत् । अविवाच्यमेवान्यदिति ॥

ण्यप्रतिषेधे त्यजेरुपसंख्यानम् ॥ ३ ॥

ण्यप्रतिषेधे त्यजेरुपसंख्यानं कर्तव्यम् । त्याज्यम् ॥ ***

---

* [V. M. om. अजिव्रज्योश्च (६०)].

** [V. M. om. प्रयाजानुयाजौ यज्ञाङ्गे (६२) ; वञ्चेर्गतौ (६३) ; ओक उचः के (६४) ; ण्य आवश्यके (६५)].

*** [V. M. om. वचोऽशब्दसंज्ञायाम् (६७) ; प्रयोज्यनियोज्यौ शक्यार्थे (६८)].

[1] कृदाधारार्चिकलिभ्यः कः (उणादि ३२०). [2] चोः कुः ८. २. ३०. [3] हलश्च ३. ३. १२१. [4] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ३. १. १३४. [5] वचोऽशब्दसंज्ञायाम् ७. ३. ६७. [6] तस्माद्दशमेऽहन्नविवाक्य उपहताय न व्युच्यम् ॥ तै. सं. ७. ३. १. ३. तस्माद्दशममहरविवाक्यं भवति ॥ ऐ. ब्रा. ५. २२.

भोज्यं भक्ष्ये ॥ ७ । ३ । ६९ ॥

[भोज्यमभ्यवहार्ये ॥ १ ॥]

भोज्यमभ्यवहार्य इति वक्तव्यम् । इहापि यथा स्यात् । भोज्यः सूपः । भोज्या यवागूरिति । किं पुनः कारणं न सिध्यति । भक्षिरयं खरविशदे वर्तते तेन द्रवे न प्राप्नोति ॥ नावश्यं भक्षिः खरविशद एव वर्तते । किं तर्हि । अन्यत्रापि वर्तते । तद्यथा । अब्भक्षः वायुभक्ष इति ॥

घोर्लोपो लेटि वा ॥ ७ । ३ । ७० ॥

वेति शक्यमवक्तुम् । कस्मान्न भवति । तद॒ग्निरंग्नये[1] ददात् । अस्त्वत्र लोप आटः[2] श्रवणं भविष्यति तेनोभयं सिध्यति । दध॒द्रत्ना॑नि दा॒शुषे॑[3] । ददा॒द्रत्ना॑नि दा॒शुषे॑ ॥

ओतः श्यनि ॥ ७ । ३ । ७१ ॥

[ओतः शिति ॥ १ ॥]

ओतः शितीति वक्तव्यम् । किं प्रयोजनम् ।

उत्तरत्र शिद्ग्रहणाभावाय ॥ २ ॥

तत्रायमप्यर्थः ष्ठिवुक्लम्वाचमां शिति [७५] इति शिद्ग्रहणं न कर्तव्यं भवति ॥ ननु च भोः श्यन्ग्रहणमपि तर्ह्युत्तरार्थं कर्तव्यम् । शमामष्टानां दीर्घः श्यनि [७४] इति श्यन्ग्रहणं न कर्तव्यं भवति । अत्राप्यस्तु शितीत्येव । यदि शितीत्युच्यते "अनु त्वेन्द्रो भ्रमतु मदतु[4]" अत्रापि प्राप्नोति । शमादिभिरत्र शितं विशेषयिष्यामः । शमादीनां यः शिदिति । कश्च शमादीनां शित् । शमादिभ्यो यो विहितः । एवमपि तस्यति यस्यति अत्र प्राप्नोति । अष्टानामिति वचनान्न भविष्यति ॥ *

---

* [V. M. om. क्सस्याचि (७२); लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये (७३); शमामष्टानां दीर्घः श्यनि (७४)].

[१] Cf. ददत् काठसं ७. १२.

[२] लेटोऽडाटौ ३. ४. ९४.

[३] दध॒द्रत्ना॑नि दा॒शुषे॑ ऋ. सं. ४. १५. ३.

[३] See काठसं ३७. ९ which drops भ्रमतु although भ्रम् is included in शमामष्टानां दीर्घः श्यनि ७. ३. ७४.

छिवुक्लमुचमां शिति ॥ ७ । ३ । ७५ ॥

दीर्घत्वमाङि चमः ॥ १ ॥

दीर्घत्वमाङि चम इति वक्तव्यम् । आचामति । इह मा भूत् । उच्चमति विचमतीति ॥ *

इषगमियमां छः ॥ ७ । ३ । ७७ ॥

इषेश्छत्वमहलि ॥ १ ॥

इषेश्छत्वमहलीति वक्तव्यम् । इह मा भूत् । इष्णाति इष्यति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । अचीति[1] वर्तते ॥ एवमपीषाणेत्यत्र[2] प्राप्नोति । अथाहलीत्युच्यमाने कस्मादेवात्र छत्वं न भवति । नैवं विज्ञायते न हल् अहल् अहलीति । कथं तर्हि । अविद्यमानो हलस्मिन्सोऽयमहल् अहलीति । यद्येवमचीत्यपि वर्तमाने न दोषः । न ह्यचा शिद्विशेष्यते । शिति भवति कतरस्मिन् अचीति । कथं तर्हि । शिताज्विशेष्यते । अचि भवति कतरस्मिन् शितीति ॥

पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ॥ ७ । ३ । ७८ ॥

पिबेर्गुणप्रतिषेधः ॥ १ ॥

पिबेर्गुणप्रतिषेधो वक्तव्यः । पिबति । लघूपधगुणः प्राप्नोति[3] ॥ स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । गुणः कस्मान्न भवति । पिबिरदन्तः ।

अदन्त इति चेदुक्तम् ॥ २ ॥

किमुक्तम् । धातोरन्त इति चेदनुदात्तेचवग्रहणमिति[4] ॥ अथवाङ्गवृत्ते पुन[5]र्वृत्तावविधिर्निष्ठितस्येत्येवं न भविष्यति ॥

---

* [V. M. om. क्रमः परस्मैपदेषु (७६)].

[1] क्सस्याचि ७. ३. ७२.

[2] हलः श्नः शानज्झौ ३. १. ८३.

[3] पुगन्तलघूपधस्य च ७. ३. ८६.

[4] धातोरन्त इति चेदनुदात्तेचवग्रहणम् ६. १. १६२ वा. १.

[5] See below p. 335 ll. 3–5 ; also p. 349 ll. 10–11 for this परिभाषा.

ज्ञाजनोर्जा ॥ ७ । ३ । ७९ ॥

दीर्घोच्चारणं किमर्थं न ज्ञाजनोर्ज इत्येवोच्येत । का रूपसिद्धिः जानाति जायते । अतो दीर्घो यञि [७. ३. १०१] इति दीर्घत्वं भविष्यति ॥ एवं तर्हि सिद्धे सति यद्दीर्घोच्चारणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषाङ्गवृत्ते पुनर्वृत्तावविधिरिति । किमेतस्य ज्ञापने प्रयोजनम् । पिबेर्गुणप्रतिषेधश्चोदितः[1] स न वक्तव्यो भवति ॥ *

जुसि च ॥ ७ । ३ । ८३ ॥

जुसि गुणे यासुट्प्रतिषेधः ॥ १ ॥

जुसि गुणे यासुडादौ प्रतिषेधो वक्तव्यः । चिनुयुः सुनुयुरिति ॥ न वक्तव्यः । नैवं विज्ञायते मिदेर्गुणः [८२] जुसि चेति । कथं तर्हि । मिदेर्गुणोऽजुसि चेति । किमिदमजुसीति । अजादावुस्यजुसीति । इहापि तर्हि प्राप्नोति । चक्रुः जहुरिति । एवं तर्हि शितीति[2] वर्तते ॥ एवमपि अजुहवुः अबिभयुरित्यत्र न प्राप्नोति । भूतपूर्वगत्या भविष्यति । न सिध्यति न ह्युस् शिद्भूतपूर्वः । उस् शिद्भूतपूर्वो नास्तीति कृत्वोसि यः शिद्भूतपूर्वस्तस्मिन्भविष्यति ॥ अथवा क्रियते न्यास एव । अविभक्तिको निर्देशः । नैवं विज्ञायते मिदेर्गुणो जुसि चेति । कथं तर्हि । मिदेर्गुण उजुसीति । उकारादौ जुसि ॥ अथवाचीति[3] वर्तते तेन जुसं विशेषयिष्यामः । अजादौ जुसीति ॥ **

जाग्रोऽविचिण्णल्ङित्सु ॥ ७ । ३ । ८५ ॥

इह जागरयति जागरक इति गुणे कृते रपरत्वे चात उपधायाः [७. २. ११६] इति वृद्धिः प्राप्नोति तस्याः प्रतिषेधो वक्तव्यः ।

चिण्णलोः प्रतिषेधसामर्थ्यादन्यत्र गुणभूतस्य वृद्धिप्रतिषेधः ॥ १ ॥

यदयमचिण्णलोरिति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो न गुणाभिनिर्वृत्तस्य वृद्धिर्भवतीति ॥

---

* [V. M. om. प्वादीनां ह्रस्वः (८०) ; मीनातेर्निगमे (८१) ; मिदेर्गुणः (८२)].

** [V. M. om. सार्वधातुकार्धधातुकयोः (८४)].

[1] पिबेर्गुणप्रतिषेधः ७. ३. ७८ वा. १. [2] ष्ठिवुक्लमुचमां शिति ७. ३. ७५. [3] क्सस्याचि ७. ३. ७२.

किं पुनरयं पर्युदासः । यदन्यद्विचिण्णल्ङिद्भ्य इति । आहोस्वित् प्रसज्यायं प्रतिषेधः । विचिण्णल्ङित्सु नेति । कश्चात्र विशेषः ।

प्रसज्यप्रतिषेधे जुसिगुणप्रतिषेधप्रसङ्गः ॥ २ ॥

प्रसज्यप्रतिषेधे जुसिगुणप्रतिषेधः प्राप्नोति । अजागरुः[1] ॥

उत्तमे च णलि ॥ ३ ॥

उत्तमे च णलि प्रतिषेधः प्राप्नोति । अहं जजागर[2] ॥

न वानन्तरस्य प्रतिषेधात् ॥ ४ ॥

न वैष दोषः । किं कारणम् । अनन्तरस्य प्रतिषेधात् । अनन्तरं यद्गुणविधानं[3] तस्य प्रतिषेधः । कुत एतत् । अनन्तरस्य विधिर्वा भवति[4] प्रतिषेधो वेति ॥

जुसि पूर्वेण गुणविधानम् ॥ ५ ॥

जुसि पूर्वेण गुणो विधीयते जुसि च [८३] इति ॥

णलि च ॥ ६ ॥

किम् । न वानन्तरस्य प्रतिषेधादित्येव । णलि च पूर्वेण गुणो विधीयते सार्वधातुकार्धधातुकयोः [८४] इति ॥

अथवा पुनरस्तु पर्युदासः ।

अतोऽन्यत्र विधाने वावगुणत्वम् ॥ ७ ॥

अतोऽन्यत्र विधाने वावगुणत्वं वक्तव्यम् । जागृविः ॥

न वा पर्युदाससामर्थ्यात् ॥ ८ ॥

न वा वक्तव्यम् । किं कारणम् । पर्युदाससामर्थ्यादत्र गुणो न भविष्यति ॥ अस्त्यन्यत् पर्युदासे प्रयोजनम् । किम् । क्विबर्थं पर्युदासः स्यात् । शुद्धपरस्य विशब्दस्य प्रतिषेधे ग्रहणमनुनासिकपरश्च क्वौ विशब्दः ॥ वस्वर्थं तर्हि पर्युदासः स्यात् । जागृवांसो अनु ग्मन्[5] । कथं पुनर्वः पर्युदास उच्यमानो वस्वर्थः शक्यो विज्ञातुम् । सामर्थ्याद्वस्वर्थमिति विज्ञास्यते ।

वस्वर्थमिति चेन्न सार्वधातुकत्वात् सिद्धम् ॥ ९ ॥

वस्वर्थमिति चेत्तन्न । किं कारणम् । सार्वधातुकत्वात् सिद्धम् । कथं सार्वधातुक-

---

[1] सिजभ्यस्तविदिभ्यश्च ३. ४. १०९ ; सार्वधातुकमपित् १. २. ४ ; जुसि च ७. ३. ८३.
[2] णलुत्तमो वा ७. १. ९१ ; सार्वधातुकार्धधातुकयोः ७. ३. ८४.
[3] जाग्रोऽविचिण्णल्ङित्सु ७. ३. ८५.
[4] See above for this परिभाषा p. 248 ll. 6–7.
[5] ऋ. सं. ६. १. ३.

संज्ञा । छान्दसः क्सुः । लिट् च च्छन्दसि सार्वधातुकमपि भवति[1] । तत्र सार्वधातुकमपिन्ङिर्दिति[2] ङित्वात्पर्युदासो भविष्यति ॥ अथवा वकारस्यैवेदमशक्तिजेनेकारेण ग्रहणम् ॥

पुगन्तलघूपधस्य च ॥ ७ । ३ । ८६ ॥

संयोगे गुरुसंज्ञायां गुणो भेत्तुर्न सिध्यति ।

संयोगे गुरुसंज्ञायां[3] भेत्ता भेत्तुमिति गुणो न प्राप्नोति ॥

विध्यपेक्षं लघोश्चासौ

विध्यपेक्षं लघुग्रहणं कृतं लघोश्चासौ विहितः ॥

कथं कुण्डिर्न दुष्यति ॥ १ ॥

कुण्डिता हुण्डिता अत्र कस्मान्न भवति ।

धातोर्नुमः

धातोर्नुम्विधावुक्तं तत्र धातुग्रहणस्य प्रयोजनं धातूपदेशावस्थायामेव नुम् भवतीति[4] ।

कथं रञ्जेः

कथं रञ्जेरुपधालक्षणा वृद्धिः[5] । आश्चर्यो रागः । विचित्रो रागः[6] ।

स्यन्दिश्रन्थ्योर्निपातनात् ।

यदयं स्यन्दिश्रन्थ्योरवृद्ध्यर्थं निपातनं करोति[7] तज्ज्ञापयत्याचार्यो भवत्येवंजातीयकानां वृद्धिरिति ॥

अनङ्लोपशिदीर्घत्वे विध्यपेक्षे न सिध्यतः ॥ २ ॥

अनङ्लोपः । दध्ना सक्थ्ना । शिदीर्घत्वम् । कुण्डानि वनानि[9] ॥ एवं तर्हि

अभ्यस्तस्य यदाहाचि

यदयं नाभ्यस्तस्याचि पिति सार्वधातुके [८७] इत्यज्ग्रहणं करोति तज्ज्ञापयत्याचार्यो भवत्येवंजातीयकानां गुण इति ।

---

[1] छन्दस्युभयथा ३. ४. ११७. [2] सार्वधातुकमपित् १. २. ४. [3] संयोगे गुरु १. ४. ११. [4] नुम्विधावुपदेशिवद्वचनं प्रत्ययविध्यर्थम् ७. १. ५८ वा. १. [5] अत उपधायाः ७. २. ११६. [6] घञि च भावकरणयोः ६. ४. २७. [7] स्यदो जवे ; अवोदैधौद्मप्रश्रथहिमश्रथाः ६. ४. २८ ; २९. [8] अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ; अल्लोपोऽनः ७. १. ७५ ; ६. ४. १३४. [9] नपुंसकस्य झलचः ; सर्वनामस्थाने चासंबुद्धौ ७. १. ७२ ; ६. ४. ८.

लङर्थं तत्कृतं भवेत् ।

लङर्थमेतत् स्यात् । अनेनेक् ॥

क्नुसनोर्यत् कृतं कित्त्वं ज्ञापकं स्याल्लघोर्गुणे ॥ ३ ॥

यदयं त्रसिगृधिधृषिक्षिपः क्नुः [३.२.१४०] इको झल्; हलन्ताच्च [१.२.९;१०] इति क्नुसनौ कितौ करोति तज्ज्ञापयत्याचार्यो भवत्येवंजातीयकानां गुण इति ॥

संयोगे गुरुसंज्ञायां गुणो भेत्तुर्न सिध्यति ।
विध्यपेक्षं लघोश्चासौ कथं कुण्डिर्न दुष्यति ॥ १ ॥
धातोर्नुमः कथं रञ्जेः स्यन्दिश्रन्थ्योर्निपातनात् ।
अनङ्लोपशिदीर्घत्वे विध्यपेक्षे न सिध्यतः ॥ २ ॥
अभ्यस्तस्य यदाहाचि लङर्थं तत् कृतं भवेत् ।
क्नुसनोर्यत् कृतं कित्त्वं ज्ञापकं स्याल्लघोर्गुणे ॥ ३ ॥

नाभ्यस्तस्याचि पिति सार्वधातुके ॥ ७ । ३ । ८७ ॥

अभ्यस्तानामुपधाह्रस्वत्वमचि पस्पशाते चाकशीमि वावशतीरिति दर्शनात् ॥ १ ॥

अभ्यस्तानामुपधाह्रस्वत्वमचि वक्तव्यम् । किं प्रयोजनम् । पस्पशाते चाकशीमि वावशतीरिति प्रयोगो दृश्यते । कपोतः शरदं पस्पशाते । अ॒हं भुव॑नं चाकशीमि[1] । वाव॑शती॒रुदा॑जत्[2] इति ॥

बहुलं छन्दस्यानुषग्जुजोषदिति दर्शनात् ॥ २ ॥

बहुलं छन्दसि वक्तव्यमुपधाह्रस्वत्वम् । किं प्रयोजनम् । आनुषग्जुजोषदिति दर्शनात् । यस्त॑ आति॒थ्यमा॑नु॒षग्जु॒जोष॑त्[3] ॥

यद्युपधाह्रस्वत्वमुच्यते

प्रियां मयूरः प्रतिनर्नृतीति

यद्वत्त्वं नरवर नर्नृतीषि हृष्टः

अत्र गुणः प्राप्नोति । तस्मान्नार्थ उपधाह्रस्वत्वेन । कस्मान्न भवति । पस्पशाते चाकशीमि वावशतीरिति । स्पशिकाशिवशयः प्रकृत्यन्तराणि ॥

---

[1] ऋ. सं. ४. ५८. ५; ९. [2] ऋ. सं. ४. ५०. ५. [3] ऋ. सं. ४. ४. १०.

भूसुवोस्तिङि ॥ ७ । ३ । ८८ ॥

भूसुवोः प्रतिषेध एकाज्ग्रहणं बोभवीत्यर्थम् ॥ १ ॥

भूसुवोः प्रतिषेध एकाज्ग्रहणं कर्तव्यम् । किं प्रयोजनम् । बोभवीत्यर्थम् । इह मा भूत् । बोभवीति ॥ यद्येकाज्ग्रहणं क्रियते अभूत् अत्र न प्राप्नोति । क्व तर्हि स्यात् । मा भूत् । तस्मान्नार्थ एकाज्ग्रहणेन । कस्मान्न भवति । बोभवीतीति । बोभूत्वित्येतन्नियमार्थं भविष्यति[1] । अत्रैव यङ्लुगन्तस्य गुणो न भवति नान्यत्रेति । क्व मा भूत् । बोभवीतीति ॥ *

तृणह इम् ॥ ७ । ३ । ९२ ॥

किमर्थं तृहिरागतश्नम्को गृह्यते न तृहेरिम् भवतीत्येवोच्येत ।

तृणहिग्रहणं श्नमिमोर्व्यवस्थार्थम् ॥ १ ॥

तृणहिग्रहणं श्नमि कृत इम् यथा स्यात् ॥

तृहिग्रहणे हीम्विषये श्नमभावोऽनवकाशत्वात् ॥ २ ॥

तृहिग्रहणे हि सतीम्विषये श्नमोऽभावः स्यात् । किं कारणम् । अनवकाशत्वात् । अनवकाश इम् श्नमं बाधेत ॥ इदमयुक्तं वर्तते । किमत्रायुक्तम् । तृणहिग्रहणं श्नमिमोर्व्यवस्थार्थमित्युक्त्वा तत उच्यते तृहिग्रहणे हीम्विषये श्नमभावोऽनवकाशत्वादिति । तत्र वक्तव्यं तृणहिग्रहणं श्नमिमोर्भावाय तृहिग्रहणे हीम्विषये श्नमभावोऽनवकाशत्वादिति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । व्यवस्थार्थमित्येव सिद्धं न ह्यसतो व्यवस्थेति ॥ **

तुरुस्तुशम्यमः सार्वधातुके ॥ ७ । ३ । ९५ ॥

सार्वधातुक इति[2] वर्तमाने पुनः सार्वधातुकग्रहणं किमर्थम् ।

पुनः सार्वधातुकग्रहणमपिदर्थम् ॥ १ ॥

अपिदर्थोऽयमारम्भः । अध्रिगो शमीध्वं सुशमि शमीध्व शमीध्वमध्रिगो[3] ॥

---

* [V. M. om. उतो वृद्धिर्लुकि हलि (८९); ऊर्णोतेर्विभाषा (९०); सुपि च (९१)].

** [V. M. om. ब्रुव ईट् (९३); यङो वा (९४)].

*** [V. M. om. अस्तिसिचोऽपृक्ते (९६); बहुलं छन्दसि (९७); रुदश्च पञ्चभ्यः (९८); अड् गार्ग्यगालवयोः (९९); अदः सर्वेषाम् (१००); अतो दीर्घो यञि (१०१); सुपि च (१०२).

[1] दाधर्तिदर्धर्तिदर्धर्षिबोभूतुतेतिक्ते...मर्मृज्यागनीगन्तीति च ७. ४. ६५. [2] नाभ्यस्तस्याचि पिति सार्वधातुके ७. ३. ८७. [3] मै. सं. ४. १३. ४; काठ. सं. १६. २१.

बहुवचने झल्येत् ॥ ७ । ३ । १०३ ॥

अतो दीर्घाद्बहुवचन एत्त्वं विप्रतिषेधेन ॥ १ ॥

अतो दीर्घाद्बहुवचन एत्त्वं भवति विप्रतिषेधेन । अतो दीर्घो यञि सुपि च [१०१ ; १०२] इत्यस्यावकाशः । वृक्षाभ्याम् प्लक्षाभ्याम् । बहुवचने झल्येदित्यस्यावकाशः । वृक्षेषु प्लक्षेषु । इहोभयं प्राप्नोति । वृक्षेभ्यः प्लक्षेभ्यः । एत्त्वं भवति विप्रतिषेधेन ॥*

अम्बार्थनद्योर्ह्रस्वः ॥ ७ । ३ । १०७ ॥

डलकवतीनां प्रतिषेधो वक्तव्यः । अम्बाडे अम्बाले अम्बिके ॥

तल्ह्रस्वत्वं वा डिसंबुद्ध्योः ॥ तल्ह्रस्वत्वं वा डिसंबुद्ध्योरिति वक्तव्यम् । देवत देवते । देवतायाम् देवते ॥

स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । स कथं न वक्तव्यो भवति ।

अम्बार्थं द्व्यक्षरं यदि ।

यद्यम्बार्थं द्व्यक्षरं गृह्यते ॥

तत्तर्हि ह्रस्वत्वं वक्तव्यम् । अवश्यं छन्दसि ह्रस्वत्वं वक्तव्यम् उपगायन्तु मां पत्नयो गर्भिणयो युवतय इत्येवमर्थम् ॥

मातॄणां मातच्पुत्रार्थमर्हते ॥ मातॄणां मातजादेशो वक्तव्यः पुत्रार्थमर्हते । गार्गीमात वात्सीमात[1] ॥

ह्रस्वस्य गुणः ॥ ७ । ३ । १०८ ॥

इह कस्मान्न भवति । नदि कुमारि किशोरि ब्राह्मणि ब्रह्मबन्धु । ह्रस्ववचनसामर्थ्यात्[2] । अस्त्यन्यद्ध्रस्ववचने प्रयोजनं पृथग्विभक्तिं मोचीचरमिति । शक्यं[3] पृथग्विभक्तिरनुच्चारयितुम् । कथम् । एवमयं ब्रूयात् । अम्बार्थानां ह्रस्वः नदीह्रस्वयोर्गुण इति । यद्येवमुच्यते जसि च [१०९] इत्यत्र नद्या अपि गुणः प्राप्नोति ॥ एवं तर्हि योगविभागः करिष्यते । अम्बार्थनद्योर्ह्रस्वः । ततो ह्रस्वस्य । ह्रस्वस्य च

---

* [V. M. om. ओसि च (१०४); आङि चापः (१०५); संबुद्धौ च (१०६)].

[1] गर्गादिभ्यो यञ् ४. १. १०५ ; यञश्च ४. १. १६.

[2] अम्बार्थनद्योर्ह्रस्वः ७. ३. १०७.

[3] सामान्ये नपुंसकम् quoted by Bhaṭṭojī Dīkṣita in his Siddhāntakamudī on the sūtra न कपि P. 7. 4. 14.

ह्रस्वो भवति । किमर्थमिदम् । गुणं वक्ष्यति तद्बाधनार्थम् । ततो गुणः । गुणश्च भवति ह्रस्वस्येति ॥ अथवा ह्रस्वस्य गुण इत्यत्राम्बार्थनद्योर्ह्रस्व इत्येतदनुवर्तिष्यते ॥

जसि च ॥ ७ । ३ । १०९ ॥

जसादिषु च्छन्दसि वावचनं प्राङ् णौ चङ्युपधायाः ॥ १ ॥

जसादिषु च्छन्दसि वेति वक्तव्यम् । किमविशेषेण । नेत्याह । प्राङ् णौ चङ्युपधायाः[1] । किं प्रयोजनम् ।

अम्बे, दर्वि, शतक्रत्वः[2], पश्वे नृभ्यः[3], किकिदीव्या[4] ॥ २ ॥

अम्बे अम्ब[5] । दर्वि दर्वे[6] । शतक्रत्वः शतक्रतवः । पश्वे पशवे[8] । किकिदीव्या किकिदीविना[9] ॥ *

घेर्ङिति ॥ ७ । ३ । १११ ॥

घेर्ङिति गुणविधाने ङीसार्वधातुके प्रतिषेधः ॥ १ ॥

घेर्ङिति गुणविधाने ङीसार्वधातुके प्रतिषेधो वक्तव्यः । पट्वी मृद्वी[10] । कुरुत इति[11] ॥

सुबधिकारात् सिद्धम् ॥ २ ॥

सुबिति वर्तते । क्व प्रकृतम् । सुपि च बहुवचने झल्येत् [१०२ ; १०३] इति ॥ **

याडापः ॥ ७ । ३ । ११३ ॥

इह अतिखट्वाय अतिमालायेति ह्रस्वत्वे[12] कृते स्थानिवद्भावाद्याट् प्राप्नोति तस्य प्रतिषेधो वक्तव्यः । न वक्तव्यः ।

याड्विधानेऽतिखट्वायेत्यप्रतिषेधो ह्रस्वादेशत्वात् ॥ १ ॥

याड्विधाने अतिखट्वाय अतिमालायेत्यप्रतिषेधः । अनर्थकः प्रतिषेधोऽप्रतिषेधः ।

---

* [V. M. om. ऋतो ङिसर्वनामस्थानयोः (११०)].

** [V. M. om. आण् नद्याः (११२)].

[1] णौ चङ्युपधाया ह्रस्वः ७. ४. १. [2] अधा शतक्रत्वो यूयमगवे ऋ. सं. १०. ९७. २. [3] पश्वे नृभ्यो यथा, ऋ. सं. १. ४३. २. [4] साकं यक्ष्म प्रपत चाषेण किकिदीव्या, मै. सं. २. ७. १३. [5] अम्बार्थनद्योर्ह्रस्वः ७. ३. १०७. [6] ह्रस्वस्य गुणः ७. ३. १०८. [7] जसि च ७. ३. १०९. [8] घेर्ङिति ७. ३. १११. [9] आङो नाऽस्त्रियाम् ७. ३. १२० ; साकं यक्ष्म प्रपत चाषेण किकिदीविना । ऋ. सं. १०. ९७. १३. [10] वोतो गुणवचनात् ४. १. ४४. [11] सार्वधातुकमपित् १. २. ४. [12] गोस्त्रियोरुपसर्जनस्य १. २. ४८.

याट् कस्मान्न भवति । ह्रस्वादेशत्वात् । ह्रस्वादेशोऽयम् । उक्तमेतन्ङ्याब्ग्रहणेऽदीर्घ इति[1] ॥ अथेदानीमसत्यपि स्थानिवद्भावे दीर्घत्वे[2] कृत आप् चासौ भूतपूर्व इति कृत्वा याट् कस्मान्न भवति । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति । ननु चेदानीं सत्यपि स्थानिवद्भाव एतया परिभाषया शक्यमुपस्थातुम् । नेत्याह । न च तदानीं क्वचिदपि स्थानिवद्भावः स्यात् ॥*

ङेराम् नद्याम्नीभ्यः ॥ ७ । ३ । ११६ ॥

इदुद्भ्यामाम्विधानमौत्त्वस्य परत्वात् ॥ १ ॥

इदुद्भ्याम् आम् विधेयः । शकट्याम् पद्धत्याम् धेन्वामिति । किं पुनः कारणं न सिध्यति । औत्त्वस्य परत्वात् । परत्वादौत्त्वं प्राप्नोति[3] ॥

योगविभागात् सिद्धम् ॥ २ ॥

योगविभागः करिष्यते । ङेराम् नद्याम्नीभ्यः । तत इदुद्भ्याम् । इदुद्भ्यामुत्तरस्य ङेराम् भवतीति । शकट्याम् पद्धत्याम् धेन्वामिति । तत औदच्च घेः ॥ **

औदच्च घेः ॥ ७ । ३ । ११८-११९ ॥

औत्त्वे योगविभागः ॥ १ ॥

औत्त्वे योगविभागः कर्तव्यः । औत् । औद्भवतीदुद्भ्याम् । ततोऽच्च घेरिति । अकारश्च भवति घेरिति ॥ किमर्थो योगविभागः ।

सखिपतिभ्यामौत्त्वार्थः ॥ २ ॥

सखिपतिभ्यामौत्त्वं यथा स्यात् । सख्यौ पत्यौ[4] ॥

एकयोगे ह्यप्राप्तिरत्त्वसंनियोगात् ॥ ३ ॥

एकयोगे हि सत्यौत्त्वस्याप्राप्तिः । किं कारणम् । अत्त्वसंनियोगात् । अत्त्वसंनियोगेनौत्त्वमुच्यते तेन यत्रैवात्त्वं तत्रैवौत्त्वं स्यात् ॥

न वाकारस्यान्वाचयवचनाद्यथा क्यङि सलोपः ॥ ४ ॥

न वार्थ औत्त्वे योगविभागेन । किं कारणम् । अकारस्यान्वाचयवचनात् ।

---

* [V. M. om. सर्वनाम्नः स्याड्ढ्रस्वश्च (११४); विभाषा द्वितीयातृतीयाभ्याम् (११५)].

** [V. M. om. इदुद्भ्याम् (११७)].

[1] ङ्याब्ग्रहणेऽदीर्घः १. १. ५६ वा. १०. [2] सुपि च ७. ३. १०२. [3] इदुद्भ्याम्; औत्; अच्च घेः ७. ३. ११७-११९. [4] शेषो घ्यसखि; पतिः समास एव १. ४. ७; ८.

प्रधानाशिष्टमौत्त्वमन्वाचयशिष्टमत्त्वं यथा क्यङि सलोपः । तद्यथा । प्रधानशिष्टः क्यङ् प्रातिपदिकमात्राद्भवति यत्र च सकारस्तत्र लोपः[1] ॥

अत्त्वे टाप्प्रतिषेधः ॥ ५ ॥

अत्त्वे टापः प्रतिषेधो वक्तव्यः । शकटौ पद्धतौ धेनौ । अत्त्वे कृते टाप् प्राप्नोति ॥

न वा संनिपातलक्षणस्यानिमित्तत्वात् ॥ ६ ॥

न वा वक्तव्यः । किं कारणम् । संनिपातलक्षणस्यानिमित्तत्वात् । संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति टान्न भविष्यति ॥

ङित्करणाद्वा ॥ ७ ॥

अथवा ङिदौकारः करिष्यते[3] । औ ङिच्च घेः ॥

आङो नाऽस्त्रियाम् ॥ ७ । ३ । १२० ॥

किमर्थमस्त्रियामित्युच्यते नाङो ना पुंसीत्येवोच्येत । का रूपसिद्धिः त्रपुणा जतुना । नुमा सिद्धम्[4] ॥ नैवं शक्यम् । इह हि अमुना ब्राह्मणकुलेनेति मुभावस्यासिद्धत्वान्नुम् न स्यात् । अस्त्रियामिति पुनरुच्यमाने न दोषो भवति । कथम् । वक्ष्यत्येतन्न मु टादेशे[5] इति ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम् ॥ पादश्च समाप्तः ॥

---

[1] कर्तुः क्यङ् सलोपश्च ३. १ ११. [2] अजाद्यतष्टाप् ४. १. ४. [3] टेः ६. ४. १४३. [4] इकोचि विभक्तौ ७. १. ७३. [5] न मु टादेशे ८. २ ३ वा. १.

णौ चङ्युपधाया ह्रस्वः ॥ ७ । ४ । १ ॥

अथ णिग्रहणं किमर्थं न चङ्युपधाया ह्रस्व इत्येवोच्येत । चङ्युपधाया ह्रस्व इतीयत्युच्यमाने अलीलवत् अपीपवत् ऊकारस्यैव ह्रस्वत्वं प्रसज्येत । नैतदस्ति प्रयोजनम् । वृद्धिरत्र बाधिका भविष्यति[1] । वृद्धौ तर्हि कृतायामौकारस्यैव ह्रस्वत्वं प्रसज्येत । नैतदस्ति । अन्तरङ्गत्वादत्रावादेशो भविष्यति[2] । न हीदानीं ह्रस्वभाविन्युपधा भवति । तस्माण्णिग्रहणं कर्तव्यम् ॥

अथ चङ्ग्रहणं किमर्थं न णावुपधाया इत्येव सिद्धम् । णावुपधाया ह्रस्व इतीयत्युच्यमाने कारयति हारयतीत्यत्रापि प्रसज्येत । नैतदस्ति प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयति न णावेव ह्रस्वत्वं भवतीति यदयं मितां ह्रस्वत्वं शास्ति[3] । इहापि तर्हि न प्राप्नोति । अचीकरत् अजीहरत् । वचनाद्भविष्यति । इहापि तर्हि वचनात् प्राप्नोति । कारयति हारयति । तस्माच्चङ्ग्रहणं कर्तव्यम् ॥

अथोपधाग्रहणं किमर्थम् ।

णौ चङ्युपधाग्रहणमन्त्यप्रतिषेधार्थम् ॥ १ ॥

णौ चङ्युपधाग्रहणं क्रियते ऽन्त्यस्य ह्रस्वत्वं मा भूत् । णौ चङि ह्रस्व इतीयत्युच्यमाने अलीलवत् अपीपवत् अन्त्यस्यैव ह्रस्वत्वं प्रसज्येत ॥ नैतदस्ति प्रयोजनम् । अन्तरङ्गत्वादत्रावादेशो भविष्यति । न हीदानीं ह्रस्वभाव्यन्त्योऽस्ति । अन्त्यो ह्रस्वभावी नास्तीति कृत्वा वचनादनन्त्यस्य भविष्यति । इहापि वचनात् प्राप्नोति । अचकाङ्क्षत् अववाञ्छत् । येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात् । केन च नाव्यवधानम् । वर्णेन । एतेन पुनः संघातेन व्यवधानं भवति न भवति च ॥ उत्तरार्थं तर्ह्युपधाग्रहणं कर्तव्यम् । लोपः पिबतेरी चाभ्यासस्य [४] उपधाया यथा स्यात् । अपीप्यत् अपीप्यताम् अपीप्यन् ॥

अथेह कथं भवितव्यम् । मा भवानटिटदिति । आहोस्विन्मा भवानाटिटदिति । मा भवानाटिटदिति भवितव्यम् । ह्रस्वत्वं कस्मान्न भवति । द्विर्वचने[4] कृते परेण

---

[1] अचो ञ्णिति ७. २. ११५. [2] एचोऽयवायावः ६. १. ७८. [3] मितां ह्रस्व ६. ४. ९२, [4] चङि ६. १. ११.

रूपेण व्यवहितमिति कृत्वा । इदमिह संप्रधार्यम् । द्विर्वचनं क्रियतां ह्रस्वत्वमिति किमत्र कर्तव्यम् । परत्वाद्ध्रस्वत्वम् । नित्यं द्विर्वचनम् । कृते ह्रस्वत्वे प्राप्नोत्यकृतेऽपि ॥ एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति द्विर्वचनाद्ध्रस्वत्वं बलीय इति यदयमोणिमृदितं करोति । कथं कृत्वा ज्ञापकम् । ऋदित्करण एतत् प्रयोजनमृदितां नेति[1] प्रतिषेधो यथा स्यात् । यदि चात्र पूर्वं द्विर्वचनं स्यादृदित्करणमनर्थकं स्यात् । द्विर्वचने कृते परेण व्यवहितत्वाद्ध्रस्वत्वं न भविष्यति । पश्यति त्वाचार्यो द्विर्वचनाद्ध्रस्वत्वं बलीय इति तत ओणिमृदितं करोति । तस्मान्मा भवानटिटदित्येव भवितव्यम् ॥

उपधाह्रस्वत्वे णेर्णिच्युपसंख्यानम् ॥ २ ॥

उपधाह्रस्वत्वे णेर्णिच्युपसंख्यानं कर्तव्यम् । वादितवन्तं प्रयोजितवान् अवीवदद्वीणां परिवादकेन । किं पुनः कारणं न सिध्यति । णिचा व्यवहितत्वात् । णिलोपे कृते[2] नास्ति व्यवधानम् । स्थानिवद्भावाद्व्यवधानमेव । प्रतिषिध्यतेऽत्र स्थानिवद्भावश्चङ्परनिर्ह्रासे न स्थानिवदिति[3] ॥ एवमप्यग्लोपिनां नेति[1] प्रतिषेधः प्राप्नोति । वृद्धौ[4] कृतायां लोपस्तन्नाग्लोप्यङ्गं भवति । इदमिह संप्रधार्यम् । वृद्धिः क्रियतां लोप इति किमत्र कर्तव्यम् । परत्वाद्वृद्धिः । नित्यो लोपः । कृतायामपि वृद्धौ प्राप्नोत्यकृतायामपि । अनित्यो लोपः । अन्यस्य कृतायां वृद्धौ प्राप्नोत्यन्यस्याकृतायां शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति । उभयोरनित्ययोः परत्वाद्वृद्धिः । वृद्धौ कृतायां लोपस्तन्नाग्लोप्यङ्गं भवति । एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति वृद्धेर्लोपो बलीयानिति यदयमग्लोपिनां नेति प्रतिषेधं शास्ति । नैतदस्ति ज्ञापकम् । अस्त्यन्यदेतस्य वचने प्रयोजनम् । किम् । यत्र वृद्धावपि कृतायामगेव लुप्यते । अत्यरराजत्[5] । यत्तर्हि प्रत्याहारग्रहणं करोति । इतरथा ह्यलोपिनां नेति ब्रूयात् ॥ एवं वा वृद्धेर्लोपो बलीयानिति । अथवारभ्यते पूर्वविप्रतिषेधो ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घत्वेभ्यः पूर्वविप्रतिषिद्धमिति[6] । तस्मादुपसंख्यानं कर्तव्यमिति ॥

नाग्लोपिशास्वृदिताम् ॥ ७ । ४ । २ ॥

अग्लोपिप्रतिषेधानर्थक्यं च स्थानिवद्भावात् ॥ १ ॥

अग्लोपिप्रतिषेधश्चानर्थकः । किं कारणम् । स्थानिवद्भावात् । स्थानिवद्भावादत्र

---

[1] नाग्लोपिशास्वृदिताम् ७. ४. २.　　[2] णेरनिटि ६. ४. ५१.　　[3] क्ङिलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानम् १. १. ५८ वा. २.　　[4] अचो ञ्णिति ७. २. ११५.　　[5] अत उपधायाः ७. २. ११६.　　[6] ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घत्वेभ्यः पूर्वविप्रतिषिद्धम् ६. ४. ४८ वा. १.

ह्रस्वत्वं न भविष्यति ॥ यत्र तर्हि स्थानिवद्भावो नास्ति तदर्थमयं योगो वक्तव्यः । क्व स्थानिवद्भावो नास्ति । यो हलचोरादेशः । अत्यरराजत्[1] । किं पुनः कारणं हलचोरादेशो न स्थानिवदित्युच्यते । अजादेशः स्थानिवदित्युच्यते[2] न चायमच एवादेशः । किं तर्हि । अचश्चान्यस्य च । अग्लोपिनां नेत्यपि तर्हि प्रतिषेधो न प्राप्नोति । किं कारणम् । अग्लोपिनां नेत्युच्यते न चात्रागेव लुप्यते । किं तर्हि । अक् चान्यश्च । योऽत्राग्लुप्यते तदाश्रयः प्रतिषेधो भविष्यति । यथैव तर्हि योऽत्राग्लुप्यते तदाश्रयः प्रतिषेधो भवत्येवं योऽत्राज्लुप्यते तदाश्रयः स्थानिवद्भावो भविष्यति ॥ एवं तर्हि सिद्धे सति यदग्लोपिनां नेति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्य इत उत्तरं स्थानिवद्भावो न भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । पूर्वत्रासिद्धे न स्थानिवदित्युक्तं[3] तन्न वक्तव्यं भवति ॥ यद्येतज्ज्ञाप्यते आदीधयतेरादीधकः आवेवयतेरावेवकः यीवर्णयोर्दीधीवेव्योः [७. ४. ५३] इति लोपो न प्राप्नोति । इह च यत् प्र॒लुनींह्यत्र तिङि चोदात्तवति [८. १. ७१] इत्येष स्वरो न प्राप्नोति । नैष दोषः । यत्तावदुच्यत आदीधयतेरादीधकः आवेवयतेरावेवकः यीवर्णयोरिति लोपो न प्राप्नोतीति यीवर्णयोरित्यत्र वर्णग्रहणसामर्थ्याद्भविष्यति । यदप्युच्यते यत् प्र॒लुनींह्यत्र तिङि चोदात्तवतीत्येष स्वरो न प्राप्नोतीति बहिरङ्गो यणादेशोऽन्तरङ्गः स्वरोऽसिद्धं बहिरङ्गमन्तरङ्गे ॥

भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम् ॥ ७ । ४ । ३ ॥

काण्यादीनां चेति वक्तव्यम् । के पुनः काण्यादयः । काणिराणिश्राणिभाणिहेठिलोपयः । अचकाणत् अचीकणत् । अरराणत् अरीरणत् । अशश्राणत् अशीश्रणत् । अबभाणत् अबीभणत् । अजिहेठत् अजीहिठत् । अलुलोपत् अलूलुपत् ॥*

दयतेर्दिगि लिटि ॥ ७ । ४ । ९ ॥

इह अवदिग्ये अवदिग्याते अवदिग्यिरे दिग्यादेशे कृते द्विर्वचनं प्राप्नोति[4] तत्र साभ्यासस्येति वक्तव्यम् । ननु च द्विर्वचने कृते साभ्यासस्य दिग्यादेशो भविष्यति । न सिध्यति । किं कारणम् ।

---

* [V. M. om. लोपः पिबतेरीच्चाभ्यासस्य (४); तिष्ठतेरित् (५); जिघ्रतेर्वा (६); उर्ऋत् (७); नित्यं छन्दासि (८)].

[1] णाविष्ठवत् प्रातिपदिकस्य ; पुंवद्भावरभावटिलोपयणादिपरार्थम् ६. ४. १५५ वा. १, २.

[2] अचः परस्मिन् पूर्वविधौ १. २. ५७.

[3] पूर्वत्रासिद्धे च १. १. ५८ वा. ३.

[4] लिटि धातोरनभ्यासस्य ६. १. ८.

दिग्यादेशस्य परत्वात्साभ्यासस्यादेशवचनम् ॥ १ ॥

दिग्यादेशः क्रियतां द्विर्वचनमिति परत्वाद्दिग्यादेशेन भवितव्यम् । तत्र साभ्यासस्येति वक्तव्यम् ॥

एवं तर्हि दिग्यादेशो द्विर्वचनं बाधिष्यते । पुनःप्रसङ्गविज्ञानाद्द्विर्वचनं प्राप्नोति ।

पुनःप्रसङ्ग इति चेदमादिभिस्तुल्यम् । पुनःप्रसङ्ग इति चेदमादिभिस्तुल्यमेतद्भवति[1] । तद्यथा । अमादिषु कृतेषु पुनःप्रसङ्गाच्छिशीलुग्नुमो न भवन्ति । एवं दिग्यादेशे कृते पुनःप्रसङ्गाद्द्विर्वचनं न भविष्यति । अथवा विप्रतिषेधे पुनःप्रसङ्ग इत्युच्यते विप्रतिषेधश्च द्वयोः सावकाशयोरिह पुनरनवकाशो दिग्यादेशो द्विर्वचनं बाधिष्यते ॥ यदि तर्ह्यनवकाशा विधयो बाधका भवन्ति बभूव भूभावो[2] द्विर्वचनं बाधेत । सावकाशो भूभावः । कोऽवकाशः । भविता भवितुम् । इह तर्हि चक्षिङः ख्याञ्; वा लिटि [२.४.५४;५५] इति ख्याञ् द्विर्वचनं बाधेत । इह चापि बभूवेति यदि तावत् स्थाने द्विर्वचनं भूभावः सर्वादेशः प्राप्नोत्यथ द्विःप्रयोगो द्विर्वचनं परस्य भूभावे कृते पूर्वस्य श्रवणं प्राप्नोति ॥ नैष दोषः । आर्धधातुकीयाः सामान्येन भवन्त्यनवस्थितेषु प्रत्ययेषु । तत्रार्धधातुकसामान्ये भूभावे कृते यो यतः प्रत्ययः प्राप्नोति स ततो भविष्यति ॥

ऋतश्च संयोगादेर्गुणः ॥ ७ । ४ । १० ॥

संयोगादेर्गुणविधाने संयोगोपधग्रहणं कृञर्थम् ॥ १ ॥

संयोगादेर्गुणविधाने संयोगोपधग्रहणं कर्तव्यम् । किमर्थम् । कृञर्थम् । इहापि यथा स्यात् । संचस्करतुः संचस्करुः ॥ यदि संयोगोपधग्रहणं क्रियते नार्थः संयोगादिग्रहणेन । इहापि सस्वरतुः सस्वरुः संयोगोपधस्येत्येव सिद्धम् । भवेत्सिद्धं सस्वरतुः सस्वरुरिति इदं तु न सिध्यति संचस्करतुः संचस्करुरिति । किं कारणम् । सुटो[3] बहिरङ्गलक्षणत्वात् । बहिरङ्गः सुट् । अन्तरङ्गो गुणः । असिद्धं बहिरङ्गमन्तरङ्गे । संयोगादिग्रहणे तु क्रियमाणे संयोगोपधग्रहणमनन्यार्थं विज्ञायते ॥

ऋतो लिटि गुणाञ् ञ्णिति वृद्धिर्विप्रतिषेधेन ॥ २ ॥

ऋतो लिटि गुणाञ् ञ्णिति वृद्धिर्भवति पूर्वविप्रतिषेधेन[4] । ऋतो लिटि गुणस्या-

---

[1] नेतराच्छन्दसि ७. १. २६ ; पुनःप्रसङ्ग इति चेदमादिभिस्तुल्यम् ७. १. ७२ वा. ३.

[2] अस्तेर्भूः २. ४. ५२.

[3] उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु ; किरतौ लवने ; हिंसायां प्रतेश्च ; अपाच्चतुष्पाच्छकुनिष्वालेखने ६. १. १३५–१३८.

[4] सिचि वृद्धिः परस्मैपदेषु ७. २. १ ; ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ७. २. ५.

वकाशः । सस्वरतुः सस्वरुः । ञ्णिति वृद्धेरवकाशः । स्वारकः ध्वारकः । इहोभयं प्राप्नोति । सस्वार दध्वार । ञ्णिति वृद्धिर्भवति पूर्वविप्रतिषेधेन ॥

पुनःप्रसङ्गविज्ञानाद्वा सिद्धम् ॥ ३ ॥

अथवा पुनःप्रसङ्गाद्गुणे कृते रपरत्वे चात उपधायाः [७. २. ११६] इति वृद्धिर्भविष्यति ॥ नैष युक्तः परिहारः । पुनःप्रसङ्गो नाम स भवति यत्र तेनैव कृते प्राप्नोति तेनैव चाकृते । अत्र खलु गुणे कृते रपरत्वे चात उपधाया इति वृद्धिः प्राप्नोत्यकृते चाचो ञ्णितीति । तस्मात्सुष्ठूच्यत ऋतो लिटि गुणाञ्ञ्णिति वृद्धिर्विप्रतिषेधेनेति ॥*

शॄदॄप्रां ह्रस्वो वा ॥ ७ । ४ । १२ ॥

किमर्थं ह्रस्वो वेत्युच्यते न गुणो वेत्युच्येत । तत्रायमप्यर्थो गुणग्रहणं न कर्तव्यं भवति । प्रकृतमनुवर्तते । क्व प्रकृतम् । ऋतश्च संयोगादेर्गुणः [१०] इति ।

ऋतो ह्रस्वत्वमित्त्वप्रतिषेधार्थम् ॥ १ ॥

ऋतो ह्रस्वत्वमुच्यत · इत्त्वप्रतिषेधार्थम् । इत्त्वं[1] मा भूदिति । गुणो वेतीयत्युच्यमाने गुणेन मुक्त इत्त्वं प्रसज्येत । ह्रस्वो वेत्युच्यमाने ह्रस्वेन मुक्ते यथाप्राप्तो[2] गुणो भविष्यति ॥

केऽणः ॥ ७ । ४ । १३ ॥

केऽणो ह्रस्वत्वे तद्धितग्रहणं कृन्निवृत्त्यर्थम् ॥ १ ॥

केऽणो ह्रस्वत्वे तद्धितग्रहणं कर्तव्यम् । किं प्रयोजनम् । कृन्निवृत्त्यर्थम् । कृति मा भूत् । राका धाकेति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥**

उपसर्गाद्ध्रस्व ऊहतेः ॥ ७ । ४ । २३ ॥

इह कस्मान्न भवति । प्रोह्यते उपोह्यते । एकादेशे कृते व्यपवर्गाभावात् ॥ एवमपि आ ऊह्यते ओह्यते समोह्यत । अण इति[3] वर्तते ॥

---

* [V. M. om. ऋच्छत्यॄताम् (११)].

** [V. M. om. न कपि (१४) ; आपोऽन्यतरस्याम् (१५) ; ऋद्दशोऽङि गुणः (१६) ; अस्यतेस्थुक् (१७) ; श्वयतेरः (१८) ; पतः पुम् (१९) ; वच उम् (२०) ; शीङः सार्वधातुके गुणः (२१) ; अयङ् यि क्ङिति (२२)].

[1] ऋत इद्धातोः ७. १. १००. [2] ऋच्छत्यॄताम् ७. ४. ११. [3] केऽणः ७. ४. १३.

एतेर्लिङि ॥ ७ । ४ । २४ ॥

एतेर्लिङ्युपसर्गात् ॥ १ ॥

एतेर्लिङ्युपसर्गादिति वक्तव्यम् । इह मा भूत् । ईयात्[1] ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । उपसर्गादिति[2] वर्तते । एवं तर्ह्याचार्योऽन्वाचष्ट उपसर्गादित्यनुवर्तत इति । नैतदन्वाख्येयमधिकारा अनुवर्तन्त इति । एष एव न्यासो यदुताधिकारा अनुवर्तेरन् ॥*

रीङृतः ॥ ७ । ४ । २७ ॥

दीर्घोच्चारणं किमर्थं न रिङ्त इत्येवोच्येत । का रूपसिद्धिः मात्रीयति पित्रीयति । अकृत्सार्वधातुकयोरिति[1] दीर्घत्वं भविष्यति ॥ एवं तर्हि सिद्धे सति यद्दीर्घोच्चारणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषाङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येति । किमेतस्य ज्ञापने प्रयोजनम् । पिबेर्गुणप्रतिषेधश्चोदितः[3] स न वक्तव्यो भवति ॥**

यङि च ॥ ७ । ४ । ३० ॥

यङ्प्रकरणे हन्तेर्हिंसायामीङ् ॥ १ ॥

यङ्प्रकरणे हन्तेर्हिंसायामीङ्वक्तव्यः । जेघ्नीयते ॥ यदीङभ्यासरूपं न सिध्यति[4] ॥ एवं तर्हि यङ्प्रकरणे हन्तेर्हिंसायामीक् । एवमप्युपधालोपो न प्राप्नोति ॥ एवं तर्हि यङ्प्रकरणे हन्तेर्हिंसायां घ्नी ॥***

न च्छन्दस्यपुत्रस्य ॥ ७ । ४ । ३५ ॥

अत्यल्पमिदमुच्यतेऽपुत्रस्येति । अपुत्रादीनामिति वक्तव्यम् । इहापि यथा स्यात् । ज॒नी॒यन्तो॒ न्वग्र॑वः पु॒त्री॒यन्त॑ः सु॒दान॑वः[6] ॥

---

* [V. M. om. अकृत्सार्वधातुकयोर्दीर्घः (२५) ; च्वौ च (२६)].

** [V. M. om. रिङ् शयग्लिङ्क्षु (२८) ; गुणोर्तिसंयोगाद्योः (२९)].

*** [V. M. om. ई घ्राध्मोः (३१) ; अस्य च्वौ (३२) ; अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु (३४)].

[1] अकृत्सार्वधातुकयोर्दीर्घः ७. ४. २५.

[2] उपसर्गाद् ह्रस्व ऊहतेः ७. ४. २३.

[3] पिबेर्गुणप्रतिषेधः ७. ३. ७८ वा. १.

[4] गमहनजनखनघसां लोपः क्ङित्यनङि ६. ४. ९८; द्विर्वचनेचि १. १. ५९.

[5] क्यचि च ७. ४. ३३.

[6] ऋ. सं. ७. ९६. ४

छन्दसि प्रतिषेधे दीर्घप्रतिषेधः ॥ १ ॥

छन्दसि प्रतिषेधे दीर्घत्वस्य[1] प्रतिषेधो वक्तव्यः । संस्वेदयुः मित्रयुः ॥

न वाश्वाघस्याद्वचनमवधारणार्थम् ॥ २ ॥

न वा वक्तव्यम् । किं कारणम् । अश्वाघस्याद्वचनमवधारणार्थं भविष्यति[2] अश्वाघयोरेव च्छन्दसि दीर्घो भविष्यति नान्यस्येति ॥*

शाछोरन्यतरस्याम् ॥ ७ । ४ । ४१ ॥

श्यतेरित्त्वं व्रते नित्यम् ॥ १ ॥

श्यतेरित्त्वं व्रते नित्यमिति वक्तव्यम् । संशितव्रतः ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् ।

देवत्रातो[3] गलो[4] ग्राह[5] इतियोगे च सद्विधिः[6] ।
मिथस्ते न विभाष्यन्ते गवाक्षः[7] संशितव्रतः ॥**

दो दद्घोः ॥ ७ । ४ । ४६ ॥

अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि ।
सुदत्तमनुदत्तं च निदत्तमिति चेष्यते ॥

किं पुनरयं तकारान्त आहोस्विद्दकारान्त उत धकारान्तोऽथवा थकारान्तः । कश्चात्र विशेषः ।

तान्ते दोषो दीर्घत्वं स्यात्

यदि तकारान्तो दस्ति [६. ३. १२४] इति दीर्घत्वं प्राप्नोति ॥

दान्ते दोषो निष्ठानत्वम् ।

अथ दकारान्तो रदाभ्यां निष्ठात इति[8] नत्वं प्राप्नोति ॥

धान्ते दोषो धत्वप्राप्तिः

अथ धान्तो झषस्तथोर्धोऽधः [८. २. ४०] इति धत्वं प्राप्नोति ॥

---

* [V. M. om. दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति (३६); अश्वाघस्यात् (३७); देवसुम्नयोर्यजुषि काठके (३८); कव्यध्वरपृतनस्यर्चि लोपः (३९); द्यतिस्यतिमास्थामित् ति किति (४०)].

** [V. M. om. दधातेर्हिः (४२); जहातेश्च क्त्वि (४३); विभाषा छन्दसि (४४); सुधितवसुधितनेमधितधिष्वधिषीय च (४५)].

[1] अकृत्सार्वधातुकयोर्दीर्घः ७. ४. २५. [2] अश्वाघस्यात् ७. ४. ३७ [3] नुदविदोन्दत्राघ्राह्रीभ्योन्यतरस्याम् ८. २. ५६. [4] अचि विभाषा ८. २. २१. [5] विभाषा ग्रहः ३. १. १४३. [6] लक्षणहेत्वोः क्रियायाः ३. २. १२६. [7] अवङ् स्फोटायनस्य ६. १. १२३. [8] रदाभ्यां निष्ठातो नः पूर्वस्य च दः ८. २. ४२.

थान्तेऽदोषस्तस्मात्थान्तः ॥

अथ थकारान्तो न दोषो भवति ॥

अच उपसर्गात्तः ॥ ७ । ४ । ४७ ॥

अच उपसर्गात्तत्व आकारग्रहणम् ॥ १ ॥

अच उपसर्गात्तत्व आकारग्रहणं कर्तव्यम् ॥ न कर्तव्यम् । अलोऽन्त्यस्य विधयो भवन्तीत्याकारस्य भविष्यति[1] ॥ न सिध्यति । किं कारणम् ।

आदेर्हि परस्य ॥ २ ॥

अत्र हि तस्मादित्युत्तरस्यादेः परस्य [१. १. ६७; ५४] इति दकारस्य प्राप्नोति ॥ नैष दोषः ।

अवर्णप्रकरणात्सिद्धम् ॥ ३ ॥

अस्येति वर्तते । क्व प्रकृतम् । अस्य च्वौ [३२] इति ॥ यद्यवर्णग्रहणमनुवर्तते दद्भावे[2] दोषो भवति । एवं तर्ह्येवं वक्ष्यामि दोऽद्धोरिति । दो य आकारस्तस्याद्भवति । ततोऽच उपसर्गात्तः । अस्येत्येव । एवमपि सूत्रभेदः कृतो भवति । नासौ सूत्रभेदः । सूत्रभेदं कमुपाचरन्ति । यत्र तदेवान्यत्सूत्रं क्रियते भूयो वा । यद्धि तदेवोपसंहृत्य क्रियते नासौ सूत्रभेदः ॥ अथवा द्वितकारको निर्देशः क्रियते सोऽनेकाल्शित्सर्वस्य [१. १. ५५] इति सर्वस्य भविष्यति । इहापि तर्हि प्राप्नोति । अद्भिः अद्भ्य इति[3] । अच इति वर्तते । तच्चावश्यमज्ग्रहणमनुवर्त्यं ल्वाभ्यामित्येवमर्थम्[4] ॥ अथवा त्रितकारको निर्देशः करिष्यत इहार्थौ द्वावुत्तरार्थश्चैकः ॥

द्यतेरित्त्वादचस्तः ॥ ४ ॥

द्यतेरित्त्वादचस्त इत्येतद्भवति विप्रतिषेधेन । द्यतेरित्त्वस्यावकाशः[5] । निर्दितम् निर्दितवान् । अचस्त इत्यस्यावकाशः । प्रत्तम् अवत्तम् । इहोभयं प्राप्नोति । नीत्तम् वीत्तम् । अचस्त इत्येतद्भवति विप्रतिषेधेन ॥

अपो भि ॥ ७ । ४ । ४८ ॥

अपो भि मासश्छन्दसि ॥ १ ॥

अपो भीत्यत्र मासश्छन्दस्युपसंख्यानं कर्तव्यम् । माद्भिरिष्ट्वा इन्द्रो वृत्रहा[6] ॥

---

[1] अलोन्त्यस्य १. १. ५२.　[2] दो दद् घोः ७. ४. ४६.　[3] अपो भि ७. ४. ४८.
[4] ऋदोरप् ३. ३. ५७. [5] द्यतिस्यतिमास्थामित्ति किति ७. ४. ४०. [6] Cf. शौ. सं. १९. २७. २.

अत्यल्पमिदमुच्यते ।

स्ववस्स्वतवसोर्मास उषसश्च त इष्यते ।

स्ववद्भिः स्वतवद्भिः । समुषद्भिरजायथाः[१] । माद्भिरिष्ट्वा इन्द्रो वृत्रहा[२] ॥*

सनि मीमाघुरभलभशकपतपदामच इस् ॥ ७ । ४ । ५४ ॥

इस्त्वं सनि राधो हिंसायाम् ॥ १ ॥

इस्त्वं सनि राधो हिंसायामिति वक्तव्यम् । प्रतिरित्सति । हिंसायामिति किमर्थम् । आरिरात्सति ॥

आप्ज्ञप्यृधामीत् ॥ ७ । ४ । ५५ ॥

ज्ञपेरीत्त्वमनन्त्यस्य ॥ १ ॥

ज्ञपेरीत्त्वमनन्त्यस्येति वक्तव्यम् । ज्ञीप्सति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । लोपो[३] ऽन्त्यस्य बाधको भविष्यति । अनवकाशा विधयो बाधका भवन्ति सावकाशश्च णिलोपः । कोऽवकाशः । कारणा हारणा । एवमपीत्त्वमन्त्यस्य लोपस्य बाधकं स्यात् । अनवकाशा हि विधयो बाधका भवन्तीत्त्वमपि सावकाशम् । कोऽवकाशः । अनन्त्यः । कथं पुनः सत्यन्त्ये ऽनन्त्यस्येत्त्वं स्यात् । भवेद्योऽचाङ्गं विशेषयेत्तस्यानन्त्यस्य न स्याद्वयं तु खल्वङ्गेनाचं विशेषयिष्यामः । अङ्गस्याचो यत्रतत्रस्थस्येति ॥ एवमप्युभयोः सावकाशयोः परत्वादीत्त्वं प्राप्नोति तस्मादनन्त्यस्येति वक्तव्यम् ॥**

अत्र लोपोऽभ्यासस्य ॥ ७ । ४ । ५८ ॥

अभ्यासस्यानचि ॥ १ ॥

अभ्यासस्येति यदुच्यते तदनचि द्रष्टव्यम् । पतापतः चराचरः वदावदः[४] ॥***

---

* [V. M. om. सः स्यार्धधातुके (४९); तासस्त्योर्लोपः (५०); रि च (५१); ह इति (५२); यीवर्णयोर्दीधीवेव्योः (५३)].

** [V. M.. om. दम्भ इच्च (५६); मुचोऽकर्मकस्य गुणो वा (५७)].

*** [V. M. om. ह्रस्वः (५९)].

[१] ऋ. १. ६. ३. [२] Cf. शौसं १९ २७. २ माद्भ्यस्त्वा चन्द्रो वृत्रहा. [३] णेरनिटि ६. ४. ५१. [४] चरिचलिपतिवदीनामचि आक् चाभ्यासस्य ६. १. १२ वा. ६.

हलादिः शेषः ॥ ७ । ४ । ६० ॥

किमयं षष्ठीसमासः । हलामादिर्हलादिः हलादिः शिष्यत इति । आहोस्वित् कर्मधारयः । हल् आदिर्हलादिः हलादिः शिष्यत इति । कश्चात्र विशेषः ।

हलादिशेषे षष्ठीसमास इति चेदजादिषु शेषप्रसङ्गः ॥ १ ॥

हलादिशेषे षष्ठीसमास इति चेदजादिषु शेषः प्राप्नोति । आनक्ष आनक्षतुः आनक्षुः ॥ अस्तु तर्हि कर्मधारयः ।

कर्मधारय इति चेदादिशेषनिमित्तत्वाल्लोपस्य तदभावे लोपवचनम् ॥ २ ॥

कर्मधारय इति चेदादिशेषनिमित्तत्वाल्लोपस्य तदभाव आद्यस्य हलोऽभावे लोपो वक्तव्यः । आटतुः आटुः ॥

तस्मादनादिलोपः ॥ ३ ॥

तस्मादनादिर्हल् लुप्यत इति वक्तव्यम् ॥

उक्तं वा ॥ ४ ॥

किमुक्तम् । प्रतिविधास्यते हलादिशेष इति[1] । अयमिदानीं स प्रतिविधानकालः । इदं प्रतिविधीयते । इदं प्रकृतमत्र लोपोभ्यासस्य [५९] इति । ततो वक्ष्यामि । ह्रस्वः [५९] । ह्रस्वो भवत्यादेशः । अभ्यासस्य लोप इत्यनुवर्तते । तत्र ह्रस्वभांविनां ह्रस्वो लोपभाविनां लोपो भविष्यति । ततो हलादिः शेषश्चेति ॥ अथवैवं वक्ष्यामि । ह्रस्वोऽहल् । ह्रस्वो भवत्यभ्यासस्येतिं । ततोऽहल् । अहल् च भवत्यभ्यासः । तत आदिः शेषः । आदिः शेषो भवत्यभ्यासस्येति ॥ अथवा योगविभागः करिष्यते । ह्रस्वादेशो भवत्यभ्यासस्य । ततो हल् । हल् च लुप्यतेऽभ्यासस्य । तत आदिः शेषः । आदिः शेषश्च भवत्यभ्यासस्य ॥

शर्पूर्वाः खयः ॥ ७ । ४ । ६१ ॥

शर्पूर्वशेषे खर्पूर्वग्रहणम् ॥ १ ॥

शर्पूर्वशेषे खर्पूर्वग्रहणं कर्तव्यम् । खर्पूर्वाः खयः शिष्यन्ते खरो लुप्यन्त

---

[1] ननु चोक्तं साति तस्मिन् प्रतिषेध इति चेद्धलादिशेषे दोष इति । प्रतिविधास्यते हलादिशेषे ॥ ६. १. २ वा. १० महाभाष्य.

इति वक्तव्यम् । किं प्रयोजनम् । उचिच्छिषति व्युचिच्छिषति । तुकः श्रवणं मा भूदिति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । चर्त्वे[1] कृते तुग्न भविष्यति । असिद्धं चर्त्वं तस्यासिद्धत्वात्तुक् प्राप्नोति[2] । सिद्धकाण्डे पठितमभ्यासजश्त्वचर्त्वमेत्त्वतुकोरिति[3] ॥ एवमप्यन्तरङ्गत्वात् प्राप्नोति तस्मात् खर्पूर्वग्रहणं कर्तव्यम् । न कर्तव्यम् । एत्त्वतुग्ग्रहणं न करिष्यते । अभ्यासजश्त्वचर्त्वं सिद्धमित्येव ॥

आदिशेषप्रसङ्गस्तु ॥ २ ॥

आदिशेषस्तु प्राप्नोति[4] । तिष्ठासति । ननु चानादिशेष आदिशेषं बाधिष्यते । कथमन्यस्योच्यमानमन्यस्य बाधकं स्यात् । असति खल्वपि संभवे बाधनं भवत्यस्ति च संभवो यदुभयं स्यात् ॥ यद्यादिशेषोऽपि भवति शर्पूर्ववचनमिदानीं किमर्थं स्यात् ।

शर्पूर्ववचनं किमर्थमिति चेत्खयां लोपप्रतिषेधार्थम् ॥ ३ ॥

शर्पूर्ववचनं किमर्थमिति चेत्खयां लोपो मा भूदिति ॥

व्यपकर्षविज्ञानात्सिद्धम् ॥ ४ ॥

व्यपकर्षविज्ञानात्सिद्धमेतत् । किमिदं व्यपकर्षविज्ञानादिति । अपवादविज्ञानात् । अपवादत्वादनादिशेष आदिशेषं बाधिष्यते ॥ ननु चोक्तं कथमन्यस्योच्यमानमन्यस्य बाधकं स्यादिति । इदं तावदयं प्रष्टव्यः । यदि तन्नोच्येत किमिह स्यात् । हलादिशेषः । हलादिशेषश्चेन्नाप्राप्ते हलादिशेष इदमुच्यते तद्बाधकं भविष्यति ॥ यदप्युच्यतेऽसति खल्वपि संभवे बाधनं भवत्यस्ति च संभवो यदुभयं स्यादिति सत्यपि संभवे बाधनं भवति । तद्यथा । दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति सत्यपि संभवे दधिदानस्य तक्रदानं बाधकं भवति । एवमिहापि सत्यपि संभवेऽनादिशेष आदिशेषं बाधिष्यते ॥*

दाधर्ति दर्धर्ति दर्धर्षि बोभूतु तेतिक्ते ऽलर्ष्यापनीफणत् संसनिष्यदत् करिक्रत् कनिक्रदद्भरिभ्रद्दविध्वतो दविद्युतत्तरित्रतः सरीसृपतं वरीवृजन्मर्मृज्यागनीगन्तीति च ॥ ७ । ४ । ६५ ॥

दाधर्तीति किं निपात्यते । धारयतेः श्लावभ्यासस्य दीर्घत्वं णिलुक् च ॥

---

* [V. M. om. कुहोश्चुः (६२) ; न कवतेर्यङि (६३) ; कृषेश्छन्दसि (६४)].

[1] अभ्यासे चर्च ८. ४. ५४.

[2] छे च ६. १. ७३.

[3] अभ्यासजश्त्वचर्त्वमेत्त्वतुकोः ८. २. ६. वा. १३.

[4] हलादिः शेषः ७. ४. ६०.

अनिपात्यम् । तूतुजानवदभ्यासस्य दीर्घत्वं[1] पर्णशुषिवण्णिलुग्भविष्यति ॥ धृङो वाभ्यासस्य दीर्घत्वं परस्मैपदं च ॥ अनिपात्यम् । तूतुजानवदभ्यासस्य दीर्घत्वं युध्यतिवत्परस्मैपदं भविष्यति ॥

दर्धर्तीति किं निपात्यते । धारयतेः श्लावभ्यासस्य रुग्णिलुक् च ॥ अनिपात्यम् । देवाअदुहूवद्रुट्[2] पर्णशुषिवण्णिलुग्भविष्यति ॥ धृङो वाभ्यासस्य रुक् परस्मैपदं च ॥ अनिपात्यम् । देवाअदुहूवद्रुडयुध्यतिवत्परस्मैपदं च भविष्यति ॥

दर्धर्षीति किं निपात्यते । धारयतेः श्लावभ्यासस्य रुग्णिलुक् च ॥ अनिपात्यम् । देवाअदुहृवद्रुट् पर्णशुषिवण्णिलुक् च भविष्यति ॥ धृङो वाभ्यासस्य रुक् परस्मैपदं च ॥ अनिपात्यम् । देवाअदुहृवद्रुड्युध्यतिवत्परस्मैपदं च भविष्यति ॥

बोभूत्विति किं निपात्यते । भवतेर्यङ्लुगन्तस्यागुणत्वं निपात्यते । नैतदस्ति प्रयोजनम् । सिद्धमत्रागुणत्वं भूसुवोस्तिङि [७. ३. ८८] इति । एवं तर्हि नियमार्थं भविष्यति । अत्रैव यङ्लुगन्तस्य गुणो न भवति नान्यत्रेति । क्व मा भूत् । बोभवीतीति ॥

तेतिक्त इति किं निपात्यते । तिजेर्यङ्लुगन्तस्यात्मनेपदं निपात्यते । नैतदस्ति प्रयोजनम् । सिद्धमत्रात्मनेपदमनुदात्तङित आत्मनेपदम् [१. ३. १२] इति । नियमार्थं तर्हि भविष्यति । अत्रैव यङ्लुगन्तस्यात्मनेपदं भवति नान्यत्रेति । क्व मा भूत् । बेभिदीति चेच्छिदीति ॥*

द्युतिस्वाप्योः संप्रसारणम् ॥ ७ । ४ । ६७ ॥

किमर्थं स्वपेरभ्यासस्य संप्रसारणमुच्यते यदा सर्वेष्वभ्यासस्थानेषु स्वपेः संप्रसारणमुक्तम्[3] ।

स्वापिग्रहणं व्यपेतार्थम् ॥ १ ॥

स्वापिग्रहणं क्रियते व्यपेतार्थम् । व्यपेतार्थोऽयमारम्भः । सुष्वापयिषतीति ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति ।

तत्र क्यजन्तेऽतिप्रसङ्गः ॥ २ ॥

तत्र क्यजन्ते ऽतिप्रसङ्गो भवति । इहापि प्राप्नोति । स्वापकमिच्छति स्वापकीयति स्वापकीयतेः सन्सिस्वापकीयिषतीति ॥

---

* [V. M. om. उरत् (६६)].

[1] तुजादीनां दीर्घोऽभ्यासस्य ६. १. ७.

[2] शीङो रुट् ; वेत्तेर्विभाषा ; बहुलं छन्दसि ७. १. ६–८.

[3] वचिस्वपियजादीनां किति ; लिट्यभ्यासस्योभयेषाम् ; स्वापेश्चङि ; स्वपिस्यमिव्येञां यङि ; ६. १. १५ ; १७ ; १८ ; १९ (रुदविदमुषग्राहिस्वपिप्रच्छः संश्च १. २. ८).

सिद्धं तु णिग्रहणात् ॥ ३ ॥

सिद्धमेतत् । कथम् । णिग्रहणं कर्तव्यम् ॥ न कर्तव्यम् । निर्देशादेव हि व्यक्तं ण्यन्तस्य ग्रहणमिति ॥ नात्र निर्देशः प्रमाणं शक्यं कर्तुम् । यथा हि निर्देशस्तथेहापि प्रसज्येत । स्वापं करोति स्वापयति स्वापयतेः सन् सिस्वापयिषतीति । तस्माण्णिग्रहणं कर्तव्यम् ॥*

निजां त्रयाणां गुणः श्लौ ॥ ७ । ४ । ७५ ॥

त्रिग्रहणानर्थक्यं गणान्तत्वात् ॥ १ ॥

त्रिग्रहणमनर्थकम् । किं कारणम् । गणान्तत्वात् । त्रय एव निजादयः ॥

उत्तरार्थं तु ॥ २ ॥

उत्तरार्थं तर्हि त्रिग्रहणं कर्तव्यम् । भृञामित् [७६] त्रयाणां यथा स्यात् । इह मा भूत् । जहाति ॥**

अर्तिपिपर्त्योश्च ॥ ७ । ४ । ७७ ॥

अर्तिग्रहणं किमर्थं न बहुलं छन्दसि [७८] इत्येव सिद्धम् । न ह्यन्तरेण छन्दोऽर्तेः श्लुर्लभ्यः ॥ एवं तर्हि सिद्धे यदर्तिग्रहणं करोति तज्ज्ञापयत्याचार्यो भाषायामर्तेः श्लुर्भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । इयर्तीत्येतत्सिद्धं भवति ॥ ***

गुणो यङ्लुकोः ॥ ७ । ४ । ८२ ॥

ऐचोर्यङि दीर्घप्रसङ्गो ह्रस्वाद्धि परं दीर्घत्वम् ॥ १ ॥

ऐचोर्यङि दीर्घत्वं प्राप्नोति । डोढौक्यते तोत्रौक्यत इति । ननु च ह्रस्वत्वे कृते दीर्घत्वं न भविष्यति[1] । न सिध्यति । किं कारणम् । ह्रस्वाद्धि परं दीर्घत्वम् । ह्रस्वत्वं क्रियतां दीर्घत्वमिति किमत्र कर्तव्यम् । परत्वाद्दीर्घत्वेन भवितव्यम् ॥

---

* [V. M. om. व्यथो लिटि (६८) ; दीर्घ इणः किति (६९) ; अत आदेः (७०) ; तस्मान्नुड् द्विहलः (७१) ; अश्नोतेश्च (७२) ; भवतेरः (७३) ; ससूवेति निगमे (७४)].

** [V. M. om. भृञामित् (७६)].

*** [V. M. om. बहुलं छन्दसि (७८) ; सन्यतः (७९) ; ओः पुयण्ज्यपरे (८०) ; स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा (८१).

[1] ह्रस्वः ७. ४. ५९ ; दीर्घोऽकितः ७. ४. ८३.

न वाभ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वात् ॥ २ ॥

न वैष दोषः । किं कारणम् । अभ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वात् । अभ्यासविकारेष्वपवादा उत्सर्गान्न बाधन्त इत्येषा परिभाषा कर्तव्या ॥ कान्येतस्याः परिभाषायाः प्रयोजनानि ।

प्रयोजनं सन्वद्भावस्य दीर्घत्वम् ॥ ३ ॥

अचीकरत् अजीहरत् । सन्वद्भावमपवादत्वाद्दीर्घत्वं न बाधते[1] ॥

मान्प्रभृतीनां दीर्घत्वमित्त्वस्य ॥ ४ ॥

मान्प्रभृतीनां दीर्घत्वमपवादत्वादित्त्वं न बाधते[2] ॥

गणेरीत्वं हलादिशेषस्य ॥ ५ ॥

गणेरीत्वमपवादत्वाद्धलादिशेषं न बाधते[3] ॥

इदमयुक्तं वर्तते । किमत्रायुक्तम् । ऐचोर्यङि दीर्घप्रसङ्गो ह्रस्वाद्धि परं दीर्घत्वमित्युक्त्वा तत उच्यते न वाभ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वादिति । तस्याश्च परिभाषायाः प्रयोजनानि नामोच्यन्ते प्रयोजनं सन्वद्भावस्य दीर्घत्वं मान्प्रभृतीनां दीर्घत्वमित्त्वस्य गणेरीत्वं हलादिशेषस्येति च । न च सन्वद्भावमपवादत्वाद्दीर्घत्वं बाधते । किं तर्हि । परत्वात् । न खल्वपि मान्प्रभृतीनां दीर्घत्वमपवादत्वादित्त्वं बाधते । किं तर्हि । अन्तरङ्गत्वात् । न खल्वपि गणेरीत्वमपवादत्वाद्धलादिशेषं बाधते । किं तर्हि । अनवकाशत्वात् ॥ एवं तर्हीयं परिभाषा कर्तव्याभ्यासविकारेषु बाधका न बाधन्त इति । सा तर्ह्येषा परिभाषा कर्तव्या । न कर्तव्या । आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति यदयमकित इति प्रतिषेधं शास्ति[4] ॥

दीर्घोऽकितः ॥ ७ । ४ । ८३ ॥

अकित इति किमर्थम् । यंयम्यते रंरम्यते । अकित इति शक्यमकर्तुम् । कस्मान्न भवति यंयम्यते रंरम्यत इति । नुकि कृते[5]ऽनजन्तत्वात् ॥ अत उत्तरं पठति ।

---

[1] सन्वल्लघुनि चङ्परेऽनग्लोपे ; दीर्घो लघोः ७. ४. ९३ ; ९४.

[2] मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य ; सन्यतः ३. १. ६ ; ७. ४. ७९.

[3] ई च गणः ; हलादिः शेषः ७. ४. ९७ ; ६०.

[4] दीर्घोऽकितः ७. ४. ८३.

[5] नुगतोऽनुनासिकान्तस्य ७. ४. ८५.

अकिद्वचनमन्यत्र किदन्तस्यालोऽन्त्यनिवृत्त्यर्थम् ॥ १ ॥

अकिद्वचनं क्रियते ज्ञापकार्थम् । किं ज्ञाप्यम् । एतज्ज्ञापयत्याचार्योऽन्यत्र किदन्तस्याभ्यासस्यालोऽन्त्यविधिर्न भवतीति[1] ॥ किमेतस्य ज्ञापने प्रयोजनम् ।

प्रयोजनं ह्रस्वत्वात्त्वेत्त्वगुणेषु ॥ २ ॥

ह्रस्वत्वम् । अवचच्छतुः अवचच्छुः । अत्त्वम् । चच्छृदतुः चच्छृदुः । इत्त्वम् । चिच्छादयिषति चिच्छर्दयिषति । गुणः । चेच्छिद्यते चोच्छुष्यते । तुकि कृतेऽनन्त्यत्वादेते विधयो न प्राप्नुवन्ति[2] ॥

विप्रतिषेधात्सिद्धम् ॥ ३ ॥

नैतानि सन्ति प्रयोजनानि । विप्रतिषेधेनाप्येतानि सिद्धानि । तुक् क्रियतामेते विधय इति किमत्र कर्तव्यम् । परत्वादेते विधय इति ॥

तदन्तग्रहणाद्वा ॥ ४ ॥

अथवा नैवं विज्ञायतेऽभ्यासस्याजन्तस्यर्कारान्तस्याकारान्तस्येगन्तस्येति । कथं तर्हि । अभ्यासे योऽजभ्यासे य ऋकारोऽभ्यासे योऽकारोऽभ्यासे य इगिति । एवं च कृत्वा दीर्घत्वं प्राप्नोति ॥ एवं तर्हीदमिह व्यपदेश्यं सदाचार्यो न व्यपदिशति । किम् । अपवादो नुग्दीर्घत्वस्येति ॥

एवं तर्हि सिद्धे सति यदकित इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषाऽभ्यासविकारेषु बाधका न बाधन्त इति । किमेतस्य ज्ञापने प्रयोजनम् । ऐचोर्यङि दीर्घप्रसङ्गो ह्रस्वाद्धि परं दीर्घत्वमित्युक्तं[3] स न दोषो भवति ॥*

नुगतोऽनुनासिकान्तस्य ॥ ७ । ४ । ८५ ॥

नुकि यंयम्यते रंरम्यत इति रूपासिद्धिः ॥ १ ॥

नुकि सति यंयम्यते रंरम्यत इति रूपं न सिध्यति[4] ॥

अनुस्वारागमवचनात्सिद्धम् ॥ २ ॥

अनुस्वारागमो वक्तव्यः ॥ एवमपीदमेव रूपं स्यात् यँय्यम्यते[5] इदं न स्यात् यंयम्यते ।

---

* [V. M. om. नीग् वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम् (८४)].

[1] अलोन्त्यस्य १. १. ५२. [2] छे च ६. १. ७३ ; ह्रस्वः ७. ४. ५९ ; उरत् ७. ४. ६६ ; सन्यतः ७. ४. ७९ ; गुणो यङ्लुकोः ७. ४. ८२. [3] ऐचोर्यङि दीर्घप्रसङ्गः ह्रस्वाद्धि परं दीर्घत्वम् ७. ४. ८२ वा. १. [4] नश्चापदान्तस्य झलि ८. ३. २४. [5] अनुस्वारस्य ययि परसवर्णः ८. ४. ५८.

पदान्तवच्च ॥ ३ ॥

पदान्तवच्चेति वक्तव्यम् । वा पदान्तस्य [८. ४. । ५९] इति ॥*

रीगृदुपधस्य च ॥ ७ । ४ । ९० ॥

रीगृत्वतः संयोगार्थम् ॥ १ ॥

रीगृत्वत इति वक्तव्यम् । किं प्रयोजनम् । संयोगार्थम् । संयोगान्ताः प्रयोजयन्ति । वरीवृश्च्यते परीपृच्छ्यते बरीभृज्ज्यते ॥

रुग्रिकौ च लुकि ॥ ७ । ४ । ९१ ॥

मर्मृज्यते मर्मृज्यमानास इति चोपसंख्यानम् ॥ १ ॥

मर्मृज्यते मर्मृज्यमानास इति चोपसंख्यानं कर्तव्यम् । मर्मृज्यते मर्मृज्यमानासः ॥

ऋतश्च ॥ ७ । ४ । ९२ ॥

किमिदमृकारग्रहणमङ्गविशेषणम् । ऋकारान्तस्याङ्गस्येति । आहोस्विदभ्यासविशेषणम् । ऋकारान्तस्याभ्यासस्येति । अङ्गविशेषणमित्याह । कथं ज्ञायते । यदयं तपरकरणं करोति । कथं कृत्वा ज्ञापकम् । न हि कश्चिदभ्यासे दीर्घोऽस्ति[1] यदर्थं तपरकरणं क्रियेत ॥ अथाङ्गविशेषण ऋकारग्रहणे सति तपरकरणे किं प्रयोजनम् । इह मा भूत् । चाकर्ति चाकीर्तः चाकिरति ॥

किरतिं चर्करीतान्तं पचतीत्यत्र यो नयेत् ।
प्राप्तिज्ञं तमहं मन्ये प्रारब्धस्तेन संग्रहः ॥

सन्वल्लघुनि चङ्परेऽनग्लोपे ॥ ७ । ४ । ९३ ॥

इह कस्मान्न भवति । अजजागरत् । लघुनि चङ्पर इत्युच्यते व्यवहितं चात्र लघु चङ्परम् । इहापि तर्हि न प्राप्नोति । अचीकरत् अजीहरत् । वचनाद्भविष्यति । इहापि वचनात् प्राप्नोति । अजजागरत् । येन नाव्यवधानं तेन व्यवहितेऽपि वचन-

---

* [V. M. om. जपजभदहदशभञ्जपशां च (८६); चरफलोश्च (८७); उत्परस्यातः (८८); ति च (८९)].

[1] ह्रस्वः ७. ४. ५९.

प्रामाण्यात् । केन च नाव्यवधानम् । वर्णेन । एतेन पुनः संघातेन व्यवधानं भवति न भवति च । एवमपि अचिक्षणत् अत्र न प्राप्नोति । एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति भवत्येवंजातीयकानामित्त्वमिति यदयमत्स्मृदृत्वरप्रथम्रदस्तृस्पशाम् [९५] इतीत्त्वबाधनार्थमत्त्वं शास्ति ॥

सन्वद्भावदीर्घत्वे णेर्णिच्युपसंख्यानम् ॥ १ ॥

सन्वद्भावदीर्घत्वे णेर्णिच्युपसंख्यानं कर्तव्यम् । वादितवन्तं प्रयोजितवान् अवीवदद्वीणां परिवादकेन । किं पुनः कारणं न सिध्यति । णिचा व्यवहितत्वात् । लोपे कृते[1] नास्ति व्यवधानम् । स्थानिवद्भावाद्व्यवधानमेव । प्रतिषिध्यतेऽत्र स्थानिवद्भावो दीर्घविधिं प्रति न स्थानिवदिति[2] ॥ एवमप्यनग्लोप इति प्रतिषेधः प्राप्नोति । वृद्धौ[3] कृतायां लोपस्तन्नाग्लोप्यङ्गं भवति । एवं तर्हीदमिह संप्रधार्यम् । वृद्धिः क्रियतां लोप इति किमत्र कर्तव्यम् । परत्वाद्वृद्धिः । नित्यो लोपः । कृतायामपि वृद्धौ प्राप्नोत्यकृतायामपि । लोपोऽप्यनित्यः । अन्यस्य कृतायां वृद्धौ प्राप्नोत्यकृतायामन्यस्य शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति । उभयोरनित्ययोः परत्वाद्वृद्धिः । वृद्धौ कृतायां लोपस्तन्नाग्लोप्यङ्गं भवति ॥

मीमादीनां तु लोपप्रसङ्गः ॥ २ ॥

मीमादीनां तु लोपः प्राप्नोति[4] । अमीमपत् ॥

सिद्धं तु रूपातिदेशात् ॥ ३ ॥

सिद्धमेतत् । कथम् । रूपातिदेशोऽयम् । सनि यादृशमभ्यासरूपं तत्सन्वद्भावेनातिदिश्यते न च मीमादीनां सन्यभ्यासरूपमस्ति ॥

अङ्गान्यत्वाद्वा सिद्धम् ॥ ४ ॥

अथवा ण्यन्तमेतदङ्गमन्यत् । लोपे कृते नाङ्गान्यत्वम् । स्थानिवद्भावादङ्गमन्यत् ॥ कथमजिज्ञपत् । अत्र सन्यपि ण्यन्तस्यैवोपादानमाप्ज्ञप्यृधामीत् [७. ४. ५५] इति । अत्राङ्गान्यत्वाभावादभ्यासलोपः स्यात् । तस्मात्पूर्व एव परिहारः सिद्धं तु रूपातिदेशादिति ॥*

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकम् ॥ पादश्च समाप्तः ॥

॥ सप्तमोऽध्यायः समाप्तः ॥

---

* [V. M. om. दीर्घो लघोः (९४) ; अत् स्मृदृत्वरप्रथम्रदस्तृस्पशाम् (९५) ; विभाषा वेष्टिचेष्टयोः (९६) ; ई च गणः (९७)].

[1] णेरनिटि ६. ४ ५१.

[2] न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु १. १. ५८.

[3] अचो ञ्णिति ७. २. ११५.

[4] सनि मीमाघुरभलभशकपतपदामच इस् ; अत्र लोपोऽभ्यासस्य ७. ४. ५४, ५८.

सर्वस्य द्वे ॥ ८ । १ ।१ ॥

सर्ववचनं किमर्थम् ।

सर्ववचनमलोऽन्त्यनिवृत्त्यर्थम् ॥ १ ॥

सर्वग्रहणं क्रियतेऽलोऽन्त्यनिवृत्त्यर्थम् । अलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य द्विर्वचनं मा भूदिति[1] ॥ क्व पुनरलोऽन्त्यनिवृत्त्यर्थेनार्थः सर्वग्रहणेन । नित्यवीप्सयोः [८. १. ४] इति । नित्यवीप्सयोरित्युच्यते न चान्त्यस्य द्विर्वचनेन नित्यता वीप्सा वा गम्यते । इह तर्हि परेर्वर्जने [५] इत्यन्त्यस्यापि द्विर्वचनेन वर्ज्यमानता गम्येत ॥

षष्ठीनिर्देशार्थं च ॥ २ ॥

षष्ठीनिर्देशार्थं च सर्वग्रहणं कर्तव्यम् । षष्ठीनिर्देशो यथा प्रकल्पेत ॥

अनिर्देशे हि षष्ठ्यर्थाप्रसिद्धिः ॥ ३ ॥

अक्रियमाणे सर्वग्रहणे षष्ठ्यर्थस्याप्रसिद्धिः स्यात् । कस्य । स्थानेयोगत्वस्य[2] ॥ क्व पुनरिह षष्ठीनिर्देशार्थेनार्थः सर्वग्रहणेन यावता सर्वत्रैव षष्ठ्युच्चार्यते । परेर्वर्जने [५] प्रसमुपोदः पादपूरणे [६] उपर्यध्यधसः सामीप्ये [७] वाक्यादेरामन्त्रितस्य [८] इति ॥ इह न काचित्षष्ठी नित्यवीप्सयोः [४] इति । ननु चैषैव षष्ठी । नैषा षष्ठी । किं तर्हि । अर्थनिर्देश एषः । नित्ये चार्थे वीप्सायां चेति ॥

अलोऽन्त्यनिवृत्त्यर्थेन तावन्नार्थः सर्वग्रहणेन । इदं तावदयं प्रष्टव्यः । नित्यवीप्सयोर्द्वे भवत इत्युच्यते द्विशब्द आदेशः कस्मान्न भवति । आचार्यप्रवृत्तिर्ज्ञापयति न द्विशब्द आदेशो भवतीति यदयं तस्य परमाम्रेडितमनुदात्तं च [२ ; ३] इत्याह । कथं कृत्वा ज्ञापकम् । द्विशब्दोऽयमेकाच् तस्यैकाच्त्वात्तस्य परमाम्रेडितमनुदात्तं चेत्येतन्नास्ति । पश्यति त्वाचार्यो न द्विशब्द आदेशो भवतीति ततस्तस्य परमाम्रेडितमनुदात्तं चेत्याह ॥ यदि तर्हि न द्विशब्द आदेशो भवति के तर्हीदानीं द्वे भवतः । द्विशब्देन

---

[1] अलोन्त्यस्य १. १. ५२.

[2] षष्ठी स्थानेयोगा १. १. ४९.

यदुच्यते । किं पुनस्तत् । द्विशब्दोऽयं संख्यापदं संख्यायाश्च संख्येयमर्थः संख्येये द्वे भविष्यतः । के पुनस्ते । पदे वाक्ये मात्रे वा । तद्यदा तावत्पदे वाक्ये वा तदानेकाल्त्वात्सर्वादेशः सिद्धः । यदा मात्रे अपि तदानेकाल्शित्सर्वस्य [१. १. ५५] इति सर्वादेशो भविष्यति ॥ यदा तर्ह्यर्धमात्रे तदा सर्वादेशो न सिध्यति । नैष दोषः । न चार्धमात्रे द्विरुच्येते । किं कारणम् । इह व्याकरणे यः सर्वाल्पीयान् स्वरव्यवहारः स मात्रया भवति नार्धमात्रया व्यवहारोऽस्ति । तेनार्धमात्रे न भविष्यतः ॥ एवमपि कुत एतत् पदे द्वे भविष्यत इति न पुनर्वाक्ये स्यातां मात्रे वा । नित्यवीप्सयोर्द्वे भवत इत्युच्यते न च वाक्यद्विर्वचनेन मात्राद्विर्वचनेन वा नित्यता वीप्सा वा गम्यते ॥

षष्ठीनिर्देशार्थमेव तर्हि सर्वग्रहणं कर्तव्यम् ।

न वा पदाधिकारात् ॥ ४ ॥

न वा वक्तव्यम् । किं कारणम् । पदाधिकारात् । पदस्येति प्रकृत्य द्विर्वचनं वक्ष्यामि ॥

तच्च समासतद्धितवाक्यनिवृत्त्यर्थम् ॥ ५ ॥

तच्चावश्यं पदग्रहणं कर्तव्यं समासनिवृत्त्यर्थं तद्धितनिवृत्त्यर्थं वाक्यनिवृत्त्यर्थं च । समासनिवृत्त्यर्थं तावत् । सप्तपर्णः अष्टापदम् । तद्धितनिवृत्त्यर्थम् । द्विपदिका त्रिपदिका[1] । माषशः कार्षापणशः[2] । वाक्यनिवृत्त्यर्थम् । ग्रामे ग्रामे पानीयम् । माषं माषं देहि ॥

अथ क्रियमाणेऽपि वै पदग्रहणे समासनिवृत्त्यर्थमिति कथमिदं विज्ञायते । समासस्य निवृत्त्यर्थं समासनिवृत्त्यर्थमिति । आहोस्वित् समासे निवृत्त्यर्थं समासनिवृत्त्यर्थमिति । किं चातः । यदि विज्ञायते समासस्य निवृत्त्यर्थं समासनिवृत्त्यर्थमिति सिद्धं सप्तपर्णः सप्तपर्णौ सप्तपर्णा इति सप्तपर्णाभ्याम् सप्तपर्णेभ्य इत्यत्र[3] प्राप्नोति । अथ विज्ञायते समासे निवृत्त्यर्थं समासनिवृत्त्यर्थमिति सप्तपर्णः सप्तपर्णौ सप्तपर्णा इत्यत्रापि प्राप्नोति[4] ॥ तथा तद्धितनिवृत्त्यर्थमिति । कथमिदं विज्ञायते । तद्धितस्य निवृत्त्यर्थं तद्धितनिवृत्त्यर्थमिति । आहोस्वित् तद्धिते निवृत्त्यर्थं तद्धितनिवृत्त्यर्थमिति । किं चातः । यदि विज्ञायते तद्धितस्य निवृत्त्यर्थं तद्धितनिवृत्त्यर्थमिति सिद्धं द्विपदिकाः त्रिपदिकाः द्विपदिकाभ्याम् त्रिपदिकाभ्याम् माषशः कार्षापणश इत्यत्र प्राप्नोति ।

---

[1] पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च ५. ४. १.

[2] संख्यैकवचनाच्च वीप्सायाम् ५. ४. ४३.

[3] स्वादिष्वसर्वनामस्थाने १. ४. १७.

[4] सुपो धातुप्रातिपदिकयोः ; प्रत्ययलोपे प्रत्ययलक्षणम् २. ४. ७१ ; १. १. ६२.

अथ विज्ञायते तद्धिते निवृत्त्यर्थं तद्धितनिवृत्त्यर्थमिति द्विपदिकाः त्रिपदिका इत्यत्रापि प्राप्नोति ॥ तथा वाक्यनिवृत्त्यर्थमिति कथमिदं विज्ञायते । वाक्यस्य निवृत्त्यर्थं वाक्यनिवृत्त्यर्थमिति । आहोस्विद्वाक्ये निवृत्त्यर्थं वाक्यनिवृत्त्यर्थमिति । किं चातः । यदि विज्ञायते वाक्यस्य निवृत्त्यर्थं वाक्यनिवृत्त्यर्थमिति यदि वाक्यं वीप्सायुक्तं भवितव्यमेव द्विर्वचनेन । अथाप्यवयवो भवत्वेव ॥ तदेतत्क्रियमाणेऽपि पदग्रहण आद्धनविशीर्णं भवति । किंचित्संगृहीतं किंचिदसंगृहीतम् ॥

सगतिग्रहणं च ॥ ६ ॥

सगतिग्रहणं च कर्तव्यम् । प्रपचति प्रपचति । प्रकरोति प्रकरोतीति । किं पुनः कारणं न सिध्यति । न हि सगतिकं पदं भवति ॥

समासनिवृत्त्यर्थेन तावन्नार्थः पदग्रहणेन । समासेनोक्तत्वाद्वीप्साया द्विर्वचनं न भविष्यति । किं च भोः समासो वीप्सायामित्युच्यते । न खलु वीप्सायामित्युच्यते गम्यते तु सोऽर्थः । तत्रोक्तः समासेनेति कृत्वा द्विर्वचनं न भविष्यति । यत्र च समासेनानुक्ता वीप्सा भवति तत्र द्विर्वचनम् । तद्यथा । एकैकविचिताः अन्योन्यसहाया इति । अथवा यदत्र वीप्सायुक्तं नादः प्रयुज्यते । किं पुनस्तत् । पर्वणि पर्वणि सप्त पर्णान्यस्य । पङ्क्तौ पङ्क्तावष्टौ पदान्यस्येति ॥ तद्धितनिवृत्त्यर्थेन चापि नार्थः पदग्रहणेन । तद्धितेनोक्तत्वाद्वीप्साया द्विर्वचनं न भविष्यति । तद्धितः खल्वपि वीप्सायामित्युच्यते[1] । यत्र च तद्धितेनानुक्ता वीप्सा भवति तत्र द्विर्वचनम् । तद्यथा । एकैकशो ददातीति ॥ वाक्यनिवृत्त्यर्थेन चापि नार्थः पदग्रहणेन । पदद्विर्वचनेनोक्तत्वाद्वीप्साया वाक्यद्विर्वचनं न भविष्यति । यत्र च पदद्विर्वचनेनानुक्ता वीप्सा भवति तत्र द्विर्वचनम् । तद्यथा । प्रपचति प्रपचति । प्रकरोति प्रकरोति ॥

उत्तरार्थं तर्हि पदग्रहणं कर्तव्यम् । तस्य परमाम्रेडितमनुदात्तं च [२, ३] इति वक्ष्यति तत्पदद्विर्वचने यथा स्याद्वाक्यद्विर्वचने मा भूत् । मह्यं ग्रहीष्यति मह्यं ग्रहीष्यति । मामभिव्याहरिष्यति मामभिव्याहरिष्यति । कथं चात्र द्विर्वचनम् । छान्दसत्वात् । स्वरोऽपि तर्हि च्छान्दसत्वादेव न भविष्यति ॥ उत्तरार्थमेव तर्हि पदग्रहणं कर्तव्यम् । पदस्य पदात् [१६, १७] इति वक्ष्यति तत् पदग्रहणं न कर्तव्यं भवति । सर्वग्रहणमपि तर्ह्युत्तरार्थम् । अनुदात्तं सर्वमपादादौ [१८] इति वक्ष्यति तत् सर्वग्रहणं न कर्तव्यं भवति ॥ उभयं क्रियते तत्रैव ॥

इहार्थमेव तर्हि षष्ठीनिर्देशार्थमन्यतरत् कर्तव्यम् । षष्ठीनिर्दिष्टस्य स्थाने द्विर्वचनं

---

[1] पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च ५. ४. १ ; संख्यैकवचनाच्च वीप्सायाम् ५. ४. ४३.

यथा स्याद्द्विःप्रयोगो मा भूदिति । किं च स्यात् । आं पचसि देवदत्ता३ आम एकान्तरमामन्त्रितमनन्तिके [५५] इत्येकान्तरता न स्यात् । इह च पौनःपुन्यम्, पौनःपुनिकमित्यप्रातिपदिकत्वात्तद्धितोत्पत्तिर्न स्यात् ॥ यदि तर्हि स्थाने द्विर्वचनं राजा राजा वाग्वाक् पदस्येति नलोपादीनि[1] न सिध्यन्ति । इदमिह संप्रधार्यम् । द्विर्वचनं क्रियतां नलोपादीनीति किमत्र कर्तव्यम् । परत्वान्नलोपादीनि । पूर्वत्रासिद्धे नलोपादीनि सिद्धासिद्धयोश्च नास्ति संप्रधारणा । एवं तर्हि पूर्वत्रासिद्धीयमद्विर्वचन इति वक्ष्यामि । तच्चावश्यं वक्तव्यम् । किं प्रयोजनम् । विभाषिताः प्रयोजयन्ति । द्रोग्धा द्रोग्धा । द्रोढा द्रोढेति[2] ॥ इह तर्हि बिसं बिसम् मुसलं मुसलम् आदेशप्रत्यययोः [८. ३. ५९] इति षत्वं प्राप्नोति । आदेशो यः सकारः प्रत्ययो यः सकार इत्येवमेतद्विज्ञायते ॥ इह तर्हि नृभिर्नृभिः रषाभ्यां नो णः समानपदे [८. ४. १] इति णत्वं प्राप्नोति । समानपद इत्युच्यते समानमेव यन्नित्यं न चैतन्नित्यं समानपदमेव । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । समानग्रहणसामर्थ्यात् । यदि हि यत्समानं चासमानं च तत्र स्यात् समानग्रहणमनर्थकं स्यात् ॥

अथवा पुनरस्तु द्विःप्रयोगो द्विर्वचनम् । ननु चोक्तमां पचसि पचसि देवदत्ता३ आम एकान्तरमामन्त्रितमनन्तिक इत्येकान्तरता न प्राप्नोति । नैष दोषः । सुप्तिङ्भ्यां पदं विशेषयिष्यामः । सुप्तिङन्तं पदम् [१. ४. १४] । यस्मात् सुप्तिङ्विधिस्तदादि सुप्तिङन्तं च । ननु चैकैकस्मादेवात्र सुप्तिङ्विधिः । समुदाये या वाक्यपरिसमाप्तिस्तया पदसंज्ञा । कुत एतत् । शास्त्राहानेः । एवं हि शास्त्रमहीनं भवति ॥ यदप्युच्यत इह पौनःपुन्यम् पौनःपुनिकमित्यप्रातिपदिकत्वात्तद्धितोत्पत्तिर्न प्राप्नोतीति मा भूदेवम् । समर्थादित्येवं भविष्यति । अथवाचार्यप्रवृत्तिर्ज्ञापयति भवत्येवंजातीयकेभ्यस्तद्धितोत्पत्तिरिति यदयं कस्कादिषु[3] कौतस्कुतशब्दं पठति ॥*

नित्यवीप्सयोः ॥ ८ । १ । ४ ॥

इह कस्मान्न भवति । हिमवान् खाण्डवः पारियात्रः समुद्र इति । नित्ये द्वे भवत इति प्राप्नोति ॥ नैष दोषः । अयं नित्यशब्दोऽस्त्येव कूटस्थेष्वविचालिषु भावेषु वर्तते । तद्यथा । नित्या द्यौः नित्या पृथिवी नित्यमाकाशमिति । अस्त्याभीक्ष्ण्ये वर्तते । तद्यथा । नित्यप्रहसितः नित्यप्रजल्पित इति । तद्य आभीक्ष्ण्ये वर्तते तस्येदं ग्रहणम् ॥

---

* [V. M. om. तस्य परमाम्रेडितम् (२) ; अनुदात्तं च (३)].

[1] नलोपः प्रातिपदिकान्तस्य ; चोः कुः ८. २. ७, ३०.

[2] वा द्रुहमुहष्णुहष्णिहाम् ८, २. ३३.

[3] कस्कादिषु च ८ ३. ४८ गणशब्द २.

अथ किमिदं वीप्सेति । आप्नोतेरयं विपूर्वादिच्छायामर्थे सन् विधीयते । यद्येवं चिकीर्षति जिहीर्षतीत्यत्रापि प्राप्नोति । नैष दोषः । नैवं विज्ञायते वीप्सायामभिधेयायामिति । कथं तर्हि । कर्तृविशेषणमेतत् । वीप्सतीति वीप्सः । वीप्सश्चेत्कर्ता भवतीति ॥ कः पुनर्वीप्सार्थः । अनवयवाभिधानं वीप्सार्थः । अनवयवेन द्रव्याणामभिधानमेष वीप्सार्थः ।

अनवयवाभिधानं वीप्सार्थ इति चेज्जात्याख्यायां द्विर्वचनप्रसङ्गः ॥ १ ॥

अनवयवाभिधानं वीप्सार्थ इति चेज्जात्याख्यायां द्विर्वचनं प्राप्नोति । व्रीहिभिर्यवैर्वेति ॥

न वैकार्थत्वाज्जातेः ॥ २ ॥

न वैष दोषः । किं कारणम् । एकार्थत्वाज्जातेः । एकार्थो हि जातिः । एकमर्थं प्रत्याययिष्यामीति जातिशब्दः प्रयुज्यते ॥

अनेकार्थाश्रयत्वाच्च वीप्सायाः ॥ ३ ॥

अनेकार्थाश्रया च पुनर्वीप्सा । अनेकमर्थं संप्रत्याययिष्यामीति वीप्सा प्रयुज्यते । एकार्थत्वाज्जातेरनेकार्थाश्रयत्वाच्च वीप्साया जात्याख्यायां द्विर्वचनं न भविष्यति ॥

निवर्तकत्वाद्वा ॥ ४ ॥

अथवा नानेन द्विर्वचनं निवर्त्यते । किं तर्हि । अद्विर्वचनमनेन निवर्त्यते । यावन्तस्तेऽर्थास्तावतां शब्दानां प्रयोगः प्राप्नोति । तत्रानेन निवृत्तिः क्रियते । नित्यवीप्सयोरर्थयोर्द्वे एव शब्दरूपे प्रयोक्तव्ये नातिबहु प्रयोक्तव्यमिति ॥

सर्वपदसगतिग्रहणानर्थक्यं चार्थाभिधाने द्विर्वचनविधानात् ॥ ५ ॥

सर्वग्रहणं[1] चानर्थकम् । किं कारणम् । सर्वस्यैव हि द्विर्वचनेनार्थो गम्यते नावयवस्य । पदग्रहणं चानर्थकं पदस्यैव हि द्विर्वचनेनार्थो गम्यते नागतिकस्य ॥

किं पुनरिदं वीप्सायां सर्वमभिधीयत आहोस्विदेकम् । कश्चात्र विशेषः ।

वीप्सायां सर्वाभिधाने वचनाप्रसिद्धिः ॥ ६ ॥

वीप्सायां सर्वाभिधाने वचनं न सिध्यति । ग्रामो ग्रामः । जनपदो जनपदः । बहवस्तेऽर्थास्तत्र बहुषु बहुवचनम् [१. ४. २१] इति बहुवचनं प्राप्नोति ॥ अस्तु तर्ह्येकम् ।

---

[1] सर्वस्य द्वे ८. १. १.

[2] समतिग्रहणं च ८. १. १ वा. ६.

एकाभिधानेऽसर्वद्रव्यगतिः ॥ ७ ॥

एकाभिधाने सर्वद्रव्यगतिर्न सिध्यति ॥ अस्तु तर्हि सर्वम् । ननु चोक्तं वीप्सायां सर्वाभिधाने वचनाप्रसिद्धिरिति ।

न वा पदार्थत्वात् ॥ ८ ।

न वैष दोषः । किं कारणम् । पदार्थत्वात् । पदस्यार्थो वीप्सा । सुबन्तं च पदं ङ्याप्प्रातिपदिकाच्चैकत्वादिष्वर्थेषु स्वादयो विधीयन्ते[1] न चैतत्प्रातिपदिकम् । यत्तर्हि प्रातिपदिकम् । दृषद्दृषत् समित्समिदिति । एतदपि प्रत्ययलक्षणेन सुबन्तं न प्रातिपदिकम् ॥

अपर आह । न वा पदार्थत्वात् । न वैष दोषः । किं कारणम् । पदार्थत्वात् । पदस्यार्थो वीप्सा सुबन्तं च पदं ङ्याप्प्रातिपदिकाच्चैकत्वादिष्वर्थेषु स्वादयो विधीयन्ते न चैतत्प्रातिपदिकम् । यत्तर्हि प्रातिपदिकम् । दृषद्दृषत् समित्समिदिति । एतदपि प्रत्ययलक्षणेन सुबन्तं न प्रातिपदिकम् ॥

अथेह कथं भवितव्यम् । पचति पचतितरां तिष्ठति । आहोस्वित्पचतितरां पचतितरां तिष्ठतीति । पचति पचतितरां तिष्ठतीति भवितव्यम् । कथम् । द्विर्वचनं क्रियतामातिशायिक इति द्विर्वचनं भविष्यति विप्रतिषेधेन । इहापि तर्ह्यातिशायिकाद्द्विर्वचनं स्यात् । आद्यतरमाद्यतरमानयेति । अस्त्यत्र विशेषः । अन्तरङ्ग आतिशायिकः । कान्तरङ्गता । ङ्याप्प्रातिपदिकादातिशायिकः[2] पदस्य द्विर्वचनम् । आतिशायिकोऽपि नान्तरङ्गः । कथम् । समर्थात्तद्धितोऽसावुत्पद्यते सामर्थ्यं च सुबन्तेन । अथवा स्पर्धायामातिशायिको विधीयते न चान्तरेण प्रतियोगिनं स्पर्धा गम्यते ॥ एवं तर्हीह द्वावर्थौ वक्तव्यौ नित्यवीप्से चातिशयश्च न चैकस्य प्रयोक्तुरनेकमर्थं युगपद्वक्तुं संभवोऽस्ति । तदेतत्प्रयोक्तर्यधीनं भवति । एतस्मिंश्च प्रयोक्तर्यधीने क्वचित्काचित्प्रसृततरा गतिर्भवति । इह तावत्पचति पचतितरां तिष्ठतीत्येषा प्रसृततरा गतिर्यन्नित्यमुक्त्वातिशय उच्यते । इहेदानीमाद्यतरमाद्यतरमानयेत्येषा प्रसृततरा गतिर्यदतिशयमुक्त्वा वीप्साद्विर्वचनमुच्यते ॥

परेर्वर्जने ॥ ८।१।५ ॥

परेरसमासे ॥ १ ॥

परेरसमास इति वक्तव्यम् । इह मा भूत् । परित्रिगर्तं[3] वृष्टो देवः ॥ तत्तर्हि

---

[1] स्वौजसमौट्छस्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङसोसाम्ङ्योस्सुप् ४. १. २. [2] अतिशायने तमबिष्ठनौ ; तिङश्च ; द्विवचनविभज्योपपदे तरबीयसुनौ ५. ३. ५५–५७. [3] अपपरिबहिरञ्चवः पञ्चम्या २. १. १२.

वक्तव्यम् । न वक्तव्यम् । परेर्वर्जन इत्युच्यते न चात्र परिर्वर्जने वर्तते । कस्तर्हि । समासः ॥

परेर्वर्जने वावचनम् ॥ २ ॥

परेर्वर्जने वेति वक्तव्यम् । परि त्रिगर्तेभ्यो वृष्टो देवः । परि परि त्रिगर्तेभ्यो वृष्टो देवः ॥*

वाक्यादेरामन्त्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु ॥ ८ । १ । ८ ॥

असूयाकुत्सनयोः कोपभर्त्सनयोश्चैकार्थत्वात् पृथक्त्वनिर्देशानर्थक्यम् ॥ १ ॥

असूया कुत्सनमित्येकोऽर्थः । कोपो भर्त्सनमित्येकोऽर्थः । असूयाकुत्सनयोः कोपभर्त्सनयोश्चैकार्थत्वात् पृथक्त्वनिर्देशोऽनर्थकः । न ह्यनसूयन्कुत्सयति न चाप्यकुपितो भर्त्सयते । ननु च भो अकुपिता अपि दृश्यन्ते दारकान्भर्त्सयमानाः । अन्तस्ते तां शरीराकृतिं कुर्वन्ति या कुपितस्य भवति ॥ एवं तर्ह्याह

सामृतैः पाणिभिर्घ्नन्ति गुरवो न विषोक्षितैः ।
लाडनाश्रयिणो दोषास्ताडनाश्रयिणो गुणाः ॥

एकं बहुव्रीहिवत् ॥ ८ । १ । ९ ॥

इह कस्माद्बहुव्रीहिवद्भावो न भवति । एक इति । एकस्य द्विर्वचनसंबन्धेन[1] बहुव्रीहिवद्भाव उच्यते न चात्र द्विर्वचनं पश्यामः ॥

एकस्य द्विर्वचनसंबन्धेनेति चेदर्थनिर्देशः ॥ १ ॥

एकस्य द्विर्वचनसंब्रन्धेनेति चेदर्थनिर्देशः कर्तव्यः । द्विर्वचनमपि ह्यत्र कस्मान्न भवति । तस्माद्वाच्यमस्मिन्नर्थे द्वे भवतो बहुव्रीहिवच्चेति ॥

न वा वीप्साधिकारात् ॥ २ ॥

न वा वक्तव्यम् । किं कारणम् । वीप्साधिकारात् । नित्यवीप्सयोः [४] इति वर्तते ॥

अथ बहुव्रीहिवत्त्वे किं प्रयोजनम् ।

---

* [V. M. om. प्रसमुपोदः पादपूरणे (६) ; उपर्यध्यधसः सामीप्ये (७)].

[1] सर्वस्य द्वे ८. १. १.

बहुव्रीहिवत्त्वे प्रयोजनं सुब्लोपपुंवद्भावौ ॥ ३ ॥

सुब्लोपः[1] । एकैकम् । पुंवद्भावः । गतगता[2] ॥ यद्येवं

सर्वनामस्वरसमासान्तेषु दोषः ॥ ४ ॥

सर्वनामस्वरसमासान्तेषु दोषो भवति । सर्वनामविधौ दोषो भवति । एकैकस्मै । न बहुव्रीहौ [१. १. २९] इति प्रतिषेधः प्राप्नोति । सर्वनाम । स्वर । नन सुसु[3] । नञ्सुभ्याम् [६. २. १७२] इत्येष स्वरः प्राप्नोति । स्वर । समासान्त । ऋगृक् पूःपूः[3] । ऋक्पूरब्धूःपथामानक्षे [५. ४. ७४] इति समासान्तः प्राप्नोति ॥ सर्वनामविधौ तावन्न दोषः । उक्तं तत्र[4] बहुव्रीहिग्रहणस्य प्रयोजनं बहुव्रीहिरेव यो बहुव्रीहिस्तत्र प्रतिषेधो यथा स्याद्बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र मा भूदिति । स्वरसमासान्तयोरपि प्रकृतं[5] समासग्रहणमनुवर्तते तेनैव बहुव्रीहिं विशेषयिष्यामः । समासो यो बहुव्रीहिरिति ॥*

कर्मधारयवदुत्तरेषु ॥ ८ । १ । ११ ॥

कर्मधारयवत्त्वे कानि प्रयोजनानि ।

कर्मधारयवत्त्वे प्रयोजनं सुब्लोपपुंवद्भावान्तोदात्तत्वानि ॥ १ ॥

सुब्लोपः[1] । पटुपटुः । पुंवद्भावः[6] । पटुपट्वी । अन्तोदात्तत्वम्[7] । पटुपटुः ॥

प्रकारे गुणवचनस्य ॥ ८ । १ । १२ ॥

गुणवचनस्येति किमर्थम् । अग्निर्माणवकः । गौर्वाहीकः ।

प्रकारे सर्वेषां गुणवचनत्वात्सर्वप्रसङ्गः ॥ १ ॥

सर्वे हि शब्दाः प्रकारे वर्तमानाः गुणवचनाः संपद्यन्ते तेनेहापि प्राप्नोति । अग्निर्माणवकः । गौर्वाहीक इति ॥

---

* [V. M. om. आबाधे च (१०)].

[1] सुपो धातुप्रातिपदिकयोः २. ४. ७१.

[2] आबाधे च ८. १. १० ; स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्...प्रियादिषु ६. ३. ३४.

[3] आबाधे च ८. १. १०.

[4] अथ समासग्रहणं किमर्थम् । समास एव यो बहुव्रीहिस्तत्र यथा स्यात्, बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र मा भूदिति १. १. २८ महाभाष्य.

[5] समासस्य ; समासान्ताः ६. १. २२३ ; ५. ४. ६८.

[6] पुंवत् कर्मधारयजातीयदेशीयेषु ६. ३. ४२.

[7] समासान्ताः ६. १. २२३.

सिद्धं तु प्रकृत्यर्थविशेषणत्वात् ॥ २ ॥

सिद्धमेतत् । कथम् । प्रकृत्यर्थविशेषणत्वात् । प्रकृत्यर्थो विशेष्यते । नैवं विज्ञायते प्रकारे गुणवचनस्येति । कथं तर्हि । गुणवचनस्य शब्दस्य द्वे भवतः प्रकारे वर्तमानस्येति ॥ अथवा प्रकारे गुणवचनस्येत्युच्यते सर्वश्च शब्दः प्रकारे वर्तमानो गुणवचनः संपद्यते तत्र प्रकर्षगतिर्विज्ञास्यते । साधीयो यो गुणवचन इति । कश्च साधीयः । यः प्रकारे च प्राक् च प्रकारात् ॥ अथवा प्रकारे गुणवचनस्येत्युच्यते सर्वश्च शब्दः प्रकारे वर्तमानो गुणवचनः संपद्यते त एवं विज्ञास्यामः प्राक्प्रकाराद्यो गुणवचन इति ॥

[आनुपूर्व्ये ॥ ३ ॥]

आनुपूर्व्ये द्वे भवत इति वक्तव्यम् । मूले मूले स्थूलाः । अग्रेऽग्रे सूक्ष्माः ॥

स्वार्थेऽवधार्यमाणेऽनेकस्मिन् ॥ ४ ॥

स्वार्थेऽवधार्यमाणेऽनेकस्मिन्द्वे भवत इति वक्तव्यम् । अस्मात्कार्षापणादिह भवद्भ्यां माषं माषं देहि । अवधार्यमाण इति किमर्थम् । अस्मात्कार्षापणादिह भवद्भ्यां माषं देहि द्वौ देहि त्रीन्देहि । अनेकस्मिन्निति किमर्थम् । अस्मात्कार्षापणादिह भवद्भ्यां माषं देहि । माषमेव देहि ॥ किं पुनः कारणं न सिध्यति । अनवयवाभिधानं वीप्सार्थ इत्युच्यते[1] ऽवयवाभिधानं चात्र गम्यते । आतश्चावयवाभिधानं यो ह्युच्यतेऽस्मात्कार्षापणादिह भवद्भ्यां माषं माषं देहीति माषं माषमसौ दत्त्वा शेषं पृच्छति किमनेन क्रियतामिति । यः पुनरुच्यत इमं कार्षापणमिह भवद्भ्यां माषं माषं देहीति माषं माषमसौ दत्त्वा तूष्णीमास्ते ॥

[चापले ॥ ५ ॥]

चापले द्वे भवत इति वक्तव्यम् । अहिरहिः बुध्यस्व बुध्यस्व ॥ न चावश्यं द्वे एव । यावद्भिः शब्दैः सोऽर्थो गम्यते तावन्तः प्रयोक्तव्याः । अहिरहिरहिः बुध्यस्व बुध्यस्व बुध्यस्वेति ॥

क्रियासमभिहारे ॥ ६ ॥

क्रियासमभिहारे द्वे भवत इति वक्तव्यम् । स भवाँल्लुनीहि लुनीहीत्येवायं लुनाति[2] ॥

---

[1] अनवयवाभिधानं वीप्सार्थ इति चेज्जात्याख्यायां द्विर्वचनप्रसङ्गः ८. १. ४ वा. १,

[2] क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः ३. ४ २.

[आभीक्ष्ण्ये ॥ ७ ॥]

आभीक्ष्ण्ये द्वे भवत इति वक्तव्यम् । भुक्त्वा भुक्त्वा व्रजति । भोजं भोजं व्रजति[1] ॥

डाचि च ॥ ८ ॥

डाचि च द्वे भवत इति वक्तव्यम् । पटपटायति मटमटायति[2] ॥

पूर्वप्रथमयोरर्थातिशयविवक्षायाम् ॥ ९ ॥

पूर्वप्रथमयोरर्थातिशयविवक्षायां द्वे भवत इति वक्तव्यम् । पूर्वं पूर्वं पुष्प्यन्ति । प्रथमं प्रथमं पच्यन्ते ॥

डतरडतमयोः समसंप्रधारणायां स्त्रीनिगदे भावे ॥ १० ॥

डतरडतमयोः समसंप्रधारणायां स्त्रीनिगदे भावे द्वे भवत इति वक्तव्यम् । उभाविमावाढ्यौ कतरा कतरानयोराढ्यता । सर्व इम आढ्याः कतमा कतमैषामिति ॥

कर्मव्यतिहारे सर्वनाम्नः समासवच्च बहुलं यदा न समासवत्प्रथमैकवचनं तदा पूर्वपदस्य ॥ ११ ॥

कर्मव्यतिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यं समासवच्च बहुलम् । यदा न समासवत्प्रथमैकवचनं भवति तदा पूर्वपदस्य । अन्योऽन्यमिमे ब्राह्मणा भोजयन्ति । अन्योऽन्यस्य भोजयन्ति । इतरेतरं भोजयन्ति । इतरेतरस्य भोजयन्ति ॥

स्त्रीनपुंसकयोरुत्तरपदस्य वाम्भावः ॥ १२ ॥

स्त्रीनपुंसकयोरुत्तरपदस्य वाम्भावो वक्तव्यः । अन्योऽन्यमिमे ब्राह्मण्यौ भोजयतः । अन्योऽन्यां भोजयतः । इतरेतरं भोजयतः । इतरेतरां भोजयतः । अन्योऽन्यमिमे ब्राह्मणकुले भोजयतः । अन्योऽन्यां भोजयतः । इतरेतरं भोजयतः । इतरेतरां भोजयतः ॥*

द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु ॥ ८ । १ । १५ ॥

अत्यन्तसहचरिते लोकविज्ञाते द्वन्द्वमित्युपसंख्यानम् ॥ १ ॥

अत्यन्तसहचरिते लोकविज्ञाते द्वन्द्वमित्युपसंख्यानं कर्तव्यम् । द्वन्द्वं स्कन्दवि-

---

* [अक्रृच्छ्रे प्रियसखयोरन्यतरस्याम् (१३); यथास्वे यथायथम् (१४)].

[1] आभीक्ष्ण्ये णमुल् च ३. ४. २२.

[2] अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच् ५. ४. ५७; अव्यक्तानुकरणस्यात इतौ ६. १. १००; लोहितादिडाज्भ्यः क्यष् ३. १. १३.

शाखौ । द्वन्द्वं नारदपर्वतौ । अत्यन्तसहचरित इति किमर्थम् । द्वौ युधिष्ठिरार्जुनौ । लोकविज्ञात इति किमर्थम् । द्वौ देवदत्तयज्ञदत्तौ ॥

अथ द्वन्द्वमिति किं निपात्यते ।

द्वन्द्वमिति पूर्वपदस्य चाम्भाव उत्तरपदस्य चात्वं नपुंसकत्वं च ॥ २ ॥

पूर्वपदस्य चाम्भावो निपात्यत उत्तरपदस्य चात्वं नपुंसकत्वं च ॥

उक्तं वा ॥ ३ ॥

किमुक्तम् । लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति[1] तत्र नपुंसकत्वमनिपात्यम् ॥

पदस्य ॥ ८ । १ । १६ ॥

पदात् ॥ ८ । १ । १७ ॥

आ कुतः पदाधिकारः ।

पदाधिकारः प्रागपदान्ताधिकारात् ॥ १ ॥

अपदान्तस्य मूर्धन्यः [८. ३. ५५] इत्यतः प्राक् पदाधिकारः ॥

अथ पदादित्यधिकार आ कुतः ।

पदात् प्राक्सुपि कुत्सनात् ॥ २ ॥

पदादित्यधिकारः प्राक्सुपि कुत्सनात् । कुत्सने च सुप्यगोत्रादौ [८. १. ६९] इत्यतः प्राक् ॥

यणेकादेशस्वरस्तूर्ध्वं पदाधिकारात् ॥ ३ ॥

यणेकादेशस्वरस्तूर्ध्वं पदाधिकारात् कर्तव्यः ॥

इह वचने ह्यपदान्तस्याप्राप्तिः ॥ ४ ॥

इह हि क्रियमाणेऽपदान्तस्याप्राप्तिः स्यात् । उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य [८. २. ४] इतीहैव स्यात् कुमार्यौ किशोर्यौ इह न स्यात् कुमार्यः किशोर्यः । एकादेश उदात्तेनोदात्तः [८. २. ५] इहैव स्यात् वृक्षौ प्लक्षौ इह न स्यात् वृक्षाः प्लक्षाः ॥

---

[1] लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य २. १. ३६ वा. ५ महाभाष्य; २. ४. १२ वा. ५ महाभाष्य; ४. १. ३. महाभाष्य; ५. ३. ६६ वा. २ महाभाष्य; ५. ४. ६८ वा. १ महाभाष्य.

न वा पदाधिकारस्य विशेषणत्वात् ॥ ५ ॥

न वोर्ध्वं पदाधिकारात्कर्तव्यो यणेकादेशस्वरः । किं कारणम् । पदाधिकारस्य विशेषणत्वात् । पदस्येति नैषा स्थानषष्ठी । का तर्हि । विशेषणषष्ठी । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । प्रत्याख्यायते स्थानषष्ठी[1] ॥

अन्तग्रहणाद्वा नलोपे ॥ ६ ॥

अथवा यदयं नलोपः प्रातिपदिकान्तस्य [८. २. ७] इत्यन्तग्रहणं करोति तज्ज्ञापयत्याचार्यो विशेषणषष्ठ्येषा न स्थानषष्ठीति ॥

अनुदात्तं सर्वमपादादौ ॥ ८ । १ । १८ ॥

सर्ववचनं किमर्थम् । सर्ववचनमनादेरनुदात्तार्थम् । सर्वग्रहणं क्रियते ऽनादेरप्यनुदात्तत्वं यथा स्यादिति । तिङतिङः [८. १. २८] इहैव स्यात्[2] देवदत्तः पचतीति इह न स्यात् देवदत्तः करोतीति ॥

सर्ववचनमनादेरनुदात्तार्थमिति चेल्लुटि प्रतिषेधात् सिद्धम् ॥ १ ॥

सर्ववचनमनादेरनुदात्तार्थमिति चेत् तन्न । किं कारणम् । लुटि प्रतिषेधात् सिद्धम् । यदयं लुटि प्रतिषेधं शास्ति न लुट् [८. १. २९] इति तज्ज्ञापयत्याचार्योऽनादेरप्यनुदात्तत्वं भवतीति । कथं कृत्वा ज्ञापकम् । न हि लुडन्तमाद्युदात्तमस्ति ॥

अलोऽन्त्यविधिप्रसङ्गस्तु ॥ २ ॥

अलोऽन्त्यस्य विधयो भवन्तीत्यनन्त्यस्य विधिः प्राप्नोति[3] । यत्र ह्यादिविधिर्नास्त्यलोऽन्त्यविधिना तत्र भवितव्यम् । तत्र को दोषः । तिङतिङ इतीहैव स्यात् देवदत्तयज्ञदत्तौ कुरुतः इह न स्यात् देवदत्तः करोतीति ॥

लृटि प्रतिषेधात्सिद्धम् ॥ ३ ॥

यदयं लृटि प्रतिषेधं शास्ति[4] तज्ज्ञापयत्याचार्योऽनन्त्यस्याप्यनुदात्तत्वं भवतीति । कथं कृत्वा ज्ञापकम् । न हि लृडन्तमन्तोदात्तमस्ति । ननु चेदमस्ति भोक्ष्य इति ।

उक्तं वा ॥ ४ ॥

किमुक्तम् । न वा पदाधिकारस्य विशेषणत्वादिति[5] ॥

---

[1] षष्ठी स्थानेयोगा १. १. ४९. [2] आदेः परस्य १. १. ५४. [3] अलोन्त्यस्य १. १. ५२. [4] गत्यर्थलोटा लृट् न चेत् कारकं सर्वान्यत् ८. १. ५१. [5] न वा पदाधिकारस्य विशेषणत्वात् ८. १. १६, १७ वा. ५.

इदं तर्हि प्रयोजनं युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांन्नावौ [८. १. २०] इति वान्नावादयः सविभक्तिकस्य यथा स्युरिति । एतदपि नास्ति प्रयोजनम् । पदस्य [१६] इति हि वर्तते विभक्त्यन्तं च पदं तत्रान्तरेण सर्वग्रहणं सविभक्तिकस्य भविष्यति । भवेत्सिद्धं यत्र विभक्त्यन्तं पदं यत्र तु खलु विभक्तौ पदं तत्र न सिध्यति । ग्रामो वां दीयते । ग्रामो नौ दीयते । जनपदो वां दीयते । जनपदो नौ दीयते । ननु च स्थग्रहणं क्रियते तेन सविभक्तिकस्यैव भविष्यति । अस्त्यन्यत्स्थग्रहणस्य प्रयोजनम् । किम् । श्रूयमाणविभक्तिविशेषणं यथा विज्ञायेत । यत्र विभक्तिः श्रूयते तत्र यथा स्यादिह मा भूत् इति युष्मत्पुत्रो ददाति इत्यस्मत्पुत्रो ददातीति ॥

समानवाक्ये निघातयुष्मदस्मदादेशाः ॥ ५ ॥

समानवाक्य इति प्रकृत्य निघातयुष्मदस्मदादेशा वक्तव्याः । किं प्रयोजनम् । नानावाक्ये मा भूवन्निति । अयं दण्डो हरानेन । ओदनं पच तव भविष्यति मम भविष्यति ॥

पश्यार्थैश्च प्रतिषेधः ॥ ६ ॥

पश्यार्थैश्च प्रतिषेधः[1] समानवाक्य इति प्रकृत्य वक्तव्यः । इतरथा हि यत्रैव पश्यार्थानां युष्मदस्मदी साधनं तत्र प्रतिषेधः स्यात् । ग्रामस्त्वां संप्रेक्ष्य संदृश्य समीक्ष्य गतः । ग्रामो मां संप्रेक्ष्य संदृश्य समीक्ष्य गतः । इह न स्यात् । ग्रामस्तव स्वं संप्रेक्ष्य संदृश्य समीक्ष्य गतः । ग्रामो मम स्वं संप्रेक्ष्य संदृश्य समीक्ष्य गतः ॥*

सपूर्वायाः प्रथमाया विभाषा ॥ ८ । १ । २६ ॥

युष्मदस्मदोरन्यतरस्यामनन्वादेशे ॥ १ ॥

युष्मदस्मदोरन्यतरस्यामनन्वादेश इति वक्तव्यम् । ग्रामे कम्बलस्ते स्वम् । ग्रामे कम्बलस्तव स्वम् । ग्रामे कम्बलो मे स्वम् । ग्रामे कम्बलो मम स्वम् । अनन्वादेश इति किमर्थम् । अथो ग्रामे कम्बलस्ते स्वम् । अथो ग्रामे कम्बलो मे स्वम् ॥

---

* [V. M. om. आमन्त्रितस्य च (१९); युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांन्नावौ (२०); बहुवचनस्य वस्नसौ (२१); तेमयावेकवचनस्य (२२); त्वामौ द्वितीयायाः (२३); न चवाहाहैवयुक्ते (२४); पश्यार्थैश्चानालोचने (२५)].

[1] पश्यार्थैश्चानालोचने ८. १. २५.

अपर आह । सर्व एव वाम्नावादयोऽनन्वादेशे विभाषा वक्तव्याः । कम्बलस्ते स्वम् । कम्बलस्तव स्वम् । कम्बलो मे स्वम् । कम्बलो मम स्वम् । अनन्वादेश इति किमर्थम् । अथो कम्बलस्ते स्वम् । अथो कम्बलो मे स्वम् ॥ न तर्हीदानीमिदं वक्तव्यं सपूर्वायाः प्रथमाया विभाषेति । वक्तव्यं च । किं प्रयोजनम् । अन्वादेशार्थम् । अन्वादेशे विभाषा यथा स्यात् । अथो ग्रामे कम्बलस्ते स्वम् । अथो ग्रामे कम्बलस्तव स्वम् । अथो ग्रामे कम्बलो मे स्वम् । अथो ग्रामे कम्बलो मम स्वम् ॥

तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः ॥ ८ । १ । २७ ॥

किमिदं तिङो गोत्रादिषु कुत्सनाभीक्ष्ण्यग्रहणं पाठविशेषणम् । कुत्सनाभीक्ष्ण्ययोरर्थयोर्गोत्रादीनि भवन्ति तिङः पराण्यनुदात्तानीति । आहोस्विदनुदात्तविशेषणम् । तिङः पराणि गोत्रादीनि कुत्सनाभीक्ष्ण्ययोरर्थयोरनुदात्तानि भवन्तीति ।

तिङो गोत्रादिषु कुत्सनाभीक्ष्ण्यग्रहणं पाठविशेषणम् ॥ १ ॥

तिङो गोत्रादिषु कुत्सनाभीक्ष्ण्यग्रहणं क्रियते पाठविशेषणम् । पाठो विशेष्यते ॥

अनुदात्तविशेषणे ह्यन्यत्र गोत्रादिग्रहणे कुत्सनाभीक्ष्ण्यग्रहणम् ॥ २ ॥

अनुदात्तविशेषणे हि सत्यन्यत्र गोत्रादिग्रहणे कुत्सनाभीक्ष्ण्यग्रहणं कर्तव्यं स्यात् । चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः [८. १. ५७] इति कुत्सनाभीक्ष्ण्ययोरिति वक्तव्यं स्यात् ॥

अनुदात्तग्रहणं वा ॥ ३ ॥

अथवा यान्यनुदात्तानीति वक्तव्यं स्यात् ॥ तस्मात् सुष्ठूच्यते तिङो गोत्रादिषु कुत्सनाभीक्ष्ण्यग्रहणं पाठविशेषणमनुदात्तविशेषणे ह्यन्यत्र गोत्रादिग्रहणे कुत्सनाभीक्ष्ण्यग्रहणमनुदात्तग्रहणं वेति ॥

तिङतिङः ॥ ८ । १ । २८ ॥

अतिङ इति किमर्थम् । पचति करोति ।

अतिङ्वचनमनर्थकं समानवाक्याधिकारात् ॥ १ ॥

अतिङ्वचनमनर्थकम् । किं कारणम् । समानवाक्याधिकारात् । समानवाक्य इति[1] वर्तते न च समानवाक्ये द्वे तिङन्ते स्तः ॥*

---

* [V. M. om. न लुट् (२९)].

[1] समानवाक्ये निघातयुष्मदस्मदादेशाः ८. १. १८ वा ५.

निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम् ॥ ८ । १ । ३० ॥

निपातैरिति किमर्थम् । यत्कूजति शकटम् । यती कूजति शकटी । यन् रथः कूजति ॥ निपातैरिति शक्यमवक्तुम् । कस्मान्न भवति । यत्कूजति शकटम् । यती कूजति शकटी । यन् रथः कूजति । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति ॥ नैषा परिभाषेह शक्या विज्ञातुम् । इह हि दोषः स्यात् । यावद्यथाभ्याम् [३६] इह न स्यात् यावदस्त्यत्रैषः सरो जनेभ्यः कृणवत्[1] ॥

चण्णिद्विशिष्टश्चेदर्थे ॥ १ ॥

चण्णिद्विशिष्टश्चेदर्थे द्रष्टव्यः । अयं च वै मरिष्यति । अयं चेन्मरिष्यति । न च पितृभ्यः पूर्वेभ्यो दास्यति । अप्रायश्चित्तिकृतौ च स्याताम् ॥*

छन्दस्यनेकमपि साकाङ्क्षम् ॥ ८ । १ । ३५ ॥

अनेकमिति किमुदाहरणम् । यदा ह्यसौ मत्तो भवति अथ[2] यत्तपति । नैतदस्ति । एकमत्र हियुक्तमपरं यद्युक्तं तत उभयोरप्यनिघातः[3] । इदं तर्हि । अनृतं हि मत्तो वदति पाप्मा एनं विपुनाति[4] ॥ एकं खल्वपि । अग्निर्हि पूर्वमुदजयत्तमिन्द्रोऽनूदजयदिति[5] ॥**

तुपश्यपश्यताहैः पूजायाम् ॥ ८ । १ । ३९ ॥

पूजायामिति[6] वर्तमाने पुनः पूजाग्रहणं किमर्थम् । अनिघातप्रतिषेधाभिसंबद्धं तत् । यदि तदनुवर्तेतेहाप्यनिघातप्रतिषेधः प्रसज्येत । इष्यते चात्र निघातप्रतिषेधः ॥ यथा पुनस्तत्र यावद्यथेत्येताभ्यामनिघाते प्राप्ते[7] ऽनिघातप्रतिषेध उच्यत इहेदानीं केनानिघाते प्राप्तेऽनिघातप्रतिषेध उच्येत । इहापि यद्वृत्तान्नित्यम् [८. १. ६६] इत्येवमादिभिः ॥***

एहि मन्ये प्रहासे लृट् ॥ ८ । १ । ४६ ॥

किमर्थमिदमुच्यते न गत्यर्थलोटा लृडित्येव सिद्धम्[8] । नियमार्थोऽयमारम्भः । एहि मन्ये प्रहास एव यथा स्यात् । क्व मा भूत् । एहि मन्ये रथेन यास्यसीति ॥

---

* [V. M. om. नह प्रत्यारम्भे (३१); सत्यं प्रश्ने (३२); अङ्गाप्रातिलोम्ये (३३); हि च (३४)].

** [V. M. om. यावद्यथाभ्याम् (३६); पूजायां नानन्तरम् (३७); उपसर्गव्यवेतं च (३८)].

*** [V. M. om. अहो च (४०); शेषे विभाषा (४१); पुरा च परीप्सायाम् (४२); नन्वित्यनुज्ञैषणायाम् (४३); किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम् (४४); लोपे विभाषा (४५)].

[1] यत्तदेतेभ्यः परिमाणे वतुप् ५. २. ३९. [2] काठसं १४. ५. [3] हि च ८. १. ३४; निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम् ८. १. ३०. [4] काठसं १४. ६. [5] काठसं १२. ७ [6] पूजायां नानन्तरम् ८. १ ३७. [7] यावद्यथाभ्याम् ८. १. ३६. [8] गत्यर्थलोटा लृट् न चेत् कारकं सर्वान्यत् ८. १. ५१.

जात्वपूर्वम् ॥ ८ । १ । ४७ ॥

किमिदमपूर्वग्रहणं जातुविशेषणम् । जातुशब्दादपूर्वात्तिङन्तमिति । आहोस्वित्तिङन्तविशेषणम् । जातुशब्दात्तिङन्तमपूर्वमिति । जातुविशेषणमित्याह । कथं ज्ञायते । यदयं किंवृत्तं च चिदुत्तरम् [४८] इत्याह । कथं कृत्वा ज्ञापकम् । अत्राप्यपूर्वमित्येतदनुवर्तते न चास्ति संभवो यत्किंवृत्तं च चिदुत्तरं स्यात्तिङन्तं चापूर्वम् । अत्रापि तिङन्तविशेषणमेव । कथम् । किंवृत्ताच्चिदुत्तरात्तिङन्तमपूर्वमिति ॥ यत्तर्ह्याहो उताहो चानन्तरम् [४९] इत्यनन्तरग्रहणं करोति । एतस्याप्यस्ति वचने प्रयोजनम् । किम् । शेषप्रक्लृप्त्यर्थमेतत्स्यात् । शेषे विभाषा [५०] कश्च शेषः । सान्तरं शेष इति । अन्तरेणाप्यनन्तरग्रहणं प्रक्लृप्तः शेषः । कथम् । अपूर्व इति वर्तते । शेषे विभाषा । कश्च शेषः । सपूर्वः शेष इति ॥*

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये ऽष्टमस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम् ॥

---

* [V. M. om. किंवृत्तं च चिदुत्तरम् (४८); आहो उताहो चानन्तरम् (४९); शेषे विभाषा (५०)].

गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् ॥ ८ । १ ।५१ ॥

लृटः प्रकृतिभावे कर्तुरन्यत्व उपसंख्यानं कारकान्यत्वात् ॥ १ ॥

लृटः प्रकृतिभावे कर्तुर्यत्कारकमन्यत्तस्यान्यत्व उपसंख्यानं कर्तव्यम् । आगच्छ देवदत्त ग्राममोदनं भोक्ष्यसे । किं पुनः कारणं न सिध्यति । कारकान्यत्वात् । न चेत्कारकं सर्वान्यदित्युच्यते सर्वान्यच्चात्र कारकम् ॥ किं पुनः कारणं सर्वान्यत्प्रतिषेधेनाश्रीयते न पुनरसर्वान्यद्विधानेनाश्रीयेत । कर्ता चात्रासर्वान्यस्ततः कर्तृसामान्यात्सिद्धम् ।

कर्तृसामान्यात्सिद्धमिति चेत्तद्भेदे ऽन्यसामान्ये प्रकृतिभावप्रसङ्गः ॥ २ ॥

कर्तृसामान्यात्सिद्धमिति चेत्तद्भेदे कर्तृभेदे ऽन्यस्मिन्कारकसामान्ये प्रकृतिभावः प्राप्नोति । आहर देवदत्त शालीन् यज्ञदत्त एनान्भोक्ष्यते ॥ एवं तर्हि व्यक्तमेव पठितव्यं न चेत्कर्ता चेत्कर्ता सर्वान्य इति ।

न चेत्कर्ता सर्वान्य इति चेदन्याभिधाने प्रतिषेधमेके ॥ ३ ॥

न चेत्कर्ता सर्वान्य इति चेदन्याभिधाने प्रतिषेधमेक इच्छन्ति । उह्यन्तां देवदत्तेन शालयो यज्ञदत्तेन भोक्ष्यन्त इति प्राप्नोति[1] भोक्ष्यन्त इति चेष्यते[2] ॥

सिद्धं तु तिङोरेकद्रव्याभिधानात् ॥ ४ ॥

सिद्धमेतत् । कथम् । तिङोरेकद्रव्याभिधानात् । यत्र तिङ्भ्यामेकं द्रव्यमभिधीयते तत्रेति वक्तव्यम् ॥*

आम एकान्तरमामन्त्रितमनन्तिके ॥ ८ । १ । ५५ ॥

कस्यायं प्रतिषेधः ।

आम एकान्तर ऐकश्रुत्यप्रतिषेधः ॥ १ ॥

आम एकान्तर ऐकश्रुत्यस्यायं प्रतिषेधः । कथं पुनरप्रकृतस्यासंशब्दितस्यैकश्रुत्यस्य प्रतिषेधः शक्यो विज्ञातुम् । अनन्तिक इत्युच्यते । अनन्तिकं च किम् । दूरम् । दूरात्संबुद्धावेकश्रुतिरुच्यते[3] ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति ।

---

* [V. M. om. लोट् च (५२); विभाषितं सोपसर्गमनुत्तमम् (५३); हन्त च (५४)].

[1] तिङतिङः ८. १. २८. [2] गत्यर्थलोटा लृण् न चेत् कारकं सर्वान्यत् ८. १. ५१. [3] एकश्रुति दूरात्संबुद्धौ १. २. ३३.

निघातप्रसङ्गस्तु ॥ २ ॥

निघातस्तु प्राप्नोति । आं भो देवदत्ता३ । आमन्त्रितस्यानुदात्तत्वं प्राप्नोति[1] ॥

सिद्धं तु प्रतिषेधाधिकारे प्रतिषेधवचनात् ॥ ३ ॥

सिद्धमेतत् । कथम् । प्रतिषेधाधिकारे प्रतिषेधवचनसामर्थ्यान्निघातो न भविष्यति ॥ नैव वा पुनरत्रैकश्रुत्यं प्राप्नोति । किं कारणम् । अनान्तिक इत्युच्यते ऽन्यच्च दूरमन्यदनन्तिकम् ॥ यद्येवं प्लुतो ऽपि तर्हि न प्राप्नोति प्लुतोऽपि हि दूरादित्युच्यते[2] । इष्टमेवैतत्संगृहीतम् । आं भो देवदत्तेत्येव भवितव्यम ॥

यद्धितुपरं छन्दसि ॥ ८ । १ । ५६ ॥

किमर्थमिदमुच्यते । यदाद्यैरेव सर्वैरेतैरनिघातकारणैर्योगेऽनिघात उच्यते[3] । यथैव पूर्वैर्योग एवं परैरपि ॥ अत उत्तरं पठति ।

यद्धितुपरस्य च्छन्दस्यनिघातोऽन्यपरप्रतिषेधार्थः ॥ १ ॥

यद्धितुपरस्य च्छन्दस्यनिघात उच्यते ऽन्यपरप्रतिषेधार्थः । अन्यपरस्य प्रतिषेधो मा भूदिति । जाये स्वो रोहावेहि[4] ॥ अथेदानीं रोहावेत्यनेन युक्त एहीत्यस्य कस्मान्न भवति । लोट्च गत्यर्थलोटा युक्त इति प्राप्नोति । न रुहिर्गत्यर्थः । कथं ज्ञायते । यदयं गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च [३. ४. ७२] इति पृथग्रुहिग्रहणं करोति । यदि न रुहिर्गत्यर्थ आरोहन्ति हस्तिनं मनुष्याः आरोहयति हस्ती स्थलं मनुष्यान् गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ [१. ४. ५२] इति कर्मसंज्ञा न प्राप्नोति । तस्मान्नैतच्छक्यं वक्तुं न रुहिर्गत्यर्थ इति । कस्मात्तर्हि रोहावेत्यनेन युक्त एहीत्यस्य न भवति । छान्दसत्वात् ॥

चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः ॥ ८ । १ । ५७ ॥

आम्रेडितेष्वगतेः सगतिरपि तिङित्यत्र गतिग्रहण उपसर्गग्रहणम् ॥ १ ॥

आम्रेडितेष्वगतेः सगतिरपि तिङ् [६८] इत्यत्र गतिग्रहण उपसर्गग्रहणं द्रष्टव्यम् ।

---

[1] आमन्त्रितस्य च ८. १. १९. [2] दूराद्धूते च ८. २. ८४. [3] निपातैर्यद्यदिहन्तकुविन्नेच्चण्कच्चिद्यत्रयुक्तम् ; हि च ; तुपश्यपश्यताहैः पूजायाम् ८. १. ३० ; ३४ ; ३९. [4] ८. १. ५२; शत्रा ५. २. १. १०. जाय एहि स्वो रोहावेति.

इह मा भूत् । शुक्लीकरोति[1] चन । कृष्णीकरोति चन । यत्काष्ठा शुक्लीकरोति । यत्काष्ठा कृष्णीकरोति ॥

अपर आह । सर्वत्रैवाष्टमिके गतिग्रहण उपसर्गग्रहणं द्रष्टव्यं गतिर्गतौतिङिचोदात्तवतिवर्जमिति[2] ॥*

यद्वृत्तान्नित्यम् ॥ ८ । १ । ६६ ॥

यद्वृत्तादित्युच्यते तत्रेदं न सिध्यति यः पचति यं पचतीति । वृत्तग्रहणेन तद्विभक्त्यन्तं प्रतीयात् । कथं यतरः पचति यतमः पचतीति । डतरडतमौ च प्रतीयात् । कथं यदा ददातीति । एषोऽपि विभक्तिसंज्ञः[3] । कथं यावदस्त्यत्रैष सरो जनेभ्यः कृणवत् । यावद्यथाभ्याम् [३६] इत्येवं भविष्यति । कथं यद्यङ्वायुः पवते[4] यत्कामास्ते[5] जुहुमः ॥ एवं तर्हि यदस्मिन्वर्तते यद्वृत्तम् यद्वृत्तादित्येवं भविष्यति ॥

वा याथाकाम्ये ॥ १ ॥

वा याथाकाम्य इति वक्तव्यम् । यत्र क्व चन यजते[6] देवयजन एव यजते ॥

पूजनात्पूजितमनुदात्तम् ॥ ८ । १ । ६७ ॥

पूजितस्यानुदात्तत्वे काष्ठादिग्रहणम् ॥ १ ॥

पूजितस्यानुदात्तत्वे काष्ठादिग्रहणं कर्तव्यम् । काष्ठादिभ्यः पूजनादिति वक्तव्यम् । इह मा भूत् । शोभनोऽध्यापकः ॥

मलोपवचनं च ॥ २ ॥

मलोपश्च वक्तव्यः । दारुणाध्यापकः दारुणाभिरूपः ॥

सगतिरपि तिङ् ॥ ८ । १ । ६८ ॥

सगतिग्रहणं किमर्थम् ।

---

* [V. M. om. चादिषु च (५८); चवायोगे प्रथमा (५९); हेति क्षियायाम् (६०); अहेति विनियोगे च (६१) चाहलोप एवेत्यवधारणम् (६२); चादिलोपे विभाषा (६३); वैवावेति च च्छन्दसि (६४); एकान्याभ्यां समर्थाभ्याम् (६५)].

[1] ऊर्यादिच्विडाचश्च १. ४. ६१. [2] गतिर्गतौ, तिङि चोदात्तवति ८. १. ७०; ७१. [3] प्राग्दिशो विभक्तिः; सर्वैकान्यकिंयत्तदः काले दा ५. ३. १; १५. [4] काठकसं १९. ८. यद्यङ्वातो वाति. [5] ऋसं १०. १२१. १०. [6] मैसं ३. ८. ४. यत्रैव क्व च...यजते देवयजन एव यजते.

सगतिग्रहणमपदत्वात् ॥ १ ॥

सगतिग्रहणं क्रियते ऽपदत्वात् । पदस्य [१६] इति वर्तते न हि सगतिकं पदं भवति ॥

उत्तरार्थं च ॥ २ ॥

उत्तरार्थं च सगतिग्रहणं क्रियते । कुत्सने च सुप्यगोत्रादौ [६९] सगतिरपि । प्रपचति पूति ॥

अथापिग्रहणं किमर्थम् । अगतिकस्यापि यथा स्यात् । यत्काष्ठा पचति । नैतदस्ति प्रयोजनम् । सिद्धं पूर्वेणागतिकस्य[1] । न सिध्यति । मलोपाभिसंबद्धं तत् । यदि तदनुवर्तेतेहापि मलोपः प्रसज्येत । दारुणं पचतीति ॥ उत्तरार्थं चापिग्रहणं क्रियते । कुत्सने च सुप्यगोत्रादावगतिरपीति । पचति पूतीति ॥

तिङ्ङिघातात् पूजनात् पूजितमनुदात्तं विप्रतिषेधेन ॥ ३ ॥

तिङ्ङिघातात्पूजनात्पूजितमनुदात्तमित्येतद्भवति विप्रतिषेधेन । तिङ्ङिघातस्यावकाशः[2] । देवदत्तः पचति । पूजनात्पूजितमनुदात्तमित्यस्यावकाशः । काष्ठाध्यापकः । इहोभयं प्राप्नोति । काष्ठा पचति । पूजनात्पूजितमित्येतद्भवति विप्रतिषेधेन ॥ कः पुनरत्र विशेषस्तेन वा सत्यनेन वा । अयमस्ति विशेषः । सापवादकः[3] स विधिरयं पुनर्निरपवादकः । यदि हि तेन स्यादिह न स्यात् । यत्काष्ठा पचति ॥

कुत्सने च सुप्यगोत्रादौ ॥ ८ । १ । ६९ ॥

सुपि कुत्सने क्रियायाः मकारलोपोऽतिङीति चोक्तार्थम् ॥

क्रियायाः कुत्सन इति वक्तव्यम् । कर्तुः कुत्सने मा भूत् । पचति पूतिः ॥

पूतिश्च चानुबन्धः

पूतिश्च चानुबन्धो द्रष्टव्यः[4] । पचति पूति ॥

विभाषितं चापि बह्वर्थम् ॥

विभाषितं चापि बह्वर्थं द्रष्टव्यम् । पचन्ति पूति । पचन्ति पूति ॥

सुपि कुत्सने क्रियाया मकारलोपो ऽतिङीति चोक्तार्थम् ।
पूतिश्च चानुबन्धो विभाषितं चापि बह्वर्थम् ॥

---

[1] पूजनात् पूजितमनुदात्तम् ८. १. ६७.

[2] तिङ्ङतिङः ८. १. २८.

[3] निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम् ८. १. ३०.

[4] चितः ६. १. १६३.

गतिर्गतौ ॥ ८ । १ । ७० ॥

गताविति किमर्थम् । प्रपचति प्रकरोति ।

गतेरनुदात्तत्वे गतिग्रहणानर्थक्यं तिङ्यवधारणात् ॥ १ ॥

गतेरनुदात्तत्वे गतिग्रहणमनर्थकम् । किं कारणम् । तिङ्यवधारणात् । तिङि चोदात्तवति [७१] इत्येतन्नियमार्थं भविष्यति । तिङ्युदात्तवत्येव गतिरनुदात्तो भवति नान्यत्रेति ॥ छन्दोऽर्थं तर्हि गतिग्रहणं कर्तव्यम् । छन्दसि गतौ परतोऽनुदात्तत्वं यथा स्यान्मन्द्रशब्दे मा भूत् । आ म॒न्द्रैरि॑न्द्र॒ हरि॑भिर्या॒हि म॒यूर॑रोमभिः[1] ।

छन्दोऽर्थमिति चेन्नागतित्वात् ॥ २ ॥

छन्दोऽर्थमिति चेत्तन्न । किं कारणम् । अगतित्वात् । यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवतो न चात्राङो मन्द्रशब्दं प्रति क्रियायोगः । किं तर्हि । याहिशब्दं प्रति ॥ इहापि तर्हि न प्राप्नोति । अभ्युद्धरति उपसमादधातीति । अत्रापि नाभेरुदं प्रति क्रियायोगः । किं तर्हि । हरतिं प्रति क्रियायोगः ॥ नैष दोषः । उदं प्रति क्रियायोगः । कथम् । उद्धरतिक्रियां विशिनष्टि । उदा विशिष्टामभिर्विशिनष्टि । तत्र यत्क्रियायुक्ता इति भवत्येव संघातं प्रति क्रियायोगः ॥ इहापि तर्हि मन्द्रसाधना क्रियाङा व्यज्यते । आ याहि मन्द्रैरिति ॥ ननु पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेनेति । नैतत्सारम् । पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण । किं कारणम् । साधनं हि क्रियां निर्वर्तयति तामुपसर्गो विशिनष्टयभिनिर्वृत्तस्य चार्थस्योपसर्गेण विशेषः शक्यो वक्तुम् । सत्यमेवमेतत् । यस्त्वसौ धातूपसर्गयोरभिसंबन्धस्तमभ्यन्तरे कृत्वा धातुः साधनेन युज्यते । अवश्यं चैतदेवं विज्ञेयम् । यो हि मन्यते पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति आस्यते गुरुणेत्यकर्मक उपास्यते गुरुरिति केन सकर्मकः स्यात् ॥

गतिना तु विशिष्टस्य गतिरेव विशेषकः ।
साधने केन ते न स्याद्बाह्यमाभ्यन्तरो हि सः ॥

तिङि चोदात्तवति ॥ ८ । १ । ७१ ॥

तिङ्ग्रहणं किमर्थम् ।

---

[1] ऋ ३. ४५. १.

तिङ्ग्रहणमुदात्तवतः परिमाणार्थम् ॥ १ ॥

तिङ्ग्रहणं क्रियत उदात्तवतः परिमाणार्थम् । तिङ्युदात्तवति यथा स्यान्मन्द्रशब्दे मा भूत् । आ मन्द्रैरिन्द्र हरिभिर्याहि ॥ यद्योगाद्गतिः । यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवतो न चाङो मन्द्रशब्दं प्रति क्रियायोगः । किं तर्हि । याहिशब्दं प्रति ॥

यद्योगाद्गतिरिति चेत्प्रत्ययोदात्तत्वे ऽप्रसिद्धिः ॥ २ ॥

यद्योगाद्गतिरिति चेत्प्रत्ययोदात्तत्वे ऽप्रसिद्धिः स्यात् । यत्प्रकरोति । तस्मात्तिङ्ग्रहणं कर्तव्यम् ॥

यदि तिङ्ग्रहणं क्रियत आमन्ते न प्राप्नोति । प्रपचतितराम् । प्रजल्पतितराम् । असति पुनस्तिङ्ग्रहणे क्रियाप्रधानमाख्यातं तस्मादतिशये तरबुत्पद्यते तरबन्तात्स्वार्थ आम्तत्र यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवत इति भवत्येतं संघातं प्रति क्रियायोगः । तस्मान्नार्थस्तिङ्ग्रहणेन ॥ कस्मान्न भवति । आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः । यद्योगाद्गतिरिति । ननु चोक्तं यद्योगाद्गतिरिति चेत्प्रत्ययोदात्तत्वेऽप्रसिद्धिरिति । नैष दोषः । यत्क्रियायुक्ता इति नैवं विज्ञायते यस्य क्रिया यत्क्रिया यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवत इति । कथं तर्हि । या क्रिया यत्क्रिया यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवत इति ॥

आमन्त्रितं पूर्वमविद्यमानवत् ॥ ८ । १ । ७२ ॥

वत्करणं किमर्थम् । स्वाश्रयमपि यथा स्यात् । आं भो देवदत्तेत्यत्राम एकान्तरमामन्त्रितमनन्तिके [५५] इत्येकान्तरता यथा स्यात् ॥

पूर्वं प्रति विद्यमानवत्त्वादुत्तरत्रानन्तर्याप्रसिद्धिः ॥ १ ॥

पूर्वं प्रति विद्यमानवत्त्वादुत्तरत्रानन्तर्यस्याप्रसिद्धिः स्यात् । इमं मे गङ्गे यमुने[1] सरस्वति । गङ्गेशब्दोऽयं यमुनेशब्दं प्रत्यविद्यमानवद्भवति । तत्रामन्त्रितस्य पदात्परस्येत्यनुदात्तत्वं[2] न स्यात् ॥

सिद्धं तु पदपूर्वस्येति वचनात् ॥ २ ॥

सिद्धमेतत् । कथम् । पदपूर्वस्येति वचनात् । पदपूर्वस्य चामन्त्रितस्याविद्यमानवद्भावो भवतीति वक्तव्यम् ॥

---

[1] ऋ १०. ७५. ५. [2] आमन्त्रितस्य च ८. १. १९.

कानि पुनरस्य योगस्य प्रयोजनानि ।

अविद्यमानवत्त्वे प्रयोजनमामन्त्रितयुष्मदस्मात्तिङ्निघाताः ॥ ३ ॥

आमन्त्रितस्य पदात्परस्यानुदात्तो भवतीतीहैव भवति[1] पचसि देवदत्त । देवदत्त यज्ञदत्तेत्यत्र न भवत्यविद्यमानवत्त्वादामन्त्रितस्य ॥ युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ [२०] इतीहैव भवति ग्रामो वां स्वम् जनपदो नौ स्वम् । देवदत्तयज्ञदत्तौ युवयोः स्वमित्यत्र न भवत्यविद्यमानवत्त्वादामन्त्रितस्य ॥ तिङतिङ [२८] इतीहैव भवति देवदत्तः पचति । देवदत्त पचसीत्यत्र न भवत्यविद्यमानवत्त्वादामन्त्रितस्य ॥

पूजायामनन्तरप्रतिषेधः ॥ ४ ॥

पूजायामनन्तरप्रतिषेधः[2] प्रयोजनम् । यावत्पचति शोभनम् । यावद्देवदत्त पचसीत्यत्रापि सिद्धं भवति ॥

जात्वपूर्वम् ॥ ५ ॥

जात्वपूर्वम् [४७] प्रयोजनम् । जातु पचति । देवदत्त जातु पचसीत्यत्रापि सिद्धं भवति ॥

आहो उताहो चानन्तरविधौ ॥ ६ ॥

आहो उताहो चानन्तरविधौ[3] प्रयोजनम् । आहो पचसि । आहो देवदत्त पचसीत्यत्रापि सिद्धं भवति । उताहो पचसि । उताहो देवदत्त पचसीत्यत्रापि सिद्धं भवति ॥

आम एकान्तरविधौ ॥ ७ ॥

आम एकान्तरविधौ[4] प्रयोजनम् । आं पचसि देवदत्त । आं भोः पचसि देवदत्त अत्रापि सिद्धं भवति ॥

नामन्त्रिते समानाधिकरणे ॥ ८ । १ । ७३ ॥

इह कस्मान्न भवति । अघ्न्ये देवि सरस्वति इडे काव्ये विहव्ये एतानि[6] ते अघ्न्ये नामानि । योगविभागः करिष्यते[5] । नामन्त्रिते समानाधिकरणे सामान्यवचनम् । ततो विभाषितं विशेषवचन इति ॥

---

[1] आमन्त्रितस्य च ८. १. १९.

[2] पूजायां नानन्तरम् ८. १. ३७.

[3] आहो उताहो चानन्तरम् ८. १. ४९.

[4] आम एकान्तरमामन्त्रितमनन्तिके ८. १. ५५.

[5] सामान्यवचनं विभाषितं विशेषवचने ८. १. ७४.

[6] द्र वासं ८. ४३; तैसं ७. १. ६. ८.

सामान्यवचनं विभाषितं विशेषवचने ॥ ८ । १ । ७४ ॥

इह कस्मान्न भवति । ब्राह्मण वैयाकरण । बहुवचनमिति वक्ष्यामि ॥

सामान्यवचनमिति शक्यमवक्तुम् । कथम् । विभाषितं विशेषवचन इत्युच्यते तेन यत्प्रति विशेषवचनमित्येतद्भवति तस्य भविष्यति । किं च प्रत्येतद्भवति । सामान्यवचनम् ॥

अपर आह । विशेषवचन इति शक्यमवक्तुम् । कथम् । सामान्यवचनं विभाषितमित्युच्यते तेन यत्प्रति सामान्यवचनमित्येतद्भवति । किं च प्रत्येतद्भवति । विशेषवचनम् । सामान्यवचनं विभाषितं विशेषवचन इति ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्येऽष्टमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम् ॥ पादश्च समाप्तः ॥

पूर्वत्रासिद्धम् ॥ ८ । २ । १ ॥

येयं सपादसप्ताध्याय्यनुक्रान्तैतस्यामयं पादोनोऽध्यायोऽसिद्धो वेदितव्यः ॥ यदि सपादायां सप्ताध्याय्यामयं पादोनोऽध्यायोऽसिद्ध इत्युच्यते य इह सप्तमीनिर्देशाः पञ्चमीनिर्देशाश्चोच्यन्ते षष्ठीनिर्देशाश्चोच्यन्ते तेऽप्यसिद्धाः स्युः । तत्र को दोषः । झलो झलि [८. २. २६] ह्रस्वादङ्गात् [२७] संयोगान्तस्य लोपः [२३] इत्येतेषां निर्देशानामसिद्धत्वात्तस्मिन्निति निर्दिष्टे पूर्वस्य [१. १. ६६] तस्मादित्युत्तरस्य [६७] षष्ठी स्थानेयोगा [४९] इत्येताः परिभाषा न प्रकल्पेरन् ॥ नैष दोषः । यद्यपीदं तत्रासिद्धं तत्त्विह सिद्धम् । कथम् । कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्र द्रष्टव्यम् । झलो झलि । ह्रस्वादङ्गात् । संयोगान्तस्य लोपः । उपस्थितमिदं भवति तस्मिन्निति निर्दिष्टे पूर्वस्य तस्मादित्युत्तरस्य षष्ठी स्थानेयोगेति ॥ यदि कार्यकालं संज्ञापरिभाषमित्युच्यत इयमपि परिभाषास्ति विप्रतिषेधे परमिति[1] सापीहोपतिष्ठेत । तत्र को दोषः । विस्फोर्यम् अवगोर्यमिति गुणाद्दीर्घत्वं स्याद्विप्रतिषेधेन[2] ॥ अत उत्तरं पठति ।

पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य ॥ १ ॥

पूर्वत्रासिद्धे नास्ति विप्रतिषेधः । किं कारणम् । अभावादुत्तरस्य । द्वयोर्हि सावकाशयोः समवस्थितयोर्विप्रतिषेधो भवति न च पूर्वत्वासिद्धे परं पूर्वं प्रति भवति ॥ यद्येवं दोग्धा दोग्धुम् घत्वस्यासिद्धत्वाड्ढत्वं प्राप्नोति[3] काष्ठतट् कूटतट् संयोगादिलोपस्यासिद्धत्वात्संयोगान्तलोपः प्राप्नोति[4] ।

अपवादो वचनप्रामाण्यात् ॥ २ ॥

अनवकाशावेतौ वचनप्रामाण्याद्भविष्यतः ॥ तस्मात्कार्यकालं संज्ञापरिभाषमिति न दोषः ॥

---

[1] विप्रतिषेधे परं कार्यम् १. ४. २.

[2] पुगन्तलघूपधस्य च ७. ३. ८६; हलि च ८. २. ७७.

[3] दादेर्धातोर्घः ८. २. ३२; हो ढः ८. २. ३१.

[4] स्कोः संयोगाद्योरन्ते च; संयोगान्तस्य लोपः ८. २. २९; २३.

पूर्वत्रासिद्धमधिकारः ॥ ३ ॥

पूर्वत्रासिद्धमित्यधिकारोऽयं द्रष्टव्यः । किं प्रयोजनम् ।

परस्य परस्य पूर्वत्र पूर्वत्रासिद्धविज्ञानार्थम् ॥ ४ ॥

परः परो योगः पूर्वं पूर्वं योगं प्रत्यसिद्धो यथा स्यात् ॥

अनधिकारे हि समुदायेऽसिद्धविज्ञानम् ॥ ५ ॥

अनधिकारे हि सति समुदायस्य समुदाये ऽसिद्धत्वं विज्ञायेत ॥ तत्र को दोषः ।

तत्रायथेष्टप्रसङ्गः ॥ ६ ॥

तत्रायथेष्टं प्रसज्येत । गोधुङ्मान् गुडलिण्मानिति । घत्वढत्वयोः[1] कृतयोर्झयः [८. २. १०] इति वत्वं प्रसज्येत ॥

तस्मादधिकारः ॥ ७ ॥

तस्मादधिकारोऽयं द्रष्टव्यः ॥

असिद्धवचनं किमर्थम् ।

असिद्धवचन उक्तम् ॥ ८ ॥

किमुक्तम् । तत्र[2] तावदुक्तं षत्वतुकोरसिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं चेति । एवमिहापि पूर्वत्रासिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं च । आदेशलक्षणप्रतिषेधार्थं तावत् । राजभिः तक्षभिः राजभ्याम् तक्षभ्याम् राजसु तक्षस्विति नलोपे कृते ऽत इत्यैस्भावादयः प्राप्नुवन्ति[3] । असिद्धत्वान्न भवन्ति । उत्सर्गलक्षणभावार्थं च । अमुष्मै अमुष्मात् अमुष्य अमुष्मिन्नित्यत्र मुभावे कृते ऽत इति स्मायादयो न प्राप्नुवन्ति[4] । असिद्धत्वाद्भवन्ति । सुपर्वाणौ सुपर्वाणः । णत्वे कृते नोपधाया इति दीर्घत्वं न प्राप्नोति[5] । असिद्धत्वाद्भवति ॥

नलोपः प्रातिपदिकान्तस्य ॥ ८ । २ । ७ ॥

सुब्विधिं प्रति नलोपो ऽसिद्धो भवतीत्युच्यते । भवेदिह राजभिः तक्षभिरिति नलोपे

---

[1] दादेर्धातोर्घः ; हो ढः ८. २. ३२ ; ३१. [2] षत्वतुकोरसिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं च ६. १. ८६. वा. १. [3] नलोपः प्रातिपदिकान्तस्य ; अतो भिस ऐस् ; सुपि च ; बहुवचने झल्येत् ८. २. ७ ; ७. १. ९ ; ७. ३. १०२ ; १०३. [4] अदसोऽसेर्दादु दो मः ; टाङसिङसामिनात्स्याः ; सर्वनाम्नः स्मै ; ङसिङ्योःस्मात्स्मिनौ ८. २. ८० ; ७. १. १२ ; १४ ; १५. [5] अट्कुप्वाङ्नुम्व्यवायेऽपि ; सर्वनामस्थाने चासंबुद्धौ ; ८. ४. २ ; ६. ४. ८.

कृते ऽत इत्यैस्भावो[1] न स्यात् । इह तु खलु राजभ्याम् तक्षभ्याम् राजसु तक्षस्विति नलोपे कृते दीर्घत्वैत्त्वे[2] प्राप्नुतः ॥ नैष दोषः । सुब्विधिरिति सर्वविभक्त्यन्तः समासः । सुपो विधिः सुब्विधिः सुपि विधिः सुब्विधिरिति ॥

अथ संज्ञाविधौ किमुदाहरणम् । पञ्च सप्त । पञ्च सप्तेत्यत्र नलोपे[3] कृते ष्णान्ता षट् [१. १. २४] इति षट्संज्ञा न प्राप्नोति । असिद्धत्वाद्भवति ।

संज्ञाग्रहणानर्थक्यं च तन्निमित्तत्वाल्लोपस्य ॥ १ ॥

संज्ञाग्रहणं चानर्थकम् । किं कारणम् । तन्निमित्तत्वाल्लोपस्य । नाकृतायां षट्संज्ञायां जश्शसोर्लुग्न चाकृते लुकि[4] पदसंज्ञा न चाकृतायां पदसंज्ञायां नलोपः प्राप्नोति । तदेतदानुपूर्व्या सिद्धं भवति ॥ इदं तर्हि प्रयोजनं पञ्चभिः सप्तभिरिति षट्त्रिचतुर्भ्यो हलादिर्झल्युपोत्तमम् [६. १. १७९ ; १८०] इत्येष स्वरो यथा स्यात् ।

स्वरेऽवधारणाच्च ॥ २ ॥

स्वरेऽवधारणाच्च संज्ञाग्रहणमनर्थकम् । स्वरेऽवधारणं क्रियते स्वरविधिं प्रतीति ॥

तुग्विधौ किमुदाहरणम् । वृत्रहभ्याम् वृत्रहभिः । नलोपे[5] कृते ह्रस्वस्य पिति कृति तुक् [६. १. ७१] इति तुक्प्राप्नोति । असिद्धत्वान्न भवति ।

तुग्विधौ चोक्तम् ॥ ३ ॥

किमुक्तम् । संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति[6] ॥ इदं तर्हि प्रयोजनम् । कृतीति वक्ष्यामि । इह मा भूत् । ब्रह्महच्छत्रम् भ्रूणहच्छाया[7] । नैष संनिपातलक्षणः ॥

न मु ने ॥ ८ । २ । ३ ॥

इह ने यत्कार्यं प्राप्नोति[8] तत्प्रति मुभावो[9] नासिद्ध इत्युच्यते नाभावश्चैव[10] तावन्न प्राप्नोति । एवं तर्हि

न मु टादेशे ॥ १ ॥

न मु टादेश इति वक्तव्यम् । किमिदं टादेश इति । टाया आदेशष्टादेश इति ।

---

[1] नलोपः प्रातिपदिकान्तस्य ८. २. ७; अतो भिस ऐस् ७. १. ९. [2] सुपि च; बहुवचने झल्येत् ७. ३. १०२ ; १०३. [3] नलोपः प्रातिपदिकान्तस्य ८. २ ७. [4] षड्भ्यो लुक् ७. १. २२. [5] नलोपः प्रातिपदिकान्तस्य ८. २. ७. [6] न वा संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य १. १. ३९ वा. ३. [7] छे च ६. १. ७३. [8] सुपि च ७. ३. १०२. [9] अदसोऽसेर्दादु दो मः ८. २. ८०. [10] आङो नाऽस्त्रियाम् ७. ३. १२०.

यदि तर्हि टाया आदेश इत्युच्यते टायामादेशेऽप्रसिद्धिः । तत्र को दोषः । अमुनेत्यत्र मुभावस्यासिद्धत्वादतो दीर्घो यञि सुपि च [७. ३. १०१ ; १०२] इति दीर्घत्वं प्रसज्येत । नैष दोषः । सर्वविभक्त्यन्तः समासः । टाया आदेशष्टादेशः । टायामादेशष्टादेश इति । सिध्यति । सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवास्तु । ननु चोक्तं ने यत्कार्यं प्राप्नोति तस्मिन्मुभावो नासिद्ध इत्युच्यते नाभावश्चैव तावन्न प्राप्नोतीति । नैष दोषः । इहेङ्गितेन चेष्टितेन निमिषितेन महता वा सूत्रनिबन्धेनाचार्याणामभिप्रायो लक्ष्यते । एतदेव ज्ञापयति भवत्यत्र नाभाव इति यदयं ने परतोऽसिद्धत्वप्रतिषेधं शास्ति ॥ अथवा द्विगता अपि हेतवो भवन्ति । तद्यथा । आम्राश्च सिक्ताः पितरश्च प्रीणिता भवन्ति । तथा वाक्यान्यपि द्विगतानि दृश्यन्ते । श्वेतो धावति । अलम्बुसानां यातेति ॥ अथवा वृद्धकुमारीवाक्यवदिदं द्रष्टव्यम् । तद्यथा । वृद्धकुमारीन्द्रेणोक्ता वरं वृणीष्वेति सा वरमवृणीत पुत्रा मे बहुक्षीरघृतमोदनं कांस्यपात्र्यां भुञ्जीरन्निति । न च तावदस्याः पतिर्भवति कुतः पुत्राः कुतो गावः कुतो धान्यम् । तत्रानयैकेन वाक्येन पतिः पुत्रा गावो धान्यमिति सर्वं संगृहीतं भवति । एवमिहापि नेऽसिद्धत्वप्रतिषेधं ब्रुवता नाभावोऽपि संगृहीतो भवति ॥

उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ॥ ८ । २ । ४ ॥

यण्स्वरो यणादेशे स्वरितयणः स्वरितार्थम् ॥ १ ॥

यण्स्वरो यणादेशे सिद्धो वक्तव्यः । किं प्रयोजनम् । स्वरितयणः स्वरितार्थम् । स्वरितयणः स्वरितत्वं यथा स्यात् । खलप्व्यटति । खलप्व्यश्नाति[1] ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । आहायं स्वरितयण इति न चास्ति सिद्धः स्वरितस्तत्राश्रयात्सिद्धत्वं भविष्यति ।

आश्रयात्सिद्धत्वमिति चेदुदात्तात्स्वरिते दोषः ॥ २ ॥

आश्रयात्सिद्धत्वमिति चेदुदात्तात्स्वरिते[2] दोषो भवति । दध्याशा । मध्वाशा ॥ एवं तर्हि योगविभागः करिष्यते । उदात्तयणः परस्यानुदात्तस्य स्वरितो भवति ।

---

[1] गतिकारकोपपदात् कृत् ६. २. १३९ ; ओः सुपि ६. ४. ८३ ; (उदात्तयणो हल्पूर्वात् ; नोङ्धात्वोः ६. १. १७४ ; १७५) उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य ८. २. ४ ; इको यणचि ६. १. ७७ ; उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य ८. २. ४.

[2] उदात्तादनुदात्तस्य स्वरितः ८. ४. ६६.

ततः स्वरितयणः । स्वरितयणश्च परस्यानुदात्तस्य स्वरितो भवति । उदात्तयण इत्येव ॥ अथवा स्वरितग्रहणं न करिष्यते । केनेदानीं स्वरितयणः परस्यानुदात्तस्य स्वरितो भविष्यति । उदात्तयण इत्येव । ननु च स्वरितयणा व्यवहितत्वान्न प्राप्नोति । स्वरविधौ व्यञ्जनमविद्यमानवदिति नास्ति व्यवधानम् ॥ अथवा नैवं विज्ञायते स्वरितस्य यण्स्वरितयण् स्वरितयण इति । कथं तर्हि । स्वरिते यण्स्वरितयण् स्वरितयण इति ॥*

स्वरितो वानुदात्ते पदादौ ॥ ८ । २ । ६ ॥

स्वरितग्रहणं शक्यमकर्तुम् । कथम् । अनुदात्ते परतः पदादौ वोदात्त इत्येव सिद्धम् । केनेदानीं स्वरितो भविष्यति । गाङ्गेऽनूप इति । आन्तर्यत उदात्तानुदात्तयोरेकादेशः स्वरितो भविष्यति । इदं तर्हि प्रयोजनं तेन वर्ज्यमानता[1] मा भूत् । अथ क्रियमाणेऽपि स्वरितग्रहणे यः सिद्धः स्वरितस्तेन वर्ज्यमानता कस्मान्न भवति । कन्यानूप इति । बहिरङ्गलक्षणत्वात् । असिद्धं बहिरङ्गमन्तरङ्ग इत्येवं न भविष्यति । यथैव तर्हि क्रियमाणे स्वरितग्रहणे यः सिद्धः स्वरितस्तेन वर्ज्यमानता न भवत्येवमक्रियमाणेऽपि न भविष्याति । तस्मान्नार्थः स्वरितग्रहणेन । बहिरङ्गलक्षणत्वासिद्धम् ॥

एकादेशस्वरोऽन्तरङ्गः ॥ १ ॥

एकादेशस्वरोऽन्तरङ्गः सिद्धो वक्तव्यः । किं प्रयोजनम् ।

अयवायावेकादेशशतृस्वरैकाननुदात्तसर्वानुदात्तार्थम् ॥ २ ॥

अय् । वृक्ष इदम् प्लक्ष इदम् । उदात्तानुदात्तयोरेकादेशः । तस्यैकादेश उदात्तेनोदात्तः [८. २. ५] इत्येतद्भवति । तस्य सिद्धत्वं वक्तव्यमान्तर्यत उदात्तस्योदात्तोऽयादेशो[2] यथा स्यात् ॥ अवादेशो नास्ति ॥ आय् । कुमार्या इदम्[3] । उदात्तानुदात्तयोरेकादेशः । तस्यैकादेश उदात्तेनोदात्त इत्येतद्भवति । तस्य सिद्धत्वं वक्तव्यमान्तर्यत उदात्तस्योदात्त आयादेशो यथा स्यात् ॥ नैतदस्ति प्रयोजनम् । एकादेशे[4] कृत उदात्तयणो हल्पूर्वात् [६. १. १७४] इत्युदात्तत्वं भविष्यति । इदमिह संप्रधार्यम् ।

---

* [V. M. om. एकादेश उदात्तेनोदात्तः].

[1] अनुदात्तं पदमेकवर्जम् ६. १. १५८.

[2] एचोऽयवायावः ६. १. ७८.

[3] आण्नद्याः ७. ३. ११२ ; उदात्तयणो हल्पूर्वात् ६. १. १७४ ; वृद्धिरेचि ६. १. ८८.

[4] एकादेश उदात्तेनोदात्तः ८. २. ५.

उदात्तत्वं क्रियतामेकादेश इति किमत्र कर्तव्यम् । परत्वादुदात्तत्वम् । नित्य एकादेशः । कृते ऽप्युदात्तत्वे प्राप्नोत्यकृतेऽपि प्राप्नोति । एकादेशोऽप्यनित्यः । अन्यथास्वरस्य कृत उदात्तत्वे प्राप्नोत्यन्यथास्वरस्याकृते स्वरभिन्नस्य च प्राप्नुवन्विधिरनित्यो भवति । अन्तरङ्गस्तर्ह्येकादेशः । कान्तरङ्गता । वर्णावाश्रित्यैकादेशः पदस्योदात्तत्वम् ॥ एवं तर्हीदमिह संप्रधार्यम् । आट् क्रियतामुदात्तत्वमिति[1] किमत्र कर्तव्यम् । परत्वादाडागमः । नित्यमुदात्तत्वम् । कृतेऽप्याटि प्राप्नोत्यकृतेऽपि प्राप्नोति । आडपि नित्यः । कृतेऽप्युदात्तत्वे प्राप्नोत्यकृतेऽपि प्राप्नोति । अनित्य आट् । अन्यथास्वरस्य कृत उदात्तत्वे प्राप्नोत्यन्यथास्वरस्याकृते स्वरभिन्नस्य च प्राप्नवन्विधिरनित्यो भवति । उदात्तत्वमप्यनित्यम् । अन्यस्य कृत आटि प्राप्नोत्यन्यस्याकृते प्राप्नोति शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति । उभयोरनित्ययोः परत्वादाडागम आटि कृते ऽन्तरङ्ग एकादेशः ॥ आव् । वृक्षाविदम् । उदात्तानुदात्तयोरेकादेशः । तस्यैकादेश उदात्तेनोदात्त इत्येतद्भवति । तस्य सिद्धत्वं वक्तव्यमान्तर्यत उदात्तस्योदात्त आवादेशो[2] यथा स्यात् ॥ एकादेशस्वर । गाङ्गे[3]ऽनूप इति । उदात्तानुदात्तयोरेकादेशः[4] । तस्यैकादेश उदात्तेनोदात्त इत्येतद्भवति । तस्य सिद्धत्वं वक्तव्यं स्वरितो वानुदात्ते पदादौ [८. २. ६] इत्येतद्यथा स्यात् ॥ शतृस्वर । तुदती नुदती । उदात्तानुदात्तयोरेकादेशः[5] । तस्यैकादेश उदात्तेनोदात्त इत्येतद्भवति । तस्य सिद्धत्वं वक्तव्यं शतुरनुमो नद्यजादिरन्तोदात्तादित्येष[6] स्वरो यथा स्यात् ॥ नैतदस्ति प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयति सिद्ध एकादेशस्वरः शतृस्वरः इति यदयमनुम इति प्रतिषेधं शास्ति । कथं कृत्वा ज्ञापकम् । न ह्यन्तरेणोदात्तानुदात्तयोरेकादेशं शत्रन्तं सनुम्कमन्तोदात्तमस्ति । ननु चेदमस्ति यान्ती वान्ती । एतदपि निघाते[7] कृते नान्तरेणोदात्तानुदात्तयोरेकादेशं शत्रन्तं सनुम्कमन्तोदात्तमस्ति ॥ इदमिह संप्रधार्यम् । निघातः क्रियतामेकादेश इति[8] किमत्र कर्तव्यम् । परत्वान्निघातः । नित्य एकादेशः । कृतेऽपि निघाते प्राप्नोत्यकृतेऽपि प्राप्नोति । एकादेशोऽप्यनित्यः । अन्यथास्वरस्य कृते निघाते प्राप्नोत्यन्यथास्वरस्याकृते निघाते स्वरभिन्नस्य च प्राप्नुवन्विधिरनित्यो भवति । अन्तरङ्गस्तर्ह्येकादेशः । कान्तरङ्गता । वर्णावाश्रित्यैकादेशः पदस्य निघातः । निघातोऽप्यन्तरङ्गः । कथम् । उक्तमेतत्पदग्रहणं परिमाणार्थमिति[9] । उभयोरन्तरङ्गयोः परत्वान्निघातो निघाते कृत एतदपि नान्तरेणो-

---

[1] आण् नद्याः ; उदात्तयणो हल्पूर्वात् ७. ३. ११२ ; ६. १. १७४. [2] एचोऽयवायावः ६. १ ७८. [3] आद्गुणः ६. १. ८७. [4] एङः पदान्तादति ६. १. १०९. [5] तुदादिभ्यः शः ; आद्युदात्तश्च ; तास्यनुदात्तेङ्गिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः ; अतो गुणे ; ३. १. ७७ ; ३ ; ६. १. १८६ ; ६. १. ९७. [6] शतुरनुमो नद्यजादी ; ६. १ १७३. [7] आद्युदात्तश्च ; अनुदात्तं पदमेकवर्जम ; ३. १. ३ ; ६. १. १५८. [8] अनुदात्तं पदमेकवर्जम् ; अकः सवर्णे दीर्घः ६. १. १५८ ; १०१. [9] पदग्रहणं परिमाणार्थम् ४. ३. १४० वा. ४.

दात्तानुदात्तयोरेकादेशमन्तोदात्तं भवति । शतृस्वर ॥ एकाननुदात्त । तुदन्ति लिखन्ति । उदात्तानुदात्तयोरेकादेशः[1] । तस्यैकादेश उदात्तेनोदात्त इत्येतद्भवति । तस्य सिद्धत्वं वक्तव्यं तेन वर्ज्यमानता[2] यथा स्यात् ॥ सर्वानुदात्त । ब्राह्मणास्तुदन्ति । ब्राह्मणा लिखन्ति । उदात्तानुदात्तयोरेकादेशः[1] । तस्यैकादेश उदात्तेनोदात्त इत्येतद्भवति । तस्य सिद्धत्वं वक्तव्यम् । किं प्रयोजनम् । तिङतिङ [८. १. २८] इति निघातो यथा स्यात् ॥

किमुच्यते ऽन्तरङ्ग इति । यो हि बहिरङ्गोऽसिद्ध एवासौ भवति । प्रपचतीति[3] । सोमसुत्पचतीति[4] ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । सर्वत्रैव नुम्प्रतिषेधो[5] ज्ञापकः सिद्ध एकादेशस्वरोऽन्तरङ्ग इति ॥

संयोगान्तलोपो रोरुत्वे हरिवो मेदिनं त्वा ॥ ३ ॥

संयोगान्तलोपो रोरुत्वे सिद्धो वक्तव्यः । किं प्रयोजनम् । हरिवो[6] मेदिनं त्वा । संयोगान्तलोपस्यासिद्धत्वाद्धशीत्युत्वं न प्राप्नोति ॥

प्लुतिश्च ॥ ४ ॥

प्लुतिश्चोत्वे सिद्धा वक्तव्या । सुस्रोता३ अत्र न्वसीत्यत्र प्लुतेरसिद्धत्वादतोऽतीत्युत्वं प्राप्नोति[7] । अप्लुतादप्लुत[8] इत्येतन्न वक्तव्यं भवति ॥ नैतदस्ति प्रयोजनम् । क्रियते न्यास एव ॥

सिज्लोप एकादेशे ॥ ५ ॥

सिज्लोप एकादेशे सिद्धो वक्तव्यः । अलावीत् अपावीत् । सिज्लोपस्यासिद्धत्वात् सवर्णदीर्घत्वं न प्राप्नोति[9] ॥ यदि पुनरिडादेः सिचो लोप उच्येत । नैवं शक्यम् । इह हि मा हि लावीत् मा हि पावीत् यद्यत्रेण्न स्यादनुदात्तस्य ईटः श्रवणं प्रसज्येत । इटि पुनः सत्युक्तमेतदर्थवत्तु चित्करणसामर्थ्याद्धीट उदात्तत्वमिति[10] तत्रैकादेश उदात्तेनोदात्तः [८. २. ५] इत्युदात्तत्वं सिद्धं भवति ॥

संयोगादिलोपः संयोगान्तलोपे ॥ ६ ॥

संयोगादिलोपः संयोगान्तस्य लोपे सिद्धो वक्तव्यः । काष्ठतट् कूटतट् ।

---

[1] तुदादिभ्यः शः ; आद्युदात्तश्च ; तास्यनुदात्तेङिददुपदेशात् ... अहृन्विङो; अतो गुणे ३. १. ७७ ; ३ ; ६. १. १८६ ; ९७.

[2] धातोः ६. १. १६२ ; अनुदात्तं पदमेकवर्जम् ६. १. १५८.

[3] तिङि चोदात्तवति ८. १. ७१.

[4] तिङतिङः ८. १. २८.

[5] शतुरनुमो नद्यजादी ६. १. १७३.

[6] (छन्दसीरः ८. २. १५) ; संयोगान्तस्य लोपः २३ (मतुवसो रु संबुद्धौ छन्दसि ८. ३. १) ; हशि च ६. १. ११४.

[7] दूराद्धूते च ८. २. ८४ ; अतो रोरप्लुतादप्लुते ६. १. ११३.

[8] अतो रोरप्लुतादप्लुते ६. १. ११३.

[9] इट ईटि ; अकः सवर्णे दीर्घः ८. २. २८ ; ६. १. १०१.

[10] ३. १. ४४ वा. २.

संयोगादिलोपस्यासिद्धत्वात्संयोगान्तलोपः प्राप्नोति[1] ॥ नैष दोषः । उक्तमेतदपवादो वचनप्रामाण्यादिति[2] ॥

निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु ॥ ७ ॥

निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वक्तव्यः । वृक्णः वृक्णवान् । निष्ठादेशस्यासिद्धत्वाज्झलीति षत्वं प्राप्नोति[3] । स्वर । क्षीवः[4] । निष्ठादेशस्यासिद्धत्वान्निष्ठा च द्व्यजनात् [६. १ २०५] इत्येष स्वरो न प्राप्नोति । प्रत्यय । क्षीवेण तरति क्षीविकः । निष्ठादेशस्यासिद्धत्वाद्द्व्यचष्ठनिति ठन्न प्राप्नोति[5] । इड्विधि । निष्ठादेशस्यासिद्धत्वाद्वलादिलक्षण इट् प्राप्नोति[6] ॥ ननु च यः प्रत्ययविधौ सिद्धः सिद्धोऽसाविड्विधौ । इदं तर्हि प्रयोजनम् । ओलस्जी लग्नः[7] । निष्ठादेशः सिद्धो वक्तव्यो नेड्वशि कृति [७. २. ८] इतीट्प्रतिषेधो यथा स्यात् । ईदित्करणं न कर्तव्यं भवति[8] ॥ एतदपि नास्ति प्रयोजनम् । क्रियत एतन्न्यास एव ॥

वस्वादिषु दत्वं सौ दीर्घत्वे ॥ ८ ॥

वस्वादिषु दत्वं सौ दीर्घत्वे सिद्धं वक्तव्यम् । उखास्रत् । पर्णध्वत् । दत्वस्यासिद्धत्वादत्वसन्तस्येति दीर्घत्वं प्राप्नोति[9] । अधातोरिति[10] न वक्तव्यं भवति ॥ नैतदस्ति प्रयोजनम् । क्रियते न्यास एव ॥

अदस ईत्वोत्वे स्वरे बहिष्पदलक्षणे । ॥ ९ ॥

अदस ईत्वोत्वे स्वरे बहिष्पदलक्षणे सिद्धे वक्तव्ये । अमी अत्र । अमी आसते । अमू अत्र । अमू आसाते । ईत्वोत्वयोरसिद्धत्वादेच इत्ययावेकादेशाः प्राप्नुवन्ति[11] । किमुच्यते बहिष्पदलक्षण इति । यो ह्यन्योऽसिद्ध एवासौ भवति । अमुया अमुयोरिति[12] ॥

प्रगृह्यसंज्ञायां च ॥ १० ॥

प्रगृह्यसंज्ञायां च सिद्धे वक्तव्ये । अमी अत्र । अमी आसते । अमू अत्र । अमू आसाते । ईत्वोत्वयोरसिद्धत्वाददसो मात् [१. १. १२] इति प्रगृह्यसंज्ञा न प्राप्नोति ॥ किमर्थमिदमुभयमुच्यते न प्रगृह्यसंज्ञायामित्येव स्वरेऽपि बहिष्पदलक्षणे

---

[1] स्कोः संयोगाद्योरन्ते च ; संयोगान्तस्य लोपः ८. २. २९ ; २३. [2] अपवादो वचनप्रामाण्यात् ८. २. १. वा. २. [3] ओदितश्च ; व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ८. २. ४५ ; ३६. [4] अनुपसर्गात् फुल्लक्षीवकृशोल्लाघाः ८. २. ५५. [5] नौद्व्यचष्ठन् ४. ४. ७. [6] आर्धधातुकस्येड् वलादेः ७. २. ३५. [7] ओदितश्च ८. २. ४५. [8] श्वीदितो निष्ठायाम् ८. २. १४. [9] वसुस्रंसुध्वंस्वनडुहां दः ८. २. ७२ ; अत्वसन्तस्य चाधातोः ६. ४. १४. [10] अत्वसन्तस्य चाधातोः ६. ४. १४. [11] अदसोसेर्दादु दो मः ८. २. ८० ; एत ईद् बहुवचने ८. २. ८१ ; एचोऽयवायावः ६. १. ७८ ; एङः पदान्तादति ६. १. १०९. [12] त्यदादीनामः ७. २. १०२ ; अजाद्यतष्टाप् ४. १. ४ ; अकः सवर्णे दीर्घः ६. १. १०१ ; आङि चापः ७. २. १०५ ; ओसि च ७. २. १०४ ; एचोऽयवायावः ६. १. ७८ ; अदसोसेर्दादु दो मः ८. २. ८०.

चोदितं स्यात् । पुरस्तादिदमाचार्येण दृष्टं स्वरे बहिष्पदलक्षण इति तत् पठितम् । तत उत्तरकालमिदं दृष्टं प्रगृह्यसंज्ञायां चेति तदपि पठितम् । न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति ॥

प्लुतिस्तुग्विधौ छे ॥ ११ ॥

प्लुतिस्तुग्विधौ छे सिद्धा वक्तव्या । अग्ना३इ च्छत्रम् । पटा३उ च्छत्रम्[1] । प्लुतेरसिद्धत्वाच्छे च [६. १. ७३] इति तुग्न प्राप्नोति ॥ किमुच्यते छ इति । यो ह्यन्यो ऽसिद्ध एवासौ भवति । अग्निची३त् सोमसू३त्[2] ॥

श्चुत्वं धुट्त्वे ॥ १२ ॥

श्चुत्वं धुट्त्वे सिद्धं वक्तव्यम् । अट् श्च्योतति । पट् श्च्योतति[3] । श्चुत्वस्यासिद्धत्वाड्ढः सि धुट् [८. ३. २९] इति धुट् प्रसज्येत ॥

अभ्यासजश्त्वचर्त्वमेत्त्वतुकोः ॥ १३ ॥

अभ्यासजश्त्वचर्त्वमेत्त्वतुकोः सिद्धं वक्तव्यम् । बभणतुः बभणुः । अभ्यासादेशस्यासिद्धत्वादेत्त्वं प्राप्नोति[4] । उचिच्छिषति । अभ्यासादेशस्यासिद्धत्वाच्छे च [६. १. ७३] इति तुक् प्राप्नोति ॥

द्विर्वचने परसवर्णत्वम् ॥ १४ ॥

द्विर्वचने परसवर्णत्वं सिद्धं वक्तव्यम् । सय्ँयन्ता सव्ँवत्सरः तँल्लोकम् यँल्लोकमिति परसवर्णस्यासिद्धत्वाद्यर इति द्विर्वचनं[5] न प्राप्नोति ॥

पदाधिकारश्चेल्लत्वघत्वनत्वरुत्वषत्वणत्वानुनासिकछत्वानि ॥ १५ ॥

पदाधिकारश्चेल्लत्वघत्वनत्वरुत्वषत्वणत्वानुनासिकछत्वानि सिद्धानि वक्तव्यानि[6] । लत्व । गरो गरः । गलो गलः । लत्व । घत्व । द्रोग्धा द्रोग्धा । द्रोढा द्रोढा । घत्व । नत्व । नुन्नो नुन्नः । नुत्तो नुत्तः । नत्व । रुत्व । अभिनोऽभिनः । अभिनदभिनत् । रुत्व । षत्व । मातुःष्वसा मातुःष्वसा । मातुःस्वसा मातुःस्वसा पितुःष्वसा पितुःष्वसा । पितुःस्वसा पितुःस्वसा । षत्व । णत्व । माषवापाणि माषवापाणि । माषवापानि माषवापानि । णत्व । अनुनासिक । वाङ्नयनं वाङ्नय-

---

[1] वाक्यस्य टेः प्लुत उदात्तः ; एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ ८. २. ८२ ; १०७. [2] ह्रस्वस्य पिति कृति तुक् ६. १. ७१. [3] स्तोः श्चुना श्चुः ८. ४. ४०. [4] अभ्यासे चर् च ८. ४. ५४ ; अत एकमध्येऽनादेशादेर्लिटि ६. ४. १२०. [5] वा पदान्तस्य ८. ४. ५९ ; अनचि च ८. ४. ४७. [6] पदस्य ८. १. १६ ; अचि विभाषा ८. २. २१, वा. ३ वा द्रुहमुहष्णुहष्णिहाम् ८. २. ३३, नुदविदोन्दत्राघ्राह्रीभ्योन्यतरस्याम् ८. २. ५६ ; सिपि धातो रुर्वा ८. २. ७४ ; दश्च ८. २. ७५ ; मातुःपितुर्भ्यामन्यतरस्याम् ८. ३. ८५ ; प्रातिपदिकान्तनुम्विभक्तिषु च ८. ४. ११, यरोऽनुनासिकेऽनुनासिको वा. ८. ४. ४५ ; शश्छोऽटि ८. ४. ६३ नित्यवीप्सयोः ८. १. ४.

नम् । वाग्नयनं वाग्नयनम् । अनुनासिक । छत्व । वाक्छयनं वाक्छयनम् । वाक्शयनं वाक्शयनम् ॥ उभयथा चायं दोषो यद्यपि स्थाने द्विर्वचनमथापि द्विःप्रयोगः । कथम् । यदि तावत्स्थाने द्विर्वचनं संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य ल्त्वाद्यभावः । अथ द्विःप्रयोगोऽसिद्धत्वाल्लत्वादीनि निवर्तेरन् ॥

नलोपः प्रातिपदिकान्तस्य ॥ ८ । २ । ७ ॥

अन्तग्रहणं किमर्थम् ।

नलोपे ऽन्तग्रहणं पदाधिकारस्य विशेषणत्वात् ॥ १ ॥

नलोपे ऽन्तग्रहणं क्रियते । किं कारणम् । पदाधिकारस्य विशेषणत्वात् । पदाधिकारो विशेषणम् । कथम् । पदस्येति नैषा स्थानषष्ठी[1] । का तर्हि । विशेषणषष्ठी ॥

अह्नो नलोपप्रतिषेधः ॥ २ ॥

अह्नो नलोपप्रतिषेधो वक्तव्यः । अहोभ्याम् अहोभिरिति ॥ स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । रुरत्र बाधको भविष्यति[2] । असिद्धो रुस्तस्यासिद्धत्वान्नलोपः प्राप्नोति । अनवकाशो रुर्नलोपं बाधिष्यते । सावकाशो रुः । कोऽवकाशः । अनन्त्यो ऽकारः । आचार्यप्रवृत्तिर्ज्ञापयति नानन्त्यस्य रुर्भवतीति यदयमहन्ग्रहणं करोति[2] ॥

अहन्ग्रहणादिति चेत्संबुद्ध्यर्थं वचनम् ॥ ३ ॥

अहन्ग्रहणादिति चेत्संबुद्ध्यर्थमेतत् स्यात्[3] । हेऽहरिति[4] ॥ यत्तर्हि रुत्वं शास्ति । एतदपि संबुद्ध्यर्थमेव स्यात् । हे दीर्घाहोऽत्र[5] ॥ यत्तर्हि रूपरात्रिरथंतरेषूपसंख्यानं करोति तज्ज्ञापयत्याचार्यो नानन्त्यस्य रुर्भवतीति । कथं कृत्वा ज्ञापकम् । न ह्यस्ति विशेषो रूपरात्रिरथंतरेष्वनन्त्यस्य रौ वा रे वा ॥

न ङिसंबुद्ध्योः ॥ ८ । २ । ८ ॥

न ङिसंबुद्ध्योरनुत्तरपदे ॥ १ ॥

न ङिसंबुद्ध्योरनुत्तरपद इति वक्तव्यम् । इह मा भूत् । चर्मणि तिला अस्य चर्मतिल इति । राजन्वृन्दारक राजवृन्दारकेति ॥

---

[1] पदस्य ; षष्ठी स्थानेयोगा ; अलोन्त्यस्य ८. १. १६ ; १. १. ४९ ; ५२.

[2] अहन् ८. २. ६८.

[3] न ङिसंबुद्ध्योः ८. २. ८.

[4] रोऽसुपि ८. २. ६९.

[5] हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् ; प्रत्ययलोपे प्रत्ययलक्षणम् ; अहन् ६. १. ६८ ; १. १. ६२ ; ८. २. ६८.

[6] रुविधावह्नो रूपरात्रिरथंतरेषूपसंख्यानम् ८. २. ६८ वा. १.

वा नपुंसकानाम् ॥ २ ॥

वा नपुंसकानामिति वक्तव्यम्। हे चर्म हे चर्मन्। हे वर्म हे वर्मन् ॥

तत्तर्ह्यनुत्तरपद इति वक्तव्यम्। न वक्तव्यम्। न ङिसंबुद्ध्योरित्युच्यते न चात्र ङिसंबुद्धी पश्यामः। प्रत्ययलक्षणेन[1]। न लुमता तस्मिन्निति[2] प्रत्ययलक्षणस्य प्रतिषेधः। न कचिन्ङिर्लोपेन लुप्यते सर्वत्र लुमतैव[3]। यथैवेह भवति आर्द्रे चर्मन् लोहिते चर्मन्नित्येवमिहापि स्यात् चर्मणि तिला अस्य चर्मतिल इति। तस्मादुपसंख्यानं कर्तव्यम् ॥ एवं तर्हि ङ्यर्थेन तावन्नार्थः।

भत्वात्तु ङौ प्रतिषेधानर्थक्यम् ॥ ३ ॥

ङौ प्रतिषेधोऽनर्थकः। किं कारणम्। भत्वात्। भसंज्ञात्र भविष्यति[4] ॥ यदि तर्हि भसंज्ञात्र भवति रथंतरे सामन्नित्यत्राल्लोपोऽनः [६. ४. १३४] इत्यल्लोपः प्राप्नोति। नैष दोषः। उक्तमुभयसंज्ञान्यपि च्छन्दांसि दृश्यन्ते तद्यथा स सुष्टुभा स ऋक्वता गणेन[5] पदत्वात्कुत्वं भत्वाज्जश्त्वं न भवति[6]। एवमिहापि पदत्वादल्लोपो न भत्वान्नलोपो न भविष्यति। तस्मान्नार्थो ङिग्रहणेन ॥

संबुद्ध्यर्थेन चापि नार्थः। कथम्। संबुद्ध्यन्तानामसमासः। राजवृन्दारकेति। किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गंस्यते। इह समानार्थेन वाक्येन भवितव्यं समासेन च यश्चेहार्थो वाक्येन गम्यते नासौ जातुचित्समासेन गम्यते। अवयवसंबोधनं वाक्येन गम्यते समुदायसंबोधनं समासेन ॥

वा नपुंसकानामित्येतद्वक्तव्यमेव ॥

मादुपधायाश्च मतोर्वोऽयवादिभ्यः ॥ ८ । २ । ९ ॥

रदाभ्यां निष्ठातो नः पूर्वस्य च दः ॥ ८ । २ । ४२ ॥

अनन्त्ययोरपि निष्ठामतुपोरादेशः ॥ १ ॥

निष्ठामतुपोरादेशो ऽनन्त्ययोरपीति वक्तव्यम्। भिन्नवन्तौ भिन्नवन्तः। वृक्षवन्तौ वृक्षवन्तः ॥ न वक्तव्यम्। वचनाद्भविष्यति। अस्ति वचने प्रयोजनम्। किम्। भिन्नवान् छिन्नवान्। वृक्षवान् प्लक्षवान् ॥

---

[1] प्रत्ययलोपे प्रत्ययलक्षणम् १. १. ६२.

[2] न लुमता तस्मिन्निति चेद्धनिणिङादेशास्तल्लोपे १. १. ६३ वा. १३.

[3] सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ७. १. ३९ ; सुपो धातुप्रातिपदिकयोः २. ४. ७१.

[4] यचि भम् १. ४. १८ ; अयस्मयादीनि च्छन्दसि १. ४. २०.

[5] ऋ. सं. ४. ५०. ५.

[6] वृद्धिरादैच्। कुत्वं कस्मान्न भवति चोः कुः पदस्य (८. २. ३०) इति। भत्वात्। कथं भसंज्ञा। ... उभयसंज्ञान्यपि च्छन्दांसि दृश्यन्ते ... जश्त्वं न भवति। महाभाष्य १. १. १.

नार्मते प्रतिषेधः ॥ २ ॥

नार्मते प्रतिषेधो वक्तव्यः । नृमतो नार्मत इति ॥

उक्तं वा ॥ ३ ॥

किमुक्तम् । निष्ठामतुपोस्तावदुक्तं न वा पदाधिकारस्य विशेषणत्वादिति[1] । नार्मते ऽप्युक्तं न वा बहिरङ्गलक्षणत्वादिति[2] ॥*

संज्ञायाम् ॥ ८ । २ । ११ ॥

आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती ॥ ८ । २ । १२ ॥

किमयमेकयोग आहोस्विन्नानायोगौ । किं चातः । यद्येकयोगोऽहीवती कपीवती अत्र न प्राप्नोति । अथ नानायोगाविक्षुमती द्रुमती अत्रापि प्राप्नोति । यथेच्छसि तथास्तु ॥ अस्तु तावदेकयोगः । कथमहीवती कपीवती । आचार्यप्रवृत्तिर्ज्ञापयति भवत्येवंजातीयकानां वत्वमिति यदयमन्तोऽवत्या ईवत्याः [६. १. २२०; २२१] इत्याह ॥ अथवा पुनरस्तु नानायोगौ । ननु चोक्तमिक्षुमती द्रुमती अत्रापि प्राप्नोतीति । यवादिषु[3] पाठः करिष्यते ॥**

छन्दसीरः ॥ ८ । २ । १५ ॥

छन्दसीर इत्युच्यते तत्र ते विश्वकर्माणं ते सप्तर्षिमन्तमित्यत्रापि[4] प्राप्नोति । नैष दोषः । नैवं विज्ञायते छन्दसि इर इति । कथं तर्हि । छन्दसि ईर इति ॥ एवमपि त्विषीमान्[5] पतीमानित्यत्रापि प्राप्नोति । नैष दोषः । विहितविशेषणमीकारग्रहणम् । ईकारान्ताद्यो विहित इति ॥ एवमपि सूर्यं ते द्यावापृथिवीमन्तमित्यत्रापि[6] प्राप्नोति । इह च न प्राप्नोति त्रिवतीर्याज्यानुवाक्याः[7] भवन्तीति ॥ एवं तर्हि परिगणनं कर्तव्यम् । त्रिहर्यधिपत्यग्निरे । त्रिवतीर्याज्यानुवाक्या भवन्ति । त्रि । हरि । हरिवो मेदिनं[8] त्वा । हरि । अधिपति । अधिपतिवतीर्जुहोति[9] । अधिपति । अग्नि । चरुरग्निवानिवं[10] । अग्नि । रे । आ रेवानेतु नो विशः इति ॥ यदि तर्हि परिगणनं

---

* [V. M. om. ज्ञयः (१०)].

** [V. M. om. उदन्वानुदधौ च (१३) ; राजन्वान् सौराज्ये (१४)].

[1] न वा पदाधिकारस्य विशेषणत्वात् ८. १. १६–१७ वा. ५. [2] न वा बहिरङ्गलक्षणत्वात् ८. ३. १५ वा. २. [3] मादुपधायाश्च मतोर्वोऽयवादिभ्यः ८. २. ९. [4] शौ. सं. १९. १८. ७. [5] ऋ. सं. २. २२. २. [6] शौ. सं. १९. १८. ५. [7] काठकसं. ११. १. [8] तै. सं. ४. ७. १४. ४. [9] काठकसं. २१. ३. [10] ऋ. सं. ७. १०४. २.

क्रियते सरस्वतीवान्भारतीवान्[1] अपूपवान्[2]दधिवांश्चरुरित्यत्र न प्राप्नोति । एवं तर्हि च्छन्दसीरो बहुलमिति वक्तव्यम् ॥

अनो नुट् ॥ ८ । २ । १६ ॥

यदि पुनरयं नुट् पूर्वान्तः क्रियेत ।

अनो नुकि विनामरुविधिप्रतिषेधः ॥ १ ॥

अनो नुकि सति विनामो विधेयः । अक्षण्वान्[3] । पदान्तस्य नेति प्रतिषेधः प्राप्नोति[4] । रुश्च प्रतिषेध्यः । सुपथिन्तरः[5] । नश्छव्यप्रशान् [८. ३. ७] इति रुः प्राप्नोति ॥ अस्तु तर्हि परादिः ।

परादौ वत्वप्रतिषेधोऽवग्रहश्च ॥ २ ॥

यदि परादिर्वत्वस्य प्रतिषेधो वक्तव्यः । अक्षण्वान् । मादुपधायाश्च मतोर्वोऽयवादिभ्यः [८. २. ९] इति वत्वं प्राप्नोति । अवग्रहश्चानिष्टे देशे प्राप्नोति । अक्षण्वान् ॥ अस्तु तर्हि पूर्वान्तः । ननु चोक्तमनो नुकि विनामरुविधिप्रतिषेध इति ।

भत्वात्सिद्धम् ॥ ३ ॥

भसंज्ञा वक्तव्या ॥ यदि तर्हि भसंज्ञाल्लोपोऽनः [६. ४. १३४] इत्यल्लोपः प्राप्नोति ।

अनस्तु प्रकृतिभावे मतुब्ग्रहणं छन्दसि ॥ ४ ॥

अनस्तु प्रकृतिभावे मतुब्ग्रहणं छन्दसि वक्तव्यम् ॥ इह तर्हि सुपथिन्तरः नान्तस्य टिस्तद्धिते लुप्यत इति[6] लोपः प्राप्नोति ।

घग्रहणं च ॥ ५ ॥

घग्रहणं च कर्तव्यम् ॥

तत्तर्हीदं बहु वक्तव्यम् । नुग्वक्तव्यः । भसंज्ञा च वक्तव्या । अनस्तु प्रकृतिभावे मतुब्ग्रहणं छन्दसि वक्तव्यम् । घग्रहणं च कर्तव्यमिति । न कर्तव्यम् । यत्तावदुच्यते नुग्वक्तव्य इति नुक एष परिहारो भत्वात्सिद्धमिति । भसंज्ञा वक्तव्येति

---

[1] तु० ऋ. सं. ८. ३८. १०. [2] तु० ऋ. सं. ३. ५२. १; ८. ९१. २. [3] छन्दस्यपि दृश्यते; नलोपः प्रातिपदिकान्तस्य ७. १. ७६; ८. २. ७. [4] पदान्तस्य ८. ४. ३७. [5] नाद्घस्य ८. २. १७. [6] नस्ताद्धिते ६. ४. १४४.

क्रियते न्यास एवायस्मयादीनि च्छन्दसि [१. ४. २०] इति । यदप्युच्यतेऽनस्तु प्रकृतिभावे मतुब्ग्रहणं छन्दसि घग्रहणं च कर्तव्यमिति न कर्तव्यम् । उभयसंज्ञान्यपि हि च्छन्दांसि दृश्यन्ते । तद्यथा । स सुष्टुभा स ऋक्कता गणेन । पदत्वात्कुत्वं भत्वाज्जश्त्वं न भवति । एवमिहापि पदत्वादल्लोपटिलोपौ न भत्वाद्दिनामरुविधिप्रतिषेधौ भविष्यतः । सिध्यति । सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवास्तु । ननु चोक्तं परादौ वत्वप्रतिषेधो ऽवग्रहश्चेति । यत्तावदुच्यते वत्वप्रतिषेध इति निर्दिश्यमानस्यादेशा भवन्तीत्येवं न भविष्यति । यस्तर्हि निर्दिश्यते तस्य न प्राप्नोति । किं कारणम् । नुटा व्यवहितत्वात् । असिद्धो नुट् तस्यासिद्धत्वाद्भविष्यति । अवग्रहेऽपि न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्यम् । यथालक्षणं पदं कर्तव्यम् ॥

नाद्घस्य ॥ ८ । २ । १७ ॥

ईद्रथिनः ॥ १ ॥

रथिन ईद्वक्तव्यः । रथीतरः ॥

भूरिदान्नस्तुट् ॥ २ ॥

भूरिदान्नस्तुड्वक्तव्यः । भूरिदावत्तरो जनः ॥

कृपो रो लः ॥ ८ । २ । १८ ॥

कृपणादीनां प्रतिषेधो वक्तव्यः । कृपणः कृपाणः कृपीटम् ॥

वालमूललघ्वलमङ्गुलीनां वा लो रमापद्यत इति वक्तव्यम् । अश्ववालैः[1] अश्ववारः । मूलदेवः मूरदेवः । वरुणस्य लघुस्यदः वरुणस्य रघुस्यदः । अलं भक्ताय अरं भक्ताय । सुबाहुः[2] स्वङ्गुलिः सुबाहुः स्वङ्गुरिः ॥

संज्ञाछन्दसोर्वा कपिलकादीनामिति वक्तव्यम् । कपिरकः कपिलकः । तिल्विरीकः तिल्विलीकः । रोमाणि लोमानि । पांसुरम् पांसुलम् । कर्म कल्म । शुक्रः शुक्लः ॥

---

[1] तै. सं. ६. १. २५; मै. सं. ३. ७. ९. [2] ऋ. २.-३२. ७.

उपसर्गस्यायतौ ८ । २ । १९ ॥

किमिदमयतिग्रहणं रेफविशेषणम् । अयतिपरस्य रेफस्य लो भवति स चेदुपसर्गस्य भवतीति । आहोस्विदुपसर्गविशेषणम् । अयतिपरस्योपसर्गस्य यो रेफस्तस्य लो भवतीति । कश्चात्र विशेषः ।

रेफस्यायताविति चेत्परेरुपसंख्यानम् ॥ १ ॥

रेफस्यायताविति चेत्परेरुपसंख्यानं कर्तव्यम् । पल्ययते । वचनाद्भविष्यति । अस्ति वचने प्रयोजनम् । किम् । प्लायते पलायते ॥ अस्तु तर्ह्युपसर्गविशेषणम् ।

उपसर्गस्येति चेदेकादेशे ऽप्रसिद्धिः ॥ २ ॥

उपसर्गस्येति चेदेकादेशे ऽप्रसिद्धिर्भवति । प्लायते पलायते । एकादेशे कृते व्यपवर्गाभावान्न प्राप्नोति । अन्तादिवद्भावेन व्यपवर्गः । उभयत आश्रये नान्तादिवत् । एवं तर्ह्येकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यपवर्गः । प्रतिषिध्यतेऽत्र स्थानिवद्भावः पूर्वत्रासिद्धे न स्थानिवदिति[1] । दोषा एवैते तस्याः परिभाषायास्तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति[2] ॥

अथवा पुनरस्तु रेफविशेषणम् । ननु चोक्तं रेफस्यायताविति चेत्परेरुपसंख्यानमिति । वचनाद्भविष्यति । ननु चोक्तमस्ति वचने प्रयोजनम् किम् प्लायते पलायत इति । अत्राप्यकारेण व्यवहितत्वान्न प्राप्नोति । एकादेशे कृते नास्ति व्यवधानम् । एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यवधानमेव । प्रतिषिध्यतेऽत्र स्थानिवद्भावः पूर्वत्रासिद्धे न स्थानिवदिति । दोषा एवैते तस्याः परिभाषायास्तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति ॥*

अचि विभाषा ॥ ८ । २ । २१ ॥

णावुपसंख्यानं कर्तव्यम् । इहापि यथा स्यात् । निगार्यते निगाल्यते । किं पुनः कारणं न सिध्यति । अचीत्युच्यते न चात्राजादिं पश्यामः । प्रत्ययलक्षणेन[4] । वर्णाश्रये नास्ति प्रत्ययलक्षणम् । एवं तर्हि स्थानिवद्भावाद्भविष्यति । प्रतिषिध्यतेऽत्र स्थानिवद्भावः पूर्वत्रासिद्धे न स्थानिवदिति[1] ॥ अत उत्तरं पठति ।

---

* [V. M. om. ग्रो यङि (२०)].

[1] पूर्वत्रासिद्धे च १. १. ५८ वा. ३.
[2] तस्य दोषः संयोगादिलोपलत्वणत्वेषु १. १. ५८ वा. १०.
[3] णेरनिटि ६. ४. ५१.
[4] प्रत्ययलोपे प्रत्ययलक्षणम् १. १. ६२.

गिरेतेर्लत्वे णावुक्तम् ॥ १ ॥

किमुक्तम् । तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति[1] ॥

परेश्च घाङ्कयोः ॥ ८ । २ । २२ ॥

योगे चेति वक्तव्यम् । इहापि यथा स्यात् । परियोगः पलियोगः ॥

सङि लत्वसलोपसंयोगादिलोपकुत्वदीर्घत्वानि ॥ १ ॥

सङीति[2] प्रकृत्य लत्वसलोपसंयोगादिलोपकुत्वदीर्घत्वानि वक्तव्यानि ॥ किं प्रयोजनम् ।

प्रयोजनं गिरौ गिरः पयो धावति द्विष्टराम् दृषत्स्थानम् काष्ठशक्स्थाता क्रुञ्चा धुर्य इति ॥ २ ॥

गिरौ गिर[3] इत्यत्राचि विभाषा [८. २. २१] इति लत्वं प्राप्नोति सङीति वचनान्न भवति ॥ नैतदस्ति प्रयोजनम् । उक्तमेतद्धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्सिद्धमिति[4] ॥ पयो धावतीत्यत्र धि च [२५] इति सलोपः प्राप्नोति सङीति वचनान्न भवति ॥ एतदपि नास्ति प्रयोजनम् । वक्ष्यत्येतद्धिसकारे सिचो लोप इति[5] ॥ द्विष्टरामित्यत्र[6] ह्रस्वादङ्गात् [२७] इति सलोपः प्राप्नोति सङीति वचनान्न भवति ॥ एतदपि नास्ति प्रयोजनम् । अत्रापि सिच इत्येवानुवर्तिष्यते ॥ दृषत्स्थानमित्यत्र झलो झलि [२६] इति सलोपः प्राप्नोति सङीति वचनान्न भवति ॥ एतदपि नास्ति प्रयोजनम् । अत्रापि सिच इत्येवानुवर्तिष्यते ॥ काष्ठशक्स्थातेत्यत्र स्कोः संयोगाद्योरन्ते च [२९] इति ककारलोपः प्राप्नोति सङीति वचनान्न भवति ॥ एतदपि नास्ति प्रयोजनम् । काष्ठशगेव नास्ति कुतो यः काष्ठशकि तिष्ठेत् ॥ क्रुञ्चेत्यत्र चोः कुः [३०] झलीति कुत्वं प्राप्नोति सङीति वचनान्न भवति ॥ एतदपि नास्ति प्रयोजनम् । निपातनादेतत्सिद्धम् । किं निपातनम् । ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाम् [३. २. ५९] इति ॥ धुर्य इत्यत्र हलि च [८. २. ७७] इति दीर्घत्वं प्राप्नोति सङीति वचनान्न भवति ॥ एतदपि नास्ति प्रयोजनम् । न भकुर्छुराम् [७९] इति प्रतिषेधो भविष्यति ॥

---

[1] तस्य दोषः संयोगादिलोपलत्वणत्वेषु १. १. ५८ वा. १०.

[2] गुप्तिज्किद्भ्यः सन्, तिप्तस्झि ... महिङ् ३. १. ५; ३. ४. ७८.

[3] स्वौजसमौट् ... ङ्योस्सुप् ४. १. २.

[4] धातोः स्वरूपग्रहणे वा तत्प्रत्ययविज्ञानात् सिद्धम् ७. २. ११४ वा. २.

[5] धिसकारे सिचो लोपः, चकाद्धीति प्रयोजनम् ८. २. २५ श्लो. वा. १.

[6] द्वित्रिचतुर्भ्यः सुच् ५. ४. १८.

संयोगान्तस्य लोपः ॥ ८ । २ । २३ ॥

संयोगान्तस्य लोपे यणः प्रतिषेधः ॥ १ ॥

संयोगान्तस्य लोपे यणः प्रतिषेधो वक्तव्यः। दध्यत्र मध्वत्रेति ॥

संयोगादिलोपे[1] च यणः प्रतिषेधो वक्तव्यः। काक्यर्थम् वास्यर्थम् ॥

न वा झलो लोपात् ॥ २ ॥

न वा वक्तव्यः। किं कारणम्। झलो लोपात्। झलो लोपः संयोगान्तलोपो वक्तव्यः ॥

बहिरङ्गलक्षणत्वाद्वा ॥ ३ ॥

अथवा बहिरङ्गो यणादेशोऽन्तरङ्गो लोपोऽसिद्धं बहिरङ्गमन्तरङ्गे ॥

संयोगान्तलोपे सग्रहणम् ॥ ४ ॥

संयोगान्तलोपे सग्रहणं कर्तव्यम्। संयोगान्तलोपः सस्य चेति वक्तव्यम्। इहापि यथा स्यात्। श्रेयान् भूयान् ज्यायान् ॥ किं पुनः कारणं न सिध्यति। परत्वाद्रुः[2] प्राप्नोति। असिद्धो रुस्तस्यासिद्धत्वाल्लोपो भविष्यति। न सिध्यति। किं कारणम्।

रुविधानस्यानवकाशत्वात् ॥ ५ ॥

अनवकाशो रुर्लोपं बाधेत ॥ सावकाशो रुः। कोऽवकाशः। पयः शिरः। ननु चात्रापि जश्त्वं[3] प्राप्नोति। स यथैव रुर्जश्त्वं बाधत एवं लोपमपि बाधेत। न बाधते। किं कारणम्। येन नाप्राप्ते तस्य बाधनं भवति न चाप्राप्ते जश्त्वे रुरारभ्यते लोपे पुनः प्राप्ते चाप्राप्ते च ॥

योगविभागात्सिद्धम् ॥ ६ ॥

अथवा योगविभागः करिष्यते[4]। एवं वक्ष्यामि। संयोगान्तस्य लोपोऽरात्। संयोगान्तस्य लोपो भवत्यरात्। ततः सस्य। सस्य च लोपो भवति संयोगान्तस्य। किमर्थं पुनरिदमुच्यते। प्रतिषिद्धार्थं रुबाधनार्थं च ॥ अथवा यदेतद्रात्सस्येति सग्रहणं तत्पुरस्तादपकक्ष्यते। संयोगान्तस्य लोपः। ततः सस्य। सस्य च संयोगान्तस्य लोपो

---

[1] स्कोः संयोगाद्योरन्ते च ८. २. २९. [2] ससजुषो रुः ८. २. ६६. [3] झलां जशोन्ते ८. २. ३९. [4] रात्सस्य ८. २. २४.

भवति । ततो रात् । रात्सस्यैव संयोगान्तस्य लोपो भवति ॥ अथवा रात्सस्येत्यत्र संयोगान्तस्य लोप इत्येतदनुवर्तिष्यते ॥*

धि च ॥ ८ । २ । २५ ॥

धि सकारे सिचो लोपः

धि सकारे सिचो लोपो वक्तव्यः । किं प्रयोजनम् ।

चकाद्धीति प्रयोजनम् ।

इह मा भूत् । चकाद्धि पलितं शिरः ॥ यदि तर्हि सिचो लोप इत्युच्यत

आशाध्वं तु कथं ते स्यात्

आशाध्वमित्यत्र न प्राप्नोति ॥

जश्त्वं सस्य भविष्यति ॥ १ ॥

जश्त्वमत्र सकारस्य भविष्यति[1] ॥

सर्वत्रैवं प्रसिद्धं स्यात्

सर्वत्रैवं जश्त्वेन सिद्धं स्यात् । इहापि आयन्ध्वम् अरन्ध्वमिति जश्त्वेनैव सिद्धम्[2] ।

श्रुतिश्चापि न भिद्यते ।

श्रुतिकृतश्चापि न कश्चिद्भेदो भवति ॥

लुङश्चापि न मूर्धन्ये ग्रहणम्

तत्रायमप्यर्थ इणः षीध्वंलुङ्लिटां धोऽङ्गात् [८. ३. ७८] इत्यत्र लुङ्ग्रहणं न कर्तव्यम् । इहापि अच्योड्ढ्वम् अप्लोड्ढ्वमिति षत्वे सिचो धस्य ष्टुत्वे च कृते जश्त्वेन सिद्धम्[3] ॥

सेटि दुष्यति ॥ २ ॥

सेटि दोषो भवति[4] । इदमेव रूपं स्यात् अलविड्ढ्वम् इदं न स्यात् अलविध्वमिति । तस्मात्सिचो ग्रहणं कर्तव्यम् ॥ यदि तर्हि सिचो ग्रहणं क्रियते

---

* [V. M. om रात् सस्य (२४)].

[1] झलां जश् झशि ८. ४. ५३. [2] झरो झरि सवर्णे ८. ४. ६५. [3] आदेशप्रत्यययोः ८. ३. ५९ ; ष्टुना ष्टुः ८. ४. ४१ ; झलां जश् झशि ८. ४. ५३. [4] विभाषेटः ८. ३. ७९.

घसिभस्योर्न सिध्येत्तु

घसिभस्योर्न सिध्यति । सग्धिश्च[1] मे सपीतिश्च[2] मे, बब्धां[3] ते हरी धाना[4] इत्यत्र न प्राप्नोति ॥

तस्मात्सिज्ग्रहणं न तत् ।

तस्माद्धि चेत्यत्र सिचो ग्रहणं न कर्तव्यम् । कथं चकाद्धि पलितं शिर इति । एवं तर्हि सिज्ग्रहणं कर्तव्यम् । कथं सग्धिश्च मे सपीतिश्च मे बब्धां ते हरी धाना इति । इह तावत्सग्धिरिति नैतद्घसे रूपम् । किं तर्हि । सघेरेतद्रूपम् । बब्धां ते हरी धाना इति नैतद्घसे रूपम् । किं तर्हि । बन्धेरेतद्रूपम् ॥

छान्दसो वर्णलोपो वा यथेष्कर्तारमध्वरे ॥ ३ ॥

अथवा छान्दसो वर्णलोपो भविष्यति यथेष्कर्तारमध्वरे । तद्यथा । तुभ्येदमग्ने[5] । तुभ्यमिदमग्न इति प्राप्ते । आम्बानां चरुः[6] । नाम्बानां चरुरिति प्राप्ते । आव्याधिनीरुगणाः[7] । आव्याधिनीः सुगणा इति प्राप्ते । इष्कर्तारमध्वरस्य[8] । निष्कर्तारमिति प्राप्ते । शिवा उद्रस्य[9] भेषजी । शिवा रुद्रस्य भेषजीति प्राप्ते ॥ तरमात्सिज्ग्रहणं कर्तव्यम् । न कर्तव्यम् । यदेतद्रात्सस्य [८. २. २४] इति सकारग्रहणं तत्सिचो ग्रहणं विज्ञास्यते । कथम् । रात्सस्येत्युच्यते न चान्यो रेफात्परः सकारोऽस्त्यन्यदतः सिचः । ननु चायमस्ति मातुः पितुरिति । तस्मात्सिचो ग्रहणं कर्तव्यम् ॥ न कर्तव्यम् । कस्मान्न भवति चकाद्धि पलितं शिर इति । इष्टमेवैतत्संगृहीतम् । चकाधीत्येव भवितव्यम् ॥

धि सकारे सिचो लोपश्चकाद्धीति प्रयोजनम् ।
आराध्वं तु कथं ते स्याज्जश्त्वं सस्य भविष्यति ॥ १॥
सर्वत्रैवं प्रसिद्धं स्याच्छ्रुतिश्चापि न भिद्यते ।
लुङश्चापि न मूर्धन्ये ग्रहणं सेटि दुष्यति ॥ २ ॥
घसिभस्योर्न सिध्येत्तु तस्मात्सिज्ग्रहणं न तत् ।
छान्दसो वर्णलोपो वा यथेष्कर्तारमध्वरे ॥ ३ ॥ *

दादेर्धातोर्घः ॥ ८ । २ । ३२ ॥

इह दोग्धा दोग्धुमिति घत्वस्यासिद्धत्वाड्ढत्वं[10] प्राप्नोति । नैष दोषः । उक्तमेत-

---

* [V. M. om. झलो झलि (२६); ह्रस्वादङ्गात् (२७); स्कोः संयोगाद्योरन्ते च (२९); चोः कुः (३०); हो ढः (३१)].

[1] (लुङ्सनोर्घस्लृ २. ४. ३७); बहुलं छन्दसि २. ४. ३९ ; घसिभसोर्हलि ६. ४. १०० ; झलो झलि ८. २. २६. [2] वा. सं. १८. ९. [3] घसिभसोर्हलि ६. ४. १०० ; झलो झलि ८. २. २६. [4] ऋ. खि. ५. ७. ४ च. [5] ऋ. ६. ११. ५. [6] मै. सं. २. ६. ६ ; तै. सं. १. ८. १०. १. [7] वा. सं. ११. ७. [8] ऋ. १०. १४०. ५. [9] तै. सं. ४. ५. १०. [10] हो ढः ८. २. ३१.

दपवादो वचनप्रामाण्यादिति[1] ॥ अथवैवं वक्ष्यामि । हो ढो ऽदादेः । हो ढो भवत्यदादेः । ततो धातोर्घ इति । दादेरित्यनुवर्तते नेति निवृत्तम् ॥

दादेरित्युच्यते तत्रेदं न सिध्यति । अधोक् । क तर्हि स्यात् । मा स्म धोक् । नैष दोषः । धातोरिति नैषा दादिसमानाधिकरणा षष्ठी । दादेर्धातोरिति । का तर्हि । अवयवयोगैषा षष्ठी । धातोर्यो दादिरवयव इति ॥ सा चावश्यमवयवयोगा षष्ठी विज्ञेयोत्तरार्था । किं प्रयोजनम् । एकाचो बशो भष्झषन्तस्य स्ध्वोः [८. २. ३७] इतीहापि यथा स्यात् । गर्दभयतेरप्रत्ययो गर्धबिति ॥ यद्यवयवयोगा षष्ठी दोग्धा दोग्धुमित्यत्र न प्राप्नोति । एषोऽपि व्यपदेशिवद्भावेन धातोर्दादिरवयवो भवति ॥

हृग्रहोर्भश्छन्दसि हस्य ॥ १ ॥

हृग्रहोश्छन्दसि हस्य भत्वं वक्तव्यम् । गर्दभेन संभरति[2] । मरुदस्य ग्रभीता । सामिधेन्यो जभ्रिरे । उद्ग्राभं च निग्राभं च[3] ब्रह्म देवा अवीवृधन् ॥*

दधस्तथोश्च ॥ ८ । २ । ३८ ॥

किमर्थश्चकारः । स्ध्वोरित्येतदनुकृष्यते[4] । नैतदस्ति प्रयोजनम् । सिद्धं स्ध्वोः पूर्वेणैव । न सिध्यति । किं कारणम् । अबशादित्वात् । ननु च जश्त्वे कृते बशादिः[5] । असिद्धं जश्त्वं तस्यासिद्धत्वान्न बशादिः । एवं तर्हि सिद्धकाण्डे पठितमभ्यासजश्त्वचर्त्वमेत्त्वतुकोरिति[6] । एत्त्वतुकोर्ग्रहणं न करिष्यते । अभ्यासजश्त्वचर्त्वं सिद्धमित्येव । एवमप्यझषन्तत्वान्न प्राप्नोति । लोपे[7] कृते झषन्तः । स्थानिवद्भावान्न झषन्तः ॥ अत उत्तरं पठति ।

दधस्तथोरनुकर्षणानर्थक्यं स्थानिवत्प्रतिषेधात् ॥ १ ॥

दधस्तथोरनुकर्षणमनर्थकम् । किं कारणम् । स्थानिवत्प्रतिषेधात् । प्रतिषिध्यतेऽत्र स्थानिवद्भावः पूर्वत्रासिद्धे न स्थानिवदिति[8] ॥ स चावश्यं प्रतिषेध आश्रयितव्यः ।

इतरथा ह्यलोपे प्रतिषेधः ॥ २ ॥

यो हि मन्यतेऽनुकर्षणसामर्थ्यान्मेऽत्र भवत्यलोपे तेन प्रतिषेधो वक्तव्यः स्यात् । दधाति दध्मासि ॥

---

* [V. M. om. वा द्रुहमुहष्णुहष्णिहाम् (३३) ; नहो धः (३४) ; आहस्थः (३५) ; व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः (३६) ; एकाचो बशो भष् झषन्तस्य स्ध्वोः (३७)].

[1] अपवादो वचनप्रामाण्यात् ८. २. १ वा. २.

[2] तै. सं. ५. १. ५. ५.

[3] वा. सं. १७. ६४ ; तै. सं. १. १. १३.

[4] एकाचो बशो भष् झषन्तस्य स्ध्वोः ८. २. ३७.

[5] झलां जश् झशि ८. ४. ५३.

[6] (स्वरितो वानुदात्ते पदादौ ८. २. ६.) अभ्यासजश्त्वचर्त्वमेत्त्वतुकोः ८. २. ६ वा. १३.

[7] श्नाभ्यस्तयोरातः ६. ४. ११२.

[8] पूर्वत्रासिद्धे च १. १. ५८ वा. ३.

तथोश्चापि ग्रहणं शक्यमकर्तुम् । कथम् । झलि झषन्तस्येत्युच्यते तथोश्चायं झलि झषन्तो भवति नान्यत्र ॥

अथाप्येतन्नास्ति पूर्वत्रासिद्धे न स्थानिवदित्येवमपि नैवार्थोऽनुकर्षणार्थेन चकारेण नापि तथोर्ग्रहणेन । आनन्तर्यमिहाश्रीयते झलि झषन्तस्येति । क्वचिच्च संनिपातकृतमानन्तर्यं शास्त्रकृतमनानन्तर्यं क्वचिन्नैव संनिपातकृतं नापि शास्त्रकृतम् । लोपे संनिपातकृतमानन्तर्यं शास्त्रकृतमनानन्तर्यमलोपे नैव संनिपातकृतं नापि शास्त्रकृतम् । यत्र कुतश्चिदेवानन्तर्यं तदाश्रयिष्यामः ॥*

झषस्तथोर्धोऽधः ॥ ८ । २ । ४० ॥

अध इति किमर्थम् । धत्तः । धत्थः ॥ अध इति शक्यमकर्तुम् । कस्मान्न भवति धत्तः धत्थ इति । जश्त्वे[1] योगविभागः करिष्यते । इदमस्ति दधस्तथोश्च [८. २. ३८] इति । ततो वक्ष्यामि झलां जशः । झलां जशो भवन्ति दधस्तथोः । ततोऽन्ते । अन्ते च झलां जशो भवन्तीति । तत्र जश्त्वे कृतेऽझषन्तत्वान्न भविष्यति ॥*

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये ऽष्टमस्याध्यायस्य द्वितीये पादे प्रथममाह्निकम् ॥

---

* [V. M. om. झलां जशोन्ते (३९)].

** [V. M. om. षढोः कः सि (४१)].

[1] झलां जशोन्ते ८. २. ३९.

रदाभ्यां निष्ठातो नः पूर्वस्य च दः ॥ ८ । २ । ४२ ॥

रदाभ्यामिति किमर्थम् । चरितम् मुदितम् । ननु च रदाभ्यामित्युच्यमानेऽप्यत्र प्राप्नोति । अत्रापि रेफदकाराभ्यां परा निष्ठा । न रेफदकाराभ्यां निष्ठा विशेष्यते । किं तर्हि । तकारो विशेष्यते । रेफदकाराभ्यामुत्तरस्य तकारस्य नो भवति स चेन्निष्ठाया इति ॥

अथ पूर्वग्रहणं किमर्थम् ।

निष्ठादेशे पूर्वग्रहणं परस्यादेशप्रतिषेधार्थम् ॥ १ ॥

निष्ठादेशे पूर्वग्रहणं क्रियते परस्यादेशो मा भूदिति । भिन्नवद्भ्याम् भिन्नवद्भिः ॥

पञ्चमीनिर्दिष्टाद्धि परस्य ॥ २ ॥

पञ्चमीनिर्दिष्टाद्धि परस्येति[1] परस्य प्राप्नोति ॥

वृद्धिनिमित्तात्प्रतिषेधः ॥ ३ ॥

वृद्धिनिमित्तात्प्रतिषेधो वक्तव्यः । किं प्रयोजनम् ।

प्रयोजनं कार्तिक्षैतिफौल्लयः ॥ ४ ॥

कार्तिरिति वृद्धौ कृतायां[2] रदाभ्यामिति नत्वं प्राप्नोति । क्षैतिरिति वृद्धौ कृतायां क्षियो दीर्घात् [८. २. ४६] इति नत्वं प्राप्नोति । फौल्लिरिति वृद्धौ कृतायामुदुपधत्वसंनियोगेन लत्वमुच्यमानं[3] न प्राप्नोति ॥ अथोच्यमानेऽपि प्रतिषेधे वृद्धिनिमित्तादिति कथमिदं विज्ञायते । वृद्धिरेव निमित्तं वृद्धिनिमित्तम् वृद्धिनिमित्तादिति । आहोस्विद्वृद्धिर्निमित्तमस्य सोऽयं वृद्धिनिमित्तः वृद्धिनिमित्तादिति । किं चातः । यदि विज्ञायते वृद्धिरेव निमित्तं वृद्धिनिमित्तम् वृद्धिनिमित्तादिति क्षैतिः संगृहीतः कार्तिरसंगृहीतः । अथ विज्ञायते वृद्धिर्निमित्तमस्य सोऽयं वृद्धिनिमित्तः वृद्धिनिमित्तादिति कार्तिः संगृहीतः क्षैतिरसंगृहीतः । उभयथा च फौल्लिरसंगृहीतः । यथेच्छसि तथास्तु । अस्तु तावद्वृद्धिरेव निमित्तं वृद्धिनिमित्तम् वृद्धिनिमित्तादिति । ननु चोक्तं क्षैतिः संगृहीतः कार्तिरसंगृहीत इति । कार्तिश्च संगृहीतः । कथम् । वृद्धिर्भवति गुणो भवतीति रेफशिरा गुणवृद्धिसंज्ञकोऽभिनिर्वर्तते । अथवा पुनरस्तु

---

[1] तस्मादित्युत्तरस्य १. १. ६७. [2] अत इञ् ; तद्धितेष्वचामादेः ४. १. ९५ ; ७. २. ११७.
[3] अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः ८. २. ५५.

वृद्धिर्निमित्तमस्य सोऽयं वृद्धिनिमित्तः वृद्धिनिमित्तादिति । ननु चोक्तं कार्तिः संगृहीतः क्षैतिरसंगृहीत इति । क्षैतिश्च संगृहीतः । कथम् । यत्तद्वृद्धिशास्त्रं[१] तस्मिन्वृद्धिशब्दो वर्तते ॥ स तर्हि प्रतिषेधो वक्तव्यः ।

न वा बहिरङ्गलक्षणत्वात् ॥ ५ ॥

न वा वक्तव्यम् । किं कारणम् । बहिरङ्गलक्षणत्वात् । बहिरङ्गा वृद्धिः । अन्तरङ्गं नत्वम् । असिद्धं बहिरङ्गमन्तरङ्गे । एवं च कृत्वा लत्वमपि सिद्धं भवति फौल्लिरिति ॥*

ल्वादिभ्यः ॥ ८ । २ । ४४ ॥

ऋकारल्वादिभ्यः क्तिन्निष्ठावत् ॥ १ ॥

ऋकारल्वादिभ्यः क्तिन्निष्ठावद्भवतीति वक्तव्यम् । कीर्णिः गीर्णिः । लूनिः धूनिः ॥

दुग्वोर्दीर्घश्च ॥ २ ॥

दुग्वोर्दीर्घश्चेति वक्तव्यम् । आदूनः विगूनः ॥

पूञो विनाशे ॥ ३ ॥

पूञो विनाश इति वक्तव्यम् । पूना यवाः । विनाश इति किमर्थम् । पूतं धान्यम् ॥

सिनोतेर्ग्रासकर्मकर्तृकस्य ॥ ४ ॥

सिनोतेर्ग्रासकर्मकर्तृकस्येति वक्तव्यम् । सिनो ग्रासः । ग्रासकर्मकर्तृकस्येति किमर्थम् । सिता पाशेन सूकरी ॥**

क्षियो दीर्घात् ॥ ८ । २ । ४६ ॥

दीर्घादिति किमर्थम् । अक्षितमसि[२] मा[३] मे क्षेष्ठाः ॥ दीर्घादिति शक्यमकर्तुम् । कस्मान्न भवति अक्षितमसि मा मे क्षेष्ठा इति । निर्देशादेवेदमभिव्यक्तं दीर्घस्य ग्रहणमिति । यदि ह्रस्वस्य ग्रहणं स्यात्क्षेरित्येव ब्रूयात् ॥ नात्र निर्देशः प्रमाणं

---

* [V. M. om. संयोगादेरातो धातोर्यण्वतः (४३)].

** [V. M. om. ओदितश्च (४५)].

[१] तद्धितेष्वचामादेः ; मृजेर्वृद्धिः ७. २. ११७ ; ११४.

[२] निष्ठायामण्यदर्थे ६. ४. ६०.

[३] तै. सं. १. ६. ५. १.

शक्यं कर्तुम् । यथैवात्राप्राप्ता विभक्तिरेवमियङादेशोऽपि । नात्राप्राप्ता विभक्तिः । सिद्धात्र विभक्तिः प्रातिपदिकादिति[1] । कथं प्रातिपदिकसंज्ञा । अर्थवत्प्रातिपदिकमिति[2] । ननु चाधातुरिति प्रतिषेधः प्राप्नोति । नैष धातुर्धातोरेषोऽनुकरणः । यद्यनुकरण इयङादेशो[3] न प्राप्नोति । प्रकृतिवदनुकरणं भवतीत्येवमियङादेशो भविष्यति । यदि प्रकृतिवदनुकरणं भवतीत्युच्यते स्वाद्युत्पत्तिर्न प्राप्नोति । एवं तर्ह्यातिदेशिकानां स्वाश्रयाण्यपि न निवर्तन्ते ॥ अथाप्येतन्नास्त्यातिदेशिकानां स्वाश्रयाण्यपि न निवर्तन्त इत्येवमपि न दोषः । अवश्यमत्र सर्वतो नैर्देशिकी विभक्तिर्वक्तव्या । तद्यथा । नेर्विशः [१. ३. १७] परिव्यवेभ्यः क्रियः [१८] विपराभ्यां जेः [१९] इति ॥ अथाप्येतन्नास्ति प्रकृतिवदनुकरणं भवतीत्येवमपि न दोषः । धातोरजादौ यद्रूपं तदनुक्रियते ॥*

अञ्चोऽनपादाने ॥ ८ । २ । ४८ ॥

अञ्चेर्नत्वे व्यक्तप्रतिषेधः ॥ १ ॥

अञ्चेर्नत्वे व्यक्तस्य प्रतिषेधो वक्तव्यः । व्यक्तमनृतं कथयतीति ॥

अञ्जिविज्ञानात्सिद्धम् ॥ २ ॥

नैतदञ्चे रूपम् । अञ्जेरेतद्रूपम् ॥ अञ्चत्यर्थो वै गम्यते । कः पुनरञ्चत्यर्थः । अञ्चतिः प्रकाशने वर्तते । अञ्चितं गच्छति । प्रकाशयत्यात्मानमिति गम्यते । न वै लोके ऽञ्चितं गच्छतीति प्रकाशनं गम्यते । किं तर्हि । समाधानं गम्यते । समाहितो भूत्वा गच्छतीति । एवं तर्ह्यञ्चतेरङ्कोऽङ्कश्च प्रकाशनम् । अङ्किता गाव इत्युच्यते ऽन्याभ्यो गोभ्यः प्रकाश्यन्ते ॥

अञ्चत्यर्थ इति चेदञ्जेस्तदर्थत्वात्सिद्धम् ॥ ३ ॥

अञ्चत्यर्थ इति चेदञ्जिरप्यञ्चत्यर्थे वर्तते । कथं पुनरन्यो नामान्यस्यार्थे वर्तते । कथमञ्जिरञ्चत्यर्थे वर्तते । अनेकार्था अपि धातवो भवन्ति । अस्ति पुनः क्वचिदन्यत्राप्यञ्जिरञ्चत्यर्थे वर्तते । अस्तीत्याह । अञ्जेरञ्जनमञ्जनं च प्रकाशनम् । अङ्क्तेऽक्षिणी इत्युच्यते यत्तत्सितं चासितं चैतत्प्रकाशयति । तथाञ्जेर्व्यञ्जनं व्यञ्जनं च

---

* [V. M. om. ञ्योऽस्पर्शे (४७)].

[1] ङ्याप्प्रातिपदिकात् ४. १. १; स्वौजसमौट्... ङ्योस्सुप् ४. १. २. [2] अर्थवदधातुरप्रत्ययः प्रातिपदिकम् १. २. ४५. [3] आचि श्नुधातुवाभ्रुवां ध्वोरियङुवङौ ६. ४. ७७.

प्रकाशनम् । यत्तत्स्नेहेन मधुरेण च जडीकृतानामिन्द्रियाणां स्वस्मिन्नात्मनि व्यवस्थापनं स रागस्तद् व्यञ्जनम् । अन्वर्थं खल्वपि निर्वचनम् । व्यज्यतेऽनेनेति व्यञ्जनमिति ॥*

निर्वाणोऽवाते ॥ ८ । २ । ५० ॥

अवाताभिधाने ॥ १ ॥

अवाताभिधान इति वक्तव्यम् । इहापि यथा स्यात् । निर्वाणोऽग्निर्वातेन । निर्वाणः प्रदीपो वातेनेति ॥**

अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः ॥ ८ । २ । ५५ ॥

अनुपसर्गादित्युच्यते तत्रेदं न सिध्यति परिकृशामिति ।

कृशेः क एष विहित इगुपधात्

नैतन्निष्ठान्तम् । किं तर्हि । कृश एष इगुपधात्को विहितः[1] ॥

स्वरे हि दोषो भवति परिकृशे ।

नैवं शक्यम् । इह हि परिकृश इति स्वरे दोषः स्यात् । अन्तस्थाथघञ्क्ताजबित्रकाणाम् । [६. २. १४३ ; १४४] इत्येष स्वरः प्रसज्येत ॥

पदस्य लोपो विहित इति मतम्

एवं तर्हि पदस्य लोपो द्रष्टव्यः । पर्यागतः कार्श्येन परिकृशः ॥

जगत्यनूना भवति हि रुचिरा ॥

फलेर्लत्व उत्पूर्वस्योपसंख्यानम् ॥ १ ॥

फलेर्लत्व उत्पूर्वस्योपसंख्यानं कर्तव्यम् । उत्फुल्लोऽनृतं कथयति ॥

अल्पल्पमिदमुच्यत उत्पूर्वादिति । उत्फुल्लसंफुल्लयोरिति वक्तव्यम् । उत्फुल्लः संफुल्लः ॥

कृशेः क एष विहित इगुपधा-
त्स्वरे हि दोषो भवति परिकृशे ।
पदस्य लोपो विहित इति मतं
जगत्यनूना भवति हि रुचिरा ॥

---

* [V. M. om. दिवोऽविजिगीषायाम् (४९)].

** [V. M. om. शुषः कः (५१) ; पचो वः (५२) ; क्षायो मः (५३) ; प्रस्त्योन्यतरस्याम् (५४)].

[1] इगुपधज्ञाप्रीकिरः कः ३. १. १३५.

नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम् ॥ ८ । २ । ५६ ॥

किमयं विधिराहोस्वित्प्रतिषेधः । किं चातः । यदि तावद्विधिर्नकारग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । रदाभ्यां निष्ठातो नः पूर्वस्य च दः [४२] इति । तद्वा अनेकेन निपातनेन व्यवच्छिन्नं न शक्यमनुवर्तयितुम् । अथ प्रतिषेधो ह्रीग्रहणमनर्थकं न ह्येतस्माद्विधिरस्ति ॥ यथेच्छसि तथास्तु । अस्तु तावद्विधिः । ननु चोक्तं नकारग्रहणं कर्तव्यम् न कर्तव्यम् प्रकृतमनुवर्तते क्व प्रकृतम् रदाभ्यां निष्ठातो नः पूर्वस्य च द इति तद्वा अनेकेन निपातनेन व्यवच्छिन्नं न शक्यमनुवर्तयितुमिति । संबन्धमनुवर्तिष्यते । अथवा क्रियते न्यास एव । द्विनकारको निर्देशः । नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्यां न्न ध्याख्यापॄमूर्छिमदाम् [५७] इति ॥ अथवा पुनरस्तु प्रतिषेधः । ननु चोक्तं ह्रीग्रहणमनर्थकं न ह्येतस्माद्विधिरस्तीति । नानर्थकम् । एतदेव ज्ञापयत्याचार्यो भवत्येतस्माद्विधिरिति यदयं ह्रीग्रहणं करोति ॥*

वित्तो भोगप्रत्यययोः ॥ ८ । २ । ५८ ॥

बहव इमे विदयः पठ्यन्ते । तत्र न ज्ञायते कस्य नित्यं नत्वं कस्य विभाषा[1] कस्य प्रतिषेधः कस्येडिति ॥ अत उत्तरं पठति ।

यस्य विदेः श्नशकौ तपरत्वे तनवचने तद्‌ वाप्रतिषेधौ ।

श्नविकरणस्य विभाषा शविकरणस्य प्रतिषेधः ॥

श्यविकरणान्नविधिश्छिदितुल्यः

श्यन्विकरणाद्विदेर्नविधिश्छिदिना तुल्यः ॥

लुग्विकरणो वालि पर्यवपन्नः ॥

लुग्विकरणो विदिर्वलादौ[2] पर्यवपन्नः ॥

एष एवार्थः ।

ययोर्विदोः श्नशावुक्तौ तयोर्नत्वस्य वानञौ ।
ययोस्तु श्यँल्लुकौ ताभ्यां छिदिवच्चेट् च इष्यते ॥

अपर आह ।

---

* [V. M. om. न ध्याख्यापॄमूर्छिमदाम् (५७)].

[1] नुदविदोन्दत्राघ्राह्रीभ्योन्यतरस्याम् ८. २. ५६.

[2] विभाषा मृजिदृशोः ७. २. ६५.

वेत्तेस्तु विदितो निष्ठा विद्यतेर्विन्न इष्यते ।
विन्त्तेर्विन्नश्च वित्तश्च वित्तो भोगेषु विन्दतेः ॥

भित्तं शकलम् ॥ ८ । २ । ५९ ॥

भित्तं शकलमित्युच्यते तत्रेदं न सिध्यति भित्तं भिन्नमिति । नैष दोषः । सर्वत्रैवात्र भिदिर्विदारणसामान्ये वर्तते तत्रावश्यं विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः । भिन्नम् किम् भित्तमिति ॥

तत्वमभिधायकं चेच्छकलस्यानर्थकः प्रयोगः स्यात् ।
शकलेन चाप्यभिहिते न भवति तत्वं निगमयामः ॥*

क्विन्प्रत्ययस्य कुः ॥ ८ । २ । ६२ ॥

प्रत्ययग्रहणं किमर्थं न क्विनः कुरित्येवोच्येत । क्विनः कुरितीयत्युच्यमाने वकारस्यैव कुत्वं प्रसज्येत । ननु च लोपे[1] कृते न भविष्यति । अनवकाशं कुत्वं लोपं बाधेत । सावकाशं कुत्वम् । कोऽवकाशः । अनन्त्यः । कथं पुनः सत्यन्त्येऽनन्त्यस्य कुत्वं स्यात् । आचार्यप्रवृत्तिर्ज्ञापयति नान्त्यस्य कुत्वं भवतीति यदयं क्विनः कुरिति कवर्गनिर्देशं करोति । इतरथा हि तद्गुणमेवायं निर्दिशेत् ॥ इदं तर्हि प्रयोजनं येभ्यः क्विन्प्रत्ययो विधीयते तेषामन्यप्रत्ययान्तानामपि पदान्ते कुत्वं यथा स्यात् । मा नो अस्राक् । मा नो अद्राक्[2] ॥

क्विनः कुरिति वक्तव्ये प्रत्ययग्रहणं कृतम् ।
क्विन्प्रत्ययस्य सर्वत्र पदान्ते कुत्वमिष्यते ॥**

अहन् ॥ ८ । २ । ६८ ॥

रुविधावह्नो रूपरात्रिरथंतरेषूपसंख्यानम् ॥ १ ॥

रुविधावह्नो रूपरात्रिरथंतरेषूपसंख्यानं कर्तव्यम् । अहोरूपम् अहोरात्रः अहोरथंतरं साम ॥

---

* [V. M. om. ऋणमाधमर्ण्ये (६०); नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि छन्दसि (६१)].

** [V. M. om. नशेर्वा (६३); मो नो धातोः (६४); म्वोश्च (६५); ससजुषो रुः (६६); अवयाः श्वेतवाः पुरोडाश्च (६७)].

[1] वेरपृक्तस्य ६. १. ६७.

[2] ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च ३. २. ५९; त्यदादिषु दृशोऽनालोचने कञ् च ३. २. ६०.

रोऽसुपि ॥ ८ । २ । ६९ ॥

असुपि रादेश उपसर्जनसमासे प्रतिषेधोऽलुकि ॥ १ ॥

असुपि रादेश उपसर्जनसमासे ऽलुकि प्रतिषेधो वक्तव्यः । दीर्घाहा निदाघ इति ॥

सिद्धं तु सुपि प्रतिषेधात् ॥ २ ॥

सिद्धमेतत् । कथम् । सुपि प्रतिषेधात् । प्रसज्यायं प्रतिषेधः सुपि नेति[1] ॥ इहापि तर्हि न प्राप्नोति । अहर्ददाति । अहर्भुङ्क्ते इति ।

लुकि चोक्तम् ॥ ३ ॥

किमुक्तम् । अह्नो रविधौ लुमता लुप्ते प्रत्ययलक्षणं न भवतीति[2] ॥

अम्नरूधरवरित्युभयथा छन्दसि ॥ ८ । २ । ७० ॥

छन्दसि भाषायां च प्रचेतसो राजन्युपसंख्यानम् ॥ १ ॥

छन्दसि भाषायां च प्रचेतसो राजन्युपसंख्यानं कर्तव्यम् । प्रचेतो राजन् । [3]प्रचेता[4] राजन् ॥

अहरादीनां पत्यादिषूपसंख्यानं कर्तव्यम् । अहर्पतिः[5] अहःपतिः । अहर्पुत्रः अहःपुत्रः । गीर्पतिः गीःपतिः ॥*

वसुस्रंसुध्वंस्वनडुहां दः ॥ ८ । २ । ७२ ॥

इह कस्मान्न भवति । पपिवान् तस्थिवानिति । सस्येति[6] वर्तते । एवमप्यत्र प्राप्नोति । लोपे[7] कृते न भविष्यति । अनवकाशं दत्वं लोपं बाधेत । सावकाशं दत्वम् । कोऽवकाशः । पपिवद्भ्याम् पपिवद्भिरिति । अत्रापि रुः प्राप्नोति । तद्यथैव रुं बाधत एवं लोपमपि बाधेत । न बाधते । किं कारणम् । येन नाप्राप्ते तस्य बाधनं भवति न चाप्राप्ते रौ दत्वमारभ्यते लोपे पुनः प्राप्ते चाप्राप्ते च ॥ यदि तर्हि

---

* [V. M. om. भुवश्च महाव्याहृतेः (७१)].

[1] हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् ; प्रत्ययलोपे प्रत्ययलक्षणम् ६. १. ६८ ; १. १. ६२. [2] अह्नो रविधौ १. १. ६३ वा. ५; स्वमोर्नपुंसकात् ७. १. २३. [3] ऋ. सं. १. २४. १४. [4] रो रि ; ढ्रलोपे पूर्वस्य दीर्घोऽणः ८. ३. १४ ; ६. ३. १११. [5] वासं ९. २०. [6] ससजुषो रुः ८. २. ६६. [7] संयोगान्तस्य लोपः ८. २. २३.

सस्येति वर्तते अनडुद्भ्याम् अनडुद्भिरित्यत्र न प्राप्नोति । वचनादनडुहि भविष्यति ॥ यद्येवम्

अनडुहो दत्वे नकारप्रतिषेधः ॥ १ ॥

अनडुहो दत्वे नकारस्य प्रतिषेधो वक्तव्यः । अनड्वान् ॥

सिद्धं तु प्रतिपदविधानान्नुम ॥ २ ॥

सिद्धमेतत् । कथम् । नुमः[1] प्रतिपदविधानसामर्थ्याद्दत्वं न भविष्यति ॥ यदि तर्हि यद्यदनडुहः प्राप्तं तत्तन्नुमः प्रतिपदविधानसामर्थ्याद् बाध्यते रुत्वमपि न प्राप्नोति । अनड्वांस्तत्रेति[2] । नैष दोषः । यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यते । दत्वं च प्रति नुमः प्रतिपदविधिरनर्थको रोः पुनर्निमित्तमेव ॥*

उपधायां च ॥ ८ । २ । ७८ ॥

किमर्थमिदमुच्यते न हलीत्येव[3] सिद्धम् । न सिध्यति । धातोरिति तत्र वर्तते तत्र रेफवकाराभ्यां धातुर्विशेष्यते । रेफवकारान्तस्य धातोरिति । किं पुनः कारणं पूर्वस्मिन्योगे रेफवकाराभ्यां धातुर्विशेष्यते । इह मा भूत् । अग्निर्वायुरिति ॥ एवं तर्हि पूर्वस्मिन् योगे यद्धातुग्रहणं तदुत्तरत्र[4] निवृत्तम् । एवमपि कुर्कुरः मुर्मुर इत्यत्रापि प्राप्नोति ॥ एवं तर्ह्यनुवर्तते तत्र धातुग्रहणं न तु रेफवकाराभ्यां धातुर्विशेष्यते । किं तर्हि । इग्विशेष्यते । रेफवकारान्तस्येको धातोरिति ॥ एवमपि कुर्कुरीयति मुर्मुरीयतीत्यत्र प्राप्नोति । तस्माद्धातुरेव विशेष्यो धातौ च विशेष्यमाण उपधायां चेति वक्तव्यम् ॥

उपधादीर्घत्वेऽभ्यासजिव्रिचतुर्णां प्रतिषेधः ॥ १ ॥

उपधादीर्घत्वेऽभ्यासजिव्रिचतुर्णां प्रतिषेधो वक्तव्यः । रिर्यतुः रिर्युः । संविव्यतुः संविव्युः । जिव्रिः । चतुर्यिता चतुर्यितुम् ॥

उणादिप्रतिषेधश्च ॥ २ ॥

उणादीनां च प्रतिषेधो वक्तव्यः । किर्योः गिर्योरिति ॥

---

* [V. M. om. तिप्यनस्तेः (७३); सिपि धातो रुर्वा (७४); दश्च (७५); र्वोरुपधाया दीर्घ इकः (७६); हलि च (७७)].

[1] सावनडुहः ७. १. ८२.

[2] नश्छव्यप्रशान् ८. ३. ७.

[3] हलि च ८. २. ७७.

[4] सिपि धातो रुर्वा ८. २. ७४.

[5] र्वोरुपधाया दीर्घ इकः ८. २. ७६.

अभ्यासप्रतिषेधस्तावन्न वक्तव्यः । हलीत्युच्यते न चात्र हलादिं पश्यामः । यणादेशे कृते प्राप्नोति । स्थानिवद्भावान्न भविष्यति । प्रतिषिध्यतेऽत्र स्थानिवद्भावो दीर्घविधिं प्रति न स्थानिवदिति[1] । नैषोऽस्ति प्रतिषेधः । उक्तमेतत् प्रतिषेधे स्वरदीर्घयलोपेषु लोपाजादेश इति[2] ॥ [3]जिव्रिप्रतिषेधश्च न वक्तव्यः । उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥ चतुर्यिता चतुर्यितुमिति सुपि नेति[4] वर्तते । यद्येवं गीर्भ्याम् गीर्भिरित्यप्रसिद्धिः[5] । न सुपो विभक्तिविपरिणामाद् गीर्भ्याम् गीर्भिरित्यदोषः ॥ उणादिप्रतिषेधो वक्तव्य इति परिहृतमेतदुणादयो ऽव्युत्पन्नानि प्रातिपदिकानीति ॥*

अदसोऽसेर्दादु दो मः ॥ ८ । २ । ८० ॥

अदसोऽनोस्रेः ॥ १ ॥

अदसोऽनोस्रेरिति वक्तव्यम् । किमिदमनोस्रेरिति । अनोकारस्यासकारस्यारेफकस्येति । अनोकारस्य । अदोऽत्र । असकारस्य । अदस्यति । अरेफकस्य । अदः[6] ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । क्रियते न्यास एव । अविभक्तिको निर्देशः । अदस् ओ इति । ओकारात्परः प्रतिषेधः पूर्वभूतः[7] । ततः सकारः । ततो रेफ इति ॥ अथवा नैवं विज्ञायते अदसोऽसकारस्येति । कथं तर्हि । अकारोऽस्य सकारस्य[8] सोऽयमसिः असेरिति ॥ यद्येवममुमुयङ्ङिति न सिध्यति अदद्र्यङ्ङिति प्राप्नोति[9] । अदमुयङ्ङिति भवितव्यमनन्त्यविकारेऽन्त्यसदेशस्य कार्यं भवतीति ॥

अदसोऽद्रेः पृथङ् मुत्वं केचिदिच्छन्ति लत्ववत्[10] ।
केचिदन्त्यसदेशस्य नेत्येके ऽसेर्हि दृश्यते ॥

तत्र पदाधिकारादपदान्तस्याप्राप्तिः ॥ २ ॥

तत्र पदाधिकारादपदान्तस्य न प्राप्नोति[11] । अमुया अमुयोरिति ॥

सिद्धं तु सकारप्रतिषेधात् ॥ ३ ॥

सिद्धमेतत् । कथम् । सकारप्रतिषेधात् । यदयमसेरिति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्योऽपदान्तस्यापि भवतीति ॥

---

* [V. M. om. न भकुर्छुराम् (७९)].

[1] न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु १. १. ५८.

[2] प्रतिषेधे स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत् १. १. ५८ वा. १.

[3] जीर्यतेः क्रिन् रश्च वः उणादिसूत्र ७२७ (५. ४९).

[4] रोऽसुपि ८. २. ६९.

[5] र्वोरुपधाया दीर्घ इकः ८. २. ७६.

[6] ससजुषो रुः; खरवसानयोर्विसर्जनीयः ८. २. ६६ ; ८. ३. १५.

[7] एङः पदान्तादति ६. १. १०९.

[8] त्यदादीनामः ७. २. १०२.

[9] विश्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये ६. ३. ९२.

[10] कृपो रो लः; रीगृदुपधस्य च ८. २. १८; ७. ४. ९०.

[11] पदस्य ८. १. १६.

अथ दाद्ग्रहणं किमर्थम् ।

दाद्ग्रहणमन्त्यप्रतिषेधार्थम् ॥ ४ ॥

दाद्ग्रहणं क्रियतेऽन्त्यप्रतिषेधार्थम् । अलोऽन्त्यस्य मा भूदिति । अमुया अमुयोरिति ॥

एत ईद्बहुवचने ॥ ८ । २ । ८१ ॥

ईत्त्वं बहुवचनान्तस्य ॥ १ ॥

ईत्त्वं बहुवचनान्तस्येति वक्तव्यम् । बहुवचन इतीयत्युच्यमान इहैव स्यात् । अमीभिः अमीषु । इह न स्यात् । अमी अत्र । अमी आसते ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । नेदं पारिभाषिकस्य[1] बहुवचनस्य ग्रहणम् । किं तर्हि । अन्वर्थग्रहणमेतत् । बहूनामर्थानां वचनं बहुवचनम् बहुवचन इति ॥

वाक्यस्य टेः प्लुत उदात्तः ॥ ८ । २ । ८२ ॥

वाक्याधिकारः किमर्थः ।

वाक्याधिकारः पदनिवृत्त्यर्थः ॥ १ ॥

वाक्याधिकारः क्रियते पदनिवृत्त्यर्थः । पदाधिकारो[2] निवर्त्यते ॥ न हि काको वाश्यत इत्यधिकारा निवर्तन्ते । दोषः खल्वपि स्याद्यदि वाक्याधिकारः पदाधिकारं निवर्तयेत् । इष्यन्त एवोत्तरत्र पदकार्याणि तानि न सिध्यन्ति । नश्छव्यप्रशान् [८. ३. ७] इति ॥ पदनिवृत्त्यर्थमिति नैवं विज्ञायते पदस्य निवृत्त्यर्थं पदनिवृत्त्यर्थमिति । किं तर्हि । पदे निवृत्त्यर्थं पदनिवृत्त्यर्थमिति । वाक्ये यावन्ति पदानि तेषां सर्वेषां टेः प्लुतः प्राप्नोति । इष्यते च वाक्यपदयोरन्त्यस्य स्यादिति तच्चान्तरेण यत्नं न सिध्यतीत्येवमर्थो वाक्याधिकारः ॥

अथ टिग्रहणं किमर्थम् ।

टिग्रहणमलोऽन्त्यनियमे व्यञ्जनान्तार्थम् ॥ २ ॥

टिग्रहणं क्रियते ऽलोऽन्त्यनियमे[3] व्यञ्जनान्तस्यापि यथा स्यात् । अग्निची३त् सोमसू३त् ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति ।

---

[1] सुपः १. ४. १०३. [2] पदस्य ८. १. १६. [3] अलोन्त्यस्य १. १. ५२ ; अचश्च १. २. २८.

सर्वादेशप्रसङ्गस्तु ॥ ३ ॥

सर्वादेशस्तु टेः प्लुतः प्राप्नोति । किं कारणम् । अच इति वचनादन्त्यस्य नान्त्यस्येति वचनादचो नोच्यते च प्लुतः स सर्वादेशः प्राप्नोति ॥

उक्तं वा ॥ ४ ॥

किमुक्तम् । ह्रस्वो दीर्घः प्लुत इति यत्र ब्रूयादच इत्येतत्तत्रोपस्थितं द्रष्टव्यमिति[1] ॥

प्रत्यभिवादेऽशूद्रे ॥ ८ । २ । ८३ ॥

अशूद्र इति किमर्थम् । कुशल्यसि तुषजक ॥ अत्यल्पमिदमुच्यतेऽशूद्र इति ।

[अशूद्रस्त्र्यसूयकेषु ॥ १ ॥]

अशूद्रस्त्र्यसूयकेष्विति वक्तव्यम् । तत्र शूद्र उदाहृतम् । स्त्रियाम् । गार्ग्यहं भोः आयुष्मती भव गार्गि । असूयके । स्थाल्यहं भोः आयुष्मानेधि स्थाली३न् । नैषा मम संज्ञा स्थालीति । किं तर्हि । दण्डिन्यायो मम विवक्षितः । स वक्तव्यः । स्थाल्यहं भोः आयुष्मानेधि स्थालिन् । न मम दण्डिन्यायो विवक्षितः । किं तर्हि । संज्ञा ममैषा । असूयकस्त्वमसि जाल्म न त्वं प्रत्यभिवादमर्हसि भिद्यस्व वृषल स्थालिन् ॥

भोराजन्यविशां वा ॥ २ ॥

भोराजन्यविशां वेति वक्तव्यम् । देवदत्तोऽहं भोः आयुष्मानेधि देवदत्त भो३ः । देवदत्त भोः । भोः । राजन्य । इन्द्रवर्माहं भोः आयुष्मानेधीन्द्रवर्मा३न् । इन्द्रवर्मन् । राजन्य । विट् । इन्द्रपालितोऽहं भोः आयुष्मानेधीन्द्रपालिता३ । इन्द्रपालित ॥

अपर आह । सर्वस्यैव नाम्नः प्रत्यभिवादे भोःशब्द आदेशो वक्तव्यः । देवदत्तोऽहं भोः आयुष्मानेधि भो३ः । आयुष्मानेधि देवदत्ता३ इति वा ॥

इह कस्मान्न भवति । देवदत्त कुशल्यसीति । इह किंचिदुच्यते किंचित्प्रत्युच्यते । अप्रधानमुच्यते प्रधानं प्रत्युच्यते । तत्र प्रधानस्थस्य टिसंज्ञकस्य प्लुत्या भवितव्यं न चात्र प्रधानस्थं टिसंज्ञम् ॥ इहापि तर्हि न प्राप्नोति । आधेयोऽग्नी३र्नाधेया३ इति[2] ।

---

[1] एवं तर्हि ह्रस्वो दीर्घः प्लुत इति यत्र ब्रूयादच इत्येतत्तत्रोपस्थितं द्रष्टव्यम् १. २. २८ वा २ महाभाष्य.

[2] विचार्यमाणानाम् ८. २. ९७.

नैतद्विचार्यत आधेयो नाधेयोऽग्निश्चेद्भवतीति । किं तर्हि । इहाग्निसाधना क्रिया विचार्यत आधेयोऽग्निर्नाधेय इति । यद्येवं द्वितीयोऽग्निशब्दस्य प्रयोगः प्राप्नोति । उक्तार्थानामप्रयोग इति न भविष्यति । यद्येवमाधेयशब्दस्यापि तर्हि द्वितीयस्य प्रयोगो न प्राप्नोत्युक्तार्थानामप्रयोगो नाम भवतीति । नैष दोषः । उक्तार्थानामपि प्रयोगो दृश्यते । तद्यथा । अपूपौ द्वावानय । ब्राह्मणौ द्वावानयेति ॥

दूराद्धूते च ॥ ८ । २ । ८४ ॥

दूराद्धूत इत्युच्यते दूरशब्दश्चायमनवस्थितपदार्थकः । तदेव हि कंचित्प्रति दूरं कंचित्प्रत्यन्तिकं भवति । एवं हि कश्चित्कंचिदाह । एष पार्श्वतः करकस्तमानयेति । स आह । उत्थाय गृहाण दूरं न शक्ष्यामीति । अपर आह । दूरं मथुरायाः पाटलिपुत्रमिति । स आह । न दूरमिदमन्तिकमिति । एवमेष दूरशब्दोऽनवस्थितपदार्थकस्तस्यानवस्थितपदार्थकत्वान्न ज्ञायते कस्यामवस्थायां प्लुत्या भवितव्यमिति ॥ एवं तर्हि ह्वयतिनायं निर्देशः क्रियते । ह्वयतिप्रसङ्गे यद्दूरम् । किं पुनस्तत् । यत्र प्राकृतात्प्रयत्नात्प्रयत्नविशेष उपादीयमाने संदेहो भवति श्रोष्यति न श्रोष्यतीति तद्दूरमिहावगम्यते ॥

हैहेप्रयोगे हैहयोः ॥ ८ । २ । ८५ ॥

हैहेग्रहणं किमर्थम् ।

हैहेप्रयोगे हैहेग्रहणं हैहयोः प्लुत्यर्थम् ॥ १ ॥

हैहेप्रयोगे हैहेग्रहणं क्रियते हैहयोः प्लुतिर्यथा स्यात् । देवदत्त है३ । देवदत्त हे३ । अक्रियमाणे हि हैहेग्रहणे तयोः प्रयोगेऽन्यस्य स्यात् ॥ अथ प्रयोगग्रहणं किमर्थम् ।

प्रयोगग्रहणमर्थवद्ग्रहणेऽनर्थकार्थम् ॥ २ ॥

प्रयोगग्रहणं क्रियतेऽर्थवद्ग्रहणेऽनर्थकयोरपि यथा स्यात् । देवदत्त है३ । देवदत्त हे३ ॥ अथ पुनर्हैहेग्रहणं किमर्थम् ।

पुनर्हैहेग्रहणमनन्त्यार्थम् ॥ ३ ॥

पुनर्हैहेग्रहणं क्रियतेऽनन्त्ययोरपि यथा स्यात् । है३ देवदत्त । हे३ देवदत्तेति ॥

गुरोरनृतोऽन्त्यस्याप्येकैकस्य प्राचाम् ॥ ८ । २ । ८६ ॥

गुरोः प्लुतविधाने लघोरन्त्यस्य प्लुतप्रसङ्गोऽन्येन विहितत्वात् ॥ १ ॥

गुरोः प्लुतविधाने लघोरन्त्यस्य प्लुतः प्राप्नोति । दे३वदत्त । किं कारणम् । अन्येन विहितत्वात् । अन्येन हि लक्षणेन लघोरन्त्यस्य प्लुतो विधीयते दूराद्धूते च [८. २. ८४] इति ॥

न वानन्त्यस्यापीति वचनमुभयनिर्देशार्थम् ॥ २ ॥

न वैष दोषः । किं कारणम् । अनन्त्यस्यापीति वचनमुभयनिर्देशार्थं भविष्यति । अनन्त्यस्यापि गुरोरन्त्यस्यापि टेरिति । ननु चैतद्गुर्वपेक्षं स्यात् । अनन्त्यस्यापि गुरोरन्त्यस्यापि गुरोरिति । नेत्याह । द्व्यपेक्षमेतत् । अनन्त्यस्यापि गुरोरन्त्यस्यापि टेरिति ॥ अथ प्राग्वचनं किमर्थम् ।

प्राग्वचनं विभाषार्थम् ॥ ३ ॥

प्राग्वचनं क्रियते विभाषा यथा स्यात् ॥

प्राग्वचनानर्थक्यं चैकैकस्येति वचनात् ॥ ४ ॥

प्राग्वचनमनर्थकम् । किं कारणम् । एकैकस्येति वचनात् । एकैकग्रहणं क्रियते तद्विभाषार्थं भविष्यति ॥ अस्त्यन्यदेकैकग्रहणस्य प्रयोजनम् । किम् । युगपत्प्लुतो मा भूदिति ॥ अनुदात्तं पदमेकवर्जम् [६. १. १५८] इति वचनान्नास्ति यौगपद्येन संभवः । असिद्धः प्लुतस्तस्यासिद्धत्वान्नियमो न प्राप्नोति । नैष दोषः । यद्यपीदं तत्रासिद्धं तत्त्विह सिद्धम् । कथम् । कार्यकालं संज्ञापरिभाषमिति यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम् । गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् । उपस्थितमिदं भवत्यनुदात्तं पदमेकवर्जमिति । इहापि तर्हि समावेशो न प्राप्नोति । देवदत्ता३[1] । सिद्धासिद्धावेतौ । यौ हि सिद्धावेवासिद्धावेव वा तयोर्नियमः । यस्तर्हि स्वरितप्लुतस्तेन समावेशः प्राप्नोति । स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेषु [८. २. १०३] इति । स्वरितेऽप्युदात्तोऽस्ति[2] । यस्तर्ह्यनुदात्तप्लुतस्तेन समावेशः प्राप्नोति । अनुदात्तं प्रश्नान्ताभिपूजितयोः [१००] इति ॥ तस्मात्प्राग्वचनं कर्तव्यम् ॥*

---

* [V. M. om. ओमभ्यादाने (८७)].

[1] आमन्त्रितस्य च ६. १. १९८.

[2] तस्यादित उदात्तमर्धह्रस्वम् १. २. ३२.

ये यज्ञकर्मणि ॥ ८ । २ । ८८ ॥

ये यज्ञकर्मणीत्यतिप्रसङ्गः ॥ १ ॥

ये यज्ञकर्मणीत्यतिप्रसङ्गो भवति । इहापि प्राप्नोति । ये देवा॑सो दि॒व्येका॑दश॒ स्थ[1] इति ॥

सिद्धं तु ये यजामह इति ब्रूह्यादिषूपसंख्यानात् ॥ २ ॥

सिद्धमेतत् । कथम् । येयजामहेशब्दो ब्रूह्यादिषूपसंख्येयः[2] ॥

प्रणवष्टेः ॥ ८ । २ । ८९ ॥

प्रणव इत्युच्यते कः प्रणवो नाम । पादस्य वार्धर्चस्य वान्त्यमक्षरमुपसंहृत्य तदाद्यक्षरशेषस्य स्थाने त्रिमात्रमोंकारं त्रिमात्रमोकारं वा विदधति तं प्रणव इत्याचक्षते ॥

अथ टिग्रहणं किमर्थम् ।

टिग्रहणं सर्वादेशार्थम् ॥ १ ॥

यदा ओकारस्तदा सर्वादेशो यथा स्यात् । यदा ओंकारस्तदानेकाल्शित्सर्वस्य [१. १. ५५] इति सर्वादेशो भविष्यति ॥

याज्यान्तः ॥ ८ । २ । ९० ॥

अन्तग्रहणं किमर्थम् । याज्या नामर्चो वाक्यसमुदायस्तत्र यावन्ति वाक्यानि सर्वेषां टेः प्लुतः प्राप्नोति । इष्यते चान्त्यस्य स्यादिति तच्चान्तरेण यत्नं न सिध्यतीत्येवमर्थमन्तग्रहणम् ॥*

अग्नीत्प्रेषणे परस्य च ॥ ८ । २ । ९२ ॥

अग्नीत्प्रेषण इत्यतिप्रसङ्गः ॥ १ ॥

अग्नीत्प्रेषण इत्यतिप्रसङ्गो भवति । इहापि प्राप्नोति । अग्नीदग्नीन्विहर[3] ॥

---

* [V. M. om. ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः (९१)].

[1] ऋ. सं. १. १३९. ११.

[2] ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः ८. २. ९१.

[3] तै. सं. ६. ३. १. २.

सिद्धं त्वोश्रावये परस्य चेति वचनात् ॥ २ ॥

सिद्धमेतत् । कथम् । ओश्रावये परस्येति वक्तव्यम् । ओ३ श्रा३वय ॥

अपर आह । ओश्रावयाश्रावययोरिति वक्तव्यम् । ओ३ श्रा३वय । आ३ श्रा३वय ॥

बहुलमन्यत्रेति वक्तव्यम् । उद्धरा३ उद्धर । आहरा३ आहर ॥

तत्तर्हि वक्तव्यम् । न वक्तव्यम् । योगविभागः करिष्यते[1] । अग्नीत्प्रेषणे परस्य च विभाषा । ततः पृष्ठप्रतिवचने हेः । विभाषेत्येव ॥

अपर आह । सर्व एव प्लुतः साहसमनिच्छता विभाषा वक्तव्यः ॥*

आम्रेडितं भर्त्सने ॥ ८ । २ । ९५ ॥

भर्त्सने पर्यायेण ॥ १ ॥

भर्त्सने पर्यायेणेति वक्तव्यम् । चौरा३ चौर । चौर चौरा३ । कुशीला३ कुशील । कुशील कुशीला३[2] ॥**

स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेषु ॥ ८ । २ । १०३ ॥

असूयादिषु वावचनम् ॥ १ ॥

असूयादिषु वेति वक्तव्यम् । कन्ये३ कन्ये । कन्ये कन्ये । शक्तिके३ शक्तिके । शक्तिके शक्तिके[2] ॥***

प्लुतावैच इदुतौ ॥ ८ । २ । १०६ ॥

किमर्थमिदमुच्यते ।

ऐचोरुभयविवृद्धिप्रसङ्गादिदुतोः प्लुतवचनम् ॥ १ ॥

ऐचोरुभयविवृद्धिप्रसङ्गादिदुतोः प्लुत उच्यते ॥ किमुच्यत उभयविवृद्धिप्रसङ्गादिति यदा नित्याः शब्दा नित्येषु च शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायो-

---

* [V. M. om. विभाषा पृष्टप्रतिवचने हेः (९३) ; निगृह्यानुयोगे च (९४)].

** [V. M. om. अङ्गयुक्तं तिङाकाङ्क्षम् (९६) ; विचार्यमाणानाम् (९७) ; पूर्वं तु भाषायाम् (९८) ; प्रतिश्रवणे च (९९) ; अनुदात्तं प्रश्नान्ताभिपूजितयोः (१००) ; चिदिति चोपमार्थे प्रयुज्यमाने (१०१) ; उपरिस्विदासीदिति च (१०२)].

*** [V. M. om. क्षियाशीःप्रैषेषु तिङाकाङ्क्षम् (१०४) ; अनन्त्यस्यापि प्रश्नान्ताभिपूजितयोः (१०५)].

[1] विभाषा पृष्टप्रतिवचने हेः ८. २. ९३.

[2] वाक्यादेरामन्त्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु ८. १. ८.

पजनविकारिभिः। नैष दोषः। उभयविवृद्धिप्रसङ्गादिति नैवं विज्ञायत उभयोर्विवृद्धिरुभयविवृद्धिः उभयविवृद्धिप्रसङ्गादिति। कथं तर्हि। उभयोर्विवृद्धिरस्मिन्सोऽयमुभयविवृद्धिः उभयविवृद्धिप्रसङ्गादिति। इमावैचौ समाहारवर्णौ मात्रावर्णस्य मात्रेवर्णोवर्णयोरिति तयोः प्लुत उच्यमान उभयविवृद्धिः प्राप्नोति। तद्यथा। अभिवर्धमानो गर्भः सर्वाङ्गपरिपूर्णो वर्धते॥ अस्ति प्रयोजनमेतत्। किं तर्हीति।

तत्रायथेष्टप्रसङ्गः ॥ २ ॥

तत्रायथेष्टं प्रसज्येत। चतुर्मात्रः प्लुतः प्राप्नोति॥

सिद्धं त्विदुतोर्दीर्घवचनात् ॥ ३ ॥

सिद्धमेतत्। कथम्। इदुतोर्दीर्घो भवतीति वक्तव्यम्॥ तदेतत्कथं कृत्वा सिद्धं भवति। यदि समः प्रविभागो मात्रावर्णस्य मात्रेवर्णोवर्णयोः। अथ ह्यर्धमात्रावर्णस्याध्यर्धमात्रेवर्णोवर्णयोरर्धतृतीयमात्रः प्राप्नोति। अथ ह्यध्यर्धमात्रावर्णस्यार्धमात्रेवर्णोवर्णयोरर्धचतुर्थमात्रः प्राप्नोति। सूत्रं च भिद्यते॥ यथान्यासमेवास्तु। ननु चोक्तं तत्रायथेष्टप्रसङ्ग इति। तत्र सौर्यभगवतोक्तमनिष्टिज्ञो वाडवः पठति। इष्यत एव चतुर्मात्रः प्लुतः॥

एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ ॥ ८ । २ । १०७ ॥

एचः प्लुतविकारे पदान्तग्रहणम् ॥ १ ॥

एचः प्लुतविकारे पदान्तग्रहणं कर्तव्यम्। इह मा भूत्। भद्रं करोषि गौ३रिति॥

विषयपरिगणनं च ॥ २ ॥

विषयपरिगणनं च कर्तव्यम्। प्रश्नान्ताभिपूजितविचार्यमाणप्रत्यभिवादयाज्यान्तेष्विति वक्तव्यम्[1]। प्रश्नान्त। अगमा३ः पूर्वा३न्ग्रामा३नग्निभूता३इ। पटा३उ। प्रश्नान्त। अभिपूजित। सिद्धोऽसि माणवकाग्निभूता३इ। पटा३उ। अभिपूजित। विचार्यमाण। होतव्यं दीक्षितस्य[2] गृहा३इ। विचार्यमाण। प्रत्यभिवाद। आयुष्मानेध्य-

---

[1] अनुदात्तं प्रश्नान्ताभिपूजितयोः ८. २. १००; विचार्यमाणानाम् ८. २. ९७; प्रत्यभिवादेऽशूद्रे ८. २. ८३; याज्यान्तः (८. २. ९०).

[2] तै. सं. ६. १. ४. ५.

ग्निभूता३इ । प्रत्यभिवाद । याज्यान्त । उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे । स्तोमैर्विधेमाग्नया३ई[1] ॥

आमन्त्रिते छन्दस्युपसंख्यानम् ॥ ३ ॥

आमन्त्रिते छन्दस्युपसंख्यानं कर्तव्यम् । अग्ना३इ पत्नीवा३ः सजूर्देवेन[2] त्वष्ट्रा सोमं पिब ॥

तयोर्य्वावचि संहितायाम् ॥ ८ । २ । १०८ ॥

अथ कयोरिमौ य्वावुच्येते । इदुतोरित्याह । तदिदुतोर्ग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । पूर्वस्यार्धस्यादुत्तरस्येदुताविति[3] । तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । अचीत्येषा सप्तमीदुताविति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मिन्निति निर्दिष्टे पूर्वस्य [१. १. ६६] इति ॥

किमर्थमिदमुच्यते नेको यणचि [६. १. ७७] इत्येव सिद्धम् । न सिध्यति । असिद्धः प्लुतः प्लुतविकारौ चेमौ ॥ सिद्धः प्लुतः स्वरसंधिषु । कथं ज्ञायते । यदयं प्लुतः प्रकृत्येति प्लुतस्य प्रकृतिभावं शास्ति[4] । कथं कृत्वा ज्ञापकम् । सतो हि कार्यिणः कार्येण भवितव्यम् ॥ इदं तर्हि प्रयोजनं दीर्घशाकलप्रतिषेधार्थम् । दीर्घत्वं शाकलं च[5] मा भूदिति । अग्ना३यिन्द्रम् । पटा३वुदकम् ॥ एतदपि नास्ति प्रयोजनम् । आरभ्यते प्लुतपूर्वस्य यणादेशः प्लुतपूर्वस्य दीर्घशाकलप्रतिषेधार्थमिति[6] ॥ तन्न वक्तव्यं भवति ॥ अवश्यं तद्वक्तव्यं यौ प्लुतपूर्वाविदुतावप्लुतविकारौ तदर्थम् । भो३यिन्द्र । भो३यिहेति ॥ यदि तर्हि तस्य निबन्धनमस्ति तदेव वक्तव्यमिदं न वक्तव्यम् ॥ इदमप्यवश्यं वक्तव्यं स्वरार्थम् । तेन हि सत्युदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य [८. २. ४] इत्येष स्वरः प्रसज्येत । अनेन पुनः सत्यसिद्धत्वान्न भविष्यति ॥ यदि तर्ह्यस्य निबन्धनमस्तीदमेव वक्तव्यं तन्न वक्तव्यम् । ननु चोक्तं तदप्यवश्यं वक्तव्यं यौ प्लुतपूर्वाविदुतावप्लुतविकारौ तदर्थं भो३यिन्द्र भो३यिहेति । छान्दसमेतद्दृष्टानुविधिश्छन्दसि भवति । यत्तर्हि न च्छान्दसम् । भो३यिन्द्रं साम गायति । एषोऽपि च्छन्दसि दृष्टस्यानुप्रयोग इति ॥

---

[1] ऋ. सं. ८. ४३. ११.

[2] तै. सं. १. ४. २७. १.

[3] एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ ८. २. १०७.

[4] प्लुतप्रगृह्या अचि नित्यम् ६. १. १२५.

[5] अकः सवर्णे दीर्घः ६. १. १०१ ; इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ६. १. १२७.

[6] (इको यणचि ६. १. ७७) ; यणादेशः प्लुतपूर्वस्य च ६. १. ७७ वा. १. दीर्घशाकलप्रतिषेधार्थम् ६. १. ७७ वा. २.

किं नु यणा भवतीह न सिद्धं य्वाविदुतोर्यदयं विदधाति ।
तौ च मम स्वरसंधिषु सिद्धौ शाकलदीर्घविधी तु निवर्त्यौ ॥ १ ॥

इक् तु यदा भवति प्लुतपूर्वस्तस्य यणं विदधात्यपवादम् ।
तेन तयोश्च न शाकलदीर्घौ यण्स्वरबाधनमेव तु हेतुः ॥ २ ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्येऽष्टमस्याध्यायस्य द्वितीये पादे द्वितीयमाह्निकम् ॥ पादश्च समाप्तः ॥

मतुवसो रु संबुद्धौ छन्दसि ॥ ८ । ३ । १ ॥

मतुवसो रादेशे वन उपसंख्यानम् ॥ १ ॥

मतुवसो रादेशे वन उपसंख्यानं कर्तव्यम् । यस्त्वायन्तं वसुना प्रातरित्वः[1] ॥[2]

विभाषा भवद्भगवदघवतामोच्चावस्य ॥ २ ॥

छन्दसि भाषायां च भवत् भगवत् अघवदित्येतेषां विभाषा रुर्वक्तव्य ओच्चावस्य वक्तव्यः । भोः भवन् । भगोः भगवन् । अघोः अघवन्निति ॥ संबुद्धावित्युच्यते तत्रेदं न सिध्यति । भो ब्राह्मणा इति । तथा विभक्तौ लिङ्गविशिष्टग्रहणं नेतीह न प्राप्नोति । भो ब्राह्मणि ॥ नैष दोषः । अव्ययमेष भोःशब्दो नैषा भवतः प्रवृत्तिः । कथमव्ययत्वम् । विभक्तिस्वरप्रतिरूपकाश्च निपाता भवन्तीति निपातसंज्ञा निपातोऽव्ययमित्यव्ययसंज्ञा[3] ॥*

समः सुटि ॥ ८ । ३ । ५ ॥

पुमः खय्यम्परे ॥ ८ । ३ । ६ ॥**

कानाम्रेडिते ॥ ८ । ३ । १२ ॥

संपुंकानां सत्वम् ॥ १ ॥

संपुंकानां सत्वं वक्तव्यम् । सँस्स्कर्ता पुँस्कामा काँस्कानिति ॥

रुविधौ ह्यनिष्टप्रसङ्गः ॥ २ ॥

रुविधौ हि सत्यनिष्टं प्रसज्येत । इह तावत्सँस्स्कर्तेति[4] वा शरि [८. ३. ३६] इति प्रसज्येत । पुँस्कामेतीदुदुपधस्येति षत्वं प्रसज्येत[5] । काँस्कानिति कुप्वोः ≍कः प्रसज्येत[6] ॥

---

* [V. M. om. अत्रानुनासिकः पूर्वस्य तु वा (२); आतोऽटि नित्यम् (३); अनुनासिकात् परोऽनुस्वारः (४)].

** [V. M. om. नश्छव्यप्रशान् (७); उभयथर्क्षु (८); दीर्घादटि समानपादे (९); नॄन् पे (१०); स्वतवान् पायौ (११)].

[1] आतो मनिन्क्वनिब्वनिपश्च ; अन्येभ्योपि दृश्यन्ते ३. २. ७४–७५. [2] ऋ. सं. १. १२५. २. [3] (चादयोऽसत्त्वे १. ४. ५७) उपसर्गविभक्तिस्वरप्रतिरूपकाश्च निपाताः (गणसूत्र १४६); स्वरादिनिपातमव्ययम् १. १. ३७. [4] खरवसानयोर्विसर्जनीयः ८. ३. १५. [5] इदुदुपधस्य चाप्रत्ययस्य ८. ८. ४१. [6] कुप्वोः ≍क≍पौ च ८. ३, ३७,

तत्तर्हि वक्तव्यम्। न वक्तव्यम्। क्रियते न्यास एव। समः सुटीति द्विसकारको निर्देशः[1]। समः सुटि सकारो भवति। तत्प्रकृतमुत्तरत्रानुवर्तिष्यते॥ यदि तदनुवर्तते नश्छव्यप्रशान् [८. ३. ७] इत्यत्रापि प्राप्नोति। संबन्धमनुवर्तिष्यते। समः सुटि। पुमः खय्यम्परे सो भवति। नश्छव्यप्रशान् रुर्भवति पुमः खय्यम्परे सकारः। उभयथर्क्षु [८] दीर्घादटि समानपादे [९] नॄन् पे [१०] स्वतवान् पायौ [११] रुर्भवति पुमः खय्यम्परे सकारः। कानाम्रेडिते सकारः। पुमः खय्यम्पर इति निवृत्तम्॥

समो वा लोपमेक इच्छन्ति। संस्कर्ता सँस्कर्ता॥

ढो ढे लोपः॥ ८। ३। १३॥

ढलोपेऽपदान्तग्रहणम्॥ १॥

ढलोपेऽपदान्तग्रहणं कर्तव्यम्। इह मा भूत्। श्वलिड्ढौकते। गुडलिड्ढौकते[2]॥ तत्तर्हि वक्तव्यम्। न वक्तव्यम्। जश्त्वमत्र बाधकं भविष्यति[3]॥

जश्भावादिति चेदुत्तरत्र ढस्याभावादपवादप्रसङ्गः॥ २॥

जश्भावादिति चेदुत्तरत्र ढकारस्याभावादसिद्धत्वादपवादोऽयं विज्ञायेत[4]। कस्य। जश्त्वस्य॥

तस्मात्सिद्धवचनम्॥ ३॥

तस्मात्सिद्धत्वं वक्तव्यम्। कस्य। ष्टुत्वस्य[4]॥

सङ्ग्रहणं वा॥ ४॥

सङ्ग्रहणं[5] वा कर्तव्यम्। सङि ढ इति वक्तव्यम्॥

तत्तर्हि वक्तव्यम्। न वक्तव्यम्। आनन्तर्यमिहाश्रीयते ढकारस्य ढकार इति। क्वचिच्च संनिपातकृतमानन्तर्यं शास्त्रकृतमनानन्तर्यं क्वचिच्च नैव संनिपातकृतं नापि शास्त्रकृतम्। ष्टुत्वे संनिपातकृतमानन्तर्यं शास्त्रकृतमनानन्तर्यं जश्त्वे नैव संनिपातकृतं नापि शास्त्रकृतम्। यत्र कुतश्चिदेवानन्तर्यं तदाश्रयिष्यामः॥*

---

* [V. M. om. रो रि (१४)].

[1] झरो झरि सवर्णे ८. ४. ६५. [2] हो ढः ८. २. ३१. [3] झलां जशोन्ते ८. २. ३९. [4] ष्टुना ष्टुः ८. ४. ४१. [5] गुप्तिज्किद्भ्यः सन् (३. १. ५)—तिपूतसृक्षि...महिङ् ३. ४. ७८.

खरवसानयोर्विसर्जनीयः ॥ ८ । ३ । १५ ॥

विसर्जनीयोऽनुत्तरपदे ॥ १ ॥

विसर्जनीयोऽनुत्तरपद इति वक्तव्यम् । इह मा भूत् । नार्कुटः नार्पत्य इति[१] ॥

न वा बहिरङ्गलक्षणत्वात् ॥ २ ॥

न वा वक्तव्यम् । किं कारणम् । बहिरङ्गलक्षणत्वात् । बहिरङ्गो रेफः । अन्तरङ्गो विसर्जनीयः । असिद्धं बहिरङ्गमन्तरङ्गे ॥ नैष युक्तः परिहारः । अन्तरङ्गं बहिरङ्गमिति प्रतिद्वन्द्वभाविनावेतौ पक्षौ । सत्यन्तरङ्गे बहिरङ्गं सति बहिरङ्गे ऽन्तरङ्गम् । न चात्रान्तरङ्गबहिरङ्गयोर्युगपत्समवस्थानमस्ति । किं कारणम् । असिद्धत्वात्[२] । न चानभिनिर्वृत्ते बहिरङ्गे ऽन्तरङ्गं प्राप्नोति । तत्र निमित्तमेव बहिरङ्गमन्तरङ्गस्य ॥ अनिमित्तं बहिरङ्गमन्तरङ्गस्य । किं कारणम् । असिद्धत्वात् ॥ कथमसिद्धत्वं यावता पूर्वत्रासिद्धम् [८. २. १] इत्यसिद्धा परिभाषा ॥ असिद्धं बहिरङ्गमन्तरङ्गे । कथम् । कार्यकालं संज्ञापरिभाषमिति खरवसानयोर्विसर्जनीय उपस्थितमिदं भवत्यसिद्धं बहिरङ्गमन्तरङ्ग इति । एवमेषा सिद्धा परिभाषा भवति ॥ कुतो नु खल्वेतद् द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोः पूर्वत्रासिद्धमिति चासिद्धं बहिरङ्गमन्तरङ्ग इति च पूर्वत्रासिद्धमित्येतामुपमृद्यासिद्धं बहिरङ्गमन्तरङ्ग इत्येतया व्यवस्था भविष्यति न पुनरसिद्धं बहिरङ्गमन्तरङ्ग इत्येतामुपमृद्य पूर्वत्रासिद्धमित्येतया व्यवस्था स्यात् । अतः किम् । अतोऽयुक्तः परिहारो न वा बहिरङ्गलक्षणत्वादिति ॥

रोः सुपि ॥ ८ । ३ । १६ ॥

किमर्थमिदमुच्यते न खरवसानयोर्विसर्जनीयः [८. ३. १५] इत्येव सिद्धम् । नियमार्थोऽयमारम्भः । रोरेव सुपि नान्यस्य सुपि । क्व मा भूत् । गीर्षु धूर्षु ॥

---

[१] तत्र भवः ४. ३. ५३ ; दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ४. १. ८५ ; तद्धितेष्वचामादेः ७. २. ११७ ; उरण् रपरः १. १. ५१.

[२] पूर्वत्रासिद्धम् ८. २. १.

भोभगोअघोअपूर्वस्य योऽशि ॥ ८ । ३ । १७ ॥

अश्ग्रहणमनर्थकमन्यत्राभावात् ॥ १ ॥

अश्ग्रहणमनर्थकम् । किं कारणम् । अन्यत्राभावात् । न ह्यन्यत्र रुरस्त्यन्यदतोऽशः[1] ॥ ननु चायमस्ति । छन्दःसु पयःस्विति । किं पुनः कारणं सुकारपर एवोदाह्रियते न पुनरयं वृक्षस्तत्र प्लक्षस्तत्रेति[1] । अस्त्यत्र विशेषः । विसर्जनीये कृते न भविष्यति । इहापि तर्हि विसर्जनीये कृते न भविष्यति । छन्दःसु पयःस्विति[2] । स्थानिवद्भावात् प्राप्नोति । ननु चेहापि स्थानिवद्भावात् प्राप्नोति । वृक्षस्तत्र प्लक्षस्तत्रेति । अनल्विधौ स्थानिवद्भावः । अथायमल्विधिः स्याच्छक्यमश्ग्रहणमवक्तुम् । बाढं शक्यम् । अल्विधिस्तर्हि भविष्यति । कथम् । इदमस्ति रो रि [८. ३. १४] इति । ततो वक्ष्यामि खरवसानयोर्विसर्जनीयो रः । ततो रोः सुपि विसर्जनीयो र इत्येव ॥ उत्तरार्थं तर्ह्यश्ग्रहणं कर्तव्यं हलि सर्वेषाम् [८. ३. २२] हल्यशीति यथा स्यात् । इह मा भूत् । वृक्षवयतेरप्रत्ययो वृक्षञ्करोति ॥*

ओतो गार्ग्यस्य ॥ ८ । ३ । २० ॥

किमर्थमिदमुच्यते न लोपः शाकल्यस्य [८. ३. १९] इत्येव सिद्धम् ।

ओकाराल्लोपवचनं नित्यार्थम् ॥ १ ॥

ओकाराल्लोपवचनं क्रियते । नित्यार्थोऽयमारम्भः ॥

उञि च पदे ॥ ८ । ३ । २१ ॥

पद इति किमर्थम् । तन्त्रे उतम् तन्त्रयुतम् तन्त्र उतम् ॥ पद इति शक्यमवक्तुम् । कस्मान्न भवति तन्त्रे उतम् तन्त्रयुतम् तन्त्र उतमिति । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति[3] ॥ उत्तरार्थं तर्हि पदग्रहणं कर्तव्यं ङमो ह्रस्वादचि ङमुण्नित्यम् [८. ३. ३२] इत्यपदे मा भूत् । दण्डिना शकटिना ॥**

---

* [V. M. om. व्योर्लघुप्रयत्नतरः शाकटायनस्य (१८); लोपः शाकल्यस्य (१९)].

** [V. M. om. हलि सर्वेषाम् (२२); मोऽनुस्वारः (२३); नश्चापदान्तस्य झलि (२४); मो राजि समः क्वौ (२५)].

[1] खरवसानयोर्विसर्जनीयः ८. ३. १५. [2] रोः सुपि ८. ३. १६. [3] वचिस्वपियजादीनां किति ६. १. १५.

हे मपरे वा ॥ ८ । ३ । २६ ॥

यवलपरे यवला वा ॥ १ ॥

यवलपरे हकारे यवला वेति वक्तव्यम् । किय्ँह्यः किं ह्यः । किव्ँह्वलयति किं ह्वलयति । किल्ँह्लादयति किं ह्लादयति ॥*

डः सि धुट् ॥ ८ । ३ । २९ ॥

नश्च ॥ ८ । ३ । ३० ॥

शि तुक् ॥ ८ । ३ । ३१ ॥

ङ्णोः कुक्टुक्शरि ॥ ८ । ३ । २८ ॥

ङमो ह्रस्वादचि ङमुण्नित्यम् ॥ ८ । ३ । ३२ ॥

इह धुडादिषु केचित्पूर्वान्ताः केचित्परादयः । यदि पुनः सर्व एव पूर्वान्ताः स्युः सर्व एव परादयः । कश्चात्र विशेषः ।

धुगादिषु ष्टुत्वणत्वप्रतिषेधः ॥ १ ॥

धुगादिषु सत्सु ष्टुत्वणत्वयोः प्रतिषेधो वक्तव्यः ॥ ष्टुत्वस्य तावत् । श्वलिट्त्साये । मधुलिट्त्साये । ष्टुना ष्टुः [८. ४. ४१] इति ष्टुत्वं प्राप्नोति । परादौ पुनः सति न पदान्ताट्टोरनाम् [४२] इति प्रतिषेधः सिद्धो भवति ॥ णत्वस्य । कुर्वन्नास्ते । कृषन्नास्ते । रषाभ्यां नो णः समानपदे [८. ४. १] इति णत्वं प्राप्नोति । परादौ पुनः सति पदान्तस्य नेति प्रतिषेधः[1] सिद्धो भवति ॥ सन्तु तर्हि परादयः ।

परादौ छत्वषत्वविधिप्रतिषेधः ॥ २ ॥

यदि परादयश्छत्वं विधेयं षत्वं च प्रतिषेध्यम् ॥ छत्वं विधेयम् । कुर्वञ्छेते ।

---

* [V. M. om. नपरे नः (२७) ; ङ्णोः कुक्टुक् शरि (२८)].

[1] पदान्तस्य ८. ४. ३७.

कृषञ्च्छेते । यद्धि तच्शश्छोऽटि [८. ४. ६३] इति झयः पदान्तादित्येवं तत् । किं पुनः कारणं झयः पदान्तादित्येवं तत् । इह मा भूत् । पुरा[1] क्रूरस्य विसृपो विरप्शिन्निति ॥ षत्वं च प्रतिषेध्यम् । प्रत्यङ्क्सिञ्च । उदङ्क्सिञ्च । आदेशप्रत्यययोः [८. ३. ५९] इति षत्वं प्राप्नोति । पूर्वान्ते पुनः सति सात्पदाद्योः [१११] इति प्रतिषेधः सिद्धो भवति ॥ तस्मात्सन्तु यथान्यासमेव केचित्पूर्वान्ताः केचित्परादयः ॥ अयं तु खलु शि तुक्छत्वार्थं नियोगतः पूर्वान्तः कर्तव्यस्तत्र कुर्वञ्च्छेते कृषञ्च्छेत इति रषाभ्यां नो णः समानपद इति णत्वं प्राप्नोति । नैष दोषः । श्चुत्वे योगविभागः करिष्यते[2] । इदमस्ति क्षुभ्नादिषु न णकारो भवति[3] । ततः स्तोः श्चुना । स्तोः श्चुना संनिपाते न णकारो भवति । ततः श्चुः । श्चुश्च भवति स्तोः श्चुना संनिपाते ॥

ङमो ह्रस्वादचि ङमुण्नित्यम् ॥ ८ । ३ । ३२ ॥

ङमुटि पदादिग्रहणम् ॥ १ ॥

ङमुटि पदादिग्रहणं कर्तव्यम् । इह मा भूत् । दण्डिना शकटिनेति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । पदादिति[4] वर्तते । एवमपि परमदण्डिना परमच्छत्रिणेति प्राप्नोति[5] । नैष दोषः । उक्तमेतदुत्तरपदत्वे चापदादिविधौ लुमता लुप्ते प्रत्ययलक्षणं न भवतीति[6] ॥ एवमपि पदादिति वक्तव्यम् । यद्धि तत्प्रकृतं प्राक्सुपि कुत्सनादित्येवं तत्[7] ॥ एवं तर्हि ङम एवायं ङमुट् क्रियते । कथम् । पदस्येति[8] वर्तते ङम इति च नैषा पञ्चमी । का तर्हि । संबन्धषष्ठी । पदान्तस्य ङमो ङमुड् भवति ह्रस्वादुत्तरस्याचीति । यदि ङम एव ङमुट् क्रियते कुर्वन्नास्ते कृषन्नास्ते रषाभ्यां नो णः समानपदे [८. ४. १] इति णत्वं प्राप्नोति । पदान्तस्य नेति[9] प्रतिषेधो भविष्यति । पदान्तस्येत्युच्यते नैष पदान्तः । पदान्तभक्तः पदान्तग्रहणेन ग्राहिष्यते ॥ एवमपि न सिध्यति । किं कारणम् । उक्तमेतन्न वा पदाधिकारस्य विशेषणत्वादिति[10] ॥ एवं तर्हि पद इति वर्तते । क्व प्रकृतम् । उञि च पदे [८. ३. २१] इति ॥

---

[1] तै. सं. १. १. ९ ३.
[2] स्तोः श्चुना श्चुः ८. ४. ४०
[3] क्षुभ्नादिषु च ८. ४. ३९.
[4] पदात् ८. १. १७.
[5] सुपो धातुप्रातिपदिकयोः २. ४. ७१ ; प्रत्ययलोपे प्रत्ययलक्षणम् १. १. ६२ ; सुप्तिङन्तं पदम् १. ४. १४.
[6] (न लुमताङ्गस्य १. १. ६३.) उत्तरपदत्वे चापदादिविधौ १. १. ६३ वा. ६.
[7] कुत्सने च सुप्यगोत्रादौ ८. १. ६९.
[8] पदस्य ८. १. १६.
[9] पदान्तस्य ८. ४. ३७.
[10] न वा पदाधिकारस्य विशेषणत्वात् ८. १. १६ वा. ५.

मय उञो वो वा ॥ ८ । ३ । ३३ ॥

किमर्थं मय उत्तरस्योञो वो वेत्युच्यते नेको यणचि [६. १. ७७] इत्येव सिद्धम् । न सिध्यति । प्रगृह्यः प्रकृत्येति[1] प्रकृतिभावः प्राप्नोति ॥ यदि पुनस्तत्रैवोच्येतेको यणचि मय उञो वेति । नैवं शक्यम् । इह हि दोषः स्यात् । किम्वावपनं महत्[2] । मोऽनुस्वारः [८. ३. २३] हलीत्यनुस्वारः प्रसज्येत । वत्वे पुनः सत्यसिद्धत्वान्न भविष्यति ॥

विसर्जनीयस्य सः ॥ ८ । ३ । ३४ ॥

इह कस्मान्न भवति । वृक्षः प्लक्ष इति । संहितायामिति[3] वर्तते । एवमप्यत्र प्राप्नोति । किं कारणम् । परः संनिकर्षः संहिता [१. ४. १०९] इत्युच्यते स यथैव परेण परः संनिकर्ष एवं पूर्वेणापि । एवं तर्ह्यनवकाशावसानसंज्ञा[4] संहितासंज्ञां बाधिष्यते । अथवा संहितासंज्ञायां प्रकर्षगतिर्विज्ञास्यते । साधीयो यः परः संनिकर्ष इति । कश्च साधीयः । यः पूर्वपरयोः ॥ यद्येवानवकाशावसानसंज्ञा संहितासंज्ञां बाधतेऽथापि संहितासंज्ञायां प्रकर्षगतिर्विज्ञायत उभयथा दोषो भवति । इष्यन्त इत उत्तरमवसाने संहिताकार्याणि तानि न सिध्यन्ति । अणो ऽप्रगृह्यस्यानुनासिकः [८. ४. ५७] इति ॥ एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति न सर्वस्य विसर्जनीयस्य सत्वं भवतीति यदयं खरवसानयोर्विसर्जनीयः [८. ३. १५] इत्याह । इतरथा खरवसानयोः सो भवतीत्येव ब्रूयात् । तच्च लघु भवति विसर्जनीयस्य स इत्येतच्च न वक्तव्यं भवति ॥ अवश्यं शर्परे विसर्जनीयः [८. ३. ३५] इत्यत्र प्रकृतिनिर्देशार्थं विसर्जनीयग्रहणं कर्तव्यम् । अथेदानीमेतदपि रसांनिध्यार्थं पुरस्तादपक्रक्ष्यते खरवसानयोः स इत्यत्रैवैवमपि कुप्वोः ᳵक ᳶपौ च [८. ३. ३७] इत्येवमादिनानुक्रमणेन व्यवच्छिन्नं भोभगोअघोअपूर्वस्य योऽशि [८. ३. १७] इत्यत्र रुग्रहणं कर्तव्यं स्यात् ॥ एवमप्येकं विसर्जनीयग्रहणं व्याजो भवति । सो ऽयमेवं लघीयसा न्यासेन सिद्धे सति यद्गरीयांसं यत्नमारभते तज्ज्ञापयत्याचार्यो न सर्वस्य विसर्जनीयस्य सत्वं भवतीति ॥ एवमप्यनैकान्तिकं ज्ञापकम् । एतावज्ज्ञाप्यते न सर्वस्य विसर्जनीयस्य सत्वं भवतीति

---

[1] निपात एकाजनाङ्; प्लुतप्रगृह्या अचि नित्यम् १. १. १४; ६. १. १२५. [2] वा. सं. २९. ९. ४५. [3] तयोर्य्वावचि संहितायाम् ८. २. १०८. [4] विरामोऽवसानम् १. ४. ११०.

तत्र कुत एतदिह भविष्यति वृक्षस्तत्र प्लक्षस्तत्रेतीह न भविष्यति वृक्षः प्लक्ष इति ॥ एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति नास्य विसर्जनीयस्य सत्वं भवतीति यदयं शर्परे विसर्जनीय इत्याह । अथवा हलीति वर्तते । क्व प्रकृतम् । हलि सर्वेषाम् [८. ३. २२] इति । यदि तदनुवर्तते मय उञो वो वा [८. ३. ३३] हलि चेति हल्यपि वत्वं प्राप्नोति । शमु[1] नः । शमु योरस्तु । एवं तर्हि विसर्जनीयस्य स इत्यत्र खरीत्यनुवर्तिष्यते[2] । अथवा संबन्धमनुवर्तिष्यते ॥*

वा शरि ॥ ८ । ३ । ३६ ॥

वाशर्प्रकरणे खर्परे लोपः ॥ १ ॥

वाशर्प्रकरणे खर्परे लोपो वक्तव्यः । वृक्षा स्थातारः । वृक्षाः स्थातारः ॥

कुप्वोः ᳵक ᳶपौ च ॥ ८ । ३ । ३७ ॥

सस्य कुप्वोर्विसर्जनीयजिह्वामूलीयोपध्मानीयाः ॥ १ ॥

सस्य कुप्वोर्विसर्जनीयाजिह्वामूलीयोपध्मानीया वक्तव्याः ॥

विसर्जनीयादेशे हि शर्परयोरेवादेशप्रसङ्गः ॥ २ ॥

विसर्जनीयादेशे हि सति शर्परयोरेव[3] कुप्वोः ᳵक ᳶपौ स्याताम् । अद्भिः प्सातम् । वासः क्षौमम् ॥ वचनान्न भविष्यतः । अस्ति वचने प्रयोजनम् । किम् । पुरुषः त्सरुकः ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । यदेतद्विसर्जनीयस्य सः [८. ३. ३४] इत्यत्र विसर्जनीयग्रहणमेतदुत्तरत्रानुवर्तिष्यते तस्मिंश्च शर्परे विसर्जनीयो ऽसिद्धः ॥ नासिद्धः । कथम् । अधिकारो नाम त्रिप्रकारः । कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयति । अपरो यथा रज्ज्वायसा वा बद्धं काष्ठमनुकृष्यते तद्वत् । अपरोधिकारः प्रतियोगं तस्यानिर्देशार्थ इति योगे योग उपतिष्ठते । तद्यदैष पक्षोऽधिकारः प्रतियोगं तस्यानिर्देशार्थ इति तदा हि यदेतद्विसर्जनीयस्य स इत्यत्र विसर्जनीयग्रहणमेतदुत्तरत्रानुवृत्तं सदन्यत्संपद्यते तस्मिंश्च शर्परे विसर्जनीयः सिद्धः । एवं च

---

* [V. M. om. शर्परे विसर्जनीयः (३५)].

[1] काठकसं. २.१ शमु नः सन्तु कूप्याः

[2] खरवसानयोर्विसर्जनीयः ८. ३. १५.

[3] शर्परे विसर्जनीयः ८. ३. ३५.

कृत्वा शर्परयोरेव कुप्वोः ᳵकᳶपौ स्याताम् । अद्भिः प्सातम् । वासः क्षौममिति ॥

एवं तर्हि योगविभागः करिष्यते[1] । शर्परे विसर्जनीयः [३५] । वा शरि [३६] । ततः कुप्वोः । कुप्वोश्च शर्परयोर्विसर्जनीयस्य विसर्जनीयो भवतीति । किमर्थमिदम् । कुप्वोः ᳵकᳶपौ वक्ष्यति तद्बाधनार्थम् । ततः ᳵकᳶपौ भवतः कुप्वोरित्येव । शर्परयोरिति निवृत्तम् ॥ अथवा शर्परे विसर्जनीय इत्येतत्कुप्वोः ᳵकᳶपौ चेत्यत्रानुवर्तिष्यते ॥

सोऽपदादौ ॥ ८ । ३ । ३८ ॥

सोऽपदादावनव्ययस्य ॥ १ ॥

सोऽपदादावनव्ययस्येति वक्तव्यम् । इह मा भूत् । प्रातःकल्पम् पुनःकल्पम् ॥

रोः काम्ये नियमार्थम् ॥ २ ॥

रोः काम्य इति वक्तव्यम् । किं प्रयोजनम् । नियमार्थम् । रोरेव काम्ये नान्यस्य । पयस्काम्यति । क्व मा भूत् । गीःकाम्यति पूःकाम्यति ॥

उपध्मानीयस्य च सत्वं वक्तव्यम् । किं प्रयोजनम् । अयमुब्जिरुपध्मानीयोपधः पठ्यते तस्य सत्वे कृते जश्भावे[2] चाभ्युद्गः समुद्ग इत्येतद्रूपं यथा स्यात् ॥ यद्युपध्मानीयोपधः पठ्यत उब्जिजिषतीत्युपध्मानीयस्य द्विर्वचनं प्राप्नोति । दकारोपधे पुनः सति न न्द्राः संयोगादयः [६. १. ३] इति प्रतिषेधः सिद्धो भवति । यदि दकारोपधः पठ्यते का रूपसिद्धिः उब्जिता उब्जितुमिति । असिद्धे भ उद्जेः । इदमस्ति स्तोः श्चुना श्चुः [८. ४. ४०] । ततो वक्ष्यामि । भ उद्जेः । उद्जेश्च श्चुना संनिपाते भो भवतीति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । निपातनादेतत्सिद्धम् । किं निपातनम् । भुजन्युब्जौ पाण्युपतापयोः [७. ३. ६१] इति । इहापि प्राप्नोति । अभ्युद्गः समुद्गः । अकुत्वविषये निपातनम् । अथवा नैतदुब्जे रूपम् । किं तर्हि । गमेर्ड्युपसर्गाड्डो विधीयते । अभ्युद्गतोऽभ्युद्गः । समुद्गतः समुद्गः ॥

इणः षः ॥ ८ । ३ । ३९ ॥

किमविशेषेण सत्वमुक्त्वा तत इण उत्तरस्य सकारस्य षत्वमुच्यत आहोस्विदिण

---

[1] कुप्वोः ᳵकᳶपौ च ८. ३. ३७. [2] चजोः कुघिण्यतोः ; झलां जश् झशि ७. .३ ५२ ; ८. ४. ५३.

उत्तरस्य विसर्जनीयस्यैव षत्वं विधीयते । किं चातः । यद्यविशेषेण सत्वमुक्त्वेण उत्तरस्य सकारस्य षत्वमुच्यते निष्कृतम् निष्पीतमित्यत्र[1] सत्वस्यासिद्धत्वात्षत्वं न प्राप्नोति ॥ अथेण उत्तरस्य विसर्जनीयस्यैव षत्वं विधीयते सत्वमप्यनुवर्तत उताहो न । किं चातः । यद्यनुवर्तते सत्वमपि प्राप्नोति । अथ निवृत्तं नमस्पुरसोर्गत्योः [८. ३. ४०] इत्यत्र सकारग्रहणं कर्तव्यम् ॥ तस्मिंश्च क्रियमाणे षत्वमप्यनुवर्तत उताहो न । किं चातः । यद्यनुवर्तते षत्वमपि प्राप्नोति । अथ निवृत्तमिदुदुपधस्य चाप्रत्ययस्य [४१] इत्यत्र षकारग्रहणं कर्तव्यम् ॥ तस्मिंश्च क्रियमाणे सत्वमप्यनुवर्तत उताहो न । किं चातः । यद्यनुवर्तते सत्वमपि प्राप्नोति । अथ निवृत्तं तिरसोऽन्यतरस्याम् [४२] इत्यत्र सकारग्रहणं कर्तव्यम् ॥ तस्मिंश्च क्रियमाणे षत्वमप्यनुवर्तत उताहो न । किं चातः । यद्यनुवर्तते षत्वमपि प्राप्नोति । अथ निवृत्तं द्विस्त्रिश्चतुरिति कृत्वोऽर्थे [४३] इसुसोः सामर्थ्ये [४४] नित्यं समासेऽनुत्तरपदस्थस्य [४५] इति षकारग्रहणं कर्तव्यम् ॥ तस्मिंश्च क्रियमाणे सत्वमप्यनुवर्तत उताहो न । किं चातः । यद्यनुवर्तते सत्वमपि प्राप्नोति । अथ निवृत्तमतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य [४६] इति सकारग्रहणं कर्तव्यम् ॥

यथेच्छसि तथास्तु । अस्तु तावदविशेषेण सत्वमुक्त्वेण उत्तरस्य सकारस्य षत्वमुच्यते । ननु चोक्तं निष्कृतम् निष्पीतमित्यत्र सत्वस्यासिद्धत्वात् षत्वं न प्राप्नोतीति । नैष दोषः । आचार्यप्रवृत्तिर्ज्ञापयति न योगे योगोऽसिद्धः । किं तर्हि । प्रकरणे प्रकरणमसिद्धमिति यदयमुपसर्गादसमासेऽपि णोपदेशस्य [८. ४. १४] इत्यसमासेऽपिग्रहणं करोति ॥ अथवा पुनरस्त्विण उत्तरस्य विसर्जनीयस्य षत्वं विधीयते । ननु चोक्तं सत्वमप्यनुवर्तत उताहो न किं चातः यद्यनुवर्तते सत्वमपि प्राप्नोतीति । नैष दोषः । संबन्धमनुवर्तिष्यते । सोऽपदादौ [३८] । इणः षः [३९] । नमस्पुरसोर्गत्योः [४०] सकारः इण उत्तरस्य षकारः । इदुदुपधस्य चाप्रत्ययस्य [४१] षकारः नमस्पुरसोर्गत्योः सकारः । तिरसोऽन्यतरस्याम् [४२] सकारः इदुदुपधस्य चाप्रत्ययस्य षकारः । द्विस्त्रिश्चतुरिति कृत्वोऽर्थे [४३] इसुसोः सामर्थ्ये [४४] नित्यं समासेऽनुत्तरपदस्थस्य [४५] इति षकारः तिरसोऽन्यतरस्यां सकारः । अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य [४६] । सकारोऽनुवर्तते षकारग्रहणं निवृत्तम् ॥*

---

* [V. M. om. नमस्पुरसोर्गत्योः (४०)].

[1] इदुदुपधस्य चाप्रत्ययस्य ८. ३. ४१.

इदुदुपधस्य चाप्रत्ययस्य ॥ ८ । ३ । ४१ ॥

इदुदुपधस्य चाप्रत्ययस्येति चेत्पुम्मुहुसोः प्रतिषेधः ॥ १ ॥

इदुदुपधस्य चाप्रत्ययस्येति चेत्पुम्मुहुसोः प्रतिषेधो वक्तव्यः । पुँस्कामा[1] मुहुःकाम इति ॥

वृद्धिभूतानां षत्वं वक्तव्यम् । दौष्कुल्यम् नैष्पुरुष्यम् ॥

प्लुतानां तादौ च ॥ २ ॥

प्लुतानां तादौ[2] च कुप्वोश्चेति वक्तव्यम् । सर्पी३ष्टर । बर्ही३ष्टर नी३ष्कुल दू३ष्पुरुष ॥

न वा बहिरङ्गलक्षणत्वात् ॥ ३ ॥

न वा वक्तव्यम् । किं कारणम् । बहिरङ्गलक्षणत्वाद्वृद्धेः । बहिरङ्गलक्षणा वृद्धिः ॥

इह कस्मान्न भवति । पितुः[3] करोति । मातुः करोति । अप्रत्ययविसर्जनीयस्येति षत्वं प्रसज्येत । अप्रत्ययविसर्जनीयस्येत्युच्यते प्रत्ययविसर्जनीयश्चायम् । लुप्यतेऽत्र प्रत्ययविसर्जनीयो रात्सस्य [८. २. २४] इति । एवं तर्हि

भ्रातुष्पुत्रग्रहणं ज्ञापकमेकादेशनिमित्तात्षत्वप्रतिषेधस्य ॥ ४ ॥

यदयं कस्कादिषु[4] भ्रातुष्पुत्रशब्दं पठति तज्ज्ञापयत्याचार्यो नैकादेशनिमित्तात् षत्वं भवतीति ॥*

द्विस्त्रिश्चतुरिति कृत्वोऽर्थे ॥ ८ । ३ । ४३ ॥

द्विस्त्रिश्चतुर्ग्रहणं किमर्थम् । इह मा भूत् । पञ्चकृत्वः करोति ॥ अथ कृत्वोऽर्थग्रहणं किमर्थम् । इह मा भूत् । चतुष्कपालः चतुष्कण्टक इति । नैतदस्ति । अस्त्वेतेन विभाषा पूर्वेण[5] नित्यो विधिर्भविष्यति । नाप्राप्ते पूर्वेणेयं विभाषारभ्यते सा यथैवेह बाधिका भवति चतुः करोति चतुष्करोतीत्येवं चतुष्कपालेऽपि बाधिका स्यात् । नात्र पूर्वेण षत्वं प्राप्नोति । किं कारणम् । अप्रत्ययविसर्जनीयस्येत्युच्यते

---

* [V. M. om. तिरसोन्यतरस्याम् (४२)].

[1] संपुंकानां सत्वम् ८. ३. ६. वा. १, but shown under 8–3–72. [2] ह्रस्वात् तादौ तद्धिते ८. ३. १०१. [3] ऋत उत् ६. १. १११; उरण् रपरः १. १. ५१. [4] भ्रातुष्पुत्रः ८. ३. ४८ गणशब्द [5] इदुदुपधस्य चाप्रत्ययस्य ८. ३. ४१.

प्रत्ययविसर्जनीयश्चायम् । लुप्यते प्रत्ययविसर्जनीयो रात्सस्य [८. २. २४] इति । तस्मात्कृत्वोऽर्थग्रहणं कर्तव्यम् ॥

द्विस्त्रिश्चतुर्ग्रहणं शक्यमवक्तुम् । कस्मान्न भवति पञ्चकृत्वः करोतीति । इदुदुपधस्येति[2] वर्तते ॥ नैवं शक्यम् । अक्रियमाणे द्विस्त्रिश्चतुर्ग्रहणे कृत्वोऽर्थग्रहणेन विसर्जनीयो विशेष्येत । तत्र को दोषः । इहैव स्यात् द्विष्करोति द्विः करोति[1] । इह न स्यात् चतुष्करोति चतुः करोतीति[3] । द्विस्त्रिश्चतुर्ग्रहणे पुनः क्रियमाणे कृत्वोऽर्थग्रहणे द्विस्त्रिश्चतुरो विशेष्यन्ते । द्विस्त्रिश्चतुर्णां कृत्वोऽर्थे वर्तमानानां यो विसर्जनीय इति ॥ एतदपि नास्ति प्रयोजनम् । पदस्येति[4] वर्तते तत्कृत्वोऽर्थग्रहणेन विशेषयिष्यामः । पदस्य कृत्वोऽर्थे वर्तमानस्य यो विसर्जनीय इति ॥

कृत्वसुजर्थे षत्वं ब्रवीति कस्माच्चतुष्कपाले मा ।
षत्वं विभाषया भून्ननु सिद्धं तत्र पूर्वेण ॥ १ ॥
सिद्धे ह्ययं विधत्ते चतुरः षत्वं यदापि कृत्वोऽर्थे ।
लुप्ते कृत्वोऽर्थीये रेफस्य विसर्जनीयो हि ॥ २ ॥
एवं सति त्विदानीं द्विस्त्रिश्चतुरित्यनेन किं कार्यम् ।
अन्यो हि नेदुदुपधः कृत्वोऽर्थे कश्चिदप्यस्ति ॥ ३ ॥
अक्रियमाणे ग्रहणे विसर्जनीयस्तदा विशेष्येत ।
चतुरो न सिध्यति तदा रेफस्य विसर्जनीयो हि ॥ ४ ॥
तस्मिंस्तु गृह्यमाणे युक्तं चतुरो विशेषणं भवति ।
प्रकृतं पदं तदन्तं तस्यापि विशेषणं न्याय्यम् ॥ ५ ॥*

नित्यं समासेऽनुत्तरपदस्थस्य ॥ ८ । ३ । ४५ ॥

अनुत्तरपदस्थस्येति किमर्थम् । परमसर्पिःकुण्डिका । अथेदानीमनेन मुक्ते पूर्वेण षत्वं विभाषा कस्मान्न भवतीसुसोः सामर्थ्ये [४४] इति ।

नानापदार्थयोर्वर्तमानयोः ख्यायते यदा योगः ।
तस्मिन्षत्वं कार्यं तद्युक्तं तच्च मे नेह ॥ १ ॥

व्यपेक्षासामर्थ्ये पूर्वयोगो न चात्र व्यपेक्षासामर्थ्यम् ॥ किं पुनः कारणं व्यपेक्षासामर्थ्यमाश्रीयते न पुनरेकार्थीभावो यथान्यत्र ।

---

* [V. M. om. इसुसोः सामर्थ्ये (४४)].

[1] द्वित्रिचतुर्भ्यः सुच् ५. ४. १८.　　[2] इदुदुपधस्य चाप्रत्ययस्य ८. ३. ४१.

[3] द्वित्रिचतुर्भ्यः सुच् ५. ४. १८; रात् सस्य ८. २. २४.　　[4] पदस्य ८. १. १६.

ऐकार्थ्ये सामर्थ्ये वाक्ये षत्वं न मे प्रसज्येत ।

ऐकार्थ्ये सामर्थ्ये सति वाक्ये षत्वं न स्यात् । सर्पिष्करोति । सर्पिः करोतीति ॥

तस्मादिह[1] व्यपेक्षां सामर्थ्यं साधु मन्यन्ते ॥ २ ॥
अथ चेत्कृदन्तमेतत्ततोऽधिके नैव मे भवेत्प्राप्तिः ।

यदि कृदन्तमेतत्ततोऽधिकस्य षत्वं न प्राप्नोति । किं कारणम् । प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीति ॥ वाक्येऽपि तर्हि न प्राप्नोति । परमसर्पिष्करोति परमसर्पिः करोतीति ।

वाक्ये च मे विभाषा प्रतिषेधो न प्रकल्पेत ॥ ३ ॥

यदयमनुत्तरपदस्थस्येति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो भवति वाक्ये विभाषेति ॥

अथ चेत्संविज्ञानं नित्ये षत्वे ततो विभाषेयम् ।

अथाव्युत्पन्नं प्रातिपदिकं ततो नित्ये षत्वे प्राप्त इयं विभाषारभ्यते[2] ॥

सिद्धं च मे समासे

षत्वम् । किमर्थं तर्हीदमुच्यते ।

प्रतिषेधार्थस्तु यत्नोऽयम् ॥ ४ ॥

अनुत्तरपदस्थस्येति प्रतिषेधं वक्ष्यामीति ॥

नानापदार्थयोर्वर्तमानयोः ख्यायते यदा योगः ।
तस्मिन्षत्वं कार्यं तद्युक्तं तच्च मे नेह ॥ १ ॥
ऐकार्थ्ये सामर्थ्ये वाक्ये षत्वं न मे प्रसज्येत ।
तस्मादिह व्यपेक्षां सामर्थ्यं साधु मन्यन्ते ॥ २ ॥
अथ चेत्कृदन्तमेतत्ततोऽधिके नैव मे भवेत्प्राप्तिः ।
वाक्ये च मे विभाषा प्रतिषेधो न प्रकल्पेत ॥ ३ ॥
अथ चेत्संविज्ञानं नित्ये षत्वे ततो विभाषेयम् ।
सिद्धं च मे समासे प्रतिषेधार्थस्तु यत्नोऽयम् ॥ ४ ॥*

अपदान्तस्य मूर्धन्यः ॥ ८ । ३ । ५५ ॥

अथ मूर्धन्यग्रहणं किमर्थं नापदान्तस्य षो भवतीत्येवोच्येत । तत्रायमप्यर्थः

---

* [V. M. om. अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य (४६) ; अधःशिरसी पदे (४७) ; कस्कादिषु च (४८) ; छन्दसि वाऽप्राम्रेडितयोः (४९) ; कःकरत्करतिकृधिकृतेष्वनदितेः (५०) ; पञ्चम्याः परावध्यर्थे (५१) ; पातौ च बहुलम् (५२) ; षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु (५३) ; इडाया वा (५४)].

[1] इसुसोः सामर्थ्ये ८. ३. ४४.

[2] इदुदुपधस्य चाप्रत्ययस्य ८. ३. ४१ ; इसुसोः सामर्थ्ये ८. ३. ४४.

षकारग्रहणं न कर्तव्यं भवति प्रकृतमनुवर्तते । क्व प्रकृतम् । इणः षः [८. ३. ३९] इति ॥ नैवं शक्यम् । अवश्यं मूर्धन्यग्रहणं कर्तव्यमिहार्थमुत्तरार्थं च । इहार्थं तावत् । इणः षीध्वंलुङ्लिटां धोऽङ्गात् [८. ३. ७८] इत्यत्र मूर्धन्यग्रहणं न कर्तव्यं भवति । उत्तरार्थं च । रषाभ्यां नो णः समानपदे [८. ४. १] इत्यत्र णकारग्रहणं न कर्तव्यं भवति । तत्रायमप्यर्थः पदान्तस्य नेति[१] प्रतिषेधो न वक्तव्यो भवति । अपदान्ताभिसंबद्धं मूर्धन्यग्रहणमनुवर्तते ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये ऽष्टमस्याध्यायस्य तृतीये पादे प्रथममाह्निकम् ॥

---

[१] पदान्तस्य ८. ४. ३७.

समानाधिकरणानां चाप्राप्तिः ॥ ४ ॥

समानाधिकरणानां च षत्वस्याप्राप्तिः । एषः[1] अकार्षीत्[2] ॥

अस्तु तर्हि समानाधिकरणा । यदि समानाधिकरणा सिषेच सुष्वाप[3] अत्र न प्राप्नोति । न धातुद्विर्वचने स्थाने द्विर्वचनं शक्यमास्थातुम् । इहापि हि प्रसज्येत सरीसृप्यत इति । तस्मात्तत्र द्विःप्रयोगो द्विर्वचनम्[4] ॥ इह तर्हि करिष्यति हरिष्यति प्रत्ययो यः सकार इति षत्वं न प्राप्नोति ॥

अस्तु तर्ह्यादेशो यः सकारः प्रत्ययस्य यः सकार इति । इह तर्हि अकार्षीत् प्रत्ययस्य यः सकारः इति षत्वं न प्राप्नोति । मा भूदेवमादेशो यः सकार इत्येवं भविष्यति ॥ इह तर्हि जोषिषत् मन्दिषदिति[5] प्रत्ययस्य यः सकार इति षत्वं न प्राप्नोति । एषोऽपीटि कृते प्रत्ययस्य सकारः ॥ इह तर्हि इन्द्रो मा वक्षत् स देवान् यक्षत्[6] ॥

नानाविभक्तीनां च समासानुपपत्तिः ॥ ५ ॥

नानाविभक्तीनां च समासो नोपपद्यत आदेशप्रत्यययोरिति ॥

योगविभागात्सिद्धम् ॥ ६ ॥

योगविभागः करिष्यते । आदेशस्य षो भवतीति । ततः प्रत्ययसकारस्य षो भवतीति ॥

स तर्हि योगविभागः कर्तव्यः । न कर्तव्यः । कथम् । अस्तु तावदवयवषष्ठी । ननु चोक्तमादेशप्रत्यययोरित्यवयवषष्ठी चेद् द्विर्वचने प्रतिषेध इति । नैष दोषः । द्विःप्रयोगो द्विर्वचनम् ॥ यदप्युच्यते समानाधिकरणानां चाप्राप्तिरिति व्यपदेशिवद्भावेन भविष्यति ॥ अथवा पुनरस्तु समानाधिकरणा । कथं करिष्यति हरिष्यति । आचार्यप्रवृत्तिर्ज्ञापयति भवत्येवंजातीयकानां षत्वमिति यदयं सात्पदाद्योः [८. ३. १११] इति सात्प्रतिषेधं शास्ति ॥ अथवा पुनरस्त्वादेशो यः सकारः प्रत्ययस्य यः सकार इति । कथमिन्द्रो मा वक्षत् स देवान्यक्षत्[6] । व्यपदेशिवद्भावेन भविष्यति ॥ स तर्हि व्यपदेशिवद्भावो वक्तव्यः । न वक्तव्यः ।

उक्तं वा ॥ ७ ॥

किमुक्तम् । तत्र व्यपदेशिवद्वचनमेकाचो द्वे प्रथमार्थं षत्वे चादेशसंप्रत्ययार्थम्

---

[1] तदोः सः सावनन्त्ययोः ७. २. १०६ [2] च्लेः सिच् ३. १. ४४. [3] एकाचो द्वे प्रथमस्य ; लिटि धातोरनभ्यासस्य ६. १. १ ; ८. [4] धात्वादेः षः सः ६. १. ६४. [5] सिब्बहुलं लेटि ३. १. ३४. [6] ऋ. सं. ३. ४. ३.

अवचनाल्लोकविज्ञानात्सिद्धमिति[1] ॥ यदपि नानाविभक्तीनां च समासानुपपत्तिरित्याचार्यप्रवृत्तिर्ज्ञापयति नानाविभक्त्योरेष समास इति यदयं शासिवसिघसीनां च [८. ३. ६०] इति घसिग्रहणं करोति । कथं कृत्वा ज्ञापकम् । यदि ह्यादेशस्य यः सकार इत्येवं स्याद् घसिग्रहणमनर्थकं स्यात्[2] । पश्यति त्वाचार्य आदेशो यः सकारस्तस्य षत्वमिति ततो घसिग्रहणं करोति ॥*

स्तौतिण्योरेव षण्यभ्यासात् ॥ ८ । ३ । ६१ ॥

स्तौतिणिग्रहणं किमर्थम् । अस्तौतिण्यन्तानां मा भूत् । सिसिक्षति ॥ अथैवकारः किमर्थः । नियमार्थः । स्तौतिण्यन्तानामेव नान्येषामिति । नैतदस्ति प्रयोजनम् । सिद्धे विधिरारभ्यमाणोऽन्तरेणैवकारकरणं नियमार्थो भविष्यति । इष्टतोऽवधारणार्थस्तर्हि । यथैवं विज्ञायेत स्तौतिण्योरेव षणीति । मैवं विज्ञायि स्तौतिण्योः षण्येवेति । इह न स्यात् तुष्टाव ॥ अथ षणीति किमर्थम् । सेषीव्यते ॥ को विनतेऽनुरोधः । अविनते नियमो मा भूत् । सुषुप्सतीति ॥ कः सानुबन्धेऽनुरोधः । षशब्दमात्रे नियमो मा भूत् । सुषुपिष इन्द्रम्[3] । सुषुपिष इहेति ॥ अभ्यासादिति किमर्थम् । अभ्यासाद्या प्राप्तिस्तस्या नियमो यथा स्यादुपसर्गाद्या प्राप्तिस्तस्या नियमो मा भूत् । अभिषिषिक्षति[4] । नैतदस्ति । असिद्धमुपसर्गात्षत्वं तस्यासिद्धत्वान्नियमो न भविष्यति । इदं तर्हि प्रयोजनम् । सनि योऽभ्यासस्तस्माद्या प्राप्तिस्तस्या नियमो यथा स्याद्यङि योऽभ्यासस्तस्माद्या प्राप्तिस्तत्र नियमो मा भूदिति । सोषुप्यतेः सन् सोषुपिषते । अथवाभ्यासाद्या प्राप्तिस्तस्या नियमो यथा स्याद्धातोर्या प्राप्तिस्तस्या नियमो मा भूत् । अधीषिषति । ननु च षणीत्युच्यते । षणीति नैषा परसप्तमी शक्या विज्ञातुं सन्यङन्तं हि द्विरुच्यते[5] । तस्मादेषा सत्सप्तमी षणि सतीति । सत्सप्तमी चेत्प्राप्नोति ॥**

स्थादिष्वभ्यासेन चाभ्यासस्य ॥ ८ । ३ । ६४ ॥

किमर्थमिदमुच्यते ।

---

* [V. M. om. शासिवसिघसीनां च (६०)].

** [V. M. om. सः स्विदिस्वदिसहीनां च (६२) ; प्राक् सितादड्व्यवायेपि (६३)].

[1] (आद्यन्तवदेकस्मिन् १. १. २१) अवचनाल्लोकविज्ञानात् सिद्धम् १. १. २१ वा. ५.

[2] लुङ्सनोर्घस्ऌ ; घञपोश्च ; बहुलं छन्दसि ; लिट्यन्यतरस्याम् २. ४. ३७-४०.

[3] इन्द्रं wrong for इन्द्रियं ; see तै. सं. ६. १. ४. ७.

[4] उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् ८. ३. ६५.

[5] सन्यङोः ६. १. ९.

स्थादिष्वभ्यासवचनं नियमार्थम् ॥ १ ॥

नियमार्थोऽयमारम्भः । स्थादिष्वेवाभ्यासस्य यथा स्यात् । इह मा भूत् । अभिसुसूषति[1] ॥

अथ किमर्थमभ्यासेन चेत्युच्यते ।

तद्व्यवाये चाषोपदेशार्थम् ॥ २ ॥

तद्व्यवायेऽभ्यासव्यवाये चाषोपदेशस्यापि यथा स्यात् । अभिषिषेणयिषति ॥

अवर्णार्थं षणि प्रतिषेधार्थं च ॥ ३ ॥

अवणार्थं तावत् । अभितष्ठौ । षणि प्रतिषेधार्थम्[1] । अभिषिषिक्षति ॥

उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् ॥ ८ । ३ । ६५ ॥

उपसर्गात्षत्वे निस उपसंख्यानमनिणन्तत्वात् ॥ १ ॥

उपसर्गात् षत्वे निस उपसंख्यानं कर्तव्यम्। निःषुणोति निःषिञ्चति । किं पुनः कारणं न सिध्यति । अनिणन्तत्वात् । इणन्तादुपसर्गात्षत्वमुच्यते न च निसिणन्तः ॥

न वा वर्णाश्रयत्वात्षत्वस्य तद्विशेषक उपसर्गो धातुश्च ॥ २ ॥

न वा वक्तव्यम् । किं कारणम् । वर्णाश्रयत्वात्षत्वस्य । वर्णाश्रयं षत्वम् । तद्विशेषक उपसर्गो धातुश्च । नैवं विज्ञायत इणन्तादुपसर्गादिति । कथं तर्हि । इण उत्तरस्य सकारस्य चेदिणुपसर्गस्य स चेत्सकारः सुनोत्यादीनामिति । तत्र शर्व्यवाय इत्येव सिद्धम्[2] ॥ यद्येवं धातूपसर्गयोरभिसंबन्धोऽकृतो भवति । तत्र को दोषः । इहापि प्राप्नोति । विगताः सेचका अस्माद् ग्रामाद्विसेचको ग्रामः । धातूपसर्गयोश्चाभिसंबन्धः कृतः । कथम् । सुनोत्यादिभिरत्रोपसर्गं विशेषयिष्यामः सुनोत्यादीनां य उपसर्गस्तस्य य इणिति ॥

सुनोत्यादीनां षत्वे ण्यन्तस्योपसंख्यानमधिकत्वात् ॥ ३ ॥

सुनोत्यादीनां षत्वे ण्यन्तस्योपसंख्यानं कर्तव्यम् । अभिषावयति । किं कारणम् ।

---

[1] स्तौतिण्योरेव षण्यभ्यासात् ८. ३. ६१. [2] नुम्विसर्जनीयशर्व्यवायेपि ८. ३. ५८.

अधिकत्वात् । व्यतिरिक्तः सुनोत्यादिरिति कृत्वोपसर्गात्सुनोत्यादीनामिति षत्वं न प्राप्नोति ॥

न वावयवस्यानन्यत्वात् ॥ ४ ॥

न वा वक्तव्यम् । किं कारणम् । अवयवस्यानन्यत्वात् । अवयवोऽत्रानन्यः ॥

नामधातोस्तु प्रतिषेधः ॥ ५ ॥

नामधातोस्तु प्रतिषेधो वक्तव्यः । सावकमिच्छत्यभिसावकीयति परिसावकीयति ॥

न वानुपसर्गत्वात् ॥ ६ ॥

न वा वक्तव्यः । किं कारणम् । अनुपसर्गत्वात् । यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवतो न चात्र सुनोतिं प्रति क्रियायोगः । किं तर्हि । सावकीयतिं प्रति । इहापि तर्हि न प्राप्नोति । अभिषावयति । अत्रापि न सुनोतिं प्रति क्रियायोगः । किं तर्हि । सावयतिं प्रति । सुनोतिं प्रत्यत्र क्रियायोगः । कथम् । नासावेवं प्रेष्यते सुन्वभीति । किं तर्हि । उपसर्गविशिष्टामसौ क्रियां प्रेष्यतेऽभिषुण्विति ॥*

स्तम्भेः ॥ ८ । ३ । ६७ ॥

अप्रतेरिति[1] वर्तत उताहो निवृत्तम् । निवृत्तमित्याह । कथं ज्ञायते । योगविभागकरणसामर्थ्यात् । इतरथा हि सदिस्तम्भ्योरप्रतेरित्येव ब्रूयात् ॥ अस्त्यन्यद्योगविभागकरणे प्रयोजनम् । किम् । अवाच्चालम्बनाविदूर्ययोः [६८] इति वक्ष्यति तत्स्तम्भेरेव यथा स्यात्सेदर्मा भूदिति । नैतदस्ति प्रयोजनम् । एकयोगेऽपि सति यस्यालम्बनाविदूर्ये स्तस्तस्य भविष्यति । कस्य चालम्बनाविदूर्ये स्तः । स्तम्भेरेव ।**

अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु ॥ ८ । ३ । ७२ ॥

अथ यः प्राण्यप्राणी च कथं तत्र भवितव्यम् । अनुष्यन्देते मत्स्योदके इति । आहोस्विदनुस्यन्देते मत्स्योदके इति । यदि तावदप्राणी विधिनाश्रीयते ऽस्त्यत्राप्राणीति कृत्वा भवितव्यं षत्वेन । अथ प्राणी प्रतिषेधेनाश्रीयते ऽस्त्यत्र प्राणीति कृत्वा भवितव्यं प्रतिषेधेन । किं पुनरत्रार्थसतत्त्वम् । देवा ज्ञातुमर्हन्ति ॥

---

* [V. M. om. सदिरप्रतेः (६६)].

** [V. M. om. अवाच्चालम्बनाविदूर्ययोः (६८); वेश्च स्वनो भोजने (६९); परिनिविभ्यः सेवासितसयसिवुसहसुट्स्तुस्वञ्जाम् (७०); सिवादीनां वाड्व्यवायेपि (७१)].

[1] सदिरप्रतेः ८. ३. ६६.

परेश्च ॥ ८ । ३ । ७४ ॥

अनिष्ठायामिति[1] वर्तत उताहो निवृत्तम् । निवृत्तमित्याह । कथं ज्ञायते । योगविभागकरणसामर्थ्यात् । इतरथा हि विपरिभ्यां च स्कन्देरनिष्ठायामित्येव ब्रूयात् ॥*

इणः षीध्वंलुङ्लिटां धोऽङ्गात् ॥ ८ । ३ । ७८ ॥

विभाषेटः ॥ ८ । ३ । ७९ ॥

इण्ग्रहणं किमर्थम् ॥

इण्ग्रहणं ढत्वे कवर्गनिवृत्त्यर्थम् ॥ १ ॥

इण्ग्रहणं क्रियते कवर्गाड्ढत्वं मा भूदिति[2] । पक्षीध्वम् यक्षीध्वम् ॥

किं पुनरिदमिण्ग्रहणं प्रत्ययविशेषणम् । इण उत्तरेषां षीध्वंलुङ्लिटां यो धकार इति । आहोस्विद्धकारविशेषणम् । इण उत्तरस्य धकारस्य स चेत्षीध्वंलुङ्लिटां धकार इति । कश्चात्र विशेषः ।

तत्र प्रत्ययपरत्व इटो लिटि ढत्वं परादित्वात् ॥ २ ॥

तत्र प्रत्ययपरत्व इटो लिटि ढत्वं न प्राप्नोति । लुलुविढ्वे लुलुविध्व इति । किं कारणम् । परादित्वात् । इट् परादिः ॥ वचनाद्भविष्यति । अस्ति वचने प्रयोजनम् । किम् । अलविढ्वम् अलविध्वम् ॥ अस्तु तर्हि धकारविशेषणम् ।

धकारपरत्वे षीध्वस्यनन्तरत्वादिटो विभाषाभावः ॥ ३ ॥

धकारपरत्वे षीध्वम्यनन्तरत्वादिटो विभाषा न प्राप्नोति । लविषीढ्वम् लविषीध्वमिति ॥ वचनाद्भविष्यति । अस्ति वचने प्रयोजनम् । किम् । लुलुविढ्वे लुलुविध्व इति ॥

इण्ग्रहणस्य चाविशेषणत्वात्ष्यादिमात्रे ढत्वप्रसङ्गः ॥ ४ ॥

इण्ग्रहणस्य चाविशेषणत्वात्ष्यादिमात्रे ढत्वं प्राप्नोति । पक्षीध्वम् यक्षीध्वमिति ॥

---

* [V. M. om. परिस्कन्दः प्राच्यभरतेषु (७५) ; स्फुरतिस्फुलत्योर्निर्निविभ्यः (७६) ; वेः स्कभ्नातेर्नित्यम् (७७)].

[1] वेः स्कन्देरनिष्ठायाम् ८. ३. ७३.

[2] इण्कोः ८. ३. ५७.

नैष दोषः। अङ्गादिति वक्ष्यामि। अङ्गग्रहणाच्च दोषः। इह न प्राप्नोति। उपदिदीयिध्वे उपदिदीयिढ्वे[१]। यो ह्यत्राङ्गान्त्य इण् न तस्मादुत्तर इट्। यस्माच्चोत्तर इड् नासावङ्गान्त्य इण् इति॥

यथेच्छसि तथास्तु। अस्तु तावत्प्रत्ययविशेषणम्। ननु चोक्तं तत्र प्रत्ययपरत्व इटो लिटि ढत्वं परादित्वात् लुलुविढ्वे लुलुविध्व इति। वचनाद्भविष्यति। ननु चोक्तमस्ति वचने प्रयोजनम्। किम्। अलविढ्वम् अलविध्वमिति। यदेतस्मिन्योगे[२] लिड्ग्रहणं तदनवकाशं तस्यानवकाशत्वाद्वचनाद्भविष्यति॥ अथवा पुनरस्तु धकारविशेषणमिति। ननु चोक्तं धकारपरत्वे षीध्वम्यनन्तरत्वादिटो विभाषाभावः लविषीढ्वम् लविषीध्वमिति। वचनाद्भविष्यति। ननु चोक्तमस्ति वचने प्रयोजनम्। किम्। लुलुविढ्वे लुलुविध्व इति। यदेतस्मिन्योगे षीध्वंग्रहणं तदनवकाशं तस्यानवकाशत्वाद्वचनाद्भविष्यति॥ यदप्युच्यत इण्ग्रहणस्य चाविशेषणत्वात् ष्यादिमात्रे ढत्वप्रसङ्ग इत्यङ्गादिति वक्ष्यामि। ननु चोक्तमङ्गग्रहणाच्च दोष इति। पूर्वस्मिन्योगे यदङ्गग्रहणं तदुत्तरत्र निवृत्तम्। अथवा पूर्वस्मिन्योग इण्ग्रहणं प्रत्ययविशेषणमुत्तरत्र धकारविशेषणम्॥*

अग्नेः स्तुत्स्तोमसोमाः॥ ८। ३। ८२॥

अग्नेर्दीर्घात्सोमस्य॥ १॥

अग्नेर्दीर्घात्सोमस्येति वक्तव्यम्। अग्नीषोमौ[३]॥

इतरथा ह्यनिष्टप्रसङ्गः॥ २॥

इतरथा ह्यनिष्टं प्रसज्येत। आग्निसोमौ माणवकाविति॥

तत्तर्हि वक्तव्यम्। न वक्तव्यम्। गौणमुख्ययोर्मुख्ये संप्रतिप्रत्तिः। तद्यथा। गौरनुबन्ध्यो ऽजोऽग्नीषोमीय इति न वाहीकोऽनुबध्यते। कथं तर्हि वाहीके वृद्ध्यात्वे भवतः[४]। गौस्तिष्ठति। गामानयेति। अर्थाश्रय एतदेवं भवति। यद्धि शब्दाश्रयं शब्दमात्रे तद्भवति। शब्दाश्रये च वृद्ध्यात्वे॥**

---

* [V. M. om. समासेऽङ्गुलेः सङ्गः (८०); भीरोः स्थानम् (८१)].

** [V. M. om. ज्योतिरायुषः स्तोमः (८३); मातृपितृभ्यां स्वसा (८४)].

[१] दीङो युडचि क्ङिति ६. ४. ६३. [२] इणः षीध्वंलुङ्लिटां धोऽङ्गात् ८. ३. ७८; विभाषेटः ८. ३. ७९. [३] ईदग्नेः सोमवरुणयोः ६. ३. २७. [४] गोतो णित् ७. १. ९०; औतोऽम्शसोः ६. १. ९३.

मातुःपितुभ्र्यामन्यतरस्याम् ॥ ८ । ३ । ८५ ॥

सान्ताभ्यां चेति वक्तव्यम्[1] । इहापि यथा स्यात् । मातुःष्वसा मातुःस्वसा । पितुःष्वसा पितुःस्वसेति ।

मातुः पितुरिति सान्तग्रहणानर्थक्यमेकदेशविकृतस्यानन्यत्वात् ॥ १ ॥

मातुःपितुरिति सान्तग्रहणमनर्थकम् । किं कारणम् । एकदेशविकृतस्यानन्यत्वात् । एकदेशविकृतमनन्यवद्भवतीति सान्तस्यापि भविष्यति ॥*

उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ॥ ८ । ३ । ८७ ॥

अस्तिग्रहणं किमर्थम् । इह मा भूत् । अनुसृतम् विसृतमिति । नैतदस्ति प्रयोजनम् । यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवतो न चैतं सकारं प्रति क्रियायोगः । इहापि तर्हि न प्राप्नोति अभिषन्ति विषन्तीति न ह्यस्तिः क्रियावचनः । कः पुनराह नास्तिः क्रियावचन इति । क्रियावचनोऽस्तिः । आतश्च क्रियावचनो व्यत्यनुषते कर्तरि कर्मव्यतिहारे [१. ३. १४] इत्यनेनात्मनेपदं भवति । कर्मव्यतिहारश्च कः । क्रियाव्यतिहारः ॥ प्रादुःशब्दात्तर्हि मा भूत् । प्रादुःशब्दश्च नियतविषयः कृभ्वस्तियोग एव वर्तते ॥ उपसर्गात्तर्हि स्यतेर्मा भूदिति । इष्यत उपसर्गात्स्यतेः षत्वम् । आतश्चेष्यत एवं ह्याहोपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् [८. ३. ६५] इति ॥ प्रादुःशब्दात्तर्हि स्यतेर्मा भूदिति । प्रादुःशब्दश्च नियतविषयः कृभ्वस्तियोग एव वर्तते ॥ इदं तर्हि प्रयोजनमिह मा भूत् अनुसूतेरप्रत्ययोऽनुसूः[2] अनुस्वोऽपत्यमानुसेयः[3] ॥

सुविनिर्दुर्भ्यः सुपिसूतिसमाः ॥ ८ । ३ । ८८ ॥

किमर्थं स्वपेः सुपिभूतस्य ग्रहणं क्रियते ।

सुपेः षत्वं स्वपेर्मा भूत्

सुपेः षत्वमुच्यते तत् स्वपेर्मा भूदिति । सुस्वप्नः विस्वप्नगिति ॥

---

* [V. M. om. अभिनिसः स्तनः शब्दसंज्ञायाम् (८६)].

[1] वा शरि ८. ३. ३६ ; विसर्जनीयस्य सः ८. ३. ३४. [2] सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेपि क्विप् ३. २. ६१. [3] चतुष्पाद्भ्यो ढञ् ४. १. १३५ ; ढे लोपोऽकद्र्वाः ६. ४. १४७.

विसुष्वापेति केन न ।

विसुष्वापेत्यत्र[1] कस्मान्न भवति ।

हलादिशेषान्न सुपिः

हलादिशेषे[2] कृते नैष सुपिर्भवति ॥ इदमिह संप्रधार्यम् । हलादिशेषः क्रियतां संप्रसारणमिति किमत्र कर्तव्यम् । परत्वाद्धलादिशेषः ।

इष्टं पूर्वं प्रसारणम् ॥ १ ॥

इष्यते हलादिशेषात्पूर्वं संप्रसारणम् । आतश्चेष्यत एवं ह्याहाभ्याससंप्रसारणं हलादिशेषाद्विप्रतिषेधेनेति[3] ॥ एवं तर्हि स्थादिष्वभ्यासस्येत्येतस्मान्नियमान्न भविष्यति[4] ।

स्थादीनां नियमो नात्र प्राक्सितादुत्तरः सुपिः ।

प्राक्सितसंशब्दनात्स नियम[5] उत्तरश्च सुपिः पठ्यते ॥ एवं तर्ह्यर्थवद्ग्रहणे नानर्थकस्येत्येवमेतस्य न भविष्यति ।

अनर्थके विषुषुपुः

यद्यर्थवतो ग्रहणं विषुषुपुरिति न सिध्यति । नैष दोषः । कथम् ।

सुपिभूतो द्विरुच्यते ॥ २ ॥

सुपिभूतस्य द्विर्वचनम्[6] ॥

सुपेः षत्वं स्वपेर्मा भूद्विसुष्वापेति केन न ।
हलादिशेषान्न सुपिरिष्टं पूर्वं प्रसारणम् ॥ १ ॥
स्थादीनां नियमो नात्र प्राक्सितादुत्तरः सुपिः ।
अनर्थके विषुषुपुः सुपिभूतो द्विरुच्यते ॥ २ ॥*

कपिष्ठलो गोत्रे ॥ ८ । ३ । ९१ ॥

कपिष्ठलो गोत्रप्रकृतौ ॥ १ ॥

कपिष्ठलो गोत्रप्रकृताविति वक्तव्यम् । गोत्र इत्युच्यमान इहैव स्यात् । कापिष्ठलिः । इह न स्यात् । कपिष्ठलः कापिष्ठलायनः ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् ।

---

* [V. M. om. निनदीभ्यां स्नातेः कौशले (८९); सूत्रं प्रतिष्णातम् (९०)].

[1] लिटयभ्यासस्योभयेषाम् ६. १. १७. [2] हलादिः शेषः ७. ४. ६०. [3] अभ्याससंप्रसारणं हलादिशेषाद्विप्रतिषेधेन ६. १. १७ वा. १. [4] स्थादिष्वभ्यासेन चाभ्यासस्य ८. ३. ६४; स्थादिष्वभ्यासवचनं नियमार्थम् ८. ३. ६४ वा. १. [२] परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् ८. ३. ७०. [6] वचिस्वपियजादीनां किति ६. १. १५; लिटि धातोरनभ्यासस्य ६. १. ८.

नैवं विज्ञायते कपिष्ठल इति गोत्रे निपात्यत इति । कथं तर्हि । गोत्रे यः कपिष्ठलशब्दस्तस्य षत्वं निपात्यते यत्र वा तत्र वेति ॥*

अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः ॥ ८ । ३ । ९७ ॥

स्थ इति किमिदं धातुग्रहणमाहोस्विद्रूपग्रहणम् । किं चातः । यदि धातुग्रहणं गोस्थानमित्यत्र प्राप्नोति । अथ रूपग्रहणं सव्येष्ठाः परमेष्ठी सव्येष्ठा सारथिरित्यत्र न प्राप्नोति ॥ यथेच्छसि तथास्तु । अस्तु तावद्धातुग्रहणम् । कथं गोस्थानमिति । सवनादिषु[1] पाठः करिष्यते । अथवा पुनरस्तु रूपग्रहणम् । कथं सव्येष्ठाः परमेष्ठी सव्येष्ठा सारथिरिति । स्थः स्थास्थिन्स्थॄणामिति वक्तव्यम् ॥

सुषामादिषु च ॥ ८ । ३ । ९८ ॥

अविहितलक्षणो मूर्धन्यः सुषामादिषु द्रष्टव्यः ॥**

ह्रस्वात्तादौ तद्धिते ॥ ८ । ३ । १०१ ॥

ह्रस्वात्तादौ तिङि प्रतिषेधः ॥ १ ॥

ह्रस्वात्तादौ तिङि प्रतिषेधो वक्तव्यः । भिन्द्युस्तराम् छिन्द्युस्तरामिति ॥***

स्तुतस्तोमयोश्छन्दसि ॥ ८ । ३ । १०५ ॥

स्तुतस्तोमयोश्छन्दस्यनर्थकं वचनं पूर्वपदादिति सिद्धत्वात् ॥ १ ॥

स्तुतस्तोमयोश्छन्दसि वचनमनर्थकम् । किं कारणम् । पूर्वपदादिति सिद्धत्वात् । पूर्वपदात् [८. ३. १०६] इत्येव सिद्धम् ॥****

---

* [V. M. om. प्रष्ठोऽग्रगामिनि (९२); वृक्षासनयोर्विष्टरः (९३); छन्दोनाम्नि च (९४); गावियुधिभ्यां स्थिरः (९५); विकुशमिपरिभ्यः स्थलम् (९६)].

** [V. M. om. एति संज्ञायामगात् (९९); नक्षत्राद्वा (१००)].

*** [V. M. om. निसस्तपतावनासेवने (१०२); युष्मत्तत्ततक्षुःष्वन्तःपादम् (१०३); यजुष्येकेषाम् (१०४)].

**** [V. M. om. पूर्वपदात् (१०६); सुञः (१०७)].

[1] न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् ८. ३. ११०.

सनोतेरनः ॥ ८ । ३ । १०८ ॥

सनोतेरन इति च ॥ १ ॥

किम् । वचनमनर्थकमित्येव । किं कारणम् । पूर्वपदादिति सिद्धत्वात्[1] ॥ नियमार्थं तर्हीदं वक्तव्यम् । सनोतेरनकारस्यैव यथा स्यात् । इह मा भूत् । गोसनिमिति[2] ।

सनोतेरन इति नियमार्थमिति चेत्सवनादिकृतत्वात्सिद्धम् ॥ २ ॥

सनोतेरन इति नियमार्थमिति चेत्सवनादिषु[3] पाठः करिष्यते ॥

सनर्थं तु ॥ ३ ॥

सनर्थं त्विदं वक्तव्यम् । सिसनिषति ॥ एतदपि नास्ति प्रयोजनम् । स्तौतिण्योरेव षण्यभ्यासात् [८. ३. ६१] इत्येतस्मान्नियमान्न भविष्यति ॥ ण्यर्थं तर्हीदं वक्तव्यम् । सिसानयिषति । कथं पुनरण्यन्तस्य प्रतिषेधे ण्यन्तः शक्यो विज्ञातुम् । सामर्थ्यात् । अण्यन्तस्य प्रतिषेधवचने प्रयोजनं नास्तीति कृत्वा ण्यन्ते विज्ञास्यते ॥ अथवायमस्त्यण्यन्तः । सिसनिषतेरप्रत्ययः सिसनीः ॥*

न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् ॥ ८ । ३ । ११० ॥

किमर्थं सवनादिष्वश्वसनिशब्दः पठ्यते । पूर्वपदात् [८. ३. १०६] इति षत्वं प्राप्नोति तद्बाधनार्थम् ॥ नैतदस्ति प्रयोजनम् । इणन्तादिति[4] तत्रानुवर्ततेऽनिणन्तश्चायम् । नैव प्राप्नोति नार्थः प्रतिषेधेन ॥ एवं तर्हि सिद्धे सति यत्सवनादिष्वश्वसनिशब्दं पठति तज्ज्ञापयत्याचार्योऽनिणन्तादपि षत्वं भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । जलाषाहं माष इत्येतत्सिद्धं भवति[5] । अथवैकदेशविकृतार्थोऽयमारम्भः । अश्वषा इति[6] ॥**

---

* [V. M. om. सहेः पृतनर्ताभ्यां च (१०९)].

** [V. M. om. सात्पदाद्योः (१११)].

[1] स्तुतस्तोमयोश्छन्दस्यनर्थकं वचनं पूर्वपदादिति सिद्धत्वात् ८. ३. १०५ वा. १.

[2] अ. सं. ३. २०. १०.

[3] न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् ८. ३. ११०.

[4] इणः षीध्वंलुङ्लिटां धोऽङ्गात् ८. ३. ७८.

[5] पूर्वपदात् ८. ३. १०६ ; सनोतेरनः ८. ३. १०८.

[6] सनोतेरनः ८. ३. १०८.

सिचो यङि ॥ ८ । ३ । ११२ ॥

उपसर्गादिति[1] या प्राप्तिर्भवितव्यं तस्याः प्रतिषेधेनोताहो न । न भवितव्यम् । किं कारणम् । उपसर्गात्षत्वं प्रतिषेधविषय आरभ्यते तद्यथैव पदादिलक्षणं[2] प्रतिषेधं बाधत एवं सिचो यङीत्येतमपि बाधते ॥ न बाधते । किं कारणम् । येन नाप्राप्ते तस्य बाधनं भवति न चाप्राप्ते पदादिलक्षणे प्रतिषेध उपसर्गात्षत्वमारभ्यते सिचो यङीत्येतस्मिन्पुनः प्राप्ते चाप्राप्ते च । अथवा पुरस्तादपवादा अनन्तरान् विधीन् बाधन्त इत्येवमुपसर्गात्षत्वं पदादिलक्षणं प्रतिषेधं बाधिष्यते सिचो यङीत्येतं न बाधिष्यते । तस्मादभिसेसिच्यत इति भवितव्यम् ॥*

सोढः ॥ ८ । ३ । ११५ ॥

किमर्थं सहिः सोढभूतो गृह्यते । यत्रास्यैतद्रूपं तत्र यथा स्यात् । इह मा भूत् । परिषहत इति[3] ॥

स्तम्भुसिवुसहां चङि ॥ ८ । ३ । ११६ ॥

स्तम्भुसिवुसहां चङ्युपसर्गात् ॥ १ ॥

स्तम्भुसिवुसहां चङ्युपसर्गादिति वक्तव्यम् । किं प्रयोजनम् । उपसर्गाद्या प्राप्तिस्तस्याः प्रतिषेधो यथा स्यात् । अभ्यासाद्या प्राप्तिस्तस्याः प्रतिषेधो मा भूदिति । पर्यसीषहत् ॥

सुनोतेः स्यसनोः ॥ ८ । ३ । ११७ ॥

सनि किमुदाहरणम् । सुसूषति । नैतदस्ति प्रयोजनम् । स्तौतिण्योरेव षणीत्येतस्मान्नियमान्न भविष्यति[4] ॥ इदं तर्हि । अभिसुसूषति । एतदपि नास्ति प्रयोजनम् । स्थादिष्वभ्यासेन चाभ्यासस्य [८. ३. ६४] इत्येतस्मान्नियमान्न भविष्यति[5] ॥ इदं तर्हि प्रयोजनम् । अभिसुसूषतेरप्रत्ययोऽभिसुसूः ॥

---

* [V. M. om. सेघतेर्गतौ (११३); प्रतिस्तब्धनिस्तब्धौ च (११४)].

[1] उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् ८. ३. ६५.

[2] सात्पदाद्योः ८. ३. १११.

[3] परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् ८. ३. ७०.

[4] स्तौतिण्योरेव षण्यभ्यासात् ८. ३. ६१.

सदेः परस्य लिटि ॥ ८ । ३ । ११८ ॥

सदो लिटि प्रतिषेधे स्वञ्जेरुपसंख्यानम् ॥ १ ॥

सदो लिटि प्रतिषेधे स्वञ्जेरुपसंख्यानं कर्तव्यम् । परिषस्वजे ॥*

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्येऽष्टमस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम् ॥ पादश्च समाप्तः ॥ 5

---

* [V. M. om. निन्यभिभ्योऽड्व्यवाये वा छन्दसि (११९)].

रषाभ्यां नो णः समानपदे ॥ ८ । ४ । १ ॥

रषाभ्यां णत्व ऋकारग्रहणम् ॥ १ ॥

रषाभ्यां णत्व ऋकारग्रहणं कर्तव्यम् । रषाभ्यां नो णः समानपद ऋकाराच्चेति वक्तव्यम् । इहापि यथा स्यात् । मातॄणाम् पितॄणामिति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । योऽसावृकारे रेफस्तदाश्रयं णत्वं भविष्यति । न सिध्यति । किं कारणम् । न हि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते ॥

एकदेशे नुडादिषु चोक्तम् ॥ १ ॥

किमुक्तम् । अग्रहणं चेन्नुड्विधिलादेशविनामेष्वृकारग्रहणमिति[1] । तस्माद्गृह्यन्ते ॥ एवमपि न सिध्यति । किं कारणम् । अनन्तरत्वात् । यत्तद्रेफात्परं भक्तेस्तेन व्यवहितत्वान्न प्राप्नोति । अड्व्यवाय इत्येवं भविष्यति । न सिध्यति । किं कारणम् । वर्णैकदेशाः के वर्णग्रहणेन गृह्यन्ते । ये व्यपवृक्ता अपि वर्णा भवन्ति । यच्चात्र रेफात्परं भक्तेर्न तत्क्वचिदपि व्यपवृक्तं दृश्यते । एवं तर्हि योगविभागः करिष्यते[2] । रषाभ्यां नो णः समानपदे । ततो व्यवाये । व्यवाये च रषाभ्यां नो णो भवतीति । ततोऽट्कुप्वाङ्नुम्भिरिति । इदमिदानीं किमर्थम् । नियमार्थम् । एतैरेवाक्षरसमाम्नायिकैर्व्यवाये नान्यैरिति ॥ अथवाचार्यप्रवृत्तिर्ज्ञापयति भवत्यृकाराण्णत्वमिति यदयं क्षुभ्नादिषु नृनमनशब्दं पठति[3] । नैतदस्ति ज्ञापकम् । वृद्ध्यर्थमेतत्स्यात् । नार्नमनिरिति । यत्तर्हि तत्रैव तृप्नोतिशब्दं पठति[3] । यच्चापि नृनमनशब्दं पठति । ननु चोक्तं वृद्ध्यर्थमेतत्स्यादिति । बहिरङ्गा वृद्धिः । अन्तरङ्गं णत्वम् । असिद्धं बहिरङ्गमन्तरङ्गे ॥ अथवोपरिष्टाद्योगविभागः करिष्यते[4] । ऋतो नो णो भवति । ततश्छन्दस्यवग्रहात् । ऋत इत्येव ॥

अट्कुप्वाङ्नुम्व्यवायेऽपि ॥ ८ । ४ । २ ॥

अड्व्यवाये णत्वे ऽन्यव्यवाये प्रतिषेधः ॥ १ ॥

अड्व्यवाये णत्वे ऽन्यव्यवाये प्रतिषेधो वक्तव्यः । आदर्शेन अक्षदर्शेन ॥

---

[1] अग्रहणं चेन्नुड्विधिलादेशविनामेषु ऋकारग्रहणम् । शिवसूत्र ३. ४. वा. ११. [2] रषाभ्यां नो णः समानपदे ८. ४. २. [3] क्षुभ्नादिषु च ८. ४. ३९ गणपाठ, २ नृनमन, २५ तृप्नु. [4] छन्दस्यृदवग्रहात् ८. ४. २६.

न वान्येन व्यपेतत्वात् ॥ २ ॥

न वा वक्तव्यः । किं कारणम् । अन्येन व्यपेतत्वात् । अन्येनात्र व्यवायः ॥ यद्यप्यत्रान्येन व्यवायो ऽटापि तु व्यवायो ऽस्ति तत्रास्त्यड्व्यवाय इति प्राप्नोति । अटैव व्यवाये भवति । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । अड्ग्रहणसामर्थ्यात् । यदि हि यत्राटा चान्येन च व्यवायस्तत्र स्यादड्ग्रहणमनर्थकं स्यात् । व्यवाये नो णो भवतीत्येव ब्रूयात् । अस्त्यन्यदड्ग्रहणस्य प्रयोजनम् । किम् । योऽनिर्दिष्टैरेव व्यवायस्तत्र मा भूत् । कृत्स्नम् मृत्स्नेति । यद्येतावत्प्रयोजनं स्याच्छर्व्यवाये नेत्येव ब्रूयात् ॥

तत्समुदाये णत्वाप्रसिद्धिर्यथान्यत्र ॥ ३ ॥

तत्समुदाये व्यवायसमुदाये णत्वस्याप्रसिद्धिः । अर्केण अर्घेण । यथान्यत्रापि व्यवायसमुदाये कार्यं न भवति । क्वान्यत्र । नुम्विसर्जनीयशर्व्यवायेऽपि [८. ३. ५८] निंस्से निंस्स्वेति ॥ किं पुनः कारणमन्यत्रापि व्यवायसमुदाये कार्यं न भवति । प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति । तद्यथा । गुणवृद्धिसंज्ञे प्रत्येकं भवतः । ननु चायमप्यस्ति दृष्टान्तः समुदाये वाक्यपरिसमाप्तिरिति । तद्यथा । गर्गाः शतं दण्ड्यन्तामिति । अर्थिनश्च राजानो हिरण्येन भवन्ति न च प्रत्येकं दण्डयन्ति । यद्येवमेकेन व्यवाये न प्राप्नोति । किरिणा गिरिणेति । उभयथापि वाक्यपरिसमाप्तिर्दृश्यते । तद्यथा । गर्गैः सह न भोक्तव्यमिति प्रत्येकं च न संभुज्यते समुदितैश्च ॥

कुव्यवाये हादेशेषु प्रतिषेधः ॥ ४ ॥

कुव्यवाये हादेशेषु प्रतिषेधो वक्तव्यः । किं प्रयोजनम् ।

प्रयोजनं वृत्रघ्नः स्रुघ्नः प्राघानीति ॥ ५ ॥

हन्तेरत्पूर्वस्य [८. ४. २२] इत्यत्पूर्वग्रहणं न कर्तव्यं भवति ॥

नुम्व्यवाये णत्वे ऽनुस्वाराभावे प्रतिषेधः ॥ ६ ॥

नुम्व्यवाये णत्वे ऽनुस्वाराभावे प्रतिषेधो वक्तव्यः । प्रेन्वनम् प्रेन्वनीयम्[१] ॥

अनागमे च णत्वम् ॥ ७ ॥

अनागमे च णत्वं वक्तव्यम् । तृम्पणीयम् ॥

---

[१] इदितो नुम् धातोः ७. १. ५८ ; (नश्चापदान्तस्य झलि ८. ३. २४).

अनुस्वारव्यवायवचनात्तु सिद्धम् ॥ ८ ॥

अनुस्वारव्यवाये नो णो भवतीति वक्तव्यम् ॥ तदनुस्वारग्रहणं कर्तव्यम् । न कर्तव्यम् । क्रियते न्यास एव । नकारोऽनुस्वारः परसवर्णीभूतो निर्दिश्यते । इहापि तर्हि प्राप्नोति । प्रेन्वनम् प्रेन्वनीयम् । अनुस्वारविशेषणं नुम्ग्रहणम् । नुमो योऽनुस्वार इति । इहापि तर्हि न प्राप्नोति । तृम्पणम् तृम्पणीयम् । एवं तर्ह्ययोगवाहानामविशेषेणोपदेशश्चोदितस्तत्रानुस्वारे कृते ऽड्व्यवाय इत्येव सिद्धम्[1] । यद्येवं नार्थो नुम्ग्रहणेन । अनुस्वारे कृतेऽड्व्यवाय इत्येव सिद्धम् ॥

पूर्वपदात्संज्ञायामगः ॥ ८ । ४ । ३ ॥

पूर्वपदात्संज्ञायामुत्तरपदग्रहणम् ॥ १ ॥

पूर्वपदात्संज्ञायामुत्तरपदग्रहणं कर्तव्यम् । किं प्रयोजनम् ।

तद्धितपूर्वपदस्थाप्रतिषेधार्थम् ॥ २ ॥

तद्धितस्थस्य पूर्वपदस्थस्य च प्रतिषेधो मा भूत् । खारपायणः[2] करणप्रियः ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । पूर्वपदमुत्तरपदमिति संबन्धिशब्दावेतौ । सति पूर्वपद उत्तरपदं भवति सति चोत्तरपदे पूर्वपदं भवति । तत्र संबन्धादेतद्गन्तव्यं यत्प्रति पूर्वपदमित्येतद्भवति तत्स्थस्य नियम इति । किं च प्रत्येतद्भवति । उत्तरपदं प्रति ॥

संज्ञायां नियमवचने गप्रतिषेधान्नियमप्रतिषेधः ॥ ३ ॥

संज्ञायां नियमवचने गप्रतिषेधान्नियमस्यायं प्रतिषेधो विज्ञायतेऽग इति ॥ तत्र को दोषः ।

तत्र नित्यं णत्वप्रसङ्गः ॥ ४ ॥

तत्र पूर्वेण[3] संज्ञायां चासंज्ञायां च नित्यं णत्वं प्राप्नोति ॥

योगविभागात्सिद्धम् ॥ ५ ॥

योगविभागः करिष्यते । पूर्वपदात्संज्ञायाम् । ततोऽगः । गान्तात्पूर्वपदाद्या च यावती णत्वप्राप्तिस्तस्याः सर्वस्याः प्रतिषेधः ॥

---

[1] अयोगवाहानामट्सु णत्वम् ; शर्षु जश्भावषत्वे ; अविशेषेण संयोगोपधासंज्ञाऽलोन्त्यद्विर्वचनस्थानिवद्भावप्रतिषेधाः । ...शिवसूत्र ५ वा. ६, ७, ८ ; अयोगवाहानामविशेषेणोपदेशश्चोदितः ७. १. ७२ वा. ३. महाभाष्य.

[2] नडादिभ्यः फक् ४. १. ९९. गणपाठ, ६४ खरप.

[3] रषाभ्यां नो णः समानपदे ८. ४. १.

अप्रतिषेधो वा यथा सर्वनामसंज्ञायाम् ॥ ६ ॥

न वार्थः प्रतिषेधेन । णत्वं कस्मान्न भवति । यथा सर्वनामसंज्ञायाम् । उक्तं च सर्वनामसंज्ञायां सर्वनामसंज्ञायां निपातनाण्णत्वाभाव इति[1] । यथा पुनस्तत्र निपातनं क्रियते सर्वादीनि सर्वनामानि [१. १. २७] इतीहेदानीं किं निपातनम् । इहापि निपातनमस्ति । किम् । अणृगयनादिभ्यः [४. ३. ७३] इति ॥

नैव वा पुनरत्र पूर्वेण[2] णत्वं प्राप्नोति । किं कारणम् । समानपद इत्युच्यते न चैतत् समानपदम् । समासे कृते समानपदम् । समानमेव यन्नित्यं न चैतन्नित्यं समानपदमेव । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । समानग्रहणसामर्थ्यात् । यदि हि यत्समानं चासमानं च तत्र स्यात् समानग्रहणमनर्थकं स्यात् ॥*

विभाषौषधिवनस्पतिभ्यः ॥ ८ । ४ । ६ ॥

द्व्यक्षरत्र्यक्षरेभ्य इति वक्तव्यम् । इह मा भूत् । देवदारुवनम् ॥

इरिकादिभ्यः प्रतिषेधो वक्तव्यः । इरिकावनम् तिमिरवनम् ॥

अह्नोऽदन्तात् ॥ ८ । ४ । ७ ॥

अदन्तादन्तस्येति वक्तव्यम् । इह मा भूत् । दीर्घाह्नी शरदिति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । नैषाहन्शब्दात् षष्ठी । का तर्हि । अह्नशब्दात् प्रथमा[3] पूर्वसूत्रनिर्देशश्च ॥ अथवा युवादिषु[4] पाठः करिष्यते ॥

वाहनमाहितात् ॥ ८ । ४ । ८ ॥

आहितोपस्थितयोरिति वक्तव्यम् । इहापि यथा स्यात् । इक्षुवाहणम् शरवाहणम् ॥

अपर आह । वाहनं वाह्यादिति वक्तव्यम् । यदा हि गर्गाणां वाहनमपविद्धं तिष्ठति तदा मा भूत् । गर्गवाहनमिति ॥**

---

* [V. M. om. वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः (४); प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि (५)].

** [V. M. om. पानं देशे (१)].

[1] सर्वनामसंज्ञायां निपातनाण्णत्वाभावः १. १. २७ वा. १.

[2] रषाभ्यां नो णः समानपदे ८. ४. १.

[3] अह्नोऽह्न एतेभ्यः ५. ४. ८८.

[4] प्रातिपदिकान्तनुम्विभक्तिषु च ८. ४. ११; तत्र युवादिप्रतिषेधः ८. ४. ११ वा. ३.

वा भावकरणयोः ॥ ८ । ४ । १० ॥

वाप्रकरणे गिरिनद्यादीनामुपसंख्यानम् ॥ १ ॥

वाप्रकरणे गिरिनद्यादीनामुपसंख्यानं कर्तव्यम् । गिरिणदी गिरिनदी । चक्रणितम्बा चक्रनितम्बा ॥

प्रातिपदिकान्तनुम्विभक्तिषु च ॥ ८ । ४ । ११ ॥

प्रातिपदिकान्तस्य णत्वे समासान्तग्रहणमसमासान्तप्रतिषेधार्थम् ॥ १ ॥

प्रातिपदिकान्तस्य णत्वे समासान्तग्रहणं कर्तव्यम् । किं प्रयोजनम् । असमासान्तप्रतिषेधार्थम् । असमासान्तस्य मा भूत् । गर्गभगिनी दक्षभगिनीति ॥ न वा भवति गर्गभगिणीति । भवति यदैतद्वाक्यं गर्गाणां भगो गर्गभगः गर्गभगोऽस्या अस्तीति[1] । यदा त्वेतद्वाक्यं भवति गर्गाणां भगिनी गर्गभगिनीति तदा न भवितव्यम् । तदा मा भूदिति ॥ यदि समासान्तग्रहणं क्रियते माषवापिणी व्रीहिवापिणी अत्र न प्राप्नोति ।

लिङ्गविशिष्टग्रहणे चोक्तम् ॥ २ ॥

किमुक्तम् । गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेरिति[2] ।

तत्र युवादिप्रतिषेधः ॥ ३ ॥

तत्र युवादीनां प्रतिषेधो वक्तव्यः । आर्ययूना क्षत्रिययूना प्रपक्वानि परिपक्वानि दीर्घाह्नी शरदिति ॥*

कुमति च ॥ ८ । ४ । १३ ॥

अथेह कथं भवितव्यम् । माषकुम्भवापेण व्रीहिकुम्भवापेणेति । किं नित्यं णत्वेन भवितव्यमाहोस्विद्विभाषया[3] । यदा तावदेतद्वाक्यं भवति कुम्भस्य वापः कुम्भवापः माषाणां कुम्भवापो माषकुम्भवाप इति तदा नित्यं णत्वेन भवितव्यम् । यदा

---

* [V. M. om. एकाजुत्तरपदे णः (१२)].

[1] रषाभ्यां नो णः समानपदे ८. ४. १. [2] गतिकारकोपपदानां कृद्भिः सह समासवचनम् ४. १. ४८ वा. ४. [3] प्रातिपदिकान्तनुम्विभक्तिषु च ८. ४. ११.

त्वेतद्वाक्यं भवति माषाणां कुम्भो माषकुम्भः माषकुम्भस्य वापो माषकुम्भवाप इति तदा विभाषया भवितव्यम् ॥

उपसर्गादसमासेऽपि णोपदेशस्य ॥ ८ । ४ । १४ ॥

असमासग्रहणं किमर्थम् । समास इति वर्ततेऽसमासेऽपि यथा स्यात् । प्रणमति परिणमति । क्व पुनः समासग्रहणं प्रकृतम् । पूर्वपदात्संज्ञायामगः [८. ४. ३] इति । कथं पुनस्तेन समासग्रहणं शक्यं विज्ञातुम् । पूर्वपदग्रहणसामर्थ्यात् । समास एवैतद्भवति पूर्वपदमुत्तरपदमिति ॥

अथापिग्रहणं किमर्थम् । समासेऽपि यथा स्यात् । प्रणामकः परिणामकः ॥ यदि तर्हि समासे चासमासे चेष्यते नार्थोऽसमासेऽपिग्रहणेन । निवृत्तं पूर्वपदादिति । अविशेषेणोपसर्गाण्णत्वं वक्ष्यामि । समासे नियमान्न प्राप्नोति । असिद्धमुपसर्गाण्णत्वं तस्यासिद्धत्वान्नियमो[1] न भविष्यति ॥ एवं तर्हि सिद्धे सति यदसमासेऽपिग्रहणं करोति तज्ज्ञापयत्याचार्यो न योगे योगोऽसिद्धः । किं तर्हि । प्रकरणे प्रकरणमसिद्धमिति । किमेतस्य ज्ञापने प्रयोजनम् । यत्तदुक्तं निष्कृतम् निष्पीतमित्यत्र सत्वस्यासिद्धत्वात्षत्वं न प्राप्नोतीति[2] स न दोषो भवति ॥

णोपदेशं प्रत्युपसर्गाभावादनिर्देशः ॥ १ ॥

अगमको निर्देशोऽनिर्देशः । यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवतो न च णोपदेशं प्रति क्रियायोगः ॥ एवं तर्ह्याहायमुपसर्गादसमासेऽपि णोपदेशस्येति न च णोपदेशं प्रत्युपसर्गोऽस्ति तत्र वचनाद्भविष्यति ।

वचनप्रामाण्यादिति चेत्पदलोपे प्रतिषेधः ॥ २ ॥

वचनप्रामाण्यादिति चेत्पदलोपे प्रतिषेधो वक्तव्यः । प्रगता नायका अस्माद् ग्रामात् प्रनायको ग्राम इति ॥

सिद्धं तु यं प्रत्युपसर्गस्तत्स्थस्येति वचनात् ॥ ३ ॥

सिद्धमेतत् । कथम् । यं प्रत्युपसर्गस्तत्स्थस्य णो भवतीति वक्तव्यम् । सिध्यति । सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवास्तु । ननु चोक्तं णोपदेशं प्रत्युपसर्गा-

---

[1] पूर्वपदात्संज्ञायामगः ८. ४. ३.

[2] इणः षः ८. ३. ३९. महाभाष्य भाग ३ पृ. ४३३ प. २-३.

भावादनिर्देश इति । नैष दोषः । णोपदेश इति नैवं विज्ञायते ण उपदेशो णोपदेशः णोपदेशस्येति । कथं तर्हि । ण उपदेशोऽस्य सोऽयं णोपदेशः णोपदेशस्येति ॥

हिनु मीना ॥ ८ । ४ । १५ ॥

हिनुमीनाग्रहणे विकृतस्योपसंख्यानम् ॥ १ ॥

हिनुमीनाग्रहणे विकृतस्योपसंख्यानं कर्तव्यम् । प्रहिणोति प्रमीणीते ॥ वचनाद्भविष्यति । अस्ति वचने प्रयोजनम् । किम् । प्रहिणुतः प्रमीणाति ॥

सिद्धमचः स्थानिवत्त्वात् ॥ २ ॥

सिद्धमेतत् । कथम् । अचः स्थानिवत्त्वात् । स्थानिवद्भावादत्र णत्वं भविष्यति ॥ प्रतिषिध्यतेऽत्र स्थानिवद्भावः पूर्वत्रासिद्धे न स्थानिवदिति[1] । दोषा एवैते तस्याः परिभाषायास्तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति[2] ॥

आनि लोट् ॥ ८ । ४ । १६ ॥

लोडिति किमर्थम् । प्रहिमानि कुलानि । प्रवपानि मांसानि ।

आनि लोड्ग्रहणानर्थक्यमर्थवद्ग्रहणात् ॥ १ ॥

आनि लोड्ग्रहणमनर्थकम् । किं कारणम् । अर्थवद्ग्रहणात् । अर्थवत आनिशब्दस्य ग्रहणं नैषोऽर्थवान् ॥

अनुपसर्गाद्वा ॥ २ ॥

अथवा यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवतो न चैतमानिशब्दं प्रति क्रियायोगः ॥ इहापि तर्हि न प्राप्नोति । प्रयाणि परियाणीति । अत्रापि नानिशब्दं प्रति क्रियायोगः । आनिशब्दं प्रत्यत्र क्रियायोगः । कथम् । यत्क्रियायुक्ता इति नैवं विज्ञायते यस्य क्रिया यत्क्रिया यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवत इति । कथं तर्हि । या क्रिया यत्क्रिया यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवत इति ॥

---

[1] पूर्वत्रासिद्धे न स्थानिवत् १. १. ५८ वा. ३.

[2] न पदान्तद्विर्वचन...जश्चर्विधिषु १. १. ५८; तस्य दोषः संयोगादिलोपलत्वणत्वेषु १. १. ५८ वा. १०.

नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च ॥ ८ । ४ । १७ ॥

नेर्गदादिष्वड्व्यवाय उपसंख्यानम् ॥ १ ॥

नेर्गदादिष्वड्व्यवाय उपसंख्यानं कर्तव्यम् । प्रण्यगदत् परिण्यगदत् ॥

आङा चेति वक्तव्यम् । प्रण्यागदत् ॥

ननु चायमड् गदादिभक्तो गदादिग्रहणेन ग्राहिष्यते । न सिध्यति । अङ्गस्याडुच्यते[1] विकरणान्तं चाङ्गं सोऽसौ संघातभक्तोऽशक्यो गदादिग्रहणेन ग्रहीतुम् ॥ एवं तर्ह्यड्व्यवाय इति वर्तते । क्व प्रकृतम् । अट्कुप्वाङ्नुम्व्यवायेऽपि [८. ४. २] इति । तद्वै कार्यिविशेषणं निमित्तविशेषणेन चेहार्थः । तत्रापि निमित्तविशेषणमेव ॥*

अनितेः ॥ ८ । ४ । १९ ॥

अन्तः ॥ ८ । ४ । २० ॥

अन्तग्रहणं किमर्थम् ।

अनितेरन्तग्रहणं संबुद्ध्यर्थम् ॥ १ ॥

अनितेरन्तग्रहणं क्रियते संबुद्ध्यर्थम् । हे प्राण् ॥

अपर आह । अनितेरन्तः पदान्तस्य । अनितेरन्तग्रहणं क्रियते पदान्तस्य नेति[2] प्रतिषेधः प्राप्नोति तद्बाधनार्थम् ॥

यो वा तस्मादनन्तरः ।

अथवायमन्तशब्दोऽस्त्येवावयववाची । तद्यथा । वस्त्रान्तः वसनान्त इति । अस्ति सामीप्ये वर्तते । तद्यथा । उदकान्तं गतः । उदकसमीपं गत इति गम्यते । तद्यः सामीप्ये वर्तते तस्य ग्रहणं विज्ञायते । अनितेः समीपे यो रेफस्तस्मान्नस्य यथा स्यात् । प्राणिति । इह मा भूत् । पर्यनिति ॥

---

* [V. M. om. शेषे विभाषाऽकखादावषान्त उपदेशे (१८)].

[1] लुङ्लङ्लृङ्क्ष्वडुदात्तः ६. ४. ७१. [2] पदान्तस्य ८. ४. ३७.

उभौ साभ्यासस्य ॥ ८ । ४ । २१ ॥

साभ्यासस्य द्वयोरिष्टम्।

साभ्यासस्य द्वयोर्णत्वमिष्यते । प्राणिणिषति ॥

हन्तेरत्पूर्वस्य ॥ ८ । ४ । २२ ॥

अत्पूर्वस्येति किमर्थम् । प्रघ्नन्ति परिघ्नन्ति ।

हन्तेरत्पूर्वस्य वचन उक्तम् ॥ १ ॥

किमुक्तम् । कुव्यवाये हादेशेषु प्रतिषेध इति[1] ॥*

उपसर्गादनोत्परः ॥ ८ । ४ । २८ ॥

कथमिदं विज्ञायते । ओकारात्पर ओत्परः न ओत्परोऽनोत्पर इति । आहोस्विदोकारः परोऽस्मात्सोऽयमोत्परः न ओत्परोऽनोत्पर इति । किं चातः । यदि विज्ञायत ओकारात्पर ओत्परः न ओत्परोऽनोत्पर इति प्र नो मुञ्चतम्[2] अत्रापि प्राप्नोति । अथ विज्ञायत ओकारः परोऽस्मात्सोऽयमोत्परः न ओत्परोऽनोत्पर इति प्र णो वनिर्देवकृतौ[3] अत्र न प्राप्नोति । उभयथा च प्रक्रमे दोषो भवति । प्र नः मुञ्चतम् प्र नो मुञ्चतम् । प्र उ नः प्रो नः ।

भाविन्यप्योति नेष्यते ।

भाविन्यप्योकारे णत्वं नेष्यते ॥ एवं तर्ह्युपसर्गाद्बहुलमिति वक्तव्यम् ॥

कृत्यचः ॥ ८ । ४ । २९ ॥

कृत्स्थस्य णत्वे निर्विण्णस्योपसंख्यानम् ॥ १ ॥

कृत्स्थस्य णत्वे निर्विण्णस्योपसंख्यानं कर्तव्यम् । निर्विण्णो[4]ऽहमनेन वासेन ॥

---

* [V. M. om. वमोर्वा (२३) ; अन्तरदेशे (२४) ; अयनं च (२५) ; छन्दस्यृदवग्रहात् (२६) ; नश्च धातुस्थोरुषुभ्यः (२७)].

[1] कुव्यवाये हादेशेषु प्रतिषेधः ८. ४. २. वा. ४. [2] ऋ. सं. ६. ७४. ४. [3] अथर्वसं. ५. ७. ३. [4] ष्टुना ष्टुः ८. ४. ४१.

णेर्विभाषा ॥ ८ । ४ । ३० ॥

णेर्विभाषायां साधनव्यवाय उपसंख्यानम् ॥ १ ॥

णेर्विभाषायां साधनव्यवाय उपसंख्यानं कर्तव्यम्। प्राप्यमाणम् प्राप्यमानम् ॥

तद्विधानात्सिद्धम् ॥ १ ॥

विहितविशेषणं णिग्रहणम्। ण्यन्ताद्यो विहित इति ॥

अड्धिकाराद्वा ॥ २ ॥

अथवाड्व्यवाय इति[1] वर्तते ॥*

इजादेः सनुमः ॥ ८ । ४ । ३२ ॥

किमर्थमिदमुच्यते न कृत्यचः [२९] इत्येव सिद्धम्। नियमार्थोऽयमारम्भः। इजादेरेव च सनुम्कान्नान्यस्मात्सनुम्कादिति। क मा भूत्। प्रमङ्कनम् परिमङ्कनम् ॥

सनुमो णत्वे ऽवधारणाप्रसिद्धिर्विधेयभावात् ॥ १ ॥

सनुमो णत्वे ऽवधारणस्याप्राप्तिः। किं कारणम्। विधेयभावात्। कैमर्थक्यान्नियमो भवति। विधेयं नास्तीति कृत्वा। इह चास्ति विधेयम्। किम्। ण्यन्ताद्विभाषा प्राप्तौ[2] तत्र नित्यं णत्वं विधेयम्। तत्रापूर्वो विधिरस्तु नियमोऽस्त्वित्यपूर्वो विधिर्भविष्यति न नियमः ॥

सिद्धं तु प्रतिषेधाधिकारे सनुम्ग्रहणात् ॥ २ ॥

सिद्धमेतत्। कथम्। प्रतिषेधाधिकारे सनुम्ग्रहणात्। प्रतिषेधाधिकारे सनुम्ग्रहणं कर्तव्यम्। न भाभूपूकमिगमिप्यायिवेपिसनुमामिति[3] ॥ इहापि तर्हि न प्राप्नोति। प्रेङ्गणम् प्रेङ्गणीयम्।

कृत्स्थस्य च णत्व इजादेः सनुमो ग्रहणम् ॥ ३ ॥

कृत्स्थस्य च णत्वे[4] इजादेः सनुमो ग्रहणं कर्तव्यम्। सिध्यति सूत्रं तर्हि भिद्यते ॥

---

* [V. M. om. हलश्चेजुपधात् (३१)].

[1] अट्कुप्वाङ्नुम्व्यवायेपि ८. ४. २. [2] णेर्विभाषा ८. ४. ३०. [3] न भाभूपूकमिगमिप्यायीवेपाम् ८. ४. ३४. [4] कृत्यचः ८. ४. २९.

यथान्यासमेवास्तु । ननु चोक्तं सनुमो णत्वे ऽवधारणाप्रसिद्धिर्विधेयभावादिति । नैष दोषः । हल इति वर्तते । क्व प्रकृतम् । हलश्चेजुपधात् [३१] इति । तद्वै तत्रादिविशेषणमन्तविशेषणेन चेहार्थः । कथं पुनर्ज्ञायते तत्रादिविशेषणमिति । इजुपधादित्युच्यते तत्र नार्थोऽन्तविशेषणेन । तत्रादिविशेषणं सदिहान्तविशेषणं भविष्यति । कथम् । इजादेरित्युच्यते तत्र नार्थ आदिविशेषणेन ॥ अथवेजादेः सनुम इत्यत्र णेर्विभाषा [३०] इत्येतदनुवर्तिष्यते ॥*

न भाभूपूकमिगमिप्यायिवेपाम् ॥ ८ । ४ । ३४ ॥

भादिषु पूञ्ग्रहणम् ॥ १ ॥

भादिषु पूञ्ग्रहणं कर्तव्यम् । इह मा भूत् । प्रपवणं सोमस्येति ॥

ण्यन्तस्य चोपसंख्यानम् ॥ २ ॥

ण्यन्तस्य चोपसंख्यानं कर्तव्यम् । किं पूञ एव । नेत्याह । अविशेषेण । प्रभापनम् परिभापनम् ॥

षात्पदान्तात् ॥ ८ । ४ । ३५ ॥

षात्पदादिपरवचनम् ॥ १ ॥

षात्पदादिपरग्रहणं कर्तव्यम् । इहैव यथा स्यात् । निष्पानम् दुष्पानम् । इह मा भूत् । ससर्पिष्केण सयजुष्केण ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । नैवं विज्ञायते पदस्यान्तः पदान्तः पदान्तादिति । कथं तर्हि । पदेऽन्तः पदान्तः पदान्तादिति ॥

नशेः षान्तस्य ॥ ८ । ४ । ३६ ॥

नशेरशः ॥ १ ॥

नशेरश इति वक्तव्यम् । इहापि यथा स्यात् । प्रनङ्क्ष्यति परिनङ्क्ष्यति[1] ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । इह नशेः ष इतीयता सिद्धम् । सोऽयमेवं सिद्धे सति यदन्तग्रहणं करोति तस्यैतत्प्रयोजनं षान्तभूतपूर्वस्यापि यथा स्यात् ॥**

---

* [V. M. om. वा निंसनिक्षनिन्दाम् (३३)].

** [V. M. om. पदान्तस्य (३७)].

[1] व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ८. २. ३६ ; षढोः कः सि ८. २. ४१ ; मस्जिनशोर्झलि ७. १. ६०.

पदव्यवायेऽपि ॥ ८ । ४ । ३८ ॥

पदव्यवायेऽतद्धिते ॥ १ ॥

पदव्यवायेऽतद्धित इति वक्तव्यम् । इह मा भूत् । आर्द्रगोमयेण शुष्कगोमयेणेति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । नैवं विज्ञायते पदेन व्यवाये पदव्यवाय इति । कथं तर्हि । पदे व्यवायः पदव्यवायः पदव्यवाय इति ॥

क्षुम्नादिषु च ॥ ८ । ४ । ३९ ॥

अविहितलक्षणो णत्वप्रतिषेधः क्षुम्नादिषु द्रष्टव्यः ॥

स्तोः श्चुना श्चुः ॥ ८ । ४ । ४० ॥

किमर्थं तृतीयानिर्देशः क्रियते न श्चावित्येवोच्येत । आनन्तर्यमात्रे श्चुत्वं यथा स्यात् । यज्ञः राज्ञः याच्ञा ॥ अथ संख्यातानुदेशः[1] कस्मान्न भवति । आचार्यप्रवृत्तिर्ज्ञापयति संख्यातानुदेशो नेहेति यदयं शात्प्रतिषेधं शास्ति[2] ॥

ष्टुना ष्टुः ॥ ८ । ४ । ४१ ॥

किमर्थं तृतीयानिर्देशः क्रियते न ष्टावित्येवोच्येत । आनन्तर्यमात्रे ष्टुत्वं यथा स्यात् । पेष्टा लेढा ॥ अथ संख्यातानुदेशः[1] कस्मान्न भवति । आचार्यप्रवृत्तिर्ज्ञापयति नेह संख्यातानुदेशो भवतीति यदयं तोः षि [८. ४. ४३] इति प्रतिषेधं शास्ति ॥

न पदान्ताट्टोरनाम् ॥ ८ । ४ । ४२ ॥

अनामिति किम् । षण्णां भवति कश्यपः[3] ॥ अत्यल्पमिदमुच्यतेऽनामिति । अनांनवतिनगरीणां चेति वक्तव्यम् । षण्णाम् षण्णवतिः षण्णगरी ॥*

---

* [V. M. om. तोः षि (४३); शात् (४४)].

[1] यथासंख्यमनुदेशः समानाम् १. ३. १०. [2] शात् ८. ४. ४४. [3] पैप्प. सं. ४. ४०. ६.

यरोऽनुनासिकेऽनुनासिको वा ॥ ८ । ४ । ४५ ॥

यरोऽनुनासिके प्रत्यये भाषायां नित्यवचनम् ॥ १ ॥

यरोऽनुनासिके प्रत्यये भाषायां नित्यमिति च वक्तव्यम् । वाङ्मयम् । त्वङ्मयमिति ॥*

अनचि च ॥ ८ । ४ । ४७ ॥

द्विर्वचने यणो मयः ॥ १ ॥

द्विर्वचने यणो मय इति वक्तव्यम् । किमुदाहरणम् । यदि यण इति पञ्चमी मय इति षष्ठी उल्क्का वल्म्मीकमित्युदाहरणम् । अथ मय इति पञ्चमी यण इति षष्ठी दध्य्यत्र मध्व्वत्रेत्युदाहरणम् ॥

शरः खयः ॥ २ ॥

शरः खय इति वक्तव्यम् । किमुदाहरणम् । यदि शर इति पञ्चमी खय इति षष्ठी स्थ्थाली स्थ्थातेत्युदाहरणम् । अथ खय इति पञ्चमी शर इति षष्ठी वत्स्सः क्षीरम् अप्स्सरा इत्युदाहरणम् ॥

अवसाने च ॥ ३ ॥

अवसाने च द्वे भवत इति वक्तव्यम् । वाक्क् वाक् । त्वक्क् त्वक् । स्रुक्क् स्रुक् ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । नायं प्रसज्यप्रतिषेधः । अचि नेति । किं तर्हि । पर्युदासोऽयम् । यदन्यदच इति ॥

नादिन्याक्रोशे पुत्रस्य ॥ ८ । ४ । ४८ ॥

नादिन्याक्रोशे पुत्रस्येति तत्परे च ॥ १ ॥

नादिन्याक्रोशे पुत्रस्येत्यत्र तत्परे चेति वक्तव्यम् । पुत्रपुत्रादिनि ॥

वा हतजग्धपरे च ॥ २ ॥

वा हतजग्धपर इति वक्तव्यम् । पुत्रहती पुत्त्रहती । पुत्रजग्धी पुत्त्रजग्धी ॥

---

* [V. M. om. अचो रहाभ्यां द्वे (४६)].

चयो द्वितीयाः शरि पौष्करसादेः ॥ ३ ॥

चयो द्वितीया भवन्ति शरि परतः पौष्करसादेराचार्यस्य मतेन । वथ्सः ख्षीरम् अफ्सराः ॥*

उदः स्थास्तम्भोः पूर्वस्य ॥ ८ । ४ । ६१ ॥

उदः पूर्वत्वे स्कन्देश्छन्दस्युपसंख्यानम् ॥ १ ॥

उदः पूर्वत्वे स्कन्देश्छन्दस्युपसंख्यानं कर्तव्यम् । अघ्न्ये दूरमुत्कन्द ॥

रोगे चेति वक्तव्यम् । उत्कन्दको रोगः ॥**

शश्छोऽटि ॥ ८ । ४ । ६३ ॥

छत्वममि तच्छ्लोकेन तच्छ्मश्रुणेति प्रयोजनम् ॥ १ ॥

छत्वममीति वक्तव्यम् । किं प्रयोजनम् । तच्छ्लोकेन । तच्छ्मश्रुणेति[1] ॥***

झरो झरि सवर्णे ॥ ८ । ४ । ६५ ॥

सवर्णग्रहणं किमर्थम् ।

झरो झरि सवर्णग्रहणं समसंख्यप्रतिषेधार्थम् ॥ १ ॥

झरो झरि सवर्णग्रहणं क्रियते समसंख्यप्रतिषेधार्थम् । संख्यातानुदेशो[2] मा भूदिति । किं च स्यात् । इह न स्यात् । शिण्ढि पिण्ढीति ॥****

अ अ ॥ ८ । ४ । ६८ ॥

किमर्थमिदमुच्यते । अकारोऽयमक्षरसमाम्नाये विवृत उपदिष्टस्तस्य संवृतताप्रत्यापत्तिः क्रियते ॥ किं पुनः कारणं विवृत उपदिश्यते ।

---

* [V. M. om. शरोऽचि (४९); त्रिप्रभृतिषु शाकटायनस्य (५०); सर्वत्र शाकल्यस्य (५१); दीर्घादाचार्याणाम् (५२); झलां जश् झशि (५३); अभ्यासे चर् च (५४); खरि च (५५); वाऽवसाने (५६); अणोऽप्रगृह्यस्यानुनासिकः (५७); अनुस्वारस्य ययि परसवर्णः (५८); वा पदान्तस्य (५९); तोर्लि (६०)].

** [V. M. om. झयो होन्यतरस्याम् (६२)].

*** [V. M. om. हलो यमां यमि लोपः (६४)].

**** [V. M. om. उदात्तादनुदात्तस्य स्वरितः (६६); नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् (६७)].

[1] तै. सं. ५. ५. १. २ यच्छ्मश्रुणः.   [2] यथासंख्यमनुदेशः समानाम् १. ३. १०,

आदेशार्थं सवर्णार्थमकारो विवृतः स्मृतः ।
आकारस्य तथा ह्रस्वस्तदर्थं पाणिनेर अ ॥

आदेशार्थं तावत् । वृक्षाभ्याम्[1] देवदत्ता३[2] । आन्तर्यतो विवृतस्य विवृतौ दीर्घप्लुतौ यथा स्याताम् । सवर्णार्थं च । अकारः सवर्णग्रहणेनाकारमपि यथा गृह्णीयात् । आकारस्य तथा ह्रस्वः । तथा च अतिखट्वः अतिमालः इत्यत्राकारस्य ह्रस्व उच्यमानो[3] विवृतः प्राप्नोति स संवृतः स्यादित्येवमर्था प्रत्यापत्तिः ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति ।

अकारस्य प्रत्यापत्तौ दीर्घप्रतिषेधः ॥ १ ॥

अकारस्य प्रत्यापत्तौ दीर्घस्य प्रतिषेधो वक्तव्यः । खट्वा माला ॥ नैष दोषः । यथैव प्रकृतितः सवर्णग्रहणमेवमादेशतोऽपि भवितव्यं तत्रान्तर्यतो ह्रस्वस्य ह्रस्वो दीर्घस्य दीर्घो भविष्यति ॥

आदेशस्य चानण्त्वान्न सवर्णग्रहणम् ॥ २ ॥

आदेशस्य चानण्त्वात्सवर्णानां ग्रहणं न प्राप्नोति । केषाम् । उदात्तानुदात्तस्वरितानुनासिकानाम् ॥

सिद्धं तु तपरनिर्देशात् ॥ ३ ॥

सिद्धमेतत् । कथम् । तपरनिर्देशात् । तपरनिर्देशः कर्तव्यः[4] । अद इति ॥

अपर आह । अकारस्य प्रत्यापत्तौ दीर्घप्रतिषेधः । अकारस्य प्रत्यापत्तौ दीर्घस्य प्रतिषेधो वक्तव्यः । खट्वा माला । नैष दोषः । दीर्घोच्चारणसामर्थ्यान्न भविष्यति । इदं तर्हि प्रयोजनम् । वृक्षाभ्याम् प्लक्षाभ्याम्[1] । अत्रापि दीर्घवचनसामर्थ्यान्न भविष्यति । इदं तर्हि । अपि काकः श्येनायते[5] । ननु चात्रापि दीर्घवचनसामर्थ्यादेव न भविष्यति । अस्त्यन्यद्दीर्घवचने प्रयोजनम् । किम् । दधीयति मधूयति ॥ अत्रैव चैष दोष आदेशस्य चानण्त्वात्सवर्णानां ग्रहणं न प्राप्नोति । केषाम् । उदात्तानुदात्तस्वरितानुनासिकानाम् ॥ सिद्धं तु तपरनिर्देशात् । सिद्धमेतत् । कथम् । तपरनिर्देशात् । तपरनिर्देशः कर्तव्यः । अददिति ॥

---

[1] सुपि च ७. ३. १०२. [2] वाक्यस्य टेः प्लुत उदात्तः ८. २. ८२. [3] गोस्त्रियोरुपसर्जनस्य १. २. ४८. [4] तपरस्तत्कालस्य १. १. ७०. [5] अकृत्सार्वधातुकयोर्दीर्घः ७. ४. २५.

एकशेषनिर्देशाद्वा स्वरभिन्नानां भगवतः पाणिनेः सिद्धम् ॥ ४ ॥

एकशेषनिर्देशाद्वा स्वरभिन्नानां भगवतः पाणिनेराचार्यस्य सिद्धम् । एकशेषनिर्देशोऽयम् । अ अ अ इति ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्येऽष्टमस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकम् ॥ पादश्च समाप्तः ॥ 5

॥ अष्टमोऽध्यायः समाप्तः ॥

॥ इति श्रीभगवत्पतञ्जलिविरचितं व्याकरणमहाभाष्यं संपूर्णम् ॥

॥ शुभं भूयात् ॥